AGRARIAN, *a.* क्षेत्रविषयकः -का -कं, क्षेत्रिकः -की -कं, भूमिविषयकः -का -कं.

To AGREE, *v. n.* (Be in concord) सम्मन् (c. 4. -मन्यते -मन्तुं), सम्मतः -ता -तं भू.—(Assent to) स्वीकृ, अङ्गीकृ, अनुमन् (c. 4. -मन्यते -मन्तुं), अभिमन्; अनुज्ञा (c. 9. -जानाति -ज्ञातुं), अनुवद् (c. 1. -वदति -वदितुं), ग्रह् (c. 9. गृह्णाति ग्रहीतुं), उपगम् (c. 1. -गच्छति -गन्तुं).—(Settle by stipulation) सन्धा (c. 3. -धत्ते -धातुं), संविदा निष्पन्नं -न्नां -न्नं कृ.—(Be of the same mind) एकचित्तीभू, एकमतः -ता -तं भू.—(Be consistent or suitable) युज् in pass. (युज्यते).

To AGREE, *v. a.* सन्धा (c. 3. -दधाति -धत्ते -धातुं), सम्मतं -तां -तं or संविदितं -तां -तं कृ.

AGREEABLE, *a.* (Pleasant) रम्यः -म्या -म्यं, काम्यः -म्या -म्यं, सुभगः -गा -गं, अभिमतः -ता -तं, मनोज्ञः -ज्ञा -ज्ञं, सन्तोषकः -का -कं, तुष्टिकरः -री -रं.—(Suitable, comfortable) अनुरूपः -पा -पं, उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, सदृशः -शी -शं, तुल्यः -ल्या -ल्यं, अ—(To be agreeable, please) रुच् (c. 1. रोचते, रोचितुं).

AGREEABLENESS, *s.* (Consistency with) योग्यता, उपयुक्तता, अनुरूपता -ष्टं सादृश्यं.—(The quality of pleasing) रम्यत्वं, काम्यत्वं, अभिमतता—(Resemblance) तुल्यता, सदृशता.

AGREEABLY, *adv.* सुखं, अभिमतं, सुभगं, यथाभिमतं, यथासुखं.—(According to) अनुरूपं, अनुसारतस् *ind.*, योगतस् *ind.*—(Agreeable to one's nature) सत्त्वानुरूपं.

AGREED, *p. p.* संविदितः -ता -तं, सम्मतः -ता -तं, उपगतः -ता -तं, अभ्युपेतः -ता -तं, अभ्युपगतः -ता -तं, स्वीकृतः -ता -तं, अनुज्ञातः -ता -तं; 'he has agreed to a separation,' भेदम् उपगतः.

AGREEMENT, *s.* (Compact) संविद् *f.*, प्रतिज्ञानं, नियमः, संस्कारः, अङ्गीकारः, उपगमः, समयः, अभ्युपगमः, सङ्केतः, संवादः, व्यवस्था.—(Making an agreement) समयकारः.—(Breaking an agreement) समयभेदः.—(Concord) सम्मतिः *f.*, एकचित्तता, अनुवादः, ऐक्यं.—(Resemblance) सदृशता, अनुरूपता, सादृश्यं, तुल्यत्वं.

AGRICULTURE, *s.* कृषिः *f.*, कर्षणं, हलभृतिः *f.*, वैश्यक्रिया, वैश्यवृत्तिः *f.* (The science) कृषिविद्या.

AGRICULTURIST, *s.* कर्षकः, क्षेत्राजीवः, कृषकः, क्षेत्रिकः, क्षेत्री *m.* (न्), कृषिविद्याज्ञः.—(A man of the third class) वैश्यः, विट् (श्).

AGROUND, *adv.* उत्तीरस् *ind.*, तटस्थः -स्था -स्थं, सैकतस्थः -स्था -स्थं, पुलिनस्थः -स्था -स्थं.

AGUE, *s.* कम्पज्वरः.—(A tertian ague) तृतीयकः, तृतीयकज्वरः.—(A quartan) चातुर्थकः.

AGUE-FIT, *s.* कम्पज्वराक्रमः.

AGUISH, *a.* कम्पज्वरशीलः -ला -लं, कम्पज्वरस्वभावः -वा -वं.

AH, *interj.* आ, आस्, हन्त, हा, अहो, अहह.

AHEAD, *adv.* अग्रे, अग्रतस् *ind.*, पुरस् *ind.*, पुरतस् *ind.*—(Headlong) अधोमुखं.

AJAR, *adv.* अर्द्धविवृतः -ता -तं, अर्द्धोद्घट्टितः -ता -तं.

AID, *s.* साहाय्यं, उपकारः, उपकृतं, साहित्यं, शरणं, उपग्रहः.—(An assistant) सहायः, उपकारकः, उत्तरसाधकः.

To AID, *v. a.* उपकृ (c. 8. -करोति -कर्त्तुं), उपचर् (c. 1. -चरति -चरितुं), उपग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), साहाय्यं कृ, अभिरक्ष् (c. 1. -रक्षति -रक्षितुं).

AIDED, *p. p.* उपकृतः -ता -तं, कृतोपकारः -रा -रं.

AIDE-DE-CAMP, *s.* परिधिस्थः, सेनापतिसहायः, सेनापत्याज्ञावहः.

AIDER, *s.* सहायः, साहाय्यकर्त्ता *m.* (र्त्तृ), उपकारकः.

AIDLESS, *a.* साहाय्यरहितः -ता -तं, उपकारहीनः -ना -नं, असहायः -या -यं.

To AIL, *v. a.* (To give pain) पीड् (c. 10. पीडयति -यितुं).—(To be ailing) ईषद्रोगेण or क्षुद्ररोगेण, पीड् in pass. (पीड्यते).

AIL or AILMENT, *s.* ईषद्रोगः, ईषद्व्याधिः *m.*, क्षुद्ररोगः, क्षुद्रव्याधिः *m.*

AILING, *a.* रोगी -गिणी -गि (न्), क्षुद्ररोगपीडितः -ता -तं, व्याधितः -ता -तं.

To AIM, *v. a.* and *n.* (As at a mark) अभिसन्धा (c. 3. -दधाति -धातुं), उद्दिश् (c. 6. -दिशति -देष्टुं) with acc.; as, 'aiming at him,' तमुद्दिश्य; लक्षीकृ.—(Endeavour after) आप् in des. (ईप्सति ईप्सितुं), अभ्याप्; सेव् (c. 1. सेवते सेवितुं), उपसेव् निषेव्; समाचर् (c. 1. -चरति -चरितुं); काङ्क्ष् (c. 1. काङ्क्षति काङ्क्षितुं), आकाङ्क्ष्, अनुकाङ्क्ष्.—(To direct the weapon) अभिसन्धा, लक्ष्यं प्रति अस्त्रं क्षिप् (c. 6. क्षिपति, क्षेप्तुं).

[illegible]M, *s.* (The point to which a missive weapon is thrown) लक्षं, लक्ष्यं, बाणलक्ष्यं, शरव्यं.—(The direction of the weapon) [illegible]सन्धानं.—(A purpose, design) अभिप्रायः, चिकीर्षितं, आशयः, काङ्क्षा, वाञ्छा.—(Conjecture) अनुमानं.

[illegible]IMLESS, *a.* असन्धानः -ना -नं, सन्धानरहितः -ता -तं, अलक्ष्यः -क्ष्या -क्ष्यं.

[illegible]IR, *s.* आकाशः, वायुः *m.*, नभः *n.* (स्), विहायः *n.* (स्), समीरणः, समिरः.—(Air in motion) वायुः, वातः, समीरणः.—(In music) तालः, मूर्च्छना, निशारुकं.—(Appearance) रूपं, आकारः, आकृतिः *f.*—(Gesture, mien) गतिः *f.*, वदनं, रीतिः *f.*—(Manner) विधिः *m.*, प्रकारः, रूपं.—(Scent, vapour) वासः, वाष्पः, गन्धः; 'aloft in air,' विहायसा *ind.*; 'to build castles in the air,' गगनकुसुमानि कृ.

To AIR, *v. a.* (To expose to the air) वायुव्याप्यं -प्यां -प्यं कृ.—(To dry) शुष् in caus. (शोषयति -यितुं), शुष्कीकृ, निर्जलं -लां -लं कृ.

AIR-BALLOON, *s.* आकाशयानं, व्योमयानं, आकाशवर्त्मना गमनार्थं विमानं.

AIR-BLADDER, *s.* (Any cuticle filled with air) वायुकोषः, अनिलपूरिता नाडिः

AIR-BORN, *a.* वायुजः -जा -जं, आकाशजः -जा -जं.

AIR-GUN, *s.* शरादिप्रासनार्थं वायुपूरितं यन्त्रं.

AIR-HOLE, *s.* वातायनं, गवाक्षः, जालं, वायुच्छिद्रं, वायुपथः.

AIRING, *s.* वायुसेवनं, विहारः, वायुहेतोः परिक्रमः.

AIR-PUMP, *s.* वायुप्रक्षेपको नालः.

AIR-SHAFT, *s.* आकरे वायुगमनार्थं पथः or छिद्रं.

AIRY, *a.* (Composed of air) वायुमयः -यी -यं, आकाशीयः -या -यं, वैहायसः -सी -सं.—(Open to the air) वायुव्याप्यः -प्या -प्यं.—(Wanting reality, vain, empty) शून्यः -न्या -न्यं, लघुः -घुः -घ्वी -घु, अवास्तवः -वी -वं, असारः -रा -रं, चञ्चलः -ला -लं, वायुसमः -मा -मं.

AISLE, *s.* (A path in a church) पूजाशालाभ्यन्तरे पथः.

AKIN, *a.* (Allied by blood, used of persons) स्वगोत्रजः -जा -जं, स्वजातीयः -या -यं.—(Used of things) सम्बन्धी -न्धिनी -न्धि (न्), सम्पर्कीयः -या -यं.

ALABASTER, *s.* श्वेतप्रस्तरविशेषः.

ALACK, *interj.* (Alas!) कष्टं, आस्, हा, हन्त, अहह, हाहा, हाहो.

ALACRITY, *s.* लाघवं, चञ्चलत्वं, सोद्यमत्वं, शीघ्रत्वं, अविलम्बत्वं, क्षिप्रता.

ALAMODE, *adv.* व्यवहारानुरूपं, रीत्यनुसारेण.

ALARM, *s.* (Fright) त्रासः, भयं, साध्वसं, शङ्का, भयप्रस्तावः.—(A cry by which soldiers are summoned to arms) सान्नहनिकं, युद्धाय योधाह्वानं.—(Alarm-cry in general) भयध्वनिः *m.*

To ALARM, *v. a.* भी in caus. (भाययति -यितुं or भीषयति -ते), त्रस् in caus. (त्रासयति -यितुं), वित्रस्, सन्त्रस् in caus.

ALARMED, *p. p.* भीतः -ता -तं, भयार्त्तः -र्त्ता -र्त्तं, चकितः -ता -तं, शङ्कितः -ता -तं, भीषितः -ता -तं.

ALARM-BELL, *s.* भयसूचका घण्टा, शत्रोर् आगमनसमये वाद्यते या घण्टा.

ALARMING, *a.* भयङ्करः -रा -रं, भयानकः -का -कं, त्रासजनकः -का -कं, भयदः -दा -दं.

ALARMIST, *s.* भयोत्पादकः, भयकारकः.

ALARM-POST, *s.* भयसमये सैन्यसमागमार्थं निरूपितस्थानं.

ALARUM, *s.* सान्नहनिकं, भयध्वनिः *m.*, निरूपितसमये निद्रालसं प्रबोधयति या घटी.

ALAS, *interj.* कष्टं, आ, आस्, हा, हन्त, अहह, अहोवत्.

ALB, *s.* (A white garment worn by priests) धर्म्माध्यापकैर् भृतः श्वेतवस्त्रविशेषः.

ALBATROSS, समुद्रीयपक्षिविशेषः, दक्षिणसमुद्रसेवी पक्षी.

ALBEIT, *adv.* तथापि, यद्यपि.

ALBION, *s.* श्वेतद्वीपः.

ALBUGINEOUS, *a.* अण्डशुक्लांशोपमः -मा -मं.

ALBUGO, *s.* शुक्लं, चक्षूरोगः, शुक्लमण्डलरोगः.

ALBUM, *s.* विशिष्टश्लोकरक्षार्थं पुस्तकं.

ALCHYMICAL, *a.* रसायनविद्याविषयकः -का -कं, रसायनजः -जा -जं.

ALCHYMIST, *s.* रसज्ञः, रसायनविद्याज्ञः, रससिद्धः.

ALCHYMY, *s.* रसायनविद्या, रसायनं, रससिद्धिः *f.*

ALCOHOL, *s.* मद्यसारः.—(Impalpable powder) सूक्ष्मभस्म *f.* (न्).

ALCOVE, *s.* कुञ्जः, कुञ्जकुटीरः, पर्णशाला, पल्लवशाला, निभृतस्थानं.

ALDER, *s.* वृक्षविशेषः.

ALDERMAN, *s.* पुराध्यक्षः, नगरस्य प्रधानपुरुषः, मान्यपदस्थः, पौरजनः, वृद्धः, वृद्धजनः, गुरुजनः.

ALDERMANLY, *adv.* वृद्धजनवत् *ind.*, गुरुजनवत् *ind.*, गुरुजनप्रकारेण.

ALE, *s.* यवसुरं, यवनिर्म्मितो मद्यविशेषः.

ALE-HOUSE, *s.* यवसुरालयः, यवसुरस्थानं.

ALE-HOUSE-KEEPER, *s.* यवसुरविक्रयी *m.* (न्), शौण्डिकः.

ALEMBIC, *s.* वकः, वकयन्त्रं, काचवकयन्त्रं, मुषा, द्रवद्रव्यसारनिर्हारार्थं मुषा.

ALERT, *a.* त्वरितः -ता -तं, क्षिप्रः -प्रा -प्रं, उद्यमी -मिनी -मि (न्), उद्योगी -गिनी -गि (न्), स्ववहितः -ता -तं, अतन्द्रः -न्द्रा -न्द्रं.

ALERTNESS, *s.* क्षिप्रता, अतन्द्रता, सत्वरता, सोद्योगत्वं.

ALGEBRA, *s.* बीजगणितं, गणनाविद्या.

ALGEBRAICAL, *a.* बीजगणितविषयकः -का -कं, गणनाविद्यासम्बन्धी -न्धिनी -न्धि (न्).

ALGID, *a.* शीतः -ता -तं, शीतलः -ला -लं, शिशिरः -रा -रं, हिमवान् -वती -वत् (त्).

ALIEN, *s.* (A foreigner) विदेशी *m.* (न्), विदेशीयः, भिन्नजातीयः.

ALIEN, *a.* अन्यदेशीयः -या -यं, विदेशीयः -या -यं, पारक्यः -क्या -क्यं.—(Estranged from) विरक्तः -क्ता -क्तं.—(Adverse to) विरुद्धः -द्धा -द्धं, विपरीतः -ता -तं, भिन्नः -न्ना -न्नं.

ALIENABLE, *a.* विच्छेदनीयः -या -यं, विभेद्यः -द्या -द्यं.—(Alienable property) पराधीनं कर्त्तुं शक्यते यद् द्रव्यं.

To ALIENATE, *v. a.* (To withdraw the affections) विरञ्ज् in caus. (-रञ्जयति -यितुं).—(To transfer property) द्रव्याधिकारित्वं पराधीनं or परवशं कृ, or परस्वत्वे प्रतिपद् in caus. (-पादयति -यितुं).

ALIENATE, *a.* विभिन्नः -न्ना -न्नं, विरक्तः -क्ता -क्तं, विच्छिन्नः -न्ना -न्नं, पराधीनः -ना -नं.

ALIENATED, *p. p.* विरक्तः -क्ता -क्तं. *See* ALIENATE.

ALIENATION, *s.* (Coldness of affection) विरागः, विरक्तिः *f.*, वैरक्त्यं.—(Transferring of property) स्वस्वत्वत्यागानन्तरं परस्वत्वापादनं.

To ALIGHT, *v. n.* अवतॄ (c. 1. -तरति -तरितुं -तरीतुं), उपविश् (c. 6. -विशति -वेष्टुं), निपत् (c. 1. -पतति -पतितुं).

ALIGHTED, *p. p.* अवतीर्णः -र्णा -र्णं, उपविष्टः -ष्टा -ष्टं, निपतितः -ता -तं.

ALIKE, *a.* सदृशः -शी -शं, तुल्यः -ल्या -ल्यं, समानः -ना -नं, एकप्रकारः -रा -रं, तुल्यरूपः -पी -पं, तुल्याकृतिः -तिः ति.

ALIMENT, *s.* आहारः, भोजनं, भक्ष्यं, भोज्यं, अन्नं, खाद्यं, पौष्टिकं.

ALIMENTAL OR ALIMENTARY, *a.* पौष्टिकः -की -कं, पोषकः -का -कं, पुष्टिदः -दा -दं, प्रतिपालकः -का -कं, भरणशीलः -ला -लं.

ALIMENTARINESS, *s.* पोषकत्वं, प्रतिपालकत्वं, भरिमा *m.* (न्), भरणशीलता.

ALIMENTATION, *s.* पोषणं, भरणं, प्रतिपालनं, पुष्टिः *f.*

ALIMONY, *s.* स्त्रीपुरुषविभेदसमये यो धनस्य न्यायाज्ञो भार्य्यायै दीयते.

ALIVE, *a.* जीवन् -वन्ती -वत् (त्), वर्त्तमानः -ना -नं, सजीवः -वा -वं, सचेतनः -ना -नं, आयुष्मान् -ष्मती -ष्मत् (त्).—(Cheerful, sprightly) त्वरितः -ता -तं, अतन्द्रः -न्द्रा -न्द्रं, चञ्चलः -ला -लं.

ALKALI, *s.* सर्ज्जिका, सर्ज्जिः *f.*, क्षारः, सर्ज्जिकाक्षारः, यवक्षारः, गोगवाही *m.* (न्).

ALKALINE, *a.* क्षारस्वभावः -वा -वं, क्षारविशिष्टः -ष्टा -ष्टं, सर्ज्जियुक्तः -क्ता -क्तं.

ALL, *a.* सर्व्वः -र्व्वा -र्व्वं, विश्वः -श्वा -श्वं, कृत्स्नः -त्स्ना -त्स्नं, निखिलः -ला -लं, अखिलः -ला -लं, समस्तः -स्ता -स्तं, सकलः -ला -लं.

ALL, *s.* (The whole) सर्व्वं, कार्त्स्न्यं, कार्त्स्न्यं, साकल्यं; 'In all, altogether,' सर्व्वशस्, साकल्येन, कृत्स्नशस्; 'not at all,' न कथञ्चन, न मनाक्; 'at all times,' सर्व्वदा; 'all but,' प्रायस् *ind.*, प्रायशस्, ईषदूनः -ना -नं; 'all of a sudden,' अकस्मात्; 'all I can,' यथाशक्ति *ind.*, यथाबलं, यथासामर्थ्यं; 'all around,' सर्व्वतस्, समन्ततस्, परितस्, चतुर्दिक्षु; 'by all means,' सर्व्वथा; 'all at once,' युगपत् *ind.*, 'most of all,' भूयिष्ठं, विशेषतस्; 'all hail,' नमस् *ind.*

ALL-ATONING, *a.* सर्व्वपापनाशकः -का -कं, सर्व्वपापशोधकः -का -कं.

ALL-BEARING, *a.* सर्व्वसहः -हा -हं.—(Omniparous) सर्व्वप्रसवी -विनी -वि (न्).

ALL-CONQUERING, *a.* सर्व्वजयी -यिनी -यि (न्), सर्व्वदमनः -ना -नं, सर्व्वन्दमः -ना -नं.

ALL-GLORIOUS, *a.* सर्व्वतेजोमयः -यी -यं, सर्व्वप्रतापवान् -वती -वत् (त्).

ALL-KNOWING, *a.* सर्व्वज्ञः -ज्ञा -ज्ञं, सर्व्ववेदी -दिनी -दि (न्).

ALL-LOVING, *a.* सर्व्वप्रियः -या -यं, सर्व्वहितैषी -षिणी -षि (न्).

ALL-MATURING, *a.* सर्व्वपाचकः -का -कं, सर्व्वपाचनशीलः -ला -लं.

ALL-PENETRATING, *a.* सर्व्वभेदकः -का -कं, सर्व्वप्रवेशकः -का -कं.

ALL-PERVADING, सर्व्वगतः -ता -तं, सर्व्वव्यापी -पिनी -पि (न्), सर्व्वत्रगः -गा -गं.

ALL-SEEING, *a.* सर्व्वदर्शी -र्शिनी -र्शि (न्), सर्व्वद्रष्टा -ष्ट्री -ष्टृ (ष्टृ).

ALL-SUFFICIENCY, *n.* सर्व्वशक्तिता, सर्व्वसामर्थ्यं.

ALL-SUFFICIENT, सर्व्वसमर्थः -र्था -र्थं, सर्व्वशक्तिमान् -मती -मत् (त्).

ALL-WISE, *a.* सर्व्वज्ञः -ज्ञा -ज्ञं, सर्व्ववित् *m. f. n.*, सर्व्ववेदी -दिनी -दि (न्). सर्व्वज्ञानमयः -यी -यं.

To ALLAY, *v. a.* (To mitigate) शम् in caus. (शमयति -यितुं), प्रशम् उपशम्; शान्त्व् or सान्त्व् (c. 10. शान्त्वयति -यितुं) अभिशान्त्व् परिशान्त्व्; तुष् in caus. (तोषयति -यितुं).—(To mix one metal with another) धातुं धातुना मिश्र् (c. 10. मिश्रयति -यितुं); सुवर्णं रूप्यं वा कुप्येन मिश्र्.

ALLAY OR ALLAYMENT, *s.* (Mitigation) शान्तिः *f.*, प्रशमनं, प्रशान्तिः *f.*, सान्त्वनं; 'allayment of fear,' भयोपशमः; 'allayment of hunger,' क्षुत्प्रतीकारः.—(Mixture of base metal) कुप्यसम्पर्कः.

ALLAYED, *p. p.* प्रशान्तः -न्ता -न्तं, उपशान्तः -न्ता -न्तं, प्रशमितः -ता -तं.

ALLAYER, *s.* शमकः, शान्तिकरः, शान्तिकर्त्ता *m.* (र्त्तृ), शान्तिदः.

ALLEGATION, *s.* (Affirmation) वचनं, अभियोगः, वाक्यं, अभिधानं.—(False allegation) मिथ्याभिशंसनं.—(Excuse, plea) छद्म *n.* (न्), उपदेशः, व्यपदेशः.

To ALLEGE, *v. a.* (To affirm, declare) वद् (c. 1. वदति, वदितुं), तथेति ब्रू (c. 2. ब्रवीति ब्रूते वक्तुं).—(To plead as an excuse) छद्म कृ, व्यपदिश् (c. 6. -दिशति -देष्टुं), मिथ्या वद्.

ALLEGEABLE, *a.* वचनीयः -या -यं, वदनीयः -या -यं, कथनीयः -या -यं.

ALLEGIANCE, *s.* भक्तिः *f.*, अनुरागः, वशीभूतत्वं, अधीनत्वं.

ALLEGIANT, *a.* भक्तिमान् -मती -मत् (त्), अनुरागी -गिणी -गि (न्).

ALLEGORICAL, *a.* रूपकमयः -यी -यं, दृष्टान्तरूपः -पी -पं, लाक्षणिकः -की -कं, अ

ALLEGORICALLY, *adv.* दृष्टान्ततस् *ind.*, लाक्षणिकप्रकारेण, रूपकप्र

To ALLEGORISE, *v. a.* दृष्टान्तीकृ, दृष्टान्तय् (*nom.* दृष्टान्तयति -ष्टा -ष्टं, लाक्षणिकप्रकारेण वद् (c. 1. वदति, वदितुं).

ALLEGORY, *s.* रूपकं, दृष्टान्तः, उदाहरणं, लाक्षणिकवाक्यं, युक्तिः *f.*, हृदय

ALLEGRO, *adv.* त्वरितं, क्षिप्रं, शीघ्रं.

To ALLEVIATE, *v. a.* शम् in caus. (शमयति -यितुं), प्रशम्, उपशम्; शान्त्व् or सान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, उपसान्त्व्, परिशान्त्व्, लघ् (*nom.* लघयति -यितुं), उद्धृ (c. 1. -हरति -ते -हर्त्तुं), लघूकृ.

ALLEVIATED, *p. p.* प्रशमितः -ता -तं, प्रज्ञानः -ना -नं, उपशान्तः -न्ता -न्तं, लघूकृतः -ता -तं.

ALLEVIATION, *s.* शान्तिः *f.*, प्रशमनं, प्रज्ञानिः, उपशमः, लघूकरणं लाघवं.

ALLEVIATIVE, *a.* (Giving alleviation) शान्तिदः -दा -दं, शमकरः -रा -रं, शमकः -का -कं.

ALLEY, *s.* (A narrow passage) सङ्कटपथः, सङ्कीर्णपथः, सङ्कुचितवीथिः *f.*—(A walk in a garden) उद्यानपथः.

ALLIANCE, *s.* (League) सन्धिः *m.*, साहित्यं, संयोगः, सार्द्धं, सहायता, ऐक्यं.—(Relation by marriage, &c.) सम्बन्धः, ज्ञातिसम्पर्कः; 'offensive and defensive alliance,' परस्परोपकारः.

ALLIED, *p. p.* सन्धितः -ता -तं, सहितः -ता -तं, सम्बद्धः -द्धा -द्धं, संयुक्तः -क्ता -क्तं.

To ALLIGATE, *v. a.* सम्बन्ध् (c. 9. -बध्नाति -बन्धुं or caus. -बन्धयति -यितुं), अनुबन्ध्, आबन्ध्.

ALLIGATION, *s.* (Tying together) सन्धानं, सम्बन्धनं, संयोजनं.—(Rule in arithmetic) सम्मिश्रद्रव्याणां मूल्यं निरूपयति यो गणनाविधिः, अर्घसंख्यापनं.

ALLIGATOR, *s.* नक्रः, ग्राहः, कुम्भीरः.

ALLITERATION, *s.* अनुप्रासः.

ALLODIAL, *a.* अनधीनः -ना -नं, अनायत्तः -त्ता -त्तं, स्वाधीनः -ना -नं.

To ALLOO, *v. a.* (Set on by crying alloo) हे है इत्यादिशब्दैः कुक्कुरान् प्रचुद् (caus. -चोदयति -यितुं).

To ALLOT, *v. a.* (Distribute by lot) विभज् (c. 1. -भजति -ते -भक्तुं), प्रविभज्; क्यंस् (c. 10. -कंसयति -यितुं), कंश् (c. 10. कंशयति -यितुं), विन्यस् (c. 4. -अस्यति -असितुं), व्यस्; कॢप् (c. 10. कल्पयति -यितुं), परिकॢप्.—(To grant) प्रदा (c. 3. -ददाति -दातुं).

ALLOTMENT, *s.* (Distributing by lot) विभागः, कंशनं, विभागकल्पना.—(The portion granted) कंशः, भागः, विभागः.

To ALLOW, *v. a.* अनुज्ञा (c. 9. -जानाति -ज्ञातुं), अभ्यनुज्ञा; अनुमन् (c. 4. -मन्यते -मन्तुं), सह् (c. 1. सहते सोढुं), विसह्, अनुमुद् (c. 1. -मोदते -मोदितुं).—(To admit an argument) ग्रह् (c. 9. गृह्णाति ग्रहीतुं).—(To allow wages) वर्त्तनं दा or अनुदा (c. 3. -ददाति -दातुं).—(To abate) उद्धारं कृ, न्यूनीकृ.

ALLOWABLE, *a.* धर्म्यः -र्म्या -र्म्यं, अनुज्ञेयः -या -यं, अनुज्ञातव्यः -व्या -व्यं, स्वीकरणीयः -या -यं, अनुज्ञायोग्यः -ग्या -ग्यं, दातव्यः -व्या -व्यं.—(Admissible) ग्राह्यः -ह्या -ह्यं, गृह्यः -ह्या -ह्यं, प्रगृह्यः -ह्या -ह्यं.

ALLOWANCE, *s.* अनुज्ञा, अनुमतिः *f.*—(Stipulated pay) वर्त्तनं, वेतनं, निरूपितमूल्यं, परिमितमूल्यं.—(Abatement) उद्धारः, न्यूनीकरणं.

ALLOWED, *p. p.* अनुज्ञातः -ता -तं, अभ्यनुज्ञातः -ता -तं, अनुमतः -ता -तं.

ALLOY, *s.* अपद्रव्यं, कुप्यं, कूटरूपं, अल्पमूल्यको धातुः, दूषणं, दोषः, मलं.—(Abatement, impairment) न्यूनता, क्षयः, विघ्नः.

ALLOYED, *p. p.* दूषितः -ता -तं, दुष्टः -ष्टा -ष्टं.

To ALLUDE, *v. n.* (Hint at) उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्, सूच् (c. 10. सूचयति -यितुं), इङ्गं or इङ्गितं or सङ्केतं कृ, स्मृ in caus. (स्मारयति -यितुं), प्रबुध् in caus. (-बोधयति -यितुं).

ALLUDED, *p. p.* उद्दिष्टः -ष्टा -ष्टं, सूचितः -ता -तं, स्मृतः -ता -तं.

ALLURE, *v. a.* आकृष् (c. 1. -कर्षति or c. 6. -कृषति -क्रष्टुं), समाकृष्; प्रलुभ् in caus. (-लोभयति -यितुं).

ALLURED, *p. p.* आकृष्टः -ष्टा -ष्टं or आकर्षितः -ता -तं, प्रलोभितः -ता -तं.

ALLUREMENT, *s.* प्रलोभनं, आकर्षणं, विलोभनं, वशनं, भोगः.

ALLURING, *a.* आकर्षकः -का -कं, आकर्षी -र्षिणी -र्षि (न्), प्रलोभकः -का -कं, वशकः -का -कं.

ALLURINGLY, *adv.* प्रलोभनपूर्वकं, प्रलोभनेन, आकर्षकप्रकारेण.

ALLUSION, *s.* (Hint) इङ्गं, इङ्गितं, सङ्केतः, आकारः.—(Allusion to) उद्देशः, सूचनं.—(In allusion to) उद्दिश्य, समुद्दिश्य.

ALLUSIVE, *a.* उद्देशकः -का -कं, सूचकः -का -कं.

ALLUVION, *s.* पुलिनं, नदीरयेण or जलप्रवाहेण समानीता मृत्तिका.

ALLUVIOUS, *a.* नदीरयेण समानीतः -ता -तं, पुलिनमयः -यी -यं.

ALLY, *s.* सहायः, सहकारी *m.* (न्), मित्रं, सुहृद् *m.*, परस्परोपकारी *m.* (न्), सम्बन्धी *m.* (न्).

To ALLY, *v. a.* सन्धा (c. 3. -दधाति -धत्ते -धातुं), सम्बन्ध् (caus. -बन्धयति -यितुं), संयुज् (c. 10. -योजयति -यितुं), संश्लिष् in caus. (-श्लेषयति -यितुं).

ALMANAC, *s.* पञ्जिका, पञ्जिः *f.*

ALMANAC-MAKER, *s.* पञ्जीकरः, पञ्जिकारचकः.

ALMIGHTINESS, *s.* सर्वशक्तित्वं, सर्वसामर्थ्यं.

ALMIGHTY, *a.* सर्वशक्तिमान् -मती -मत् (त्), सर्वसमर्थः -र्था -र्थं, सर्वशक् *m. f. n.*, अमितौजाः -जाः -जः (स्).

ALMOND, *s.* पारसीकजनेर् वादामित् अभिधीयते यत् फलं.

ALMONER, *s.* दानधर्मे नियुक्तः, भिक्षावितरणे अधिकृतः, दरिद्रेषु यद् धनं दातव्यं तद्वितरणे अधिकृतः.

ALMONRY, *s.* दानधर्मे नियुक्तस्य गृहं, भिक्षावितरणशाला.

ALMOST, *adv.* प्रायस्, प्रायशस्, भूयिष्ठं, ईषदूनः -ना -नं, कल्पः affixed.—(Somewhat less) ईषदूनं, यत् किञ्चिन् न्यूनं; 'almost four,' उपचतुराः *m. pl.*; 'almost every person,' प्रायः सर्वजनः; 'almost dead,' मुमूर्षुः or मृतप्रायः or मृतकल्पः; 'almost finished,' समाप्तभूयिष्ठः; 'seven days being almost ended,' सप्तसु दिनेषु समाप्तकल्पेषु.

ALMS, *s.* भैक्षं, भैक्ष्यं, भिक्षा, भिक्षार्थं, दानं; 'to beg alms,' भिक्ष् (c. 1. भिक्षते भिक्षितुं), भैक्षं चर् (c. 1. चरति, चरितुं), भिक्षाटनं कृ.

ALMS-BOX, *s.* भिक्षापात्रं, दानाधारः.

ALMS-GIVER, *s.* भिक्षादाता *m.* (तृ), दरिद्रपोषकः.

ALMS-GIVING, *s.* दानधर्मः, दानकार्यं, भिक्षादानं, दरिद्रपोषणं.

ALMS-HOUSE, *s.* दरिद्रपोषणशाला, भिक्षावितरणशाला.

ALMS-MAN, *s.* भिक्षाचरः, भिक्षुकः, भिक्षाजी *m.* (न्), भिक्षोपजीवी *m.* (न्).

ALOE, *s.* (The plant) कुमारी, सहा, स्थूलदला.—(A precious wood) अगुरुः, अगुरुकाष्ठं.

ALOFT, *adv.* ऊर्द्धं, उपरि, उपरिष्टात्, उच्चैः.—(In air) विहायसा.

ALONE, *a.* एकान्तः -न्ता -न्तं, एकः -का -कं, एकाकी -किनी -कि (न्), निभृतः -ता -तं, केवलः -ला -लं, केवली -लिनी -लि (न्), अद्वितीयः -या -यं.—(Only) केवलं, मात्रं.

ALONG, *prep.* (At length, all along the side of) अनु prefixed to the acc. c. neuter; as, 'along the Ganges,' अनुगङ्गं; 'along the bank,' अनुकूलं.—(Forward) अग्रे, पुरस् *ind.*, पुरस्तात्.—(Along with) सह, सार्द्धं, सहितः -ता -तं.—(All along, from first to last) प्रथमावयवः प्रभृति शेषपर्य्यन्तं, सर्वत्र.—(Along-side) पार्श्वतस् *ind.*

ALOOF, *adv.* दूरे, कियद्दूरे, ईषद्दूरे, अन्तरे, निभृतं, पृथक्.—(Standing aloof) दूरस्थः.

ALOUD, *adv.* प्रकाशं, उच्चैस् *ind.*, उच्चकैस्, प्रोच्चैस्, उच्चैःस्वरेण, महानादेन, उच्चैस्तराम् *ind.*, मुक्तकण्ठं.

ALPHABET, *s.* वर्णमाला, वर्णक्रमः, अक्षरविन्यासः, वर्णसङ्घाटः.

ALPHABETICAL, *a.* वर्णक्रमानुसारी -रिणी -रि (न्), वर्णमालाश्रेण्यनुरूपः -पा -पं.

ALPHABETICALLY, *adv.* वर्णक्रमानुसारतस् *ind.*, वर्णमालाश्रेण्यनुरूपं.

ALREADY, *adv.* (Some time ago) तत्पूर्वं, पूर्वं, पुरा, पूर्वकाले, प्राग् वर्त्तमानकालात्.—(At the present time) तत्क्षणे, सम्प्रति, तत्काले.

so, *adv.* च, चैव, अपिच, एवं, अपरञ्च, पुनरपि, पुनश्च.—(In like manner) सदृश् *ind.*, तद्वत्, तथाकारे.

-TAR, *s.* चेतः, आयतनं, वेदिः *m.* or -दी *f.*, भवनं, यज्ञवेदिः, स्थण्डिलं.

AND ALTER, *v. a.* अन्यथा कृ, अन्यरूपं -पां -पं कृ, अन्यप्रकारं -रां -रं कृ.

AN, विपरिवृत् (c. 1. -वर्तते -वर्तितुं), परिवृत् in caus. (-वर्तयति -यितुं).—(To alter for the worse) विकृ (c. 8. -कुरुते -कर्तुं), विरूप् (c. 10. -रूपयति -यितुं).

To ALTER, *v. n.* अन्यथा or अन्यरूपः -पा -पं or अन्यप्रकारः -रा -रं भू.—(For the worse) विकृ (c. 8. -कुरुते).—(To alter in mind and feelings) विमनीभू.

LTERABLE, *a.* विकार्यः -र्या -र्यं, अन्यथा करणीयः -या -यं, विकारशीलः -ला -लं, परीवर्त्तनीयः -या -यं, परिणामयोग्यः -ग्या -ग्यं.

LTERAGE, *s.* (The fostering of a child) बालकपोषणं, पुत्रप्रतिपालनं.

LTERATION, *s.* विकारः, विक्रिया, विकृतिः *f.*, परिवर्त्तः, परीवर्त्तनं, अन्यथाभावः, वैकृतं.

LTERATIVE, *a.* विकारी -रिणी -रि (न्), परिवर्त्तकः -का -कं, परिणामकरः -रा -रं.

To ALTERCATE, *v. n.* विवद् (c. 1. -वदते -वदितुं), व्यवकुश् (c. 1. -कोशति -कोष्टुं).

ALTERCATION, *s.* विप्रलापः, व्यवक्रोशनं, व्यवभाषी *f.*, वादानुवादः, विवादः, रूक्षप्रत्युत्तरं, वाक्यविरोधः, वाग्युद्धं, वाक्कलहः.

ALTERED, *p. p.* विकृतः -ता -तं, वैकृतः -ता -तं, अन्यरूपः -पा -पं, अन्यथा कृतः -ता -तं, कृतविक्रियः -या -यं.—(In mind) विमनीकृतः -ता -तं.

ALTERNATE, ALTERNATELY, *adv.* विपर्य्ययेण, वारं वारं, अन्योन्यं, परस्परात्, परस्परम्, परिवृत्तः 'alternate sleeping and waking,' पर्य्यायशयनं.

To ALTERNATE, *v. a.* परिवृत् in caus. (-वर्तयति -यितुं), विधू (c. 1. -धूनति -धोतुं).

To ALTERNATE, *v. n.* परिवृत् (c. 1. -वर्तते -वर्तितुं).

ALTERNATION, *s.* विपर्य्ययः, पर्य्यायः, परिवर्त्तनं, परिवृत्तिः *f.*—(Alternation of employment or duty) कर्म्मविपर्य्ययः.

ALTERNATIVE, विकल्पः, अनुकल्पः, पाक्षिकः, पक्षः, वार्य्यः.—(In grammar) विभाषा *f.*

ALTHOUGH, *conj.* यद्यपि. 'Although' is sometimes expressed by the potential mood of the verb; as, 'although it be not,' न भवेत्.—(Notwithstanding) तथापि, किन्तु.

ALTILOQUENCE, *s.* गर्व्वितवाक्यं, वाग्गर्व्वोक्तिः *f.*

ALTISONANT, *a.* उच्चैःस्वरकारी -रिणी -रि (न्), महास्वनः -ना -नं.

ALTIVOLANT, *a.* उच्चैर् उड्डीयमानः -ना -नं, उच्चैर् गतिगः -गा -गं.

ALTITUDE, *s.* उच्चत्वं, उच्छ्रितिः *f.*, उच्छ्रायः, उन्नतता, उत्सेधः.—(Superiority) प्रधानत्वं.

ALTOGETHER, *adv.* सर्व्वथा, सर्व्वैस्, *ind.*, सम्यक्, अशेषतस्, *ind.*, अशेषेण, कृत्स्नशस्, *ind.*, अखिलेन, साकल्येन, कात्स्न्येन.—(Conjunctly) सम्, एकचित्तीभूय *ind.*, सहितः -ता -तं, संहतः -ता -तं.

ALUM, *s.* स्फटी, लवणविशेषः.

ALUMINOUS, *a.* स्फटीयः -यी -यं, स्फटीसम्बन्धी -न्धिनी -न्धि (न्).

ALWAYS, *adv.* सर्व्वदा, सदा, सततम्, नित्यदा, अनिशं, अनवरतं, निरन्तरं, सर्व्वत्रगे.

AMAIN, *adv.* (Violently) प्रसभं, प्रसह्य, बलात्, बलवत् *ind.*—(With impetuosity) सवेगं, वेगात् *ind.*, सवेगं.

AMALGAM, *s.* धात्वं.

To AMALGAMATE, *v. n.* सवेग धातून् मिश्र् (c. 10. मिश्रयति -यितुं).—(To unite together) संयुज् (c. 10. -योजयति -यितुं), संश्लिष् in caus. (-श्लेषयति -यितुं), संहन् (c. 2. -हति -हन्तुं), एकीकृ.

AMALGAMATION, *s.* (Of metals) धातुमिश्रणं, योगः.—(Junction) संश्लेषः, संयोजनं.

AMANUENSIS, *s.* लेखकः, लिपिकारः, यद् अन्येन वाचितं तल्लेखकः.

AMARANTH, *s.* अह्लादः, अह्लादपुष्पं.

AMARANTINE, *a.* अह्लादी -दिनी -दि (न्), अह्लादवान् -वती -वत् (त्), अह्लादपुष्पमयः -या -यं.

AMARITUDE, *s.* तिक्तता, तिक्तं, कटुता.

To AMASS, *v. a.* चिञ् (c. 5. -चिनोति -चेतुं), उपचि, सम्भृ (c. 1. -भरति -भर्त्तुं), समाक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), एकत्र कृ, राशीकृ.

AMASSED, *p. p.* चयितः -ता -तं, उपचितः -ता -तं, सम्भृतः -ता -तं, राशीकृतः -ता -तं.

AMASSMENT, *s.* सञ्चयः, पुञ्जः, समुच्चयः, संहतिः *f.*, ओघः, समुदायः, राशीकरणं.

AMATEUR, *s.* कश्चिद् विद्यां सेवमानः or आत्मविनोदार्थं सेवते यः.—(In music) गन्धर्व्वविद्यानुरागिणः, गन्धर्व्वविद्याकामाः.

AMATORY, *a.* कामी -मिनी -मि (न्), कामी -मिनी -मि (न्), प्रीतिमान् -मती -मत् (त्), अनुरागी -गिणी -गि (न्), प्रेमशीलः -ला -लं, शृङ्गारी -रिणी -रि (न्), रतिकः -का -कं.

To AMAZE, *v. a.* विस्मि in caus. (-स्मापयति -ये -यितुं), आकुलीकृ, व्याकुलीकृ, विलयाकुलं -लां -लं or साध्वसे -सी -सं or व्यसे -सां -सं कृ.

AMAZE, *s.* विस्मयः, आश्चर्य्यं, भयभ्रमः.—(Confusion) आकुलता, व्याकुलता.

AMAZED, *p. p.* विस्मितः -ता -तं, चमत्कृतः -ता -तं, मोहितः -ता -तं, व्याकुलितः -ता -तं, आकुलीकृतः -ता -तं, व्याकुलमनाः -नाः -नः (स्).

AMAZEDLY, *adv.* सविस्मयं, साध्वसं, विलयेन, चमत्कारेण.

AMAZEMENT, *s.* विस्मयः, आश्चर्य्यभावः, अहृतं, व्याकुलता, आतङ्कः.

AMAZING, *part. a.* (Astonishing) विस्मयकारी -रिणी -रि (न्), विस्मितः -ता -तं, अद्भुतः -ता -तं, चमत्कारी -रिणी -रि (न्).—(Excessive) अतिरिक्तः -क्ता -क्तं, 'amazing power,' अतिशक्तिः *f.*

AMAZINGLY, *adv.* अद्भुतं, विस्मितं, विस्मयकारेण.—(Excessively) निर्भरं, अतीव, अतिरिक्तं, अतिशयं, 'amazingly covetous,' अतिलुब्धः.

AMAZON, *s.* चत्वारश्चेदनपूर्व्वके देशे स्त्रियो दक्षैर्विद्या या स्त्रीजातिः प्राचीनपुस्तकेषु प्रशस्यते.

AMBAGES, *s.* वक्रोक्तिः *f.*, वक्रभणितं.

AMBASSADOR, *s.* दूतः, सन्देशहरः, राजदूतः, राजचरः, सखी *m.* (न्).

AMBASSAGE, *s.* दूत्यं, दौत्यं, दूतप्रेरणं.

AMBER, *s.* वृषगन्धिः *m.*, वृषगन्धी *m.* (न्), शुक्रापुष्पः.

AMBER, *a.* वृषगन्धिमयः -यी -यं, शुक्रापुष्पमयः -यी -यं.

AMBERGRIS, *s.* जीवपशुविशेषः.

AMBER-TREE, *s.* सुगन्धिवृक्षविशेषः.

AMBIDEXTER OR AMBIDEXTROUS, *a.* (Having equally the use of both hands) सव्यसाची -चिनी -चि (न्), उभयहस्तकुशलः -ला -लं.—(Equally ready to act on both sides) द्विपक्षपाती *m.* (न्).

AMBIENT, *a.* वेष्टकः -का -कं, परिवेष्टकः -का -कं, आपकः -का -कं.

AMBIGUITY, AMBIGUOUSNESS, *s.* द्व्यर्थः, सन्दिग्धार्थः, सन्देहार्थः, [illegible] -क्ता -क्तं, अस्पष्टता, वक्रोक्तिः *f.*, वक्रता.

AMBIGUOUS, *a.* द्व्यर्थः -र्था -र्थं, सन्दिग्धार्थः -र्था -र्थं, अस्पष्टार्थः, [illegible] अस्पष्टः -ष्टा -ष्टं, वक्रार्थः -र्था -र्थं, वक्रः -क्रा -क्रं.

AMBIGUOUSLY, *adv.* द्व्यर्थेन *ind.*, अस्पष्टं, अन्यार्थं, वक्रोक्त्या, सन्दिग्धार्थं.

AMBIT, *s.* मण्डलं, वेष्टनं, चक्रवालं.

AMBITION, *s.* कीर्तिस्पृहा, अभिरुचिः *f.*, ऐश्वर्याकाङ्क्षा, उत्कृष्टपदवाञ्छा, राज्यलोभः.

AMBITIOUS. *s.* कीर्तिप्रेप्सुः -प्सुः -प्सु, यशस्कामः -मा -मं, यशस्काम्यन् -म्यती -म्यत् (त्), आजिगीषुः -षुः -षु उत्कृष्टपदप्रेप्सुः -प्सुः -प्सु, अभिरुचिमान् -मती -मत् (त्), ऐश्वर्यप्रेप्सुः -प्सुः -प्सु, अभिप्रेतः -ता -तं.

AMBITIOUSLY, *adv.* कीर्तिस्पृहातस् *ind.*, ऐश्वर्याकाङ्क्षया, उत्कृष्टपदवाञ्छया, अभिरुच्या.

To AMBLE, *v. n.* सुन्दरगत्या चल् (c. 1. चलति चलितुं), सुन्दरप्रकारेण प्लु (c. 1. प्लवते प्लोतुं) or धोर् (c. 1. धोरति धोरितुं).

AMBLE, *s.* अश्वस्य गतिविशेषः, प्लुतः, धोरितं, सुन्दरगतिः *f.*

AMBLER, *s.* धोरितशीलः, सुन्दरगतियायी *m.* (न्).

AMBROSIA, *s.* अमृतं, चिदशाहारः, पीयूषं, देवान्नं, परमान्नं.

To AMBULATE, *v. a.* विचर् (c. 1. -चरति -चरितुं). भ्रम् in freq. (भंभ्रम्यते), परिभ्रम् (c. 4. -भ्राम्यति भ्रमितुं), इतस्ततस् चर्.

AMBULATION *s.* परिभ्रमः, इतस्ततो भ्रमणं.

AMBUSCADE, AMBUSH, *s.* (A place where persons lie in wait) पराक्रमणार्थं निभृतस्थानं.—(The liers in wait) सैन्यं निभृते स्थापितं.

To AMELIORATE, *v. a.* भद्रतरं -रां -रं, or श्रेयांसं -यसीं -यः or अहैतरं -रां -रं, or साधीयांसं -यसीं -यः कृ.

AMELIORATION, *s.* श्रेयस्त्वं, भद्रतरता, श्रेष्ठता, गौरवं, वृद्धिः *f.*

AMEN, *adv.* तथास्तु, एवमस्तु.

AMENABLE, *a.* अभियोक्तुराह्वानाधीनः -ना -नं, परानुयोगाधीनः -ना -नं, अनुसन्धेयः -या -यं.

To AMEND, *v. a.* (To correct) शुध् in caus. (शोधयति -यितुं), परिशुध् विशुध्, संशुध्; समाधा (c. 3. -दधाति -धत्ते -धातुं).—(To amend one's life, leave wickedness) पापात् निवृत् (c. 1. -वर्तते -वर्तितुं), पापं त्यक्त्वा धर्मम् आचर् (c. 1. -चरति -चरितुं), or साधून् आचारान् आस्था (c. 1. -तिष्ठति -स्थातुं), विप्रतीसारं कृ.

To AMEND, *v. n.* (As the life or manners) शुध् (c. 4. शुध्यति शोद्धुं), विशुध्, संशुध्, समाधा in pass. (-धीयते), भद्रतरः -रा -रं भू, साधुः -धुः or -ध्वी -धु भू.—(As a disease) शम् (c. 4. शाम्यति शमितुं) उपशम्.

AMENDED, *p. p.* शोधितः -ता -तं, संशुद्धः -द्धा -द्धं.—(Ceased from evil) निवृत्तपापः -पा -पं.

AMENDMENT, *s.* शोधनं, संशुद्धिः *f.*, प्रतिसमाधानं, समाधानं, विप्रतीसारः, श्रेयस्त्वं, श्रेष्ठता, गौरवं.—(Of life) आचारशोधनं, दोषशोधनं.—(Of a disease) उपशमः, स्वास्थ्यं.

AMENDS, *s.* निस्तारः, निष्कृतिः *f.*, पारितोषिकं, शोधनं, संशुद्धिः *f.*

AMENITY, *s.* रम्यता, प्रियता, अभिरामत्वं, सुनन्दता.

To AMERCE, *v. a.* दण्ड् (c. 10. दण्डयति -यितुं) with two accusatives.

AMERCED, *p. p.* दण्डितः -ता -तं, साधितः -ता -तं.

AMERCEMENT, *s.* दण्डः, धनदण्डः.—(Loss) हानिः *f.*, क्षयः, अपचयः.

AMETHYST, *s.* मणिविशेषः, नीलपद्मः प्रस्तरप्रभेदः, मटीमणिः.

AMIABLE, *a.* सुशीलः -ला -लं, सुप्रियः -या -यं, सुशीलवान् -वती -वत् (त्), कीर्तिमान् -मती -मत् (त्), प्रियदर्शनः -ना -नं, लोहार्हः -र्हा -र्हं, प्रियङ्करः -री -रं.—(Pleasant) रमणीयः -या -यं.

AMIABLENESS, *s.* सुशीलत्वं, सद्भावः, प्रियता, प्रियम्भाविष्णुता, प्रियम्भावुकता.

AMIABLY, *adv.* सुशीलजनवत्, सुप्रियं, प्रीतिपूर्वकं, प्रीत्या.

AMICABLE, *a.* मैत्रः -त्री -त्रं, हितः -ता -तं, सालेयः -या -यं, स्नेहशीलः -ला -लं.

AMICABLENESS, *s.* मित्रत्वं, साख्यं, सौहार्दं, सहायता, अनुकूलता.

AMID, AMIDST, *prep.* मध्ये, अन्तरेण, अन्तरे, अन्तरा, अभ्यन्तरे.

AMISS, *adj.* दोषी -षिणी -षि (न्), अपराधी -धिनी -धि (न्), अनुचितः -ता -तं, अयुक्तः -क्ता -क्तं. *adv.* दुष्टु, दोषेण, अपराधतस्, अनुचितं, अन्यथा.

AMITY, *s.* मैत्र्यं, साख्यं, बन्धुता, स्नेहः.—(Between nations) सन्धिः *m.*

AMMONIAC, *s.* (Gum ammoniac) निर्यासप्रकारः.—(Sal ammoniac) लवणप्रकारः.

AMMUNITION, *s.* युद्धोपकरणं, युद्धसज्जा.

AMNESTY, *s.* राजक्षमा, दोषक्षमा, दोषविस्मरणव्यवस्था.

AMONG, AMONGST, *prep.* मध्ये, अभ्यन्तरे, अन्तरे, अन्तरेण, अन्तरा, सन्ना

AMOROUS, *a.* कामी -मिनी -मि (न्), प्रकामः -मा -मं, कामुकः -का -कं मन्मथी -थिनी -थि (न्), शृङ्गारी -रिणी -रि (न्), रसिकः -का -कं प्रेमशीलः -ला -लं, कामाक्रान्तः -न्ता -न्तं.

AMOROUSLY, *adv.* कामेन, कामतस् *ind.*, रसिकभावेन, प्रीतिपूर्वकं.

To AMOUNT, *v. n.* उपचि in pass. (-चीयते), सञ्चि, समुदि in pass. (-ईयते), सङ्ख्या in pass. (-ख्यायते); 'amounting to,' संख्यकः -का -कं.

AMOUNT, *s.* परिमाणं, सङ्ख्या, समुदायः, उपचायः, सारः, अर्थः; 'money to the amount of a lac,' लक्षसंख्यानि धनानि.—(Value, price) मूल्यं.

AMPHIBIOUS, *a.* भूजलचरः -रा -रं, स्थलजलचरः -रा -रं, जलवायुः -यु -युं, द्विधागतिः -तिः -ति, स्थलेशयः.

AMPHITHEATRE, *s.* अर्द्धचन्द्राकारो रङ्गः, अर्द्धजगतीकारो रङ्गः, रङ्गभूमिः *f.* रङ्गाङ्गणं.

AMPLE, *a.* विशालः -ला -लं, विपुलः -ला -लं, विस्तृतः -ता -तं, बृहन् -हती -हत् (त्), प्रचुरः -रा -रं, बहुलः -ला -लं, यथेष्टः -ष्टा -ष्टं.

AMPLENESS, *s.* विशालता, विपुलता, विस्तीर्णता, बृहत्त्वं, प्राचुर्यं.

AMPLIFICATION, *s.* विस्तारत्वं, विस्तरः, वृद्धिः *f.*, वर्द्धनं.—(In rhetoric) अत्युक्तिः *f.*

To AMPLIFY, AMPLIFICATE, *v. a.* वृध् in caus. (वर्धयति -यितुं), संवृध्; विस्तृ (c. 5. -स्तृणोति, c. 9. -स्तृणाति -स्तरितुं, -स्तरीतुं, caus. -स्तारयति), साध्यै in caus. (-धाययति -यितुं), समाधै; तन् (c. 8. तनोति तनितुं).

AMPLITUDE, *s.* (Extent) विस्तीर्णता, विस्तारः, विपुलता.—(Greatness) बृहत्त्वं, महत्त्वं, महिमा *m.* (न्).—(Capacity) आधारशक्तिः, सामर्थ्यं.—(Abundance) प्रचुरत्वं, सम्पूर्णत्वं, बहुत्वं.

AMPLY, *adv.* विस्तरेण, विस्तरशस् *ind.*, विपुलं, यथेष्टं.

To AMPUTATE, *v. a.* अङ्गं छिद् (c. 7. छिनत्ति छेत्तुं), लू (c. 9. लुनाति -नीते लवितुं), निकृत् (c. 6. -कृन्तति -कर्तितुं), अङ्गच्छेदनं कृ.

AMPUTATED, *p. p.* छिन्नः -न्ना -न्नं, लूनः -ना -नं, कृत्तः -त्ता -त्तं.

AMPUTATION, *s.* छेदः, अङ्गच्छेदनं, कर्तनं, अङ्गकर्तनं.

AMULET, *s.* कवचः, रक्षा, रोगनिवारणार्थं खिद्रद् द्रव्यं or औषधं.

To AMUSE, *v. a.* नन्द् in caus. (नन्दयति -यितुं), अभिनन्द्, प्रतिनन्द्; रम् in caus. (रमयति -यितुं), विनुद् in caus. (नोदयति -यितुं).—(To amuse one's self) विलस् (c. 1. -लसति -लसितुं).

AMUSED, *p. p.* विनोदितः -ता -तं, अभिनन्दितः -ता -तं.

AMUSEMENT, *s.* विनोदः, परीहासः, क्रीडा, केलिः *f.*, खेला, विलासः, आह्लादः, नर्म *n.* (न्), कौतुकं, कुतूहलं.

AMUSER, *s.* विनोदयिता *m.* (तृ), नन्दकः.

AN. *See* A.

ANABAPTISM, *s.* पुनर्जलसंस्कारः, पुनर्मज्जनं.

ANABAPTIST, *s.* पुनर्जलसंस्कारमतावलम्बी, पुनर्जलसंस्कारमतं धारयन्.

ANACHRONISM, *s.* कालक्रमनाभंगः.

ANAGRAM, नामाक्षरपरिवर्त्तनात् सार्थवाक्यरचनं यथा देवराजः, वेद व्रजः.

ANALOGICAL or ANALOGOUS, सम्बन्धी -न्धिनी -न्धि (न्), सम्बन्धकः -का -कं, सदृशः -शी -शं, उपमः -मा -मं, अनुरूपः -पा -पं, समानः -ना -नं,

अनुगुणः -णा -णं, तुल्यः -ल्या -ल्यं, सम्पर्की -र्किणी -र्कि (न्), आनुषङ्गिकः -की -कं, तुल्यरूपः -पा -पी -पं.

ANALOGICALLY, *adv.* सादृश्येन, औपम्येन, सामान्यतस् *ind.*, सादृश्यतस् *ind.*

ANALOGY, *s.* सम्बन्धः, सादृश्यं, औपम्यं, सम्पर्कः, सामान्यं, समानभावः, उपमितिः.

ANALYSIS, *s.* उपोद्घातः, पृथक्करणं, विच्छेदः, व्यवच्छेदः, परिच्छेदः, विभेदः, विभागः, विवेचनं, विवेकः, द्रावणं, व्याकारः.—(The essence of any thing) सारः, वस्तु *n.*

To ANALYZE, *v. a.* उपोद्घातं कृ, किञ्चित् समस्तद्रव्यं पृथक्कृ, or खण्डशस् कृ, or भागशस् कृ, विविक्तं -क्तां -क्तं or विभिन्नं -न्नां -न्नं कृ, व्याकृ, विभज् (c. 1. -भजति -ते -भक्तुं), विछिद् (c. 7. -छिनत्ति -छेत्तुं), द्रु in caus. (द्रावयति -यितुं), द्रवीकृ.

ANARCHICAL, *a.* अराजकः -का -कं, अनीश्वरः -रा -रं, अशिष्टः -ष्टा -ष्टं, राजनीतिरहितः -ता -तं, अशासितः -ता -तं, अस्थिरः -रा -रं, अव्यवस्थितः -ता -तं.

ANARCHY, *s.* अराज्यं, अशासनं, प्रभुत्वराहित्यं, शासनहीनत्वं, अनधीनता, अनीश्वरता.

ANATHEMA, *s.* शापः, अभिशापः, परिशापः, आक्रोशनं, अवक्रोशः.

To ANATHEMATIZE, *v. a.* शप् (c. 1. शपति, c. 4. शप्यति, शप्तुं), अभिशप्; आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं).

ANATOMICAL, *a.* व्यवच्छेदविद्यासम्बन्धकः -का -कं, व्यवच्छेदविद्यानुरूपः -पा -पं.

ANATOMICALLY, *adv.* व्यवच्छेदविद्यानुरूपं, विशसनविद्याक्रमेण, व्यवच्छेदविद्यावत्.

To ANATOMISE, *v. a.* शरीरं व्यवछिद् (c. 7. -छिनत्ति -छेत्तुं), विछिद्, सञ्छिद्; विशस् (c. 1. -शसति -शसितुं), खण्डशस् कृ, पृथक्कृ.—(To lay open distinctly) विवृ (c. 5. -वृणोति, -वरितुं or -वरीतुं), अपवृ; प्रकटीकृ, व्याख्या (c. 2. -ख्याति -ख्यातुं).

ANATOMISED, *p. p.* व्यवछिन्नः -न्ना -न्नं, विशसितः -ता -तं, पृथक्कृतः -ता -तं.

ANATOMIST, *s.* व्यवच्छेदविद्याज्ञः, व्यवच्छेदकः, विशसिता *m.* (तृ).

ANATOMY, *s.* शरीरव्यवच्छेदविद्या, विशसनविद्या, विशसनं.—(Division of any thing) विच्छेदः, विभेदः, पृथक्करणं.

ANCESTOR, *s.* पूर्वपुरुषः.—(Ancestors) पूर्वजाः *m. pl.*, पितरः *m. pl.*, पितृलोकः.

ANCESTRAL, *a.* पित्र्यः -त्र्या -त्र्यं, पितृकः -का -कं, कौलिकः -की -कं, पैत्रः -त्री -त्रं, पैत्रिकः -की -कं.

ANCESTRY, *s.* पितरः *m. pl.*, पूर्वजाः *m. pl.*, पितृसामान्यं, पितृश्रेणी *f.*, पितृपितामहादि *n.*—(Birth, the honour of descent) वंशः, अन्वयः, कुलमर्य्यादा.

ANCHOR, *s.* नौबन्धनकीलः, लोहमयवन्नं येन नौका बध्यते or स्थिरीक्रियते.—(A post for mooring vessels) कूपकः.

To ANCHOR, *v. a.* लौहयन्त्रेण नावं बन्ध् (c. 9. बध्नाति बन्द्धुं) or स्थिरीकृ.

ANCHORAGE, *s.* स्थानं नौबन्धनयोग्यं.—(The duty paid for anchoring) नौकाबन्धनानन्तरं यत् शुल्कं नौकारूढैर् दीयते.

ANCHORITE, *s.* वनवासी *m.* (न्), यती *m.* (न्), यतिः *m.*, तपस्वी *m.* (न्), सन्न्यासी *m.* (न्), वनी *m.* (न्).—(Brahman of the 3d order) वानप्रस्थः, गृहस्थाश्रमत्यागी *m.* (न्).

ANCHOVY, *s.* क्षुद्रमत्स्यविशेषः.

ANCIENT, *a.* पुराणः -णा or -णी -णं, पुरातनः -नी -नं, प्राक्कालीनः -ना -नं, पौराणः -णी -णं, प्राक्तनः -नी -नं, वृद्धः -द्धा -द्धं, प्राचीनः -ना -नं, पूर्वकालीनः -ना -नं, चिरन्तनः -नी -नं.

ANCIENT, *s.* वृद्धः, प्राचीनपुरुषः, पूर्वकालीनलोकः.—(The flag of a ship) नावो ध्वजः or पताका.—(Flag-bearer) पताकी *m.* (न्).

ANCIENTLY, *adv.* पूर्वकाले, गतकाले, पुरा, पूर्वं.

ANCIENTNESS, *s.* प्राचीनता, पुरातनत्वं, प्राक्कालीनता, वृद्धत्वं.

ANCIENTS, *s.* पूर्वजाः *m. pl.*, प्राचीनपुरुषाः *m. pl.*, पूर्वकालीनमनुष्याः *m. pl.*

AND, *conj.* च placed after the word which it connects with another. In many cases 'and' may be omitted in Sanskrit, and the connection expressed by the use of the indeclinable participle; as, 'the beasts assembled *and* informed the lion,' पशुभिर्मिलित्वा सिंहो विज्ञप्तः.—(Moreover) अपिच, किञ्च, अपरं, अन्यच्च.—(And then) अथ.

ANDANTE, *s.* घनं, तत्त्वं, विलम्बितं, स्पष्टं.

ANDIRON, *s.* लोहनिर्म्मितः शूलाधारः.

ANDROGYNAL or ANDROGYNOUS, *a.* द्विलिङ्गविशिष्टः -ष्टा -ष्टं.

ANECDOTE, *s.* उपकथा, उपाख्यानं.

ANENT, *prep.* (Concerning) प्रति, उद्दिश्य *ind.*, प्रतीक्ष्य *ind.*, विषयकः -का -कं.

ANEURISM, *s.* नाडिस्फातिः *f.*, नाडीनां रक्तप्रवाहकाणाम् अतिशयस्फातिः.

ANEW, *adv.* (Over again) पुनर्, पुनःपुनर्, पुनरपि.—(Newly) नूतनं, प्रतिनवं.

ANGEL, *s.* ईश्वरदूतः, देवदूतः, ईश्वरप्रेष्यः, स्वर्गी *m.* (न्), परमेश्वरप्रेरितः, स्वर्गीयदूतः, स्वर्गदूतः, दिव्यदूतः.

ANGELICAL, ANGELIC, *a.* ईश्वरदूतोपमः -मा -मं, दिव्यः -व्या -व्यं, देवरूपी -पिणी -पि (न्), स्वर्गीयः -या -यं.

ANGELICALLY, *adv.* ईश्वरदूतवत्, स्वर्गीयजनवत्, दिव्यप्रकारेण.

ANGER, *s.* क्रोधः, कोपः, अमर्षः, रोषः, चेतोविकारः; 'my anger is appeased,' मम क्रोधः शाम्यति; 'through anger,' कोपात्.—(Smart of a sore) व्रणवेदना.

To ANGER, *v. a.* कुप् in caus. (कोपयति -यितुं), प्रकुप्, सङ्कुप्; क्रुध् in caus. (क्रोधयति -यितुं).

ANGLE, *s.* अस्रः, कोणः, द्विभुजः.—(Apparatus to take fish) मत्स्यवेधनोपकरणं.

To ANGLE, *v. a.* वडिशेन मत्स्यान् जलाद् उद्धृ (c. 1. -हरति -ते -हर्त्तुं), वडिश (nom. वडिशयति), मत्स्यवेधनेन मीनान् व्यध् (c. 4. विध्यति व्यद्धुं) or ग्रह् (c. 9. गृह्णाति ग्रहीतुं).

ANGLE-ROD or ANGLING-ROD, *s.* मत्स्यग्रहणार्थं दण्डं.

ANGLER, *s.* मत्स्यवेधकः, मत्स्यबन्धी *m.* (न्), यो वडिशेन मत्स्यान् गृह्णाति

ANGLING, *s.* वडिशेन मत्स्यवेधनं, मत्स्यबन्धनं.

ANGLING-LINE, *s.* मत्स्यग्रहणार्थं सूत्रं or रज्जुः *m.*

ANGRILY, *adv.* सकोपं, सरोषं, सामर्षं, कोपेण, क्रोधात्.

ANGRY, *a.* क्रुद्धः -द्धा -द्धं, क्रोधी -धिनी -धि (न्), कोपी -पिनी -पि (न्), जातामर्षः -र्षा -र्षं, रुष्टः -ष्टा -ष्टं, क्रोधाक्रान्तः -न्ता -न्तं, सामर्षः -र्षा -र्षं, कृतकोपः -पा -पं, कृतक्रुधः -धा -धं, आगतमन्युः -न्युः -न्यु, सरोषः -षा -षं, रोषणः -णा -णं, सकोपः -पा -पं, समन्युः -न्युः -न्यु.—(To be angry) क्रुध् (c. 4. क्रुध्यति क्रोद्धुं), अनुक्रुध्, समभिक्रुध्, संक्रुध्, अभिसंरुध् (c. 4. रुध्यति रोधितुं), कुप् (c. 4. कुप्यति कोपितुं), प्रकुप्, with dative; असूय् (असूयति -ते, असूयितुं) with acc.

ANGUISH, *s.* परितापः, वेदना, तीव्रवेदना, क्लेशः, पीडा, दुःखं, आधिः, मनस्तापः, परिवेदनं, विबाधा, कृच्छ्रं, कष्टं, तोदः.

ANGULAR or ANGULOUS, *a.* सास्रः -स्रा -स्रं, कोणविशिष्टः -ष्टा -ष्टं, -वती -वत् (त्), असोपेतः -ता -तं.

ANHELATION, *s.* उच्छ्वसनं, निःश्वसनं.—(Palpitation) हृदयकम्पः.

ANIMADVERSION, *s.* (Reproof) अनुयोगः, निन्दा, उपालम्भः, [illegible]

(Infliction of punishment) दण्डयोगः.—(Observation) चर्चा, निरीक्षणं, अन्वेषणं.

To ANIMADVERT, *v. n.* (To pass censure on) प्रतिनिन्द् (c. 1. -निन्दति -निन्दितुं), उपालभ् (c. 1. -लभते -लब्धुं).—(To punish) दण्डं प्रणी (c. 1. -नयति -नेतुं), दण्ड् (c. 10. दण्डयति -यितुं).—(To make observation) निरीक्ष् (c. 1. -ईक्षते -ईक्षितुं), चर्चां कृ.

ANIMADVERTED, *p.p.* प्रतिनिन्दितः-ता-तं.—(Punished) दण्डितः-ता-तं.

ANIMADVERTER, *s.* प्रतिनिन्दकः, दण्डप्रणेता *m.* (तृ), अनुयोगी *m.* (न्).

ANIMAL, *s.* जन्तुः *m.*, प्राणी *m.* (न्), चेतनः, जीवी *m.* (न्), जन्तुः *m.*, जन्मी *m.* (न्), शरीरी *m.* (न्).—(Beast) पशुः *m.*, तिर्यञ्च् *m.* (-च्).

ANIMAL, *a.* जीवी -विनी -वि (न्), प्राणी -णिनी -णि (न्), चेतनः -ना -नं, चेतनावान् -वती -वत् (त्).—(Animal food) मांसाहारः.

ANIMALCULE, *s.* क्षुद्रजीवी *m.* (न्), क्षुद्रजन्तुः *m.*

To ANIMATE, *v. a.* जीव् in caus. (जीवयति -यितुं), प्राण् in caus. (-प्राणयति -यितुं), आश्वस् in caus. (-आश्वासयति -यितुं), समाश्वस्, विश्वस्, परिविश्वस् in caus.; उत्था in caus. (उत्थापयति -यितुं), उत्सुज् in caus. (-योजयति -यितुं), प्रोत्साह् in caus. (-साहयति -यितुं), उत्तिज् (c. 10. -तेजयति -यितुं).

ANIMATE, ANIMATED, *part. a.* (Inspirited) आश्वासितः-ता-तं, उत्सुकः-का-कं, उत्तेजितः-ता-तं.—(Living) चेतनः-ना-नं, प्राणी -णिनी -णि (न्).—(Vivacious) प्रफुल्लवदनः-ना-नं, हृष्टहृदयः-या-यं, रसिकः-का-कं, सारवान् -वती -वत् (त्).

ANIMATION, *s.* (The act of enlivening) आश्वासनं, उत्तेजनं.—(The state of being enlivened, vivacity) प्रफुल्लता, हृष्टता.

ANIMATOR, *s.* आश्वासकः, जीवदः, प्राणदः, प्रोत्साहकः.

ANIMOSITY, *s.* वैरं, द्वेषः, विरोधः, मात्सर्यं.

ANISE, *s.* छत्रा, सालेयः, शीतशिवः, मधुरिका, मिश्री, मिश्रेया.

ANKER, *s.* रसानां परिमाणविशेषः.

ANKLE, *s.* गुल्फः -ल्फं, घुटिका or घटिका, घुटिः *f.*, चरणग्रन्थिः *f.*

ANKLED, *a.* गुल्फयुक्तः-क्ता-क्तं, गुल्फसम्बन्धी -न्धिनी -न्धि (न्).

ANKLET, *s.* नूपुरः, पादाङ्गदं, मञ्जीरं, पादकटकः.

ANNALIST, *s.* क्रमानुसारेण चरित्ररचकः, चरित्रलेखकः, पुरावृत्तरचकः, आख्यानरचकः, वृत्तान्तलेखकः, आख्यानसङ्ग्राहकः.

To ANNALIZE, *v. a.* चरित्राणि or पुरावृत्तकथा रच् (c. 10. रचयति -यितुं).

ANNALS, *s.* क्रमानुसारेण सङ्गृहीत इतिहासः, पुरावृत्तं, पुरावृत्तकथा, चरित्राख्यानं, वृत्तान्तविवरणं.

ANNATES, *s.* प्रथमफलं, नवशस्यं.—(Sacrifice of first-fruits) आग्रायणं.

To ANNEAL, *v. n.* दृढस्थिरीकरणनिमित्ते काचं तप् (c. 1. तपति तप्तुं or caus. तापयति -यितुं).

ANNEALING, *s.* यत् काचस्य तपनं दृढस्थिरीकरणाय क्रियते.

To ANNEX, *v. a.* अनुबन्ध् (c. 9. -बध्नाति -बन्धुं), आबन्ध्; संयुज् in caus. (-योजयति -यितुं), उपाधा (c. 3. -दधाति -धत्ते -धातुं), आधा; उपस्था in caus. (-स्थापयति -यितुं).

ANNEXED, *p. p.* संयोजितः-ता-तं, उपाहितः-ता-तं, अनुबद्धः-द्धा-द्धं.

ANNEXATION, *s.* अनुबन्धनं, उपस्थापनं, संयोगः, संयोजनं, उपधानं.

ANNEXMENT, *s.* (The act of annexing). *See the last.*—(The thing annexed) अनुबन्धः, उपाहितं, संयुक्तभागः.

ANNIHILATE, *v. a.* नश् in caus. (नाशयति -यितुं), विनश्; प्रलीन caus. (-लापयति or -लाययति -यितुं), उद्धृ (c. 1. -हरति -ते -हर्तुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), लोपं कृ.

ANNIHILATED, *p. p.* उच्छिन्नः-न्ना-न्नं, विनाशितः-ता-तं.

ANNIHILATION, *s.* नाशः, क्षयः, प्रलयः, विनाशः, अभावः, समुच्छेदः, लोपः, निर्भावः, प्रलीनता.

ANNIVERSARY, *s.* दिवसः केनापि सविशेषेण कारणेन वत्सरे वत्सरे प्रसिद्धः, प्रतिवार्षिक उत्सवः, वत्सरे वत्सरे सेवितो महोत्सवः.

ANNIVERSARY, *a.* सांवत्सरिकः-की-कं, सांवत्सरः-री-रं, प्रतिवार्षिकः-का-कं.

To ANNOTATE, *v. n.* टीकां or भाष्यं लिख् (c. 6. लिखति लेखितुं) or रच् (c. 10. रचयति -यितुं).

ANNOTATION, *s.* टीका, भाष्यं, टिप्पनी *f.*

ANNOTATOR, *s.* टीकालेखकः, भाष्यकारः, भाष्यकृत्.

To ANNOUNCE, *v. a.* आख्या (c. 2. -ख्याति -ते -ख्यातुं), समाख्या; ख्या in caus. (ख्यापयति -यितुं), आख्या in caus.; विद्युष् (c. 1. -द्योषति -द्योषितुं or c. 10. द्योषयति), विद् in caus. (वेदयति -यितुं), निविद्, आविद्, समाविद्, विनिविद्, सन्निविद्; विज्ञा in caus. (-ज्ञापयति -यितुं).

ANNOUNCED, *p. p.* प्रकाशितः-ता-तं, निवेदितः-ता-तं, आवेदितः-ता-तं, अवघुष्टः-ष्टा-ष्टं, आख्यातः-ता-तं, परिकीर्तितः-ता-तं.

ANNOUNCEMENT, *s.* ख्यापनं, विज्ञापनं, विज्ञप्तिः *f.*, निवेदनं, विद्योषणं.—(News) सन्देशः, समाचारः, संवादः.

ANNOUNCER, *s.* आख्यायकः, विज्ञापकः, विद्योषकः, सन्देशहरः.

To ANNOY, *v. a.* पीड् (c. 10. पीडयति -यितुं), अभिपीड्, उपपीड्, प्रपीड्, प्रतिपीड्, सम्पीड्; तप् in caus. (तापयति -यितुं), सन्तप्, परितप्; क्लिश् (c. 9. क्लिश्नाति क्लेष्टुं), अद् in caus. (अदयति -यितुं), समद्, बाध् (c. 1. बाधते, बाधितुं).

ANNOYANCE, *s.* व्यथा, क्लेशः, विडम्बना, दुःखं, पीडा, बाधा.—(The act of annoying) पीडनं.—(A source of annoyance) कण्टकः, -कं.

ANNOYED, *p. p.* क्लिष्टः-ष्टा-ष्टं, परिक्लिष्टः-ष्टा-ष्टं, सव्यथः-था-थं, व्यथितः-ता-तं.

ANNOYER, *s.* क्लेशकः, दुःखकरः, व्यथाकरः.

ANNOYING, *a.* क्लेशी -शिनी -शि (न्), क्लेशकः-का-कं, दुःखकरः-री-रं.

ANNUAL, *a.* वार्षिकः-की-कं, आब्दिकः-की-कं, सांवत्सरः-री-रं, वर्षीकः-का-कं, समीनः-ना-नं.—(Lasting only for a year) एकवर्षजीवी -विनी -वि (न्); 'an annual plant,' ओषधिः *f.*

ANNUALLY, *adv.* प्रतिवर्षं, प्रतिवत्सरं, वत्सरे वत्सरे, वत्सरक्रमेण.

ANNUITY, *s.* वार्षिकं or सांवत्सरिकं वेतनं or वृत्तिनं, यत् निरूपितमूल्यं वत्सरे वत्सरे कस्मैचिद् दीयते.

To ANNUL, *v. a.* लोपं कृ, निरर्थकं -कां -कं कृ, विनश् in caus. (-नाशयति -यितुं).

ANNULAR, *a.* मण्डलाकारः-रा-रं, वलयाकारः-रा-रं, वलयाकृतिः-तिः-ति, अङ्गुरीयाकारः-रा-रं.

ANNULET, *s.* क्षुद्रवलयः, क्षुद्राङ्गुरीयः, -यं.

ANNULMENT, *s.* लोपः, नाशः, विनाशः.

To ANNUMERATE, *v. a.* संख्यां संख्यया संयुज् (c. 7. -युनक्ति -युङ्क्ते -योक्तुं).

ANNUMERATION, *s.* संख्या संख्यया संयोजनं.

ANNUNCIATION, प्रत्यादेशः, घोषणं, -ख्या, ख्यापनं, विज्ञापनं.

ANODYNE, *a.* शूलघ्नः-घ्नी-घ्नं, वेदनाशामिकः-की-कं, पीडाशमकः-का-कं.

ANODYNE, *s.* शूलघ्नं, वेदनाशामिकं.

To ANOINT, *v. a.* लिप् (c. 6. लिम्पति -ते लेप्तुं), अनुलिप्, आलिप्, समालिप्, उपलिप्, विलिप्; अञ्ज् (c. 7. अनक्ति अंक्तुं) or caus. (अञ्जयति -यितुं), समालभ् (c. 1. -लभते -लब्धुं).—(To consecrate by unction) अभिषिच् (c. 6. -सिञ्चति -सेक्तुं).

ANOINTED, *p. p.* लिप्तः-प्ता-प्तं, अभिषिक्तः-क्ता-क्तं, दिग्धः-ग्धा-ग्धं, अनुलिप्तः-प्ता-प्तं, अभ्यक्तः-क्ता-क्तं, कृताभिषेकः-का-कं.

ANOINTER, *s.* अभिषेचकः, लेपकः, अञ्जनकर्त्ता *m.* (र्तृ).

ANOINTING, *s.* अभिषेकः, -चनं, विलेपनं, समालम्भः, अभ्यञ्जनं, अञ्जनं.

ANOMALOUS, *a.* विधिविरुद्धः -द्धा -द्धं हीनः -ना -नं, विधिभ्रः -भ्री -भ्रं, -विरुद्धः -द्धा -द्धं, अविधिः -धि

ANOMALOUSLY, *adv.* अविधानतस् *ind.*, अविधिवत् *ind.*, अनियमतस् *ind.*

ANOMALY, *s.* अविधिः *m.*, अविधानं, विधिविरुद्धता, अनियमः.

ANON, *adv.* (Quickly, soon) झटिति, सपदि, झटिति.—(Now and then) कदापि, कदाचित्.

ANONYMOUS, *a.* अनामकः -का -कं, नामहीनः -ना -नं, सम्ज्ञारहितः -ता -तं.

ANONYMOUSLY, *adv.* नामव्यतिरेकेण, संज्ञाव्यतिरेकेण, संज्ञां विना.

ANOTHER, *a.* अन्यः -न्या -न्यत्, इतरः -रा -रं, परः -रा -रं, अपरः -रा -रं, परकीयः -या -यं, अन्यदीयः -या -यं. Another is often expressed by अन्तर in composition; as, 'another place,' स्थानान्तरं; 'along with another king,' राजान्तरेण सह. 'In another place,' अन्यत्र; 'in another manner,' अन्यथा; 'at another time,' अन्यदा; 'one after another,' अनुपूर्वशस् *ind.*, प्रत्येकं एकैकशस्; 'a defect in another,' परदूषणं; 'another's wife,' परदारः; 'another man's goods,' परद्रव्यं, परस्वं; 'another's right,' परस्वत्वं; 'another day,' अन्यस्मिन् दिवसे, अन्येद्युः (स्).

To ANSWER, *v. n.* (To speak in reply) प्रतिवच् (c. 2. -वक्ति -वक्तुं), प्रतिभाष् (c. 1. -भाषते -भाषितुं), प्रतिवद् (c. 1. -वदति -ते -वदितुं), प्रतिब्रू (c. 2. -ब्रवीति -वक्तुं), आह (c. 1. -हरति -ते -हर्तुं), प्रतिभण् (c. 1. -भणति -भणितुं), प्रतिजल्प् (c. 1. -जल्पति -जल्पितुं).—(To correspond, to suit) युज् in pass. (युज्यते), अनुरूपः -पा -पं or तुल्यरूपः -पा -पं or सदृशः -शी -शं अस्.—(To succeed) सम्पद् (c. 4. -पद्यते -पत्तुं), संसिध् (c. 4. -सिध्यति -द्धुं).—(To be accountable for) प्रतिभूः or प्रतिनिधिः अस्, लग्नकं दा (c. 3. ददाति दातुं).

ANSWER, *s.* प्रतिवचनं, प्रतिकाव्यं, प्रतिवाक् *f.* (च्), उत्तरं, प्रत्युत्तरं, प्रत्युक्तिः *f.*, प्रतिवाणिः *f.*—(Refutation of a charge) दोषापहरणं, दोषव्यावृत्तिः.

ANSWERABLE, *a.* प्रतिवाक्यः -क्या -क्यं.—(Responsible) परानुयोगाधीनः -ना -नं, पराज्ञानाधीनः -ना -नं, अभियोक्तव्यः -व्या -व्यं, येन प्रत्युत्तरं दातव्यं सः, यो लग्नकं दातुम् अर्हति.—(Corresponding to) योग्यः -ग्या -ग्यं, अनुरूपः -पा -पं, अनुसारी -रिणी -रि (न्).

ANSWERED, *p. p.* प्रत्युक्तः -क्ता -क्तं, प्रतिभाषितः -ता -तं, प्रतिभणितः -ता -तं.

ANT, *s.* पिपीलिका, पुत्रिका.

ANT-BEAR, *s.* पिपीलिकादको जन्तुविशेषः.

ANT-HILL, *s.* वल्मीकः, -कं, कृमिशैलः, कूलकः, भूध्रवः *m.* (स्), पक्षीकूटं, वामकूरः, स्तनीकः, मृत्तिकाकूटं.

ANTAGONIST, *s.* विरोधी *m.* (न्), विपक्षः, वैरी *m.* (न्), शत्रुः *m.*, अभियोक्ता *m.* (क्तृ), पक्ष्येतरस्थातृ *m.* (तृ), प्रतिबन्धकः.

ANTAGONISTIC, *a.* विरोधी -धिनी -धि (न्), विपक्षः -क्षा -क्षं, विपरीतः -ता -तं.

ANTALGIC, *a.* वेदनाशमनः -का -कं, शूलघ्नः -घ्नी -घ्नं, शोकापनुदः -दा -दं.

ANTARCTIC, *adj.* दक्षिणकेन्द्रीयः -या -यं.—(The south pole) दक्षिणकेन्द्रं, ध्रुवेरः *m.*

ANTECEDENT, *a.* पूर्वगतः -ता -तं, अग्रगतः -ता -तं, अग्रगामी -मिनी -मि (न्).

ANTECEDENTLY, *adv.* पूर्वं, अग्रे, पूर्वतस्, अग्रतस्.

ANTEDILUVIAN, *a.* प्राग् भूतप्लवाद् विद्यमानः -ना -नं, प्राग् जलाप्लावनाद् विद्यमानः -ना -नं.

ANTELOPE, *s.* मृगः, हरिणः, रेणेयः, कुरङ्गः, -ङ्गकः, -ङ्गमः.

ANTEMERIDIAN, *a.* पूर्वाह्णेतनः -नी -नं.

ANTEMUNDANE, *a.* प्राग् जगत्सृष्टेर् वर्तमानः -ना -नं.

ANTEPAST, *s.* पूर्वभुक्तिः *f.*, पूर्वभोजनं, पूर्वज्ञानं, अग्रग्रहणं.

ANTEPENULTIMATE, *s.* उपधायाः पूर्वं विद्यते यद् अक्षरं, पूर्वोपान्तः.

ANTERIOR, *a.* प्राक्तनः -नी -नं, पूर्वः -र्वी -र्वं, अग्रः -ग्रा -ग्रं.

ANTHEM, *s.* ईश्वरस्तवात्मकं गीतं, ईश्वरस्तुतिरूपकं गानं.

ANTHONY'S FIRE, *s.* उर्दः, रोगविशेषः.

ANTHROPOPHAGI, *s.* नृमांसभक्षाः *m. pl.*, आत्ममांसाशिनः *m. pl.*, क्रव्याशिनः *m. pl.*, अघ्नयाः *m. pl.*, राक्षसाः *m. pl.*

ANTIBILIOUS, *a.* पित्तघ्नः -घ्नी -घ्नं.

ANTIC, *a.* (Buffoon-like) भण्डोपमः -मा -मं.—(Odd, unnatural) अपरूपः -पा -पं, विरूपः -पा -पं, असङ्गतः -ता -तं, अयोग्यः -ग्या -ग्यं.

ANTIC, *s.* (A buffoon) भण्डः, भाण्डकरः.—(An odd gesture) असङ्गतप्रकारेण हस्तादिविक्षेपः, विरूपो ऽङ्गविक्षेपः.

ANTI-CHAMBER, *s.* उपशाला.

To ANTICIPATE, *v. a.* (Before the time) पूर्वतस् ग्रह् (c. 9. गृह्णाति ग्रहीतुं), प्रवेद् (c. 1. -ईदते -ईदितुं).—(To foretaste) पूर्वास्वादनं कृ, अग्रतस् अनुभू (c. 1. -भवति -भवितुं), पूर्वं ज्ञा (c. 9. जानाति ज्ञातुं) or भुज् (c. 7. भुनक्ति, भुङ्क्ते, भोक्तुं), उदृश् (c. 1. उत्पश्यति उद्द्रष्टुं), प्रदृश्.

ANTICIPATED, *p. p.* पूर्वभुक्तः -क्ता -क्तं, पूर्वतस् अनुभूतः -ता -तं, प्रदृष्टः -ष्टा -ष्टं, प्रवेदितः -ता -तं, सन्दृष्टः -ष्टा -ष्टं, चित्तकल्पितः -ता -तं, पुरस्कृतः -ता -तं.

ANTICIPATION, *s.* पूर्वभुक्तिः *f.*, पूर्वभोजनं, पूर्वज्ञानं, प्रवेदनं.

ANTIDOTAL, *a.* विषघ्नाशी -शिनी -शि (न्), विषघ्नाही -हिनी -हि (न्), विषघ्नः -घ्नी -घ्नं, गरघ्नः -घ्नी -घ्नं.

ANTIDOTE, *s.* विषघ्नाशनं, प्रतिविषं.—(Dealer in) विषवैद्यः, जाङ्गुलिकः.

ANTIFEBRILE, *a.* ज्वरघ्नः -घ्नी -घ्नं, ज्वरनाशकः -का -कं, ज्वरारकः -का -कं.

ANTIMONY, *s.* सौवीरं, सौवीरं, कापोताञ्जनं, यामुनं.—(Made of antimony) सौवीरमयः -यी -यं.

ANTIPATHY, *s.* सहजो विरोधः, वैरभावः, विरक्तिः *f.*, वैरिता, शत्रुता, विप्रकृतिः *f.*, अनिच्छा.

ANTIPHLEGMATIC, *a.* कफघ्नाशनः -नी -नं, कफघ्नः -घ्नी -घ्नं, श्लेष्मघ्नः -घ्नी -घ्नं.

ANTIPHONY, *s.* प्रतिगानं, परस्परगीतिः *f.*, प्रतिध्वनिः *f.*

ANTIPODES, *s.* भूगोलस्य विपरीतभागे वर्तिनः; अन्यतरस्मिन् भूगोलभागे वर्तिनः परस्परम् अभिमुखपादतला जनाः.

ANTIQUARIAN, *a.* प्राक्कालीनः -ना -नं, पूर्वकालीनः -ना -नं, प्राक्तनः -नी -नं.

ANTIQUARY, ANTIQUARIAN, *s.* प्राक्कालीनविषयेषु पण्डितः, पुरातनद्रव्यानुसन्धायी *m.* (न्).

ANTIQUE, *a.* (Ancient) पुराणः -णा or -णी -णं, पुरातनः -नी -नं, प्राक्तनः -नी -नं, पूर्वकालीनः -ना -नं, चिरन्तनः -नी -नं.—(Old-fashioned) अप्रचलः -ला -लं, अपकृष्टः -ष्टा -ष्टं.

ANTIQUE, *s.* प्राचीनद्रव्यं, प्राक्कालीनविषयः.

ANTIQUITY, *s.* (Old-times) प्राक्कालः, पूर्वकालः, गतकालः.—(The ancients) प्राचीनपुरुषाः *m. pl.*—(Ancientness) पुरातनत्वं, प्राचीनत्वं.

ANTISEPTIC, *a.* पूतिघ्नः -घ्नी -घ्नं, पूतिनिवारकः -का -कं, पूतिनाशकः -का -कं.

ANTISTES, *s.* प्रधानपुरोहितः, धर्माध्यक्षः.

ANTITHESIS, *s.* अर्थान्तरन्यासः, अर्थवैपरीत्यं, विकल्पः, प्रतिपक्षता, विरोधः.

ANTITYPE, *s.* प्रतिमूर्त्या प्रदर्शिता मूर्तिः *f.*, मूलमूर्तिः *f.*, वस्तु *n.*, आदर्शः.

ANTLER, *s.* मृगशृङ्गं, मृगशृङ्गशाखा, मृगविषाणं.

ANTLERED, *a.* शृङ्गी -ङ्गिनी -ङ्गि (न्), विषाणी -णिनी -णि (न्).

ANUS, गुदं, पायुः *m.*, नेमः, अपानं.

ANVIL, *s.* भूमी *f.*, भूम्निः *m.*, स्थूणा, लोहप्रतिमा.

ANXIETY, *s.* चिन्ता, चित्तोद्वेगः, औत्सुक्यं, मनोदुःखं, मनस्तापः, चित्तवेदना, आधिः *m.*, व्यग्रता, उद्वेगः -गनं, उत्तापः, चित्ताभारः, मानसी व्यथा.

To CATCH, *v. a.* ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), धृ (c. 1. धरति, धर्त्तुं), लभ् (c. 1. लभते, लब्धुं), प्राप् (c. 5. -आप्नोति -आप्तुं).—(Lay hold with the hand) सङ्ग्रह्, परिग्रह्, परामृश् (c. 6. -मृशति -ष्टुं), अवलम्ब् (c. 1. -लम्बते -लम्बितुं).—(Receive suddenly) अकस्माद् ग्रह् or लभ् or प्राप्; 'to catch cold,' पीनसग्रस्तः -स्ता -स्तं भू, पीनसोपहतः -ता -तं भू; 'to catch a distemper,' सम्पर्कात् or संसर्गाद् रोगग्रस्तः -स्ता -स्तं भू; 'to catch fire,' अकस्माद् दह् in pass. (दह्यते) or दीप् (c. 4. दीप्यते, दीपितुं), लब्धदाहः -हा -हं भू, अग्निदीप्तः -प्ता -प्तं भू, अग्निं ग्रह्.—(Ensnare, entrap) ग्रह्, धृ, बन्ध् (c. 9. बध्नाति, बन्द्धुं), प्रलुभ् in caus. (लोभयति -यितुं), बञ्च् in caus. (वञ्चयते -यितुं); 'to catch fish,' मत्स्यान् धर्त्तुं or ग्रहीतुं.—(Come upon unexpectedly) अकस्माद् आसद् (c. 10. -सादयति -यितुं) or समासद् or प्राप्; 'caught out in a fault,' दुष्टदोषः -षा -षं, 'I caught him in the act of stealing,' चौर्यकरणेन तम् आसादयं or उपातिष्ठं.—(Allure) प्रलुभ् in caus., आकृष् (c. 1. -कर्षति -क्रष्टुं).—(Catch up, snatch, seize) हृ (c. 1. हरति, हर्त्तुं), अपहृ, हृत्वा अपनी.—(To spread as contagion) सञ्चर् (c. 1. -चरति -चरितुं).
CATCH, s. (Seizure) ग्रहणं, ग्रहः, सङ्ग्रहणं, सङ्ग्राहः, धरणं, हरणं.—(Any thing that catches) ग्राहकः -कं, ग्रहः, धरः; 'a latch,' तालकं; 'a clasp,' कुडुपः.—(Prize, advantage) लाभः, प्राप्तिः f., लोभ्रं, फलं.—(A song sung in succession) पर्य्यायगीतं, परस्परगीतं, परिवर्त्तकगीतं.
CATCHER, s. ग्राहकः, वागुरिकः, जालिकः, लुब्धकः.—(That in which fish, &c. are caught, a snare for animals) मत्स्यधानी, मृगबन्धिनी, वागुरा, जालं.
CATCHING, a. (Contagious) सञ्चारकः -का -कं, सञ्चारी -रिणी -रि (न्), सम्पर्कीयः -या -यं, त्वाचः -ची -चं.
CATCHPOLE, s. आसेद्धा m. (द्ध्), आसेधकर्त्ता m. (र्त्तृ), ग्राहकः, यष्टिधरः.
CATCHWORD, s. मुद्राक्षरभाषायां परपक्षगः शब्दः.
CATECHETICAL, a. प्राश्नोत्तरिकः -की -कं, प्रश्नोत्तरमयः -यी -यं, प्रश्नोत्तरविशिष्टः -ष्टा -ष्टं, सप्रश्नोत्तरः -रा -रं.
CATECHETICALLY, *adv.* प्रश्नोत्तरक्रमेण, सप्रश्नोत्तरं, प्रश्नोत्तरद्वारेण.
To CATECHISE, *v. a.* प्रश्नोत्तरद्वारेण or प्रश्नोत्तरक्रमेण उपदिश् (c. 6. -दिशति -देष्टुं) or शिक्ष् in caus. (शिक्षयति -यितुं) or अधी in caus. (अध्यापयति -यितुं).—(To interrogate) प्रच्छ् (c. 6. पृच्छति, प्रष्टुं), परीक्ष् (c. 1. -ईक्षते -ईक्षितुं).
CATECHISING, s. प्रश्नोत्तरद्वारेण शिक्षा or उपदेशः or अध्यापनं, परीक्षा.
CATECHISM, s. (Form of question and answer) प्रश्नोत्तरं, कथोपकथनं, उत्तरप्रत्युत्तरं, प्रश्नोत्तरविधिः m., प्रश्नोत्तररीतिः f., सप्रश्नोत्तरः पाठः.
CATECHIST OR CATECHISER, s. प्रश्नोत्तरद्वारेण or प्रश्नोत्तरक्रमेण or प्रश्नोत्तरविधिना उपदेशकः or शिक्षकः or अध्यापकः or पाठकः.
CATECHUMEN, s. नवशास्त्रः, नवशिष्यः, नवाधीयानः, प्राथमकल्पिकः.
CATEGORICAL, a. स्पष्टः -ष्टा -ष्टं, व्यक्तः -क्ता -क्तं, सुव्यक्तः -क्ता -क्तं, अवक्रः -क्रा -क्रं, स्पष्टः -ष्टा -ष्टं, स्पष्टार्थः -र्था -र्थं, वाचकः -का -कं, नियतः -ता -तं, पर्य्यायः -या -यं, अव्यञ्जनः -ना -नं.
CATEGORICALLY, *adv.* स्पष्टं, स्पष्टार्थं, सुव्यक्तं, अवक्रं, वाचकतया.
CATEGORY, s. पदार्थः, समानाधिकरणं, समानपदं, समानवर्गः, पदं.—(Of individual application) अध्याप्यवृत्तिः f.
CATENARIAN, a. शृङ्खलाकारः -रा -रं, शृङ्खलसम्बन्धी -न्धिनी -न्धि (न्).
CATENATION, s. शृङ्खलता, शृङ्खलत्वं, पर्य्यायः, सम्बन्धः.
To CATER, *v. a.* भोजनादि परिकॢप् (c. 10. -कल्पयति -यितुं) or उपकॢप् or सम्भृ (c. 1. -भरति, c. 3. -बिभर्त्ति -भर्त्तुं) or युज् in caus. (योजयति -यितुं).
CATERER, s. भोजनाधिकारी m. (न्), भोजनाधिकृतः, भोजनाधिष्ठाता m. (तृ), अन्नादिपरिकल्पकः.
CATERPILLAR, s. वृश्चिकः, शूककीटः, कोशवासी m. (न्), कोषकारी m. (न्).
To CATERWAUL, *v. n.* मज्जारविडालवद् रु (c. 2. रौति, रवितुं), मेनादं कृ.
CATERWAULING, s. मज्जारविडालरुतं, मज्जारमार्ज्जारचित्कारः, कर्कशरावः, मेनादः.
CATES, s. *pl.* स्वाद्वन्नं, विशिष्टान्नं, भोजनविशेषाः m. *pl.*, मिष्टान्नं.
CAT-GUT, s. विडालादिपुरीतद्विर्म्मिता तन्त्रीः, जन्तुनाड्यमयं सूत्रं, तन्तुः m.
CATHARTIC, s. रेचकः, रेचनं, विरेकः, विरेचनं, उदरशोधनं.
CATHARTICAL, a. रेचकः -की -कं, विरेचकः -की -कं, अधोभागहरः -रा -रं, अतिसारी -रिणी -रि (न्), शोधकः -का -कं.
CATHEDRAL, s. महापूजाशाला, महाभजनभवनं, महामखपः, महामन्दिरं, महाधर्म्माध्यक्षाधिष्ठिता पूजाशाला.
CATHEDRAL, a. महाधर्म्माध्यक्षमठसम्बन्धी -न्धिनी -न्धि (न्), महापूजाशालासम्बन्धीयः -या -यं.
CATHETER, s. मूत्रकृच्छ्रपीडितानां मेहमोचनार्थं मूत्रमार्गेनिवेशयितव्या वक्रनाडिः.
CATHOLIC, a. सामान्यः -न्या -न्यं, सर्व्वसामान्यः -न्या -न्यं, साधारणः -णा -णं, सर्व्वसाधारणः -णा -णं, सार्व्वः -र्व्वी -र्व्वं, सार्व्वत्रिकः -की -कं, सर्व्वीयः -या -यं, सार्व्वलौकिकः -की -कं, सार्व्वजनिकः -की -कं, सर्व्वजनीनः -ना -नं.
CATHOLIC, s. सर्व्वसाधारणमतस्थः, सर्व्वसामान्यमतधारी m. (न्).—(Roman Catholic) रोमीयमतधारी m. (न्).
CATHOLICISM, s. साधारण्यं, सामान्यं, सर्व्वसाधारण्यं, सर्व्वसामान्यं.
CATHOLICON, s. सर्व्वसाधारणभेषजं, सर्व्वसम्मतभेषजं.
CATKINS, s. तरुशाखातो लम्बमाना विडालपुच्छाकारा हरितपुष्पश्रेणी.
CATLING, s. अस्त्रचिकित्सकैर् अङ्गच्छेदने प्रयुक्तः कर्त्तरिकाविशेषः.
CATOPTRICAL, a. वक्ष्यमाणचाक्षुषविद्याङ्गसम्बन्धी -न्धिनी -न्धि (न्).
CATOPTRICS, s. चाक्षुषविद्यायाः प्रतिबिम्बविषयकम् अङ्गं.
CATTLE, s. गावः m. *pl.*, गोधनं, गोकुलं; 'cattle for draught,' धुरीणः, धुर्य्यः; 'fit for any draught,' सर्व्वधुरीणः, सर्व्वधुरावहः; 'rich in cattle,' गोमान् -मती -मत् (न्), गोमी -मिनी -मि (न्); 'capture of cattle,' गोग्रहः; 'cattle-keeper,' गोपालः, पशुपालः; 'the keeping of cattle,' पाशुपाल्यं.
CAVALCADE, s. आश्विकयात्रा, सादिनां or अश्वारोहिणां यात्रा or श्रेणी.
CAVALIER, s. सादी m. (न्), अश्ववारः, आश्विकः, अश्वारूढः, अश्वारोही m. (न्), अश्ववहः, हयारूढः, तुरगी m. (न्), तुरङ्गी m. (न्).
CAVALIERLY, *adv.* (Disdainfully) सावमानं, सावमानेन, सदर्पं, सगर्व्वं,

सावलेपं, सावहेलं.—(To treat cavalierly) अवमन् (c. 4. -मन्यते -मन्तुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), कदर्थीकृ, लघूकृ.

CAVALRY, *s.* आश्वं, आश्विकं, अश्वीयं, अश्वाः *m. pl.*, अश्वारोहाः *m. pl.*, अश्वारोहं सेनाङ्गं, अश्वारूढाः *m. pl.*, अश्वारोहिणः *m. pl.*, हयारूढाः *m. pl.*, अश्ववहाः *m. pl.*, सादिनः *m. pl.*, तुरङ्गिणः *m. pl.*, तुरङ्गयायिनः *m. pl.*

To CAVATE, *v. a.* (To hollow) खन् (c. 1. खनति, खनितुं, खातुं), शुषिरीकृ.

CAVATION, *s.* गृहतले खातं, गृहस्याधस्तात् खाता गुम्फिः.

CAUDATED, *a.* पुच्छी -च्छिनी -च्छि (न्), लाङ्गूली -लिनी -लि (न्).

CAUDLE, *s.* प्रसूताभिर् आहार्यं मद्यादिसम्मिश्रितं पानीयं.

CAVE or CAVERN, *s.* बिलं, बिवरं, कन्दरः -रा, गह्वरः, गह्वरं -री, रन्ध्रं, गुहा, गुहागृहं, निर्झरिः *m.*, दरी *f.*, शैलरन्ध्रं.—(Excavation) खातं, देवखातं, देवखातबिलं.

CAVEAT, *s.* सावधानो भव इति विज्ञापनं, निषेधः, निषेधपत्रं.

CAVERNED, *a.* (Full of caverns) गह्वरी -रिणी -रि (न्).—(Excavated) खातः -ता -तं.—(Inhabiting caverns) गह्वरवासी -सिनी -सि (न्) or -भाक् (ञ्), बिलवासी -सिनी -सि (न्).

CAVESSON, *s.* अश्वदमने प्रयुक्तं नासायन्त्रणं.

CAUGHT, *p. p.* गृहीतः -ता -तं, धृतः -ता -तं, प्राप्तः -प्ता -प्तं, लब्धः -ब्धा -ब्धं, बद्धः -द्धा -द्धं; 'caught in a net,' जालबद्धः -द्धा -द्धं; 'caught hold of,' सङ्गृहीतः -ता -तं, अवलम्बितः -ता -तं; 'caught out in a crime,' दुष्टदोषः -षा -षं; 'caught by a glance,' कटाक्षमुष्टः -ष्टा -ष्टं.

CAVIAR, *s.* लवणादिसन्धितं बृहन्मत्स्याण्डं, लवणाक्तं मीनाण्डं.

To CAVIL, *v. a.* मिथ्या विवद् (c. 1. -वदते -वदितुं) or निन्द् (c. 1. निन्दति -न्दितुं), वाक्यं खण्ड् (c. 10. खण्डयति -यितुं), दोषं or छिद्रम् अन्विष् (c. 6. -इच्छति -इषितुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), विप्रलप् (c. 1. -लपति -लपितुं), दोषीकृ.

CAVIL, *s.* मिथ्याविवादः, विवादः, उद्ग्राहः, मिथ्योद्ग्राहः, दोषग्राहः, दोषकल्पनं, दोषप्रसङ्गः, छिद्रान्वेषः, मिथ्यापत्तिः *f.*, मिथ्यावितर्कः, विप्रलापः, वाक्यखण्डनं, वाक्यविरोधः, अपवादः, वाग्युद्धं, वितण्डा, विप्रतिपत्तिः *f.*

CAVILLER, *s.* विवादशीलः, उद्ग्राहशीलः, मिथ्याविवादी *m.* (न्), उद्ग्राहमल्लः.

CAVILLING, *a.* दोषग्राही -हिणी -हि (न्), विवादी -दिनी -दि (न्), छिद्रान्वेषी -षिणी -षि (न्), छिद्रानुसारी -रिणी -रि (न्), घृणी -णिनी -णि (न्), निन्दकः -का -कं, अपवादकः -का -कं, विसंवादी -दिनी -दि (न्).

CAVILLINGLY, *adv.* मिथ्याविवादपूर्वकं, विवादशीलत्वात्, छिद्रान्वेषिवत्.

CAVITY, *s.* गर्तः, छिद्रं, बिवरं, खातं, बिलं, रन्ध्रं, कोष्ठः, कुहरं, अवटः, अवटिः *m.*

CAUL, *s.* (Covering for the head) शिरोवेष्टनं.—(Integument of the bowels) अन्त्रावेष्टनं, पुरीतदावेष्टनं.—(Membrane encompassing the head of a new-born child) सद्यो योनिजातस्य बालकस्य मस्तकावेष्टकः कोशविशेषः, गर्भवेष्टनं, गर्भाशयः.

CAULIFEROUS, *a.* प्रकाण्डविशिष्टः -ष्टा -ष्टं, काण्डवान् -वती -वत् (त्), सञ्जरितः -ता -तं.

CAULIFLOWER, *s.* शाकप्रभेदः, हरितकः, शिग्रुः *m.*

CAUSABLE, *a.* उत्पादनीयः -या -यं, उत्पादयितुं शक्यः -क्या -क्यं.

CAUSAL, *a.* कारणिकः -की -कं, हेतुकः -का -कं, हैतुकः -की -कं.—(Causal verb) प्रेरणं.

CAUSALITY or CAUSATION, *s.* कारणत्वं -ता, हेतुता -त्वं, निमित्तत्वं, प्रयोजकत्वं, हेतुत्वं.

CAUSATIVE, *a.* उत्पादकः -का -कं, जनिकः -का -कं, जनयिता -त्री -तृ (तृ).

CAUSE, *s.* (That which effects, motive, reason) कारणं, हेतुः *m.*, निमित्तं -त्तकं, निदानं, प्रयोजनं, निबन्धनं, करणं, उपाधिः *m.*—(Origin) प्रभवः, उद्भवः, सम्भवः, योनिः *f.*, बीजं, वैजिकं, मूलं; 'without cause,' अकस्मात्; 'for this cause,' अनेन हेतुना, तदर्थं, तस्य हेतोः; 'primary cause,' आद्यबीजं, आदिकारणं; 'a good cause,' सन्निमित्तं; 'cause and effect,' कार्यकारणं.—(The person who effects) उत्पादकः, कारकः, कर्त्ता *m.* (र्तृ), प्रयोजकः, प्रवर्त्तकः.—(Subject of litigation) अर्थः; 'one who has lost his cause,' साधितः.—(Occasion) प्रयोजनं, कारणं, स्थानं, अवसरः.—(Side, party) पक्षः; 'one's own cause,' आत्मपक्षः.

To CAUSE, *v. a.* जन् in caus. (जनयति -यितुं), उत्पद् in caus. (-पादयति -यितुं), कृ (c. 8. करोति, कर्त्तुं), सन्ध् in caus. (साधयति -यितुं), निमित्त (nom. निमित्तायते). Sometimes भू is used with the dat. c.; as, 'that will cause my destruction,' तन्मम विनाशाय भविष्यति: or even the dative alone may be used; as, तन्मम विनाशाय. Sometimes a phrase like the following may be found; 'I was not the cause of this deed,' इदं कर्म्म न मत्स्वामिकं or मत्कर्तृकं.

CAUSED, *p. p.* कारितः -ता -तं, कृतः -ता -तं, जनितः -ता -तं, उत्पादितः -ता -तं, कारणभूतः -ता -तं, उद्भवः -वा -वं or प्रभवः -वा -वं in *comp.*; as, 'caused by the wind,' अनिलोद्भवः -वा -वं.

CAUSELESS, *a.* निष्कारणः -णा -णं, निर्निमित्तः -त्ता -त्तं, अनिमित्तः -त्ता -त्तं, निष्प्रयोजनः -ना -नं, अहेतुकः -का -कं, अनिदानः -ना -नं, हेतुशून्यः -न्या -न्यं; 'causeless state,' बिलक्षणं.

CAUSELESSLY, *adv.* निष्प्रयोजनं, अकारणं, अकारणात्, निष्कारणं, अनिमित्ततस्, निर्निमित्तं, असति प्रयोजने, हेतुना विना, हेतुं विना.

CAUSER, *s.* कारकः, कर्त्ता *m.* (र्तृ), करः, कारः, उत्पादकः, जनकः, जनयिता *m.* (तृ), प्रयोजकः, प्रवर्त्तकः.

CAUSEWAY, *s.* सेतुः *m.*, सेतुबन्धः, पाली, पिण्डलः, पिण्डिलः, धरणः, संवरः.

CAUSTIC, *a.* (Burning, corrosive) दाहकः -का -कं, अरुन्तुदः -दा -दं, अरुष्करः -रा -रं, क्षयकरः -री -रं, तिग्मः -ग्मा -ग्मं.—(Biting, satirical) अरुन्तुदः -दा -दं, दंशेरः -रा -रं, मर्म्मभेदी -दिनी -दि (न्), मर्म्मस्पृक् *m. f. n.* (ञ्).

CAUSTICITY, *s.* अरुन्तुदत्वं -ता, अरुष्करत्वं -ता.

CAUTELOUS, *a.* (Cunning, wily) विदग्धः -ग्धा -ग्धं, विचक्षणः -णा -णं.

CAUTERIZATION, *s.* दाहः, दाहनं, उपयन्त्रेण or तप्तलोहेन or तिग्मौषधप्रयोगेण मांसदाहनं, क्षारकर्म्म *n.* (न्), कृष्णकर्म्म, क्षारापेणं.

To CAUTERIZE, *v. a.* दह् in caus. (दाहयति -यितुं), तप्तलोहेन or उपयन्त्रेण or तिग्मौषधप्रयोगेण मांसं दह्, क्षारम् कृ in caus. (अपेयति -यितुं).

CAUTERY, *s.* (Actual) दाहः, उपयन्त्रं, तप्तलोहेन मांसदाहः, क्षारः.—(Potential) दाहः, औषधीयारुन्तुददव्यप्रयोगेण मांसदाहः.

CAUTION, *s.* (Prudent care) अवधानं -नता, सावधानता, समीक्षा -क्षणं, प्रसमीक्षा, अवेक्षा, अन्ववेक्षा, अपेक्षा, अप्रमादः, चिन्ता, कार्य्यचिन्ता, विवेचनं, चेतना, आशङ्का, आशङ्काशीलता.—(Warning) प्रत्यादेशः, अवधेहि or सावधानो भव इति विज्ञापनं, सन्देशः.—(Security) प्रातिभाव्यं, पारिभाव्यं, बन्धकः, आधिः *m.*

To CAUTION AGAINST, *v. a.* प्रत्यादिश् (c. 6. -दिशति -देष्टुं), सन्दिश्; अवधेहि or अवधत्स्व or सावधानो भव इति विज्ञा in caus. (-ज्ञापयति -यितुं); 'he cautioned his sons against evil company,' असत्संसर्गात् सावधाना भवत or अवधत्त इति पुत्रान् प्रत्यादिशत्.

CAUTIONARY, *a.* (Containing a security) सबन्धकः -का -कं, सपारिभाव्यः -व्या -व्यं.—(Containing a warning) प्रत्यादेशकः -का -कं.

CAUTIONED, *p. p.* प्रत्यादिष्टः -ष्टा -ष्टं, सन्दिष्टः -ष्टा -ष्टं.

CAUTIOUS, *a.* सावधानः -ना -नं, कृतावधानः -ना -नं, अवहितः -ता -तं,

सावहितः -ता -तं, अप्रमत्तः -त्ता -त्तं, अप्रमादी -दिनी -दि (न्), समीक्ष्यकारी -रिणी -रि (न्), विमृश्यकारी -रिणी -रि (न्), आशङ्काशीलः -ला -लं, कार्य्यचिन्तकः -का -कं, बुधः -धा -धं.

CAPTIOUSLY, *adv.* सावधानं, अवधानेन, अवहितं, अप्रमादेन, अवेक्षया, साशङ्कं.

CAUTIOUSNESS, *s.* अवधानता, सावधानता, अप्रमत्तता, अप्रमादित्वं.

To CAW, *v. n.* काकवद् रु (c. 2. रौति, रवितुं), कै (c. 1. कायति, कातुं), क्रुंश् (c. 1. क्रुंशति, क्रुंशितुं), क्रांश् (c. 1. क्रांशति -शितुं).

CAYENNE, *s.* मरीचगुणोपेतः सुतिग्मो रक्तवर्णो उपस्करविशेषः.

To CEASE, *v. n.* (To be at an end) विरम् (c. 1. -रमति -रन्तुं), उपरम्, निवृत् (c. 1. -वर्त्तते -वर्त्तितुं), निवृत्, विनिवृत्, शम् (c. 4. शाम्यति, शमितुं), अपया (c. 2. -याति -यातुं), विगम् (c. 1. -गच्छति -गन्तुं), विच्छिद् in pass. (-च्छिद्यते), विश्रम् (c. 4. -श्राम्यति -श्रमितुं).—(To desist from) विरम् or निवृत् with abl. c.; 'he ceases from wickedness,' पापाद् विरमति.

To CEASE, *v. a.* (To put a stop to) निवृत् in caus. (-वर्त्तयति -यितुं), निवृत्, विरम् in caus. (-रमयति -यितुं), उपरम्, शम् in caus. (शमयति -यितुं).

CEASED, *p. p.* विरतः -ता -तं, उपरतः -ता -तं, अवरतः -ता -तं, व्युपरतः -ता -तं, निवृत्तः -त्ता -त्तं, प्रशान्तः -न्ता -न्तं, शान्तः -न्ता -न्तं, विगतः -ता -तं, विश्रान्तः -न्ता -न्तं, विच्छिन्नः -न्ना -न्नं, निरस्तः -स्ता -स्तं; 'one whose fever has ceased,' विगतज्वरः or गतज्वरः or वीतज्वरः or शान्तज्वरः; 'one who has ceased from desire after worldly objects,' उपरतविषयाभिलाषः -षा -षं.

CEASELESS, *a.* अविरतः -ता -तं, अनवरतः -ता -तं, निरन्तरः -रा -रं, अनिवृत्तः -त्ता -त्तं, अविश्रान्तः -न्ता -न्तं, नित्यः -त्या -त्यं.

CEASELESSLY, *adv.* अविरतं, अनवरतं, निरन्तरं, नित्यं.

CEASING, *s.* विरतिः *f.*, निवृत्तिः *f.*, अवरतिः *f.*, उपरामः -रमः -रतिः *f.*, आरतिः *f.*

CECITY, *s.* अन्धता -त्वं, तिमिरं, अदृष्टिः *f.*, दृष्टिहीनता.

CECUTIENSY, *s.* दृष्टिवैकल्यं, नेत्रेन्द्रियवैकल्यं, नाकुलान्ध्यं, कुदृष्टिः *f.*

CEDAR, *s.* देवदारुः *m.* -रु *n.*, सारः *n.* (स्), सारस्तरुः *m.*

To CEDE, *v. a.* (To give up) उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, वितॄ (c. 1. -तरति -तरितुं -तरीतुं), त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, अनुदा (c. 3. -ददाति -दातुं), अनुज्ञा (c. 9. -जानाति -ज्ञातुं), प्रोत्सृ in caus. (-सारयति -यितुं).—(To go over) अभ्युपे (c. 2. अभ्युपैति, अभ्युपेतुं), वशीभू.

CEDED, *p. p.* उत्सृष्टः -ष्टा -ष्टं, विसर्जितः -ता -तं, प्रोत्सारितः -ता -तं, वितीर्णः -र्णा -र्णं, त्यक्तः -क्ता -क्तं.

CEDRINE OR CEDARN, *a.* देवदारुमयः -यी -यं, देवदारुसम्बन्धीयः -या -यं.

To CEIL, *v. a.* छत्रःपटलेन छद् (c. 10. छादयति -यितुं), आच्छद्.

CEILING, *s.* छत्रःपटलः, छत्रच्छादं -दनं, छत्राच्छादनं, पटलः, चालः.

CELANDINE, *s.* अरुष्करनिर्य्यासविशिष्टः पीतपुष्प ओषधिभेदः, बहुदुग्धिका.

CELATURE, *s.* तक्षणं, तक्षणकर्म्म *n.* (न्), नानारेखादिना अलङ्करणविद्या.

To CELEBRATE, *v. a.* प्रशंस् (c. 1. -शंसति -शंसितुं), स्तु (c. 2. स्तौति, स्तोतुं), ख्या (c. 2. -ख्याति -ख्यातुं), कृत् (c. 10. कीर्त्तयति -यितुं), श्लाघ् (c. 1. श्लाघते, श्लाघितुं), वन्द् (c. 1. वन्दते -न्दितुं), पूज् (c. 10. पूजयति -यितुं), श्रु in caus. (-श्रावयति -यितुं), प्रथ् in caus. (प्रथयति -यितुं), प्रकाश् in caus. (-काशयति -यितुं), अनुवर्ण् (c. 10. -वर्णयति -यितुं).—(To perform solemnly) सेव् (c. 1. सेवते, सेवितुं), विधिवत् कृ, यथाविधि अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं) or सम्पद् in caus. (-पादयति -यितुं) or निर्व्वह् in caus. (-वाहयति -यितुं) or पाल् (c. 10. पालयति -यितुं) or आचर् (c. 1. -चरति -चरितुं) or पॄ (c. 10. पारयति -यितुं).—(To celebrate on the lyre) उपवीण (nom. -वीणयति -यितुं).

CELEBRATED, *a.* विश्रुतः -ता -तं, ख्यातः -ता -तं, विख्यातः -ता -तं, प्रथितः -ता -तं, प्रसिद्धः -द्धा -द्धं, कीर्त्तिमान् -मती -मत् (त्), कीर्त्तितः -ता -तं, स्तुतः -ता -तं, अनुवर्णितः -ता -तं, लब्धशब्दः -ब्दा -ब्दं, यशस्वी -स्विनी -स्वि (न्), यशस्वान् -स्वती -स्वत् (त्), प्रतीतः -ता -तं, विज्ञातः -ता -तं, विज्ञः -ज्ञा -ज्ञं.—(In song) उपगीतः -ता -तं, उपगीयमानः -ना -नं; 'to be celebrated,' प्रशंस् in pass. (-श्रूयते), विश्रु in pass. (-श्रूयते), प्रथ् (c. 1. प्रथते, प्रथितुं); 'by mention,' अभिपद् in pass. (पद्यते), परिपद्.—(As a festival) अभ्युदितः -ता -तं.

CELEBRATION, *s.* (Solemn performance) सेवनं, निषेवणं, विधिवत् पालनं or अनुष्ठानं or आचरणं, अभ्युदयः.—(Praise) स्तुतिः *f.*, स्तवः, वर्णना, प्रशंसा, पूजा, कीर्त्तनं, उत्कीर्त्तनं, श्लाघा.

CELEBRITY, *s.* (Fame) कीर्त्तिः *f.*, यशः *n.* (स्), ख्यातिः *f.*, सुख्यातिः *f.*, विश्रुतिः *f.*, प्रसिद्धिः *f.*, प्रकीर्त्तिः *f.*, विख्यातिः *f.*, प्रविख्यातिः *f.*, प्रतिख्यातिः *f.*, प्रतिपत्तिः *f.*, विश्रावः, प्रथा, सम्प्रथा, प्रथितिः *f.*, प्रतिष्ठा; 'conferring celebrity,' यशस्करः -री -रं, कीर्त्तिकरः -री -रं.

CELERITY, *s.* शीघ्रता, वेगः, जवः, त्वरा, रभसः, तूर्णिः *m.*, आशुगमनं.

CELERY, *s.* अजमोदाजातीयः शाकप्रभेदः.

CELESTIAL, *a.* (Relating to heaven, or the sky, divine) स्वर्गीयः -या -यं, दिव्यः -व्या -व्यं, दिविजः -जा -जं, दिविष्टः -ष्टा -ष्टं, दैवः -वी -वं, देवकीयः -या -यं, देवार्हः -र्हा -र्हं, सौरः -री -रं, आमरीकः -की -कं, वैहायसः -सी -सं, विहायसीयः -या -यं, नभःस्थः -स्था -स्थं; 'clothed in celestial raiment,' दिव्यवस्त्रः -स्त्रा -स्त्रं; 'celestial nymph,' स्वर्वेश्या.—(Excellent) परमः -मा -मं, उत्तमः -मा -मं.

CELIBACY OR CELIBATE, *s.* अविवाहः, अनुद्वाहः, अपरिणयनं, अपाणिग्रहणं, अविवाहावस्था, अकृतविवाहत्वं; 'living in celibacy,' अविवाहितः.

CELL, *s.* (A small cavity) बिलं, छिद्रं, रन्ध्रं, कूपः, कुहरं.—(A small apartment) कुटी, कक्षः.—(In a prison) कारागारे कुटी or कक्षः or उपरोधकं, अवरोधनशालिका, गुप्तिः *f.*—(A cottage) कुटीरः.—(The habitation of a religious person) मठः, आश्रमः.

CELLAR, *s.* गुप्तिः *f.*, भूतिकीलः, अवटः -टिः *m.*, गृहतले or गृहस्याधस्तात् भूमौ खातो मद्यादिकोष्ठः.

CELLARIST, *s.* धर्म्मचारिणां मठे मद्यादिरक्षकः or भोजनाधिकारी *m.* (न्).

CELLULAR, *a.* सूक्ष्मकूपविशिष्टः -ष्टा -ष्टं, सूक्ष्मरन्ध्रपूर्णः -र्णा -र्णं, मधुकोषाकारः -रा -रं.

CELSITUDE, *s.* उच्चता, ऊर्द्धत्वं, उच्चयः, उत्सेधः, समुन्नतिः *f.*, उत्कर्षः.

CEMENT, *s.* (The matter with which two bodies are made to cohere, as mortar) सुधा, लेपः, विलेपः, संलग्नीकरणार्थेन अतिश्यानद्रव्यं.—(Bond of union) बन्धनं, सम्बन्धः, आबन्धः, सन्धिः *m.*

To CEMENT, *v. a.* संलग्नीकृ, संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), संश्लिष् in caus. (-श्लेषयति -यितुं), सम्बन्ध् (c. 9. -बध्नाति -बन्धुं), सन्धा (c. 3. -दधाति -धातुं).

CEMENTATION, *s.* संलग्नीकरणं, संयोजनं, संयोगः, सन्धानं, संश्लेषः.

CEMENTED, *p. p.* संलग्नीकृतः -ता -तं, संयुक्तः -क्ता -क्तं, संश्लिष्टः -ष्टा -ष्टं, सम्बद्धः -द्धा -द्धं, सन्धितः -ता -तं.

CEMETERY, *s.* श्मशानं, प्रेतवनं, पितृवनं, पितृकाननं, पितृवसतिः *f.*, शवस्थानं, शतानकं, रुद्राक्रीडः.

CENATORY, *a.* रात्रिभोजनसम्बन्धी -न्धिनी -न्धि (न्), नक्तभोजनविषयकः -का -कं.

CENOTAPH, *s.* शून्यचैत्यं, चैत्यं, चित्यं, स्थानान्तरे निखातं मृतजनमुद्दिश्य स्मरणचैत्यं.

CENSE, *s.* करः, राजकरं, राजस्वं, शुल्कः.—(Rank) पदं.

CENSER, *s.* धूपाधारः, धूपपात्रं.—(Fire-pan) अङ्गारधानिका.

CENSOR, *s.* नीतिशास्ता *m.* (स्तृ), धर्म्माध्यक्षः, धर्म्माधिकारी *m.* (न्), व्यवहारद्रष्टा *m.* (ष्टृ), आचारोपद्रष्टा *m.* (ष्टृ), कण्टकोद्धर्त्ता *m.* (र्त्तृ), दण्डप्रणेता *m.* (तृ), दोषनिग्रहीता *m.* (तृ), पापनिग्रहकृत्.

CENSORIAN, *a.* नीतिशिष्टिसम्बन्धी -न्धिनी -न्धि (न्) or आचारदर्शनसम्बन्धी.

CENSORIOUS, *a.* निन्दकः -का -कं, घृणी -णिनी -णि (न्), दोषग्राही -हिणी -हि (न्), गुणघाती -तिनी -ति (न्), अपवादकः -का -कं, -दी -दिनी -दि (न्), सापवादः -दा -दं, कुवादः -दा -दं, कुवदः -दा -दं, पापदर्शी -र्शिनी -र्शि (न्), निन्दाशीलः -ला -लं, छिद्रान्वेषी -षिणी -षि (न्), छिद्रानुसारी -रिणी -रि (न्), कुत्सावादी -दिनी -दि (न्) or अगुणवादी, कुचरः -रा -रं, दोषैकदृक् *m. f. n.*, पुरोभागी -गिनी -गि (न्).

CENSORIOUSLY, *adv.* घृणया, सापवादं, निन्दापूर्व्वकं, जुगुप्सया, अपवादशीलत्वात्, छिद्रान्वेषिवत्.

CENSORIOUSNESS, *s.* निन्दकता, अपवादशीलत्वं, छिद्रान्वेषः, परदोषकीर्त्तनं.

CENSORSHIP, *s.* नीतिशास्तृपदं, आचारद्रष्टृपदं, धर्म्माधिकारः, -करणं.

CENSURABLE, *a.* निन्द्यः -न्द्या -न्द्यं, निन्दनीयः -या -यं, निन्दार्हः -र्हा -र्हं, वचनीयः -या -यं, वाच्यः -च्या -च्यं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हणीयः -या -यं, विगर्ह्यः -र्ह्या -र्ह्यं, दोषी -षिणी -षि (न्), अपराधी -धिनी -धि (न्).

CENSURABLENESS, *s.* निन्द्यता, वाच्यता, वचनीयता, सापराधता.

CENSURE, *s.* निन्दा, अपवादः, परीवादः, जुगुप्सा -प्सनं, उपक्रोशः, परिभाषणं, तिरस्कारः, घृणा, उपालम्भः, आक्षेपः, गर्हा, गर्हणं, कुत्सा, निर्वादः, अवर्णः, अवर्णनं, श्रुतीया.

To CENSURE, *v. a.* निन्द् (c. 1. निन्दति, निन्दितुं), प्रणिन्द्, प्रतिनिन्द्, विनिन्द्; प्रत्यादिश् (c. 6. -दिशति -देष्टुं), परिवद् (c. 1. -वदति -वदितुं), अपवद्, गर्ह् (c. 1. गर्हते, गर्हितुं, c. 10. गर्हयति -ते -यितुं), विगर्ह्, परिगर्ह्; तिरस्कृ; कुत्स् (c. 10. कुत्सयति -यितुं), अभिकुत्स्, गुप् in des. (जुगुप्सते -प्सितुं), असूय (nom. असूयति -यितुं), उपालभ् (c. 1. -लभते -लब्धुं), दोषीकृ, धिक्कृ.

CENSURED, *p. p.* निन्दितः -ता -तं, जुगुप्सितः -ता -तं, तिरस्कृतः -ता -तं, विगर्हितः -ता -तं, निर्भर्त्सितः -ता -तं, धिक्कृतः -ता -तं, अवरीणः -णा -णं, उपालब्धः -ब्धा -ब्धं.

CENSURER, *s.* निन्दकः, अपवादकः, अपवादी *m.* (न्), परिवादी *m.* (न्), निन्दाकृत्.

CENT, *s.* शतं; 'five per cent.,' शते विंशभागः, पञ्चकं शतं, पञ्चोत्तरं; 'two per cent.,' द्विकं शतं.

CENTAUR, *s.* जन्तुविशेषो यस्य पृष्ठभागः पुरुषाकारः पश्चिमभागश्च अश्वाकृतिः, पृष्ठकालीनकविभिः कल्पितो नरोर्द्धकायो वाज्यधःकायो जन्तुविशेषः, अर्द्धेन अश्वो अर्द्धेन पुरुषो जन्तुः, राक्षसः, दैत्यः.

CENTAURY, *s.* तिक्तस्वाद ओड्रपुष्पसवर्ण ओषधिप्रभेदः.

CENTENARIAN, *s.* (One a hundred years of age) शतायुः *m.* (स्), शतवर्षः.

CENTENARY, *a.* शतकः -का -कं, शतिकः -की -कं, शत्यः -त्या -त्यं.

CENTENARY, *s.* शतकः, शतं; 'a centenary of years,' वर्षशतं, अब्दशतं, शतवर्षं.

CENTENNIAL, *a.* शतवर्षः -र्षा -र्षं, शताब्दः -ब्दा -ब्दं, शतवत्सरः -रा -रं.

CENTESIMAL, *a.* शततमः -मी -मं.—(Hundredth part) शतभागमध्ये एकभागः.

CENTIFOLIOUS, *a.* शतपत्रः -त्री -त्रं, शतपर्णः -र्णी -र्णं, शतच्छदः -दा -दं.

CENTIPEDE, *s.* शतपदी *f.*, शतपाद् *f.*, शतपादिका, पृथिका, वृश्चिकः, कर्णशलोका -काः (स्).

CENTO, *s.* (A poem formed by scraps) प्रकीर्णकाव्यं, खण्डकाव्यं, नानाग्रन्थसङ्गृहीतं काव्यं.—(A collection of a hundred stanzas) शतकः.

CENTRAL OR CENTRICAL, *a.* मध्यः -ध्या -ध्यं, मध्यमः -मा -मं, मध्यमीयः -या -यं, मध्यस्थः -स्था -स्थं, मध्यस्थायी -यिनी -यि (न्), गर्भस्थः -स्था -स्थं, मध्यवर्त्ती -र्त्तिनी -र्त्ति (न्).

CENTRALITY, *s.* मध्यत्वं, मध्यस्थता -त्वं, मध्यमत्वं.

CENTRE, *s.* (The middle, interior) मध्यं, मध्यः, मध्यस्थानं, मध्यस्थलं, गर्भः, उदरं, अभ्यन्तरं, हृदयं; 'in the centre,' मध्ये, अभ्यन्तरे.—(Of a circle) केन्द्रं, चतुर्थ्यं.

To CENTRE, *v. n.* (To rest on) अवलम्ब् (c. 1. -लम्बते -लम्बितुं), समालम्ब्, संश्रि (c. 1. -श्रयति -श्रयितुं).—(To meet together in one point) मध्यस्थानं or एकस्थानं प्रति सम् (c. 2. समेति, समेतुं), एकत्र समागम् (c. 1. -गच्छति -गन्तुं) or सम्मिल् (c. 6. -मिलति -मेलितुं).

CENTRICALLY, *adv.* मध्यतस्, मध्यं प्रति, मध्ये, मध्यस्थाने, मध्यमुद्दिश्य.

CENTRIFUGAL, *a.* केन्द्रापजिगमिषुः -षुः -षु, मध्यापजिगमिषुः -षुः -षु.

CENTRIPETAL, *a.* केन्द्रजिगमिषुः -षुः -षु, केन्द्राभिपिपतिषुः -षुः -षु, मध्यं प्रति पतयालुः -लुः -लु or पातुकः -का -कं.

CENTUPLE, *s.* शतगुणः -णा -णं, शतधा *ind.*

To CENTUPLICATE, *v. a.* शतगुणं -णां -णं कृ, शतगुणीकृ, शतधा कृ.

To CENTURIATE, *v. a.* शतभागशः कृ, शतखण्डशः कृ, शतधा कृ, शतखण्डीकृ.

CENTURION, *s.* शतसेनापतिः *m.*, शतयोधमुख्यः, शतसैन्याधिपतिः *m.*

CENTURY, *s.* (Space of a hundred years) वर्षशतं, शतवर्षं, वत्सरशतं, अब्दशतं.—(A hundred) शतं, शतकः.

CEPHALALGY, *s.* शिरोवेदना, शीर्षवेदना, शिरःपीडा, शिरोव्यथिः *f.*, शिरोरोगः.

CEPHALIC, *a.* मस्तकपथ्यः -थ्या -थ्यं, मस्तिष्करोगघ्नः -घ्नी -घ्नं.

CERASTES, *s.* शृङ्गविशिष्टः सर्पभेदः, विषाणी व्यालः, शृङ्गी.

CERATE, *s.* सिक्थादिनिर्म्मितः or सिक्थतैलादिमयः क्षतशमक उपनाहः.

CERATED, *a.* सिक्थाक्तः -क्ता -क्तं, सिक्थमयः -यी -यं, सिक्थानुलिप्तः -प्ता -प्तं.

To CERE, *v. a.* सिक्थेन लिप् (c. 6. लिम्पति, लेप्तुं) or अञ्ज् (c. 7. अनक्ति, अंक्तुं).

CEREBRAL, *a.* मस्तिष्कसम्बन्धकः -का -कं; 'a cerebral letter,' मूर्द्धन्यं.

CEREBRUM, *s.* मस्तिष्कं, मस्तिष्कः, गोहीं, मस्तकस्नेहः.

CERECLOTH OR CEREMENT, *s.* सिक्थाक्तं वस्त्रं, शववस्त्रं.

CEREMONIAL, *s.* व्यवहारः, आचारः, रीतिः *f.*, विधिः *m.*, विधानं, नियमः, कृत्यं, नित्यकृत्यं, आह्निकाचारः, संस्कारः, क्रियाविधिः *m.*, शास्त्रविधानं.—(Sacrificial) यज्ञकर्म्म *n.* (न्), विधियज्ञः, इष्टिः *f.*

CEREMONIAL, *a.* वैधिकः -की -कं, वैधः -धी -धं, नैयमिकः -की -कं, आचारिकः -की -कं, व्यावहारिकः -की -कं, ऐष्टिकः -की -कं, पौरश्चिकः -की -कं.

CEREMONIOUS, *a.* अतिशयेन आदरकृत्, अतिशयेन आदृतः -ता -तं or सभ्याचारसेवी -विनी -वि (न्), अतिसभ्यः -भ्या -भ्यं or अत्यञ्जलिकृत्, एकान्तसभ्यः -भ्या -भ्यं, सभ्यम्मन्यः -न्या -न्यं, एकान्तप्रश्रितः -ता -तं, एकान्तप्रणयी -यिनी -यि (न्), अतिसमादरकृत्, अत्यादृतः -ता -तं, अतिसम्भाजनकृत्, अत्यानन्दनकृत्, अत्यनुनयी -यिनी -यि (न्).

CEREMONIOUSNESS, *s.* (The use of too much ceremony) अत्यादरः, अतिशयेन शिष्टाचारानुष्ठानं, or सभ्याचारसेवनं, अतिसौजन्यं, अतिप्रश्रयः, अत्यनुनयः, अतिसम्भाजनं, अतिसमादरः, अत्यानन्दनं.

CEREMONIOUSLY, *adv.* एकान्तादरपूर्व्वं, अतिसमादरेण, अतिप्रश्रयेण, अतिशयसम्भाजनं.

CEREMONY, *s.* (Rite) विधिः *m.*, नियमः, संस्कारः, विधानं, कृत्यं, नित्यकृत्यं, कर्म्म *n.* (न्), नित्यकर्म्म *n.* (न्), क्रिया, आह्निकाचारः, दीक्षा; 'engaged in ceremonies,' दीक्षितः; 'occasional ceremony,' नैमित्तिककर्म्म *n.* (न्); 'marriage ceremony,' विवाहविधिः *m.*—(Form of civility) शिष्टाचारविधिः *m.*, सभ्याचारविधिः *m.*, सौजन्यरीतिः *f.*

CERTAIN, *a.* (Sure) ध्रुवः -वा -वं, अवश्यंकः -का -कं, सुनिश्चितः -ता -तं. —(Not admitting doubt) असन्दिग्धः -ग्धा -ग्धं, असंशयः -या -यं, निःसन्दिग्धः -ग्धा -ग्धं, निःसन्देहः -हा -हं, निःसंशयः -या -यं; 'it is certain,' अत्र न संशयः.—(Settled, determined, resolved) निश्चितः -ता -तं, कृतनिश्चयः -या -यं, निष्पन्नः -न्ना -न्नं, नियतः -ता -तं; 'as to time,' कृतकालः -ला -लं.—(Regular) नित्यः -त्या -त्यं.—(Infallible) अमोघः -घा -घं.—(Particular) सविशेषः -षा -षं.—(Some) कश्चित् काचित् किंचित्, कोऽपि कापि किमपि, कश्चन काचन किंचन; 'some few,' कतिचित् *ind.*, कतिपयः -या -यं, कियान् -यती -यत् (त्); 'a certain person,' कश्चित्; 'a certain lion,' कश्चित् सिंहः, or in more modern Sanscrit एकः सिंहः; 'certain people,' कतिपयलोकाः; 'certain teachers,' कियन्तोऽध्यापकाः; 'on a certain time,' एकदा, कदाचित्, विशेषकाले.

CERTAINLY, *adv.* अवश्यं, निश्चितं, सुनिश्चितं, असंशयं, ध्रुवं, नूनं, खलु, किल, नाम, तत्त्वतस्, संशयं विना, अत्र न संशयः, कः सन्देहः, कोऽत्र सन्देहः.

CERTAINNESS, or CERTAINTY, or CERTITUDE, *s.* निश्चयः, निर्णयः, नैश्चित्यं, अवश्यकता, दृढप्रमाणं, ध्रुवत्वं, असन्दिग्धता; 'certainties,' ध्रुवाणि.

CERTIFICATE, *s.* प्रमाणपत्रं, अभिज्ञानपत्रं, निर्णयपत्रं, निश्चयपत्रं, सत्यापनपत्रं, निदर्शनपत्रं, आगमपत्रं, नियोक्ता *m.* (तृ).

To CERTIFY, *v. a.* (To inform) ज्ञा in caus. (ज्ञापयति -यितुं), विज्ञा.—(To bear testimony, give proof) प्रमाणीकृ, सप्रमाणं -णां -णं कृ, दृढीकृ, स्थिरीकृ, सत्याकृ, प्रमाणपत्रेण or अभिज्ञानपत्रेण निर्णयं कृ.

CERVICAL, *a.* ग्रैवः -वी -वं, ग्रैवेयः -यी -यं, कण्ठ्यः -ण्ठ्या -ण्ठ्यं.

CERULEAN, *a.* नीलः -ला -लं, नीलवर्णः -र्णा -र्णं, आकाशवर्णः -र्णा -र्णं.

CERUMEN, *s.* (Ear-wax) कर्णमलः -लं, तोकमं, कर्णगूथः, कर्णविट् (ष्).

CERUSE, *s.* (White lead) श्वेतरञ्जनं, शुक्लवर्णः सीसकविशेषः.

CESARIAN, *a.* (Operation) गर्भोच्छेदनं, भ्रूणोत्कर्तनं.

CESS, *s.* (A sum levied) करः, शुल्कः -ल्कं, राजस्वं.—(The act of assessing) करग्रहणं, शुल्कग्रहणं.

To CESS, *v. a.* (To assess) करं or शुल्कं or राजस्वं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or दा in caus. (दापयति -यितुं).

CESSATION, *s.* विरतिः *f.*, विरामः, अवरतिः *f.*, उपरतिः *f.*, निवृत्तिः *f.*, विनिवृत्तिः *f.*, निर्वृतिः *f.*, निग्रहणं, निर्वेशनं, विच्छेदः, उपशमः, अपशमः, क्षयः; 'cessation of arms,' अवहारः.—(Without cessation) अविरतं, अनवरतं, निरन्तरं; 'cessation of affection,' स्नेहच्छेदः.

CESSAVIT, *s.* अमुकजनो यर्वेद्वयप्रभृति अद्य यावत् करं न दत्तवान् इति ज्ञापनार्थं लेख्यं.

CESSIBLE, *a.* त्याज्यः -ज्या -ज्यं, प्रदेयः -या -यं, विसर्जनीयः -या -यं.

CESSION, *s.* त्यागः, परित्यागः, प्रदानं, वितरणं, विसर्जनं, समर्पणं.

CESSMENT, *s.* करग्रहणं, शुल्कग्रहणं, राजस्वग्रहणं, करदापनं.

CESSOR, *s.* नियतधर्म्मैनिरपेक्षत्वात् or करदानमन्दादरत्वात् पूर्व्वोक्तलेख्यद्वारेण अभियोक्तव्यः.

CESTUS, *s.* रतिमेखला, रतिरसना, रतिकलापः.

CETACEOUS, *a.* तिमिजातीयः -या -यं, मीनरजातीयः -या -यं.

CEYLON, *s.* (The island) सिंहलद्वीपः, सिंहलं, लङ्का.

CHAD, *s.* पाठीनः, मद्गुरः, शृङ्गी *f.*

To CHAFE, *v. a.* (To rub, make hot by rubbing) घृष् (c. 1. घर्षति, घर्षितुं), आघृष्, निघृष्, संवाहं कृ, घर्षणेन तप् in caus. (तापयति -यितुं).—(To irritate) तप् in caus., परितप्, बाध् (c. 1. बाधते, बाधितुं).—(To make angry) कुप् in caus. (कोपयति -यितुं), प्रकुप्, रुष् in caus. (रोषयति -यितुं).

To CHAFE, *v. n.* तप् in pass. (तप्यते), परितप्, सन्तप्, दुर्मनस् (nom. दुर्मनायते), क्लिश् (c. 4. क्लिश्यते, क्लेशितुं), कुप् (c. 4. कुप्यति -ते, कोपितुं), प्रकुप्, रुष् (c. 4. रुष्यति, रोषितुं), क्रुध् (c. 4. क्रुध्यति, क्रोद्धुं), मन्यु (nom. मन्यूयति); 'chafing,' आतप्यमानः -ना -नं.

CHAFE, *s.* प्रकोपः, उत्तापः, परितापः, मनस्तापः, क्लेशः, रोषः, मन्युः *m.*, अमर्षः,

CHAFER, *s.* पिङ्गशरीरो ध्वनमोदी भ्रमरप्रभेदः.

CHAFF, *s.* घुसं, घुर्वं, तुषः -षा, तुच्छं, तुच्छधान्यकं, धान्यकल्कं, कडङ्गरः, निष्पावः.—(Freed from the chaff) निस्तुषः -षा -षं.

To CHAFFER, *v. a.* पण् (c. 1. पणते, पणितुं or पणायति -यितुं), पणं कृ, पणीकृ, विपणीकृ, कुत्सितप्रकारेण पणायां कृ or क्रयविक्रयं कृ.

CHAFFERN, *s.* उदस्थाली, स्थाली, पिठरः, उखा.

CHAFFINCH, *s.* वुसप्रियः क्षुद्रपक्षिप्रभेदः.

CHAFFLESS, *a.* निस्तुषः -षा -षं, तुषरहीनः -ना -नं, तुषरहितः -ता -तं.

CHAFFY, *a.* तुषमयः -यी -यं, तुषोपमः -मा -मं, लघुः -घुः -घु.

CHAFING-DISH, *s.* अङ्गारधानिका, अङ्गारशकटी *f.*, अङ्गारिः *f.* -रिणी, कटाहः.

CHAGRIN, *s.* क्लेशः, मन्युः *m.*, शोकः, विडम्बना, व्यथा, असन्तोषः.

To CHAGRIN, *v. a.* दुःख् (c. 10. दुःखयति -यितुं), क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), व्यथ् in caus. (व्यथयति -यितुं), तप् in caus. (तापयति -यितुं), सन्तप्, परितप्, शुच् in caus. (शोचयति -यितुं).

CHAGRINED, *p. p.* आगतमन्युः -न्युः -न्यु, सञ्जातव्यथः -था -थं, दुःखितः -ता -तं, उद्विग्नः -ग्ना -ग्नं.

CHAIN, *s.* शृङ्खलः -ला -लं, रासः.—(Fetter) लोहबन्धनं, लौहबन्धं, निगडः -डं, बन्धनं, पाशः; 'a gold chain,' कनकसूत्रं.—(A series) श्रेणी, पर्य्यायः, पंक्तिः *f.*, अनुक्रमः, माला; 'a chain of causes,' कारणमाला.

To CHAIN, *v. a.* शृङ्खलया or निगडेन बन्ध् (c. 9. बध्नाति, बन्धुं), शृङ्खल (nom. शृङ्खलयति -यितुं), निगड (nom. निगडयति -यितुं).

CHAINED, *p. p.* शृङ्खलितः -ता -तं, निगडितः -ता -तं, शृङ्खलाबद्धः -द्धा -द्धं.

CHAIN-PUMP, *s.* शृङ्खलासञ्चारितं जलोत्तोलनयन्त्रं or घटीयन्त्रं.

CHAIN-SHOT, *s.* शृङ्खलाबद्धं युद्धयन्त्रात् प्रक्षेपणीयं लोहगोलद्वयं.

CHAIN-WORK, *s.* शृङ्खलकर्म्म *n.* (न्), शृङ्खलारूपेण निर्म्मितं यत् किंचिद् चित्रलकर्म्म.

CHAIR, *s.* पीठं, आसनं, पिठरः, चित्तरः, संवेशः.—(Wheel-chair) यानं.

CHAIRMAN, *s.* सभापतिः *m.*, सभाधिकृतः, गोष्ठीपतिः, श्रेष्ठी *m.* (न्), प्रामाणिकः.—(One whose profession it is to carry a chair) प्रवहणिकः.

CHAISE, *s.* यानविशेषः, रथः, क्रीडारथः, पुष्परथः, वाहनं.

CHALCOGRAPHY, *s.* ताम्रफलके or पित्तलफलके लिखनविद्या.

CHALDRON, *s.* पिठरः, उखा, स्थाली, उदस्थाली, पिष्टपचन.

CHALICE, *s.* कंसः, पात्रं, भाजनं, शरावः, यज्ञपात्रं, यज्ञभाजनं.

CHALK, *s.* कठिनी, खटिनी, कठिका, खटिका, खडिका, चूर्णः -र्णं, श्वेतधातुः *m.*, शुक्लधातुः, वर्णलेखा, पाण्डुमृत् *f.*, शिलाधातुः, सितोपलः, पाकशुक्ला, धवलमृत्तिका.—(Red chalk) गैरेयं, सर्ज्यं, गिरिजं, अश्मजं, शिलाजतु *n.*

To CHALK, *v. a.* (To mark with chalk) कठिन्या चिह्न् (c. 10. चिह्नयति -यितुं) or लिख् (c. 6. लिखति, लेखितुं).

CHALK-CUTTER, *s.* कठिनीखनकः, कठिनीखनिता *m.* (तृ), शुक्लधातुखनकः.

CHALKY, *a.* कठिनीमयः -यी -यं, श्वेतधातुपूर्णः -र्णा -र्णं, कठिनीसंसृष्टः -ष्टा -ष्टं.

To CHALLENGE, *v. a.* आह्वे (c. 1. -ह्वयति -ते -ह्वातुं), उपाह्वे, समाह्वे; द्वन्द्वयुद्धार्थं or नियुद्धार्थम् आह्वे; स्पर्ध् (c. 1. स्पर्धते, स्पर्धितुं), आक्रन्द् (c. 1. -क्रन्दति -क्रन्दितुं), प्रत्यर्ध् (c. 10. -अर्धयति -यितुं).—(To accuse) अभियुज् (c. 7. -युनक्ति -योक्तुं).—(To claim as one's own due)

आत्मसात्कृ, स्वीकृ, मम देयं or मह्यं दातव्यमिति ज्ञापयित्वा ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or in des. (जिघृक्षति -क्षितुं).

CHALLENGE, *s.* आह्वानं, समाह्वयः -ह्वानं, योधसंरावः, क्रन्दितं, अभिग्रहः. —(A writing containing a challenge) युद्धाह्वानपत्रं, द्वन्द्वयुद्धार्थम् आह्वानपत्रं.

CHALLENGED, *p. p.* आहूतः -ता -तं, समाहूतः -ता -तं, कृताह्वानः -ना -नं.

CHALLENGER, *s.* आह्वानकर्त्ता *m.* (र्त्तृ), समाह्वानकृत्, समाह्वाता *m.* (तृ), अभियोक्ता *m.* (क्तृ).

CHALLENGING, *s.* (Act of) आह्वानं, हूतिः *f.*, हवः, क्रन्दनं, स्पर्द्धा.

CHALYBEATE, *a.* अयःसंसृष्टः -ष्टा -ष्टं, लोहव्याप्तः -प्ता -प्तं, लोहगुणविशिष्टः -ष्टा -ष्टं, लोहघटितः -ता -तं; 'a chalybeate pill,' अयोगुडः.

CHAMADE, *s.* युद्धे पराजयसूचकं or सम्प्रदानसूचकं पटहताडनं.

CHAMBER, *s.* कोष्ठः, प्रकोष्ठः, शाला, शालिका, आगारः -रं, गृहं, स्थलं, आवासः, वासभवनं, कक्षः, कुटी, कुटिः *f.*; 'bed-chamber,' शयनागारः, स्वप्ननिकेतनं, शयनशाला, शय्यावेश्म *n.* (न्); 'an inner chamber,' उपरोधकं, कक्षान्तरं; 'an upper chamber,' उपरिस्थः प्रकोष्ठः; चन्द्रशालिका, शिरोगृहं.—(A cavity) कोष्ठः, गर्त्तः, विलं, कुहरं.

To CHAMBER, *v. n.* लम्पटवत् स्त्रियो गम् (c. 1. गच्छति, गन्तुं) or अभिगम्, लम्पटाचारः -रा -रं अस्.

CHAMBERING, *s.* स्त्रीगमनं, नार्य्यभिगमनं, स्त्रीसेवा, नारीप्रसङ्गः, लम्पटता.

CHAMBERLAIN, *s.* शयनाधिकृतः, अन्तःपुरवर्त्ती *m.* (न्), अन्तर्वंशिकः, कञ्चुकी *m.* (न्), स्थापत्यः, वस्त्रगृहाधीशः, द्वाःस्थितदर्शकः, बन्धुलः.

CHAMBERMAID, *s.* शयनशालायां शय्यादिपरिकल्पिका परिचारिका or दासी.

CHAMELEON, *s.* सरटः, सरटुः, प्रतिसूर्य्यः, कुलाहकः. *See* CAMELEON.

To CHAMFER, *v. a.* स्तम्भस्य परितः सीताकारा रेखा लिख् (c. 6. लिखति, लेखितुं).

CHAMFER or CHAMFRET, *s.* स्तम्भस्य परितो लिखिता सीताकारा रेखाः, स्तम्भरेखा, स्तम्भसीता.

CHAMOIS, *s.* वातप्रमीयः, वनछागजातीयो गिरिप्रियो महावेगो जन्तुभेदः.

CHAMOMILE, *s.* अतितिक्तरसविशिष्टः सुगन्ध ओषधिभेदः.

To CHAMP, *v. a.* चर्व् (c. 1. चर्वति, चर्वितुं), दंश् (c. 1. दशति, दंष्टुं), परिदंश्, दन्तघर्षं कृ; 'to champ the bit,' खलीनं परिदंश्.

CHAMPAIGN, *s.* समभूमिः *f.*, समभूभागः, समस्थलं -ली, समप्रदेशः, निर्व्वनभूमिः *f.*

CHAMPAKA, *s.* (A plant) चम्पकः, चाम्पेयः, हेमपुष्पकः, स्थिरगन्धः, स्थिरपुष्पः.—(Its flower) गन्धफली.

CHAMPIGNON, *s.* छत्राप्रभेदः, छत्राकं, उच्छिलीन्ध्रं, शिलीन्ध्रं.

CHAMPION, *s.* (A warrior) भटः, सुभटः, वीरः, प्रवीरः, योद्धा *m.* (द्धृ), प्रयुयुत्सुः *m.*, विक्रान्तः, गण्डीरः, नासीरः.—(A defender) रक्षकः, रक्षिता *m.* (तृ), परिरक्षी *m.* (न्).

CHANCE, *s.* दैवं, दैवयोगः, दैवगतिः *f.*, घटना, दैवघटना, सङ्गतिः *f.*, अकस्मात्सङ्गतं, आगन्तुः *m.*, अतिवर्त्तनं.—(Unfortunate chance) विपद्, आपद्; 'a game of chance,' अक्षादिक्रीडा, द्यूतं; 'trusting too much to chance,' दैवपरः, दैवायत्तः, दैवचिन्तकः; 'by chance,' अकस्मात्, दैवात्, दैववशात्, घटनया, अनपेक्षं, प्रमादेन.—(State of doubt) संशयः; 'committed to chance,' संशयस्थः -स्था -स्थं.

To CHANCE, *v. n.* अकस्मात् सम्भू (c. 1. -भवति -भवितुं) or सम्पद् (c. 4. -पद्यते -पत्तुं) or समापद् or उपस्था (c. 1. -तिष्ठति -स्थातुं) or समुपस्था, or आपत् (c. 1. -पतति -पतितुं).

CHANCEL, *s.* पूजाशालायाः पूर्व्वदिश्यो महापवित्रत्वाद् व्यवधानेन अवरुद्धो भागः, मन्दिरस्य प्राचीनभागः.

CHANCELLOR, *s.* महाप्राड्विवाकः, प्रधानधर्म्माध्यक्षः, महाविचारकः, महाशासनकर्त्ता *m.* (र्त्तृ).—(Chancellor of the Exchequer) कोशाधीशः. —(Of the University) राजविद्यालयाधिपतिः *m.*

CHANCELLORSHIP, *s.* महाप्राड्विवाकत्वं, प्रधानधर्म्माध्यक्षस्य पदं or अधिकारः.

CHANCE-MEDLEY, *s.* डिम्बाहवे अनिच्छातो नृहत्या or मनुष्यमारणं.

CHANCER, *s.* विद्रधिः *m.*, उपदंशः, गलितक्षतं. *See* CANCER.

CHANCERY, *s.* दण्डनैष्ठुर्य्यशमका महाविचारणसभा, महाविचारस्थानं, धर्म्मीयतानियामकः सभाविशेषः.

CHÁNDÁLA, *s.* (An outcaste or man of a degraded tribe) चाण्डालः, चण्डालः, मातङ्गः, निषादः, दिवाकीर्त्तिः, श्वपचः, जनङ्गमः, अन्तेवासी, पुक्कसः, प्लवः.

CHANDELIER, *s.* दीपवृक्षः, दीपपादपः, शिखातरुः, शिखावृक्षः, दीपाधारः.

CHANDLER, *s.* (A huckster) वार्त्तावहः, वैवधिकः, विवधिकः; 'a corn-chandler,' धान्यमायः.—(One who makes or sells candles) दीपिकाकृत्, दीपविक्रेता *m.* (तृ).

To CHANGE, *v. a.* विकृ (c. 8. -करोति -कर्त्तुं), अन्यरूपं -पीं -पं कृ, भिन्नरूपं -पीं -पं कृ, विपर्यस् (c. 4. -अस्यति, असितुं).—(To barter) निमे (c. 1. -मयते -मातुं), विमे, विनिमे, परिवृत् in caus. (-वर्त्तयति -यितुं); 'he changes beans for sesamum-seed,' तिलेभ्यः प्रति माषान् ददाति.—(To change the mind) अन्यमानसीभू, विपरीतं विज्ञा (c. 9. -जानाति -ज्ञातुं).—(To change a note) हुण्डिकापत्रं सुवर्णरूप्यादिभिः परिवृत्.—(To change gold for coin of less value) सुवर्णरूप्यादिकं कुप्यनाणकपणकपर्दादिभिः परिवृत्.—(To change one's clothes) वासांसि अवतार्य्य or विहाय or अवमुच्य अपराणि परिधा (c. 3. -दधाति -धातुं).

To CHANGE, *v. n.* विकृ (c. 8. -कुरुते), विकृतीभू, अन्यथा भू, अन्यरूपः -पी -पं भू, भिन्नरूपः -पी -पं भू, विकृताकारः -रा -रं भू; 'the mouse was changed into a cat,' मूषिको विडालः कृतः.—(To change in mind) विमनीभू.—(To change one's evil course) पापाद् विनिवृत् (c. 1. -वर्त्तते -वर्त्तितुं) or निवृत्.

CHANGE, *s.* विकारः, विकृतिः *f.*, विक्रिया, वैकृत्यं, परिणामः, विपरिणामः, विपर्य्ययः, परिवर्त्तः, अन्यथाभावः.—(Vicissitude) आवृत्तिः *f.*, परिवृत्तिः *f.*; 'of the seasons,' ऋतुपर्य्यायः.—(Variety) वैचित्र्यं, विभेदः. —(Reformation) निवर्त्तनं.—(Small money) अल्पसारं धनं यथा कुप्यनाणकपणकपर्दकादि, अल्पार्घमुद्रा, क्षुद्रमुद्रा.—(Place where merchants meet) वणिक्समागमचत्वरं, श्रेष्ठिचत्वरं.—(Of the moon) अमावसी, प्रतिपत्, चन्द्रपरिवर्त्तः, पर्व्वसन्धिः *m.*; 'of mind,' बुद्धिभेदः.

CHANGEABLE, *a.* (Possible to be changed) विकार्य्यः -र्य्या -र्य्यं.—(Fickle) अस्थायी -यिनी -यि (न्), अस्थिरः -रा -रं, अधीरः -रा -रं, चलः -ला -लं, चलचित्तः -त्ता -त्तं, चपलः -ला -लं, सङ्कसुकः -का -कं, नैकभावाश्रयः -या -यं, प्रकृतितरलः -ला -लं, अन्यमनाः -नाः -नः (स्), अन्यमानसः -सी -सं.—(Inconstant) अनित्यः -त्या -त्यं.

CHANGEABLENESS, *s.* अस्थिरता, अस्थैर्य्यं, चलचित्तता, चञ्चलत्वं, चापल्यं.

CHANGED, *p. p.* विकारितः -ता -तं, विकृतः -ता -तं, वैकृतः -ता -तं, कृतविक्रियः -या -यं, अन्यरूपः -पी -पं, परिणतरूपः -पी -पं, विपर्यस्तः -स्ता -स्तं, विकृताकारः -रा -रं.—(In feelings) विमनीकृतः -ता -तं, विमनीभूतः -ता -तं.

CHANGELING, *s.* कुलीनपुत्रेण परिवर्त्तितो धात्रीपुत्रः; वेतालेन सुरूपबालकम् अपहृत्य तस्य स्थाने उपसर्ज्जितः कुरूपबालक इति केचिन् मन्यन्ते; उपसर्ज्जितपुत्रः, उपकल्पितपुत्रः, कृत्रिमपुत्रः, पुत्रप्रतिनिधिः *m.*

CHANGER, *s.* हुण्डिकापत्रसुवर्णरूप्यादिपरिवर्त्तकः.

CHANNEL, *s.* (A strait) सङ्कटं.—(The bed of a river) नदीभाण्डं, नदीपात्रं, गर्भः, नदीगर्भः.—(A long excavation, a canal) कुल्या, उपकुल्या, खातं, ग्लालः, प्रणालः.—(A narrow passage) सङ्कीर्णपथः.—(Furrow of a pillar) स्तम्भरेखा, स्तम्भसीता.—(A stream) स्रोतः *n.* (स्).

To CHANNEL, *v. a.* खन् (c. 1. खनति, खनितुं, खातुं), उत्खन्, कुल्याः कृ, सीताः कृ.

To CHANT, *v. n.* गै (c. 1. गायति, गातुं), प्रगै, उद्गै, सुम्न (nom. सुम्नायते), पठ् (c. 1. पठति, पठितुं).

CHANT, *s.* गीतं, गेयं, गानं, गाथा, खलिः *f.*, स्तोत्रं.

CHANTED, *p. p.* गीतः -ता -तं, परिगीतः -ता -तं, पठितः -ता -तं.

CHANTER, *s.* वृद्धाता *m.* (तृ), गायकः, गेष्णुः, गाथिकः, सुम्नयुः *m.*

CHANTICLEER, *s.* उषाकलः, कुक्कुटः, कृकवाकुः, यामघोषः.

CHAOS, *s.* महाभूतादिसाङ्कर्य्यं, प्राग्जगत्सृष्टेर् जलादिभूतानाम् अस्तव्यस्तता, एकार्णवः.—(Confusion) सङ्करः, साङ्कर्य्यं, संक्षोभः, व्यस्तता, अव्यक्तता.

CHAOTIC, *a.* सङ्करीकृतः -ता -तं, अस्तव्यस्तः -स्ता -स्तं, अधरोत्तरः -रा -रं, सङ्कीर्णः -र्णा -र्णं, सङ्कुलः -ला -लं, एकार्णवीभूतः -ता -तं, अव्यक्तः -क्ता -क्तं, अलक्षणः -णा -णं.

To CHAP, *v. n.* (To break into gapings from the effect of cold) शीतोपहतत्वात् त्रुट् (c. 4. त्रुट्यति, त्रुटितुं) or विदल् (c. 1. -दलति -दलितुं) or विभिद् in pass. (-भिद्यते) or विदृ in pass. (-दीर्य्यते) or छिद् in pass. (छिद्यते) or स्फुट् (c. 6. स्फुटति, स्फुटितुं).

CHAP, *s.* (Cleft, chink) त्रुटितं, त्रुटिः *f.* -टी, छिद्रं, रन्ध्रं, गर्त्तः, भित्तिः *f.*; 'in the feet,' पाददारी, अलसः.—(A person, a fellow, contemptuously) माणवः -वकः, मनुष्यकः, नागरः.

CHAPE, *s.* (The catch of any thing by which it is held) बन्धनी, बन्धनकीलकः, सङ्ग्रहणार्थं दन्तकः, ग्रहणी, रक्षणी, आलानं.

CHAPEL, *s.* (Shrine) देवागारः, देवतागारः, देवायतनं, देवालयं.—(A small place of worship subject to a church) महामन्दिराधीना क्षुद्रपूजाशाला, अप्रधानमन्दिरं.—(Of ease) दूरस्थैः सेवितं क्षुद्रभजनभवनं.

CHAPELRY, *s.* क्षुद्रमन्दिराधिकारः, पूर्व्वोक्तपूजाशालाधीनो भूमिभागः.

CHAPERON, *s.* नृत्यगीतादिसमाजे अनूढाम् तरुणीम् उपास्ते या मध्यमवयस्का भाविनी or कुलीना स्त्री.

To CHAPERON, *v. a.* नृत्यगीतादिसमाजे अनूढां तरुणीं युवतिगणं वा उपास् (c. 2. -आस्ते -आसितुं) or उपस्था (c. 1. -तिष्ठति -स्थातुं), or उपचर् (c. 1. -चरति -चरितुं).

CHAPFALLEN, *a.* म्लानवदनः -नी -नं, मलिनमुखः -खी -खं, हताशः -शा -शं.

CHAPITER, *s.* स्तम्भशीर्षं, स्तम्भमस्तकः, स्तम्भशृङ्गं, ऊर्द्ध्वस्तम्भः, स्तम्भस्य ऊर्द्ध्वभागः.

CHAPLAIN, *s.* पुरोहितः, कुलाचार्य्यः, ऋत्विक् *m.* (ज्), कुलगुरुः *m.*, कुलविप्रः.

CHAPLAINSHIP, *s.* पौरोहित्यं, पुरोहितपदं, कुलाचार्य्यपदं, आर्त्विज्यं.

CHAPLET, *s.* माला, माल्यं, स्रक् *f.* (ज्), दाम *n.* (न्), कुसुमावतंसकं, निर्य्यूहः, आपीडः, पीडा; 'chaplet-maker,' मालाकारः, मालिकः; 'chaplets worn in different positions,' गर्भकः, प्रभ्रष्टकं, ललामकं, प्रालम्बं, वैकक्षकं, आपीडः, शेखरः.

CHAPMAN, *s.* आपणिकः, विपणी *m.* (न्), क्रयिकः, विक्रयिकः.

CHAPPED, *p. p.* त्रुटितः -ता -तं, त्रुटितवान् -वती -वत् (त्), विदलितः -ता -तं, विभिन्नः -न्ना -न्नं, विदीर्णः -र्णा -र्णं, छिन्नः -न्ना -न्नं.

CHAPS, *s. pl.* (The mouth of a beast of prey) आस्यं, मुखं, वदनं, हनुः *m.*—(Entrance of a channel) सङ्कटमुखं, सङ्कटप्रवेशः.

CHAPTER, *s.* (Division) अध्यायः, अध्ययः, सर्गः, पर्व्व *n.* (न्), परिच्छेदः, विच्छेदः, काण्डः -ण्डं, खण्डः -ण्डं, स्कन्धः, उच्छ्वासः, आश्वासः, प्रकरणं, लम्बकः.

—(An assembly of canons) महामन्दिरे प्रधानपुरोहितानां सभा.

To CHAR, *v. a.* (To burn wood to a cinder) अङ्गारसात्कृ, अङ्गारीकृ, अङ्गार (nom. अङ्गारयति -यितुं); ईषद्दह् (c. 1. -दहति -दग्धुं).

To CHAR, *v. n.* (To work at other's houses by the day) गृहसम्मार्जने उदकवाहने इत्यादिकुत्सितकर्म्मणि एकदिनमात्रं यावद् व्यापृता भू or नियुज् in pass. (-युज्यते).

CHAR-WOMAN, *s.* गृहसम्मार्जने उदकवाहने इत्यादिकुत्सितकर्म्मणि एकदिनमात्रं नियुक्ता or व्यापृता चेटी, प्रत्यहं भृतिं गृह्णाति या कर्म्मकरी, दिनिकाचेटी, दिनिकाप्रेष्या, प्रेष्या, सैरिन्ध्री.

CHARACTER, *s.* (Disposition) शीलः -लं, शीलत्वं -ता, स्वभावः, वृत्तिः *f.*, स्वरूपं, स्वाभिप्रायः, चारित्रं.—(Property, peculiarity) भावः, गुणः, विशेषः.—(Natural character) स्वभावः, निसर्गः, प्रकृतिः *f.*—(Mark) लक्षणं, चिह्नं, अभिज्ञानं.—(Letter) अक्षरं, वर्णः -र्णं.—(Handwriting) स्वहस्ताक्षरं.—(Personage in a drama) भूमिका.—(Reputation, honour) मर्य्यादा, कीर्त्तिः *f.*, यशः *n.* (स्).—(Dignity) गौरवं

CHARACTERISTIC, *a.* लाक्षणिकः -की -कं, लाक्षण्यः -ण्या -ण्यं, विशेषकः -का -कं, विशेषणः -णा -णं, स्वाभाविकः -की -कं, गुणवाचकः -का -कं.

CHARACTERISTIC, *s.* लक्षणं, विशेषलक्षणं, संलक्षणं, लिङ्गं, चिह्नं, विशेषः -षणं, अभिज्ञानं, संज्ञा, गुणः, उपाधिः *m.*, स्वधर्म्मः, स्वभावः; 'generic property,' समानाधिकरणं; 'specific property,' जातित्वं.

CHARACTERISTICALLY, *adv.* विशेषतस्, सविशेषं, लक्षणतस्.

To CHARACTERIZE, *v. a.* लक्ष् (c. 10. लक्षयति -यितुं), संलक्ष्, उपलक्ष्; विशिष् in caus. (-शेषयति -यितुं), चिह्न् (c. 10. चिह्नयति -यितुं).—(To give an account of the personal qualities) गुणदोषान् व्या[illegible] (c. 2. -ख्याति -ख्यातुं).

CHARACTERIZED, *p. p.* विशिष्टः -ष्टा -ष्टं, विशेषितः -ता -तं, सविशेषः -षा -षं -षणः -णा -णं, लक्षितः -ता -तं, संलक्षितः -ता -तं, उपलक्षितः -ता -तं, कृतलक्षणः -णा -णं, लिङ्गी -ङ्गिनी -ङ्गि (न्).

CHARADE, *s.* सर्व्वतोभद्रः, वर्द्धमानः, प्रवह्लिका, पद्यविरचिता प्रश्नदूती यथा किंस्विच्छीघ्रतरं वायोः किंस्विद्बहुतरं तृणात् मनः शीघ्रतरं वाताच्चिन्ता बहुतरा तृणादिति.

CHARCOAL, *s.* अङ्गारः -रं, निधापकः, दग्धकाष्ठं, दग्धेध्मं.

To CHARGE, *v. a.* (Accuse) अभियुज् (c. 7. -युनक्ति -योक्तुं), अभिशप् (c. 1. -शपति -शप्तुं), अभिशंस् (c. 1. -शंसति -शंसितुं), अधिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).—(Impute a crime to any one) दोषं कस्मिंश्चिद् आरुह् in caus. (-रोपयति -यितुं).—(Enjoin, exhort) आदिश् (c. 6. -दिशति -देष्टुं), समादिश्, प्रत्यादिश्, निर्दिश्, उपदिश्; आज्ञा in caus. -ज्ञापयति -यितुं).—(Intrust) निक्षिप्, न्यस् (c. 4. -अस्यति -असितुं), समृ in caus. (-अर्पयति -यितुं).—(Impose as a task) नियुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं, c. 10. -योजयति -यितुं).—(Attack) अभिद्रु (c. 1. -द्रवति -द्रोतुं); आस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), आक्रम् (c. 1. -क्रामति -क्रमितुं), अभिधाव् (c. 1. -धावति -ते -धावितुं).—(Burden, load) भारं न्यस्, or निविश् in caus. (-वेशयति -यितुं) or आरुह् in caus. (-रोपयति -यितुं), पॄ (c. 10. पूरयति -यितुं) with inst. c.—(Ask a price) मूल्यं प्रार्थ् (c. 10. -अर्थयते -ति -यितुं).

CHARGE, *s.* (Care, custody) गुप्तिः *f.*, रक्षा, रक्षणं; 'to take charge of,' रक्ष् (c. 1. रक्षति, रक्षितुं), अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं).—(Trust) निक्षेपः, उपनिक्षेपः, न्यासः, उपन्यासः, उपनिधिः *m.*; 'to give in charge,' निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), न्यस् (c. 4. -अस्यति -असितुं), नियुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं).—(Commission, office, task,

duty) नियोगः, अधिकारः, भारः, व्रतं, धर्म्मः.—(Mandate, command) आदेशः, आज्ञा, शासनं.—(Exhortation) प्रत्यादेशः, उपदेशः.—(Accusation) अभियोगः, अभिशापः, अभिशंसनं, अपवादः.—(Imputation) दोषारोपः, दोषकल्पनं; 'to lay a crime to any one's charge,' दोषं कस्मिंश्चिद् आरुह् in caus. (-रोपयति -यितुं).—(Onset, attack) संशरणं, आस्कन्दः, अभ्यवस्कन्दः, उपघातः, अभिक्रमः, आक्रमः; 'charge sounded by musical instruments,' आडम्बरः.—(Burden) भारः, पुरा.—(Charge of a gun) यच्चूर्णगुलिकादिकम् एकवारे युद्धनाडौ निवेशयितव्यं.—(Expense) व्ययः.—(Price) मूल्यं, अर्घः.

Chargeable, *a.* (Liable to be accused) अभियोक्तव्यः -व्या -व्यं, अभियोज्यः -ज्या -ज्यं.—(Imputable) आरोपणीयः -या -यं.—(Causing expense) व्ययकारी -रिणी -रि (न्).

Charged, *p. p.* (Loaded) पुष्टहः -हा -हं, भुरीणः -णा -णं, भुरीयः -या -यं, भारवान् -वती -वत् (त्), भाराक्रान्तः -न्ता -न्तं, अभिपूर्णः -र्णा -र्णं, गर्भः -र्भा -र्भं in comp.; as, 'a cloud charged with water,' अम्भोगर्भो जलदः.—(Accused) अभियुक्तः -क्ता -क्तं, अभिशस्तः -स्ता -स्तं.—(Injoined) समादिष्टः -ष्टा -ष्टं, प्रत्यादिष्टः -ष्टा -ष्टं.—(Made to pay) दापितः -ता -तं.—(Imputed) आरोपितः -ता -तं.

Charger, *s.* (Large dish) बृहत्पात्रं, पात्रं, भाजनं.—(War-horse) वारकीरः, योधहरः, युद्धाश्वः, युद्धवाजी *m.* (न्).

Charily, *adv.* परिमितप्रकारेण, मितप्रकारेण, परिमितं, अमुक्तहस्तेन, अस्पशम्.

Chariot, *s.* रथः, चक्रयानं, गल्ली, गन्त्रीरथः; 'of war,' स्यन्दनः, शताङ्गः; 'of the gods,' विमानः -नं; 'covered chariot,' कणीरथः, हयनं; 'pleasure-chariot,' क्रीडारथः; 'chariot-race,' रथचर्य्या; 'chariot-horse,' रथ्यः; 'warrior mounted on a chariot,' स्यन्दनारोहः, रथारूढः, रथी *m.* (न्).

Charioteer, *s.* सूतः, यन्ता *m.* (न्तृ), नियन्ता (न्तृ), अधिरथः, रथवाहकः, सादिः *m.*, सारथिः *m.*, चातुरिकः, प्राजिता *m.* (तृ), क्षत्ता *m.* (त्तृ), सव्येष्ठा *m.* (ष्ठृ), दक्षिणस्थः, प्रचेता *m.* (तृ).

Charitable, *a.* (Kind in giving alms and assisting the poor) कृपणवत्सलः -ला -लं, दरिद्रवत्सलः -ला -लं, दीनवत्सलः -ला -लं, करुणात्मकः -का -कं, दानशीलः -ला -लं, दरिद्रोपकारी -रिणी -रि (न्) or परोपकारी, अन्नदाता -त्री -तृ (तृ) or भिक्षादाता, दयालुः -लुः -लु, दरिद्रपोष्टा -ष्ट्री -ष्टृ (ष्टृ), दरिद्रपालकः -का -कं, सत्त्वभूतानुकम्पकः -का -कं, धर्म्मात्मा -त्मा -त्म (न्).—(Kind in judging of others) परदोषसहनः -ना -नं, अनसूयकः -का -कं, असत्सरः -रा -रं.

Charitably, *adv.* दरिद्रोपकारशीलत्वात्, दयया, सदयं, दयालुवत्, दीनवत्सलवत्, दरिद्रपोष्टृवत्, सानुकम्पं.—(Without malignity) अनसूयया, असत्सरं, परदोषसहनवत्.

Charity, *s.* (Kindness to the poor, liberality) दरिद्रोपकारः, दरिद्रपालनं, दरिद्रपोषणं, दया, कारुण्यं, दयालुत्वं, दानशीलता, कृपा, सुकरं, पुण्यं.—(Almsgiving) भिक्षादानं, दानं, दानधर्म्मः.—(Alms) भिक्षा, भैक्षं, भिक्षान्नं, पुण्यं, पुण्यकं; 'for charity,' पुण्यार्थं.—(Christian charity, love) प्रेम *n.* (न्), सत्त्वभूतानुकम्पा, सत्त्वप्राणिनः प्रति प्रेम.

Charlatan, *s.* मिथ्याचिकित्सकः, दुश्चिकित्सकः, अभ्रवैद्यः, आयुर्वेदानभिज्ञः.—(Deceiver) छली *m.* (न्), मायी *m.* (न्), कपटी *m.* (न्).

Charlatanical, *a.* आयुर्वेदविरुद्धः -द्धा -द्धं, मिथ्याचिकित्सासम्बन्धीयः -या -यं, कापटिकः -की -कं, छाद्मिकः -की -कं, दाम्भिकः -की -कं.

Charlatanry, *s.* मिथ्याचिकित्सा, दुश्चिकित्सा, आयुर्वेदानभिज्ञता, छलं, कपटः -टं, छद्म *n.* (न्), दम्भः, प्रतारणं, वञ्चनं, वाक्छलं.

Charles's wain, *s.* सप्तर्षयः *m.pl.*, चित्रशिखण्डिनः *m.pl.*, शकटाकृति नक्षत्रं.

Charlock, *s.* क्षुरक्षेत्रप्ररोही पीतपुष्पविशिष्ट ओषधिभेदः.

Charm, *s.* (Words having mystic power) मन्त्रः, अभिचारमन्त्रः.—(Charm, amulet) कवचः -चं, संवदनं -ना, गारुडः; 'subduing by charms, &c.' वशक्रिया, अभिचारः, संवदनं -ना; 'under the influence of a charm,' अनुमन्त्रितः -ता -तं, अभिमन्त्रितः -ता -तं.—(Something of power to charm or allure) प्रलोभनं, विलोभनं.—(Beauty) सुभगता, शोभा, कान्तिः *f.*, श्रीः, सौन्दर्य्यं.

To charm, *v. a.* (To enchant) मन्त्रद्वारेण वशीकृ or मुह् in caus. (मोहयति -यितुं), अभिमन्त्र् (c. 10. -मन्त्रयते -यितुं), अनुमन्त्र्, अभिचर् (c. 10. -चारयति -यितुं).—(To rejoice the mind) मनो हृ (c. 1. हरति, हर्तुं) or रम् in caus. (रमयति -यितुं), हृष् in caus. (हर्षयति -यितुं).—(To allure) प्रलुभ् in caus. (-लोभयति -यितुं).

Charmed, *p. p.* (With joy) हृतमानसः -सी -सं, हृष्टमानसः -सी -सं, प्रह्लादितः -ता -तं. उल्लासितः -ता -तं.—(By incantations, &c.) अभिमन्त्रितः -ता -तं, अनुमन्त्रितः -ता -तं, अभिचारितः -ता -तं, वशः -शा -शं, वशीभूतः -ता -तं, वशीकृतः -ता -तं, वशतापन्नः -न्ना -न्नं, मोहितः -ता -तं, आकृष्टः -ष्टा -ष्टं.

Charmer, *s.* (A dealer in charms) गारुडिकः, जाङ्गुलिकः.—(An enchanter) अभिचारी *m.* (न्), -रिणी *f.*, मायी *m.* (न्), -यिनी *f.*, मायाकारः, मोही *m.* (न्), -हिनी *f.*—(Word of endearment applied to a woman) प्रिया, वत्सा, मुग्धा.

Charming, *a.* मनोहरः -रा -रं, मनोरमः -मा -मं, रम्यः -म्या -म्यं, रमणीयः -या -यं, कमनीयः -या -यं, सुभगः -गा -गं, कान्तः -न्ता -न्तं, मोदकः -का -कं, हर्षकरः -री -रं, विचित्रः -त्रा -त्रं, सश्रीकः -का -कं, आकर्षकः -का -कं, आकृष्टवान् -वती -वत् (त्), असेचनकः -का -कं; 'a charming woman,' मुग्धा, प्रमदा.

Charmingly, *adv.* मनोरमं, रमणीयप्रकारेण, रम्यं, रमणीयतया, विचित्रं, सुभगं, यथा मनो हृियते तथा, मनोहरप्रकारेण.

Charmingness, *s.* रम्यत्वं, रमणीयता, कमनीयता, मनोहरत्वं, सश्रीकता.

Charnel-house, *s.* शवास्थिस्थानं, अस्थिसञ्चयस्थानं, श्मशानं, शवास्थिगृहं.

Charred, *p. p.* अङ्गारितः -ता -तं, अङ्गारसाकृतः -ता -तं, अर्द्धदग्धः -ग्धा -ग्धं.

Chart, *s.* वेलालेख्यं, वेलापटः, समुद्रयायिनां पथदर्शनार्थं नदीसमुद्रवेलासैकतादिभिर् अङ्कितं पत्रं, समुद्रद्वीपादीनाम् आलेख्यं, नौकारूढानां पथदर्शकं पत्रं.

Charter, *s.* शासनं, शासनपत्रं, राजाज्ञापत्रं, प्रामाणिकपत्रं, धर्म्मकीलः, पट्टः.—(Privilege) अधिकारः.

Chartered, *p. p.* राजादिसकाशात् शासनपत्रेण अधिकारयुक्तः -क्ता -क्तं.

Chary, *a.* परिमितः -ता -तं, मितः -ता -तं, अमुक्तहस्तः -स्ता -स्तं, सावधानः -ना -नं, अवहितः -ता -तं, विचक्षणः -णा -णं.

DESICCATIVE, *a.* शोषकः -का -कं, उच्छोषणः -णी -णं, शुष्ककृत् *m. f. n.*

To DESIDERATE, *v. a.* अप्रत्यक्षं or अविषयं किञ्चिद्वस्तु इष् (c. 6. इच्छति, एषितुं) or उत्कण्ठ् (c. 1. -कण्ठते -ण्ठितुं) or अभ्याप् in des. (-ईप्सति -प्सितुं).

DESIDERATUM, *s.* अविद्यमानं किञ्चिद् अभीष्टं वस्तु, अवर्त्तमानो वाञ्छनीयविषयः.

To DESIGN, *v. a.* (Purpose, intend) कृ in des. (चिकीर्षति -र्षितुं), अभिप्रे (rt. इ with अभि, प्र; अभिप्रेति -तुं), उपलक्ष् (c. 10. -लक्षयति -यितुं); उद्दिश् (c. 6. -दिशति -देष्टुं), अभिसन्धा (c. 3. -दधाति -धातुं), मनः or मतिं or बुद्धिं कृ or प्रकृ with loc. or abl. case; as, 'he designs a crime,' मनः पापे करोति; 'he designs the death of the king,' राज्ञो विनाशाय मतिं करोति.—(Plan, meditate) चिन्त् (c. 10. चिन्तयति -यितुं), प्रचिन्त्, मन्त्र् (c. 10. मन्त्रयति -यितुं), घट् (c. 1. घटते -टितुं), कॢप् (c. 10. कल्पयति -यितुं), परिकॢप्, अनुसन्धा (c. 3. -दधाति -धातुं), व्यवसो (c. 4. -स्यति -सातुं).—(Devote to, apply to a particular purpose) प्रयुज् (c. 7. -युंक्ते -योक्तुं), उपयुज्, विनियुज्; as, 'to religious purposes,' धर्म्मार्थम् उपयुज्. —(Draw) आलिख् (c. 6. -लिखति -लेखितुं), सूत्रपातं कृ, संस्कारं कृ, संस्कृ.

DESIGN, *s.* (Intention, purpose) चिकीर्षा -र्षितं, अभिप्रायः, अभिप्रेतं, आशयः, अर्थः, आकूतं, तात्पर्य्यं, आकांक्षा, छन्दः, छन्दस् *n.* (स्), सङ्कल्पः, उद्देशः, मतिः *f.*, मतं, कार्य्यं, उपयोगः, प्रयोजनं, उपलक्षितं, अभिसन्धिः *m.*—(Plan, scheme) चिन्ता, उपायः, व्यवसितं, व्यवसायः, प्रक्रान्तं, अनुसन्धानं, कल्पना, घटनं, विधानं.—(Drawing, impression) संस्कारः, आलेख्यं, सूत्रं, सूत्रपातः; 'with the design of,' अर्थं; 'one who has not effected his design,' अकृतार्थः.

To DESIGNATE, *v. a.* (Mark out, indicate) चिह्न् (c. 10. चिह्नयति -यितुं), लक्ष् (c. 10. लक्षयति -यितुं), उपलक्ष्, विशिष् in caus. (-शेषयति -यितुं), प्रदिश् (c. 6. -दिशति -देष्टुं), निर्दिश्, सूच् (c. 10. सूचयति -यितुं).—(Appoint) नियुज् (c. 10. -योजयति -यितुं), परिकॢप् (c. 10. -कल्पयति -यितुं).

DESIGNATED, *p. p.* चिह्नितः -ता -तं, लक्षितः -ता -तं, विशेषितः -ता -तं.

DESIGNATION, *s.* लक्षणं, उपलक्षणं, संलक्षणं, चिह्नं, विशेषणं, संज्ञा, अभिज्ञानं, अभिधानं, आख्या, निर्देशः, सूचनं.

DESIGNED, *p. p.* चिकीर्षितः -ता -तं, अभिप्रेतः -ता -तं, उपलक्षितः -ता -तं, उद्दिष्टः -ष्टा -ष्टं, अर्थवान् -वती -वत् (न्), व्यवसितः -ता -तं, घटितः -ता -तं.

DESIGNEDLY, *adv.* इच्छातस्, मन्त्रतस्, कामतस्, प्रकामं, यथाकामं, मतिपूर्व्वकं, बुद्धिपूर्व्वं, बुद्धिपुरःसरं, मनोपूर्व्वकं, मत्या, बुद्ध्या, तात्पर्य्यतस्, यथाकल्पं.

DESIGNER, *s.* (Contriver) चिन्तकः, उपायचिन्तकः, परिकल्पकः, व्यवसायी *m.* (न्).—(Drawer) आलेखकः, संस्कारलेखकः, सूत्रपातकः.

DESIGNING, *a.* विदग्धः -ग्धा -ग्धं, छली -लिनी -लि (न्), मायी -यिनी -यि (न्), कापटिकः -की -कं, वञ्चनशीलः -ली -लं, प्रतारकः -का -कं, सव्याजः -जा -जं.

DESIGNLESS, *a.* अभिप्रायहीनः -ना -नं, निरर्थकः -का -कं, निष्प्रयोजनः -ना -नं.

DESIGNMENT, *s.* अभिप्रायः, चिकीर्षा, आशयः, अर्थः, अर्थवत्ता, अर्थत्वं, अभिसन्धिः *m.*

DESIRABLE, *a.* स्पृहणीयः -या -यं, स्पृह्यः -ह्या -ह्यं, अभिलषणीयः -या -यं, वाञ्छनीयः -या -यं, कमनीयः -या -यं, काम्यः -म्या -म्यं, लोभ्यः -भ्या -भ्यं, आकांक्षणीयः -या -यं, एषणीयः -या -यं, प्रार्थनीयः -या -यं, अपेक्षणीयः -या -यं, गम्यः -म्या -म्यं; 'a desirable gift,' काम्यदानं.

DESIRABLENESS, *s.* स्पृहणीयता, वाञ्छनीयत्वं, कमनीयता, काम्यत्वं, इष्टत्वं.

DESIRE, *s.* इच्छा, अभिलाषः, अभिलषितं, स्पृहा, वाञ्छा, ईहा, कामः, कामना, कांक्षा, आकांक्षा, अभिकांक्षा, मनोरथः, अभिमतं, समीहितं, लोभः, आशा, तृषा, तृष्णा, इच्छत्वं, इष्टिः *f.*, इष्टं, अभीष्टं, छन्दः *n.* (स्), छन्दं, रुचिः *f.*, अभिरुचिः *f.*, मनस्कामना, मनोभिमतं, अभीप्सा, लिप्सा, औत्सुक्यं, औत्कण्ठ्यं, वशः, लालसा, कौतूहलं, कान्तिः *f.*, वसारं; 'one's desire,' स्वेच्छा; 'according to one's desire,' स्वेच्छातस्, स्वेच्छया, स्ववाञ्छया, स्वरुच्या, यथेष्टं, यथाभिमतं, स्वच्छन्दं. *Obs.* The noun formed from the desid. base often expresses 'desire'; as, 'desire to drink,' पिपासा; 'desire to burn,' दिधक्षा.

To DESIRE, *v. a.* इष् (c. 6. इच्छति, इषितुं), अभिलष् (c. 1. -लषति, c. 4. -लष्यति -लषितुं), वाञ्छ् (c. 1. वाञ्छति -ञ्छितुं), अभिवाञ्छ्, संवाञ्छ्; कांक्ष् (c. 1. कांक्षति -क्षितुं), आकांक्ष्, अनुकांक्ष्, अभिकांक्ष्; स्पृह् (c. 10. स्पृहयति -यितुं), काम् (c. 10. कामयते -यितुं), ईह् (c. 1. ईहते -हितुं), समीह्, लुभ् (c. 4. लुभ्यति, लोभुं), अभिरुच् in caus. (-रोचयति -यितुं), आप् in des. (ईप्सति -प्तुं), अभ्याप्, पर्याप्; लभ् in des. (लिप्सते -प्तुं), अभिलभ्; आशंस् (c. 1. -शंसते -सितुं), गृध् (c. 4. गृध्यति, गर्धितुं), वञ्च् (c. 2. वंक्ति, वञ्चितुं).—(Ask, beg for) अर्थ् (c. 10. अर्थयते -ति -यितुं), प्रार्थ्, याच् (c. 1. याचति -चितुं), वृ (c. 9. वृणीते, वरितुं -रीतुं) with 2 acc., निविद् in caus. (-वेदयति -यितुं).

DESIRED, *p. p.* इष्टः -ष्टा -ष्टं, अभीष्टः -ष्टा -ष्टं, अभिलषितः -ता -तं, वाञ्छितः -ता -तं, कांक्षितः -ता -तं, आकांक्षितः -ता -तं, अभिकांक्षितः -ता -तं, अभिमतः -ता -तं, ईहितः -ता -तं, समीहितः -ता -तं, ईप्सितः -ता -तं, अभीप्सितः -ता -तं, लिप्सितः -ता -तं, संलिप्सितः -ता -तं, दृब्धः -ब्धा -ब्धं.

DESIROUS, *a.* इच्छुः -च्छुः -च्छु, इच्छुकः -का -कं, इच्छकः -का -कं, इच्छावान् -वती -वत् (त्), इच्छान्वितः -ता -तं, अभिलाषी -षिणी -षि (न्) -षुकः -का -कं, वाञ्छी -ञ्छिनी -ञ्छि (न्), आकांक्षी -क्षिणी -क्षि (न्) or अभिकांक्षी, स्पृही -हिणी -हि (न्), अर्थी -र्थिनी -र्थि (न्), कामी -मिनी -मि (न्), कामुकः -का -कं, कामवान् -वती -वत् (त्), कामयानः -ना -नं, लोभी -भिनी -भि (न्), लुभः -भा -भं, स्पृहयालुः -लुः -लु, जातस्पृहः -हा -हं, सस्पृहः -हा -हं, साकांक्षः -क्षा -क्षं, ईप्सुः -प्सुः -प्सु or अभीप्सुः or प्रेप्सुः or परिप्रेप्सुः, इष्टी -ष्टिनी -ष्टि (न्), लिप्सुः -प्सुः -प्सु, आशंसुः -सुः -सु, आशायुक्तः -क्ता -क्तं, लालसी -सिनी -सि (न्), तृष्णकः -का -कं, कचः -चा -चं. 'Desirous' is sometimes expressed by काम affixed to the infinitive, the final of which is rejected; as, 'desirous to do,' कर्तुकामः -मा -मं; 'desirous to go,' गन्तुकामः -मा -मं; or by the adj. formed from the desid. base; as, 'desirous of drinking,' पिपासुः -सुः -सु; 'desirous of taking,' आदित्सुः -त्सुः -त्सु.

To DESIST, *v. n.* विरम् (c. 1. -रमति -रन्तुं), उपरम्, निवृत् (c. 1. -वर्तते -र्त्तितुं), निवृत्, विनिवृत्; शम् (c. 4. शाम्यति, शमितुं), विगम् (c. 1. -गच्छति -गन्तुं), विच्छिद् in pass. (-छिद्यते), विश्रम् (c. 4. -श्राम्यति -श्रमितुं), अपया (c. 2. -याति -तुं); 'he desists from wickedness,' पापाद् विरमति or निवर्त्तते.

DESISTANCE, *s.* विरतिः *f.*, विरामः, निवृत्तिः *f.*, निवर्त्तनं, निवृत्तिः *f.*, उपशमः.

DESISTED, *p. p.* निवृत्तः -त्ता -त्तं, विरतः -ता -तं, उपरतः -ता -तं, शान्तः -ता -तं, प्रशान्तः -ता -तं, विगतः -ता -तं, विच्छिन्नः -न्ना -न्नं.

DESK, *s.* लिखनफलकं, लिपिफलकं, लिपिसत्राधारः, लेखसाधनाधारः.

DESOLATE, *a.* (Solitary, uninhabited) शून्यः -न्या -न्यं, शून्याकारः -रा -रं, विविक्तः -क्ता -क्तं, निर्जनः -ना -नं, निर्मनुष्यः -ष्या -ष्यं, पुरुषवर्जितः -ता -तं, अप्रजः -जा -जं, विलोकः -की -कं, निःशलाकः -का -कं, निरालयः -या -यं, वसतिहीनः -ना -नं.—(Laid waste) उच्छिन्नः -न्ना -न्नं, प्रवाधितः -ता -तं, उपपीडितः -ता -तं.

To DESOLATE, *v. a.* उपपीड् (c. 10. -पीडयति -यितुं), प्रबाध् (c. 1. -बाधते -धितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), शून्यीकृ, निर्जनीकृ, निर्दह् (c. 1. -दहति -दग्धुं), वसतौ मज्ज् in caus. (-माज्जयति -यितुं).

DESOLATION, *s.* (Destruction of inhabitants) शून्यीकरणं, निर्जनीकरणं, वसतिनाशः, उच्छेदः, उपपीडनं.—(State of destitution) शून्यता, निर्जनत्वं, विविक्तता, रहितत्वं, विषादः, विषण्णता.

DESPAIR, *s.* निराशा, नैराश्यं, आशाहीनता, दीनमनस्यं, वैक्लव्यं, विषादः; 'in despair,' त्यक्ताशः, आशाहीनः, गताशः.

To DESPAIR, *v. n.* आशां हा (c. 3. जहाति, हातुं) or त्यज्, आशया हा in pass. (हीयते), नैराश्यम् उपगम् (c. 1. -गच्छति -गन्तुं) or गम्; निराशीभू, सङ्कुच् (c. 6. -कुटति -टितुं).

DESPAIRINGLY, *adv.* आशां विना, आशया विना, सनैराश्यं, नैराश्यात्.

To DESPATCH, *v. a.* (Send away hastily) सत्वरं प्रस्था in caus. (-स्थापयति -यितुं) or प्रेर् (c. 10. -ईरयति -यितुं) or प्रेष् in caus. (प्रेषयति -यितुं, rt. इष्), सम्प्रेष्, परिप्रेष्, or प्रहि (c. 5. -हिणोति -हेतुं) or प्रया in caus. (-यापयति -यितुं) or चुद् (c. 10. चोदयति -यितुं), or प्रयुद् (c. 6. -युदति -योत्तुं).—(Hasten, perform quickly) त्वर् in caus. (त्वरयति -यितुं), सत्वर्; त्वरितं कृ or सम्पद् in caus. (-पादयति -यितुं) or प्रवृत् in caus. (-वर्त्तयति -यितुं).—(Kill) व्यापद् in caus. (-पादयति -यितुं), लोकान्तरं प्राप् in caus. (-आपयति -यितुं) or प्रेर्.

DESPATCH, *s.* (Hasty execution) क्षिप्रकारित्वं, शीघ्रनिर्वाहः, त्वरा, तूर्णिः *f.*, आवेगः, अदीर्घसूत्रता.—(Official message) वाचिकं, वाचिकपत्रं, राजकीयपत्रं, राजलेखः -लेख्यं.—(Hasty messenger) धावकः, वेगी *m.* (न्), प्रजवी *m.* (न्), लेखहारी *m.* (न्), वार्त्ताहरः, दूतः.

DESPATCHED, *p. p.* (Sent) प्रस्थापितः -ता -तं, प्रेरितः -ता -तं, प्रेषितः -ता -तं, प्रहितः -ता -तं, प्रयापितः -ता -तं, दूतः -ता -तं, प्रतिसृष्टः -ष्टा -ष्टं, नुन्नः -न्ना -न्नं, प्रयुक्तः -क्ता -क्तं, गमितः -ता -तं, प्रतिक्षिप्तः -प्ता -प्तं.

DESPATCHFUL, *a.* क्षीप्रकारी -रिणी -रि (न्) or क्षिप्रकारी, अविलम्बी -म्बिनी -म्बि (न्), अदीर्घसूत्रः -त्रा -त्रं, त्वरायुक्तः -क्ता -क्तं, त्वराशीलः -ला -लं.

DESPERADO, *s.* साहसी *m.* (न्), साहसिकः, अत्याहितकर्मी *m.* (न्), आततायी *m.* (न्).

DESPERATE, *a.* (Without hope) निराशः -शा -शं, आशाहीनः -ना -नं, आशारहितः -ता -तं, गताशः -शा -शं, त्यक्ताशः -शा -शं, निःप्रत्याशः -शा -शं.—(Daring) साहसिकः -की -कं -सी -सिनी -सि (न्).—(Fearless) निर्भयः -या -यं, अकुतोभयः -या -यं.—(Irretrievable) निरुपायी -यिनी -यि (न्), अप्रतिकारः -रा -रं or अशक्यप्रतिकारः.—(Furious) उग्रः -ग्रा -ग्रं, संरब्धः -ब्धा -ब्धं.—(Excessive) अत्यन्तः -न्ता -न्तं, अति or सु prefixed; 'a desperate fool,' अतिमूढः; 'a desperate act,' अत्याहितं, साहसकल्पः, आततायिता.

DESPERATELY, *adv.* (Furiously) उन्मत्तवत्, साहसेन -सात्, उग्रं, संरब्धं.—(In a great degree) सु or अति prefixed; अत्यन्तं, भृशं, तीव्रं.

DESPERATENESS, *s.* (Fury, daringness) उन्मादः, संरम्भः, उग्रत्वं, साहसिकत्वं.

DESPERATION, *s.* नैराश्यं, आशाहीनता, आशारहितं, निराशा.

DESPICABLE, *a.* अवमाननीयः -या -यं, अवमान्यः -न्या -न्यं or अवमान्यः, अवमन्तव्यः -व्या -व्यं, अवज्ञेयः -या -यं, अवज्ञातव्यः -व्या -व्यं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हणीयः -या -यं, गर्हितः -ता -तं, अवगर्हितः -ता -तं, अतिगर्हितः -ता -तं, निन्द्यः -न्द्या -न्द्यं, निन्दनीयः -या -यं, निन्दार्हः -र्हा -र्हं, दूष्यः -ष्या -ष्यं, तुच्छः -च्छा -च्छं, कुत्सितः -ता -तं, क्षुद्रः -द्रा -द्रं, अपकृष्टः -ष्टा -ष्टं.

DESPICABLENESS, *s.* अवमान्यता, गर्ह्यत्वं, निन्द्यता, तुच्छत्वं, दूष्यता.

DESPICABLY, *adv.* गर्हणीयं, गर्हितं, कुत्सितं, अपकृष्टं, तुच्छं.

To DESPISE, *v. a.* अवज्ञ (c. 9. -जानाति -ज्ञातुं), अवमन् (c. 4. -मन्यते -मन्तुं), तृणाय मन्, अभ्यवमन्, परिभन्, गर्ह् (c. 1. गर्हते -र्हितुं), विगर्ह्, कुत्स् (c. 10. कुत्सयति -यितुं), निन्द् (c. 1. निन्दति -न्दितुं), परिभू (c. 1. -भवति -वितुं), अवधीर् (c. 10. अवधीरयति -यितुं), जुगुप् in des. (जुगुप्सते -प्सितुं), उपेक्ष् (c. 1. -ईक्षते -क्षितुं), अवध्यै (c. 1. -ध्यायति -ध्यातुं), वाच् in des. (वीभात्सते -त्सितुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं),

कदर्थ् (c. 10. -अर्थयते -यितुं), कदर्थीकृ, तुच्छीकृ, लघूकृ.

DESPISED, *p. p.* अवमतः -ता -तं, अवमानितः -ता -तं, विमानितः -ता -तं, अपमानितः -ता -तं, अवज्ञातः -ता -तं, परिभूतः -ता -तं, गर्हितः -ता -तं, विगर्हितः -ता -तं, अवधीरितः -ता -तं, कदर्थितः -ता -तं, अवध्यातः -ता -तं, निन्दितः -ता -तं, उपेक्षितः -ता -तं, अवगणितः -ता -तं.

DESPISER, *s.* अवमन्ता *m.* (न्तृ), अवज्ञाता *m.* (तृ), अवमानकर्त्ता *m.* (र्तृ), निन्दकः.

DESPITE, *s.* (Malice) द्वेषः, द्रोहः, मात्सर्य्यं, ईर्ष्या, अभ्यसूया, दुर्बुद्धिः *f.*, नृशंस्यं, दौर्जन्यं, दंशः.—(Opposition) प्रतिरोधः, विरोधः, प्रतियोगः, प्रतिकारः, प्रतिकूलता; 'in despite,' अनिच्छया, विरुद्धं, प्रातिकूल्येन, or expressed by the gen. c. of the pres. part. of the root दृश् 'to see,' or मिष्; 'in despite of thee,' पश्यतस् तव; 'in despite of the princes,' मिषतां पार्थिवानां.

To DESPITE, *v. a.* कुप् in caus. (कोपयति -यितुं), रुष् in caus. (रोषयति -यितुं), तप् in caus. (तापयति -यितुं), सन्तप्; क्लिश् (c. 9. क्लिश्नाति, क्लेष्टुं), व्यथ् in caus. (व्यथयति -यितुं), दुःख् (c. 10. दुःखयति -यितुं).

DESPITEFUL, *a.* द्रोही -हिणी -हि (न्), द्रोहबुद्धिः -द्धिः -द्धि or दुर्बुद्धिः, ईर्ष्यी -र्ष्यिणी -र्ष्यि (न्), सासूयः -या -यं, विषहृदयः -या -यं, नृशंसः -सा -सं, मत्सरः -रा -रं, द्वेषी -षिणी -षि (न्), अहितेच्छुः -च्छुः -च्छु, हिंसाशीलः -ला -लं.

DESPITEFULLY, *adv.* सद्रोहं, सद्वेषं, हिंसापूर्वं, नृशंसं, साभ्यसूयं.

DESPITEFULNESS, *s.* द्रोहः, द्वेषः, मात्सर्य्यं, नृशंस्यं, दंशः, दौर्जन्यं.

To DESPOIL, *v. a.* हृ (c. 1. हरति, हर्त्तुं), अपहृ, विमुच् (c. 6. -मुञ्चति -मोक्तुं), वियुज् in caus. (-योजयति -यितुं), विप्रयुज् with inst. c.; 'despoil of leaves,' निष्पत्रीकृ.

DESPOILED, *p. p.* हृतः -ता -तं, अपहृतः -ता -तं, वियुक्तः -क्ता -क्तं, वियोजितः -ता -तं; 'despoiled of all possessions,' हृतसर्व्वस्वः -स्वा -स्वं.

DESPOILER, *s.* हर्त्ता *m.* (र्त्तृ), हारकः, अपहारकः, अपहारकृत्, लुण्ठाकः.

DESPOLIATION, *s.* हरणं, अपहारणं, अभिहारः, अभ्याहारः, अभिग्रहणं.

To DESPOND, *v. n.* विषद् (c. 1. -षीदति -षत्तुं), अवसद्; निर्वेदं or विषादं or नैराश्यम् उपगम् (c. 1. -गच्छति -गन्तुं) or गम्; आशां हा (c. 3. जहाति, हातुं) or त्यज् (c. 1. त्यजति, त्यक्तुं), निर्विण्णीभू, निर्विद् (c. 4. -विद्यते -वेत्तुं), सङ्कुच् (c. 6. -कुटति -टितुं).

DESPONDENCY, *s.* विषादः, निर्वेदः, विषण्णता, निर्विण्णता, नैराश्यं, निराशा, अवसन्नता, उद्वेगः, दौर्मनस्यं, ग्लानिः *f.*, क्लान्तिः *f.*

DESPONDENT, *a.* विषण्णः -ण्णा -ण्णं, विषादी -दिनी -दि (न्), निर्विण्णः -ण्णा -ण्णं, निराशः -शा -शं, आशाहीनः -ना -नं, त्यक्ताशः -शा -शं, अवसन्नः -न्ना -न्नं, उद्विग्नमनाः -नाः -नः (स्) or दुर्मनाः or अन्यमनाः, ग्लानः -ना -नं.

DESPONDINGLY, *adv.* सनिर्वेदं, सविषादं, निर्वेदात्, सनैराश्यं.

To DESPONSATE, *v. a.* वाग्दत्तां कृ, वाग्दानेन विवाहार्थं प्रतिज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), कन्यां प्रदा, प्रतिज्ञाविवाहितां कृ.

DESPONSATION, *s.* वाग्दानं, कन्याप्रदानं, विवाहार्थं प्रतिज्ञानं.

DESPOT, *s.* सम्राट् *m.* (ज्), अधिराजः, चक्रवर्त्ती *m.* (न्), सर्व्वेश्वरः, राजाधिराजः, एकराजः, स्वाधीनराजः, स्वयम्प्रभुः.

DESPOTIC, DESPOTICAL, *a.* अनधीनः -ना -नं, अनायत्तः -त्ता -त्तं, अधिराजकः -का -कं, स्वयम्प्रभुः -भुः -भु, साम्राजिकः -की -कं, स्वयम्प्रभुत्वकारी -रिणी -रि (न्).

DESPOTICALLY, *adv.* अधिराजवत्, अनायत्तं, स्वेच्छातस्, स्वकामतस्, स्वच्छन्दं.

DESPOTISM, *s.* साम्राज्यं, अधिराज्यं, ऐकपत्यं, स्वेच्छाप्रभुत्वं, अनधीनत्वं.

To DESPUMATE, *v. n.* फेन (nom. फेनायते), उत्सेचनं कृ, मण्ड (nom. मण्डायते).

DESPUMATION, *s.* फेनोत्सेचनं, मण्डोत्सेचनं, उत्सेचनं, उत्पीडः.

DESQUAMATION, *s.* त्वक्परिपुटनं, अस्थिपरिपुटनं, अभ्यस्थिपरिपुटनं.

DESSERT, *s.* भोजनान्ते परिवेशितं फलमोदकादिखाद्यं, फलाहारः.

DESTINATION, *s.* (Purpose for which any thing is intended) अर्थः, अर्थत्वं, प्रयोगः, उपयोगः, प्रयोजनं, उद्देशः, आशयः, अभिप्रायः, तात्पर्य्यं.—(Place of destination) अग्रभूमिः *f.*, अग्रस्थानं, अग्रं, निरूपितस्थानं.

To DESTINE OR DESTINATE, *v. a.* निरूप् (c. 10. -रूपयति -यितुं), प्ररूप् (c. 10. -रूपयति -यितुं), परिकल्प्, निर्दिश् (c. 6. -दिशति -देष्टुं), उद्दिश्, प्रदिश्, समादिश्; नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), प्रयुज्, उपयुज्, विनियुज्, प्रस्था in caus. (-स्थापयति -यितुं), अभिसन्धा (c. 3. -दधाति -धातुं).

DESTINED, *p. p.* निरूपितः -ता -तं, परिकल्पितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं.

DESTINY, *s.* दैवं, भाग्यं, भागधेयं, कृतान्तः, विधिः *m.*, विधाता *m.* (तृ), भवितव्यता, दैविकं, अदृष्टं, नियतिः *f.*, कालनियोगः, कालधर्म्मः, दिष्टं, प्राक्तनं.

DESTITUTE, *a.* (Poor, abject, friendless) निर्धनः -ना -नं, अर्थहीनः -ना -नं, निष्किञ्चनः -ना -नं, अकिञ्चनः -ना -नं, दुर्गतः -ता -तं, निःस्वः -स्वा -स्वं, निराश्रयः -या -यं, अपाश्रयः -या -यं, अशरणः -णा -णं, बन्धुहीनः -ना -नं.—(Deprived of, in want of) हीनः -ना -नं, विहीनः -ना -नं, परिहीणः -णा -णं, रहितः -ता -तं, विरहितः -ता -तं, वर्জितः -ता -तं, विवर्জितः -ता -तं, शून्यः -न्या -न्यं, विनाकृतः -ता -तं, वियुक्तः -क्ता -क्तं, लुप्तः -प्ता -प्तं, हृतः -ता -तं, अपेतः -ता -तं; 'destitute of fruit,' फलहीनः -ना -नं or फलरहितः -ता -तं or फलापेतः -ता -तं or हृतफलः -ला -लं; 'destitute of means,' असाधनः -ना -नं.

DESTITUTION, *s.* (State of being deprived) हीनत्वं, रहितत्वं, शून्यता.—(Absence of a thing) अभावः, असम्भवः, विरहः.—(Want of money, &c., poverty) धनाभावः, वस्तुनाभावः, निष्किञ्चनत्वं, अकिञ्चनं, दारिद्र्यं, बन्धुहीनता, असहायता, अभूमिः *f.*

To DESTROY, *v. a.* (Put an end to, ruin) नश् in caus. (नाशयति -यितुं), विनश्, प्रणश्; साध् in caus. (साधयति -यितुं), संसाध्; क्षि (c. 5. क्षिणोति, क्षेतुं or caus. क्षययति, क्षपयति -यितुं), सद् in caus. (सादयति -यितुं), लुप् (c. 6. लुम्पति, लोप्तुं or caus. लोपयति -यितुं), विलुप्; ध्वंस् in caus. (ध्वंसयति -यितुं), विध्वंस्, प्रध्वंस्; उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), निर्दह् (c. 1. -दहति -दग्धुं), ग्रस् (c. 1. ग्रसते -सितुं).—(Kill) हन् (c. 2. हन्ति -न्तुं or caus. घातयति -यितुं), व्यापद् in caus. (-पादयति -यितुं), मृ in caus. (मारयति -यितुं), सूद् (c. 10. सूदयति -यितुं), अभिसूद्, निसूद्, विनिसूद्, सन्निसूद्; शद् in caus. (शातयति -यितुं), प्रमी in caus. (-मापयति -यितुं), क्षप् (c. 8. क्षपोति -पितुं).

DESTROYED, *p. p.* नष्टः -ष्टा -ष्टं, नाशितः -ता -तं, विनाशितः -ता -तं, प्रणष्टः -ष्टा -ष्टं, सादितः -ता -तं, सूदितः -ता -तं, हतः -ता -तं, घातितः -ता -तं, ध्वंसितः -ता -तं, उच्छिन्नः -न्ना -न्नं, भग्नः -ग्ना -ग्नं, व्यापादितः -ता -तं.

DESTROYER, *s.* विनाशकः, नाशी *m.* (न्), नाशकारी *m.* (न्), विनाशकारी, हन्ता *m.* (न्तृ), निहन्ता, घाती *m.* (न्), क्षयकरः, अन्तकः, अन्तकृत्, ध्वंसकः, ध्वंसकारी *m.* (न्), प्रलयकर्त्ता *m.* (र्त्तृ), सूदकः, अपहः; 'destroying angel,' कृतान्तः.

DESTRUCTIBLE, *a.* नाश्यनीयः -या -यं, नाश्यः -श्या -श्यं, विनश्वरः -रा -रं, ध्वंसनीयः -या -यं, अवसेयः -या -यं, क्षयी -यिणी -यि (न्).

DESTRUCTION, *s.* नाशः, विनाशः, विनष्टिः *f.*, प्रणाशः, क्षयः, ध्वंसः, प्रध्वंसः, सादनं, सूदनं, प्रलयः, संहारः, अपायः, अत्ययः, विलोपनं, लोपः, समुच्छेदः, उद्दलनं, उत्पाटनं, क्षैरेयं.—(Murder) घातः -तनं, मारणं, वधः, निहननं, प्रमापणं.—(Of the world) प्रलयः, कल्पान्तः, महानकः, जिहानकः, संवर्त्तः, क्षयः.

DESTRUCTIVE, *a.* नाशी -शिनी -शि (न्) or प्रणाशी, विनाशकः -का -कं, क्षयकरः -री -रं, घाती -तिनी -ति (न्) or विघाती, घातुकः -का -कं, प्रध्वंसी -सिनी -सि (न्) or परिध्वंसी, अनकरः -री -रं, सूदनः -नी -नं, प्रमापी -पिणी -पि (न्), आत्ययिकः -की -कं, निधनकारी -रिणी -रि(न्), नाश्यः -श्या -श्यं, प्राणहरः -रा -रं, अपकारकः -का -कं, पांसनः -ना -नं, अभिमर्शनः -ना -नं, क्रूरः -रा -रं, अपहः -हा -हं or हः हा हं or घ्नः घ्ना घ्नं in comp.

DESTRUCTIVELY, *adv.* सनाशं, विनाशेन, विनाशकप्रकारेण, आत्ययिकं.

DESTRUCTIVENESS, *s.* नाशकत्वं, नाशित्वं, घातुकत्वं, अपकारकता.

DESUETUDE, *s.* विरतिः *f.*, उपरतिः *f.*, निवृत्तिः *f.*, निवृत्तिः, निवर्तनं, विच्छेदः.

DESULTORY, *a.* चञ्चलः -ला -लं, अस्थिरः -रा -रं, लोलः -ला -लं, तरलः -ला -लं, चपलः -ला -लं, सङ्कुचकः -का -कं, अधीरः -रा -रं, उच्छृङ्खलः -ला -लं.

To DETACH, *v. a.* (Separate) भिद् (c. 7. भिनत्ति, भेत्तुं), विभिद्, वियुज् (c. 7. -युनक्ति -योक्तुं), विच्छिद् (c. 7. -छिनत्ति -छेत्तुं), अवच्छिद्, विश्लिष् in caus. (-श्लेषयति -यितुं), सङ्ग् (c. 10. सङ्गयति -यितुं), पृथक्कृ.—(Send out a party from the main army) सङ्घसैन्यमध्यात् कतिपयसैन्यान् उत्करकरणार्थं प्रस्था in caus. (-स्थापयति -यितुं).

DETACHED, *p. p.* वियुक्तः -क्ता -क्तं, विप्रयुक्तः -क्ता -क्तं, विनियुक्तः -क्ता -क्तं, भिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, प्रभिन्नः -न्ना -न्नं, विच्छिन्नः -न्ना -न्नं, अवच्छिन्नः -न्ना -न्नं, विश्लिष्टः -ष्टा -ष्टं, असंलग्नः -ग्ना -ग्नं, असंसक्तः -क्ता -क्तं, असक्तः -क्ता -क्तं, व्यासक्तः -क्ता -क्तं, गतसङ्गः -ङ्गा -ङ्गं, निर्युक्तिकः -का -कं.

DETACHMENT, *s.* (Act of detaching) वियोगः, विप्रयोगः, विभेदः, विच्छेदः, अवच्छेदः, विश्लेषः, व्यासङ्गः, अनभिष्वङ्गः.—(Body of troops sent out for petty warfare) उत्करकरणार्थं प्रस्थापितः सैन्यगुल्मः, सैन्यदलं.

DETAIL, *s.* विवरणं, विस्तारः, विस्तरः, वाग्विस्तारः, उपवर्णः -र्णनं, वृत्तान्तविवरणं, सङ्घवृत्तान्तव्याख्या; 'in detail,' विस्तरेण, विस्तरशस्, सुविस्तरं, उपवर्णेन, विभागशस्.

To DETAIL, *v. a.* सुविस्तरेण कथ् (c. 10. कथयति -यितुं) or आख्या (c. 2. -ख्याति -तुं), सङ्घवृत्तान्तं विवृ (c. 5. -वृणोति -वरितुं -रीतुं) or आख्या; उपवर्ण् (c. 10. -वर्णयति -यितुं), वृत्तान्तविवरणं कृ.

DETAILED, *p. p.* and *a.* उपवर्णितः -ता -तं, सविस्तरः -रा -रं, विस्तीर्णः -र्णा -र्णं.

To DETAIN, *v. a.* (Keep what belongs to another) परद्रव्यं भृ (c. 1. भरति, भर्तुं or caus. भारयति -यितुं) or सम्भृ or परिभुज् (c. 7. -भुंक्ते -भोक्तुं).—(Keep back, withhold) निवृ in caus. (-वारयति -यितुं), निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), विधृ in caus., उपसंह (c. 1. -हरति -हर्तुं) संह्.—(Restrain from departure) धृ, निरुध् (c. 7. -रुणद्धि -रोद्धुं) अवरुध्.—(Hold in confinement) कारायां निरुध् or आसिध् (c. 1. -सेधति -सेद्धुं) or बन्ध् (c. 9. बध्नाति, बन्धुं).

DETAINED, *p. p.* धृतः -ता -तं, निरुद्धः -द्धा -द्धं, निवारितः -ता -तं.

DETAINER, *s.* धारकः, धर्त्ता *m.* (र्तृ), परिभोक्ता *m.* (क्तृ), निरोधकः.

To DETECT, *v. a.* ज्ञा (c. 9. जानाति, ज्ञातुं), विज्ञा, परिज्ञा, अभिज्ञा, निरूप् (c. 10. -रूपयति -यितुं), निर्णी (c. 1. -णयति -णेतुं), उपलभ् (c. 1. -लभते -लब्धुं), अवगम् (c. 1. -गच्छति -गन्तुं), अधिगम्, अध्यागम्, धृ (c. 1. धरति, धर्तुं), आसद् (c. 10. -सादयति -यितुं), प्रोत्सद्, अनुसन्धा (c. 3. -दधाति -धातुं), व्यञ्ज् in caus. (-अञ्जयति -यितुं), अक्षीकृ, विधृ (c. 5. -वृणोति -वरितुं -रीतुं).

DETECTED, *p. p.* ज्ञातः -ता -तं, विज्ञातः -ता -तं, अभिज्ञातः -ता -तं, अवगतः -ता -तं, निरूपितः -ता -तं, धृतः -ता -तं, निर्णीतः -ता -तं, व्यञ्जितः -ता -तं, अक्षीकृतः -ता -तं; 'in a crime,' दृष्टदोषः -षा -षं.

DETECTION, *s.* ज्ञानं, परिज्ञानं, विज्ञानं, निरूपणं, निर्णयः, धरणं, अवगमः, अनुसन्धानं, अक्षीकरणं, विवृतिः *f.*

DETENTION, *s.* धरणं, धारणं, सन्धारणं, निग्रहः, निवारणं, संहरणं, संरोधः, अमुक्तिः *f.*, अमोक्षः.—(Confinement) रोधः, निरोधः -धनं, आसेधः, स्थानासेधः, सम्प्रतिरोधकः.—(Forcible detention of a debtor) बलात्कारः.

To DETER, *v. a.* भयहेतुं दर्शयित्वा निवृत् in caus. (-वर्तयति -यितुं) or निवर्तय् in caus., or विरम् in caus. (-रमयति -यितुं) or निवृ in caus. (-वारयति -यितुं), विभी in caus. (-भाययति -यितुं), अवभर्त्स् in caus. (-भर्त्सयति -ते -यितुं).

To DETERGE, *v. a.* मलम् अपमृज् (c. 1. -माष्टि -ष्टुं), परिमृज्, परिष्कृ.

DETERGENT, *a.* परिमार्जकः -का -कं, परिमार्ष्टुः -ष्ट्री -ष्टृ, शोधकः -का -कं.

To DETERIORATE, *v. n.* क्षि in pass. (क्षीयते), द्रुस् (c. 1. द्रुसते -सितुं), दुष् (c. 4. दुष्यति, दोष्टुं), भंश् (c. 4. भ्रश्यति, भंशितुं), विकृतीभू, अन्यथाभू, विकलीभू.

To DETERIORATE, *v. a.* दुष् in caus. (दूषयति -यितुं), विकलीकृ, विकृ, अपकृष् (c. 1. -कर्षति -क्रष्टुं), द्रुस् in caus. (द्रासयति -यितुं).

DETERIORATED, *p. p.* क्षीणः -णा -णं, परिभ्रष्टः -ष्टा -ष्टं, विकलः -ला -लं.

DETERIORATION, *s.* (Growing worse) विकारः, विकृतिः *f.*, ह्रासः, अपचयः, क्षयः, क्षीणता, भ्रष्टता, दुष्टता, अधोगतिः *f.*, अन्यथाभावः.—(Making worse) अपकर्षः -र्षणं, विकलीकरणं.

DETERMENT, *s.* निवर्तनं, निवृत्तिः *f.*, उद्योगभङ्गः, उद्यमव्याघातः, विघ्नः.

DETERMINABLE, *a.* निर्णेयः -या -यं, विवेचनीयः -या -यं, निर्धारणीयः -या -यं, निर्धार्यः -र्य्या -र्य्यं, अवधारणीयः -या -यं, अवधार्यः -र्य्या -र्य्यं.

DETERMINATE, *a.* (Settled, definite) निश्चितः -ता -तं, निर्णीतः -ता -तं, नियतः -ता -तं, निर्धारितः -ता -तं, सिद्धः -द्धा -द्धं, निबद्धः -द्धा -द्धं, निर्दिष्टः -ष्टा -ष्टं, व्यवस्थापितः -ता -तं, व्यवस्थितः -ता -तं.—(Decisive) निश्चायकः -का -कं, निर्णायकः -का -कं.—(Resolved) व्यवसितः -ता -तं, कृतनिश्चयः -या -यं.

DETERMINATELY, *adv.* निश्चितं, सनिश्चयं, सनिर्णयं, निर्णयपूर्वं, सङ्कल्पपूर्वं.

DETERMINATION, *s.* निश्चयः, निर्णयः, सङ्कल्पः, व्यवसायः, कल्पः, सम्प्रधारणा, निर्धारणं, अवधारणं, सिद्धिः *f.*, निष्पत्तिः *f.*, व्यवस्थितिः *f.*, विचारः, विवेचना; 'firm determination,' दृढनिश्चयः.—(Persevering direction to an end) अभिनिवेशः, निर्बन्धः, अध्यवसायः.

DETERMINATIVE, *a.* निश्चायकः -का -कं, निर्णायकः -का -कं, निर्धारकः -का -कं.

To DETERMINE, *v. a.* (Fix, settle) स्था in caus. (स्थापयति -यितुं), अवस्था, व्यवस्था; सिध् in caus. (साधयति -यितुं), स्थिरीकृ, सिद्धीकृ, परिकॢप् (c. 10. -कल्पयति -यितुं).—(Decide) निश्चि (c. 5. -चिनोति -चेतुं), निर्णी (c. 1. -णयति -णेतुं), विचर् in caus. (-चारयति -यितुं).—(Resolve) अवसो (c. 4. -स्यति -सातुं), अध्यवसो, सङ्कॢप्, मनो निविश् in caus. (-वेशयति -यितुं).—(Ascertain) निरूप् in caus. (-रूपयति -यितुं), अवधृ in caus. (-धारयति -यितुं), सम्प्रधृ, निधे.—(Define) निर्दिश् (c. 6. -दिशति -देष्टुं), लक्ष् (c. 10. लक्षयति -यितुं).—(Confine) परिमा (c. 2. -माति -तुं).—(Direct, influence the choice) उद्दिश्; प्रेर् in caus. (-ईरयति -यितुं), प्रयुज् in caus. (-योजयति -यितुं), प्रोत्सह् in caus. (-साहयति -यितुं).

To DETERMINE, *v. n.* (Come to a decision) निश्चयं कृ, निर्णयं कृ, सङ्कल्पं कृ.—(End, come to a conclusion) सिध् in pass. (सिध्यते or c. 4. सिध्यति), सम्पद् (c. 4. -पद्यते -पत्तुं), अवसो (c. 4. -स्यति -सातुं), व्यवसो; 'I am determined to do that,' तत् कर्तुं व्यवसितोऽस्मि.

DETERMINED, *p. p.* निश्चितः -ता -तं, निर्णीतः -ता -तं, कृतनिश्चयः -या -यं,

व्यवसितः -ता -तं, सिद्धः -द्धा -द्धं, व्यवस्थितः -ता -तं, निर्धारितः -ता -तं, अवधारितः -ता -तं, नियतः -ता -तं, प्रयतितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, विचारितः -ता -तं, सङ्कल्पितः -ता -तं.—(Resolute) साङ्कल्पिकः -की -कं, व्यवसायी -यिनी -यि (न्), सुस्थिरः -रा -रं, स्थिरमतिः -तिः -ति, अभिनिविष्टः -ष्टा -ष्टं; 'determined to sacrifice life,' प्राणांस् त्यक्तुं सुनिश्चितः or व्यवसितः.

Determinedly, *adv.* सुस्थिरं, स्थिरचेतसा, सुनिश्चितं, बुद्धिपुरःसरं, बुद्ध्या.

Determiner, *s.* निर्णेता *m.* (तृ), निश्चयकारी *m.* (न्), सङ्कल्पकृत्.

Detersive, *a.* अपमार्ज्जकः -का -कं, शोधकः -का -कं, परिष्कारकः -का -कं.

To detest, *v. a.* द्विष् (c. 2. द्वेष्टि -ष्टुं), प्रद्विष्, विद्विष्, गर्ह् (c. 1. गर्हते -र्हितुं), द्रुह् (c. 4. द्रुह्यति, द्रोहितुं, द्रोग्धुं), अभिद्रुह्, बाध् in des. (बीभत्सते -त्सितुं), घृण् (c. 1. घृणते -णितुं).

Detestable, *a.* द्वेष्यः -ष्या -ष्यं, द्वेषणीयः -या -यं, गर्हणीयः -या -यं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हितः -ता -तं, घृणार्हः -र्हा -र्हं, अश्लिगतः -ता -तं.

Detestably, *adv.* गर्हणीयं, गर्हितं, द्वेषणीयं, विद्विष्टं, घृणार्हं.

Detestation, *s.* द्वेषः, विद्वेषः, विद्विष्टता, गर्हा -र्हणं, बीभत्सः, घृणा.

Detested, *p. p.* द्विष्टः -ष्टा -ष्टं, विद्विष्टः -ष्टा -ष्टं, गर्हितः -ता -तं, घृणितः -ता -तं, ख्यातगर्हणः -णा -णं, अवगीतः -ता -तं.

Detester, *s.* द्वेषी *m.* (न्), विद्वेषी *m.*, विद्वेष्टा *m.* (ष्टृ), गर्हाकारी *m.* (न्).

To dethrone, *v. a.* राज्यात् or सिंहासनात् पत् in caus. (पातयति -यितुं) or च्यु in caus. (च्यावयति -यितुं) or भ्रंश् in caus. (भ्रंशयति -यितुं) or उत्पद् in caus. (-पाटयति -यितुं).

Dethroned, *p. p.* राज्यभ्रष्टः -ष्टा -ष्टं, भ्रष्टराज्यः -ज्या -ज्यं, राज्यात्प्रभ्रंशितः -ता -तं, राज्यप्रच्युतः -ता -तं, सिंहासनात्पातितः -ता -तं, राज्यादुत्पाटितः -ता -तं.

Dethronement, *s.* राज्यभ्रंशः, राज्यात्प्रभ्रंशनं, राज्यात्पातनं, राज्यादुत्पाटनं.

To detonate, *v. n.* स्तन् (c. 1. स्तनति -नितुं), स्फूर्ज् (c. 1. स्फूर्जति -र्जितुं), तीक्ष्णशब्दं कृ.

Detonation, *s.* स्तनितं, स्तननं, स्फूर्जनं, विस्फूर्जितं, तीक्ष्णशब्दः, आस्फोटनशब्दः.

To detort, *v. a.* विकृ, साचीकृ, वक्रीकृ, विरूप् (c. 10. -रूपयति -यितुं).

To detract, *v. a.* (Take away from) अपकृष् (c. 1. -कर्षति -क्रष्टुं), व्यपकृष्, अपहृ (c. 1. -हरति -हर्तुं), अपनी (c. 1. -नयति -नेतुं).—(Diminish, lessen the value) अल्पीकृ, न्यूनीकृ, क्षन (nom. क्षनयति -यितुं), लघ (nom. लघयति -यितुं), लघूकृ, ह्रस् in caus. (ह्रासयति -यितुं).—(Disparage, calumniate) असूय (nom. असूयति -ते -यितुं), अभ्यसूय, अपवद् (c. 1. -वदति -दितुं), परिवद्; निन्द् (c. 1. निन्दति -न्दितुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आक्षिप्.

Detraction, *s.* (Taking away, diminishing) अपकर्षः -र्षणं, अपनयनं, अपहरणं, अल्पीकरणं, न्यूनीकरणं, लघूकरणं, ह्रासः.—(Disparagement, calumny) असूया -यनं, अभ्यसया, असूयुः *m.*, अपवादः, परिवादः, गणापवादः, गुणनिन्दा, गुणघातः, परगुणमात्सरः, परदोषवादः, परदोषाभिधानं, दोषाविष्करणं, पिशुनवाक्यं, पैशुन्यं, कौलीनं, विगानं, आक्षेपः, कलङ्कः, वाग्दोषः.

Detractor, *s.* असूयकः, अभ्यसूयकः, अपवादी *m.* (न्), गुणापवादकः, परिवादी *m.* (न्), गुणघाती *m.* (न्), परगुणासहनः, निन्दकः, आक्षेपकः, सूचकः, खलः.

Detractory, detractive, *a.* असूयकः -का -कं, अभ्यसूयकः -का -कं, असूकः -का -कं, अपवादकः -का -कं, गुणघाती -तिनी -ति (न्), परिवादी -दिनी -दि (न्), लाघवकारी -रिणी -रि (न्), पिशुनः -ना -नं, कलङ्ककरः -री -रं, अकीर्त्तिकरः -री -रं.

Detractress, *s.* अपवादिनी, परिवादिनी, अभ्यसूयका, निन्दाकारिणी.

Detriment, *s.* क्षतिः *f.*, अपायः, हानिः *f.*, अपकारः, अपचयः, हिंसा, द्रोहः, अनिष्टं, नाशः, विनाशः, विक्षेपः, क्षतं, अपकृतं, अपचितिः *f.*, अपहारः, क्षयः, उपद्रवः, दोषः, बाधः, भंङ्गः, ध्वंसः, प्रध्वंसः, अपः.

Detrimental, *a.* अपकारकः -का -कं -री -रिणी -रि (न्), घातुकः -का -कं, उपघातकः -का -कं, हिंसः -सा -सं, हिंसकः -का -कं, विरोधी -धिनी -धि (न्), क्षतिकारकः -का -कं, हानिजनकः -का -कं, द्रोही -हिणी -हि (न्).

To detrude, *v. a.* निपत् in caus. (-पातयति -यितुं), अधःपत् in caus. or अधोऽधः पत्, अधःक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अधःकृ, प्रभंज् in caus. (-भंजयति -यितुं).

To detruncate, *v. a.* अवच्छिद् (c. 7. -छिनत्ति -छेत्तुं), अवकृत् (c. 6. -कृणत्ति -कर्त्तितुं).

Detruncation, *s.* छेदः, कर्त्तनं, अवच्छेदः, अवकर्त्तनं, लोदः -दनं.

Detrusion, *s.* निपातनं, अधःपातनं, अधोऽधःपातनं, अधःक्षेपणं.

Deuce, *s.* (Two) द्वि:, द्वयं, द्विकं.—(Devil) पिशाचः, वेतालः, भूतः.

Deuteronomy, *s.* ईश्वरीयव्यवस्थाया द्वितीयविवरणं, मूसालिखितं पञ्चमपुस्तकं.

To devastate, *v. a.* उपपीड् (c. 10. -पीडयति -यितुं); बाध् (c. 1. बाधते -धितुं), प्रबाध्, परिबाध्; उपद्रु (c. 1. -द्रवति -द्रोतुं), अभिभू (c. 1. -भवति -भवितुं), अवभृद्, उपप्लु (c. 1. -प्लवते -प्लोतुं), दह् (c. 1. दहति, दग्धुं), निर्दह्.

Devastated, *p. p.* पीडितः -ता -तं, विप्लुतः -ता -तं, उपद्रुतः -ता -तं.

Devastation, *s.* विप्लवः, उपप्लवः, उपपीडनं, पीडनं, उपद्रवः, अवभृदः, बाधा, प्रबाधा, उच्छेदः, विनाशः, अभिसम्पातः.

To develop, *v. a.* विवृ (c. 5. -वृणोति -वृणुते -वरितुं -रीतुं), अपावृ; प्रकाश् in caus. (-काशयति -यितुं), विकाश्, प्रकटीकृ, उत्पद् in caus. (-पादयति -यितुं), विस्तृ in caus. (-स्तारयति -यितुं), प्रसृ in caus. (-सारयति -यितुं), विप्रथ् in caus. (-प्रथयति -यितुं), व्याकृ.

Developed, *p. p.* विवृतः -ता -तं, विकाशितः -ता -तं, उत्पादितः -ता -तं.

Development, *s.* विवृतिः *f.*, विवरणं, विकाशनं, प्रकाशनं, प्रसारणं, उत्पत्तिः *f.*, उत्पादनं, विस्तृतिः *f.*, विस्तारणं, प्रकटीकरणं, व्याकरणं.

Devergence, *s.* अधःपतनं, अधोगतिः *f.*, च्युतिः *f.*, भंङ्गः, उत्क्रमः, वक्रता.

To deviate, *v. n.* भंश् (c. 4. भश्यति, भंशितुं), विभंश्, च्यु (c. 1. अवते, च्योतुं), विच्यु, विचल् (c. 1. -चलति -लितुं), उत्क्रम् (c. 1. -क्रामति -क्रमितुं), व्युत्क्रम्, भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), व्यभिचर् (c. 1. -चरति -रितुं) all with abl. c., त्यज् (c. 1. त्यजति, त्यक्तुं) with acc. c.

Deviated, *p. p.* भ्रष्टः -ष्टा -ष्टं, च्युतः -ता -तं, विचलितः -ता -तं.

Deviation, *s.* भंङ्गः, च्युतिः *f.*, विचलनं, उत्क्रमः, व्यभिचारः, भ्रान्तिः *f.*, भ्रमः, भ्रेषः, विक्रिया, त्यागः.—(From the right way) सत्यपथभ्रंशः, सत्यपथत्यागः, उत्पथगमनं, विमार्गगमनं, कुपथगमनं, यथोचिताद्भ्रंशः.

Device, *s.* (Contrivance) उपायः, व्यपदेशः, अपदेशः, व्यवसायः, प्रयोगः, कैतवप्रयोगः, प्रयुक्तिः *f.*, युक्तिः *f.*, कल्पना, चेष्टा, साधनं, प्रोत्साहनं, मन्त्रणा, छलं, माया, विधः; 'a good device,' सुयुक्तिः *f.*—(Project) अभिप्रायः, आशयः, चिन्ता.—(Emblem) चिह्नं, अङ्कः, कुलीनपदचिह्नं.

Devil, *s.* पिशाचः, भूतः, वेतालः, अपदेवता. *See* Demon. The translators of the Bible have coined the word शैतान् from the Arabic.

Devilish, *a.* पैशाचः -ची -चं -चिकः -की -कं, भौतः -ती -तं -तिकः -की -कं.

Devilishly, *adv.* पिशाचवत्, वेतालवत्.—(Greatly) अत्यर्थं, भृशं.

Devious, *a.* वक्रः -क्रा -क्रं, कुटिलः -ला -लं, अमर्य्यादः -दा -दं, उत्क्रान्तमर्य्यादः -दा -दं, व्यभिचारी -रिणी -रि (न्), अनाचारी -रिणी -रि (न्), भ्रमी -मिणी -मि (न्).

To DEVISE, *v. a.* प्रचिन्त् (c. 10. -चिन्तयति -यितुं), परिचिन्त्, मनसा कृप् (c. 10. -कल्पयति -यितुं) or परिकृप्, अनुसन्धा (c. 3. -दधाति -धातुं), विधा, घट् (c. 1. घटते -टितुं), मन्त् (c. 10. मन्तयति -यितुं), अवसो (c. 4. -स्यति -सातुं), आलोच् (c. 10. -लोचयति -यितुं).—(Grant by will) दानपत्रेण स्वरिक्थं दायादादिभ्यः प्रदा (c. 1. -यच्छति -दातुं) or समृ in caus. (-अर्पयति -यितुं).

To DEVISE, *v. n.* उपायप्रयोगं कृ, उपायचिन्तां कृ, व्यपदेशं कृ.

DEVISE, *s.* (Bequeathing by will) दानपत्रेण दायादिभ्यो रिक्थप्रदानं.

DEVISED, *p. p.* प्रचिन्तितः -ता -तं, घटितः -ता -तं, विहितः -ता -तं, परिकल्पितः -ता -तं; 'well-devised,' सुघटितः -ता -तं.

DEVISEE, *s.* धनहारी *m.* (न्), धनाधिकारी *m.* (न्), अधिकारी, दानपात्रं.

DEVISER, *s.* (Contriver) उपायचिन्तकः, उपायज्ञः, उपेता *m.* (तृ), उपायी *m.* (न्), प्रयोजकः, परिकल्पकः, व्यवसायी *m.* (न्).

DEVISOR, *s.* दानपत्रेण रिक्थप्रदाता *m.* (तृ), सम्प्रदाता *m.*

DEVOID, *a.* (Empty) शून्यः -न्या -न्यं.—(Free from) हीनः -ना -नं, विहीनः -ना -नं, रहितः -ता -तं, विरहितः -ता -तं, शून्यः -न्या -न्यं, वर्जितः -ता -तं, विवर्जितः -ता -तं, उज्झितः -ता -तं, वीतः -ता -तं, गतः -ता -तं, or by निर्, वि and अ prefixed; as, 'devoid of fruit,' फलहीनः -ना -नं, फलरहितः -ता -तं, फलशून्यः -न्या -न्यं, वीतफलः -ला -लं, निष्फलः -ला -लं, विफलः -ला -लं, अफलः -ला -लं.

DEVOIR, *s.* सत्कारः, सत्कृतं, सत्कृतिः *f.*, आदरकर्म्म *n.* (न्), समादरः, सम्मानं, पूजा, अर्चनं -ना, स्वकर्त्तव्यं, कर्त्तव्यता, व्रतं.

To DEVOLVE, *v. a.* (Roll down) प्रवह् in caus. (-वाहयति -यितुं), प्रसृ in caus. (-सारयति -यितुं), प्रवृत् in caus. (-वर्त्तयति -यितुं), अनुवृत्, प्रपत् in caus. (-पातयति -यितुं).—(Deliver over) न्यस् (c. 4. -अस्यति -असितुं), सन्न्यस्, उपन्यस्, ऋ in caus. (अर्पयति -यितुं), समृ, प्रतिपद् in caus. (-पादयति -यितुं), निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आरुह् in caus. (-रोपयति -यितुं), संक्रम् in caus. (-क्रामयति -यितुं).

To DEVOLVE, *v. n.* (Fall into new hands, be delivered over) आगम् (c. 1. -गच्छति -गन्तुं), आया (c. 2. -याति -तुं), संक्रम् (c. 1. -क्रमते -मितुं), न्यस् in pass. (-अस्यते), सन्न्यस् in pass., समृ in caus. pass. (-अर्प्यते), न्यस्तः -स्ता -स्तं भू.—(Roll down, fall down) अधो वृत् (c. 1. वर्त्तते -र्त्तितुं), अधो पत्, प्रपत् (c. 1. -पतति -तितुं).

DEVOLUTION, *s.* अधःपतनं, प्रवर्त्तनं, न्यसनं, सन्न्यसनं, आरोपणं.

To DEVOTE, *v. a.* (Appropriate to any use, dedicate, consecrate) विनियुज् (c. 7. -युनक्ति -योक्तुं), प्रयुज्, समृ in caus. (-अर्पयति -यितुं), निविद् in caus. (-वेदयति -यितुं), उत्सृज् (c. 6. -सृजति -स्रष्टुं), प्रणी (c. 1. -णयति -णेतुं), उपक्लृप् (c. 10. -कल्पयति -यितुं), प्रतिष्ठा in caus. (-ष्ठापयति -यितुं), सङ्कल्पं कृत्वा दा or समृ, वितॄ (c. 1. -तरति -रितुं -रीतुं).—(Addict one's self to any thing) आसञ्ज् in pass. (-सज्यते or -सज्जते -संक्तुं) with loc., भज् (c. 1. भजति -ते, भक्तुं), आसेव् (c. 1. -सेवते -वितुं), मनो निविश् in caus. (-वेशयति -यितुं), अनुरञ्ज् in pass. (-रज्यते), समायत् (c. 1. -यतते -तितुं), आसक्तः -क्ता -क्तं भू; 'he is devoted to his wife,' भार्य्यायाम् अनुरज्यते.—(Doom to destruction) नरकं गम्या इति शप्तं कृ.

DEVOTED, *p. p.* भक्तः -क्ता -क्तं, आसक्तः -क्ता -क्तं, प्रसक्तः -क्ता -क्तं, व्यासक्तः -क्ता -क्तं, सक्तः -क्ता -क्तं, रतः -ता -तं, निरतः -ता -तं, आरूढः -ढा -ढं, आस्थितः -ता -तं, समायत्तः -त्ता -त्तं, दृढभक्तिः -क्तिः -क्ति, भक्तियुक्तः -क्ता -क्तं, सक्तिमान् -मती -मत् (त्); 'devoted to one's master,' प्रभुभक्तः; 'to Krishna,' कृष्णाश्रितः or कृष्णंश्रितः; 'a devoted wife,' पतिव्रता, एकपत्नी, पतिसेविनी; 'a devoted husband,' योनीसेवी *m.* (न्), भार्य्यानुकूलः; 'a devoted friend,' स्थितप्रेमा *m.* (न्).

DEVOTEDNESS, *s.* (Dedication, consecration) समर्पणं, उत्सर्गः, निवेदनं, विनियोगः, सङ्कल्पकरणं, प्रतिष्ठा, वितरणं.—(Addiction) भक्तिः *f.*, आसक्तिः *f.*, रक्तिः *f.*, उपसेवनं, निवेशः, अभिनिवेशः, निविष्टता, परायणता, उपासकता.

DEVOTEE, *s.* योगी *m.* (न्), सन्न्यासी *m.* (न्), तपस्वी *m.* (न्), तापसः, यती *m.* (न्), महाव्रती *m.* (न्), वैखानसः, मुनिः *m.*, निर्ग्रन्थः -न्थकः, धर्म्मनिबन्धी *m.* (न्), धर्म्मनिरतः, धर्म्मनिविष्टः.

DEVOTION, *s.* (Devoted attachment) भक्तिः *f.*, भक्तत्वं, अनुरागः, आसक्तिः *f.*, प्रसक्तिः *f.*, सक्तिः *f.*, अनुरक्तिः *f.*, योगः, सेवा, उपासना, उपसेवनं.—(Piety) ईश्वरभक्तिः *f.*, भजनशीलता, धर्म्मत्वं, ईश्वरसेवा, उत्सर्गः.—(Act of worship) नियमः, धर्म्मक्रिया, धर्म्मकृत्यं, तपः *n.* (स्); 'to perform austere devotion,' तपस् (nom. तपस्यति) or तपस् तप् in pass. (तप्यते); 'self-devotion,' आत्मपरित्यागः; 'devotion to a husband,' पतिसेवा, पातिव्रत्यं.

DEVOTIONAL, *a.* (Relating to religion) धर्म्मविषयकः -का -कं, ईश्वरपूजाविषयः -या -यं, तपोमयः -यी -यं.—(Religious) धर्म्मपरः -रा -रं, ईश्वरभावनः -ना -नं, भजनशीलः -ला -लं, औपासनः -नी -नं, नियमनिष्ठः -ष्ठा -ष्ठं.

To DEVOUR, *v. a.* ग्रस् (c. 1. ग्रसते -सितुं), उपग्रस्, भक्ष् (c. 10. भक्षयति -यितुं), सम्भक्ष्, खाद् (c. 1. खादति -दितुं), संखाद्, समद् (c. 2. -अत्ति -त्तुं), समश् (c. 9. -अश्नाति -अशितुं), पर्य्यश्, जक्ष् (c. 2. जक्षिति -तुं) घस् (c. 1. घसति, घस्तुं).—(Swallow up) गॄ (c. 6. गिरति, गरितुं -रीतुं), निगॄ, सङ्गॄ, ग्रस्.—(Consume) उपयुज् (c. 7. -युंक्ते -योक्तुं), नश् in caus. (नाशयति -यितुं).

DEVOURED, *p. p.* ग्रस्तः -स्ता -स्तं, जग्धः -ग्धा -ग्धं, भक्षितः -ता -तं, खादितः -ता -तं.

DEVOURER, *s.* भक्षकः, खादकः, भक्षयिता *m.* (तृ), ग्रसनकारः, ग्रसिष्णुः *m.*

DEVOUT, *a.* भक्तः -क्ता -क्तं, भक्तिमान् -मती -मत् (त्), भजनशीलः -ला -लं, धर्म्मी -र्म्मिणी -र्म्मि (न्), धार्म्मिकः -की -कं, धर्म्मिष्ठः -ष्ठा -ष्ठं, धर्म्मात्मा -त्मा -त्म (न्) or पुण्यात्मा or प्रयतात्मा, पूजकः -का -कं, व्रती -तिनी -ति (न्) or महाव्रती, ईश्वरभावनः -ना -नं, आर्च्चः -र्च्ची -र्च्चं, पुण्यशीलः -ला -लं, तपस्वी -स्विनी -स्वि (न्), ईश्वरनिष्ठः -ष्ठा -ष्ठं, श्रद्धान्वितः -ता -तं, परमेश्वरे सदाभक्तिः -क्तिः -क्ति.

DEVOUTLY, *adv.* ईश्वरभक्तिपूर्व्वं, ईश्वरभक्तत्वात्, श्रद्धापूर्व्वं.

DEVOUTNESS, *s.* ईश्वरभक्तत्वं, ईश्वरनिष्ठत्वं, नियमनिष्ठता, श्रद्धावत्त्वं.

DEW, *s.* नीहारः, तुषारः, शिशिरः, प्रालेयं, अवश्यायः, रजनीजलं, रात्रिजलं, निशाजलं, खजलं, खवारि *n.*, अवश्यायजलं, अवश्यायसलिलं, निशापुष्पं, खवाष्पः, हिमः -मं, दस्रं.

To DEW, *v. a.* नीहारेण or शिशिरेण क्लिद् in caus. (क्लेदयति -यितुं) or सिच् (c. 6. सिञ्चति, सेक्तुं) or प्रोक्ष् (c. 1. -उक्षति -क्षितुं) or आर्द्रीकृ.

DEW-BESPRENT, *a.* शिशिराक्तः -क्ता -क्तं, नीहारोक्षितः -ता -तं, तुषारक्लिन्नः -न्ना -न्नं, अवश्यायावसिक्तः -क्ता -क्तं.

DEW-DROP, *s.* तुषारकणः, नीहारबिन्दुः *m.*, शिशिरबिन्दुः, अवश्यायबिन्दुः, हिमकणः, तुषारशीकरः.

DEW-LAP, *s.* गलकम्बलः, कम्बलः, साम्ना, वृषगलस्य लोलितमांसं.

DEWY, *a.* तुषारमयः -यी -यं, नीहारसिक्तः -क्ता -क्तं, सशिशिरः -रा -रं.

DEXTERITY, *s.* दक्षता, दाक्ष्यं, हस्तकौशल्यं, करदक्षता, हस्तलाघवं, हस्तपादादिक्षिप्रता, चातुर्य्यं, नैपुण्यं, युक्तिः *f.*, सुप्रयोगः -गता, पटुता, सत्वरता.

DEXTEROUS, *a.* दक्षः -क्षा -क्षं, करदक्षः -क्षा -क्षं, लघुहस्तः -स्ता -स्तं, कृतहस्तः -स्ता -स्तं, चतुरः -रा -रं, निपुणः -णा -णं, क्षिप्रः -प्रा -प्रं, युक्तिमान् -मती -मत् (त्), सुप्रयोगवान् -वती -वत् (त्), पेशलः -ला -लं,

पटुः -टुः -टु, सूत्थानः -ना -नं, उक्षः -क्षा -क्षं.

DEXTEROUSLY, *adv.* सदाक्षं, सलाघवं, युक्त्या, सचातुर्यं, सपाटवं.

DEXTRAL, *a.* दक्षिणः -णा -णं, दाक्षिणः -णी -णं, अपसव्यः -व्या -व्यं, वामेतरः -रा -रं, अवामः -मा -मं, दक्षिणस्थः -स्था -स्थं, दक्षिणपार्श्वस्थः -स्था -स्थं.

DHANWANTARI, *s.* (The physician of the gods) धन्वन्तरिः *m.*, काशिराजः.

DIABETES, *s.* बहुमूत्रमेहः, बहुमूत्ररोगः, इक्षुमेहः, प्रमेहः.

DIABOLIC, DIABOLICAL, *a.* पैशाचः -ची -चं -चिकः -की -कं, भौतिकः -की -कं, पिशाचोपमः -मा -मं, वैतालिकः -की -कं, दारुणः -णा -णं.

DIABOLICALLY, *adv.* पिशाचवत्, भूतवत्, वेतालवत्, दारुणं.

DIACOUSTICS, *s.* श्रवणविद्या, शब्दनिर्णयविद्या, ध्वनिविद्या.

DIADEM, *s.* किरीटः, मुकुटं, मौलिः *m.* -ली, वेष्टनं, शिरोवेष्टनं, अवतंसः, तिरीटं, बन्धुरं, चूडा, मस्तकाभरणं.

DIADEMED, *a.* किरीटी -टिनी -टि (न्), किरीटधारी -रिणी -रि (न्).

DIÆRESIS, *s.* स्वरविच्छेदः, पदविभेदः, अक्षरविच्छेदः, असन्धिः, यथा तितउ शब्दे.

DIAGNOSTIC, *s.* रोगलक्षणं, रोगचिह्नं, विसूचिका, प्रज्ञानं, उपसर्गः.

DIAGONAL, *a.* एककोणात् अन्यकोणपर्य्यन्तम् अङ्कितः -ता -तं, कोणाकोणि लिखितः -ता -तं.

DIAGONAL, *s.* कर्णः, श्रुतिः *f.*, श्रवणः, एककोणाद् अन्यकोणपर्य्यन्तम् अङ्किता रेखा, कोणाकोणि लिखिता रेखा यया चतुरस्रं द्विसमीकृतं.

DIAGONALLY, *adv.* कोणाकोणि, आरारि, असासि.

DIAGRAM, *s.* मण्डलकं, चक्रं, कूर्म्मचक्रं, क्षेत्रं, अङ्कः, चित्रं.

DIAL, DIAL-PLATE, *s.* मुहूर्त्तदण्डादिपरिमापकं मण्डलं, अङ्कचिह्निता घटी यया मयूखद्वारेण कालः सूच्यते, इन्दः, यामघोषा; 'pin of a dial,' मयूखः, कीलः; 'sun-dial,' सूर्य्यघटी, प्रतोदः.

DIALECT, *s.* (Subdivision of a language) विभिन्नभाषा, देशभाषा.—(Language, speech) भाषा, भाषितं -षणं, वचनं, वाक्यं, वाक् *f.* (च्), उक्तिः *f.*; 'foreign dialect,' म्लेच्छभाषा.

DIALECTIC, *s.* (Logic) तर्कः, तर्कविद्या, न्यायः, आन्वीक्षिकी, अनुमानोक्तिः *f.*

DIALECTICAL, *a.* तार्किकः -की -कं, न्यायी -यिनी -यि (न्), प्रोहः -हा -हं.

DIALECTICALLY, *adv.* न्यायतस्, तर्कविद्यानुसारेण, तर्कशास्त्रवत्.

DIALECTICIAN, *s.* तर्की *m.* (न्), न्यायविद्, नैयायिकः, आक्षपादः, सांवादिकः.

DIALLING, *s.* (Science of shadow) छायाविद्या.—(Dial making) घटीनिर्म्माणं, पूर्व्वोक्तमण्डलनिर्म्माणशिल्पं.

DIALOGIST, *s.* कथोपकथकः, सांवादिकः, सम्भाषकः, उत्तरप्रत्युत्तरकृत्, प्रश्नोत्तरक्रमेण कथोपकथनरचकः.

DIALOGUE, *s.* कथोपकथनं, संलापः, सम्भाषा -षणं, संवादः, द्वयोः संवादः, सङ्कथा, सम्प्रवदनं, उत्तरप्रत्युत्तरं, प्रश्नोत्तरं, उक्तिप्रत्युक्तिः *f.*, परस्परालापः, वीथ्यङ्गं.

To DIALOGUE, *v. n.* सम्भाष् (c. 1. -भाषते -षितुं), संवद् (c. 1. -वदति -दितुं), संलप् (c. 1. -लपति -पितुं), संवच् (c. 2. -वक्ति -क्तुं), कथोपकथनं कृ.

DIAMETER, *s.* (Of a circle) व्यासः, विष्कम्भः, विस्तारः, विस्तृतिः *f.*

DIAMETRAL, DIAMETRICAL, *a.* व्यासक्रमेण विपरीतगतः -ता -तं, अभिमुखगतः -ता -तं.

DIAMETRICALLY, *adv.* व्यासक्रमेण विपरीतं, अभिमुखं, प्रतिकूलं, मुखामुखि.

DIAMOND, *s.* हीरं -रकः, वज्रः -ज्रं, वरारकं, अविकं, अशिरं, दधीच्यस्थि *n.*, दृढाङ्गं, लोहजित्, सूचीमुखं, रत्नमुख्यं, भार्गवप्रियः; 'diamond-mine,' वज्राकरः.

DIAMOND-CUTTER, *s.* हीरकारः, हीरकच्छिद्, हीरमार्जकः, हीरपरिष्कारकः.

DIAPASON, *s.* स्वराष्टकं, अष्टस्वराः *m. pl.*, स्वरग्रामः, विरिञ्चाष्टकं.

DIAPER, *s.* पुष्पादिसंस्कारालङ्कृतः क्षौमपटः, चित्रपटः, वरकं.

To DIAPER, *v. a.* क्षौमपटं पुष्पादिसंस्कारेण अलङ्कृ, चित्र् (c. 10. चित्रयति -यितुं).

DIAPHANEITY, *s.* स्वच्छता, अच्छता, प्रसन्नता, प्रसत्तिः *f.*, वैशद्यं.

DIAPHANIC, DIAPHANOUS, *a.* स्वच्छः -च्छा -च्छं, अच्छः -च्छा -च्छं, प्रसन्नः -न्ना -न्नं, विशदः -दा -दं, विमलः -ला -लं, विशुद्धः -द्धा -द्धं, स्फटिकाभः -भा -भं.

DIAPHORETIC, *a.* स्वेदकरः -री -रं, स्वेदनः -ना -नं, स्वेदजनकः -का -कं, घर्म्मोत्पादकः -का -कं, प्रस्वेदितवान् -वती -वत् (त्); 'a diaphoretic,' स्वेदनं.

DIAPHRAGM, *s.* शरीरस्य मध्यदेशः, उदरवक्षःस्थलमध्ये शरीरभागः.

DIARRHŒA, *s.* अतिसारः, सारणः, प्रवाहिका, ग्रहणीरुक् *f.* (ज्), ग्रहणी, विरेकः, प्रस्कन्दनं -न्दिका, वसनः.

DIARRHŒTIC, *a.* रेचकः -की -कं, सारकः -का -कं, अधोभागहरः -रा -रं.

DIARY, *s.* आह्निकव्यवहारपुस्तकं, दैनिकवृत्तान्तपुस्तकं, आह्निकचरित्रलिखनं, पुस्तकं यस्मिन् दैनिकचेष्टितानि समारोप्यन्ते, पदभङ्गिका, पञ्जिका.

DIASTOLE, *s.* रूपकविशेषो येन ह्रस्वस्वरो दीर्घीक्रियते.

DIATESSERON, *s.* गान्धर्ववैद्यायां स्वरचतुष्टयं.

DIBBLE, *s.* लघुखनित्रं, क्षुद्रखात्रं, बीजारोपणे प्रयुक्तो तीक्ष्णाग्रो दण्डः.

DICACITY, *s.* वाक्पटुता, अतिशयोक्तिः *f.*, जल्पः, वाचालता, अविनयः.

DICE, *s.*, *pl.* of DIE. अक्षाः *m. pl.*, पाशकाः *m. pl.*, देवनाः *m. pl.*; 'loaded dice,' कूटाक्षाः *m. pl.*; 'player with dice,' अक्षदेवी *m.* (न्).

To DICE, *v. n.* अक्षैर् दिव् (c. 4. दीव्यति -ते, देवितुं) or प्रदिव् or प्रतिदिव् or क्रीड् (c. 1. क्रीडति -डितुं); ग्रह् (c. 1. गृह्णते -हितुं), अक्षक्रीडां कृ.

DICE-BOARD, *s.* पाशकपीठः, नयपीठी, अष्टापदं, शारिफलं.

DICE-BOX, *s.* अक्षाधारः, पाशकभाण्डं, अक्षभाजनं, अक्षसम्पुटकः.

DICER, *s.* अक्षदेवी *m.* (न्), अक्षद्यूतः -द्यूः, अक्षक्रीडकः; 'player with unfair dice,' कूटाक्षदेवी *m.* (न्).

To DICHOTOMIZE, *v. a.* द्विधा कृ or छिद् (c. 7. छिनत्ति, छेत्तुं), पृथक्कृ.

DICKER, *s.* (Of leather) दशचर्म्मादि *n. pl.*, चर्म्मदशकं.

To DICTATE, *v. a.* आज्ञा in caus. (-ज्ञापयति -यितुं), आदिश् (c. 6. -दिशति -देष्टुं), निर्दिश्, शास् (c. 2. शास्ति, शासितुं), चुद् in caus. (चोदयति -यितुं), अभिचुद्, प्रेर् in caus. (-ईरयति -यितुं), प्रकल्प् in caus. (-कल्पयति -यितुं).

DICTATE, *s.* आज्ञा, आदेशः, निदेशः, निर्देशः, नियमः, नियोगः, शासनं, चोदनः, विधिः *m.*, विधानं, प्रेरणं, वचनं, प्रयुक्तिः *f.*

DICTATED, *p. p.* आदिष्टः -ष्टा -ष्टं, आज्ञापितः -ता -तं, चोदितः -ता -तं.

DICTATION, *s.* आदेशः, आज्ञापनं, निर्देशः, निदेशः, नियोजनं, विज्ञापनं, चोदना.

DICTATOR, *s.* आपाततः or विनिपातसमये सर्व्वसम्मत्या परमाधिकारयुक्तो जनः, अनन्याधीनः शासिता *m.* (तृ), परमशासिता, परमप्रभुः, एकप्रभुः, एकाधिपतिः *m.*

DICTATORIAL, *a.* आज्ञापकः -का -कं, निर्देशकः -का -कं, धृष्टः -ष्टा -ष्टं.

DICTATORSHIP, *s.* पूर्व्वोक्तशासितुः पदं or अधिकारः, ऐकपत्यं, ऐकाधिपत्यं.

DICTION, *s.* वाग्व्यापारः, वाक्यव्यापारः, वाग्रीतिः *f.*, वाक्यं, उक्तिः *f.*, वचनं, भाषा, वाणी, व्याहारः, वचः *n.* (स्).

DICTIONARY, *s.* कोषः, शब्दकोषः, शब्दसङ्ग्रहः, अभिधानं, शब्दग्रन्थः, शब्दजालं, निर्वचनं, निघण्टुः *m.*; 'a dictionary compiler,' कौशिकः.

DICTUM, *s.* (Authoritative saying) वचनं, आदेशः, वक्तव्यं.

DIDACTIC, DIDACTICAL, *a.* उपदेशकः -का -कं, निर्देशकः -का -कं, शिक्षकः -का -कं, शिक्षाकरः -रा -रं, वैधिकः -की -कं, सौचः -ची -चं.

DIDAPPER, *s.* (A diving bird) प्लवः, प्लावी *m.* (न्).

DIE, *s.* (To play with) अक्षः, पाशकः, देवनः, नयः, विन्दुतन्तः, दुन्दुभिः *f.* -भी, जयपुत्रकः, शारिशृङ्खला, अष्टाङ्गं; 'a loaded die,' कूटाक्षः,

दुरन्तं.—(Chance) दैवं.—(Stamp used in coinage) मुद्रा.

To DIE, *v. a.* (Colour, stain). *See To* DYE.

To DIE, *v. n.* (Lose life) मृ (c. 6. म्रियते, मर्तुं), सम्मृ, प्रे (c. 2. -एति -तुं, with प्र, प्रैति), परे, अती (अयेति), व्यती; जीवनं or देहम् उत्सृज् (c. 6. -सृजति -स्रष्टुं), तनुं or शरीरं त्यज् (c. 1. त्यजति, त्यक्तुं) or न्यस् (c. 4. -अस्यति -असितुं), प्राणत्यागं कृ, प्रवी (c. 4. -वीयते), विपद् (c. 4. -पद्यते -पत्तुं), व्यापद्; पञ्चत्वं गम् (c. 1. गच्छति, गन्तुं), देहाद् अपगम्, लोकान्तरं गम् or प्राप् (c. 5. -आप्नोति -आप्तुं), संस्था (c. 1. -तिष्ठते -स्थातुं), प्रेतीभू.—(Perish, be lost) नश् (c. 4. नश्यति, नशितुं), प्रणश्, विनश्; प्रली (c. 4. -लीयते -लेतुं), क्षि in pass. (क्षीयते), प्रक्षि, संक्षि, ध्वंस् (c. 1. ध्वंसते -सितुं), विध्वंस्.—(Sink, faint) सद् (c. 1. सीदति, सत्तुं), अवसद्, विषद्; ग्लै (c. 1. ग्लायति, ग्लातुं), मुह् (c. 1. मूह्यति -ढुं).—(Wither) विश् in pass. (-शीर्य्यते).

DIER, *s.* (One who colours) वस्त्ररागकृत्. *See* DYER.

DIET, *s.* (Food) अन्नं, आहारः, खाद्यद्रव्यं, भोजनं, भक्ष्यं, भोज्यं; 'change of diet,' अन्नपरिवर्त्तः.—(Food regulated by the rules of medicine) पथ्यं, पथ्यान्नं, पथ्यापथ्यं.—(Assembly of princes) राजसभा, शिष्टसभा, महाजनसभा.

To DIET, *v. a.* (Feed by the rules of medicine) पथ्यापथ्यं निर्दिश् (c. 6. -दिशति -देष्टुं), पथ्यान्नं or पथ्यान्नेन भुज् in caus. (भोजयति -यितुं), पथ्यान्नं दा.—(Feed) भुज् in caus., पुष् (c. 10. पोषयति -यितुं), भृ (c. 3. बिभर्त्ति, भर्त्तुं).

To DIET, *v. n.* पथ्यान्नं भुज् (c. 7. भुंक्ते, भोक्तुं) or अश् (c. 9. अश्नाति, अशितुं).

DIET-DRINK, *s.* औषधीयजलं, पथ्यपानीयं, सिद्धजलं.

To DIFFER, *v. n.* (Be distinguished from) विशिष् in pass. (-शिष्यते), भिद् in pass. (भिद्यते), विभिद्, प्रभिद्, all with abl. c.; as, 'the son differs from the father,' पितुर् भिद्यते कुमारः.—(Contend, be at variance) विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, प्रतिकूल (nom. प्रतिकूलयति -यितुं).—(Dissent) विपरीतं मन् (c. 4. मन्यते, मन्तुं), न सम्मन्, अन्यथा मन्, असम्मतिं कृ, विवद् (c. 1. -वदते -दितुं), न स्वीकृ, भिन्नमतः -ता -तं भू.

DIFFERENCE, *s.* (Distinction from something else) भेदः, विभेदः, प्रभेदः, भिदा, विशेषः, विशिष्टता, वैशिष्ट्यं, अन्तरं -रितं, भिन्नता, विभिन्नता, पृथक्त्वं, पार्थक्यं, अवच्छेदः, अन्यथात्वं, परत्वं, इतरत्वं.—(Contrariety) विपरीतता, वैपरीत्यं, विरोधः, विरुद्धता, विपर्य्ययः, वैलक्षण्यं, विप्रतिपत्तिः *f.*, द्वैधं, द्वैविध्यं.—(Difference of opinion, dispute) मतिप्रभेदः, मतिविपर्य्ययः, विमतिः *f.*, वैमत्यं, विवादः, विसंवादः, द्वैधं, कलहः, कलिः *m.*—(Difference of meaning) अर्थभेदः, अर्थान्तरं.—(Difference in quantity) तारतम्यं, वैषम्यं.—(Dissimilarity) असाम्यं, असादृश्यं.

To DIFFERENCE, *v. a.* विशिष् in caus. (-शेषयति -यितुं), भिद् in caus. (भेदयति -यितुं), पृथक्.

DIFFERENT, *a.* (Distinct) भिन्नः -न्ना -न्नं, प्रभिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, अन्यः -न्या -न्यत्, अन्यतरः -रा -रत्, इतरः -रा -रं, परः -रा -रं, विपरीतः -ता -तं, विविक्तः -क्ता -क्तं, व्यतिरिक्तः -क्ता -क्तं, विशिष्टः -ष्टा -ष्टं, त्वः त्वा त्वं.—(Dissimilar) असदृशः -शी -शं, असमानः -ना -नं, असमः -मा -मं, विषमः -मा -मं.—(Various) विविधः -धा -धं, पृथग्विधः -धा -धं, नानाविधः -धा -धं, बहुविधः -धा -धं; 'by a different road,' भिन्नमार्गेण; 'in a different way,' अन्यथा; 'different state of the case,' अन्यथात्वं. Sometimes expressed by अन्तरं affixed; as, 'a different meaning,' अर्थान्तरं.

DIFFERENTIAL, *a.* भेदकरः -री -रं, विशेषकः -का -कं.—(Differential series, dependence of larger numbers on smaller) तारतम्यं.

DIFFERENTLY, *adv.* अन्यथा, इतरथा, परतस्, अन्यतस्, इतरतस्, पृथक्, भिन्नरूपेण, अन्यप्रकारेण, विपरीतं, पृथक्त्वेन.

DIFFICULT, *a.* (Hard, not easy) कठिनः -ना -नं, दुष्करः -रा -री -रं, दुःसाध्यः -ध्या -ध्यं, दुष्करः -रा -रं, दुर्निवहः -हा -हं, असुकरः -री -रं, असुगमः -मा -मं, विषमः -मा -मं, कष्टः -ष्टा -ष्टं, कष्टकरः -री -रं, आयासी -सिनी -सि (न्); 'difficult to be understood,' दुर्ज्ञेयः -या -यं; 'difficult to be got,' दुर्लभः -भा -भं, दुःप्रापः -पा -पं, दुःखलभ्यः -भ्या -भ्यं, दुःखेन प्रापः -पा -पं, दुरापः -पा -पं; 'difficult to be overcome,' दुरतिक्रमः -मा -मं; 'difficult to be cut,' दुःखछेद्यः -द्या -द्यं; 'difficult to be joined,' दुःसन्धानः -ना -नं; 'difficult of digestion,' दुर्जरः -रा -रं; 'difficult of ascent,' दुरारोहः -हा -हं; 'a difficult case,' सङ्कटापन्नः; 'difficult march,' सङ्क्रमः, दुर्गसञ्चरः.—(Peevish, morose) वक्रभावः -वा -वं, दुर्धियः -धी -धि.

DIFFICULTLY, *adv.* दुःखेन, कष्टेन, कृच्छ्रेण, कृच्छ्रात्, कष्टं, आयासेन, कठिनं, विषमं, दुर् prefixed; as, 'difficultly attainable,' दुःप्रापः -प्या -प्यं.

DIFFICULTY, *s.* (Hardness, that which is hard to effect) काठिन्यं, कठिनता, दुःखं, कृच्छ्रं, कष्टं, आयासः, दुष्करत्वं, असौकर्य्यं, विषमं, वैषम्यं, दुर्गं, शल्यं, संशयः; 'difficulties,' दुर्गाणि; 'beset with difficulties,' सशल्यः -ल्या -ल्यं, सकण्टकः -का -कं; 'overcoming difficulties,' दुर्गलङ्घनः -नी -नं; 'cut with difficulty,' दुःखछेद्यः -द्या -द्यं or दुःखेन छेद्यः; 'without difficulty,' अनायासं -सेन; 'obtained with difficulty,' कृच्छ्राप्तः -प्ता -प्तं.—(Distress, opposition) क्लेशः, दुःखं, बाधः, विरोधः, प्रातिकूल्यं.—(Perplexity) व्यग्रता, वैक्लव्यं, विप्लवः.—(Objection) बाधा, उद्ग्राहः.

To DIFFIDE, *v. n.* शङ्क् (c. 1. शङ्कते -ङ्कितुं), आशङ्क्, न विश्वस् (c. 2. -श्वसिति -तुं).

DIFFIDENCE, *s.* (Want of confidence in others) अविश्वासः, अप्रत्ययः, शङ्का.—(In one's self) ह्रीः, लज्जा, व्रीडा, अप्रागल्भ्यं, आशङ्का.

DIFFIDENT, *a.* (Distrustful) अविश्वासी -सिनी -सि (न्), अप्रत्ययी -यिनी -यि (न्), शङ्काशीलः -ला -लं, साशङ्कः -ङ्का -ङ्कं, सशङ्कः -ङ्का -ङ्कं.—(Modest, reserved) ह्रीमान् -मती -मत् (न्), लज्जावान् -वती -वत् (न्), अप्रगल्भः -ल्भा -ल्भं, अधृष्टः -ष्टा -ष्टं.

DIFFIDENTLY, *adv.* शङ्कया, शङ्कापूर्वं, लज्जया, अप्रगल्भं, अधृष्टं.

DIFFLUENCE, DIFFLUENCY, *s.* विद्रुतत्वं, द्रुतता, द्रवत्वं, द्राव्यत्वं, विलीनता, तरलता.

DIFFLUENT, *a.* विद्रुतः -ता -तं, द्रवः -वा -वं, विलीनः -ना -नं, तरलः -ला -लं.

DISQUIETED, *p. p.* उद्विग्नः -ग्ना -ग्नं, व्यग्रः -ग्रा -ग्रं, व्यथितः -ता -तं, सव्यथः -था -थं, क्लिष्टः -ष्टा -ष्टं, परिक्लिष्टः -ष्टा -ष्टं, अशान्तः -न्ता -न्तं, अनिर्वृतः -ता -तं, विधुरः -रा -रं, विदुरः -रा -रं, उद्भ्रान्तः -न्ता -न्तं, मोहितः -ता -तं, जातशङ्कः -ङ्का -ङ्कं.

DISQUISITION, *s.* विचारः -रणा, वितर्कः, विमर्शः, विवेचना, परीक्षा, वितण्डा.

To DISRANK, *v. a.* पदात् or अधिकाराद् भ्रंश् in caus. (भ्रंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं) or अपकृष् (c. 1. -कर्षति -क्षुं).

DISREGARD, *s.* उपेक्षा, अनपेक्षा, निरपेक्षता, अनादरः, अननुष्ठानं, अचिन्ता, अनवधानं, परित्यागः, अवक्रिया, उपात्ययः, उत्प्रेक्षा, उद्भावनं, अदर्शनं.—(Contempt) अवज्ञा, अवमानं, अवधीरणं.

To DISREGARD, *v. a.* उपेक्ष् (c. 1. -ईक्षते -क्षितुं), अनुपेक्ष्, उपप्रेक्ष्, अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवमन् (c. 4. -मन्यते -मन्तुं), अवधीर् (c. 10. -धीरयति -यितुं), न अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), न सेव् (c. 1. सेवते -वितुं), परित्यज् (c. 1. -त्यजति -त्यक्तुं).

DISREGARDED, *p. p.* उपेक्षितः -ता -तं, अनपेक्षितः -ता -तं, समुपेक्षितः -ता -तं, अवज्ञातः -ता -तं, अवधीरितः -ता -तं, अवमतः -ता -तं, अवमानितः -ता -तं, परिभूतः -ता -तं, असेवितः -ता -तं, अवगणितः -ता -तं, उन्नाविताः -ता -तं, अननुष्ठितः -ता -तं.

DISREGARDFUL, *a.* उपेक्षकः -का -कं, निरपेक्षः -क्षा -क्षं, निर्व्यपेक्षः -क्षा -क्षं, मन्दादरः -रा -रं, अवमानी -निनी -नि (न्), अनवधानः -ना -नं.

DISREGARDFULLY, *adv.* निरपेक्षं, अनपेक्ष्य, उपेक्षया, अवमानेन, मन्दादरं.

DISRELISH, *s.* अरुचिः *f.*, अनभिरुचिः *f.*, विरक्तिः *f.*, वैरस्यं, वैरागर्यं, विरागः, अप्रीतिः *f.*, विप्रियता, विमतिः *f.*, विमुखता, अनिच्छा, विध्वंसः.—(Bad taste) कुस्वादः, विस्वादः.

To DISRELISH, *v. a.* न अभिमन् (c. 4. -मन्यते -मन्तुं), विद्विष् (c. 2. -ष्टेष्टि -ष्टुं), अरुचिं कृ, न अभिरुच् (c. 10. -रोचयति -यितुं), or expressed by the neut. form रोचते; as, 'he disrelishes that,' तत् तस्मै न रोचते.

DISREPUTABLE, *a.* अनार्य्यः -र्य्या -र्य्यं, अपमान्यः -न्या -न्यं, अयशस्यः -स्या -स्यं, अपयशस्करः -री -रं, अकीर्त्तिकरः -री -रं, अवज्ञेयः -या -यं, अप्रतिष्ठः -ष्ठा -ष्ठं, अख्यातिजनकः -का -कं, अप्रशंसनीयः -या -यं, अभिशस्तः -स्ता -स्तं.

DISREPUTABLY, *adv.* अनार्य्यं, अनार्य्यवत्, अयशस्यं, अप्रशंसनीयं.

DISREPUTATION, DISREPUTE, *s.* अयशः *n.* (स्), अपयशः *n.*, अकीर्त्तिः *f.*, अपकीर्त्तिः *f.*, दुष्कीर्त्तिः *f.*, अख्यातिः *f.*, कुख्यातिः *f.*, अनार्य्यत्वं, धार्ष्ट्यता, अप्रतिष्ठा, अमर्य्यादा, मर्य्यादाहानिः *f.*, अपमानं.

DISRESPECT, *s.* अनादरः, अवज्ञा -ज्ञानं, अपमानं, अवमानं -नता, अमाननं, असम्मानं, असन्मानं, परिभवः, परिभूतिः *f.*, परिभावः, अवधीरणं, उपेक्षा -क्षणं, तिरस्कारः, तिरस्क्रिया, न्यक्कारः, अवहेलं -ला, हेलनं, धर्षणं, अमर्य्यादा, रौढा, असूयणं, असूया, दूषणं.

DISRESPECTED, *p. p.* अनादृतः -ता -तं, अवमानितः -ता -तं, अवधीरितः -ता -तं, परिभूतः -ता -तं, उपेक्षितः -ता -तं, अवज्ञातः -ता -तं, अवमतः -ता -तं.

DISRESPECTFUL, *a.* अवमानी -निनी -नि (न्), परिभावी -विनी -वि (न्) -भावुकः -का -कं, उपेक्षकः -का -कं, सावज्ञः -ज्ञा -ज्ञं, अनार्य्यः -र्य्या -र्य्यं.

DISRESPECTFULLY, *adv.* सावज्ञानं, सावमानं, अनादरात्, उपेक्षया.

To DISROBE, *v. a.* विवस्त्रीकृ, वस्त्रम् अवतॄ in caus. (-तारयति -यितुं) or उत्कृष् (c. 1. -कर्षति -ष्टुं) or अपनह् (c. 4. -नह्यति -नद्धुं) or उच्छद् (c. 10. -छादयति -यितुं), नग्नीकृ.

DISROBED, *p. p.* विवस्त्रः -स्त्रा -स्त्रं, वस्त्रविवृतः -ता -तं, नग्नीकृतः -ता -तं.

DISRUPTION, *s.* भङ्गः, भेदः, विभेदः, विदारः -रणं, विदरः, भिदा, विघटनं.

DISSATISFACTION, *s.* अतुष्टिः, अतृप्तिः *f.*, असन्तोषः, अपरितोषः, अशान्तिः *f.*, अतृप्तता, वितुष्टिः *f.*

DISSATISFIED, *p. p.* अतुष्टः -ष्टा -ष्टं, असन्तुष्टः -ष्टा -ष्टं, वितुष्टः -ष्टा -ष्टं, अपरितुष्टः -ष्टा -ष्टं, अतृप्तः -प्ता -प्तं, अशान्तः -न्ता -न्तं, अप्रतिलब्धकामः -मा -मं.

To DISSATISFY, *v. a.* न सन्तुष् in caus. (-तोषयति -यितुं), न परितुष्, न तृप् in caus. (तर्पयति -यितुं), अतुष्टिं जन् in caus. (जनयति -यितुं) or उत्पद् in caus. (-पादयति -यितुं).

To DISSECT, *v. a.* शरीराङ्गानि कर्त्तर्य्यादिना व्यवच्छिद् (c. 7. -छिनत्ति -छेत्तुं) or उच्छिद् or संछिद्, शरीरावयवान् निकृत् (c. 6. -कृन्तति -कर्त्तितुं) or विनिकृत् or पृथक्कृ or पृथक् पृथक् कृ, विशस् (c. 1. -शसति -सितुं).—(Examine minutely) सूक्ष्मं परीक्ष् (c. 1. -ईक्षते -क्षितुं).

DISSECTED, *p. p.* विशसितः -ता -तं, व्यवच्छिन्नः -न्ना -न्नं, विनिकृत्तः -त्ता -त्तं.

DISSECTION, *s.* विशसनं, व्यवच्छेदः, अङ्गच्छेदः, अङ्गकर्त्तनं, पृथक्करणं, सूक्ष्मपरीक्षा.

DISSECTOR, *s.* अवच्छेदकः, अङ्गच्छिद् *m.*, विशसिता *m.* (तृ), विशसनकृत्.

To DISSEIZE, *v. a.* अधिकाराद् भ्रंश् in caus. (भ्रंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं); हृ (c. 1. हरति, हर्त्तुं) or अपहृ.

DISSEIZING, *s.* अन्यायेन अधिकाराद् भ्रंशनं or भूमिधनादिहरणं.

To DISSEMBLE, *v. a.* and *n.* ह्नु (c. 2. ह्नुते, ह्नोतुं), अपह्नु, निह्नु, छद्म कृ, छद् (c. 10. छादयति -यितुं), गुह् (c. 1. गूहति -ते -हितुं), निगुह्, अपवृ in caus. (-वारयति -यितुं), गोपनं कृ, अपदिश् (c. 6. -दिशति -देष्टुं), व्यपदिश्, कपटं कृ, अवहित्थां कृ, अपज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), प्रतारणं कृ, छल् (c. 10. छलयति -यितुं).

DISSEMBLER, *s.* छाद्मिकः, छद्मवेशी *m.* (न्), कपटवेशी *m.*, वेशधारी *m.* (न्), दाम्भिकः, गोपनकृत् *m.*, गोप्ता *m.* (प्तृ), प्रच्छादयिता *m.* (तृ).

DISSEMBLING, *s.* अपह्नवः, निह्नुतिः *f.*, निह्नवः, अवहित्था -त्थं, गोपनं, छद्म *n.* (न्), छद्मकरणं, गुप्तिः *f.*, आकारगुप्तिः *f.*, अपलापः, कापट्यं, कृत्रिमता.

DISSEMBLINGLY, *adv.* अपह्नवेन, निह्नवात्, सावहित्थं, छद्मना, मिथ्या, कृत्रिमं.

To DISSEMINATE, *v. a.* विकॄ (c. 6. -किरति -किरितुं -कीर्तुं), प्रकॄ, विसॄ in caus. (-सारयति -यितुं), प्रचर् in caus. (-चारयति -यितुं), प्रसॄ in caus. (-सारयति -यितुं), विसॄ, वप् (c. 1. वपति, वप्तुं), निवप्; 'to be disseminated,' प्रचर् (c. 1. -चरति -रितुं).

DISSEMINATED, *p. p.* विकीर्णः -र्णा -र्णं, प्रचारितः -ता -तं, सुव्याप्तः -प्ता -प्तं, बहुधागतः -ता -तं, विस्तारितः -ता -तं, उप्तः -प्ता -प्तं.

DISSEMINATION, *s.* विकिरणं, व्यापनं, व्याप्तिः *f.*, विस्तारः, प्रचारणं, प्रसारणं, वपनं, उप्तिः *f.*, व्यासः.

DISSEMINATOR, *s.* विकिरणकृत् *m.*, प्रचारकः, वप्ता *m.* (प्तृ), प्रवापी *m.* (न्).

DISSENSION, *s.* भेदः, विमतिः *f.*, वैमत्यं, कलहः, कलिः *m.*, असम्मतिः *f.*, द्वन्द्वं, विरोधः, विवादः, विप्रतिपत्तिः *f.*, विसंवादः, द्वैधं, मतिविपर्य्ययः; 'a sower of dissension,' उपजापकः; 'family dissensions,' गृहच्छिद्रं, गृहरन्ध्रं.

To DISSENT, *v. n.* न सम्मन् (c. 4. -मन्यते -मन्तुं), विपरीतं मन्, अन्यथा मन्, असम्मतिं कृ, न स्वीकृ, विवद् (c. 1. -वदते -दितुं), विसंवद्, भिन्नमतः -ता -तं भू, मतान्तरम् अवलम्ब् (c. 1. -लम्बते -म्बितुं).

DISSENT, *s.* विमतिः *f.*, वैमत्यं, मतिप्रभेदः, मतिविपर्य्ययः, असम्मतिः *f.*, अस्वीकारः, विसंवादः, विपरीतता, भिन्नमतधारणं, मतान्तरावलम्बनं, अन्यमतधारणं, द्वैधं.

DISSENTANEOUS, *a.* असम्मतः -ता -तं, विमतः -ता -तं, विपरीतमतः -ता -तं.

DISSENTER, *s.* (One that disagrees) भिन्नमतधारी *m.* (न्), मतान्तरावलम्बी *m.* (न्), असम्मतः.—(From the church) विपथगामी *m.* (न्), अपथवर्त्ती *m.* (न्), साधारणधर्म्मविरोधी *m.* (न्), उपधर्म्मसेवी *m.* (न्), उपधर्म्मः.

To DISSERT, *v. n.* वद् (c. 1. वदति -दितुं), प्रवद्, व्याख्या (c. 2. -ख्याति -तुं), कथ् (c. 10. कथयति -यितुं), प्रसङ्गं कृ, विवरणं कृ.

DISSERTATION, *s.* वाक्यं, वादः, प्रवादः, वचनं, प्रवचनं, वचः *n.* (स्), व्याख्या, विवरणं, प्रसङ्गः, कथोपकथनं, वचनक्रमः.

To DISSERVE, *v. a.* अपकॄ, न उपकॄ, हिंस् (c. 7. हिनस्ति, c. 1. हिंसति -सितुं).

DISSERVICE, *s.* अपकारः, अपकृतं, क्षतिः *f.*, अपायः, अपचयः, हिंसा, अनिष्टं, द्रोहः, क्लेशः.

To DISSEVER, *v. a.* वियुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), विप्रयुज् विच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विभिद् (c. 7. -भिनत्ति -भेत्तुं), विश्लिष् in caus. (-श्लेषयति -यितुं), पृथक्कृ, द्वैधीकृ.

DISSEVERED, *p. p.* वियुक्तः -क्ता -क्तं, विप्रयुक्तः -क्ता -क्तं, विच्छिन्नः -न्ना -न्नं, विश्लिष्टः -ष्टा -ष्टं, गतसङ्गः -ङ्गा -ङ्गं, पृथक्कृतः -ता -तं, विगतः -ता -तं.

DISSIDENT, *a.* विमतः -ता -तं, असम्मतः -ता -तं, विपरीतमतः -ता -तं.

DISSIMILAR, *a.* असदृशः -शी -शं, असमानः -ना -नं, असमः -मा -मं, विषमः -मा -मं, अनीदृशः -शी -शं, भिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, अन्यः -न्या -न्यत्, इतरः -रा -रं, परः -रा -रं.—(Heterogeneous) विजातीयः -या

-यं, भिन्नजातीयः -या -यं.

DISSIMILARITY, DISSIMILITUDE, *s.* असादृश्यं, असदृक्षता, असाम्यं, असमता, असमानता, अतुल्यता, वैषम्यं, भेदः, विभेदः, भिन्नता, विभिन्नता, अन्तरं, परत्वं, अन्यथात्वं, विजातीयत्वं.

DISSIMULATION, *s.* अपह्नवः, निह्नवः, निह्नुतिः *f.*, छद्मकरणं, छद्म *n.* (न्), गोपनं, गुप्तिः *f.*, आकारगुप्तिः *f.*, अवहित्था -त्थं, कापट्यं, अपलापः, कृत्रिमता, प्रतारणा, दम्भः.

To DISSIPATE, *v. a.* (Scatter) कॄ (c. 6. किरति, करितुं -रीतुं), विकॄ, प्रकॄ, विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), व्यस् (c. 4. -अस्यति -असितुं), विद्रु in caus. (-द्रावयति -यितुं), विनिधू (c. 5. -धूनोति -धवितुं). *See* DISPERSE. (Spend) व्यय् (c. 1. व्ययति c. 10. व्यययति -यितुं), अपचि (c. 5. -चिनोति -चेतुं).

DISSIPATED, *p. p.* क्षीणः -णा -णं, विक्षिप्तः -प्ता -प्तं, बहुधागतः -ता -तं, विनिधूतः -ता -तं, सुव्यस्तः -स्ता -स्तं, विगलितः -ता -तं. *See* DISPERSED. (Licentious) कामवृत्तः -त्ता -त्तं, दुराचारः -रा -रं, व्यसनी -निनी -नि (न्).

DISSIPATION, *s.* विक्षेपः, विकिरणं. *See* DISPERSION. (Prodigality) धनव्ययः, अपव्ययः, धनोत्सर्गः, मोक्षणं.—(Licentiousness) स्त्रीसम्भोगनृत्यगीतादिसेवनं, व्यसनिता.

To DISSOCIATE, *v. a.* वियुज् (c. 7. -युनक्ति -योक्तुं), विप्रयुज्, विसंयुज्, विश्लिष् (c. 10. -श्लेषयति -यितुं), पृथक्कॄ, असंलग्नं -ग्नां -ग्नं कॄ.

DISSOLVABLE, DISSOLUBLE, *a.* द्राव्यः -व्या -व्यं, विद्राव्यः -व्या -व्यं, विलयनीयः -या -यं, द्रवणीयः -या -यं, गलनीयः -या -यं, स्रवभावः -वा -वं, स्रवणीयः -या -यं, याव्यः -व्या -व्यं, आर्द्रः -र्द्रा -र्द्रं, लीनः -ना -नं, विलयनशीलः -ला -लं,

To DISSOLVE, *v. a.* (Melt) विली in caus. (-लाययति -लापयति -यितुं), विद्रु in caus. (-द्रावयति -यितुं), द्रवीकॄ, आर्द्रीकॄ.—(Disunite) वियुज् (c. 7. -युनक्ति -योक्तुं).—(Dissolve friendship, &c.) सौहृदं भिद् (c. 7. भिनत्ति, भेत्तुं) or भञ्ज् (c. 7. भनक्ति, भंक्तुं); 'dissolve a league,' संहतिभेदनं कॄ; 'dissolve an assembly,' सभां विसृज् (c. 6. -सृजति -सर्ष्टुं), सभाभङ्गं कॄ.

To DISSOLVE, *v. n.* विली (c. 4. -लीयते -लेतुं), प्रविली, प्रली, द्रु (c. 1. द्रवति, द्रोतुं), विद्रु, गल् (c. 1. गलति -लितुं), विगल्, स्रर् (c. 1. स्ररति -रितुं), द्रवीभू, आर्द्रीभू.

DISSOLVED, *p. p.* विद्रुतः -ता -तं, द्रुतः -ता -तं, विलीनः -ना -नं, लीनः -ना -नं, परिगलितः -ता -तं, द्रवीभूतः -ता -तं, असंहतः -ता -तं.

DISSOLVENT, *a.* द्रावकः -री -रि, विलयनः -नी -नं, विद्रावकः -का -कं.

DISSOLUTE, *a.* व्यसनी -निनी -नि (न्), अनवस्थः -स्था -स्थं, व्यभिचारी -रिणी -रि (न्), तारल्यः -ल्ली -ल्लं, तरलः -ला -लं, दुराचारः -रा -रं, कामासक्तः -क्ता -क्तं, भोगासक्तः -क्ता -क्तं, दुष्टः -ष्टा -ष्टं, विषयी -यिणी -यि (न्), अवशः -शा -शं, कामुकः -का -कं, लम्पटः.

DISSOLUTELY, *adv.* लम्पटवत्, दुष्टवत्, कामुकवत्, भोगासक्तत्वात.

DISSOLUTENESS, *s.* लम्पटता, लाम्पट्यं, व्यसनिता, अनवस्थितिः *f.*, अनवस्थता, इन्द्रियासंयमः, दुर्वृत्तता, विषयासक्तिः *f.*, भोगासक्तिः *f.*, स्त्रीसेवा, व्यभिचारः.

DISSOLUTION, *s.* (Liquefaction) विलयः -यनं, विद्रावः, द्रावः, द्रवीकरणं.—(Destruction) प्रलयः, नाशः, विनाशः, क्षयः, परिक्षयः, ध्वंसः.—(Dissolution of an assembly) सभाभङ्गः, सभाविरामः, सभानिवृत्तिः *f.*—(Dissolution of partnership) संसर्गभेदः, संसर्गवियोगः, संसर्गिनिवृत्तिः *f.*

DISSONANCE, *s.* (Discord) विस्वरता -त्वं, अपरवः.—(Disagreement) विसंवादः.

DISSONANT, *a.* विस्वरः -रा -रं, विकलैरवः -रा -रं, कर्कशस्वनः -ना -नं.—(Disagreeing) परस्परविरुद्धः -द्धा -द्धं, विसङ्गतः -ता -तं.

To DISSUADE, *v. a.* मैवं कार्षीर् इति उपदिश्य निवृत् in caus. (-वर्तयति -यितुं), भयहेतुं दर्शयित्वा निवृत् in caus. or विरम् in caus. (-रमयति -यितुं) or निवृ in caus. (-वारयति -यितुं), मैवं कृथा इति उपदिश् (c. 6. -दिशति -देष्टुं) or प्रत्यादिश्, विपरीतम् उपदिश्, विपरीतमन्त्रणं कॄ, अन्तःस्था (c. 2. -स्थाति -तुं).

DISSUADER, *s.* निवर्त्तयिता *m.* (तृ) मैवं कार्षीर् इति उपदेशकः, प्रत्यादेष्टा *m.* (ष्टृ), विपरीतमन्त्रणदाता *m.* (तृ), निषेधकर्त्ता *m.*, (र्त्तृ).

DISSUASION, *s.* निवर्त्तनं, प्रत्यादेशपूर्व्वं निवर्त्तनं, मैवं कार्षीर् इति प्रत्यादेशः, निषेधार्थैः परामर्शैः, विपरीतमन्त्रणं, उत्तमभङ्गार्थैः प्रबोधः.

DISSUASIVE, *a.* निवर्त्तकः -का -कं, निवर्त्तनशीलः -ला -लं, निवृत्तिकारी -रिणी -रि (न्), निषेधार्थकः -का -कं, प्रत्यादेशकः -का -कं, भयहेतुप्रदर्शकः -का -कं, विपरीतमन्त्रणकारी -रिणी -रि (न्).

DISSUASIVE, *s.* निवृत्तिकारणं, निवृत्तिहेतुः *m.*, निवर्त्तनहेतुः *m.*

DISSYLLABIC, *a.* द्व्यक्षरः -रा -रं, अक्षरद्वयविशिष्टः -ष्टा -ष्टं.

DISSYLLABLE, *s.* द्व्यक्षरं, अक्षरद्वयविशिष्टः शब्दः, द्व्यक्षरः शब्दः.

DISTAFF, *s.* तकुः *f.*, तकुटं -टी, सूत्रतकुटी, सूत्रला.

To DISTAIN, *v. a.* मलिन (nom. मलिनयति -यितुं), दुष् (c. 10. दूषयति -यितुं).

DISTANCE, *s.* (Interval, space) अन्तरं, अभ्यन्तरं, अन्तरालः -लं, मानं, व्यवधानं, व्यवायः,—(Remoteness) दूरता, असान्निध्यं, असन्निधानं, असन्निकर्षः; 'a little distance,' कियद्दूरं, ईषद्दूरं, नातिदूरे; 'at a distance,' दूरं, दूरे, दूरतस्, विदूरतस्.—(Haughtiness) दुर्धर्षता, दुराधर्षत्वं, अनालापः.

To DISTANCE, *v. a.* दूरीकॄ, दव (nom. दवयति -यितुं), अपसॄ in caus. (-सारयति -यितुं), दूरतः कॄ.

DISTANCED, *p. p.* दूरीकृतः -ता -तं, अपसारितः -ता -तं.

DISTANT, *a.* (Remote) दूरः -रा -रं, विदूरः -रा -रं, दूरस्थः -स्था -स्थं, दूरस्थितः -ता -तं, दूरस्थायी -यिनी -यि (न्), अनुपस्थायी, अनुपस्थः -स्था -स्थं, दूरीभूतः -ता -तं, दूरवर्त्ती -र्त्तिनी -र्त्ति (न्), विप्रकृष्टः -ष्टा -ष्टं, असन्निकृष्टः -ष्टा -ष्टं, दविष्ठः -ष्ठा -ष्ठं, दवीयान् -यसी -यः (स्), असन्निहितः -ता -तं, प्राग्वः -ग्वा -ग्वं.—(Haughty) दुर्धर्षः -र्षा -र्षं, दुराधर्षः -र्षा -र्षं, अनालापी -पिनी -पि (न्).

DISTASTE, *s.* (Aversion of the palate, disrelish) अरुचिः *f.*, अनभिरुचिः *f.*, विरसनं, वितृष्णा, उत्क्लेशः.—(Dislike) विरक्तिः *f.*, वैराग्यं, वैरक्त्यं, अरुचिः *f.*, अननुरागः, अप्रीतिः *f.*, द्वेषः, विद्वेषः, अनिच्छा, घृणा, पराङ्मुखता.

To DISTASTE, *v. a.* and *n.* (Dislike) न रुच् (c. 1. रोचते -चितुं) with dat.; as, "he distastes that,' तत् तस्मै न रोचते; न अभिनन्द् (c. 1. -नन्दति -न्दितुं), अरुचिं कॄ.

DISTASTEFUL, *a.* अरुचिरः -रा -रं, अरुच्यः -च्या -च्यं, अप्रियः -या -यं, अरसः -सा -सं, विरसः -सा -सं, अरुचिजनकः -का -कं, अप्रीतिकरः -री -रं, विस्वादः -दा -दं, अस्वादुः -दुः -दु.

DISTEMPER, *s.* (Disease) रोगः, व्याधिः *m.*, आमयः, पीडा, अस्वास्थ्यं, असुस्थता, विकारः.—(Uneasiness) व्यथा, क्लेशः, दुःखं, कष्टं, आधिः *f.*, उपतापः, तापः, अनिर्वृतिः *f.*—(Bad condition) दुष्प्रकृतिः *f.*, दुःस्थितिः *f.*, असद्भावः, कुभावः, दुर्दशा, दुरवस्था.

To DISTEMPER, *v. a.* पीड् (c. 10. पीडयति -यितुं), व्यथ् (c. 10. व्यथयति -यितुं), क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), उपहन् (c. 2. -हन्ति -न्तुं) उपतप् in caus. (-तापयति -यितुं), बाध् (c. 1. बाधते -धितुं).

DISTEMPERATURE, *s.* वायुवैलक्ष्यं, वायुगुरुता, आकाशवैलक्ष्यं, गुरुतापः.

DISTEMPERED, *p. p.* व्याधितः -ता -तं, रोगी -गिणी -गि (न्), असुस्थः -स्था -स्थं, आधेः -धेा -धैं, आतुरः -रा -रं, पीडितः -ता -तं, उपहतः -ता

-तं, व्याकुलः -ला -लं, उत्सिक्तः -क्ता -क्तं.

To DISTEND, *v. a.* विस्तृ in caus. (-स्तारयति -यितुं), वितन् (c. 8. -तनोति -नितुं), स्फाय् in caus. (स्फापयति -यितुं), ध्मा in caus. (ध्मापयति -यितुं), आध्मा (c. 1. -धमति -ध्मातुं), प्रध्मा; 'to distend with wind,' वातेन पॄ (c. 10. -पूरयति -यितुं).

DISTENDED, *p. p.* आध्मातः -ता -तं, वितनः -ना -नं, प्रपृक्तः -क्ता -क्तं, फुल्लः -ल्ला -ल्लं, शूनः -ना -नं, उच्छूनः -ना -नं, स्फातः -ता -तं, स्फीतः -ता -तं, विस्तृतः -ता -तं, प्रसारितः -ता -तं, प्रपुरीकृतः -ता -तं; 'distended with wind,' वातपूरितः -ता -तं, वातफुल्लः -ल्ला -ल्लं.

DISTENSION, DISTENTION, *s.* आध्मानं, वितनिः *f.*, फुल्लता, उत्फुल्लता, विस्तारः, विस्तृतिः *f.*, स्फीतिः *f.*, स्फातिः *f.*, विजृम्भणं.

DISTICH, *s.* श्लोकः, श्लोकद्वयं, चरणयुगं, द्विचरणं, द्विपदी.

To DISTILL, *v. n.* (Fall in drops, flow gently) च्युत्, (c. 1. च्योतति -तितुं) or इच्युत्, रो (c. 4. रीयते, रेतुं), क्षर् (c. 1. क्षरति -रितुं) स्यन्द् (c. 1. स्यन्दते -न्दितुं) सु (c. 1. सवति, सोतुं).

To DISTILL, *v. a.* (Let fall in drops) सु (c. 1. सवति, सोतुं) with acc.; as, 'the clouds distill water,' तोयं सवन्ति मेघाः; क्षर् (c. 1. क्षरति -रितुं), जलबिन्दून् or सजलवान् मुच् (c. 6. मुञ्चति, मोक्तुं), or पत्, in caus. (पातयति -यितुं), or सृज् (c. 6. सृजति, स्रष्टुं). —(Extract the spirit, as chemists) सन्धा (c. 3. -दधाति -धातुं), अभिषु (c. 5. -षुणोति -षोतुं) आसु, मद्यं निर्हृ (c. 1. -हरति -हर्तुं).

DISTILLATION, *s.* (Act of extracting spirit) सन्धानं -नी, मद्यसन्धानं, सन्धा, अभिषवः, आसुतिः *f.*—(Act of trickling) स्रवः, स्रावः, क्षरणं, द्रवः, द्रवणं, द्रवत्वं, निस्यन्दः, स्यन्दः -न्दनं, अभिष्यन्दः.

DISTILLATORY, *a.* सन्धानयोग्यः -ग्या -ग्यं, सन्धानसम्बन्धी -न्धिनी -न्धि (न्).

DISTILLED, *p. p.* सन्धितः -ता -तं, अभिषुतः -ता -तं, चारितः -ता -तं, 'distilled water,' पञ्चवारि, *n.*

DISTILLER, *s.* सान्धिकः, मध्यासवनिकः, मद्यहारकः, शौण्डिकः, शुण्डी *m.* (न्) सुराकारः, सुराजीवी *m.* (न्), आसुतीचलः, कल्यपालः.

DISTILLERY, *s.* सन्धानी, मद्यसन्धानशाला, शुण्डा, मद्यनिर्हारस्थानं.

DISTINCT, *a.* (Different, separate) भिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, प्रभिन्नः -न्ना -न्नं, विपिक्तः -क्ता -क्तं, व्यतिरिक्तः -क्ता -क्तं, विशिष्टः -ष्टा -ष्टं, पृथग्विधः -धा -धं, विविधः -धा -धं, व्यस्तः -स्ता -स्तं, अन्यः -न्या -न्यत्, अन्यप्रकारः -रा -रं, इतरः -रा -रं; 'having distinct properties,' पृथग्गुणः -णा -णं.—(Clear) व्यक्तः -क्ता -क्तं, प्रव्यक्तः -क्ता -क्तं, स्पष्टः -ष्टा -ष्टं, स्फुटः -टा -टं, प्रत्यक्षः -क्षा -क्षं, सुप्रकाशः -शा -शं.

DISTINCTION, *s.* (Difference, separation) भेदः, विभेदः, प्रभेदः, भिन्नता, विभिन्नता, विशेषः -षत्वं, विशिष्टता, वैशिष्ट्यं, अन्तरं, पृथक्त्वं, पार्थक्यं, अवच्छेदः, विच्छेदः, अन्यथात्वं, भिदा, व्यासः; 'without distinction,' अविशेषः -षा -षं, निर्विशेषः -षा -षं.—(Discrimination) विवेकः, विवेचनं, परिच्छेदः, व्यवच्छेदः, पृथक्करणं; 'distinction of race,' जातित्वं.—(Eminence, superiority) विशिष्टता, वैशिष्ट्यं, उत्कृष्टता, उत्कर्षः, श्रेष्ठता, प्रमुखत्वं, समुन्नतिः *f.*, परमपदं.

DISTINCTIVE, *a.* विशेषकः -का -कं, विशेषवान् -ती -वत्, सविशेषः -षा -षं, अवच्छेदकः -का -कं, विच्छेदकः -का -कं, परिच्छेदकः -का -कं, पृथक्कारी -रिणी -रि (न्); 'distinctive mark,' विशेषलक्षणं.

DISTINCTIVELY, *adv.* विशेषेण, विशेषतस्, सविशेषं, पृथक् पृथक्.

DISTINCTLY, *adv.* (Separately) पृथक्.—(Clearly) व्यक्तं, सुव्यक्तं, भिन्नार्थं, स्पष्टार्थं, स्पष्टं, प्रत्यक्षतस् -क्षेण.

DISTINCTNESS, *s.* (State of being different) भिन्नता, विभिन्नभावः, पृथक्त्वं, पार्थक्यं.—(Clearness) व्यक्तिः *f.*, अभिव्यक्तिः *f.*, व्यक्तत्वं, स्पष्टता, भिन्नार्थत्वं.

To DISTINGUISH, *v. a.* and *n.* विशिष् (c. 7. -शिनष्टि -शेष्टुं, c. 10. -शेषयति -यितुं), पृथक्कृ, लक्ष् (c. 10. लक्षयति -यितुं) लक्षीकृ, परिच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विज्ञा (c. 9. -जानाति -नीते -ज्ञातुं) विविच् (c. 7. -विनक्ति -वेक्तुं c. 10. -वेचयति -यितुं) विचर् (c. 10. -चारयति -यितुं), विभू (c. 10. -भावयति -यितुं); 'distinguish one's self, become illustrious,' विशिष् in pass. (-शिष्यते) उत्कर्षं or परमपदं प्राप् (c. 5. -आप्नोति -आप्तुं).

DISTINGUISHABLE, *a.* विशेषणीयः -या -यं, विशेष्यः -ष्या -ष्यं, विशेयः -या -यं, परिच्छेदनीयः -या -यं, विभावनीयः -या -यं, विभाव्यः -व्या -व्यं, भेदनीयः -या -यं.

DISTINGUISHED, *p. p.* (Separated, discriminated) विशेषितः -ता -तं, विविक्तः -क्ता -क्तं, परिच्छिन्नः -न्ना -न्नं, पृथक्कृतः -ता -तं, विज्ञातः -ता -तं, विभावितः -ता -तं, उद्विक्तः -क्ता -क्तं.—(Marked) लक्षितः -ता -तं, उपलक्षितः -ता -तं, चिह्नितः -ता -तं, तिलकितः -ता -तं.—(Illustrious) विशिष्टः -ष्टा -ष्टं, उत्कृष्टः -ष्टा -ष्टं, ख्यातः -ता -तं, प्रसिद्धः -द्धा -द्धं, विश्रुतः -ता -तं, प्रथितः -ता -तं, द्वात्रिंशल्लक्षणोपेतः -ता -तं.

DISTINGUISHINGLY, *adv.* विशेषेण, सविशेषं, सपुरस्कारं, सविशेषमानं.

To DISTORT, *v. a.* (Make deformed) विरूप् (c. 10. -रूपयति -यितुं) विरूपीकृ, अपरूपीकृ, कुरूपीकृ, कदाकारीकृ, व्यङ्गीकृ, विकृ, वक्रीकृ, विकलीकृ.—(Twist) आकुञ्च् (c. 1. -कुञ्चति -चितुं c. 10. -कुञ्चयति -यितुं).—(Pervert) साचीकृ, वक्रीकृ.

DISTORTED, *p. p.* विकृतः -ता -तं, विरूपीकृतः -ता -तं, साचीकृतः -ता -तं, वक्रीकृतः -ता -तं; 'having the limbs distorted,' विकृताङ्गः -ङ्गी -ङ्गं, व्यङ्गः -ङ्गी -ङ्गं; 'having the face distorted,' विकृतवदनः -ना -नं.

DISTORTION, *s.* (Act of distorting) विरूपकरणं, अपरूपीकरणं, कुरूपीकरणं, विकारः, विक्रिया, साचीकरणं, वक्रीकरणं, आकुञ्चनं.—(The state) विकृतिः *f.*, वैकृत्यं, विरूपता, वैरूप्यं, व्यङ्गता, वक्रता, वक्रिमा *m.* (न्), साचीकृतं.

To DISTRACT, *v. a.* (Pull in different directions) विकृष् (c. 1. -कर्षति c. 6. -कृषति -क्रष्टुं), नानादिक्षु कृष् or आकृष् or परिकृष्, बहुधा कृ or गम् in caus. (गमयति -यितुं), विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).—(Divide, rend) विदॄ in caus. (-दारयति -यितुं), विभिद् (c. 7. -भिनत्ति -भेत्तुं), खण्ड् (c. 10. खण्डयति -यितुं), परिखण्ड्, विदलीकृ, विदल् in caus. (-दालयति -यितुं).—(Draw off from any object) अपकृष्, व्यपकृष्, अपाकृष्.—(Perplex) मुह् in caus. (मोहयति -यितुं) विमुह्, व्यामुह्, आकुलीकृ, आकुलीकृ.—(Make mad) उन्मद् in caus. (-मादयति -यितुं).—(Be distracted) मुह्, (c. 4. मुह्यति, मोहितुं), उन्मद् (c. 4. -माद्यति -मदितुं); 'my heart is distracted,' अस्मद् हृदयं विदीर्यते.

DISTRACTED, *p. p.* आकृष्टमानसः -सा -सं, विक्षिप्तः -प्ता -प्तं, विकृष्टः -ष्टा -ष्टं, मोहितः -ता -तं, विमोहितः -ता -तं, व्यग्रः -ग्रा -ग्रं, व्याकुलः -ला -लं, चिन्ताकुलः -ला -लं, खण्डितः -ता -तं, उन्मत्तः -त्ता -त्तं, व्यस्तचित्तः -त्ता -त्तं.

DISTRACTEDLY, *adv.* उन्मत्तवत्, व्यग्रं, व्याकुलमनसा, विकृष्टचेतसा, मूढचेतसा.

DISTRACTEDNESS, *s.* विक्षिप्तता, व्यग्रता, उन्मत्तता, चित्तविप्लवः, आकुलत्वं.

DISTRACTION, *s.* विकर्षः -र्षणं.—(Perturbation of mind) मोहः, विमोहः, वैचित्त्यं, चित्तविक्षिप्तता, आकुलचित्तता, व्यग्रता, चित्तवैकल्यं, व्याकुलता, व्यस्तता.—(Madness) उन्मत्तता.—(Separation) विभेदः, विदारणं —(Want of attention of mind) अमनोयोगः, विबोधः.—(Distraction of employment, various employment) विकर्मन् *n.* (न्).

To DISTRAIN, *v. a.* ऋणहेतोर् अधमर्णस्य द्रव्याणि धृ (c. 1. धरति धर्तुं) or ग्रह् (c. 9. गृह्णाति ग्रहीतुं), निरुध् (c. 7. -रुणद्धि -रोद्धुं).

DISTRESS, *s.* (Act of distraining) द्रव्यग्रहणं, द्रव्यधृतिः *f.*, ऋणार्थं

रधनयग्रहणं, निरोधः.—(Calamity, affliction) क्लेशः, दुःखं, दुर्दशा, दुरवस्था, दुर्गतिः *f.*, दौर्गत्यं, व्यथा, कष्टं, पीडा, शोकः, सन्तापः, उद्वेगः, वैक्लव्यं, आपद् *f.*, विपद् *f.*, विपत्तिः *f.*, व्यसनं, विप्लवः, उपप्लवः, उत्पातः, विधुरं, अरिष्टं, मन्युः *m.*, बाधः, दैन्यं, वृजिनं, विडम्बना, आदीनवः, आश्रवः.

To DISTRESS, *v. a.* क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं, क्लेष्टुं), व्यथ् in caus. (व्यथयति -यितुं), पीड् (c. 10. पीडयति -यितुं), उपपीड्, अभिपीड्, बाध् (c. 1. बाधते -धितुं), तप् in caus. (तापयति -यितुं), सन्तप्, परितप्, उपतप्; उद्विज् in caus. (-वेजयति -यितुं), क्लेशं दा, व्यथां कृ, खिद् in caus. (खेदयति -यितुं).

DISTRESSED, *p. p.* क्लिष्टः -ष्टा -ष्टं, क्लेशितः -ता -तं, पीडितः -ता -तं, व्यथितः -ता -तं, दुःखितः -ता -तं, क्लिश्यमानः -ना -नं, क्लेशभाक् *m. f. n.* तापितः -ता -तं, तप्तः -प्ता -प्तं, सन्तप्तः -प्ता -प्तं, सन्तापितः -ता -तं, बाधितः -ता -तं, विपन्नः -न्ना -न्नं, आपन्नः -न्ना -न्नं, आपद्ग्रस्तः -स्ता -स्तं, दुर्दशापन्नः -न्ना -न्नं, आपन्नतः -ता -तं, कृच्छ्रगतः -ता -तं, आपत्प्राप्तः -प्ता -प्तं, दुर्गतः -ता -तं, आतुरः -रा -रं, दुःखान्वितः -ता -तं, दुःखी -खिनी -खि (न्), दुःखार्तः -र्ता -र्तं, कातरः -रा -रं, उपतप्यमानः -ना -नं, आतप्यमानः -ना -नं, अभ्यर्दितः -ता -तं, विधुरः -रा -रं, विदुरः -रा -रं, उद्विग्नः -ग्ना -ग्नं, विदूनः -ना -नं, दीनः -ना -नं, आधिमान् -मती -मत् (त्), आकुलितः -ता -तं, परिकर्षितः -ता -तं, आतुरचित्तः -त्ता -त्तं, आर्तः -र्ता -र्तं in comp.; 'friend of the distressed,' आर्तबन्धुः *m.*

DISTRESSFUL, DISTRESSING, *a.* क्लेशकः -का -कं, क्लेशी -शिनी -शि (न्), क्लेशदः -दा -दं, व्यथकः -का -कं, व्यथाकरः -री -रं, दुःखकरः -री -रं, दुःखमयः -यी -यं, पीडाकरः -रा -रं, उपतापनः -ना -नं, उद्वेजकः -का -कं, आत्ययिकः -की -कं.

DISTRIBUTABLE, *a.* विभाज्यः -ज्या -ज्यं, वण्टनीयः -या -यं, परिकल्पनीयः -या -यं.

To DISTRIBUTE, *v. a.* पृथक् पृथग् विभज् (c. 1. -भजति -ते -भक्तुं) or प्रविभज् or संविभज्; विभागशः or यथाविभागं or अंशांशि दा or कृप् (c. 10. कल्पयति -यितुं), or परिकृप् or विन्यस् (c. 4. -अस्यति -असितुं) or विधा (c. 3. -दधाति -धातुं), व्यंस् (c. 10. -अंसयति -यितुं), वण्ट् (c. 10. वण्टयति -यितुं), प्रकुट्ट् (c. 10. -कुट्टयति -यितुं), निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), प्रणी (c. 1. -नयति -नेतुं).—(Distribute food to a party) परिविश् or परिविष् (c. 10. -वेषयति -यितुं).

DISTRIBUTED, *p. p.* विभक्तः -क्ता -क्तं, प्रविभक्तः -क्ता -क्तं, संविभक्तः -क्ता -क्तं, पृथग् विन्यस्तः -स्ता -स्तं, परिकल्पितः -ता -तं, प्रणीतः -ता -तं.

DISTRIBUTER, *s.* विभागकर्त्री *m.* (त्री), संविभागकृत्, विभागकल्पकः, परिकल्पकः, वण्टनकृत्, अंशयिता *m.* (तृ), अंशदः, विभक्ता *m.* (क्तृ), प्रणेता *m.* (तृ).

DISTRIBUTION, *s.* विभागः, विभागकल्पना, संविभागः, प्रविभागः, विभक्तिः *f.*, विभागकरणं, परिकल्पनं, कृन्तिः *f.*, अंशनं, अंशकरणं, वण्टनं, परिनिवेपणं, प्रणयनं; 'distribution of food to a party,' परिवेषः -षणं.

DISTRIBUTIVE, *a.* विभागदायी -यिनी -यि (न्), विभागकल्पकः -का -कं, अंशकारी -रिणी -रि (न्), वण्टनकारी, संविभागकृत् *m. f. n.*

DISTRIBUTIVELY, *adv.* विभागशस्, विभागतस्, भागशस्, अंशांशि, संविभागेन.

DISTRICT, *s.* मण्डलं, देशः, प्रदेशः, चक्रं, राष्ट्रं, उपवत्तनं, गोचरः.

To DISTRUST, *v. a.* शङ्क् (c. 1. शङ्कते -ङ्कितुं), आशङ्क्, अभिशङ्क्, परिशङ्क्; न विश्वस् (c. 2. -श्वसिति -तुं), न प्रती (c. 2. प्रत्येति -तुं rt. इ).

DISTRUST, *s.* अविश्वासः, अप्रत्ययः, अप्रतीतिः *f.*, शङ्का, आशङ्का, सन्देहः, निह्नवः, अनास्कन्दः.

DISTRUSTED, *p. p.* अविश्वस्तः -स्ता -स्तं, आशङ्कितः -ता -तं, अप्रतीतः -ता -तं,

DISTRUSTFUL, *a.* अविश्वासी -सिनी -सि (न्), अप्रत्ययी -यिनी -यि (न्), शङ्काशीलः -ला -लं, आशङ्कान्वितः -ता -तं, साशङ्कः -ङ्का -ङ्कं, रोलम्बः -म्बा -म्बं.

DISTRUSTFULLY, *adv.* अविश्वासेन, अप्रत्ययात्, शङ्कया, साशङ्कं, शङ्कापूर्वं.

To DISTURB, *v. a.* (Agitate, disquiet) क्षुभ् in caus. (क्षोभयति -यितुं), विक्षुभ्, संक्षुभ्, बाध् (c. 1. बाधते -धितुं), उपरुध् (c. 7. -रुणद्धि -रोद्धुं), धू (c. 5. धुनोति c. 9. धुनाति, धवितुं, धोतुं), मथ् (c. 1. मथति -यितुं) or मन्थ् (c. 1. मन्थति -न्थितुं c. 9. मथ्नाति), लुड् (c. 1. लोडति -डितुं c. 10. लोडयति -यितुं), आलुड्, सन्नालुड्, परिलुड्, विलुड्, विलुप् (c. 6. -लुम्पति -लोप्तुं), विप्रलुप्.—(Disturb the mind) मुह् in caus. (मोहयति -यितुं), विमुह्, व्यामुह्, विप्रमुह्, सम्मुह्, परिमुह्, व्याकुल (nom. व्याकुलयति -यितुं), व्याकुलीकृ, आकुल (nom. आकुलयति -यितुं), आकुलीकृ.—(Excite anger) प्रकुप् in caus. (-कोपयति -यितुं).—(Hinder, interrupt) वृ in caus. (वारयति -यितुं), खड्ड् (c. 10. खण्डयति -यितुं), विच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विहन् (c. 2. -हन्ति -न्तुं), भञ्ज् (c. 7. भनक्ति, भंक्तुं).—(Disturb slumber) निद्रां भञ्ज्; 'to be disturbed in mind,' मुह् (c. 4. मुह्यति,) विमुह्, सम्मुह्, आकुलीभू, व्याकुलीभू.

DISTURBANCE, *s.* (Agitation, disorder) क्षोभः, संक्षोभः, विक्षोभः, व्याक्षोभः, व्यस्तता, विमर्दः.—(Emotion of mind, perturbation) आकुलत्वं, व्याकुलत्वं, प्रकोपः, वैक्लव्यं, व्यग्रता, मोहः, आवेगः.—(Tumult) विप्लवः, आहवः, डिम्बः, तुमुलं; 'popular disturbance,' प्रकृतिक्षोभः.—(Interruption) भङ्गः, विच्छेदः, खण्डनं, बाधः.

DISTURBED, *p. p.* क्षुभ्नः -भ्ना -भ्नं, क्षोभितः -ता -तं, बाधितः -ता -तं.—(In mind) आकुलः -ला -लं -लितः -ता -तं, व्याकुलः -ला -लं -लितः -ता -तं, व्याकुलीकृतः -ता -तं, आकुलचित्तः -त्ता -त्तं, मोहितः -ता -तं, विमोहितः -ता -तं, व्यस्तः -स्ता -स्तं, व्यग्रः -ग्रा -ग्रं, कातरः -रा -रं, खेदितः -ता -तं.

DISTURBER, *s.* क्षोभकरः, विक्षोभकर्त्री *m.* (त्री), मोहकः.—(Interrupter) भङ्गकः, विच्छेदकारी *m.* (न्), विघ्नकरः, विलोपनकृत्.

DISUNION, *s.* वियोगः, विसंयोगः, विप्रयोगः, असंयोगः, निर्युक्तिः *f.*, भेदः, भिन्नता, विभेदः, विश्लेषः, अश्लेषा, असन्धानं, आसक्तत्वं, सङ्गविच्युतिः *f.*, विच्छेदः, अनैक्यं, पार्थक्यं.

To DISUNITE, *v. a.* वियुज् (c. 7. -युनक्ति -योक्तुं), विप्रयुज्, विश्लिष् (c. 10. -श्लेषयति -यितुं), भिद् (c. 7. (भिनत्ति, भेत्तुं), विभिद्, विच्छिद् (c. 7. -छिनत्ति -छेत्तुं), पृथक्कृ, विगम् in caus. (-गमयति -यितुं).

To DISUNITE, *v. n.* वियुज् in pass. (-युज्यते), विप्रयुज्; विश्लिष् (c. 4. -श्लिष्यति -श्लेष्टुं); विभिद् in pass. (-भिद्यते), विगम् (c. 1. -गच्छति -गन्तुं).

DISUNITED, *p. p.* वियुक्तः -क्ता -क्तं, विप्रयुक्तः -क्ता -क्तं, विश्लिष्टः -ष्टा -ष्टं, निर्युक्तिकः -की -कं, असंलग्नः -ग्ना -ग्नं, असंसक्तः -क्ता -क्तं, असंहतः -ता -तं, विरहितः -ता -तं, द्वैधीभूतः -ता -तं.

DISUNITER, *s.* वियोगकर्त्री *m.* (त्री), भेदकरः, पृथक्कारी *m.* (न्).

DISUSAGE, DISUSE, *s.* अव्यवहारः, अनभ्यासः, असेवनं, अनाचारः, निवृत्तिः *f.*, विरतिः *f.*, व्यवहारनिवृत्तिः *f.*, आचारत्यागः, अभ्यासविच्छेदः.

To DISUSE, *v. a.* व्यवहारं or अभ्यासं त्यज् (c. 1. त्यजति, त्यक्तुं), व्यवहारात् विरम् (c. 1. -रमति- रन्तुं) or निवृत् (c. 1. -वर्तते -र्त्तितुं), न सेव् (c. 1. सेवते -वितुं).

DISUSED, *p. p.* अव्यवहारितः -ता -तं, अनभ्यस्तः -स्ता -स्तं, असेवितः -ता -तं, त्यक्तः -क्ता -क्तं; 'as words,' निरूक्तः -क्ता -क्तं.

DITCH, *s.* खातं, खातकं, परिखा, गर्तः, खातभूः *f.*, खेयं, अखातं, उपकुल्या, कुल्या, प्रणालः, प्रतिकूपः, निपानं.

To DITCH, *v. a.* परिखन् (c. 1. -खनति -नितुं), आखन्, परिखाकरणं भूमिं खन्, परिखां कृ, गर्तं कृ.

DITCHER, *s.* आखनिकः, परिखाखनकः, गर्तखनिता *m.* (तृ), खातकः.

DITTANY, *s.* सुगन्धीय ओषधिप्रभेदः, तिक्तशाकः.

DITTO, *s.* तथा, पूर्व्वोक्तः -क्ता -क्तं, उपरिलिखितः -ता -तं.

DITTY, *s.* गीतं -तकं -तिका, गीतिः *f.*, गानं, गाथा, काव्यबन्धः.

DIURETIC, *a.* मूत्रलः -ला -लं, मूत्रवर्धकः -का -कं, मूत्रोत्पादकः -का -कं.

DIURNAL, *a.* आह्निकः -की -कं, दैनः -नी -नं -निकः -की -कं, दैनन्दिनः -नी -नं, दैवसिकः -की -कं, प्रात्यहिकः -की -कं, दिवातनः -नी -नं, अन्वाहिकः -की -कं, नैत्यिकः -की -कं, नित्यः -त्या -त्यं.

DIURNAL, *s.* पञ्जिका, पञ्जिः *f.*, पदभञ्जिका, दैनिकपुस्तकं.

DIURNALLY, *adv.* प्रतिदिनं, प्रतिदिवसं, प्रत्यहं, दिवसे दिवसे, दिने दिने.

DIUTURNAL, *a.* चिरस्थायी -यिनी -यि (न्), चिरकालिकः -की -कं.

DIVAN, *s.* (Council of state) महासभा, शिष्टसभा, तुरुष्कदेशे राजसभा. —(Saloon fitted up with sofas) केलिशयनयुक्ता शाला.

To DIVARICATE, *v. n.* द्विधा विभिद् in pass. (-भिद्यते), द्विभागीभू, द्विखण्डीभू, द्विधाभू, विगम् (c. 1. -गच्छति -गन्तुं), द्विशाखारूपेण विभिद् in pass.

To DIVARICATE, *v. a.* द्विधाकृ, द्विभागीकृ, द्विखण्डीकृ, द्विशकलीकृ.

DIVARICATION, *s.* द्विधाकरणं, द्विधाभावः, द्विखण्डीकरणं, विभिन्नता.

To DIVE, *v. a.* and *n.* मज्ज् (c. 6. मज्जति, मंक्तुं, मज्जितुं), निमज्ज्; अवगाह् (c. 1. -गाहते -हितुं -गाढुं), व्यवगाह्, जलमध्ये प्रविश् (c. 6. -विशति -वेष्टुं), जलान्तःप्रवेशं कृ, जलान्तःप्लवनं कृ, प्लु (c. 1. प्लवते, प्लोतुं).—(Dive after something) किञ्चिदन्वेषणार्थं जले निमज्ज्.—(Dive into any thing) अमुककर्म्मणि निविश्, निरूप् (c. 10. -रूपयति -यितुं); 'diving into books,' ग्रन्थमग्नः -ग्ना -ग्नं, ग्रन्थनिविष्टः -ष्टा -ष्टं.—(Explore) अन्विष् (c. 6. -इच्छति c. 4. -इष्यति -एषितुं), परीक्ष् (c. 1. -ईक्षते -क्षितुं).

DIVER, *s.* मंक्ता *m.* (क्तृ), निमंक्ता *m.*, गाहिता *m.* (तृ), अवगाहिता *m.*, जलेवाहः.—(Into books) शास्त्रनिष्ठः.—(Bird) प्लवः, प्लावी *m.* (न्).

To DIVERGE, *v. n.* एककेन्द्रात् पराङ्मुखः -खी -खं भू or विचल् (c. 1. -चलति -लितुं) or विगम् (c. 1. -गच्छति -गन्तुं) or विच्यु (c 1. -च्यवते -च्योतुं) or व्युत्क्रम् (c. 1. -क्रामति -क्रमितुं).

DIVERGENCE, *s.* केन्द्रपराङ्मुखता, केन्द्रापसरणं, विचलनं, विच्युतिः *f.*, विगमः, विस्तारः.

DIVERGENT, *a.* केन्द्रपराङ्मुखः -खी -खं, केन्द्रविचलः -ला -लं, विस्तृतः -ता -तं.

DIVERS, *a.* नाना indec., विविधः -धा -धं, अनेकः -का -कं, नानाप्रकारः -रा -रं, नानाविधः -धा -धं, बहुविधः -धा -धं, व्याविधः -धा -धं, नानारूपः -पी -पं.

DIVERSE, *a.* (Different) भिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, अन्यः -न्या -न्यत्, असदृशः -शी -शं, असमानः -ना -नं, असमः -मा -मं, अतुल्यः -ल्या -ल्यं, विपरीतः -ता -तं, विविक्तः -क्ता -क्तं, अनीदृशः -शी -शं, इतरः -रा -रं, पृथक् indec., पृथग्विधः -धा -धं.—(Various). *See* DIVERS.

DIVERSELY, *adv.* नानारूपेण, भिन्नप्रकारेण, अनेकधा, पृथक्.

DIVERSIFICATION, *s.* नानाप्रकारकरणं, नानारूपकरणं, अनेकरूपकरणं, आकारपरिवर्त्तनं, वैचित्र्यं, विभिन्नता, विभेदः.

DIVERSIFIED, *p. p.* or *a.* नानारूपः -पी -पं, भिन्नरूपः -पी -पं, नानाप्रकारः -रा -रं, नानाविधः -धा -धं, पृथग्विधः -धा -धं, विविधः -धा -धं, व्याविधः -धा -धं, चित्रितः -ता -तं, विचित्रः -त्रा -त्रं, चित्रविचित्रः -त्रा -त्रं.

To DIVERSIFY, *v. a.* नानारूपं -पीं -पं कृ, भिन्नरूपं -पीं -पं कृ, चित्र् (c. 10. चित्रयति -यितुं), विचित्रं -त्रां -त्रं कृ, चित्रविचित्रीकृ, नानाविधं -धां -धं कृ.

DIVERSION, *s.* (Sport) विनोदः, विलासः, विलसनं, विहारः, क्रीडा, परीहासः, केलिः *m. f.*, कौतुकं.—(Act of amusing the mind) मनोविनोदः, मनोरञ्जनं, अनुरञ्जनं.—(Act of turning aside) स्वपथात् or स्वमार्गाद् भ्रंशकरणं or च्युतिकरणं or विकर्षः or विकर्षणं.

DIVERSITY, *s.* (Difference) भेदः, विभेदः, भिन्नता, विभिन्नता, असादृश्यं, असाम्यं, द्वैधं, द्वैविध्यं.—(Variety) वैचित्र्यं, विचित्रता, भेदाभेदः.

To DIVERT, *v. a.* (Turn from its course) स्वपथात् or स्वमार्गाद् भ्रंश् in caus. (भ्रंशयति -यितुं) or विचल् in caus. (-चालयति -यितुं) or विकृष् (c. 6. -कृषति c. 1. -कर्षति -क्रष्टुं) or विच्यु in caus. (-च्यावयति -यितुं).—(Amuse, please) विनुद् in caus. (-नोदयति -यितुं), विलस् in caus. (-लासयति -यितुं), नन्द् in caus. (नन्दयति -यितुं), रम् in caus. (रमयति -यितुं), रञ्ज् in caus. (रञ्जयति -यितुं).

DIVERTED, *p. p.* विकृष्टः -ष्टा -ष्टं, आकृष्टः -ष्टा -ष्टं, स्वमार्गच्यावितः -ता -तं. —(Amused) विनोदितः -ता -तं, प्रमोदितः -ता -तं, उल्लासितः -ता -तं.

DIVERTING, *a.* हासकरः -री -रं, प्रहासी -सिनी -सि (न्), हास्ययुक्तः -क्ता -क्तं, विनोदकः -का -कं, विनोदजनकः -का -कं, आनन्दकः -का -कं.

DIVERTISEMENT, *s.* (Diversion) विनोदः, विलासः.—(A ballet between the acts) अङ्कद्वयमध्ये नाटकप्रेक्षकाणां विनोदार्थं हल्लीषकं.

To DIVEST, *v. a* (Strip) विवस्त्र (nom. -वस्त्रयति -यितुं), नग्नीकृ, अवतॄ in caus. (-तारयति -यितुं), उत्कृष् (c. 1. -कर्षति -क्रष्टुं), उन्मुच् (c. 6. -मुञ्चति -मोक्तुं), अवमुच्, विमुच्; उच्छद् (c. 10. -छादयति- यितुं), अपनह् (c. 4. -नह्यति -नद्धुं).—(Deprive of) हृ (c. 1. हरति, हर्त्तुं), अपनी (c. 1. -नयति -नेतुं), वियुज् (c. 10. -योजयति -यितुं), विनाकृ.

DIVESTURE, *s.* विवस्त्रीकरणं, नग्नीकरणं, अपनयनं, हरणं.

DIVIDABLE, *a.* विभेद्यः -द्या -द्यं, विभाज्यः -ज्या -ज्यं, खण्डनीयः -या -यं.

To DIVIDE, *v. a.* (Part, separate) भिद् (c. 7. भिनत्ति, भेत्तुं), विभिद्, छिद् (c. 7. छिनत्ति, छेत्तुं), विछिद्; खण्ड् (c. 10. खण्डयति -यितुं), वियुज् (c. 7. -युनक्ति -योक्तुं), विप्रयुज्, विश्लिष् (c. 10. -श्लेषयति -यितुं), पृथक्कृ, शकलीकृ.—(Divide in two) द्विधा छिद् or कृ, द्विखण्डीकृ, द्विभागीकृ, द्व्यंशीकृ.—(Make partition of) विभज् (c. 1. -भजति -भक्तुं), प्रविभज्, संविभज्, अंश् (c. 10. अंशयति -यितुं), व्यंस् (c. 10. -अंसयति -यितुं), परिक्लृप् (c. 10. -कल्पयति -यितुं).

To DIVIDE, *v. n.* भिद् in pass. (भिद्यते), विभिद्, विछिद् in pass. (-छिद्यते), वियुज् in pass. (-युज्यते), विश्लिष् (c. 4. -श्लिष्यति -श्लेष्टुं), द्विधाभू.—(Cleave open) स्फुट् (c. 1. स्फोटति c. 6. स्फुटति -टितुं), दल् (c. 1. दलति -लितुं), विदल्.—(Divide upon a question) द्विधाभू, द्वैधीभू.

DIVIDED, *p. p.* भिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, विच्छिन्नः -न्ना -न्नं, वियुक्तः -क्ता -क्तं, विश्लिष्टः -ष्टा -ष्टं, द्विधाकृतः -ता -तं, द्विधाभूतः -ता -तं, द्वैधीभूतः -ता -तं, पृथक्कृतः -ता -तं, शकलीकृतः -ता -तं, विभक्तः -क्ता -क्तं, प्रविभक्तः -क्ता -क्तं, संविभक्तः -क्ता -क्तं, अंशितः -ता -तं, द्व्यंशः -शा -शं.

DIVIDEND, *s.* (Share, interest on money, &c.) भागः, अंशः, लभ्यांशः, उद्धारः, भाज्यं, कलान्तरं.—(In arithmetic) भाज्यं.

DIVIDER, *s.* (One that separates) भेदकः, विभेदकः, भेदकरः, विच्छेदकः, छेदकरः, वियोगकृत् *m.*—(Distributer) विभागकल्पकः, संविभागकृत्, अंशयिता *m.* (तृ).

DIVINATION, *s.* गणना, गणकता, पक्षिगतिहस्तरेखादिलक्षणाद् भविष्यदनुमानं or शुभाशुभकथनं, पूर्व्वलक्षणपरीक्षा, शकुनपरीक्षणं, पूर्व्वचिह्ननिरीक्षणं, भविष्यत्सूचनं.

DIVINE, *a.* दिव्यः -व्या -व्यं, दैवः -वी -वं, देवकीयः -या -यं, देवकः -का -कं, दैविकः -की -कं, ऐश्वरः -री -रं, ईश्वरीयः -या -यं, ऐशः -शी -शं, ऐशिकः -की -कं, देवार्हः -र्हा -र्हं.—(God-like) ईश्वरतुल्यः -ल्या -ल्यं, देवरूपी -पिणी -पि (न्), ईश्वरमूर्त्तिः -र्त्तिः -र्त्ति.

DIVINE, *s.* (Clergyman) पुरोहितः, धर्म्माध्यापकः, धर्म्मोपदेशकः.—(Theologian) श्रोत्रियः, श्रुताध्ययनसम्पन्नः, परमार्थविद्.

To DIVINE, *v. a.* and *n.* (Practice divination) गणनां कृ, पक्षिगति-चक्षुःस्पन्दादिलक्षणाद् भविष्यद् अनुमा (c. 2. -माति -तुं) or शुभाशुभं कथ् (c. 10. कथयति -यितुं) or प्रदृश् in caus. (-दर्शयति -यितुं) or सूच् (c. 10. सूचयति -यितुं), शकुनानि or पूर्वलक्षणानि परीक्ष् (c. 1. ईक्षते -क्षितुं).—(Conjecture) अनुमा.

DIVINELY, *adv.* देवरूपेण, देववत्, दिव्यरूपेण, ईश्वरीयप्रकारेण.

DIVINER, *s.* (One who practices divination) दैवज्ञः, शकुनपरीक्षकः, पूर्वैचिह्ननिरीक्षकः, निमित्तज्ञः, पक्षिगतिहस्तरेखादिलक्षणाद् भविष्यत्सूचकः. —(Conjecturer) अनुमाता *m.* (तृ).

DIVING, *s.* मज्जनं, निमज्जनं, अवगाहः -हनं, विगाहः, प्लवः -वनं.

DIVING-BELL, *s.* वायुपूरितं घण्टाकृति यन्त्रं यत्प्रविश्य जलेवाहा गम्भीर-सलिले सुचिरेण वस्तुं शक्नुवन्ति.

DIVINITY, *s.* (State of being divine) देवत्वं -ता, भगवत्त्वं, ब्रह्मत्वं.—(A god) देवः -वी *f.*, देवता, भगवान् *m.* -वती *f.* (त्), सुरः, विबुधः, सुचिरायूः *m.* (स्).—(Theology) परमार्थविद्या, ईश्वरविषया विद्या, श्रुतिविद्या, धर्मशास्त्रविद्या, पारमार्थैकविद्या.

DIVISIBILITY, *s.* छेद्यत्वं, विच्छेद्यता, भेद्यत्वं, संज्ञनीयता, विभाज्यत्वं.

DIVISIBLE, *a.* छेद्यः -द्या -द्यं, विच्छेद्यः -द्या -द्यं, विच्छेदनीयः -या -यं, भेद्यः -द्या -द्यं, विभाज्यः -ज्या -ज्यं, संश्यः -श्या -श्यं, संज्ञनीयः -या -यं, -संशयितव्यः -व्या -व्यं.

DIVISION, *s.* (Dividing, separating) छेदः, विच्छेदः -दनं, भेदः, विभेदः -दनं, खण्डनं, परिच्छेदः, परिच्छित्तिः *f.*, छित्तिः *f.*, पृथक्करणं, द्विधाकरणं, द्वैधीकरणं.—(Partition) भाजनं, विभागः, प्रविभागः, विभागकरणं, संज्ञनं, उद्धारविभागः, उद्धारः -रणं.—(Disunion) वियोगः, विसंयोगः, विप्रयोगः, विश्लेषः.—(State of being divided) भिन्नता, विभिन्नता, विच्छिन्नता, विभक्तता.—(Part, distinct portion) भागः, खण्डः, विभागः, देशः, प्रदेशः, एकदेशः.—(Division of time) कालविभक्तिः *f.* —(Of an army) गुल्मः, दलं, सैन्यव्यूहः.—(In arithmetic) भागहरः -हारः, हरणं, छेदनं.

DIVISOR, *s.* (In arithmetic) हरकः, हारकः, अङ्कहारकः, हरः, हारः, भाजकः.

DIVORCE, DIVORCEMENT, *s.* निराकरणं, त्यागः, स्त्रीपुरुषविच्छेदः, धर्मानुसारेण or व्यवहारदर्शनानन्तरं विवाहसम्बन्धभेदः.—(From a wife) स्वभार्यानिराकरणं, स्वभार्यात्यागः; 'writing of divorce,' त्यागपत्रं.

To DIVORCE, *v. a.* स्वभार्यां or स्वभर्तारं त्यज् (c. 1. त्यजति, त्यक्तुं) or परित्यज् or निराकृ or निरस् (c. 4. -अस्यति -असितुं), व्यवहारदर्शनानन्तरं विवाहसम्बन्धं भिद् (c. 7. भिनत्ति, भेत्तुं).

DIVORCED, *p. p.* त्यक्तः -क्ता -क्तं, परित्यक्तः -क्ता -क्तं, निराकृतः -ता -तं.

DIVORCER, *s.* स्त्रीपुरुषयोर् विच्छेदकर्त्री *m.* (तृ), विवाहसम्बन्धभेदकः.

To DIVULGE, *v. a.* प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, ख्या in caus. (ख्यापयति -यितुं), विख्या, प्रकटीकृ, विघुष् (c. 10. -घोषयति -यितुं), व्यक्तीकृ, व्यञ्ज् (c. 7. -अनक्ति -अञ्जितुं), विप्रथ् in caus. (-प्रथयति -यितुं), विवृ (c. 5. -वृणोति -वरितुं -रीतुं), स्पष्टीकृ, प्रचर् in caus. (-चारयति -यितुं); 'to divulge a secret,' रहस्यं भिद् (c. 7. भिनत्ति भेत्तुं); 'to divulge counsel,' मन्त्रभेदं कृ.

DIVULGED, *p. p.* प्रकाशितः -ता -तं, प्रकटीकृतः -ता -तं, विप्रथितः -ता -तं.

DIVULGER, *s.* प्रकाशकः, ख्यापकः; 'of a secret,' रहस्यभेदकरः.

DIVULGING, *s.* प्रकाशनं, ख्यापनं, प्रकटीकरणं, विघोषणं, विवरणं, व्यक्तीकरणं, सर्वत्र प्रचारणं; 'of a secret,' रहस्यभेदः; 'of counsel,' मन्त्रभेदः.

DIVULSION, *s.* विदारः -रणं, विदरः, उत्पाटनं, उद्धरणं.

To DIZEN, *v. a.* भूष् (c. 10. भूषयति -यितुं), परिभूष्, अलङ्कृ, परिष्कृ.

DIZZINESS, *s.* भ्रमरं, भ्रामरं, भ्रमिः *f.*, भ्रमः, विभ्रमः, विभ्रान्तिः *f.*, घूर्णिः *f.*, घूर्णनं, चक्षुरादिवैपल्यं, चक्षुरादिचापल्यं, प्रमादः.

DIZZY, *a.* (Vertiginous) भ्रामरी -रिणी -रि (न्), भ्रमी -मिणी -मि (न्), घूर्णायमानः -ना -नं.—(Causing dizziness) भ्रमकरः -री -रं.—(Thoughtless) चपलः -ला -लं, प्रमादी -दिनी -दि (न्).

To DO, *v. a.* (Act) कृ (c. 8. करोति, कुरुते, कर्तुं), सञ्ज्, अभिकृ; विधा (c. 3. -दधाति -धातुं), व्यवसो (c. 4. -स्यति -सातुं), चेष्ट् (c. 1. चेष्टते -ष्टितुं). —(Execute) कृ, विधा, सम्पद् in caus. (-पादयति -यितुं), घट् (c. 10. घटयति -यितुं).—(Perform) कृ, विधा, अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), आस्था, समास्था, प्रवृत् in caus. (-वर्तयति -यितुं), निर्वृत्, वृत्; सम्पद् in caus., निष्पद्, उत्पद्, उपपद्.—(Practice) आचर् (c. 1. -चरति -रितुं), समाचर्, अभ्यस् (c. 4. -अस्यति -असितुं), सेव् (c. 1. सेवते -वितुं), आत्रि (c. 1. -अयति -ते -यितुं).—(Transact) व्यवह् (c. 1. -हरति -हर्तुं) कृ, समाचर्, निर्वेह् in caus. (-वाहयति -यितुं), पण् (c. 10. पणयति -यितुं), पणायां कृ.—(Carry on, effect) निर्वेह् in caus., प्रवृत् in caus., प्रथी (c. 1. -थयति -थितुं), सम्पद् in caus., तीर् (c. 10. तीरयति -यितुं), पॄ (c. 10. पारयति -यितुं).—(Exert labour) चेष्ट्, विचेष्ट्, व्यवसो, अध्यवसो, यत् (c. 1. यतते -तितुं).—(Cause) कृ, उत्पद् in caus., जन् in caus. (जनयति -यितुं), साध् in caus. (साधयति -यितुं).—(Do with, employ) प्रयुज् (c. 7. -युनक्ति -योक्तुं c. 10. -योजयति -यितुं), उपयुज्, आपॄ in caus. (-पारयति -यितुं), प्रवृत् in caus.—(Do away, destroy) साध् in caus., विनश् in caus. (-नाशयति -यितुं), लुप् (c. 6. लुम्पति, लोप्तुं).—Do good to) उपकृ.—(Do evil to) अपकृ.—(Do one's duty) कृत्यं or कर्त्तव्यं कृ, धर्मे निष्पद् in caus.—(Do one's best) यथाशक्ति कृ; 'he does not know what to do,' यथाकार्यं न जानाति; 'one's own doing,' आत्मकृतः -ता -तं, स्वयंकृतः -ता -तं.

To DO, *v. n.* (Act, behave) चर् (c. 1. चरति -रितुं), आचर्, समाचर्; वृत् (c. 1. वर्तते -र्तितुं), व्यवह्.—(Fare) अस्, भू, वृत्, स्था (c. 1. तिष्ठति, स्थातुं); 'How do you do?' किं क्षेमम् अस्ति, किं कुशलं भवति, क्षेमं भवतु.—(Do well, prosper) सुस्थः -स्था -स्थम् अस्, सुस्थितः -ता -तं भू, वृध् (c. 1. वर्धते -र्धितुं).—(Do ill) दुःस्थः -स्था -स्थम् अस्, दुःस्थितिं गम् (c. 1. गच्छति, गन्तुं).—(Suit) युज् in pass. (युज्यते); 'that will do,' इत्थलं, यथेष्टं.

Do, *s.* (Ado) दः खं, कष्टं.—(Feat) कर्मन् *n.* (न्) चेष्टितं, विचेष्टितं.

DOAB, *s.* (Name of a country) अन्तर्वेदी *f.*

DO-ALL, *s.* सर्वकर्मीन-र्मी-र्मि (न्) सर्वकर्मीणः -णा -णं, सर्वकार्यैकचक्षुः -क्षुः -क्षुः.

DOAT. *See* DOTE.

DOCIBLE, DOCILE, *a.* विनेयः -या -यं, प्रणेयः -या -यं, विधेयः -या -यं, वश्यः -श्या -श्यं, वशगः -गा -गं, वशानुगः -गा -गं, वश्यात्मा -त्मा -त्म (न्) अनुकूलः -ला -लं, अनायासेन शिक्षणीयः -या -यं or शिक्ष्यः -क्ष्या -क्ष्यं, गृह्यकः -का -कं, अनुविधायी -यिनी -यि (न्), अधीनः -ना -नं, आयत्तः -त्ता -त्तं, अस्वच्छन्दः -न्दा -न्दं, निम्नः -म्ना -म्नं, शिक्षाशीलः -ला -लं.

DOCIBLENESS, DOCILITY, *s.* विनेयता, विधेयता, वश्यता, शिक्षणीयत्वं, शिक्षाशीलत्वं.

DOCK, *s.* (The plant) लोलिका, वृद्धराजः, रक्तफलः, सौगन्धिकं, रक्तसौगन्धिकं.—(Tail cut short) छिन्नवालः, ह्रस्वपुच्छं.—(Station for ships) नौकावस्थानं, नौकाशयः, नावाशयः, नौकाधारः, नौकागारं, नावाधारः, नौकोद्धरणस्थानं.

To DOCK, *v. a.* पुच्छं छिद् (c. 7. छिनत्ति, छेत्तुं) or अवच्छिद् or ह्रस् (c. 10. ह्रासयति -यितुं), अवकृत् (c. 6. -कृन्तति -कर्त्तितुं), निकृत्, लू (c. 9. लुनाति, लवितुं).—(Lay up in a dock) नौकाशये निविश्

in caus. (-वेशयति -यितुं), नावम् उड्डृ (c. 1. -हरति -हर्तुं).

Dock-yard, *s.* नाविकभाण्डागारं, नौकानिर्म्माणस्थानं.

Docked, *p. p.* अवच्छिन्नः -न्ना -न्नं, अवकर्त्तितः -ता -तं, लूनः -ना -नं.

Docket, *s.* (Ticket on goods) अङ्कपटः, भाण्डोपरि चिह्नं or अङ्कः or अङ्कपत्रं, पत्रकं.—(Small piece of paper containing the heads of a writing) सङ्क्षेपपत्रकं, सूचिपत्रकं.—(List of those who have cases in a court) अर्थिनां or कार्य्यिणां नामावलिपत्रं.

To Docket, *v. a.* (Make an abstract of a writing and enter it in a book) लिखितसङ्क्षेपं कृत्वा पुस्तके समारुह् in caus. (-रोपयति -यितुं), or अभिलिख् (c. 6. -लिखति -लेखितुं).

Doctor, *s.* (A learned man) पण्डितः, ज्ञानी *m.* (न्), व्युत्पन्नः, वैद्यः, शास्त्री *m.* (न्).—The word आचार्य्यः is affixed to the names of learned men, as 'Doctor' is prefixed: thus राघवाचार्य्यः, रामाचार्य्यः.—(Teacher) आचार्य्यः, शिक्षकः, अध्यापकः, उपदेशकः, गुरुः *m.*—(Doctor of divinity) परमार्थविद्याज्ञः, श्रुतिविद्यासम्पन्नः.—(Physician) वैद्यः, चिकित्सकः, भिषक् *m.* (ज्), आयुर्वेददृक् *m.* (श्), चिकित्साजीवी *m.* (न्), अगदकारः, रोगशान्तकः, रोगहृत् *m.*, रोगहा *m.* (न्), जीवदः.

To Doctor, *v. a.* चित् in des. (चिकित्सति -त्सितुं), भिषज् (nom. भिषज्यति -ज्यितुं). उपचर् (c. 1. -चरति -रितुं), उपचारं कृ, औषधीकृ.

Doctoral, *a.* आचार्य्यपदसम्बन्धी -न्धिनी -न्धि (न्), वैद्यः -द्या -द्यं.

Doctorally, *adv.* वैद्यवत्, पण्डितवत्, आचार्य्यवत्, गुरुवत्.

Doctorship, *s.* आचार्य्यता -त्वं, आचार्य्यपदं, गुरुत्वं, वैद्यपदं.

Doctrinal, *a.* तत्त्वोपदेशकः -का -कं, तत्त्वोपदेशी -शिनी -शि (न्), तत्त्वशिक्षकः -का -कं, शिक्षाविषयः -या -यं, वैधिकः -की -कं, सौचः -ची -चं.

Doctrine, *s.* (Principle laid down) तत्त्वं, मतं, सूत्रं, न्यायः.—(System of doctrines) पथः, पन्थाः *m.* (पथिन्), मार्गः; 'a different doctrine,' परमतं; 'difference of doctrine,' शास्त्राभेदः; 'heretical doctrine,' असच्छास्त्रं; 'received doctrine,' आम्नायः, सम्प्रदायः; 'adhering to a doctrine,' वादरतः.—(Learning) विद्या, पाण्डित्यं.

Document, *s.* पत्रं -त्री, पत्रकं, पत्रिका, लेख्यं, लेख्यपत्रं, लेख्यप्रसङ्गः, लेख्यपत्रं, लेख्यप्रमाणं, लिखनं, लिखितं; 'a forged document,' कपटलेख्यं.

Dodecagon, *s.* द्वादशास्रं, द्वादशकोणः.

To Dodge, *v. a.* and *n.* (Trick) वञ्च् (c. 10. वञ्चयते -ञ्चि -यितुं), व्यपदिश् (c. 6. -दिशति -देष्टुं), अपदिश्, प्रलभ् (c. 1. -लभते -लब्धुं), प्रतृ in caus. (-तारयति -यितुं), छल् (c. 10. छलयति -यितुं).—(Evade) अपक्रम् (c. 1. -क्रामति -क्रमितुं), पलाय् (c. 1. पलायते -यितुं).—(Escape by suddenly shifting place) पलायमानो अकस्मात् परिवृत् (c. 1. -वर्त्तते -र्त्तितुं), विपरिवृत्, इतश्चेतः परिधाव् (c. 1. -धावति -वितुं), विपरिधाव्.

Dodger, *s.* वञ्चकः, मायी *m.* (न्), कपटी *m.* (न्), व्यपदेष्टा *m.* (ष्टृ), प्रतारकः.

Doe, *s.* (She-deer) मृगी, मृगवधूः, हरिणी, एणी, रोहित् *f.*, समीची, पृषती, कन्दली; 'doe-skin,' मृगीचर्म्म *n.* (न्).

Doer, *s.* कर्त्ता *m.* (र्तृ), कारी *m.* (न्), कारकः, कारः, करः, कृत् in comp. विधायी *m.* (न्), अनुष्ठाता *m.* (तृ), कर्म्मकारी *m.*, कर्म्मकरः, सम्पादकः, निर्वाहकः प्रवर्त्तकः.

To Doff, *v. a.* (Put off dress) वस्त्रम् अवतॄ in caus. (-तारयति -यितुं), or अपनी (c. 1. -नयति -नेतुं), व्यपनी, विवस्त्र (nom. -वस्त्रयति -यितुं), उत्कृष् (c. 1. -कर्षति -क्रष्टुं), अवमुच् (c. 6. -मुञ्चति -मोक्तुं), विमुच्, अपनह् (c. 4. -नह्यति -नद्धुं).

Dog, *s.* (The animal) श्वा *m.* (श्वन्), कुक्कुरः, कुकुरः, शुनकः, भषकः, मृगदंशकः, वक्रपुच्छः, वक्रवालधिः *m.*, ललजिह्वः, जिह्वालिट् *m.* (ह्), वृकारिः *m.*, ग्रामसिंहः, शीघ्रचेतनः, रात्रिजागरः, कृतज्ञः, सारमेयः, वान्तादः, शरत्कामी *m.* (न्), शवकाम्यः, कौलेयकः; 'sporting-dog,' मृगयाकुशलः कुक्कुरः, आखेटकार्य्यं श्वा, विश्वकद्रुः *m.*; 'mad-dog,' अलर्कः; 'bite of a dog,' श्वदंशनं.—(Andiron) लोहमयः शूलाधारः. 'To go to the dogs,' शुनो गम् (c. 1. गच्छति, गन्तुं), परिक्षि in pass. (-क्षीयते), विनश् (c. 4. -नश्यति).

To Dog, *v. a.* कुक्कुरवद् अन्विष् (c. 4. -इष्यति -एषितुं), पश्चाद्गम् (c. 1. -गच्छति -गन्तुं), पश्चाद्वृत् (c. 1. -वर्त्तते -र्त्तितुं), अनुवृत्, अनुसृ (c. 1. -सरति -सर्त्तुं), अनुश (c. 1. -तिशति -शितुं), नित्यम् अनुसृत्य आयासं जन् (c. 10. जनयति -यितुं).

Dog-brier or dog-rose, *s.* जवापुष्पः कण्टकगुल्मः, ओड्रपुष्पः कण्टकस्तम्बः.

Dog-cheap, *a.* श्वमांसवत् or विमांसवद् अल्पमूल्येन क्रेयः -या -यं, स्वल्पमूल्यः -ल्या -ल्यं, स्वल्पार्घः -र्घा -र्घं.

Dog-days, *s.* श्वदिनानि *n. pl.*, अशुभाकालः, अशुभसमयः, सूर्य्यदिनानि, आषाढात् प्रभृति भाद्रपर्य्यन्तं कालः.

Dog-fancier, *s.* श्वक्रीडी *m.* (न्), श्वागणिकः, श्वागणिकः.

Dogged, *a.* (Sullen, obstinate) वक्रभावः -वा -वं, ककैशभावः -वा -वं, जडः -डा -डं, स्तब्धः -ब्धा -ब्धं, कठिनः -ना -नं, निष्ठुरः -रा -रं.

Doggedly, *adv.* वक्रभावेन, ककैशभावेन, जाड्येन, निष्ठुरं, ककैशं.

Doggedness, *s.* भाववक्रता, काकैश्यं, जाड्यं, जडता, नैष्ठुर्य्यं, काठिन्यं.

Doggerel, *a.* (Irregular, as verses) अपरिमितचरणः -णा -णं, अपरिमितपदः -दा -दं, विषमः -मा -मं; 'doggerel verse,' कुकविता, मन्दकविता, नीचकविता.

Doggish, *a.* श्वशीलः -ला -लं, शौवः -वी -वं, कुक्कुराचारः -रा -रं, श्ववृत्तिः -त्तिः -त्ति, श्वापदः -दी -दं, शौवापदः -दी -दं; 'a doggish fellow,' श्वनरः; 'a doggish life,' श्ववृत्तिः *f.*

Doggishness, *s.* शौवं, अशीलता, कुक्कुराचारत्वं, अभावः, पशुता.

Dog-grass, *s.* तृणभेदः, तृणं, कक्षः, घासविशेषः.

Dog-hearted, *a.* श्वहृदयः -या -यं, कुक्कुरहृदयः -या -यं, कठिनहृदयः -या -यं.

Dog-hole, *s.* श्वबिलं, श्वगर्त्तः, कुक्कुरगर्त्तः, श्वविवरं, श्वभ्रं, अधमस्थानं.

Dog-keeper, *s.* श्वपोषकः, श्ववान् *m.* (त्), श्वागणिकः, श्वपचः.

Dog-kennel, *s.* कुक्कुरालयः, श्वगृहं, कुक्कुरगृहं, कुक्कुरागारं.

Dog-louse, *s.* श्वयूका, कुक्कुरयूका, श्वकीटः, कुक्कुरकीटः.

Dogma, *s.* मतं, तत्त्वं, सूत्रं, विधिः *m.*, सम्मतं, नियमः, आदेशः, निर्देशः, व्यवस्था.

Dogmatic, dogmatical, *a.* आदेशकः -का -कं or निर्देशकः, स्वमताभिमानी -निनी -नि (न्), सधर्वं स्वमतवादी -दिनी -दि (न्) or स्वमतावलम्बी -म्बिनी -म्बि (न्), मतसंस्थापनः -ना -नं, नैयमिकः -की -कं, वैधिकः -की -कं, सौचः -ची -चं.

Dogmatically, *adv.* आदेशकप्रकारेण, सनिर्देशं, दृढनिश्चयपूर्व्वं, सधर्वं.

Dogmatism, *s.* स्वमताभिमानं, स्वमतसंस्थापनं, सधर्वं स्वमतवादः or स्वमतावलम्बनं, दृढोक्तिः *f.*

Dogmatist, dogmatiser, *s.* धर्वपूर्व्वं or गर्व्वपूर्व्वं स्वमतवादी *m.* (न्) or स्वमताभिमानी *m.* (न्) or तत्त्ववादी.

To Dogmatise, *v. n.* सधर्वं or सगर्व्वं स्वमतं वद् (c. 1. वदति -दितुं), दृढोक्त्या स्वमतं संस्था in caus. (-स्थापयति -यितुं), तत्त्वानि धर्वेण वद्.

Dog's ear, *s.* कुक्कुरकर्णः, श्वकर्णः, पुस्तकपत्रकोणे श्वकर्णाकारः पुटः.

Dog-sick, *a.* कुक्कुरवद् वमनकारी -रिणी -रि (न्).

Dog's-meat, *s.* श्वमांसं, कुक्कुरमांसं, विमांसं, कुक्कुराहारः, उच्छिष्टान्नं.

Dog-star, *s.* कुक्कुरसंज्ञा तारा यस्याम् उदितायाम् अशुभाकालो भवति.

Dog's-tooth, *s.* श्वादनः, श्वदंष्ट्रा, कुक्कुरदनः.

Dog-trick, *s.* श्ववृत्तं, श्वचेष्टितं, श्वकर्म्मे *n.* (न्), दुश्चेष्टितं, कुचेष्टा.

Dog-weary, *a.* कुक्कुरवत् परिश्रान्तः -न्ता -न्तं, अतिक्लान्तः -न्ता -न्तं.

Doings, *s. pl.* (Things done) चरित्रं, चरितं, चेष्टितं, विचेष्टितं, कृतं, कर्म्म *n.* (न्), विधानं, व्यापारः, चेष्टा, वृत्तं.—(Conduct) व्यवहारः, आचारः, आचरितं, चारित्र्यं, वृत्तिः *f.*, चर्य्या, प्रवृत्तिः *f.*, रीतिः *f.*

Dole, *s.* (That which is dealt, a part, share) भागः, अंशः, विभागः, भाजितं, भाज्यं, उद्धारः, उपहारः, खण्डं, छेदः, भित्तं, वण्टः. —(Gratuity) पारितोषिकं.—(Grief) शोकः, दुःखं.

To dole, *v. a.* पृथक् पृथग् विभज् (c. 1. -भजति -ते -भक्तुं), विभागशः or अंशांशि दा.

Doleful, dolesome, *a.* सशोकः -का -कं, शोचनः -ना -नं, शोकार्त्तः -र्त्ता -र्त्तं, दुःखी -खिनी -खि (न्), समन्युः -न्युः -न्यु, विषादी -दिनी -दि (न्), उद्विग्नः -ग्ना -ग्नं, उग्रः -ग्रा -ग्रं.

Dolefully, *adv.* सशोकं, सविषादं, सोद्वेगं, सदुःखं, सोत्कण्ठं, सखेदं, उग्रं.

Dolefulness, dolesomeness, *s.* शोकः, दुःखं, विषादः, विषण्णता, मन्युः *m.*, खेदः, उद्वेगः, अनाह्लादः, उग्रत्वं, उद्विग्नता, ग्लानिः *f.*, मनोग्लानिः *f.*, दुःखित्वं.

Doll, *s.* पुत्रिका, दारुपुत्रिका, पाञ्चालिका, पाञ्चलिका, पाञ्चाली, पुत्तली, दारुगौः, दारुस्त्री, शालभञ्जी -ञ्जिका, शालाङ्गी, कुरुण्टी, यामा, अञ्जलिकारिका.

Dollar, *s.* (A silver coin) रूप्यमुद्रा, रौप्यमुद्रा.

Dolorific, *a.* दुःखकरः -री -रं, व्यथाकरः -री -रं, पीडाकरः -री -रं.

Dolorous, *a.* सशोकः -का -कं, शोकमयः -यी -यं, दुःखमयः -यी -यं, शोकान्वितः -ता -तं, समन्युः -न्युः -न्यु, खेदान्वितः -ता -तं.

Dolour, dolor, *s.* शोकः, दुःखं, खेदः, मन्युः *m.*, क्लेशः.

Dolphin, *s.* (Kind of sea-fish) समुद्रीयमत्स्यभेदः.—(The constellation) श्रविष्ठा, धनिष्ठा.

Dolt, *s.* स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, मन्दबुद्धिः, मूर्खः, मूढः, जडः.

Doltish, *a.* जडबुद्धिः -द्धिः -द्धि, मन्दमतिः -तिः -ति, स्थूलः -ला -लं.

Doltishly, *adv.* मूढवत्, जडवत्, मूर्खवत्, जाड्येन, बद्धीरवत्.

To execute, *v. a.* कृ, विधा (c. 3. -दधाति -धातुं), निर्वह् in caus. (-वाहयति -यितुं), सम्पद् in caus. (-पादयति -यितुं), निष्पद्, अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), आस्था, समास्था, साध् (c. 10. साधयति -यितुं), संसाध्, सिद्धीकृ, वृत् in caus. (वर्त्तयति -यितुं), निर्वृत्, निवृत्, संवृत्, प्रवृत्, प्रणी (c. 1. -नयति -नेतुं), सम्प्रणी, घट् (c. 10. घटयति -यितुं), आचर् (c. 1. -चरति -रितुं), समाचर्, प्रयुज् (c. 7. -युनक्ति -योक्तुं). (Inflict capital punishment) धर्म्मसभाविचारानुसारेण वधदण्डार्हं हन् (c. 2. हन्ति -न्तुं), वधदण्डं कृ, प्राणदण्डं कृ.

Executed, *p. p.* कृतः -ता -तं, अनुष्ठितः -ता -तं, निष्पादितः -ता -तं, निष्पन्नः -न्ना -न्नं, सम्पादितः -ता -तं, विहितः -ता -तं, निर्वाहितः -ता -तं, आचरितः -ता -तं, सिद्धीकृतः -ता -तं, साधितः -ता -तं, प्रणीतः -ता -तं, घटितः -ता -तं.—(Put to death by judicial sentence) धर्म्मसभाविचारानुसारेण हतः -ता -तं or व्यापादितः -ता -तं.

Execution, *s.* (Performance) करणं, विधानं, अनुष्ठानं, आचरणं, निर्व्वहणं, निर्व्वाहः, निष्पादनं, सम्पादनं, निर्वर्त्तनं, साधनं, सिद्धिः *f.*, निष्पत्तिः *f.*—(Putting to death by judicial sentence) धर्म्मसभाविचारानुसारेण प्राणाघातः or प्राणहननं or प्राणदण्डः, वधदण्डार्हघातः, वधः, हत्या, व्यापादनं, मारणं; 'place of execution,' वध्यभूमिः *f.*, वधस्थानं, घातस्थानं, वधस्थली.

Executioner, *s.* घातुकपुरुषः, घातकजनः, वध्यपुरुषः, वधकर्म्माधिकारी *m.* (न्), मृतपाः *m.*, दण्डपाशिकः.

Executive, *a.* सम्पादकः -का -कं, निर्व्वाहकः -का -कं, साधकः -का -कं, विधायकः -का -कं, प्रवर्त्तकः -का -कं, निष्पादकः -का -कं, प्रणायकः -का -कं.

Executor, *s.* मृतपत्रनिरूपणाधिकृतः, मृतलेखाधिकारी *m.* (न्), मृतकर्म्माधिकारी *m.*, मृतकर्म्मनिर्व्वाहकः, मृतकर्म्मसम्पादकः, मृतपत्रानुसारेण तद्विषयनिर्व्वाहकः.

Executorship, *s.* मृतजनकर्म्माधिकारिणः पदं or कर्म्म *n.* (न्).

Executrix, *s.* मृतलेखाधिकारिणी स्त्री, मृतकर्म्माधिकारिणी.

Exegesis, *s.* व्याख्या -ख्यानं, विवरणं, व्याकरणं, विवृतिः *f.*, उद्देशः.

Exegetical, *a.* वाचकः -का -कं, उद्देशकः -का -कं, प्रकाशकः -का -कं.

Exegetically, *adv.* व्याख्यानेन, प्रकाशनार्थं, उद्दिश्य, विवरणार्थं.

Exemplar, *s.* प्रमाणं, प्रतिमा -मानं, उपमा, प्रतिरूपं, आदर्शः, प्रतिकृतिः *f.*, न्यायाधारः, दृष्टान्तः.

Exemplarily, *adv.* प्रमाणतस्, प्रमाणवत्, प्रमाणम् इव, प्रमाणरूपेण, प्रामाणिकप्रकारेण, दृष्टान्तरूपेण, अनुकरणीयप्रकारेण, अनुकरणीयं.

Exemplariness, *s.* अनुकरणीयता, अनुकरणयोग्यता, अनुगम्यत्वं, अनुवर्त्तनीयत्वं, प्रामाणिकत्वं, प्रमाणयोग्यता, प्रामाण्यं, दृष्टान्तता.

Exemplary, *a.* प्रमाणयोग्यः -ग्या -ग्यं, अनुकरणयोग्यः -ग्या -ग्यं, अनुकरणीयः -या -यं, अनुकरणार्हः -र्हा -र्हं, अनुगम्यः -म्या -म्यं, अनुवर्त्तनीयः -या -यं, दृष्टान्तयोग्यः -ग्या -ग्यं, प्रामाणिकः -की -कं, दार्ष्टान्तिकः -की -कं.

Exemplification, *s.* उदाहरणं, उदाहारः, समुदाहरणं, उद्देशः, निदर्शनं, प्रदर्शनं, दृष्टान्तः, दृष्टान्तीकरणं, उल्लेखा.

Exemplified, *p. p.* उदाहृतः -ता -तं, समुदाहृतः -ता -तं, प्रदर्शितः -ता -तं, उद्दिष्टः -ष्टा -ष्टं, दृष्टान्तेन स्पष्टीकृतः -ता -तं or प्रकाशितः -ता -तं.

To exemplify, *v. a.* दृष्टान्तेन स्पष्टीकृ or प्रकाश् (c. 10. -काशयति -यितुं) or प्रदृश् (c. 10. -दर्शयति -यितुं) or उद्दिश् (c. 6. -दिशति -देष्टुं), दृष्टान्तीकृ, उदाहृ (c. 1. -हरति -हर्त्तुं), व्याहृ.

To exempt, *v. a.* मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, निर्मुच्, विनिर्मुच्; मोक्ष् (c. 10. मोक्षयति -यितुं), विमोक्ष्; विसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. -सर्जयति -यितुं), अवसृज्; 'to exempt from taxes,' अकरीकृ, निष्करीकृ, स्वाधीनीकृ.

Exempt, exempted, *a.* and *p. p.* (Free from) वर्ज्जितः -ता -तं, विवर्ज्जितः -ता -तं, मुक्तः -क्ता -क्तं, विनिर्मुक्तः -क्ता -क्तं, निर्मुक्तः -क्ता -क्तं, शून्यः -न्या -न्यं, रहितः -ता -तं, हीनः -ना -नं, विनाकृतः -ता -तं, वियुक्तः -क्ता -क्तं, विगतः -ता -तं, वीतः -ता -तं; 'exempt from bias,' मुक्तसङ्गः -ङ्गा -ङ्गं, सङ्गमुक्तः -क्ता -क्तं, सङ्गवर्ज्जितः -ता -तं, सङ्गहीनः -ना -नं, विगतसङ्गः -ङ्गा -ङ्गं; 'exempt from passion,' वीतरागः -गा -गं. Or expressed by अ or निर् prefixed; as, 'exempt from tax,' अकरः -रा -रं, निष्करः -रा -रं.—(Not liable) अनधीनः -ना -नं, अनायत्तः -त्ता -त्तं.

Exemption, *s.* (Freedom from) मुक्तिः *f.*, मोक्षः, विनिर्मोकः, निर्मोकः, विमोक्षः, विरहः, राहित्यं, रहितत्वं, शून्यता, अभावः, असम्भवः, व्यावृत्तिः *f.*; 'exemption from war,' युद्धाभावः. Or expressed by अ prefixed; as, 'exemption from fear,' अभयं; 'exemption from exertion,' अनायासः; 'exemption from taxes,' अकरत्वं.

To exenterate, *v. a.* निरन्त्रीकृ, नाडीः or अन्त्राणि वहिष्कृ.

Exequial, *a.* और्द्ध्वदेहिकः -की -कं, अन्त्येष्टिक्रियासम्बन्धी -न्धिनी -न्धि (न्), अन्तसत्क्रियासम्बन्धी &c., श्राद्धादिकर्म्मसम्बन्धी &c.

Exequies, *s.* और्द्ध्वदेहिकं, और्द्ध्वदेहिकक्रिया, अन्त्येष्टिक्रिया, अन्त्येष्टिः *f.*,

अमात्यक्रिया, मृतशरीरसत्कर्म्म *n.* (न्), प्रेतकर्म्म *n.* अन्त्यकर्म्म *n.* शवकर्म्म *n.*

EXERCISE, *s.* (Habitual practice) अभ्यासः, अभ्यसनं, अभ्यासता, चर्य्या, आवृत्तिः *f.*—(Performance) आचरणं, प्रवृत्तिः *f.*, व्यापारः, निषेवनं, अनुष्ठानं.—(Employment) प्रयोगः, उपयोगः, सेवनं.—(Exertion) व्यवसायः, उद्यमः, आयासः, उद्योगः, चेष्टा, उत्थानं.—(Discipline) शिक्षा.—(Bodily exercise) व्यायामः, परिश्रमः, शरीरपरिश्रमः.—(Exercise of mind) मनोव्यापारः, मनोव्यवसायः.—(Military exercise) सैन्यव्यायामः, अस्त्रशिक्षा, शस्त्राभ्यासः, युद्धाभ्यासः, योग्या; 'daily exercises,' नित्यकृत्यं; 'taking exercise,' व्यायामी -मिनी -मि (न्).

To EXERCISE, *v. a.* (Practice habitually) अभ्यस् (c. 4. -अस्यति -असितुं), आचर् (c. 1. -चरति -रितुं), समाचर्, अभ्यासं कृ,—(Employ, use) प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), उपयुज्, व्यापृ in caus. (-पारयति -यितुं).—(Perform) कृ, आचर्, आस्था, (c. 1. -तिष्ठति -स्थातुं), अनुष्ठा, सेव् (c. 1. सेवते -वितुं), निषेव्, आसेव्, उपसेव्.—(Discipline) शिक्ष् in caus. (शिक्षयति -यितुं).—(Exercise the body, troops, &c.) व्यायम् (c. 10. -यमयति -यामयति -यितुं, c. 1. -यच्छति -यन्तुं).—(Exercise one's self) चेष्ट् (c. 1. चेष्टते -ष्टितुं), आत्मानं चेष्ट् (c. 10. चेष्टयति -यितुं), उद्यम् (c. 1. -यच्छति -यन्तुं), व्यायम्, व्यवसो (c. 4. -स्यति -सातुं), उद्योगं कृ; 'having exercised,' व्यायाम्य.

To EXERCISE, *v. n.* (Use bodily exercise for health) शरीरव्यायामं कृ, आरोग्यार्थं विहारं कृ or परिश्रमं कृ.

EXERCISED, *p. p.* अभ्यस्तः -स्ता -स्तं, कृताभ्यासः -सा -सं, उद्यतः -ता -तं, व्यायतः -ता -तं, कृतोद्यमः -मा -मं, शिक्षितः -ता -तं, शीलितः -ता -तं.

To EXERT, *v. a.* (Bring into action) प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं, c. 10. -योजयति -यितुं), उपयुज्, उद्युज्, चेष्ट् in caus. (चेष्टयति -यितुं), व्यापृ in caus. (-पारयति -यितुं) वृत् in caus. (वर्त्तयति -यितुं), प्रवृत्, वाह् (c. 10. वाहयति -यितुं), उत्सह् in caus. (-साहयति -यितुं).—(Exert one's self) चेष्ट् (c. 1. चेष्टते -ष्टितुं), आत्मानं चेष्ट् in caus., विचेष्ट्, यत् (c. 1. यतते -तितुं), प्रयत्, व्यवसो (c. 4. -स्यति -सातुं), उद्यम् (c. 1. -यच्छति -यन्तुं), व्यायम्, आयस् (c. 4. -यस्यति -यसितुं), यद् (c. 1. यटते -टितुं, c. 10. यटयति -यितुं), उद्योगं कृ, यानं कृ.

EXERTED, *p. p.* चेष्टितः -ता -तं, उद्यतः -ता -तं, उद्युक्तः -क्ता -क्तं, प्रयुक्तः -क्ता -क्तं, व्यवसितः -ता -तं, यत्नः -त्ना -त्नं, वाहितः -ता -तं, प्रवर्त्तितः -ता -तं.

EXERTION, *s.* चेष्टा -ष्टनं, उद्योगः, उद्यमः, उत्साहः, यानः, व्यवसायः, चेष्टितं, विचेष्टितं, प्रयत्नः, अध्यवसायः, आयासः, प्रयासः, प्रवृत्तिः *f.*, यटनं -ना, यटा, गुरवं, गूरणं, गोरणं, व्यापारः, ग्रहः, कर्म्मयोगः, उत्थानं, प्रयोगः, व्यायामः.

EXEUNT OMNES, निष्क्रान्ताः सर्व्वे.

To EXFOLIATE, *v. n.* अध्यस्थिवद् वल्करूपेण गल् (c. 1. गलति -लितुं) or विगल्, दुष्टास्थिवत् or गलितास्थिवद् वल्करूपपरिपुटनं कृ.

EXFOLIATION, *s.* अध्यस्थि *n.*, अध्यस्थिपरिपुटनं, अध्यस्थिगलनं.

EXHALATION, *s.* (Act or process of exhaling) उद्गारः, निश्वासः, प्रश्वासः, निःश्वासः, निःश्वसनं, उत्क्षेपः.—(Rising of vapour, &c.) वाष्पोद्गारः, वाष्पोन्नतिः *f.*, भूमोन्नतिः *f.*—(The vapour exhaled) वाष्पः, धूमः -मिका; 'sending forth exhalations,' उद्गारी -रिणी -रि (न्).

To EXHALE, *v. a.* उद्ग् (c. 6. -गिरति -गरितुं -रीतुं), निश्वस् (c. 2. -श्वसिति -तुं), निःश्वस्, प्रश्वस्, प्रधा (c. 2. -धाति -तुं), मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, उदीर् (c. 10. -ईरयति -यितुं), उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उद्गम् in caus. (-गमयति -यितुं), निर्गम्.

EXHALED, *p. p.* उद्गीर्णः -र्णा -र्णं, निश्वसितः -ता -तं, उदीरितः -ता -तं.

EXHALEMENT, *s.* उद्गारः, उद्गीर्णं, वाष्पः, धूमः -मिका.

To EXHAUST, *v. a.* (Drain off, dry up) शुष् in caus. (शोषयति -यितुं), उच्छुष्, विशुष्, संशुष्, शुष्कीकृ.—(Empty, draw out all the contents) शून्यीकृ, विरसीकृ, निःसारीकृ, सर्व्वसारं हृ (c. 1. हरति, हर्त्तुं), निःशेषीकृ, निरवशेषीकृ.—(Consume) क्षि (c. 1. क्षयति, c. 5. क्षिणोति or caus. क्षपयति -यितुं), क्षीणीकृ, नश् in caus. (नाशयति -यितुं), व्ययीकृ.—(Weary, fatigue) खिद् in caus. (खेदयति -यितुं), ग्लै in caus. (ग्लापयति -यितुं), परिग्लै, क्लम् in caus. (क्लमयति -यितुं), सद् in caus. (सादयति -यितुं), अवसद्.—(Drink up) आपा (c. 1. -पिबति -पातुं), परिपा.

EXHAUSTED, *p. p.* (Drained) शोषितः -ता -तं, उच्छोषितः -ता -तं, शुष्कीकृतः -ता -तं.—(Consumed) क्षीणः -णा -णं, परिक्षीणः -णा -णं.—(Fatigued, wearied) आन्तः -न्ता -न्तं, परिश्रान्तः -न्ता -न्तं, क्लान्तः -न्ता -न्तं, अवसन्नः -न्ना -न्नं, खिन्नः -न्ना -न्नं, ग्लानः -ना -नं, परिग्लानः -ना -नं, क्लमी -मिनी -मि (न्), आहितक्लमः -मा -मं, श्रमः -मा -मं.—(Expended) व्ययितः -ता -तं; 'exhausted of strength,' गतसत्त्वः -त्त्वा -त्त्वं, गततेजाः -जाः -जः (स्), च्युतोत्साहः -हा -हं.

EXHAUSTION, *s.* (Act of draining, emptying) शोषणं, उच्छोषणं, शून्यीकरणं, सर्व्वसारहरणं.—(Consumption) क्षयः, परिक्षयः, नाशः, व्ययः.—(Fatigue) क्लान्तिः *f.*, श्रान्तिः *f.*, क्लमः, श्रमः, क्लमथः, अवसादः, ग्लानिः *f.*, खेदः, परिश्रान्तिः *f.*, क्लमित्वं.—(State of being empty) शून्यता -त्वं.

EXHAUSTLESS, *a.* अक्षयः -या -यं, अक्षयी -यिणी -यि (न्), अनाशयः -शया -शयं.

To EXHIBIT, *v. a.* दृश् in caus. (दर्शयति -यितुं), प्रदृश्, प्रकाश् in caus. (-काशयति -यितुं), सूच् (c. 10. सूचयति -यितुं), व्यक्तीकृ, प्रकटीकृ, प्रादुष्कृ, आविष्कृ, व्यञ्ज् (c. 7. -अनक्ति -अंक्तुं, c. 10. -अञ्जयति -यितुं), निर्दिश् (c. 6. -दिशति -देष्टुं), प्रदिश्, प्रसू in caus. (-सारयति -यितुं), आहृ in caus. (-हारयति -यितुं), प्रत्यक्षीकृ.

EXHIBITED, *p. p.* दर्शितः -ता -तं, प्रकाशितः -ता -तं, व्यक्तीकृतः -ता -तं.

EXHIBITER, *s.* दर्शकः, दर्शयिता *m.* (तृ), प्रदर्शकः, प्रकाशकः, निर्देष्टा *m.* (ष्टृ).

EXHIBITION, *s.* दर्शनं, प्रदर्शनं, प्रकाशनं, निर्देशः, सूचनं, व्यक्तीकरणं, व्यञ्जनं, व्यक्तिः *f.*, विवरणं, प्रकटीकरणं, प्रादुष्करणं, आविष्करणं, प्रकाशीकरणं, प्रेषणं.—(Maintenance in the university) राजविद्यालये वृत्तिः *f.*

EXHIBITIONER, *s.* राजविद्यालये वृत्तिभाक् *m.* (ज्) or वृत्तिभुक् *m.* (ज्).

To EXHILARATE, *v. a.* हृष् in caus. (हर्षयति -यितुं), प्रहृष्, परिहृष्, ह्लाद् in caus. (ह्लादयति -यितुं), आह्लाद्, प्रह्लाद्, नन्द् in caus. (नन्दयति -यितुं), अभिनन्द्; मुद् in caus. (मोदयति -यितुं), प्रमुद्, उल्लस् in caus. (-लासयति -यितुं), मद् in caus. (मादयति, मदयति -यितुं), रञ्ज् in caus. (रञ्जयति -यितुं).

EXHILARATED, *p. p.* प्रहर्षितः -ता -तं, आनन्दितः -ता -तं, प्रमुदितः -ता -तं.

EXHILARATING, *a.* प्रहर्षकः -का -कं, आनन्दकारी -रिणी -रि (न्).

EXHILARATION, *s.* हर्षः, प्रहर्षः, आनन्दः, प्रह्लादः, आह्लादः, प्रमोदः, उल्लासः, प्रफुल्लता, चित्तप्रसन्नता, मादः, प्रमदः.

To EXHORT, *v. a.* (Advise) उपदिश् (c. 6. -दिशति -देष्टुं), प्रबुध् (c. 10. -बोधयति -यितुं), प्रदिश् (c. 10. -देशयति -यितुं), मन्त्रणां दा.—(Animate) आश्वस् in caus. (-श्वासयति -यितुं), समाश्वस्.—(Instigate) उत्सह् in caus. (-साहयति -यितुं), प्रोत्सह्, समुत्सह्, चुद् (c. 10. चोदयति -यितुं), प्रचुद्, चेष् in caus. (चेषयति -यितुं), प्रवृत् in caus. (-वर्त्तयति -यितुं), प्रयुज् (c. 10. -योजयति -यितुं), उद्युज्, प्रोत्सू in caus. (-सारयति -यितुं), ईह् in caus. (ईहयति -यितुं).

EXHORTATION, *s.* उपदेशः, उपदेशवाक्यं, प्रबोधनं, प्रबोदनं, प्रबोधवाक्यं,

मन्त्रणं -णा, प्रवर्त्तकवाक्यं, विनयवाक्यं, प्रोत्साहः -हनं, प्रवर्त्तनं, प्रयोजनं, प्रेरणा.

EXHORTATIVE, EXHORTATORY, *a.* उपदेशकः -का -कं, प्रबोधकः -का -कं, प्रबोदनः -ना -नं.

EXHORTED, *p. p.* प्रबोधितः -ता -तं, प्रबोदितः -ता -तं, उपदिष्टः -ष्टा -ष्टं.

EXHORTER, *s.* उपदेष्टा *m.* (ष्टृ), उपदेशी *m.* (न्), प्रबोदकः, प्रवर्त्तकः, प्रयोजकः, प्रोत्साहकः, उत्साहहेतुकः, प्रेरकः.

EXHUMATION, *s.* शवोत्खननं, मृतशरीरोत्खननं.

To EXHUME, *v. a.* शवं or मृतशरीरम् उत्खन् (c. 1. -खनति -नितुं).

EXHUMED, *p. p.* उत्खातः -ता -तं, प्रोत्खातः -ता -तं, श्मशानबहिष्कृतः -ता -तं.

EXIGENCE, EXIGENCY, *s.* (Urgent need) प्रयोजनं, अवश्यकता, आवश्यकत्वं, कार्य्यवशः,—(Occasion) अवसरः, समयः, प्रस्तावः.—(Distress) आपद् *f.*, विपद् *f.*, विपत्तिः *f.*; 'according to the exigency,' यथाप्रयोजनं, प्रयोजनवत्, अर्थवत्, यथासमयं, यथावसरं, प्रस्तावसदृशं; 'in this exigency,' इह समये.

EXILE, *s.* प्रवासः -सनं, विवासः -सनं, निर्वासनं, विप्रवासः -सनं, उद्वासः -सनं, प्रव्राजनं, गृहभङ्गः, स्वदेशाद् दूरीभावः or निरसनं or निराकरणं, दूरसंस्थानं; 'the person exiled,' प्रवासी *m.* (न्), विप्रवासी *m.*

To EXILE, *v. a.* विवस् in caus. (-वासयति -यितुं), प्रवस्, निर्वस्, विप्रवस्; प्रव्रज् in caus. (-व्राजयति -यितुं), स्वदेशाद् बहिष्कृ or निराकृ or दूरीकृ or निरस् (c. 4. -अस्यति -असितुं) or अपानुद् (c. 6. -नुदति -नोत्तुं) or निःसृ in caus. (-सारयति -यितुं), देशान्तरीकृ.

EXILED, *p. p.* प्रवासितः -ता -तं, विवासितः -ता -तं, स्वदेशदूरीकृतः -ता -तं.

To EXIST, *v. n.* (Be) अस् (c. 2. अस्ति), भू (c. 1. भवति -वितुं), सम्भू, वृत् (c. 1. वर्त्तते -र्त्तितुं), प्रवृत्, विद् in pass. (विद्यते), जन् (c. 4. जायते), उत्पद् (c. 4. -पद्यते -पत्तुं).—(Live) जीव् (c. 1. जीवति -वितुं), प्राण् (c. 2. प्राणिति -तुं, rt. असन्).—(Remain) स्था (c. 1. तिष्ठति, स्थातुं), वृत्, आस् (c. 2. आस्ते).

EXISTENCE, *s.* जीवनं, जीवितं, जीवः -वा, वृत्तिः *f.*, वर्त्तनं, भवः, भावः, सम्भवः, वृत्तिता, अस्ति ind., सत्त्वं, सत्ता, प्राणपरिग्रहः, प्राणधारणं, असुधारणं, निश्वसनप्रश्वसनं, सद्भावः, अवस्था, स्थितिः *f.*

EXISTENT, *a.* जीवी -विनी -वि (न्), जीवन् -वन्ती -वत् (त्), वर्त्तमानः -ना -नं, विद्यमानः -ना -नं, वर्त्तिष्णुः -ष्णुः -ष्णु, भविष्णुः -ष्णुः -ष्णु, म्रियमाणः -णा -णं, सन् सती सत् (त्).

EXIT, *s.* निष्क्रमः -मणं, निर्गमः, विनिर्गमः, निर्यायं, निष्क्रान्तिः *f.*, अपगमः, अपक्रमः -मणं, अपयानं.—(In dramatic language) निष्क्रान्तः -न्ता -न्तं.

To EXONERATE, *v. a.* (Unload) भाराद् मुच् (c. 6. मुञ्चति, मोक्तुं) or विमुच्; भारम् उत्तृ in caus. (-तारयति -यितुं) or अपनी (c. 1. -नयति -नेतुं), निर्भारं -रां -रं कृ.—(Clear) शुध् (c. 10. शोधयति -यितुं), विशुध्; दोषाद् मुच्, निर्दोषं -षां -षं कृ.

EXONERATED, *p. p.* भारमुक्तः -क्ता -क्तं, दोषमुक्तः -क्ता -क्तं, विशोधितः -ता -तं.

EXORABLE, *a.* वरदः -दा -दं, सुप्रसादितः -ता -तं, सान्त्वनीयः -या -यं.

EXORBITANCE, EXORBITANCY, *s.* अपरिमितत्वं, अमर्य्यादा, मर्य्यादातिक्रमः, निर्मेाध्यस्थ्यं, असाध्यस्थ्यं, अमितत्वं, आधिक्यं, अतिरेकः, अधिकता, उद्रेकः, वैषम्यं, उत्क्रमः.

EXORBITANT, *a.* अपरिमितः -ता -तं, अमितः -ता -तं, अतिमर्य्यादः -दा -दं, अमर्य्यादः -दा -दं, अतिमात्रः -त्रा -त्रं, अतिरिक्तः -क्ता -क्तं, उद्रिक्तः -क्ता -क्तं, असाध्यस्थः -स्था -स्थं, निर्मेाध्यस्थः -स्था -स्थं, उत्क्रान्तमर्य्यादः -दा -दं, अधिकः -का -कं, विषमः -मा -मं.

EXORBITANTLY, *adv.* अपरिमितं, अतिमर्य्यादं, अतिमात्रं, विषमं.

To EXORCISE, *v. a.* भूतोपहतजनात् शपनमन्त्रादिना भूतम् अपसृ in caus. (-सारयति -यितुं), अनुकजनं त्यक्त्वा दूरम् अपैहि इति शपथपूर्व्वं भूतं वद् (c. 1. वदति -दितुं).

EXORCISM, *s.* भूतोपहतजनात् शपनमन्त्रादिना भूतापसारणं.

EXORCIST, *s.* शपनमन्त्रादिना भूतापसारी *m.* (न्) or भूतापसारकः.

EXORDIUM, *s.* वाङ्मुखं, वाक्यारम्भः, आभाषः, परिभाषा, प्रकरणं, प्रस्तावः -वना, उपोद्घातः, प्रारम्भः, वन्दना.

EXOSSATED, EXOSSEOUS, *a.* निरस्थीकृतः -ता -तं, अस्थिरहितः -ता -तं.

EXOTERIC, *a.* बाह्यः -ह्या -ह्यं, साधारणः -णा -णी -णं, सुव्यक्तः -क्ता -क्तं.

EXOTIC, *a.* विदेशीयः -या -यं, विदेशी -शिनी -शि (न्), वैदेशिकः -की -कं, विदेशजः -जा -जं, परदेशी -शिनी -शि (न्), पारदेशिकः -की -कं, अन्यदेशीयः -या -यं, अन्यदेशोद्भवः -वा -वं, बहिर्भवः -वा -वं.

EXOTIC, *s.* (Plant) विदेशीयवृक्षः, अन्यदेशीयवृक्षः.

To EXPAND, *v. a.* विस्तृ in caus. (-स्तारयति -यितुं), वितन् (c. 8. -तनोति -नितुं), आतन्, प्रतन्, वितनीकृ; विसृ in caus. (-सारयति -यितुं), प्रसृ, विकाश् in caus. (-काशयति -यितुं), प्रकाश्, प्रथ् (c. 10. प्रथयति -यितुं), विवृ (c. 5. -वृणोति -वरितुं -रीतुं, or caus. -वारयति -यितुं), विकस् in caus. (-कासयति -यितुं), वृध् in caus. (वर्धयति -यितुं), प्रवृध्, प्रपच् (c. 10. -पञ्चयति -यितुं), व्यादा (c. 3. -ददाति -दातुं), कठोर (nom. कठोरयति -यितुं); 'expand itself,' व्याप् (c. 5. -आप्नोति -आप्तुं).

To EXPAND, *v. n.* विस्तृ in pass. (-स्तीर्य्यते), वितन् in pass. (-तन्यते), वितनीभू, विजृम्भ् (c. 1. -जृम्भते -म्भितुं), विवृ in caus. pass. (-वार्य्यते), प्रवृध् (c. 1. -वर्धते -र्द्धितुं), प्रसृप् (c. 1. -सर्पति -सर्प्तुं).—(As flowers) विकस् (c. 1. -कसति -सितुं), प्रविकस्, स्फुट् (c. 6. स्फुटति -टितुं), फुल्ल् (c. 1. फुल्लति -ल्लितुं).

EXPANDED, *p. p.* वितनः -ना -नं, प्रवितनः -ना -नं, ततः -ता -तं, सन्ततः -ता -तं, विस्तारितः -ता -तं, विस्तीर्णः -र्णा -र्णं, विस्तृतः -ता -तं, विवृतः -ता -तं, विसारितः -ता -तं, प्रसारितः -ता -तं, विसृतः -ता -तं, प्रसृतः -ता -तं, व्याप्तः -प्ता -प्तं, प्रथितः -ता -तं, प्रवृद्धः -द्धा -द्धं, व्याप्तः -प्ता -प्तं, वितनीकृतः -ता -तं, विजृम्भितः -ता -तं, उज्जृम्भितः -ता -तं, प्रपञ्चितः -ता -तं.—(As a flower) विकसितः -ता -तं, फुल्लः -ल्ला -ल्लं, उत्फुल्लः -ल्ला -ल्लं, स्फुटितः -ता -तं.

EXPANDING, *a.* or *part.* विकाशी -शिनी -शि (न्) or विकासी, विकस्वरः -रा -रं -स्वरः -रा -रं, विकसन् -सन्ती -सत् (त्), प्रसारी -रिणी -रि (न्).

EXPANSE, *s.* (A spreading, extent) प्रपञ्चः, विकाशः, विस्तारः, प्रसरः, वितानकं, सन्ततिः *f.*, तानं, प्रतानः, पाटः; 'expanse of heaven,' व्योम *n.* (न्), व्योमविस्तृतं, शून्यं; 'of water,' वारिप्लवरः.

EXPANSIBILITY, *a.* विस्तारणीयता, विकाशनीयता, विस्तारक्षमता, व्यापकत्वं.

EXPANSIBLE, *a.* विस्तारयितुं or वितनितुं शक्यः -क्या -क्यं, विस्तारणीयः -या -यं, विस्तारक्षमः -मा -मं, वितनीकरणीयः -या -यं.

EXPANSION, *s.* विस्तारः, विस्तृतिः *f.*, विस्तरः, विततिः *f.*, प्रततिः *f.*, सन्ततिः *f.*, तन्तिः *f.*, विकाशः -शनं, प्रकाशः -शनं, प्रसारः -रणं, प्रसरः, परिसरः, विवृतिः *f.*, विवारः, विसरणं, व्यादानं, विसर्पणं, प्रसर्पणं, प्रपञ्चः, व्याप्तिः *f.*, व्यापनं, व्यापकत्वं, विजृम्भणं, विहृतिः *f.*, व्यासः, परिक्षेपः, अतिरिक्तता.

EXPANSIVE, *a.* व्यापकः -का -कं, व्याप्तिमान् -मती -मत् (त्), विस्तारकः -का -कं, प्रसारी -रिणी -रि (न्), विसर्पी -र्पिणी -र्पि (न्), सान्ततिकः -की -कं.

To EXPATIATE, *v. n.* सुविस्तरं or प्रपञ्चेन वद् (c. 1. वदति -दितुं) or व्याख्या (c. 2. -ख्याति -तुं), वाग्विस्तारं कृ, असुप्तिं कृ.—(Rove at large) विहृ (c. 1. -हरति -हर्त्तुं), परिभ्रम् (c. 1. -भ्रमति, c. 4. -भ्राम्यति -भ्रमितुं).

To EXPATRIATE, *v. a.* प्रवस् in caus. (-वासयति -यितुं), विवस्, स्वदेशाद् वहिष्कृ or दूरीकृ or निराकृ or निःसृ in caus. (-सारयति -यितुं), देशान्तरीकृ.

EXPATRIATED, *p. p.* प्रवासितः-ता-तं, विवासितः-ता-तं, स्वदेशवहिष्कृतः-ता-तं.

EXPATRIATION, *s.* प्रवासः -सनं, विवासनं, प्रव्राजनं, स्वदेशवहिष्करणं.

To EXPECT, *v. a.* प्रतीक्ष् (c. 1. -ईक्षते -क्षितुं), अपेक्ष्, व्यपेक्ष्, सम्प्रतीक्ष्, उदीक्ष्, निरीक्ष्, प्रतिपाल् (c. 10. -पालयति -यितुं), आकांक्ष् (c. 1. -कांक्षति -क्षितुं), प्रत्याकांक्ष्, उद्भूक्ष् (c. 1. -पश्यति -द्रष्टुं).

To EXPECT, *v. n.* प्रतीक्षां कृ, प्रत्याशां कृ, प्रतीक्षी -क्षिणी -क्षि भू.

EXPECTABLE, *a.* अपेक्ष्यः-क्ष्या-क्ष्यं, अपेक्षणीयः-या-यं, प्रतीक्ष्यः-क्ष्या-क्ष्यं.

EXPECTANT, *a.* प्रतीक्षी -क्षिणी -क्षि (न्), प्रतीक्षकः -का -कं, अपेक्षी -क्षिणी -क्षि (न्), अपेक्षकः -का -कं, व्यपेक्षः -क्षा -क्षं, प्रत्याशी -शिनी -शि (न्), आकांक्षी -क्षिणी -क्षि (न्), सम्प्रत्याशः -शा -शं, अर्थी -र्थिनी -र्थि (न्).

EXPECTATION, *s.* अपेक्षा, प्रतीक्षा -क्षणं, व्यपेक्षा, उदीक्षणं, सम्प्रतीक्षा, निरीक्षा, प्रत्याशा, आशा, व्यपाश्रयः, अभिनन्दा; 'in expectation,' अपेक्षया.

EXPECTED, *p. p.* अपेक्षितः -ता -तं, प्रतीक्षितः -ता -तं, आकांक्षितः -ता -तं, चिरकलितः -ता -तं; 'to be expected,' अपेक्षणीयः -या -यं, आकांक्षणीयः -या -यं.

To EXPECTORATE, *v. a.* श्लेष्माणं or श्लेष्मकं निरस् (c. 4. -अस्यति -असितुं) or उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or उद्गृ (c. 6. -गिरति -गरितुं -रीतुं) or मुखाद् निःसृ in caus. (-सारयति -यितुं), श्लेष्मनिरसनं कृ, निष्ठीव् (c. 1. -ष्ठीवति -ष्ठेवितुं), उत्कास् (c. 1. -कासते -सितुं).

EXPECTORATED, *p. p.* निष्ठ्यूतः -ता -तं, मुखनिरस्तः -स्ता -स्तं, मुखनिःसारितः -ता -तं.

EXPECTORATION, *s.* श्लेष्मनिरसनं, निष्ठ्यूतिः *f.*, निष्ठेवनं, उत्कासनं, श्लेष्मोल्लेपः.

EXPECTORATIVE *a.* श्लेष्मवर्धकः-का-कं, कफवर्धकः-का-कं, कफकरः-री-रं.

EXPEDIENCE, EXPEDIENCY. *s.* युक्तता, युक्तिः *f.*, योग्यता, उपयुक्तत्वं, उपयोगिता, उपयोगः, औचित्यं, उपपत्तिः *f.*, याथातथ्यं, याथार्थ्यं, सफलता, सोपकारत्वं, सार्थत्वं.

EXPEDIENT, *a.* उपयोगी -गिनी -गि (न्), उपयुक्तः -क्ता -क्तं, सोपकारः -रा -रं, अर्थयुक्तः -क्ता -क्तं, अर्थकरः -री -रं, सार्थकः -का -कं, हितः -ता -तं, योग्यः -ग्या -ग्यं, उपकारकः -का -कं, सफलः -ला -लं.

EXPEDIENT, *s.* (Means) उपायः, अभ्युपायः, गतिः *f.*, साधनं, कर्म्मसाधनं, गुणः, अङ्गं, विधानं, उपकरणं, सम्भवः, योगः, उपपत्तिः *f.*, उपक्रमः. The six expedients of defence are सन्धिः, विग्रहः, यानं, आसनं, द्वैधं, आश्रयः. The four expedients for reducing an enemy are भेदः, दण्डः, साम, दानं.

EXPEDIENTLY, *adv.* युक्तं, यथायोग्यं, यथोचितं, सोपकारं, सफलं, स्थाने.

To EXPEDITE, *v. a.* त्वर् in caus. (त्वरयति -यितुं), सन्त्वर्, त्वरितं or सत्वरं कृ or विधा (c. 3. -दधाति -धातुं), or सम्पद् in caus. (-पादयति -यितुं) or साध् (c. 10. साधयति -यितुं) or प्रवृत् in caus. -वर्त्तयति -यितुं), क्षेप (nom. क्षेपयति -यितुं), शीघ्र (nom. शीघ्रयति -यितुं). —(Despatch) सत्वरं प्रस्था in caus. (-स्थापयति -यितुं).

EXPEDITED, *p. p.* त्वरितं कृतः-ता-तं or सम्पादितः-ता-तं, वेगितः-ता-तं.

EXPEDITION, *s.* (Haste, speed) त्वरा, तूर्णिः *f.*, सत्वरता, त्वरणं, शीघ्रता, शैघ्र्यं, क्षिप्रता, द्रुतत्वं, वेगः -गिता, आवेगः, जवः, प्रजवः, लघुता, लाघवं, अविलम्बः, उद्योगः, क्षिप्रकारित्वं, शीघ्रनिर्वाहः, त्वरितगतिः *f.*, शीघ्रगमनं, आशुगमनं.—(March of an army, &c.) प्रस्थानं, प्रयाणं, यानं, गमनं, गतिः *f.*, यात्रा, अभिषेणनं, अभिनियाणं.—

(Enterprise) प्रवृत्तिः *f.*, उपक्रमः.

EXPEDITIOUS, *a.* त्वरितः -ता -तं, सत्वरः -रा -रं, त्वरावान् -वती -वत् (न्), त्वरान्वितः -ता -तं, शीघ्रः -घ्रा -घ्रं, क्षिप्रः -प्रा -प्रं, शीघ्रकारी -रिणी -रि (न्), क्षिप्रकारी &c., अविलम्बः -म्बा -म्बं -म्बी -म्बिनी -म्बि (न्), अविलम्बितः -ता -तं, अप्रलम्बः -म्बा -म्बं, द्रुतः -ता -तं, लघुः -घ्वी -घु, वेगी -गिनी -गि (न्), वेगवान् -वती -वत् (त्), जवी -विनी -वि (न्), तूर्णः -र्णा -र्णं, धावकः -का -कं, अदीर्घसूत्रः -त्रा -त्रं, शीघ्रगामी -मिनी -मि (न्), त्वरितगतिः -तिः -ति; 'being expeditious,' शीघ्रायमाणः -णा -णं, त्वरमाणः -णा -णं.

EXPEDITIOUSLY, *adv.* त्वरितं, सत्वरं, क्षिप्रं, शीघ्रं, अविलम्बितं, आशु, वेगतस्.

To EXPEL, *v. a.* (Banish) विवस् in caus. (-वासयति -यितुं), प्रवस्, निर्वस्, विप्रवस्; प्रव्रज् in caus. (-व्राजयति -यितुं), स्वदेशाद् वहिष्कृ or निराकृ or दूरीकृ.—(Drive away, eject, dismiss) निरस् (c. 4. -अस्यति -असितुं), अपास्, उदस्, निःसृ in caus. (-सारयति -यितुं), उत्सृ, अपसृ, निःसरणं कृ, अपानुद् (c. 6. -नुदति -नोत्तुं), निष्कस् in caus. (-कासयति -यितुं), निराकृ, वहिष्कृ, वहिःकृ, दूरीकृ, निष्क्रम् in caus. (क्रामयति -यितुं), उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), प्रतिक्षिप्, निधू (c. 5. -धूनोति -धवितुं), भंश् in caus. (भंशयति -यितुं) च्यु in caus. (च्यावयति -यितुं).

EXPELLED, *p. p.* निर्वासितः -ता -तं, विवासितः -ता -तं, प्रवासितः -ता -तं, स्वदेशवहिष्कृतः -ता -तं, निरस्तः -स्ता -स्तं, अपास्तः -स्ता -स्तं, निःसारितः -ता -तं, निष्क्रामितः -ता -तं, वहिष्कृतः -ता -तं, वहिःकृतः -ता -तं, निःकासितः -ता -तं, उदस्तः -स्ता -स्तं, अवकृष्टः -ष्टा -ष्टं, निधूतः -ता -तं, अवधूतः -ता -तं, च्यावितः -ता -तं; 'from society,' अपपात्रितः -ता -तं, अवपात्रितः -ता -तं, अपांक्तः -क्ता -क्तं.

EXPELLER, *s.* निर्वासनकारी *m.* (न्), अपसारकः, अपनोदकः, नुदः in comp.

To EXPEND, *v. a.* (Disburse) व्यय् (c. 1. व्ययति, c. 10. व्याययति -यितुं, rt. इ), व्ययीकृ, त्यज् (c. 1. त्यजति, त्यक्तुं), विसृज् (c. 6. -सृजति -स्रष्टुं), विनियुज् (c. 7. -युंक्ते -योक्तुं), अपचि (c. 5. -चिनोति -चेतुं).—(Lay out, consume) उपयुज् (c. 7. -युनक्ति -युंक्ते), प्रयुज्.—(Waste) विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), क्षि (c. 1. क्षयति, c. 5. क्षिणोति or caus. क्षपयति -यितुं), उपक्षि, क्षयं कृ.

EXPENDED, *p. p.* व्ययितः -ता -तं, व्ययीकृतः -ता -तं, व्ययीभूतः -ता -तं, अपचितः -ता -तं, विसर्ज्जितः -ता -तं, क्षपितः -ता -तं, विनियुक्तः -क्ता -क्तं, प्रयुक्तः -क्ता -क्तं.

EXPENDITURE, EXPENSE, *s.* व्ययः, धनव्ययः, अपव्ययः, व्ययीकरणं, अपचयः, अपचितिः *f.*, विसर्गः, उत्सर्गः -र्ज्जनं, त्यागः, परित्यागः, अर्थत्यागः, अर्थत्यागः, क्षयः, उपक्षयः, संक्षयः, अवक्षयः, मोक्षणं, क्षेपः, विनियोगः, अपहारः, न्ययः; 'income and expenditure,' आयव्ययौ.

EXPENSELESS, *a.* निर्मूल्यः -ल्या -ल्यं, निर्व्ययः -या -यं, अल्पमूल्यः -ल्या -ल्यं.

EXPENSIVE, *a.* (Costly) बहुमूल्यः -ल्या -ल्यं, बहुव्ययः -या -यं, बहुधनव्ययेन or बहुमूल्येन क्रेयः -या -यं or साध्यः -ध्या -ध्यं, महार्घः -र्घा -र्घं, दुर्मूल्यः -ल्या -ल्यं, महार्हः -र्हा -र्हं, महाधनः -ना -नं, अर्घ्यः -र्घ्या -र्घ्यं.—(Extravagant) व्ययी -यिनी -यि (न्), अतिव्ययी &c., अपरिमितव्ययी &c., व्ययशीलः -ला -लं, अर्थनाशी -शिनी -शि (न्), अपव्ययी -यिनी -यि (न्).

EXPENSIVELY, *adv.* बहुधनव्ययेन, बहुमूल्येन, बहुव्ययपूर्व्वं.

EXPENSIVENESS, *s.* बहुमूल्यता, दुर्मूल्यता, महार्घता, माहार्घ्यं.—(Extravagance) अतिव्ययः, महाव्ययः, बहुव्ययः, अर्थदूषणं.

EXPERIENCE, *s.* (Trial) परीक्षा -क्षणं, अनुभवः.—(Use, practice) अभ्यासः, पूर्व्वाभ्यासः, अभ्यसनं, उपभोगः, भोगः, भुक्तिः *f.*, आचारः.—

(Knowledge derived from trials) अनुभूतिः *f.*, अनुभवः, वेदनं, संवेदः, वेदित्वं, बोधः, प्रतीतिः *f.*, दर्शनं, ज्ञहा, परिपाकः, पाकः, परिपक्वता; 'by experience,' अनुभवेन, अनुभवात्, काय्यैतस्; 'one's own experience,' स्वानुभवः; 'universal experience,' सर्व्वानुभूतिः *f.*

To EXPERIENCE, *v. a.* (Suffer, feel) अनुभू (c. 1. -भवति -वितुं), भुज् (c. 7. भुङ्क्ते, भोक्तुं), उपभुज्, अश् (c. 5. अश्नुते, अशितुं), उपाश्, समश्, उपागम् (c. 1. -गच्छति -गन्तुं), उपगम्, प्राप् (c. 5. -आप्नोति -आप्तुं), विद् (c. 10. वेदयते -यितुं), आसद् (c. 10. -सादयति -यितुं), दृश् (c. 1. पश्यति, द्रष्टुं).—(Make trial of) परीक्ष् (c. 1. -ईक्षते -क्षितुं), ; 'one who has not experienced a battle,' अनासादितविग्रहः.

EXPERIENCED, *p. p.* (Suffered) अनुभूतः -ता -तं, उपागतः -ता -तं, उपगतः -ता -तं, उपभुक्तः -क्ता -क्तं, अनुभूयमानः -ना -नं.—(Skilful by reason of much observation) बहुदृष्टः -ष्टा -ष्टं, बहुदृश्वा -श्वा -श्व (न्), बहुदर्शी -र्शिनी -र्शि (न्), परिपक्वबुद्धिः -द्धिः -द्धि, अविपक्वबुद्धिः &c., पक्वः -क्वा -क्वं, कोविदः -दा -दं, व्युत्पन्नः -न्ना -न्नं, अनुभवी- विनी -वि (न्), अहिवानः -ना -नं.

EXPERIMENT, *s.* परीक्षा -क्षणं, परीक्षितं, कष्टिः *f.*, अनुभूतिः *f.*, अनुभवः.

To EXPERIMENT, *v. a.* परीक्ष् (c. 1. -ईक्षते -क्षितुं), जिज्ञा in des. (जिज्ञासते -सितुं), अनुभू.

EXPERIMENTAL, *a.* परीक्षकः -क्का -क्कं, अनुभवी -विनी -वि (न्).—(Derived from experience) परीक्षालब्धः -ब्धा -ब्धं, परीक्षामूलः -ला -लं, अनुभूतिमूलः -ला -लं.

EXPERIMENTALLY, *adv.* अनुभवेन-वात्, स्वानुभवेन, परीक्षापूर्व्वं, काय्यैतस्.

EXPERIMENTER, EXPERIMENTALIST, *s.* परीक्षकः, परीक्षणकारी *m.* (न्), अनुभावी *m.* (न्).

EXPERT, *a.* कुशलः -ला -लं, निपुणः -णा -णं, दक्षः -क्षा -क्षं, विज्ञः -ज्ञा -ज्ञं, अभिज्ञः -ज्ञा -ज्ञं, प्रवीणः -णा -णं, चतुरः -रा -रं, पक्वः -क्वा -क्वं, परिपक्वः -क्वा -क्वं, सुप्रयोगवान् -वती -वत् (त्), पटुः -टुः -टुः -टु, विचक्षणः -णा -णं, कृती -तिनी -ति (न्), पेशलः -ला -लं, युक्तिमान् -मती मत् (त्), विशारदः -दा -दं, विदग्धः -ग्धा -ग्धं, चक्षुरः -रा -रं; 'expert in arms,' शस्त्रकुशलः -ला -लं, शस्त्रविद् *m. f. n.*, शस्त्रज्ञः -ज्ञा -ज्ञं.

EXPERTLY, *adv.* निपुणं, चतुरं, सुप्रयोगेण, युक्त्या, सपाटवं, विज्ञवत्.

EXPERTNESS, *s.* दक्षता, दाक्ष्यं, चातुर्य्यं, चतुरता, नैपुण्यं, निपुणता, पटुत्वं, पाटवं, कौशल्यं, प्रवीणता, प्रावीण्यं, युक्तिः *f.*, सुप्रयोगः -गता, विज्ञता, अभिज्ञता, वैचक्षण्यं, योग्यता, विदग्धता, वैदग्ध्यं; 'of hand,' हस्तकौशल्यं, हस्तलाघवं, करदक्षता; 'of hands, feet, &c.,' हस्तपादादिक्षिप्रता.

EXPIABLE, *a.* शोधनीयः -या -यं, शोध्यः -ध्या -ध्यं, निष्करणीयः -या -यं, मोचनीयः -या -यं, मार्জ্জनीयः -या -यं, क्षमणीयः -या -यं, सह्यः -ह्या -ह्यं, प्रायश्चेत्यः -त्या -त्यं.

To EXPIATE, *v. a.* पापप्रायश्चित्तं कृ, पापनिष्कृतिं कृ, पापं निष्कृ or अपनुद् (c. 6. -नुदति -नोत्तुं) or शम् (c. 10. शमयति -यितुं) or हृ (c. 1. हरति, हर्त्तुं) or मृज् (c. 2. मार्ष्टि -ष्टुं), प्रायश्चित्तेन पापात् शुध् (c. 10. शोधयति -यितुं) or परिशुध् or विशुध् or मुच् (c. 6. मुञ्चति, मोक्तुं) or पू (c. 9. पुनाति, पवितुं) or पवित्रीकृ, पापक्षमां साध् (c. 10. साधयति -यितुं); 'it is expiated,' प्रायश्चित्तीयते.

EXPIATED, *p. p.* निष्कृतः -ता -तं, शोधितः -ता -तं, मृष्टः -ष्टा -ष्टं, निर्शोधितः -क्ता -क्तं, परि[illegible]कृतः -ता -तं, पावितः -ता -तं, परिपूतः -ता -तं, शान्तः -न्ता -न्तं.

EXPIATION, प्रायश्चित्तं, निष्कृतिः *f.*, शुद्धिः *f.*, शोधनं, मुक्तिः *f.*, मोचनं, शान्तिः *f.*, उपशान्तिः *f.*, प्रतीकारः, पावनं, अपनुत्तिः *f.*, अघनोदनं, पापशोधनं, पापविशुद्धिः *f.*, पापशान्तिः *f.*, पापनिर्हरणं, अघनाशनं, पापापनुत्तिः *f.*, पापप्रक्षालनं, पापनिर्णेजनं, पापमार्জ্জना, निमित्तधर्म्मः.

EXPIATORY, *a.* शोधकः -का -कं, पावकः -का -कं, पापघ्नः -घ्नी -घ्नं, अघमर्षणः -णी -णं, अघनाशकः -का -कं, अघनाशनः -ना -नं, शमकः -का -कं, शान्तिकः -की -कं.

EXPIRATION, *s.* (Breathing out) निश्वासः, निःश्वसनं, निःश्वासः, प्रश्वासः, प्राणोद्गारः, प्राणोत्क्षेपः, प्राणत्यागः.—(Exhalation) उद्गारः.—(Cessation, close) अवसानं, अन्तं, निवृत्तिः *f.*, विरतिः *f.*, उपरमः. समाप्तिः *f.*, शेषः, पर्य्यवसानं, अत्ययः, क्षयः.

To EXPIRE, *v. a.* (Breathe out) निःश्वस् (c. 2. -श्वसिति -तुं), निश्वस्, प्रश्वस्, प्राणं or श्वासम् उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or उद्गम् in caus. (-गमयति -यितुं) or निर्गम् or उदीर् (c. 10. -ईरयति -यितुं).—(Exhale) उद्गृ (c. 6. -गिरति -गरितुं -रीतुं), प्रवा (c. 2. -वाति -तुं), प्रमुच् (c. 6. -मुञ्चति -मोक्तुं).

To EXPIRE, *v. n.* (Breathe the last, die) प्राणत्यागं कृ, प्राणान् हा (c. 3. जहाति, हातुं) or त्यज् (c. 1. त्यजति, त्यक्तुं), श्वासत्यागं कृ, शेषप्राणं कृ, मृ (c. 6. म्रियते, मर्त्तुं), जीवनोत्सर्गं कृ, पञ्चत्वं गम् (c. 1. गच्छति, गन्तुं), नश् (c. 4. नश्यति, नशितुं).—(Close, end) निवृत् (c. 1. -वर्त्तते -र्त्तितुं), निवृत्, विरम् (c. 1. -रमति -रन्तुं), उपरम्, समाप् in pass. (-आप्यते), विगम्, अपया (c. 2. -याति -तुं), अवसद् (c. 1. -सीदति -सत्तुं).

EXPIRED, *p. p.* गतप्राणः -णा -णं, गतासुः -सुः -सु, उज्झितासुः -सुः -सु, परासुः -सुः -सु, प्राप्तपञ्चत्वः -त्वा -त्वं, प्रेतः -ता -तं, परेतः -ता -तं, संस्थितः -ता -तं.

EXPIRING, *part.* and *a.* कण्ठगतप्राणः -णा -णं, म्रियमाणः -णा -णं, मुमूर्षुः -र्षुः -र्षु, आसन्नमृत्युः -त्युः -त्यु.—(As a lamp) निर्वास्यन् -स्यन्ती -स्यत् (त्).

To EXPLAIN, *v. a.* व्याख्या (c. 2. -ख्याति -तुं), व्यक्तीकृ, स्पष्टीकृ, व्याकृ, विवृ (c. 5. -वृणोति -वरितुं -रीतुं), प्रकाश् (c. 10. -काशयति -यितुं), स्पश (nom. स्पशयति -यितुं), व्याह् (c. 1. -हरति -हर्त्तुं), समुद्दिश् (c. 6. -दिशति -देष्टुं), उद्दिश्, प्रबुध् (c. 10. -बोधयति -यितुं), सबुध्, विधू (c. 2. -धौति), प्रवच् (c. 2. -वक्ति -क्तुं), प्रवद् (c. 1. -वदति -दितुं), व्याचक्ष् (c. 2. -चष्टे), निरूप् (c. 10. -रूपयति -यितुं), परिशुध् (c. 10. -शोधयति -यितुं), वर्ण् (c. 10. वर्णयति -यितुं); कथ् (c. 10. कथयति -यितुं), प्रदृश् in caus. (-दर्शयति -यितुं), प्रकृ (c. 10. -कीर्त्तयति -यितुं), विवरणं कृ.

EXPLAINABLE, *a.* व्याख्येयः -या -यं, उद्देश्यः -श्या -श्यं, प्रवक्तव्यः -व्या -व्यं.

EXPLAINED, *p. p.* व्याख्यातः -ता -तं, व्याकृतः -ता -तं, स्पष्टीकृतः -ता -तं, विवृतः -ता -तं, प्रकाशितः -ता -तं, निरूपितः -ता -तं, द्योतितः -ता -तं, वर्णितः -ता -तं.

EXPLAINER, *s.* व्याख्याता *m.* (तृ), प्रवक्ता *m.* (क्तृ), प्रकाशकः, उद्देशकः.

EXPLANATION, *s.* व्याख्या -ख्यानं, विवृतिः *f.*, विवरणं, व्याकरणं, व्याकृतिः *f.*, स्पष्टीकरणं, प्रकाशनं, उद्देशः, समुद्देशः, निरूपणं, समाधानं.

EXPLANATORY, *a.* वाचकः -का -कं, उद्देशकः -का -कं, समुद्देशकः -की -कं, व्याख्याकारी -रिणी -रि (न्), विवरणकारी &c., अर्थैकथकः -का -कं, प्रकाशकः -का -कं.

EXPLETIVE, *s.* पादपूरणं, उपाक्षरं, वाक्यालङ्कारः, पादपूरकः शब्दः.

EXPLICABLE, *a.* *See* EXPLAINABLE.

To EXPLICATE, *v. a.* विवृ (c. 5. -वृणोति -वरितुं -रीतुं), व्याख्या (c. 2. -ख्याति -तुं), प्रकटीकृ.

EXPLICATION, *s.* विवृतिः *f.*, विवरणं, व्याख्या-ख्यानं, व्यक्तीकरणं, प्रकटीकरणं.

EXPLICATIVE, *a.* विवरणात्मकः -का -कं, प्रकाशकः -का -कं, वाचकः -का -कं.

EXPLICIT, *s.* व्यक्तः -क्ता -क्तं, सुव्यक्तः -क्ता -क्तं, स्पष्टः -ष्टा -ष्टं, सुस्पष्टः -ष्टा -ष्टं, सुप्रकाशः -शा -शं, स्पष्टार्थः -र्था -र्थं, भिन्नार्थः -र्था -र्थं, स्फुटः -टा -टं, अवक्रः -क्रा -क्रं.

EXPLICITLY, *adv.* व्यक्तं, सुव्यक्तं, स्पष्टं, सुस्पष्टं, सुप्रकाशं, स्पष्टार्थं, भिन्नार्थं, स्फुटं; 'explicitly shews,' स्पष्टयति.

EXPLICITNESS, *s.* व्यक्तत्वं -तं, सुव्यक्तता, स्पष्टता, सुस्पष्टता, सुप्रकाशता, स्पष्टार्थत्वं, भिन्नार्थत्वं, अवक्रता, वाचकता.

To EXPLODE, *v. n.* अमरग्निवातादिबलाद् महाशब्देन or महाशब्दपूर्वं विभिद् in pass. (-भिद्यते) or विदृ in pass. (-दीर्य्यते) or स्फुट् (c. 6. स्फुटति -टितुं) or विदल् (c. 1. -दलति -लितुं).

To EXPLODE, *v. a.* (Decry with noise, shew disapprobation) उच्चैःस्वरेण निन्द् (c. 1. निन्दति -न्दितुं), कर्कशशब्देन अप्रसादं or अस्वीकारं सूच् (c. 10. सूचयति -यितुं) or अवज्ञास्पदं कृ.

EXPLODED, *p. p.* (Burst) महाशब्देन विदीर्णः -र्णा -र्णं or विभिन्नः -न्ना -न्नं or स्फुटितः -ता -तं, निरस्तः -स्ता -स्तं.—(Brought into disrepute) अधुनातनव्यवहारविरुद्धः -द्धा -द्धं, नूतनाचारविरुद्धः -द्धा -द्धं, अवज्ञातः -ता -तं, परिभूतः -ता -तं.

EXPLOIT, *s.* कर्म्म *n.* (न्), महाकर्म्म *n.*, चेष्टितं, चेष्टा, विचेष्टितं, चरितं, प्रवृत्तिः *f.*, अद्भुतकर्म्म *n.*, आश्चर्य्यकर्म्म *n.*

EXPLORATION, *s.* अन्वेषणा -णं, पर्य्येषणं, अनुसन्धानं, जिज्ञासा, अनुसरणं, परीक्षा -क्षणं, निरूपणं, समीक्षणं, संवीक्षणं, मार्गः-र्गणं, अनुयोगः, शोधनं.

To EXPLORE, *v. a.* अन्विष् (c. 4. -इष्यति, c. 6. -इच्छति -इषितुं -ष्टुं), अनुसन्धा (c. 3. -दधाति -धातुं), निरूप् (c. 10. -रूपयति -यितुं), ज्ञा in des. (जिज्ञासते -सितुं), मार्ग् (c. 1. मार्गति, c. 10. मार्गयति -यितुं), मृग् (c. 10. मृगयते -ति -यितुं), परीक्ष् (c. 1. -ईक्षते -क्षितुं), निरीक्ष्, संवीक्ष्.

EXPLORED, *p. p.* अन्वेषितः -ता -तं, अन्विष्टः -ष्टा -ष्टं, निरूपितः -ता -तं.

EXPLORER, *s.* अन्वेष्टा *m.* (ष्टृ), अन्वेषी *m.* (न्), अनुसन्धाता *m.* (तृ), परीक्षकः.

EXPLOSION, *s.* महाशब्दपूर्वं विदारणं or स्फोटनं or स्फुटनं or अकस्माद् विभङ्गः, समहाशब्दो विदारः, आकस्मिकविदारशब्दः, आकस्मिकविभङ्गशब्दः, भ्माशब्दः.

EXPLOSIVE, *a.* आकस्मिकविदारणकारी -रिणी -रि (न्), महाशब्दपूर्वंविभङ्गकारी &c., भ्माशब्दकारी &c., विदारकः -का -कं, शीघ्रदाह्यः -ह्या -ह्यं.

To EXPORT, *v. a.* (Goods to a foreign country) वाणिज्यद्रव्याणि or वस्तूनि विदेशे or देशान्तरे or बहिर्देशे वह् (c. 1. वहति, वोढुं or caus. वाहयति -यितुं) or आवह् or उपवह् or निर्विवह् or नी in caus. (नाययति -यितुं) or सन्नी in caus. or आनी (c. 1. -नयति -नेतुं or caus. -नाययति -यितुं) or उपनी or प्रेर् (c. 10. -ईरयति -यितुं).

EXPORTABLE, *a.* देशान्तरे or बहिर्देशे वाह्यः -ह्या -ह्यं or उपवाह्यः &c.

EXPORTATION, *s.* देशान्तरे or बहिर्देशे वाहनं or उपवाहनं or अभिवाहं or नायनं or प्रेरणं.

EXPORTED, *p. p.* विदेशे or बहिर्देशे वाहितः -ता -तं or नायितः -ता -तं or सन्नायितः -ता -तं or प्रेरितः -ता -तं, देशान्तरीकृतः -ता -तं.

EXPORTS, *s. pl.* विदेशे or बहिर्देशे वाह्यानि वाणिज्यद्रव्याणि or वस्तूनि.

To EXPOSE, *v. a.* (Uncover) विवृ (c. 5. -वृणोति -वृणुते -वरितुं -रीतुं), अपवृ, अपावृ, उच्छद् (c. 10. -छादयति -यितुं).—(Make public) प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, प्रकाशीकृ, प्रकटीकृ, व्यक्तीकृ, प्रत्यक्षीकृ, प्रादुष्कृ, आविष्कृ.—(Expose to view) प्रत्यक्षीकृ, सद्वैदुग्गोचरं -रां -रं कृ.—(For sale) पण्यवीथिकायां प्रसृ in caus. (-सारयति -यितुं).—(Make liable) अधीनं -नां -नं कृ.—(To the air) वायुव्याप्यं -प्यां -प्यं कृ.—(To the sun) सूर्य्यव्याप्तं -प्तां -प्तं कृ. (To contempt, ridicule) अवमानास्पदं कृ, अवहासस्थानं कृ, हास्यं -स्यां -स्यं कृ.—(To danger) भयस्थानं कृ, शङ्कास्पदं कृ; 'to expose the failings of others,' परच्छिद्राणि विवृ or अपवृ.

EXPOSED, *p. p.* विवृतः -ता -तं, अपावृतः -ता -तं, अनावृतः -ता -तं, अनाच्छादितः -ता -तं, प्रकाशीकृतः -ता -तं, प्रकटीकृतः -ता -तं, प्रसारितः -ता -तं; 'caught out in a crime,' दृष्टदोषः -षा -षं; 'exposed to the weather,' अभ्रावकाशिकः -की -कं; 'exposed for sale,' क्रये प्रसारितः -ता -तं, क्रय्यः -य्या -य्यं, पण्यः -ण्या -ण्यं, पण्यवीथिकायां प्रसारितः -ता -तं.

EXPOSITION, *s.* विवृतिः *f.*, विवरणं, व्याख्या -ख्यानं, स्पष्टीकरणं, प्रकाशनं, व्याकृतिः *f.*, व्याकरणं, व्यक्तीकरणं, चूर्णिकं.

EXPOSITOR, *s.* व्याख्याता *m.* (तृ), प्रकाशकः, प्रवक्ता *m.* (क्तृ), अर्थपरिशोधकः, अर्थविज्ञापकः, चूर्णिकृत् *m.*

EXPOSITORY, *a.* वाचकः -का -कं, प्रकाशकः -का -कं, उद्देशकः -का -कं.

To EXPOSTULATE, *v. a.* आपत्तिं कृ, अन्यायेन or असम्यक् or अनुचितं करोषि or अन्याय्यकर्म्म त्वया कृतम् इत्यादिनिन्दावाक्यैर् अकृत्यकारिणं कञ्चिज्जनं निवृ in caus. (-वारयति -यितुं), मैवं कार्षीः or मैवं कृथाः or नैतत् त्वया करणीयम् इत्यादिवाक्यैर् अन्यायकारिणा सह विवर् (c. 10. -वारयति -यितुं) or अन्याय्यकर्म्मणः कञ्चिज्जनं निवृ in caus. (-वर्त्तयति -यितुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं).

EXPOSTULATION, *s.* आपत्तिः *f.*, अन्याय्यकर्म्म or असम्यक्कर्म्म or अयुक्तकर्म्म करोषि or कुकर्म्म त्वया कृतम् इत्यादिनिन्दार्थकं वाक्यं or इत्यादिवाक्यैर् अन्यायकारिणा सह विचारणं, निवर्त्तनार्थं वाक्यं, निषेधार्थकं प्रबोधवाक्यं, प्रतिवादः, प्रत्यादेशः.

EXPOSTULATORY, *a.* आपत्तिमयः-यी-यं, निन्दामयः-यी-यं, प्रत्यादेशकः-का-कं.

EXPOSURE, *s.* विवृतिः *f.*, विवरणं, प्रकाशनं, विकाशनं, व्यक्तीकरणं, प्रकटीकरणं, प्रत्यक्षीकरणं, दृग्गोचरीकरणं, प्रसारणं; 'to the air,' वायुव्यापकत्वं.

To EXPOUND, *v. a.* व्याख्या (c. 2. -ख्याति -तुं), व्याकृ, प्रवद् (c. 1. -वदति -दितुं), प्रवच् (c. 2. -वक्ति -क्तुं), स्पष्टीकृ, व्याहृ (c. 1. -हरति -हर्तुं), व्याचक्ष् (c. 2. -चष्टे), विवृ (c. 5. -वृणोति -वरितुं -रीतुं), प्रकाश् (c. 10. -काशयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), विवृ (c. 2. -वृणोति).

EXPOUNDED, *p. p.* व्याख्यातः -ता -तं, व्याकृतः -ता -तं, विवृतः -ता -तं, प्रकाशितः -ता -तं, निरूपितः -ता -तं, स्पष्टीकृतः -ता -तं, व्याहृतः -ता -तं.

EXPOUNDER, *s.* व्याख्याता *m.* (तृ), प्रवक्ता *m.* (क्तृ), वक्ता *m.*, वादी *m.* (न्), प्रकाशकः, वाचकः, अर्थशोधकः; 'of the law,' धर्म्मप्रवक्ता *m.*

To EXPRESS, *v. a.* (Press out) निष्पीड् (c. 10. -पीडयति -यितुं), निपीड्, निष्कृष् (c. 1. -कर्षति -क्रष्टुं), निर्हृ (c. 1. -हरति -हर्तुं), निर्दुह् (c. 2. -दोग्धि -ग्धुं).—(Utter, declare) वद् (c. 1. वदति -दितुं), कथ् (c. 10. कथयति -यितुं), उदाहृ (c. 1. -हरति -हर्तुं), व्याहृ, उच्चर् (c. 10. -चारयति -यितुं), ज्ञा in caus. (ज्ञापयति -यितुं), विज्ञा, आविद् in caus. (-वेदयति -यितुं), कृत् (c. 10. कीर्त्तयति -यितुं), प्रकाश् (c. 10. -काशयति -यितुं), सूच् (c. 10. सूचयति -यितुं), बुध् (c. 10. बोधयति -यितुं).—(Represent, exhibit) सूच्, दृश् in caus. (दर्शयति -यितुं); 'by gestures, &c.,' नट् (c. 10. नाटयति -यितुं), अभिनी (c. 10. -नयति -नेतुं), रूप् (c. 10. रूपयति -यितुं); 'they express love,' शृङ्गारभावं नाटयन्ति; 'he expresses delight,' हर्षं नाटयति; 'in painting, &c.,' प्रतिरूपं कृ, प्रतिमूर्त्तिं कृ, प्रतिमानं कृ.—(Indicate) सूच्, उद्दिश् (c. 6. -दिशति -देष्टुं), निर्दिश्, लक्ष् (c. 10. लक्षयति -यितुं).

EXPRESS, *a.* (Clear) व्यक्तः -क्ता -क्तं, सुव्यक्तः -क्ता -क्तं, स्पष्टः -ष्टा -ष्टं, स्पष्टार्थः -र्था -र्थं, अवक्रः -क्रा -क्रं, अवक्रार्थः -र्था -र्थं, भिन्नार्थः -र्था -र्थं, असन्दिग्धार्थः -र्था -र्थं; 'in express terms,' स्पष्टार्थतस्.

EXPRESS, *s.* (Courier) वेगी *m.* (न्), प्रजवी *m.* (न्), जवी *m.*, त्वरकी *m.* (न्), उद्वेगः, त्वरितः, जवनः, जवः, धावकः, अध्वगः, वार्त्ताहरः.

EXPRESSED, *p. p.* (In words) उक्तः -क्ता -क्तं, कथितः -ता -तं, आवेदितः -ता -तं, अभिहितः -ता -तं.—(Shewn, indicated) दर्शितः -ता -तं,

सूचितः -ता -तं.

EXPRESSIBLE, *a.* कथनीयः -या -यं, कथ्यः -थ्या -थ्यं, निर्वचनीयः -या -यं, आख्येयः -या -यं.—(To be pressed out) निष्कर्षणीयः -या -यं, निर्हरणीयः -या -यं.

EXPRESSION, *s.* (Declaration) वादः, कथनं, ज्ञापनं, विज्ञापनं, ख्यापनं, आवेदनं, अभिधानं, बोधनं, कीर्तनं, प्रवचनं.—(Utterance) उदाहरणं, व्याहरणं, उच्चारणं.—(Phrase, word) उक्तिः *f.*, वाक्यं, वचनं, उक्तं, वाक् *f.* (च्), शब्दः, अभिधेयं, वचः *n.* (स्), पदं; 'authorized expression,' आप्तोक्तिः.—(Style, manner) रीतिः *f.*, मार्गः, व्यापारः; 'style of expression,' वाग्व्यापारः.—(Feeling, tone) रसः.

EXPRESSIVE, *a.* वाचकः, -का -कं, सूचकः -का -कं, उद्बोधकः -का -कं, अभिधायिकः -का -कं, उद्देशकः -का -कं, अर्थैः -र्थी -र्थं or अर्थैकः -का -कं in comp.; as, 'expressive of tenderness,' करुणार्थैकः -का -कं.—(Full of meaning) पूर्णार्थैः -र्थी -र्थं, अर्थवान् -वती -वत् (त्), सार्थैः -र्थी -र्थं, गुर्वर्थैः -र्थी -र्थं, साकूतः -ता -तं.

EXPRESSIVELY, *adv.* पूर्णार्थतस्, व्यक्तार्थतस्, सार्थं, साकूतं, सगौरवं.

EXPRESSIVENESS, *s.* वाचकत्वं, पूर्णार्थत्वं, अर्थवत्त्वं, सार्थत्वं, गौरवं.

EXPRESSLY, *adv.* व्यक्तं, सुव्यक्तं, सुस्पष्टं, स्पष्टार्थतस्, व्यक्तार्थतस्, अवक्रं, असन्दिग्धार्थतस्.

To EXPROBATE, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), गर्ह् (c. 1. गर्हते -र्हितुं), विगर्ह्, कुत्स् (c. 10. कुत्सयति -यितुं), उपालभ् (c. 1. -लभते -लब्धुं), तिरस्कृ.

EXPROBATION, *s.* निन्दा, गर्हा, तिरस्कारः, दुर्वाक्यं, भर्त्सनवाक्यं, उपक्रोशः.

To EXPUGN, *v. a.* दुर्गं लङ्घ् (c. 10. लङ्घयति -यितुं), विजि (c. 1. -जयते -ति- जेतुं).

EXPUGNABLE, *a.* लङ्घनीयः -या -यं, आक्रमणीयः -या -यं, विजेतव्यः -व्या -व्यं.

EXPUGNATION, *s.* दुर्गलङ्घनं, दुर्गाक्रमणं, विजयः, जयः.

EXPULSION, *s.* अपसारणं, निःसारणं, निरसनं, निराकरणं, अपनोदः -दनं, निर्वासनं, विवासनं, प्रवासनं, प्रव्राजनं, बहिष्करणं, निष्कासनं, निःकासनं, प्रयापणं.—(The state) प्रवासः, विवासः.

EXPULSIVE, *a.* अपनोदनः -ना -नं, निरसनः -ना -नं, निराकरिष्णुः -ष्णुः -ष्णु.

EXPUNCTION, *s.* लोपः, विलोपः -पनं, उच्छेदः, अपमार्जना, व्यामर्षः, विनाशः.

To EXPUNGE, *v. a.* लुप् (c. 6. लुम्पति, लोप्तुं, c. 10. लोपयति -यितुं), विलुप्, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), व्यामृज् (c. 2. -मार्ष्टि -र्ष्टुं), अपमृज्, उन्मृज्, व्यामृश् (c. 6. -मृशति -ष्टुं), विनश् in caus. (-नाशयति -यितुं), उद्धृ (c. 1. -हरति -र्हर्तुं).

EXPUNGED, *p. p.* उच्छिन्नः -न्ना -न्नं, लुप्तः -प्ता -प्तं, व्यामृष्टः -ष्टा -ष्टं, उद्धृतः -ता -तं.

To EXPURGATE, *v. a.* शुध् (c. 10. शोधयति -यितुं), विशुध्, पू (c. 9. पुनाति -नीते, पवितुं), विपू, परिपू, निर्मलीकृ, मलं हृ (c. 1. हरति, हर्तुं), पवित्रीकृ, शुचीकृ, परिष्कृ.

EXPURGATED, *p. p.* विशोधितः -ता -तं, पावितः -ता -तं, पवित्रीकृतः -ता -तं.

EXPURGATION, *s.* शोधनं, विशोधनं, पावनं, पवित्रीकरणं, मलापकर्षणं, निर्मलीकरणं, परिष्करणं.

EXPURGATORY, *a.* शोधकः -का -कं, पावकः -का -कं, पावनः -ना -नं.

EXQUISITE, *a.* (Choice) उत्तमः -मा -मं, शिष्टः -ष्टा -ष्टं, विशिष्टः -ष्टा -ष्टं, उत्कृष्टः -ष्टा -ष्टं.—(Nice, accurate) सूक्ष्मः -क्ष्मा -क्ष्मं, समञ्जसः -सा -सं, शुद्धः -द्धा -द्धं.—(Highest) परमः -मा -मं, उत्तमः -मा -मं; 'exquisite delight,' परमानन्दः, परमहर्षः, रोमहर्षणं, पुलकः; 'causing exquisite pleasure,' परमानन्ददः -दा -दं, रुचिरमुद् *m. f. n.*—(Keen) तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं; 'exquisite pain,' तीव्रवेदना.

EXQUISITELY, *adv.* (Nicely) सूक्ष्मं, सूक्ष्मत्वेन, ससौक्ष्म्यं, अञ्जसा.—(In a high degree) परमं, उत्तमं; 'exquisitely delighted,' परमहृष्टः -ष्टा -ष्टं, पुलकितः -ता -तं, हर्षरोमाञ्चितः -ता -तं.

EXQUISITENESS, *s.* (Nicety) सूक्ष्मता, सौक्ष्म्यं, सामञ्जस्यं.—(Keenness) तीक्ष्णता, तैक्ष्ण्यं, तीव्रता.—(Choiceness) उत्तमता, उत्कृष्टता.

To EXSICCATE, *v. a.* शुष् in caus. (शोषयति -यितुं), उच्छुष्, विशुष्.

EXSICCATION, *s.* शोषः -षणं, उच्छोषणं, परिशोषः, विशोषणं, नीरसीकरणं.

EXSICCANT, EXSICCATIVE, *a.* शोषकः -का -कं, उच्छोषणः -णी -णं, विशोषणः -णी -णं.

EXSPUITION, *s.* निष्ठीवः -वनं, निष्ठेवनं, श्लेष्मनिरसनं, उद्गिरणं.

EXTANT, *a.* (Protruding) बहिःस्थः -स्था -स्थं, बहिर्भूतः -ता -तं.—(In existence) विद्यमानः -ना -नं, वर्तमानः -ना -नं, प्रकाशः -शा -शं.

EXTASY, EXTATIC. *See* ECSTACY, ECSTATIC.

EXTEMPORANEOUS, EXTEMPORARY, *a.* अचिन्तापूर्वः -र्वा -र्वं, अपूर्वचिन्तः -न्ता -न्तं, अचिन्तितः -ता -तं, अयत्नपूर्वः -र्वा -र्वं, अयत्नकृतः -ता -तं, अयत्नभूतः -ता -तं, आकस्मिकः -की -कं, अविचारितः -ता -तं, अकल्पितः -ता -तं, अध्यानपूर्वः -र्वा -र्वं, प्रस्तुतः -ता -तं, समयोपयुक्तः -क्ता -क्तं, प्रस्तावयोग्यः -ग्या -ग्यं.

EXTEMPORE, *adv.* पूर्वचिन्तां or पूर्वयत्नम् अकृत्वा, चिन्तां विना, पूर्वध्यानं विना, अचिन्तितं, अविचारितं, अनायासेन, द्रुतं.

To EXTEMPORIZE, *v. n.* पूर्वचिन्ताम् अकृत्वा वद् (c. 1. वदति -दितुं), अकस्मात् or पूर्वविचारं विना वद्.

To EXTEND, *v. a.* तन् (c. 8. तनोति -नितुं), वितन्, व्यातन्, प्रतन्, वितनीकृ, प्रसृ in caus. (-सारयति -यितुं), अतिसृ, विसृ; विस्तृ or विस्तृ (c. 5. -स्तृणोति, c. 9. -स्तृणाति -स्तरितुं -रीतुं, c. 10. -स्तारयति -यितुं), प्रथ् (c. 10. प्रथयति -यितुं), आयम् (c. 1. -यच्छति -यन्तुं), प्रपच् (c. 10. -पचयति -यितुं), प्रचर् in caus. (-चारयति -यितुं).—(Extend the hand, &c.) हस्तं प्रसृ in caus. or प्रग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).—(Enlarge) वृध् in caus. (वर्धयति -यितुं), संवृध्, विवृध्, विशालीकृ, विपुलीकृ, प्रचुरतरं -रां -रं कृ.—(Grant, impart) दा (c 3. ददाति, दातुं), प्रदा, अनुदा, प्रयम्.—(Prolong) द्राघ (nom. द्राघयति -यितुं), दीर्घीकृ, दीर्घतरं -रां -रं कृ.

To EXTEND, *v. n.* तन् in pass. (तन्यते), वितन्, विततीभू, प्रसृ (c. 1. -सरति -सर्तुं), प्रसृप् (c. 1. -सर्पति -सर्तुं), विसृप् आया (c. 2. -याति -तुं), आयम् (c. 1. -यच्छते -यन्तुं), प्रथ् (c. 1. प्रथते -थितुं), विप्रथ्, प्ररुह् (c. 1. -रोहति -रोढुं), विरुह्, विस्तृ in pass. (-स्तीर्यते), व्याप् (c. 5. -आप्नोति -आतुं), विप्रस्था (c. 1. -तिष्ठति -स्थातुं), प्रवृध् (c. 1. -वर्धते -धितुं), विजृम्भ् (c. 1. -जृम्भते -म्भितुं).

EXTENDED, *p. p.* वितनः -ना -नं, प्रवितनः -ना -नं, आततः -ता -तं, सन्ततः -ता -तं, आयतः -ता -तं, समायतः -ता -तं, आयामितः -ता -तं, व्यायतः -ता -तं, प्रथितः -था -थं, प्रसारितः -ता -तं, प्रसृतः -ता -तं, विसृतः -ता -तं, विस्तृतः -ता -तं, विस्तीर्णः -र्णा -र्णं, बहुविस्तीर्णः -र्णा -र्णं, आयति-मान् -मती -मत् (त्), विरूढः -ढा -ढं, प्ररूढः -ढा -ढं, प्रवृद्धः -द्धा -द्धं, परिगतः -ता -तं, विजृम्भितः -ता -तं.—(As the hand, &c.) प्रसारितः -ता -तं, उच्छ्रितः -ता -तं; 'having the fingers extended,' उत्थिताङ्गुलिः -लिः -लि.

EXTENDIBLE, EXTENSIBLE, *a.* विस्तारयितुं or वितनितुं शक्यः -क्या -क्यं, विस्तारणीयः -या -यं, प्रसारणीयः -या -यं, विस्तारणक्षमः -मा -मं, आयाम्यः -म्या -म्यं.

EXTENSIBILITY, *s.* विस्तारणीयता, वितनितक्षमता, आयाम्यता.

EXTENSION, *s.* विस्तारः, विस्तृतिः *f.*, विस्तीर्णता, विस्तरः, वितनिः *f.*, प्रतनिः *f.*, आयतिः *f.*, आयामः, वितानः -नं, तानः, सन्ततिः *f.*, प्रसारणं, प्रसरणं, प्रसरः, विसरणं, प्रसर्पणं, विसर्पणं, प्रपचः, व्याप्तिः *f.*, व्यापनं, वृद्धिः *f.*,

प्रवृद्धिः *f.*, प्रपञ्चः, व्यासः, विपुलता.

EXTENSIVE, *a.* विस्तीर्णः -र्णा -र्णं, विपुलः -ला -लं, विशालः -ला -लं, सुपर्य्याप्तः -प्ता -प्तं, बृहन् -हती -हत् (त्), पृथुः -थ्वी -थु, पृथुलः -ला -लं, प्रचुरः -रा -रं, विकटः -टा -टं, आयतः -ता -तं, आयतिमान् -मती -मत् (त्), असङ्कीर्णः -र्णा -र्णं, अत्यन्तः -न्ता -न्तं.

EXTENSIVELY, *adv.* सुविस्तीर्णं, सुविस्तरं, सुविस्तरेण, विस्तरशस्, अतिमात्रं, विपुलं, प्रचुरं, सामान्यतस्.

EXTENSIVENESS, *s.* विस्तीर्णता, विस्तारः, विस्तृतिः *f.*, विपुलता, विशालता, पृथुत्वं, बृहत्वं, परिसरः, आयतिः *f.*, व्याप्तिः *f.*, व्यापकत्वं.

EXTENT, *s.* (Bulk, width, length) विस्तारः, विशालता, विपुलता, बृहत्वं, आयतिः *f.*, आयामः, प्रपञ्चः, सन्ततिः *f.*, वितानकं, पाटः.—(Compass) परिमाणं, परिणाहः, परिसरः, परिधिः *m.*—(Degree, measure) मात्रं, परिमाणं, प्रमाणं, मानं.—(Limit) पर्य्यन्तं.—(Range) विषयः; 'to what extent?' कियत्पर्य्यन्तं, किम्पर्य्यन्तं, कियत्प्रमाणं; 'to such extent,' एतावत्; 'such an extent,' एतावत्त्वं; 'to a slight extent,' ईषत्, किञ्चित्, अल्पमात्रं, स्तोकं.

To EXTENUATE, *v. a.* (Lessen) न्यूनीकृ, न्यून् (c. 10. -ऊनयति -यितुं), लघ (nom. लघयति -यितुं), ऊन (nom. ऊनयति -यितुं), अल्पीकृ, क्षीणीकृ, ह्रस् (c. 10. ह्रासयति -यितुं).—(A crime) शम् (c. 10. शमयति -यितुं), उपशम्, पापापनुत्तिं कृ, पापप्रक्षालनं कृ.

EXTENUATED, *p. p.* उपशान्तः -न्ता -न्तं, शमितः -ता -तं, न्यूनीकृतः -ता -तं.

EXTENUATION, *s.* पापोपशान्तिः *f.*, पापशान्तिः *f.*, उपशमः, पापापनोदनं, पापापनुत्तिः *f.*, पापमार्जना, पापप्रक्षालनं, पापापेक्षा.

EXTERIOR, *a.* बाह्यः -ह्या -ह्यं, बाहीकः -का -कं, बहिःस्थः -स्था -स्थं, बहिर्भूतः -ता -तं, बहिर्भवः -वा -वं, बहिस् in comp.; as, 'an exterior object,' बहिरङ्गः.

EXTERIOR, *s.* बहिर्भागः, बाह्यभागः, बहिर्भावः, उपरिस्थभागः.

To EXTERMINATE, *v. a.* उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), समूलं or सामूलम् उद्धृ (c. 1. -हरति -हर्त्तुं) or समुद्धृ or उत्पद् (c. 10. -पाटयति -यितुं), उन्मूल् (c. 10. -मूलयति -यितुं), नश् in caus. (नाशयति -यितुं), विनश्.

EXTERMINATED, *p. p.* उच्छिन्नः -न्ना -न्नं, विनाशितः -ता -तं, उद्धृतः -ता -तं, उत्पाटितः -ता -तं, उन्मूलितः -ता -तं, सादितः -ता -तं.

EXTERMINATION, *s.* उच्छेदः, समुच्छेदः, उच्छित्तिः *f.*, सर्व्वनाशः, उद्धरणं, समूलोत्पाटनं, मूलादुद्धरणं, उन्मूलनं, समूलघातः, विनाशः, प्रलयः, लोपः, क्षोभनं.

EXTERMINATOR, *s.* उद्धर्त्ता *m.* (र्त्तृ), विनाशकः, उच्छेदी *m.* (न्).

EXTERMINATORY, *a.* उच्छेदी -दिनी -दि (न्), सर्व्वनाशकः -का -कं.

EXTERNAL, *a.* बाह्यः -ह्या -ह्यं, बाहीकः -का -कं, बहिःस्थः -स्था -स्थं, बहिर्वेशी -शिनी -शि (न्), बहिर्भूतः -ता -तं, बहिर्भवः -वा -वं, बहिस् in comp.; as, 'an external part,' बहिरङ्गः.

EXTERNALLY, *adv.* बाह्यतस्, बहिस्, बहिर्भागे, उपरिभागे; 'produced externally,' बहिर्भवः -वा -वं.

EXTINCT, *a.* (Extinguished) शान्तः -न्ता -न्तं, शमितः -ता -तं, निर्वाणः -णा -णं.—(Abolished, at an end) नष्टः -ष्टा -ष्टं, विनष्टः -ष्टा -ष्टं, निवृत्तः -त्ता -त्तं, निर्वृत्तः -त्ता -त्तं, विगतः -ता -तं, निर्गतः -ता -तं, अवसितः -ता -तं, अवसन्नः -न्ना -न्नं, क्षीणः -णा -णं, परिक्षीणः -णा -णं, उच्छिन्नः -न्ना -न्नं, लुप्तः -प्ता -प्तं; 'becomes extinct,' शाम्यति.

EXTINCTION, EXTINGUISHMENT, *s.* (Quenching) निर्वाणं, निर्वापणं, शान्तिः *f.*—(Abolition, destruction) नाशः, विनाशः, प्रणाशः, उच्छेदः, समुच्छेदः, उद्धरणं, लोपः, विलोपनं, क्षयः, संहारः; 'of race,' निर्वंशः.

To EXTINGUISH, *v. a.* (Quench) निर्वा in caus. (-वापयति -यितुं), शम् in caus. (शमयति -यितुं), उपशम्, प्रशम्.—(Destroy, put an end to) नश् in caus. (नाशयति -यितुं), विनश्, निवृत् in caus. (-वर्त्तयति -यितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), निर्दह् (c. 1. -दहति -दग्धुं), लुप् (c. 6. लुम्पति, लोप्तुं, c. 10. लोपयति -यितुं), सद् in caus. (सादयति -यितुं); 'to be extinguished,' शम् (c. 4. शाम्यति, शमितुं), निर्वा (c. 4. -वायति).

EXTINGUISHABLE, *a.* शाम्यः -म्या -म्यं, शमनीयः -या -यं, निर्वाप्यः -प्या -प्यं, निर्वापणीयः -या -यं, नाश्यः -श्या -श्यं, नाशनीयः -या -यं, विलोपनीयः -या -यं.

EXTINGUISHED, *p. p.* (Quenched) निर्वाणः -णा -णं, निर्वापितः -ता -तं, शान्तः -न्ता -न्तं, संशान्तः -न्ता -न्तं, शमितः -ता -तं, प्रशमितः -ता -तं, शान्ताग्निः -ग्निः -ग्नि, शान्तार्चिः -र्चिः -र्चि.—(Destroyed) नष्टः -ष्टा -ष्टं, विनष्टः -ष्टा -ष्टं.

EXTINGUISHER, *s.* निर्वापकः, निर्वाणकारी *m.* (न्).—(Of a candle) दीपनिर्वापकः.

To EXTIRPATE, *v. a.* उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, मूलात् or समूलम् उद्धृ (c. 1. -हरति -हर्त्तुं), समुद्धृ, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उत्पद् (c. 10. -पाटयति -यितुं), अपरुह् in caus. (-रोपयति -यितुं), उद्बृह् (c. 6. -बृहति -बर्हितुं), निष्कुष् (c. 9. -कुष्णाति -कोष्टुं).

EXTIRPATED, *p. p.* उन्मूलितः -ता -तं, उत्पाटितः -ता -तं, उच्छिन्नः -न्ना -न्नं, उद्धृतः -ता -तं, अपरोपितः -ता -तं, आवर्हितः -ता -तं, आबर्हितः -ता -तं, निष्कुषितः -ता -तं, निर्बीजः -जा -जं.

EXTIRPATION, *s.* उन्मूलनं, उत्पाटनं, उच्छेदः, उद्धरणं, समूलोत्पाटनं, समूलोद्धरणं, उच्छित्तिः *f.*, अपरोपणं, निष्कोषणं, नाशः, विनाशः.

EXTIRPATOR, *s.* उद्धर्त्ता *m.* (र्त्तृ), उन्मूलयिता *m.* (तृ), उच्छेदी *m.* (न्).

FAR-FETCHED, *a.* क्लिष्टः -ष्टा -ष्टं, यत्नकृतः -ता -तं; 'far-fetched idea,' क्लिष्टकल्पना.

FAR-SEEING, *a.* दूरदर्शी -र्शिनी -र्शि (न्), दीर्घदर्शी -र्शिनी -र्शि (न्).

FAR-SIGHTED, *a.* दूरदृष्टिः -ष्टिः -ष्टि, दीर्घदृष्टिः -ष्टिः -ष्टि, पारदृश्वा -श्वा -श्व (न्).

FARCE, *s.* प्रहसनं, विलासिका, दुर्म्मल्लिका, हास्योत्पादको नाटकः, परिहासजनकम् उपरूपकं.

FARCICAL, *a.* प्रहसनसम्बन्धी -न्धिनी -न्धि (न्).—(Droll) हासकरः -री -रं, हास्यः -स्या -स्यं, उपहास्यः -स्या -स्यं, रसिकः -का -कं, विनोदी -दिनी -दि (न्), हास्योत्पादकः -का -कं, असङ्गतः -ता -तं, अपरूपः -पा -पं.

FARCY, *s.* अश्वानां चर्म्मरोगविशेषः or दुश्चर्म्मत्वं or चर्म्मदूषिका.

FARDEL, *s.* कूर्चः, गुच्छः -च्छकः, पोटलिका, पोट्टली, भारः.

To FARE, *v. n.* (Be in any state) वृत् (c. 1. वर्त्तते -र्त्तितुं), अस् (c. 2. अस्ति), भू (c. 1. भवति -वितुं), स्था (c. 1. तिष्ठति, स्थातुं); 'to fare well,' सुस्थः -स्था -स्थं or सुस्थितः -ता -तं भू or अस्; 'to fare badly,' दुःस्थः -स्था -स्थं भू or अस्; 'faring well,' भविष्णुः -ष्णुः -ष्णु, भूष्णुः -ष्णुः -ष्णु, भविता -त्री -तृ (तृ).—(Feed) भोजनं कृ, भुज् (c. 7. भुंक्ते, भोक्तुं), आहारं कृ; 'to fare well,' स्वादूनानि or उत्तमानानि or परमान्नानि भुज्.

FARE, *s.* (Passage-money) आतारः, आतरः, तरपण्यं, तरमूल्यं, तारिकं, तार्य्यं, अनुतरं.—(Food) भोजनं, आहारः, अन्नं, भक्ष्यं; 'good fare,' उत्तमाहारः, परमान्नं, उत्तमान्नं; 'bad fare,' कदन्नं.

FAREWELL, *adv.* (To bid farewell) आमन्त्र् (c. 10. -मन्त्रयते -यितुं), अनुमन्त्र्, आप्रच्छ् (c. 6. -पृच्छते -ष्टि -प्रष्टुं).—(Bidding farewell) आमन्त्रणं, आप्रच्छनं, प्रस्थानकाले कुशलवादः or प्रणामः or नमस्कारः; 'farewell!' कुशलं भूयात्, सुखं भूयात्, कल्याणं भूयात्, स्वस्ति आस्तां.

FARINA, *s.* परागः, सुमनोरजः *n.* (स्), पुष्परेणुः *m.*, सुमनःपांशुः *m.*, पुरुः *m.*

FARINACEOUS, *a.* शस्यमयः -यी -यं, धान्यमयः -यी -यं, गोधूमचूर्णमयः -यी -यं.

FARM, *s.* क्षेत्रं, भूमिः *f.*, क्षेत्रभूमिः, भूः *f.*, कृषिक्षेत्रं, कर्षणभूमिः *f.*, सीतं.

To FARM, *v. a.* (Let out the collection of the revenue or any other work at a certain rate per cent.) शते शते निरूपितमूल्यं प्रतिज्ञाय or शते शते नियमितभागो मया दातव्य इति सन्धिं कृत्वा अमुकस्य शुल्ककरादिग्रहणे or किञ्चित्कर्म्मनिर्व्वहणे नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं).—(Undertake any work for another at a certain rate per cent.) शते शते नियमितभागो मद्देतनार्थम् उद्धरणीयं or शते शते निरूपितमूल्यं मया ग्रहणीयम् इति सन्धिं कृत्वा अमुकजनस्थाने किञ्चित् कर्म्म निर्व्वह् in caus. (-वाहयति -यितुं) or नियमितमूल्यम् अपेक्ष्य परस्थाने किञ्चित् कर्म्म व्यवसो (c. 4. -स्यति -सातुं) or अध्यवसो.—(Farm the tolls) निरूपितमूल्यं दत्त्वा राजस्थाने षड्दनदीतरादिदेयशुल्कान् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).—(Cultivate land) क्षेत्रं or भूमिं कृष् (c. 6. कृषति, c. 1. कर्षति, क्रष्टुं).

FARM-HOUSE, *s.* क्षेत्रिकगृहं, कर्षकगृहं, क्षेत्रिकवेश्म *n.* (न्), क्षेत्रपल्लिगृहं.

FARM-YARD, *s.* क्षेत्रिकगृहोपान्ते वाटो or वाटिका or चत्वरं.

FARMER, *s.* क्षेत्रकर्षकः, क्षेत्रिकः, क्षेत्री *m.* (न्), कर्षकः, कृषिकः, कृषकः, क्षेत्राजीवः, कृषिजीवी *m.* (न्), कृषीवलः, कार्षकः, क्षेत्रपतिः *m.*—(Of the revenue) शते शते नियमितभागो मद्देतनार्थम् उद्धरणीय इति सन्धिं कृत्वा शुल्ककरादि गृह्णाति यो जनः.

FARMING, *s.* कृषिकर्म्म *n.* (न्), कृषिः *f.*, कार्षिः *f.*, क्षेत्रिकव्यापारः, अनुतं.

FARRAGINOUS, *a.* सान्निपातिकः -की -कं, सन्निपतितः -ता -तं, प्रकीर्णः -र्णा -र्णं, बहुद्रव्यनिर्म्मितः -ता -तं, नानाद्रव्यघटितः -ता -तं.

FARRAGO, *s.* सन्निपातः, प्रकीर्णकं, नानाद्रव्यसम्मिश्रणं.

FARRIER, *s.* अश्वचिकित्सकः, अश्ववैद्यः.—(Shoer of horses) अश्वपादुकाबन्धा *m.* (न्धृ), अश्वपादुकाकारः.

FARRIERY, *s.* अश्वचिकित्सा, अश्वरोगचिकित्सनविद्या.

FARROW, *s.* शूकरशावकगणः, शूकरपोतकगणः, शूकराणां.

To FARROW, *v. n.* शूकरीप्रकारेण शावकगणं सु (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसु.

FART, *s.* पदः -दनं, गुदरवः, पायुशब्दः, शर्द्धः,

FARTHER, *adv.* दूरतरं, विदूरतरं, अधिकदूरे, अग्रे, अग्रतरं, अग्रतस्, पुरतस्, पुरस्.—(Moreover) अपरं, अपरञ्च, अधिकं, अधिकन्तु, अन्यच्च, अधिच, किञ्च, परन्तु. *See* the more correct word *further*.

FARTHER, *a.* दूरतरः -रा -रं, विदूरतरः -रा -रं, दवीयान् -यसी -यः (स्), अधिकदूरस्थः -स्था -स्थं, अपरः -रा -रं; 'the farther side,' पारः; 'on the farther side,' पारे.

FARTHEST, *a.* दूरतमः -मा -मं, विदूरतमः -मा -मं, दविष्ठः -ष्ठा -ष्ठं, सुदूर

-रा -रं, अत्यन्तदूरस्थः -स्था -स्थं.

FARTHING, *s.* ताम्रमुद्रा, कपर्द्दकः, वराटकः.

FASCES, *s.* धर्म्माध्यक्षलक्षणं, दण्डनायकचिह्नं, पूर्व्वकाले रोमनगरे दण्डलाक्षणिकः काष्ठखण्डसमूहः परशुः.

FASCIA, *s.* पट्टः, पट्टकः, बन्धनं, वेष्टनं, आवेष्टनं, कवलिका.

FASCIATION, *s.* पट्टबन्धनं, कवलिकाबन्धनं, अनुवेल्लितं.

To FASCINATE, *v. a.* (Bewitch) मुह् in caus. (मोहयति -यितुं), मोहं कृ, मायां कृ, मन्त्रद्वारेण वशीकृ or अभिमन्त्र् (c. 10. -मन्त्रयते -यितुं) or अनुमन्त्र् or अभिचर् (c. 10. -चारयति -यितुं).—(Captivate) चित्तं or मनो हृ (c. 1. हरति, हर्त्तुं) or रम् in caus. (रमयति -यितुं) or आकृष् (c. 1. -कर्षति -क्रष्टुं), हृदयं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).

FASCINATED, *p. p.* मोहितः -ता -तं, विमोहितः -ता -तं, सम्मोहितः -ता -तं, परिमूढः -ढा -ढं, सम्मुग्धः -ग्धा -ग्धं, आकृष्टचित्तः -त्ता -त्तं, हृतमानसः -सी -सं, वशीकृतः -ता -तं, वशीभूतः -ता -तं.

FASCINATING, *a.* चित्तहारी -रिणी -रि (न्), चित्तापहारी &c., मनोहरः -रा -रं, मोहनः -ना -नी -नं, विमोहनः &c., मोही -हिनी -हि (न्), परिमोही &c., आकर्षकः -की -कं, आकर्षिकः -की -कं, आकृष्टवान् -वती -वत् (त्), हृदयग्राही -हिणी -हि (न्); 'a fascinating woman,' मुग्धा, प्रमदा, मदिरेक्षणा.

FASCINATION, *s.* मोहः -हनं, परिमोहनं, विमोहनं, सम्मोहः, आकर्षः, माया, वशक्रिया, अभिमन्त्रणं, अभिचारः, इन्द्रजालं, कार्म्मणं -णत्वं.

FASCINE, *s.* युद्धे व्यवहारितः काष्ठभारः or काष्ठकूर्च्चः.

FASHION, *s.* (Form) आकारः, आकृतिः *f.*, रूपं, संस्कारः, मूर्त्तिः *f.*, विधानं, संस्थानं.—(Cut, shape) आकारः, आकृतिः *f.*, रीतिः *f.*—(Prevailing custom) लौकिकाचारः, लोकाचारः, लोकव्यवहारः, लोकरीतिः *f.*, लोकमार्गः, लोकव्यापारः, धारा, लोकमतं.—(Manner, mode) प्रकारः, विधः, विधिः *m.*, रीतिः *f.*, मार्गः; 'after this fashion,' अनेन प्रकारेण, एवंविधं; 'after one's own fashion,' स्वानुरूपं.

To FASHION, *v. a.* (Form) निर्मा (c. 2. -माति, c. 3. -मिमीते, c. 4. -मायते -मातुं), विनिर्मा, रच् (c. 10. रचयति -यितुं), विरच्, क्लृप् (c. 10. कल्पयति -यितुं), विधा (c. 3. -दधाति -धातुं), घट् (c. 10. घटयति -यितुं), कृ, सङ्कृ.—(Adapt) युज् (c. 10. योजयति -यितुं), सन्धा, समाधा.

FASHIONABLE, *a.* लौकिकः -की -कं, व्यावहारिकः -की -कं, आचारिकः -की -कं, लोकसिद्धः -द्धा -द्धं, लोकप्रसिद्धः -द्धा -द्धं, व्यवहारसिद्धः -द्धा -द्धं, लोकाचारानुसारी -रिणी -रि (न्), लोकव्यवहारानुसारी &c., लोकमतानुसारी &c., लौकिकाचारानुरूपः -पा -पं, लौकिकरीत्यनुरूपः -पा -पं, लोकमार्गानुयायी -यिनी -यि (न्).

FASHIONABLY, *adv.* लोकाचारानुसारेण, लोकव्यवहारानुसारात्, लोकरीतिवत्.

FASHIONED, *p. p.* निर्म्मितः -ता -तं, रचितः -ता -तं, विरचितः -ता -तं, कल्पितः -ता -तं, क्लृप्तः -प्ता -प्तं, घटितः -ता -तं, कारितः -ता -तं.

FAST, *a.* (Firm, close) दृढः -ढा -ढं, स्थिरः -रा -रं, स्थावरः -रा -रं, स्तब्धः -ब्धा -ब्धं, अचलः -ला -लं, निश्चलः -ला -लं, दृढसन्धिः -न्धिः -न्धि, गाढः -ढा -ढं.—(Fixed) बद्धः -द्धा -द्धं, सन्निबद्धः -द्धा -द्धं; 'a fast colour,' स्थिररङ्गः; 'a fast friend,' दृढसौहृदः, दृढभक्तिः *m*; 'a fast sleep,' सुषुप्तिः *f.*, सुनिद्रा, अतिशयनिद्रा, अघोरनिद्रा.—(Quick in motion) त्वरितगतिः -तिः -ति, शीघ्रगामी -मिनी -मि (न्), द्रुतगतिः -तिः -ति, शीघ्रः -घ्रा -घ्रं, महावेगः -गा -गं, वेगवान् -वती -वत् (त्)

FAST, *adv.* (Firmly) दृढं, गाढं, स्थिरं; 'fast-rooted,' बद्धमूलः -ला -लं; 'held fast,' सुगृहीतः -ता -तं, सुधृतः -ता -तं, कररुद्धः -द्धा -द्धं; 'fast bound,' दृढबद्धः -द्धा -द्धं; 'shut fast,' दृढसंवृतः -ता -तं, दृढपिहितः -ता -तं; 'fast asleep,' सुषुप्तः -प्ता -प्तं, सुनिद्रितः -ता -तं, अतिशयनिद्रितः -ता -तं, सुखसुप्तः -प्ता -प्तं or सुखं सुप्तः -प्ता -प्तं.—(Swiftly) शीघ्रं, त्वरितं, द्रुतं, क्षिप्रं, सत्वरं, आशु, अविलम्बितं, अशनैः; 'going fast,' त्वरितगतिः -तिः -ति; 'spoken fast,' त्वरितोदितः -ता -तं.

To FAST, *v. n.* उपवस् (c. 1. -वसति -वस्तुं), लङ्घ् (c. 1. लङ्घते -ङ्घितुं), निरूपितकालपर्य्यन्तं भोजनात् or आहाराद् निवृत् (c. 1. -वर्त्तते -र्त्तितुं), उपवासं कृ, अनशनं कृ, आहारनिवृत्तिं कृ; 'to death,' प्रायोपवेशनं कृ.

FAST, *s.* उपवासः, उपवस्तं, उपोषितं, उपोषणं, औपवस्तं, अनशनं, अनाहारः, अभोजनं, लङ्घनं, आक्षपणं.

FAST-DAY, *s.* उपवासदिनं, उपोषणदिनं, अनाहारदिवसः, लङ्घनदिवसः.

FASTED, *p. p.* उपोषितः -ता -तं, कृतोपवासः -सा -सं.

To FASTEN, *v. a.* (Make fast) बन्ध् (c. 9. बध्नाति, बन्धुं), सम्बन्ध्, निबन्ध्, अनुबन्ध्.—(Shut up) पिधा (c. 3. -दधाति -धातुं), निरुध् (c. 7. -रुणद्धि -रोद्धुं).—(Bar) अर्गलेन बन्ध्, कील (nom. कीलयति -यितुं).—(Unite together) सम्बन्ध्, संयुज् (c. 7. -युनक्ति -योक्तुं), संश्लिष् in caus. (-श्लेषयति -यितुं), सन्धा, संलग्नीकृ.—(Tie) योक्त्र् (nom. योक्त्रयति -यितुं), ग्रन्थ् (c. 9. ग्रथ्नाति, c. 1. ग्रन्थति -न्थितुं).—(Tie on) पिनह् (c. 4. -नह्यति -नद्धुं), आनह्, आबन्ध्, अनुबन्ध्.—(Impress) प्रणिधा.—(Make firm) दृढीकृ, स्थिरीकृ, संस्तम्भ् (c. 5. -स्तभ्नोति -स्तम्भितुं, c. 10. -स्तम्भयति -यितुं).

FASTENED, *p. p.* बद्धः -द्धा -द्धं, पिहितः -ता -तं, पिधानवान् -वती -वत् (त्), सपिधानः -ना -नं, निरुद्धः -द्धा -द्धं, युक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, संयोजितः -ता -तं, संलग्नीकृतः -ता -तं, लग्नः -ग्ना -ग्नं, पिनद्धः -द्धा -द्धं, आनद्धः -द्धा -द्धं, कीलायितः -ता -तं, कीलितः -ता -तं.

FASTENING, *s.* (Any thing that binds) बन्धनं -नी, बन्धनग्रन्थिः *m.*—(Joining) सन्धिः *m.*—(Of a bracelet) कुडुपः, सन्धिः *m.*

FASTER, *s.* उपवासी *m.* (न्), उपवासकर्त्ता *m.* (र्त्तृ), कृतोपवासः, सोपवासः.

FASTER, *adv.* (More rapidly) शीघ्रतरं, अधिकवेगेन, लघुतरं.

FASTIDIOUS, *a.* उपेक्षकः -का -कं, अवमानी -निनी -नि (न्), सावहेलः -ला -लं, सावज्ञः -ज्ञा -ज्ञं, घृणी -णिनी -णि (न्), दुस्तोषणीयः -या -यं, दुःखतोषणीयः -या -यं, दुःखेन सन्तोषणीयः -या -यं or तर्पणीयः -या -यं.

FASTIDIOUSLY, *adv.* सावज्ञानं, उपेक्षया, सावहेलं, सावमानं, दुस्तोषणीयं.

FASTIDIOUSNESS, *s.* अवमानशीलता, उपेक्षकत्वं, सावहेलत्वं, दुस्तोषणीयता, दुस्तर्पणीयता, अवमानिता.

FASTING, *s.* उपवासः, उपोषणं -षितं, अनशनं, निरशनं, अभोजनं, अभक्षणं, अनाहारः, लङ्घनं, आक्षपणं, अपतर्पणं; 'to death,' प्रायः -यणं, प्रायोपवेशनं -शनिका.

FASTING, *part.* or *a.* उपवासी -सिनी -सि (न्), निराहारः -रा -रं, अनशनः -ना -नं, अभक्षः -क्षा -क्षं, अनाशकः -का -कं, अकृताहारः -रा -रं; 'to death,' प्रायोपविष्टः -ष्टा -ष्टं.

FASTNESS, *s.* (Firmness) दृढता, स्थिरता, स्तब्धता, अचलता, निश्चलता.—(Strong-hold) दुर्गं, कोटिः *f.*, शिखरी *m.* (न्).

FASTUOUS, *a.* गर्व्वी -र्व्विणी -र्व्वि (न्), सावलेपः -पा -पं, उद्धतः -ता -तं.

FAT, *a.* पीवरः -रा -री -रं, पीनः -ना -नं, मेदस्वी -स्विनी -स्वि (न्), पुष्टः -ष्टा -ष्टं, पुष्टाङ्गः -ङ्गी -ङ्गं, मांसलः -ला -लं, स्थूलः -ला -लं, स्थूलकायः -या -यं, प्यानः -ना -नं, आप्यानः -ना -नं, प्रप्यानः -ना -नं, स्फीतः -ता -तं, स्फातः -ता -तं, पीवा -वा -व (न्), तुन्दी -न्दिनी -न्दि (न्), तुन्दिकः -का -कं, उच्छूनः -ना -नं, कुण्टकः -की -कं.—(Fertile) स्फीतः -ता -तं; 'fat land,' उर्व्वरा.

FAT, *s.* मेदः *n.* (स्), वसा, वपा, मांससारः, मांसस्नेहः, घृतं.

To FAT, *v. a.* प्यै in caus. (प्याययति -यितुं), आप्यै, पुष् in caus. (पोष-

यति -यितुं), स्फाय् in caus. (स्फाययति -यितुं), स्थूलीकृ, पीवरीकृ, पुष्टीकृ.

To FAT, *v. n.* आप्यै (c. 1. -आयते -यातुं), पुष् (c. 4. पुष्यति, पोषुं), पीवरीभू.

FAT. *s.* (tub) भाण्डं. *See* VAT.

FATAL, *a.* (Proceeding from fate, relating to it) दैवः -वी -वं -विकः -की -कं, दैष्टिकः -की -कं, कार्त्तान्तिकः -की -कं, दैवप्रयुक्तः -क्ता -क्तं, दैववशः -शा -शं, नियतः -ता -तं, आवश्यकः -की -कं.—(Deadly, calamitous) प्राणघातकः -का -कं, प्राणहरः -रा -रं, प्राणान्तिकः -की -कं or प्राणान्तकः, प्राणनाशकः -की -कं, मृत्युजनकः -का -कं, मारात्मकः -का -कं, साङ्घातिकः -की -कं, मारकः -का -कं, अन्तकरः -रा -रं, प्राणादकः -का -कं, आत्ययिकः -की -कं, अनायुष्यः -ष्या -ष्यं, मर्म्मोन्मिकः -की -कं, मर्म्मभेदी -दिनी -दि (न्), दुरन्तः -न्ता -न्तं, दुर्विपाकः -का -कं.

FATALISM, *s.* दैवायत्तता, दैवाधीनता, दैववशित्वं, दैवचिन्ता, दैविकता, दैष्टिकता.

FATALIST, *s.* दैवपरः, दैवाधीनः, दैवायत्तः, दैवपरायणः, दैवचिन्तकः.

FATALITY, *s.* आवश्यकता, अवश्यकत्वं, भवितव्यता, कृतान्तः, नियतिः *f.*

FATALLY, *adv.* (By necessity) दैवात्, दैववशात्, दैवनियोगात्.—(Mortally) प्राणनाशेन, सनाशं, आत्ययिकं.

FATE, *s.* दैवं, कृतान्तः, विधाता *m.* (तृ), विधिः *m.*, भागधेयं, भाग्यं, नियतिः *f.*, भवितव्यता, दिष्टं, दैविकं, अदृष्टं, कालनियोगः, कालः, कालधर्म्मः, गतिः *f.*, व्यसनं, कर्म्म *n.* (न्), कर्म्मवशः, कार्य्यवशः, प्राक्तनं.—(Death) मृत्युः *m.*, नाशः, विनाशः, क्षयः; 'ill-fate,' दुर्दैवं, दौर्भाग्यं; 'good-fate,' सौभाग्यं.

FATED, *a.* दैवनियुक्तः -क्ता -क्तं, कालनियुक्तः -क्ता -क्तं, दैवनिर्दिष्टः -ष्टा -ष्टं, नियतः -ता -तं, दैविकः -की -कं, दैष्टिकः -की -कं, भवितव्यः -व्या -व्यं; 'one whose fated time is come,' प्राप्तकालः -ला -लं; 'well-fated,' सुभाग्यः -ग्या -ग्यं, सौभाग्यवान् -वती -वत् (त्), पुण्यवान् &c.; 'ill-fated,' दुर्दैवग्रस्तः -स्ता -स्तं, दैवोपहतः -ता -तं.

FATHER, *s.* पिता *m.* (तृ), जनकः, जननः, जनिता *m.* (तृ), जनयिता *m.* (तृ), जन्मदः, तातः, प्रसविता *m.* (तृ), प्रजावान् *m.* (वत्), धाता *m.* (तृ), वप्ता *m.* (प्तृ), वापः, देहकृत् *m.*, सम्भूः *m.*; 'of a family,' कुलपतिः *m.*; 'of a son,' पुत्री *m.* (न्), सुती *m.* (न्); 'father and mother,' मातापितरौ *m.* du. or मातरपितरौ, तातजनयित्र्यौ *f.* du.; 'father of all,' विश्वधाता *m.* (तृ).—(Title of respect) गुरुः, आचार्य्यः.

FATHER-IN-LAW, *s.* श्वशुरः, धर्म्मपिता *m.* (तृ), पूज्यः; 'father and mother-in-law,' श्वश्रूश्वशुरौ *m.* du.

To FATHER, *v. a.* पुत्रं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), पोष्यपुत्रं or कृत्रिमपुत्रं ग्रह्.—(Acknowledge as one's own) स्वीकृ.—(Ascribe to another as his offspring, or production) पुत्रारोपणं कृ, किञ्चित् परस्मै आरुह् in caus. (-रोपयति -यितुं), तेन प्रसुतं or तेन विरचितम् इति विज्ञा in caus. (-ज्ञापयति -यितुं).

FATHERHOOD, *s.* पितृत्वं -तरा, जनकत्वं -ता, पितृभावः, प्रजावत्त्वं, पितृधर्म्मः.

FATHER-LAND, *s.* पैतृकभूमिः *f.*, पैतृकदेशः, पैतृकविषयः, जन्मभूमिः *f.*, मूलभूमिः.

FATHERLESS, *a.* अपितृकः -का -कं, पितृहीनः -ना -नं, तातहीनः -ना -नं, क्षमणः or क्षेमणः *m.* only, अनाथः -था -थं, निर्नाथः -था -थं.

FATHERLINESS, *s.* पितृतुल्यता, तातुल्यता, पैतृकत्वं, वात्सल्यं.

FATHERLY, *a.* पितृसदृशः -शा -शं, पितृतुल्यः -ल्या -ल्यं, तातुल्यः -ल्या -ल्यं, तातलः -ला -लं, पैतृकः -की -कं or पैत्रिकः, पैत्रः -त्री -त्रं, पितृनिर्विशेषः -षा -षं, मनोजवः -वा -वं.

FATHERLY, *adv.* पितृवत्, जनकवत्, तातवत्, पितृरूपेण, जनकरूपेण.

FATHOM, *s.* (Measure of length) व्यामः, व्यायामः, न्यग्रोधः.—(Penetration) वेधः -धनं, मर्म्मवेधः.

To FATHOM, *v. a.* (Sound the depth) वेधं or गाम्भीर्यं or तलं परीक्ष् (c. 1. -ईक्षते -क्षितुं) or निरूप् (c. 10. -रूपयति -यितुं) or मा in caus. (मापयति -यितुं).—(Penetrate) व्यध् (c. 4. विध्यति, व्यद्धुं); 'one's designs,' मर्म्म व्यध्, अभिप्रायं परीक्ष् or निरूप्.

FATHOMLESS, *a.* अतलस्पर्शः -र्शा -र्शं, अगाधः -धा -धं, अनवगाह्यः -ह्या -ह्यं, अगम्यः -म्या -म्यं, अगम्यतलः -ला -लं.

FATIDICAL, *a.* भविष्यद्वाचकः -का -कं, भविष्यत्प्रदर्शकः -का -कं.

FATIGUE, *s.* क्लान्तिः *f.*, श्रान्तिः *f.*, क्लमः, श्रमः, आयासः, परिश्रमः, परिश्रान्तिः *f.*, खेदः, क्लेशः, क्लमित्वं, क्लमथः, अवसादः, ग्लानिः *f.*, कष्टं, आयामः, कायक्लेशः, तन्द्रा; 'inured to fatigue,' जितश्रमः -मा -मं.

To FATIGUE, *v. a.* खिद् in caus. (खेदयति -यितुं), क्लम् in caus. (क्लमयति -यितुं), परिक्लम्, आयस् in caus. (-यासयति -यितुं), श्रम् in caus. (श्रमयति -यितुं), परिश्रम्, सद् in caus. (सादयति -यितुं), अवसद्, ग्लै in caus. (ग्लपयति -यितुं), परिग्लै, क्लिश् (c. 9. क्लिश्नाति, क्लेष्टुं), श्रान्तिं जन् in caus. (जनयति -यितुं).

FATIGUED, *p. p.* श्रान्तः -न्ता -न्तं, परिश्रान्तः -न्ता -न्तं, क्लान्तः -न्ता -न्तं, श्रमार्त्तः -र्त्ता -र्त्तं, जातश्रमः -मा -मं, खिन्नः -न्ना -न्नं, खेदितः -ता -तं, क्लिष्टः -ष्टा -ष्टं, क्लिश्तः -ता -तं, क्लेशितः -ता -तं, ग्लानः -ना -नं, परिग्लानः -ना -नं, क्लमी -मिनी -मि (न्), श्रमी -मिणी -मि (न्), अवसन्नः -न्ना -न्नं, अवसादितः -ता -तं, सश्रमः -मा -मं; 'to be fatigued,' श्रम् (c. 4. श्राम्यति, श्रमितुं), आयस् (c. 4. -यस्यति -यसितुं), खिद् (c. 4 खिद्यते, खेत्तुं), क्लम् (c. 4. क्लाम्यति, क्लमितुं), कष्ट (nom. कष्टायते).

FATIGUING, *a.* श्रमकरः -री -रं, श्रमजनकः -का -कं, क्लेशकः -की -कं.

FATNESS, *s.* स्थूलता, स्थौल्यं, मेदस्विता, पुष्टता, पुष्टिः *f.*, पीनता, पीवरत्वं, स्फीतिः *f.*, मेदोवृद्धिः *f.*, स्फातिः *f.*, उन्मेदा, शरीरस्थूलता, स्थूलकायत्वं, आप्यायनं.

To FATTEN, *v. a.* प्यै in caus. (प्याययति -यितुं), आप्यै, पुष् in caus. (पोषयति -यितुं), स्थूलीकृ, पीवरीकृ, पुष्टीकृ, स्फाय् in caus. (स्फाययति -यितुं), संवृध् in caus. (वर्धयति -यितुं).

To FATTEN, *v. n.* आप्यै (c. 1. -प्यायते -प्यातुं), पुष् (c. 4. पुष्यति, पोषुं), स्थूलीभू, पीवरीभू, संवृध् (c. 1. -वर्धते -र्धितुं), स्फाय् (c. 1. स्फायते -यितुं).

FATTENED, *p. p.* पुष्टः -ष्टा -ष्टं, पुष्टाङ्गः -ङ्गी -ङ्गं, आप्यायितः -ता -तं, बृंहितः -ता -तं, स्थूलीकृतः -ता -तं, संवर्धितमांसः -सा -सं.

FATTENING, *a.* पौष्टिकः -की -कं, पुष्टिदः -दा -दं, बृंहणः -णा -णं.

FATTY, *a.* मेदस्वी -स्विनी -स्वि (न्), मांसलः -ला -लं, सस्नेहः -हा -हं.

FATUITY, *s.* मूर्खता, मौर्ख्यं, मूढता, मोहः, बालिशता, मुग्धता.

FATUOUS, *a.* मूर्खः -र्खा -र्खं, मूढः -ढा -ढं, बालिशमतिः -तिः -ति, दुर्बुद्धिः -द्धिः -द्धि, दुर्मतिः -तिः -ति, अल्पधीः -धीः -धि.

FAUCET, *s.* भाण्डनिवेशितो जलनिर्गमयोग्यो नाडिविशेषः.

FAULT, *s.* दोषः, अपराधः, मनुः *m.*, भ्रमः, छिद्रं, अगुणः, पापं, दूषणं, प्रमादः, कर्म्मदोषः, व्यतिक्रमः, परवाच्यं.—(Find fault with) निन्द् (c. 1. निन्दति -न्दितुं), उपालभ् (c. 1. -लभते -लब्धुं), दोषीकृ.

FAULT-FINDER, *s.* दोषग्राही -हिणी -हि (न्), दोषग्राहकः -का -कं, निन्दकः -का -कं, पापदर्शी -र्शिनी -र्शि (न्), छिद्रानुसारी -रिणी -रि (न्), छिद्रान्वेषी -षिणी -षि (न्).

FAULTILY, *adv.* दोषेण, अपराधेन, सदोषं, सापराधं, प्रमादेन, अन्यथा.

FAULTINESS, *s.* अपराधिता -त्वं, दोषिता -त्वं, दोषवत्त्वं, सापराधता, सदोषत्वं, दुष्टता, वाच्यता.

FAULTLESS, *a.* निर्दोषः -षा -षं, निरपराधः -धा -धं, अपराधहीनः -ना -नं, अपापः -पा -पं, अनघः -घा -घं, अनवद्यः -द्या -द्यं, अकल्मषः -षा -षं, अनेनाः -नाः -नः (स्), निरागाः -गाः -गः (स्), निश्छिद्रः -द्रा -द्रं, विशुद्धः -द्धा -द्धं, निर्म्मलः -ला -लं; 'in form,' अव्यङ्गः -ङ्गी -ङ्गं,

दुष्टरूपः -पी -पं.

FAULTLESSNESS, *s.* निर्दोषत्वं, निरपराधत्वं, दोषहीनता, विशुद्धता.

FAULTY, *a.* दोषी -षिणी -षि (न्), अपराधी -धिनी -धि (न्), दोषवान् -वती -वत् (त्), निन्दनीयः -या -यं, निन्दार्हः -र्हा -र्हं, सापराधः -धा -धं, सदोषः -षा -षं, दोषिकः -की -कं, वाच्यः -च्या -च्यं, प्रामादिकः -की -कं, प्रमादी -दिनी -दि (न्), प्रमादवान् -वती -वत् (त्), अशुद्धः -द्धा -द्धं, प्राप्तदोषः -षा -षं, अयथार्थः -र्था -र्थं, वितथः -था -थं, अनृतः -ता -तं; 'full of faults,' बहुदोषः -षा -षं; 'a faulty statement,' मिथ्यावादः, मृषावादः; 'a faulty conclusion,' अपसिद्धान्तः.

FAUN, *s.* (Sylvan deity) वनदेवता, स्थलीदेवता, वनेचरः.

To FAVOR, *v. a.* अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अनुकूल (nom. अनुकूलयति -यितुं), उपकृ, उपकारं कृ, साहाय्यं कृ, प्रसादं कृ, अनुपाल् (c. 10. -पालयति -यितुं), प्रतिपाल्, भज् (c. 1. भजति -ते, भक्तुं), अनुरुध् (c. 4. -रुध्यति -रोद्धुं), जुष् (c. 6. जुषते, जोषितुं), रक्षां कृ, प्रसन्नो भू or अस् स्नेहं कृ, कृपां कृ, परप्रियं or परहितम् इष् (c. 6. इच्छति, एषितुं).—(Resemble) सरूपः -पी -पं भू or अस्; 'a child that favors his father,' पितृरूपः पुत्रः; 'fortune favors the brave,' साहसे श्रीः प्रतिवसति.

FAVOR, *s.* (Kind regard, friendly disposition) प्रसादः, अनुग्रहः, अनुकूलता, आनुकूल्यं, प्रसन्नता, प्रीतिः *f.*, प्रियता, स्नेहः, अनुरोधः, हितेच्छा, हितेषा.—(Support, countenance) आग्रहः, सङ्ग्रहः, ग्रहः, आश्रयः, संश्रयः, आधारः, अनुपालनं, साहाय्यं, उपकारः, पुरस्कारः, संवर्धनं, वर्धनं, शरण्यता, अभ्युपपत्तिः *f.*—(Kind act) उपकृतं, उपकारः, सुकृतं, सुकृतिः *f.*, उपचारः, प्रियं, हितं.—(Leave, permission) अनुमतिः *f.*, अनुज्ञा; 'to ask a favour,' प्रसद् (c. 10. -सादयते -यितुं), with acc. of person, उपकारं प्रार्थ् (c. 10. -अर्थयते -यितुं); 'I ask you as a favor not to be angry with me,' प्रसादये त्वां न मे क्रोद्धुम् अर्हसि; 'conciliate the favor,' आराध् (c. 10. -राधयति -यितुं), अनुरञ्ज् in caus. (-रञ्जयति -यितुं).

FAVORABLE, *a.* प्रसन्नः -न्ना -न्नं, सुप्रसन्नः -न्ना -न्नं, अनुग्राही -हिणी -हि (न्), अनुकूलः -ला -लं, आनुग्राहकः -की -कं, हितैषी -षिणी -षि (न्), प्रियैषी &c., हितकामः -मा -मं, हितेषुः -षुः -षु, हितः -ता -तं, सुहृदः -दा -दं, प्रियकारः -री -रं, प्रियङ्करः -री -रं, हितबुद्धिः -द्धिः -द्धि, अर्थकृत्, उपकारकः -का -कं.—(Tending to promote) उत्पादकः -का -कं; 'favorable to wealth,' अर्थोत्पादकः -का -कं; 'to longevity,' आयुष्यः -ष्या -ष्यं; 'to be favorable,' प्रसद् (c. 1. -सीदति -सत्तुं); 'I am favorable to you,' प्रसन्नोऽस्मि तव.

FAVORABLENESS, *s.* प्रसन्नता, अनुकूलता, आनुकूल्यं, हितबुद्धित्वं.

FAVORABLY, *adv.* प्रसन्नं, प्रसादेन, अनुग्रहेण, सानुग्रहं, सानुकूल्यं, प्रियं.

FAVORED, *p.p.* अनुगृहीतः -ता -तं, उपकृतः -ता -तं, प्रतिपालितः -ता -तं.

FAVORER, *s.* अनुग्राही *m.* (न्), अनुग्राहकः, उपकारकः, अनुपालकः.

FAVORITE, *s.* प्रियः -या, सुप्रियः -या, वल्लभः -भा, सुभगः -गा, हृदयप्रियः -या, स्नेहपात्रं, प्रीतिपात्रं; 'general favorite,' सर्वप्रियः; 'a royal favorite,' नृपवल्लभः, राजवल्लभः; 'a favorite wife,' सुभगा.

FAVORITE, *a.* प्रियः -या -यं, प्रियतमः -मा -मं, हृदयप्रियः -या -यं, दयितः -ता -तं, इष्टतमः -मा -मं, अभीष्टः -ष्टा -ष्टं, हृद्यः -द्या -द्यं.

FAVORITISM, *s.* पक्षपातिता, पक्षानुग्रहः, पक्षोद्ग्राहित्वं, पक्षता, स्नेहः.

FAWN, *s.* मृगशावकः, मृगपोतकः, हरिणशिशुः *m.*, हरिणवत्सः, कुरङ्गः; 'fawn-eyed,' कुरङ्गनयनः -ना -नी -नं.

To FAWN, *v. n.* (Bring forth a fawn) मृगशावकं or कुरङ्गं सू (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसु or जन् (c. 10. जनयति -यितुं).

To FAWN UPON, *v. n.* साष्टाङ्गपातं प्रणम्य सान्त्व् or ज्ञान्त्व् (c. 10. सान्त्वयति -यितुं), अभिज्ञात्व्, उपसान्त्व्, परिज्ञान्त्व् or लल् (c. 10. लालयति -यितुं).

FAWNER, *s.* साष्टाङ्गपातं प्रणम्य सान्त्वकारः, लाली *m.* (न्), चाटुकारः.

FAWNING, *s.* साष्टाङ्गप्रणामपूर्वं सान्त्वनं or लालनं, अतिचाटुकारः.

FAWNINGLY, *adv.* साष्टाङ्गपातं, अञ्जलिकर्मपूर्वं, दत्तालचाटुकारेण.

FAY, *s.* विद्याधरी, पिशाची, योगिनी, राक्षसी. *See* FAIRY.

FEALTY, *s.* भक्तिः *f.*, प्रभुभक्तिः *f.*, भक्तता, प्रभुभक्तता, आसक्तिः *f.*, अनुषङ्गः.

FEAR, *s.* भयं, भीतिः *f.*, भीरुता, त्रासः, सन्त्रासः, परित्रासः, साध्वसं, शङ्का, आशङ्का, दरः -रं, भीर्, भीरुत्वं; 'removal of fear,' भयप्रतीकारः; 'causing fear,' भयङ्करः -रा -रं, भयकारकः -का -कं, भयदः -दा -दं, भयप्रदः -दा -दं; 'cause of fear,' भयहेतुः *m.*; 'agitated by fear,' भयविह्वलः -ला -लं; 'through fear,' भयात्, त्रासात्, भीत्या, भीतेः, शङ्कया; 'through fear of punishment,' दण्डभयात्.

To FEAR, *v. a.* भी (c. 3. बिभेति, भेतुं) with abl. or gen. c. So also भ्रमी, विभी, त्रस् (c. 4. त्रस्यति, त्रसितुं), विभय्, उद्विज् (c. 6. -विजते -जितुं), व्यथ् (c. 1. व्यथते -थितुं), प्रव्यथ् all with abl. c., शङ्क् (c. 1. शङ्कते -ङ्कितुं), आशङ्क् with acc. c., तर्क् (c. 10 तर्कयति -यितुं).

To FEAR, *v. n.* त्रस् (c. 4. त्रस्यति, त्रसितुं), व्यथ् (c. 1. व्यथते -थितुं), उद्विग्नीभू, भयार्तः -र्ता -र्तं भू or अस्; 'do not fear,' मा भैषीः, मा त्रासीः or मा त्रसीः.

FEARFUL, *a.* (Affected by fear, timid) भयार्तः -र्ता -र्तं, भयातुरः -रा -रं, भीरुः -रुः -रु -रुकः -का -कं, सभयः -या -यं, भीतः -ता -तं, ससाध्वसः -सा -सं, सशङ्कः -ङ्का -ङ्कं, शङ्कितः -ता -तं, त्रस्तः -स्ता -स्तं, सन्त्रस्तः -स्ता -स्तं, दीनः -ना -नं, क्षुद्रः -द्रा -द्रं, भीलुकः -का -कं, दरितः -ता -तं.—(Terrible) भयङ्करः -रा -रं, भयानकः -की -कं, भयावहः -ही -हं, त्रासकरः -री -रं, भीरुमयः -यी -यं, दारुणः -णा -णं, रौद्रः -द्री -द्रं, घोरः -रा -रं, भीमः -मा -मं, भीषणः -णा -णं, भीष्मः -ष्मा -ष्मं, भैरवः -वी -वं.

FEARFULLY, *adv.* (With fear) सभयं, सत्रासं, भयेन, ससाध्वसं, सशङ्कं.—(Terribly) दारुणं, घोरं, भैरवं, भयानकं.

FEARFULNESS, *s.* भीरुता, भीतत्वं, सभयत्वं, सन्त्रस्तता, रौद्रता.

FEARLESS, *a.* निर्भयः -या -यं, अभयः -या -यं, अभीतः -ता -तं, विभीतः -ता -तं, अशङ्कः -ङ्का -ङ्कं, निःशङ्कः -ङ्का -ङ्कं, विशङ्कः -ङ्का -ङ्कं, निर्विशङ्कः -ङ्का -ङ्कं, अभीरुः -रुः -रु, अपभीः -भीः -भि, अपशङ्कः -ङ्का -ङ्कं, निःसाध्वसः -सा -सं, विगतभयः -या -यं, अकुतोभयः -या -यं, निःसंशयः -या -यं, साहसिकः -की -कं.

FEARLESSLY, *adv.* निर्भयं, अभयं, निःशङ्कं, अभीतवत्, साहसेन; 'acting fearlessly,' निर्वीर्यः -र्या -र्यं.

FEARLESSNESS, *s.* निर्भयत्वं, अभीतिः *f.*, अभीतता, अभयं -यत्वं, शौर्यं.

FEASIBILITY, *s.* शक्यता, साध्यता, करणीयता, सम्भाव्यता, उपपाद्यत्वं.

FEASIBLE, *a.* साध्यः -ध्या -ध्यं, करणीयः -या -यं, शक्यः -क्या -क्यं, कर्तुं शक्यः -क्या -क्यं, सुकरः -रा -रं, सम्भाव्यः -व्या -व्यं, सम्भावनीयः -या -यं, उपपाद्यः -द्या -द्यं, कृत्यः -त्या -त्यं, सुगमः -मा -मं, लभ्यः -भ्या -भ्यं, सुलभः -भा -भं.

FEAST, *s.* (Festival) उत्सवः, महः, पर्व *n.* (न्), यात्रा, यात्रोत्सवः, उद्भवः, उद्भवः, पर्वोत्सवः, अभ्युदयः, क्षणः, चर्चरी; 'a great feast,' महोत्सवः.—(Entertainment) सत्क्रिया, सहभोजनं, सम्भोजनं, उत्तमाशनसम्भारः, परमान्नसम्भारः; 'feast of lanterns,' दीपोत्सवः; 'feast to the eye,' नयनोत्सवः.

To FEAST, *v. n.* परमान्नानि भुज् (c. 7. भुंक्ते, भोक्तुं), उत्तमाहारं कृ, उत्तमभोजनं कृ, उत्तमान्नेन तृप (c. 4. तृप्यति), उत्सवं कृ, महोत्सवं कृ.

To FEAST, *v. a.* उत्तमान्नैः or भोजनविशेषैः सन्तृप् (c. 10. -तर्पयति -यितुं) or सन्तुष् in caus. (-तोषयति -यितुं), परमान्नानि भुज् in caus. (भोजयति -यितुं), साकृ.

FEASTED, *p. p.* साकृतः -ता -तं, परमान्नसमर्पितः -ता -तं.

FEASTING, *s.* उत्सवकरणं, परमान्नभोजनं, उत्तमाहारकरणं, सहभोजनं.

FEAT, *s.* कर्म्म *n.* (न्), चरित्रं, चेष्टितं, अद्भुतकर्म्म *n.*, आश्चर्य्यकर्म्म *n.*

FEATHER, *s.* पक्षः, पर्णः, गरुत् *m.*, पिच्छं, पतत्रं, पत्रं, पक्ष्म *n.* (न्), वाजः, तनुरुहः; 'of a peacock,' मयूरपिच्छं; 'of an arrow,' पुङ्खः, [illegible], शरपक्षः, पत्रं, व्राजः, मणिकाचः.

FEATHER[illegible], *s.* पक्षपूरितं शयनं, पक्षशय्या, मृदुशयनं, कोमलपर्य्यङ्कः, [illegible].

FEA[illegible] पक्षी -क्षिणी -क्षि (न्), पक्षवान् -वती -वत् (त्), पक्षा[illegible] -तं, पक्षयुक्तः -क्ता -क्तं, सपक्षः -क्षा -क्षं, गरुत्मान् -त्मती [illegible] पत्री -त्रिणी -त्रि (न्), पतत्री -त्रिणी -त्रि (न्).

FEATHERY, *a.* पक्षतुल्यः -ल्या -ल्यं, पक्षसदृशः -शी -शं, पक्षसगुणः -णा -णं.

FEATURE, *s.* (Form of the face) वदनाकृतिः *f.*, वदनाकारः, वदनरेखा, मुखरेखा, मुखावयवः, वदनावयवः.—(Form, cast) आकारः, आकृतिः *f.*, संस्कारः, संस्थानं, रूपं, मूर्त्तिः *f.*

To FEAZE, *v. a.* उद्ग्रन्थ् (c. 1. -ग्रन्थति -न्थितुं, c. 9. -ग्रथ्नाति), समुद्ग्रन्थ्.

FEBRICULOSE, *a.* ईषज्ज्वरी -रिणी -रि (न्), ईषज्ज्वरातुरः -रा -रं.

FEBRIFACIENT, *a.* ज्वरकरः -रा -रं, ज्वरोत्पादकः -का -कं.

FEBRIFUGE, *a.* ज्वरघ्नः -घ्नी -घ्नं, ज्वरनाशकः -का -कं, ज्वरान्तकः -का -कं, ज्वरहन्ता -न्त्री -न्तृ (न्तृ), ज्वरनिवारकः -का -कं; 'a febrifuge,' ज्वरनाशकम् औषधं, ज्वरापहा.

FEBRILE, *a.* ज्वरी -रिणी -रि (न्), ज्वरितः -ता -तं, ज्वरजः -जा -जं.

FEBRUARY, *s.* फाल्गुनः, माघः, तपस्यः, फाल्गुनिकः, वासरस्य द्वितीयमासः.

FECAL, *a.* मलमयः -यी -यं, शकृन्मयः -यी -यं, विण्मयः -यी -यं, मलिनः -ना -नं, अमेध्यः -ध्या -ध्यं, खली -लिनी -लि (न्).

FECES, *s.* मलं, पुरीषं, विष्ठा, विट् *f.* (ष्), उच्चारः, उच्चरितं, शमलं, गूथः, अवस्करः, अपस्करः, वर्च्चस्कः, दूर्य्यं.—(Dregs) मलं, खलं, कल्कं, किट्टं, उच्छिष्टं, शेषं, कलङ्कः; 'to discharge feces,' पुरीषोत्सर्गं कृ, विण्मूत्रोत्सर्गं कृ.

FECULENCE, *s.* मालिन्यं, समलता, अमेध्यता, मलवत्त्वं, कलुषता, मलं.

FECULENT, *a.* समलः -ला -लं, मलवान् -वती -वत् (त्), मलिनः -ना -नं, मलीमसः -सा -सं, मलदूषितः -ता -तं, अमेध्यः -ध्या -ध्यं, खली -लिनी -लि (न्), कल्की -ल्किनी -ल्कि (न्), कलुषः -षा -षं -षी -षिणी -षि (न्), विड्भवः -वा -वं, कलङ्की -ङ्किनी -ङ्कि (न्).

FECUND, *a.* बहुप्रजः -जा -जं, बह्वपत्यः -त्या -त्यं, अवन्ध्यः -न्ध्या -न्ध्यं, बहुफलदः -दा -दं, प्रजनिष्णुः -ष्णुः -ष्णु; 'fecund soil,' उर्व्वरा.

To FECUNDATE, *v. a.* सफलीकृ, बहुफलदीकृ, रेतः or परागं सिच् (c. 6. सिञ्चति, सेक्तुं).

FECUNDATION, *s.* सफलीकरणं, अवन्ध्यीकरणं, परागसेकः, रेतःसेचनं.

FECUNDITY, *s.* साफल्यं, सफलता, फलवत्त्वं, जनकता, अवन्ध्यता, स्फीतिः *f.*, प्रसवनं, प्रसवित्वं, सावकत्वं, प्रजनिष्णुता.

FED, *p. p.* पुष्टः -ष्टा -ष्टं, पुषितः -ता -तं, पोषितः -ता -तं, भृतः -ता -तं, पालितः -ता -तं, सन्तोषितः -ता -तं, सन्तर्पितः -ता -तं, अशितः -ता -तं, आशितः -ता -तं; 'well-fed,' सुपुष्टः -ष्टा -ष्टं, हृष्टपुष्टः -ष्टा -ष्टं, स्वाशितः -ता -तं; 'ill-fed,' विपुष्टः -ष्टा -ष्टं; 'fed on by cattle,' अशितगुवीनः -ना -नं; 'having fed,' भोजयित्वा.

FEDERAL, *a.* साङ्घातिकः -की -कं, सामयिकः -की -कं, सहितः -ता -तं.

FEDERATE, *a.* सन्धितः -ता -तं, कृतसन्धिः -न्धिः -न्धि, कृतसमन्धः -न्धा -न्धं, संहतः -ता -तं, सहितः -ता -तं, सङ्घातवान् -वती -वत् (त्), संयुक्तः -क्ता -क्तं.

FEE, *s.* (Recompense) शुल्कः -ल्कं, पारितोषिकं, वेतनं, भाटिः *f.*, भाटकः, दक्षिणा, उपप्रदानं, उपायनं, निस्तारः, प्रतिफलं.—(Land granted by a lord) भूस्वामिना स्वपरिचरहस्ते समर्पिता भूमिः; 'fee-simple,' स्वाधीनभूमिः *f.*

To FEE, *v. a.* पारितोषिकं दा, वेतनं दा, उपप्रदानेन परितुष् in caus. (-तोषयति -यितुं) or सन्तुष्, उत्कोचं दा.

FEEBLE, *a.* अल्पबलः -ला -लं, दुर्बलः -ला -लं, अल्पशक्तिः -क्तिः -क्ति, अल्पवीर्य्यः -र्य्या -र्य्यं, अल्पसत्त्वः -त्त्वा -त्त्वं, अल्पतेजाः -जाः -जः (स्), शिथिलबलः -ला -लं, शिथिलशक्तिः -क्तिः -क्ति, निर्बलः -ला -लं, बलहीनः -ना -नं, सामर्थ्यहीनः -ना -नं, क्षीणबलः -ला -लं, असमर्थः -र्था -र्थं, शिथिलः -ला -लं, फल्गुः -ल्गुः -ल्गु, विसस्ततेजाः -जाः -जः (स्), क्षीणः -णा -णं, अवसन्नः -न्ना -न्नं, क्षामः -मा -मं, क्लीबः -बा -बं, छातः -ता -तं, शातः -ता -तं, अमांसः -सा -सं.

FEEBLE-MINDED, *a.* अल्पबुद्धिः -द्धिः -द्धि, दुर्मतिः -तिः -ति, अल्पधीः -धीः -धि.

FEEBLENESS, *s.* दौर्बल्यं, अल्पशक्तित्वं, अल्पबलं, बलशैथिल्यं, शक्तिशैथिल्यं, शिथिलता, क्षीणता, क्षीणशक्तित्वं, वीर्य्यहानिः *f.*, शक्तिहीनता, सत्त्वहानिः *f.*, तेजोहीनता, अतेजः *n.* (स्), अशक्तिः *f.*, असामर्थ्यं, सामर्थ्यहीनता, अवसादः, विसंसा, क्लैब्यं.

FEEBLY, *adv.* अल्पबलेन, अल्पशक्त्या, दुर्बलं, निर्बलं, दौर्बल्येन.

To FEED, *v. a.* (Give to eat) भुज् in caus. (भोजयति -यितुं), अश् in caus. (आशयति -यितुं), प्राश् in caus., भोजनं or अन्नं दा.—(Nourish) पुष् (c. 1. पोषति -षितुं, c. 9. पुष्णाति, c. 10. पोषयति -यितुं), परिपुष्, पाल् (c. 10. पालयति -यितुं), प्रतिपाल्, भृ (c. 3. बिभर्त्ति, भर्त्तुं), सम्भृ, अन्नेन सन्तुष् in caus. (-तोषयति -यितुं) or सन्तृप् in caus. (-तर्पयति -यितुं) or संपृष् (c. 10. -वर्षयति -यितुं).—(Pasture) चर् in caus. (चारयति -यितुं).—(Supply) उपस्था in caus. (-स्थापयति -यितुं), उपकॢप् (c. 10. -कल्पयति -यितुं); 'to be plentifully fed,' आपॄ in pass. (-पूर्य्यते).

To FEED, *v. n.* (Eat) भुज् (c. 7. भुंक्ते, भोक्तुं), उपभुज्, अश् (c. 9. अश्नाति, अशितुं), समश्, पर्य्यश्, प्राश्, खाद् (c. 1. खादति -दितुं), अद् (c. 2. अत्ति -त्तुं), भक्ष् (c. 10. भक्षयति -यितुं), अन्नेन पॄ in pass. (पूर्य्यते) or पुष् (c. 4. पुष्यति, पोष्टुं).—(Graze) चर् (c. 1. चरति -रितुं), तृण् (c. 8. तृणोति, तर्णोति -र्णितुं) तृणं भुज्.

FEED, *s.* (Provender, fodder) भक्ष्यं, भोज्यं, विधा, विधानं, [illegible] *m.*, गवादनं, अश्वादनं.—(Quantity of corn, &c. eaten by a horse at once) यत् तृणधान्यादि एकवारे अश्वेन भुज्यते; 'day's feed for a cow,' गवाह्निकं.

FEEDER, *s.* (Giver of food) भोजयिता *m.* (तृ), आशयिता *m.* (तृ), पोष्टा *m.* (ष्टृ), पोषयिता *m.* (तृ), आहारदाता *m.* (तृ), अन्नदाता *m.*—(One that eats) भक्षकः, खादकः, अत्ता *m.* (त्तृ), भोक्ता *m.* (क्तृ), भक्षयिता *m.* (तृ), भोजी *m.* (न्), आशी *m.* (न्); 'on grain,' शस्यभक्षकः, शस्यादः, शस्याद्; 'on grass,' तृणजम्भः; 'on flesh,' मांसभक्षः, पिशिताशनः, क्रव्यादः, क्रव्याद्, मांसभुक् *m.* (ज्); 'on fruit,' फलाशी *m.* (न्), फलाशनः.

FEEDING, *s.* (Giving food) आहारदानं, अन्नदानं, पोषणं, पालनं, [illegible].—(Eating) भक्षणं, खादनं, भोजनं, अशनं, प्राशनं, जक्षणं, [illegible], अभ्यवहरणं; 'upon grain,' शस्यभक्षणं.

To FEEL, *v. a.* (Perceive by the touch) स्पृश् (c. 6. स्पृशति, [illegible]), संस्पृश्, परिस्पृश्, हस्तेन or पाणिना परामृश् (c. 6. -मृशति -मर्शितुं), परिमृश् or मृश् or आलभ् (c. 1. -लभते -लब्धुं).—(Try by touch)

स्पर्शेन or इस्तसम्पर्केण परीक्ष् (c. 1. -ईक्षते -क्षितुं) or निरूप् (c. 10. -रूपयति -पि॰); 'to feel the pulse,' नाडीं परीक्ष्, नाडीपरीक्षां कृ. —(Suffer, experience) अनुभू, उपगम् (c. 1. -गच्छति -गन्तुं), उपागम्, विद् (c. 10. वेदयते -यितुं), सूच् (c. 10. सूचयति -यितुं); 'one who feels pain,' अनुभूतव्यथः, ज्ञातव्यथः, आहितव्यथः.—(Be affected with) उपहतः -ता -तं भू or अस्.—(Know) ज्ञा (c. 9. जानाति, ज्ञातुं).—(Feel for the woes of another) परस्य समदुःखः -खा -खं भू or अस्, परदुःखसमृद्धानं ज्ञात्वा कारुण्यं सूच् or कृ, अनुकम्प् (c. 1. -कम्पते -म्पितुं).

Feel, *s.* स्पर्शः, स्पृष्टिः *f.*, संस्पर्शः, सम्पर्कः, परिमर्शः.

Feeler, *s.* (Of an insect) कीटमस्तकाग्रे परामर्शीयोग्यं सूक्ष्मशृङ्गं.

Feeling, *s.* (Sense of touch) स्पर्शः, स्पर्शज्ञानं, स्पर्शेन्द्रियं, स्पृष्टिः *f.*, संस्पर्शः, परिमर्शः, परामर्शः, सम्पर्कः.—(Sensation, perception) संवेदः, वेदनं, बोधः, ज्ञानं, चेतना, चैतन्यं, चित् *f.*, चिच्छक्तिः *f.*, उपगमः, उपागमः, उपलम्भः, उपलब्धिः *f.*—(Emotion, sentiment) रसः, भावः, चित्तवृत्तिः *f.*, रागः, चित्तरागः, चित्तविकारः.—(Feeling for others) कृपा, दया, अनुकम्पा, करुणा, समदुःखार्तं; 'the feelings,' चेतः *n.* (स्), चित्तं, चैतन्यं, हृदयं.

Feeling, *part.* or *a.* (Sentient) चेतनः -ना -नं, चेतकः -की -कं, चेतनावान् -वती -वत् (त्).—(Impassioned, affecting) रसिकः -का -की -कं, रसी -सिनी -सि (न्), रसवान् -वती -वत् (त्), भाविकः -का -की -कं, रागी -गिणी -गि (न्), हृदयङ्गमः -मा -मं.

Feelingly, *adv.* सरसं, सरागं, हृदयङ्गमप्रकारेण, कृपापूर्वं, सानुकम्पं.

Feet, *s. pl.* पादौ m. du., चरणौ n. du.; 'ornament for the feet,' नूपुरः.

To feign, *v. a.* (Invent) मनसा कृप् (c. 10. कल्पयति -यितुं) or परिकृप् or सृज् (c. 6. सृजति, स्रष्टुं).—(Pretend) छद्म कृ, छल् (c. 10. छलयति -यितुं), कपटं कृ, व्याजं कृ, अलीकृ, कूटं कृ; 'to feign one's self asleep,' आत्मानं प्रसुप्तम् इव दृश् in caus. (दर्शयति -यितुं) or मिथ्याप्रसुप्तः -प्ता -प्तं भू or अस्; 'feigning himself dead,' आत्मानं मृतवत् सन्दर्श्य; 'feigning himself just,' साधुवेशधारी *m.* (न्).

Feigned, *p. p.* or *a.* कल्पितः -ता -तं, मनःकल्पितः -ता -तं, काल्पनिकः -की -कं, कृत्रिमः -मा -मं, कृतकः -का -कं, कूटार्थः -र्थी -र्थं, विडम्बितः -ता -तं; 'a feigned dress,' कपटवेशः, छद्मवेशः; 'in a feigned dress,' छद्मवेशी *m.* (न्); 'a feigned ascetic,' छद्मतापसः, वैडालव्रतिकः, बकव्रती *m.* (न्); 'feigned kindness,' मिथ्योपचारः.

Feignedly, *adv.* मिथ्या, सकपटं, सकूटं, सव्याजं, छलेन, छद्मना, असत्यं.

Feigner, *s.* परिकल्पकः, कूटकः, छद्मवेशी *m.* (न्), कपटिकः, छली *m.* (न्), प्रतारकः; 'of madness,' उन्मत्तालिङ्गी *m.* (न्).

Feint, *s.* अपदेशः, व्यपदेशः, छद्म *n.* (न्), कूटः -टं, छलं, मिथं, कैतवं, निमित्तं, व्याजः, कपटः, उपधा; 'mock attack,' मिथ्याक्रमणं, मिथ्याघातः.

To felicitate, *v. a.* मङ्गलवचनं or कल्याणवचनं वद् (c. 1. वदति -दितुं), कल्यं वद्, कुशलवादं कृ, मङ्गलं or कुशलं भूयाद् इति वद्, आनन्द् (c. 10. -न्दयति -ते -यितुं), अभिनन्द् (c. 1. -नन्दते -न्दितुं), संवन्द्, अभिवद् (c. 10. -वादयते -यितुं), अभिनन्द् (c. 1. -नन्दति -न्दितुं).

Felicitated, *p. p.* अभिवन्दितः -ता -तं, अभिनन्दितः -ता -तं, आनन्दितः -ता -तं.

Felicitation, *s.* अभिवन्दनं, कल्यवादः, कल्याणवचनं, मङ्गलवाक्यं, कल्यं, कल्या, कुल्यं, कुशलवादः, आशीर्वादः, धन्यवादः, अभिवादनं.

Felicitous, *a.* परमानन्दितः -ता -तं, परमसुखी -खिनी -खि (न्), अतिकल्याणः -णा -णं.

Felicitously, *adv.* परमसुखेन, परमानन्देन, अतिकल्याणं, अतिसुखेन.

Felicity, *s.* परमसुखं, परमानन्दः, परमाह्लादः, सुखं, सौख्यं, अत्यन्तसुखं, हर्षः, धन्यता, कल्याणं, क्षेमं *n.* (न्), प्रह्लादः, श्रेयः *n.* (स्), निःश्रेयसं, सौभाग्यं.—(Heavenly) सद्गतिः *f.*, स्वर्गगतिः, परमागतिः *f.*, सिद्धिः *f.*, परमपदं, अपवर्गः, मोक्षः.

Feline, *a.* वैडालः -ली -लं -लिकः -की -कं, मार्जारीयः -या -यं.

Fell, *a.* (Cruel, savage) क्रूरः -रा -रं, रौद्रः -द्री -द्रं, दारुणः -णा -णं, उग्रः -ग्रा -ग्रं, निष्ठुरः -रा -रं, शौवापदः -दी -दं, व्यालः -ला -लं.

Fell, *s.* चर्म *n.* (न्), अजिनं, दृतिः *m.*, कृत्तिः *f.*, पशुचर्म *n.*

To fell, *v. a.* पत् in caus. (पातयति -यितुं), अवपत्, निपत्, अवच्छिद् (c. 7. -छिनत्ति -छेत्तुं), छिद्; अवकृत् (c. 6. -कृन्तति -कर्तितुं), प्रकृत्, अवभञ्ज् (c. 7. -भनक्ति -भंक्तुं), निभञ्ज्, प्रभञ्ज्, भंज् in caus. (भञ्जयति -यितुं), आघातेन or प्रहारेण भूमौ पत् in caus.

Felled, *p. p.* पातितः -ता -तं, निपातितः -ता -तं, अवपातितः -ता -तं, छिन्नः -न्ना -न्नं, अवच्छिन्नः -न्ना -न्नं, प्रभग्नः -ग्ना -ग्नं, [illegible]

Feller, *s.* अवपातकः, निपातकः, छेत्ता *m.* (तृ), अव[illegible]

Fellifluous, *a.* पित्तस्रावी -विणी -वि (न्), पित्तमयः -यी -यं, [illegible]

Fellmonger, *s.* पशुचर्मविक्रेता *m.* (तृ), दृतिक्रयविक्रयिकः, चर्मकारः.

Fellness, *s.* क्रूरता, दारुत्वं, दारुणता, रौद्रता, उग्रत्वं, नैष्ठुर्यं, पशुत्वं.

Felloe, *s.* (Of a wheel) नेमिः *f.* *See* Felly.

Fellow, *s.* (Companion) सहायः, सहचरः, सङ्गी *m.* (न्), अनुषङ्गी *m.*, सहभावी *m.* (न्), सहचर्ती *m.* (न्), बन्धुः *m.*, सखा *m.* (स्), मित्रं.—(Equal) वयस्यः, सवयाः *m.* (स्), समवयस्कः, तुल्यपदस्थः.—(One of the same kind) सजातिः *m.*, सजातीयः, सविधः.—(One of two or a pair) यमः -मा -मं, यमकः -का -कं, युग्मकः, एकतरः -रा -रं.—(Of a college) विद्यालये लाभालाभभागी *m.* (न्) or आयभाक् *m.* or आयभागी *m.* (न्).—(Of a learned body) पण्डितगणाभ्यन्तरः, आचार्यपंक्त्याभ्यन्तरः.—(Of any association) गणाभ्यन्तरः, ज्ञेयभ्यन्तरः, पौक्तः, पांक्तेयः.—(Appellation of contempt) मानवकः, मनुष्यकः, जाल्मः; 'poor fellow,' अपस्वी *m.* (न्); 'my good fellow,' भद्र, सौम्य.

To fellow, *v. a.* समायुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), संयुज्, समाधा (c. 3. -दधाति -धातुं), सन्धा, एकचक्रं, एकीकृ, तुल्यीकृ.

Fellow-citizen, *s.* एकपौरः, एकपुरवासी *m.* (न्), एकनगरस्थः, एकग्रामीणः, एकग्रामनिवासी *m.* (न्), सांस्थानिकः.

Fellow-citizenship, *s.* पौरसख्यं, पौरसाहार्यं, पौरसाहित्यं, एकपौरत्वं.

Fellow-commoner, *s.* विद्यालये आचार्यगणसहभोजी कुलीनछात्रः.

Fellow-councilor, *s.* सहमन्त्री *m.* (न्), समन्त्री *m.*, समसचिवः.

Fellow-countryman, *s.* स्वदेशजः, स्वदेशीयः, एकदेशीयः, एकदेशवासी *m.* (न्), एकस्थानजः, सांस्थानिकः, संस्थः.

Fellow-creature, *s.* सजातिः *m.*, सजातीयः, समानजातिः *m.*, समानजातीयः, समभूतं, समभावः, समजः.

Fellow-feeling, *s.* समदुःखत्वं, समदुःखसुखत्वं, समभावः, कृपा, अनुकम्पा.

Fellow-heir, *s.* समांशी *m.* (न्), समाधिकारी *m.* (न्), समांशभाक् *m.* *See* Co-heir.

Fellow-helper, *s.* सहकारी *m.* (न्), सहकृत् *m.*, साहाय्यकृत् *m.*, सहायः.

Fellow-laborer, *s.* सहकर्मी *m.* (न्), एककर्मकारी *m.*, समभूयकारी *m.*

Fellow-prisoner, *s.* सहबन्दिः *f.*, एककारास्थायी *m.* (न्), एककारागुप्तः.

Fellow-scholar, *s.* सहाध्यायी *m.* (न्), सहाध्येता *m.* (तृ), सहशिष्यः, सहछात्रः.

Fellow-servant, *s.* सहदासः, सहभृत्यः, एकप्रभुसेवकः, सहसेवकः.

Fellowship, *s.* सहायता -त्वं, साहाय्यं, साहित्यं, सख्यं, संसर्गः, संसर्गिता, सङ्गः, सङ्गतिः *f.*, साङ्गत्यं, सङ्गित्वं, सङ्गमः, सङ्गातः, संयोगः, साहचर्यं, समागमः, संवासः, मैत्र्यं, मैत्री, मित्रत्वं, सख्यं, सौहृदं.—(In a college) विद्यालये आयभागित्वं or आयसंविभागिनः पदं or अधिकारः or वृत्तिः *f.*

FELLOW-SOLDIER, *s.* सहयुध्वा *m.* (न्), सहयुध्वानः, सहयोद्धा *m.* (द्धृ), सहसैन्यः.

FELLOW-STUDENT, *s.* सहाध्यायी *m.* (न्), सहपाठकः, सहशिष्यः, सहछात्रः, समछात्रः, सब्रह्मचारी *m.* (न्), सतीर्थः, सतीर्थ्यः.

FELLOW-SUBJECT, *s.* एकराजभक्तः, एकराजाधीनः, एकराज्यवासी *m.* (न्).

FELLOW-SUFFERER, *s.* सहदुःखी *m.* (न्), समदुःखी *m.*, समदुःखभागी *m.* (न्), सहदुःखभाक् *m.* (ज्), समदुःखोपेतः, सहभोगी *m.* (न्).

FELLOW-TRAVELLER, *s.* समध्वः -ध्वा, समपथगः, सहयायी *m.* (न्), सहपथिकः, सहगामी *m.* (न्), समाध्वनि वर्त्तमानः, सममार्गेण यायी *m.* (न्).

FELLOW-WORKER, *s.* सहकर्म्मी *m.* (न्), एककर्म्मकारी *m.* (न्), सहकारः, सहकृत्वा *m.* (न्).

FELLY, *adv.* दारुणं, क्रूरं, निष्ठुरं, उग्रं, रौद्रतया, पशुवत्, श्वापदवत्.

[illegible] (Of a wheel) नेमिः *f.*, चक्रनेमिः, चक्रपरिधिः *m.*, प्रधिः *m.*, [illegible] नीध्रं, नीव्रः.

[illegible], *s.* आत्महा *m.* (न्), आत्मघाती *m.* (न्), आत्मत्यागी *m.* (न्), कृतजीवितत्यागः, आत्मव्यापादकः.

FELON, *s.* आततायी *m.* (न्), महापातकी *m.* (न्), महापापी *m.* (न्), महापराधी *m.* (न्), साहसिकः.—(Whitlow) नखम्पचः, चिप्पं.

FELONIOUS, *a.* आततायी -यिनी -यि (न्), जिघांसुः -सुः -सु, घाती -तिनी -ति (न्), साहसिकः -की -कं, साहसी -सिनी -सि (न्), दुराचारः -रा -रं, दुर्वृत्तः -त्ता -त्तं, दुष्टः -ष्टा -ष्टं, पापिष्ठः -ष्ठा -ष्ठं, वधोद्यतः -ता -तं, सन्नद्धः -द्धा -द्धं, द्रोहबुद्धिः -द्धिः -द्धि.

FELONIOUSLY, *adv.* द्रोहबुद्ध्या, द्रोहचेतसा, द्रोहचिन्तनपूर्व्वं, दुष्टमतिपूर्व्वं.

FELONY, *s.* आततायिता, महापातकं, महापापं, महापराधः, साहसं.

FELT, *p. p.* अनुभूतः -ता -तं, जातः -ता -तं, उपगतः -ता -तं, विदितः -ता -तं, ज्ञातः -ता -तं, चित्तभवः -वा -वं, आहितः -ता -तं.

FELT, *s.* ऊर्णा, और्णवस्त्रं, उर्णा, और्णकं, ऊर्णायुः *m.*, कम्बलः.

To FELT, *v. a.* ऊर्णालोमादि संहत्य व्यूतिव्यतिरेकेण स्थूलवस्त्रं कृ.

FELUCCA, *s.* अग्रे पश्चाच्च कर्णयुक्ता लघुनौका or लघुनौका यस्याः कर्णः कदापि पश्चात् कदापि अग्रे युज्यते.

FEMALE, *s.* स्त्री, नारी, मानुषी, मनुषी, अङ्गना, योषित् -ता, योषा, महिला, वनिता, अबला, स्त्रीजनः, अङ्गनाजनः, अबलाजनः, वधूः, सीमन्तिनी, वामा; 'female friend,' सखी; 'female apartments,' शुद्धान्तः.

FEMININE, *a.* स्त्रैणः -णी -णं, स्त्रीसम्बन्धी -न्धिनी -न्धि (न्), निष्पुरुषः -षा -षं, स्त्रीधर्म्मा -र्म्मा -र्म्म (न्).—(Soft, delicate) सुकुमारः -री -रं, कोमलः -ला -लं, पेलवः -वा -वं, मृदुः -द्वी -दु; 'the feminine gender,' स्त्रीलिङ्गं.

FEN, *s.* अनूपः, अनूपभूः *f.*, कच्छः, कच्छभूः *f.*, पङ्कः, कर्द्दमः.

FENCE, *s.* आवरणं, वृतिः *f.*, प्रान्ततो वृतिः, प्रावृतिः *f.*, प्राकारः, प्राचीरं, अवरोधकं, वेष्टकः, वेष्टनं, वेष्टः, आवेष्टकः, प्रावरः, आवारः, वारणं -णी, वरणः, स्तम्भकरः, मत्तवारणं, मत्तालम्बः, गडः, नेमः, मोघः, मोघाली.—(Defence) रक्षा -क्षणं, गुप्तिः *f.*, त्राणं.

To FENCE, *v. a.* (Inclose with a hedge) प्राचीरेण परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं) or आवृ (c. 5. -वृणोति -वरितुं -रीतुं) or परिवृ or अवरुध् (c. 7. -रुणद्धि -रोद्धुं) or निरुध् or वृ in caus. (वारयति -यितुं).—(Fortify) परिखाप्राकारादिना परिवृ or आवृ or संवेष्ट्.—(Defend) रक्ष् (c. 1. रक्षति -क्षितुं), परिरक्ष्.

To FENCE, *v. n.* (Practise the art of fencing) यष्टिद्वारेण शस्त्रविद्यां or आयुधविद्याम् अभ्यस् (c. 4. -अस्यति -असितुं) or शिक्ष् (c. 1. शिक्षते -क्षितुं), त्सरुमार्गान् कृ, यष्टिमार्गान् कृ.—(Fight with foils) यष्टियुद्धं कृ, दण्डादण्डि युद्धं कृ, यष्टिक्रीडां कृ, दण्डक्रीडां कृ.

FENCED, *p. p.* or *a.* प्राचीरेण वृतः -ता -तं, सावरणः -णा -णं, प्राकाराद्यावृतः -ता -तं, प्रावृतः -ता -तं, प्राकारीयः -या -यं, अवरुद्धः -द्धा -द्धं.

FENCELESS, *a.* अनावृतः -ता -तं, अरक्षितः -ता -तं, अरुद्धः -द्धा -द्धं.

FENCER, *s.* यष्टियुद्धकर्त्ता *m.* (र्त्तृ), आयुधविद्याभ्यासी *m.* (न्), यष्टिक्रीडाशिक्षकः.

FENCING, *s.* आयुधविद्या, शस्त्रविद्या, यष्टियुद्धं, दण्डयुद्धं, यष्टिक्रीडा.

FENCING-MASTER, *s.* आयुधविद्योपदेशकः, यष्टिक्रीडोपदेशी *m.* (न्).

FENCING-SCHOOL, *s.* आयुधविद्यावेश्म *n.* (न्), आयुधशिक्षाशाला, शस्त्रविद्याशिक्षालयः, यष्टिक्रीडाशिक्षाशाला.

To FEND, *v. a.* वृ in caus. (वारयति -यितुं), निवृ, प्रतिहन् (c. 2. -हन्ति -न्तुं).

FENDER, *s.* अङ्गारगुप्तिः *f.*, अङ्गारवारणी -णं, अङ्गारावरोधकं, अङ्गारस्तम्भकरः.—(Of a carriage) वरूथः, रथगुप्तिः *f.*

FENNEL, *s.* शालेयः, सालेयः, शतपुष्पा, भूरिपुष्पा, स्कन्धबन्धना, छत्रा, शीतशिवः, मधुरिका, मिशी, मिश्रेया, कारवी, घोषा.

FENNY, *a.* अनूपः -पा -पं, आनूपः -पी -पं, कच्छः -च्छा -च्छं, जलाढ्यः -ढ्या -ढ्यं, आप्यः -प्या -प्यं, सजलः -ला -लं, पङ्किलः -ला -लं.

FEOD, *s.* युद्धे ममोपकारी भवेति सन्धिं कृत्वा भूस्वामिना परहस्ते समर्पिता भूमिः or परस्मै विसर्ज्जितः क्षेत्राधिकारः.

FEODAL, FEODARY. *See* FEUDAL, FEUDATORY.

To FEOFF, *v. a.* पूर्व्वोक्तसन्धिना क्षेत्राद्यधिकारं परहस्ते or परस्मै सम् in caus. (-अर्पयति -यितुं) or परं क्षेत्राद्यधिकारे नियुज् (c. 10. -योजयति -यितुं).

FEOFFEE, *s.* पूर्व्वोक्तसन्धिपुरःसरं भूस्वामिना क्षेत्राद्यधिकारे नियुक्तः or क्षेत्राद्यधिकारवान् *m.* (त्).

FEOFFER, *s.* पूर्व्वोक्तसन्धिपुरःसरं परस्मै क्षेत्राद्याधिकारसमर्पकः.

FEOFFMENT, *s.* पूर्व्वोक्तसन्धिपुरःसरं परस्मै समर्पितो भूम्यधिकारः.

FERACIOUS, *a.* स्फीतः -ता -तं, फली -लिनी -लि (न्), अबन्ध्यः -न्ध्या -न्ध्यं.

FERACITY, *s.* फलवत्त्वं, साफल्यं, स्फीतता, अबन्ध्यता, उर्व्वरात्वं.

FERINE, *a.* पाशवः -वी -वं, शौवापदः -दी -दं, श्वापदः -दी -दं, पशुशीलः -ला -लं, पशुव्यवहारः -रा -रं, पशुधर्म्मा -र्म्मा -र्म्म (न्), वन्यः -न्या -न्यं.

FERITY, *s.* पशुता -त्वं, पशुशीलता, क्रूराचारत्वं, निष्ठुरता.

To FERMENT, *v. a.* अन्तःक्षोभं or अन्तश्चलनं or अन्तस्तापं or उद्भावं जन् (c. 10. जनयति -यितुं), उत्सेचनं जन्, अन्तः क्षुभ् (c. 10. क्षोभयति -यितुं), उत्तप् (c. 10. -तापयति -यितुं).

To FERMENT, *v. n.* अन्तःक्षुभ् (c. 4. क्षुभ्यति, क्षोभितुं), अन्तःक्षोभं or अन्तस्तापम् उपगम् (c. 1. -गच्छति -गन्तुं) or गम् or इ (c. 2. एति -तुं), उत्तप्तः -प्ता -प्तं भू or अस्, उद्भू, फेन (nom. फेनायते).

FERMENT, *s.* (Intestine motion, heat) अन्तःक्षोभः, अन्तस्तापः, अन्तर्दाहः, अन्तर्वेगः, अन्तरुत्सेकः, उत्तापः, अन्तरालोडनं, अन्तरुष्मः, उग्रत्वं, प्रचण्डता.—(That which causes fermentation, yeast) नग्नहूः *m.*, किण्वः -ण्वं, मण्डः -ण्डं, सुरामण्डः, अभिषवः, कारोत्तरः, कारोत्तमः, कादम्बरीबीजं.

FERMENTABLE, *a.* अन्तरुत्सेकयोग्यः -ग्या -ग्यं, अन्तरुत्सेचनक्षमः -मा -मं, अन्तःक्षोभणीयः -या -यं.

FERMENTATION, *s.* सन्धानं, सन्धिका, अन्तर्दहनं, अन्तःक्षोभः, अन्तस्तापः, अन्तर्दाहः, अन्तरुत्सेकः, उत्सेकः, उत्सेचनं, उद्भावः, उत्तापः, उग्रत्वं, अन्तरुष्मः, उच्चण्डता, अन्तश्चण्डता, अन्तरालोडनं, विकारः.

FERMENTATIVE, *a.* उद्भावकारी -रिणी -रि (न्), अन्तःक्षोभकारी &c., उत्सेकजनकः -का -कं, मण्डजनकः -का -कं.

FERMENTED, *a.* विकृतः -ता -तं, विकारितः -ता -तं, सन्धितः -ता -तं, सन्धानोपगतः -ता -तं, अन्तःक्षुब्धः -ब्धा -ब्धं, उत्सिक्तः -क्ता -क्तं; 'fermented liquor,' सुरासवः, यवसुरं.

FERN, *s.* समङ्गा, गुप्तपुष्प ओषधिभेदः, बहुपत्रकः.

FERNY, *a.* समङ्गाविशिष्टः -ष्टा -ष्टं, समङ्गावृतः -ता -तं, समङ्गामयः -यी -यं.

FEROCIOUS, *a.* रौद्रः -द्री -द्रं, क्रूरः -रा -रं, अतिक्रूरः -रा -रं, मारात्मकः -का -कं, उग्रः -ग्रा -ग्रं, शौवापदः -दी -दं, श्वापदः -दी -दं, व्यालः -ला -लं, साहसिकः -की -कं, दारुणः -णा -णं, क्रूरचरितः -ता -तं, क्रूरकर्म्मा -र्म्मा -र्म्म (न्), रौरवः -वी -वं, व्यालतमः -मा -मं.

FEROCIOUSLY, *adv.* अतिक्रूरवत्, अतिक्रौर्य्येण, श्वापदवत्, व्यालवत्, उग्रं.

FEROCITY, *s.* रौद्रता, क्रूरता, अतिक्रूरता, क्रौर्य्यं, उग्रत्वं, व्यालत्वं.

FERREOUS, *a.* लौहः -ही -हं, आयसः -सी -सं, लोहलः -ला -लं, लोहमयः -यी -यं, अयोमयः -यी -यं, लोहसभावः -वा -वं.

FERRET, *s.* बभ्रुः *m.*, नकुलः, अङ्गूषः, नकुलजातीयो जन्तुः.

To FERRET, *v. a.* शशकादिबिलेवासिनो क्षुद्रजन्तून् बभ्रुभिर् गर्त्तेभ्यो निःसृ in caus. (-सारयति -यितुं) or गर्त्तेभ्यो बहिष्कृत्य अनुसृ, इन्दुरादीन् गर्त्ताश्रयान् निःसृ in caus.

FERRUGINOUS, *a.* लोहकलङ्कमयः -यी -यं, अयोमलवान् -वती -वत् (त्).

FERRULE, *s.* लोहवलयः, लोहबन्धनी -नं, लौहरक्षणी, दण्डाग्रत्राणं.

To FERRY OVER, *v. a.* नावा or नौकया नदीं or नदीपारं तॄ in caus. (तारयति -यितुं).

To FERRY OVER, *v. n.* नौकया नदीं or नदीपारं तॄ (c. 1. तरति -रितुं -रीतुं) or सन्तॄ.

FERRY, *s.* (Place of passing over rivers) नदीतरस्थानं, तरस्थानं, तरणस्थानं, उत्तरणस्थानं, तरः, घट्टः -ट्टी, उमः.

FERRY-BOAT, *s.* तरणनौका, तरणः -णिः *f.*, तारणः -णिः *f.*, तरित्री, तरिः *f.*, तरिकं -का, तारकः -कं, तरण्डः -ण्डा -ण्डी, तरालुः *m.*, तरान्धुः *m.*, वहित्रं, उडुपः -पं.

FERRY-MAN, *s.* तारकः, तरिकः -की *m.* (न्), तारणः, तरिता *m.* (तृ).

FERTILE, *a.* बहुफलः -ला -ली -लं, बहुफलदः -दा -दं -दायी -यिनी -यि (न्), बहुफलोत्पादकः -का -कं, बहुशस्यदः -दा -दं, प्रचुरशस्योत्पादकः -का -कं, फली -लिनी -लि (न्), फलवान् -वती -वत् (त्), सफलः -ला -लं, स्फीतः -ता -तं, पीनः -ना -नं, अबन्ध्यः -न्ध्या -न्ध्यं; 'fertile soil,' उर्व्वरा or ऊर्व्वरा.

FERTILELY, *adv.* सफलं, सबहुफलं, स्फीतं, स्फीत्या, यथा बहुफलम् उत्पद्यते तथा, अबन्ध्यं.

FERTILENESS, FERTILITY, *s.* फलवत्त्वं, सफलता, फलिता, साफल्यं, स्फीतिः *f.*, बहुफलोत्पादकत्वं, अबन्ध्यत्वं, उर्व्वरात्वं, ऊर्व्वरत्वं.

To FERTILIZE, *v. a.* सफल (nom. सफलयति -यितुं), सफलीकृ, स्फीतीकृ, स्फाय् in caus. (-[illegible] -यितुं), आप्यै in caus. (-प्याययति -यितुं).

FERTILIZED, *p. p.* सफलीकृतः -ता -तं, स्फीतीकृतः -ता -तं, आप्यायितः -ता -तं.

FERULE, FERULA, *s.* काष्ठफलकविशेषो येन हस्ततले शिष्यताडनं क्रियते.

To FERULE, *v. a.* पूर्व्वोक्तकाष्ठफलकेन करतले शिष्यं तड् (c. 10. ताडयति -यितुं).

FERVENCY, *s.* व्यग्रता, चण्डता, उच्चण्डता, प्रचण्डता, उष्णता, उष्मः, उत्तापः, तैक्ष्ण्यं, तीक्ष्णता, उद्योगः, उद्युक्तता, उग्रता, औत्सुक्यं, अनुरागः, आसक्तिः *f.*, चित्तासक्तिः *f.*, मनोनिर्बन्धः, उत्साहः; 'pious ardour,' अतिशयभक्तिः *f.*, भक्तिव्यग्रता.

FERVENT, *a.* व्यग्रः -ग्रा -ग्रं, चण्डः -ण्डा -ण्डं, प्रचण्डः -ण्डा -ण्डं, उच्चण्डः -ण्डा -ण्डं, उत्तप्तः -प्ता -प्तं, उष्णः -ष्णा -ष्णं, उद्योगी -गिनी -गि (न्), उद्युक्तः -क्ता -क्तं, सोद्योगः -गा -गं, तीक्ष्णः -क्ष्णा -क्ष्णं, अनुरक्तः -क्ता -क्तं, अत्यनुरागी -गिणी -गि (न्), उत्सुकः -का -कं, आसक्तः -क्ता -क्तं, समुद्यतः -ता -तं, उग्रः -ग्रा -ग्रं; 'in piety,' अतिभक्तः -क्ता -क्तं, भक्तिव्यग्रः -ग्रा -ग्रं.

FERVENTLY, *adv.* व्यग्रं, अत्यनुरागेण, सतैक्ष्ण्यं, उत्तापेन, सोद्योगं, औत्सुक्येन, उत्सुकं, उग्रं, सानुरागं, प्रचण्डं, व्यवसितं, अतिकुतूहलेन.

FERVID, *a.* तप्तः -प्ता -प्तं, सन्तप्तः -प्ता -प्तं, उपतप्तः -प्ता -प्तं, अभितप्तः -प्ता -प्तं, उत्तप्तः -प्ता -प्तं, चण्डः -ण्डा -ण्डं, प्रचण्डः -ण्डा -ण्डं, उष्णः -ष्णा -ष्णं, तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं, तिग्मः -ग्मा -ग्मं.

FERVOUR, *s.* तापः, उत्तापः, सन्तापः, उपतापः, अभितापः, उष्णता, औष्ण्यं, दाहः, चण्डता, तीक्ष्णता, तैक्ष्ण्यं, तिग्मता, तीव्रता. *See* FERVENCY.

FESTAL, *a.* पार्व्वः -र्व्वी -र्व्वं, औत्सविकः -की -कं, यात्रिकः -की -कं.

To FESTER, *v. n.* पूय् (c. 1. पूयते -यितुं), पाकं कृ, पक्वः -क्वा -क्वं भू, सपूयः -या -यं भू, पूतीभू, व्रणवद् दुष् (c. 4. दुष्यति, दोढुं).

FESTIVAL, *s.* उत्सवः, पर्व्व *n.* (न्), पर्व्वाहः, पर्व्वरीणं, उत्सवदिनं, महः, महः *n.* (स्), उद्धर्षः, यात्रा, उद्धवः, क्षणः, अभ्युदयः, चर्चरी; 'great festival,' महोत्सवः; 'public festival,' यात्रोत्सवः; 'fixed,' नैश्चित्यं; 'completion of a festival,' पर्व्वपूर्णता.

FESTIVE, *a.* आनन्दी -न्दिनी -न्दि (न्), सानन्दः -न्दा -न्दं, आनन्दसूचकः -का -कं, सोत्सवः -वा -वं, उत्सवकारी -रिणी -रि (न्), [illegible]

FESTIVITY, *s.* समुत्सवः, उत्सवः, महोत्सवः, उत्सवकालः, [illegible] आह्लादः, आमोदः, प्रमोदः, विश्रम्भः.

FESTOON, *s.* माला, हारः, प्रालम्बिका; 'of flowers,' कुसुमाला.

FETAL, *a.* गार्भः -र्भी -र्भं, गार्भिकः -की -कं, भूणस्यन्धी -न्धिनी -न्धि (न्).

To FETCH, *v. a.* (Bring) आनी (c. 1. -नयति -नेतुं), उपानी, आहृ (c. 1. -हरति -हर्त्तुं).—(Derive) आनी, निर्णी, नी, अपवह् (c. 1. -वहति -वोढुं).—(Draw, cause to appear) निष्कृष् (c. 1. -कर्षति -क्रष्टुं), सु in caus. (स्रावयति -यितुं), उत्पद् in caus. (-पादयति -यितुं), जन् in caus. (जनयति -यितुं); 'draw blood,' शोणितम् उत्पद् in caus., रक्तं सु in caus.; 'fetch a sigh,' दीर्घं निःश्वस् (c. 2. -श्वसिति -तुं) or निश्वस्.—(Perform) कृ.—(Fetch a price) अमुकमूल्येन विक्री in pass. (-क्रीयते); 'what price does it fetch?' कियता मूल्येन विक्रीयते.

FETCH, *s.* उपायः, व्यपदेशः, अपदेशः, छलं -लना, कपटः, व्याजः.

FETCHED, *p. p.* आनीतः -ता -तं, उपानीतः -ता -तं, आहृतः -ता -तं.

FETE, *s.* उत्सवः, महोत्सवः, उत्सवदिनं, उद्धर्षदिनं.

FETID, *a.* दुर्गन्धः -न्धा -न्धं, दुर्गन्धी -न्धिनी -न्धि (न्), असुगन्धः -न्धा -न्धं, उग्रगन्धिः -न्धिः -न्धि, पूतिगन्धिकः -की -कं, असुरभिः -भिः -भि, पूतः -ता -तं.

FETIDNESS, *s.* दुर्गन्धत्वं, दौर्गन्ध्यं *m.*, पूतिगन्धता, पूतिः *f.*, पूतत्वं.

FETLOCK, *s.* अश्वानां पादजङ्घासन्धिः *m.* or चरणजङ्घापर्व्व *n.* (न्) or पादजङ्घासन्धिरुहो लोमपिण्डः or लोमगुच्छकः.

FETOR, *s.* दुर्गन्धः, पूतिगन्धः, कुत्सितगन्धः, उग्रगन्धः, असुगन्धः.

FETTER, *s.* निगडः -डं, बन्धनं, बन्धः, पाशः, शृङ्खलः -ला -लं, यन्त्रणं, यन्त्रं, योक्त्रं, चारः, प्रसितिः *f.*; 'for the feet,' पादपाशः -शी, चरणपाशः, पादबन्धनं; 'of iron,' लौहबन्धः -न्धं -न्धनं, शृङ्खला.

To FURTHER, *a.* उपकृ, पुरस्कृ, साहाय्यं कृ, प्रवृत् (c. 10. -वर्तयति -यितुं), प्रवृध् (c. 10. -वर्धयति -यितुं), संवृध्, प्रयुज् (c. 10. -योजयति -यितुं), अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), उपग्रह्, त्वर् (c. 10. त्वरयति -यितुं), उपकारं कृ, पक्षपातं कृ.

FURTHERANCE, *s.* उपकारः -रिता, उपकरणं, साहाय्यं, वर्धनं, प्रवर्धनं, वृद्धिः *f.*, संवर्धना, उपग्रहः, अनुग्रहः, सङ्ग्रहः, प्रवर्तनं, पक्षपातः.

FURTHERED, *p. p.* प्रवर्धितः -ता -तं, संवर्धितः -ता -तं, प्रवर्तितः -ता -तं, कृतसाहाय्यः -य्या -य्यं, उपकृतः -ता -तं, कृतोपकारः -रा -रं.

FURTHERER, *s.* उपकारी *m.* (न्), उपकारकः, साहाय्यकर्त्ता *m.* (तृ), प्रवर्धकः, प्रवर्तकः, संवर्धनकारी *m.*, उत्तरसाधकः, प्रयोजकः.

FURTHERMORE, *s.* अपरञ्च, अपरं, अपरन्तु, परन्तु, अधिकन्तु, अन्यच्च, अपिच, किञ्च.

FURTHEST, FURTHERMOST, *a.* दूरतमः -मा -मं, विदूरतमः -मा -मं, दविष्ठः -ष्ठा -ष्ठं, सुदूरः -रा -रं, अत्यन्तदूरः -रा -रं, अतिदूरस्थः -स्था -स्थं.

FURTHEST, *adv.* दूरतमं, विदूरतमं, सुदूरं, अत्यन्तदूरं, दविष्ठं.

FURTIVE, *a.* चौरहृतः -ता -तं, छलेन हृतः -ता -तं or गृहीतः -ता -तं, चौर्येण अपहृतः -ता -तं, मूषितः -ता -तं.

FURTIVELY, *adv.* छलेन, निभृतं, सुनिभृतं, रहसि, उपांशु, चौरवत्.

FURUNCLE, *s.* व्रणः -णं, नालीव्रणः, स्फोटः -टकः, विस्फोटः, गण्डः.

FURY, *s.* (Madness) उन्मादः, उन्मत्तता, प्रामाद्यं, मदोत्कटत्वं, मदोद्यता.—(Rage) संरम्भः, संरब्धता, उग्रता -त्वं, क्रोपः, क्रोधः, औत्कट्यं, चण्डता, उग्रचण्डता.—(Impetuous motion) अत्यन्तवेगः, महावेगः, आपातः.—(Goddess of vengeance) चण्डा -ण्डी, दुर्गा.—(Furious woman) चण्डी.

FURZE, *s.* प्रचुरकण्टकः पीतपुष्पः सदाहरितवर्णो गुल्मभेदः.

FURZY, *a.* पूर्व्वोक्तगुल्मावृतः -ता -तं, सकण्टकस्तबपूर्णः -र्णा -र्णं.

FUSCATION, *s.* तिमिरीकरणं, तिमिरं, कलुषीकरणं, अन्धकारकरणं.

FUSCOUS, *a.* आकृष्णः -ष्णा -ष्णं, श्यामः -मा -मं, कपिशवर्णः -र्णा -र्णं.

To FUSE, *v. a.* विली in caus. (-लाययति -लापयति -यितुं), विद्रु in caus. (-द्रावयति -यितुं), द्रवीकृ, गल् in caus. (गालयति -यितुं), गलितीकृ, जलसात्कृ, आर्द्रीकृ, विलीनीकृ.

To FUSE, *v. n.* विली (c. 4. -लीयते -लेतुं), प्रविली, प्रली, द्रु (c. 1. द्रवति, द्रोतुं), विद्रु, गल् (c. 1. गलति -लितुं), विगल्, द्रवीभू, विलीनीभू, जलसाद्भू, क्षर् (c. 1. क्षरति -रितुं).

FUSED, *p. p.* द्रुतः -ता -तं, विद्रुतः -ता -तं, विद्रावितः -ता -तं, विलीनः -ना -नं, लीनः -ना -नं, निलीनः -ना -नं, द्रवीकृतः -ता -तं, द्रवीभूतः -ता -तं, गलितः -ता -तं, गालितः -ता -तं, परिगलितः -ता -तं, तमः -मा -मं.

FUSEE, *s.* (Of a watch) घटीमध्यवर्त्ती सूची यत्परितः शृङ्खलम् आवेष्टितं तिष्ठति.—(Small firelock) क्षुद्रपरिमाणा युद्धनाडी or आग्नेयनाडिः *f.*

FUSIBILITY, *s.* द्राव्यत्वं -ता, विद्राव्यता, द्रवत्वं, गलनीयता, विलयनीयता.

FUSIBLE, *a.* द्राव्यः -व्या -व्यं, विद्राव्यः -व्या -व्यं, विलयनीयः -या -यं, गलनीयः -या -यं, द्रवणीयः -या -यं, सुविलयः -या -यं, क्षरणीयः -या -यं, क्षरभावः -वा -वं, क्षाव्यः -व्या -व्यं, विलयनशीलः -ला -लं.

FUSIL, *s.* क्षुद्रपरिमाणा लघुयुद्धनाडी or आग्नेयनाडिः *f.*

FUSILEER, *s.* पूर्व्वोक्तशस्त्रधारी or पूर्व्वोक्तशस्त्रभृत् सैन्यः or योद्धा *m.* (द्धृ).

FUSING, *part.* द्रवमाणः -णा -णं, गालनी -लिनी -लि (न्).

FUSION, *s.* द्रावः, द्रवत्वं, विलयनं, विलयः, विद्रावः, गलनं, गालनं, लयः -यं, गलितत्वं, जलसात्त्वं, द्रवीकरणं, विलीनता.

FUSS, *s.* सम्भ्रमः, व्यग्रता, आकुलत्वं, वैक्लव्यं, व्यस्तता, तुमुलं, कोलाहलः.

FUSSY, *a.* सम्भ्रमशीलः -ला -लं, व्यग्रशीलः -ला -लं.

FUST, *s.* (Of a column) स्तम्भदण्डः, स्तम्भः, स्तूणास्तम्भः, स्तम्भयष्टिः *f.*—(Strong smell) दुर्गन्धः, कुत्सितगन्धः, पूतिगन्धः, उग्रगन्धः.

FUSTIAN, *s.* (Cloth) स्थूलकार्पासं, स्थूलवस्त्रं, स्थूलशाटकः, वराशिः *m.*—(Inflated style of writing) गर्व्वितवाग्वृत्तिः *f.*, दर्पवाक्यं, अतिशयोक्तिः *f.*

FUSTIAN, *a.* कार्पासिकः -की -कं, स्थूलकार्पासमयः -यी -यं.—(Inflated) अतिगर्व्वितः -ता -तं, आम्भातः -ता -तं.

FUSTINESS, *s.* पूतिः *f.*, कुत्सितत्वं, पूतिगन्धता, दुर्गन्धः, विरसता, वैरस्यं.

FUSTY, *a.* दुर्गन्धः -न्धा -न्धं, पूतिगन्धः -न्धा -न्धं, उग्रगन्धिः -न्धिः -न्धि, कुत्सितगन्धः -न्धा -न्धं, विरसः -सा -सं, पूतः -ता -तं, पर्य्युषितः -ता -तं.

FUTILE, *a.* लघ्वर्थः -र्था -र्थं, तृणप्रायः -या -यं, निरर्थकः -का -कं, अनर्थकः -का -कं, मोघः -घा -घं, असारः -रा -रं, क्लीवः -वा -वं, मन्दः -न्दा -न्दं.

FUTILITY, *s.* अनर्थकत्वं, लाघवं, मोघता, असारता, क्लीवता, निर्गुणत्वं.

FUTURE, *a.* भावी -विनी -वि (न्), भविष्यन् -ष्यन्ती -ष्यत् (त्), आगामी -मिनी -मि (न्), अनागतः -ता -तं, भाविकः -का -कं, उत्तरकालीनः -ना -नं, कालान्तरीयः -या -यं, शौषस्तिकः -की -कं, अद्यतनः -नी -नं.—(Belonging to another world) पारलौकिकः -की -कं, पारत्रिकः -की -कं, आमुष्मिकः -की -कं, अमुत्रयः -त्रया -त्रयं; 'future event,' भाविघटना; 'future tense,' भविष्यत्कालः.

FUTURE, FUTURITY, *s.* भविष्यत्कालः, भाविकालः, उत्तरकालः, आगामिकालः, परकालः, भावि *n.* (न्), भविष्यत् *n.*, आयतिः *f.*, आयतिः *f.*, उदर्कः; 'knowledge of futurity,' भविष्यज्ञानं; 'ignorant of the future,' अद्यस्तनविद् *m. f. n.*

FUZZBALL, *s.* रेणुपूरितो गोमयछत्रप्रभेदः, बहुपांशुगर्भं विड्जछत्रं.

FY, *exclam.* धिक्, अपैहि, अपेहि, शान्तं, उम्, अये, अरे, कित्.

G.

GABARDINE, *s.* स्थूलशाटकः, स्थूलशाटी, ग्राम्यजनभृतं शिथिलोत्तरीयं.

To GABBLE, *v. n.* जल्प् (c. 1. जल्पति -ल्पितुं), उपजल्प्, प्रलप् (c. 1. -लपति -पितुं), अनर्थकवाक्यम् उदीर् (c. 10. -ईरयति -यितुं), अनर्थकशब्दं कृ, वृथाशब्दं कृ.

GABBLE, *s.* जल्पः -ल्पना -ल्पितं, प्रजल्पः, प्रलापः, निरर्थकशब्दः, चीत्कारः.

GABBLER, *s.* जल्पकः, जल्पाकः, उपजल्पी *m.* (न्), अनर्थकशब्दकारी *m.* (न्).

GABEL, *s.* शुल्कः -ल्कं, करः, राजग्राह्यभागः, राजदेयो भागः, राजस्वं.

GABION, *s.* युद्धे शत्रुप्रक्षिप्तगोलनिवारको मृत्तिकागर्भः करण्डविशेषः.

GABLE, GABLE-END, *s.* गृहशृङ्गं, प्रासादशृङ्गं, गृहशिखरं, वडभिः *f.*

GAD, *s.* (Head of a spear or arrow) शूलाग्रं, बाणाग्रं.—(Wedge of steel or iron) तीक्ष्णायसकीलः, लोहकीलः.

To GAD ABOUT, *v. n.* अट् (c. 1. अटति -टितुं), पर्य्यट्, भ्रम् (c. 1. भ्रमति, c. 4. भ्राम्यति, भ्रमितुं), परिभ्रम्, अट् in freq. (अटाट्यते), इतस्ततो विचर् (c. 1. -चरति -रितुं).

GADDER, *s.* अटनकारी *m.* (न्), पर्य्यटनकृत्, भ्रमणकारी *m.*, अवनिचरः.

GADDING ABOUT, *s.* अटनं, पर्य्यटनं, भ्रमणं, परिभ्रमणं, व्रज्या, विहरणं.

GADFLY, *s.* दंशः -ञ्शी, दंशकः, वनमक्षिका, अरण्यमक्षिका, गोमक्षिका, नीलाक्षः *m.*, पांशुरः.

GAFF, *s.* (Light spear used by fishermen) लघुशूलः, धीवरी.—(For extending sails) नौकावसनप्रसारणार्थं यष्टिः *m. f.*

GAFFER, *s.* साधुजनः, आर्य्यकः, आर्य्यमाणवकः, तपस्वी *m.* (न्).

To GAG, *v. a.* मुखं बन्ध् (c. 9. बध्नाति, बन्धुं) or प्रतिबन्ध् or रुध् (c. 7. रुणद्धि, रोद्धुं) or निरुध् or प्रतिरुध् or [illegible] (c. 3. -दधाति -धातुं).

GAG, *s.* मुखरोधनं, मुखबन्धनी, मुखप्रतिबन्धकं, मुखविधानं.

GAGE, *s.* (Pledge) पणः, परिपणनं, प्रतिपाद्यं, आधिः *m.*, बन्धकः.—(Challenge) आह्वानं.—(Measure) परिमाणं, परिमाणविधिः *m.*, परिमाणरीतिः *f.*, प्रमाणं, मानं.—(Instrument for measuring) मापनयन्त्रं, परिमापनयन्त्रं; 'rain-gage,' वृष्टिमापनयन्त्रं.

To GAGE, *v. a.* (Pledge) पण् (c. 1. पणते -णितुं), पणं कृ, प्रतिज्ञा (c. 9. -जानीते -ज्ञातुं), अङ्गीकृ.—(Bind by pledge) पणेन बन्ध् (c. 9. बध्नाति, बन्धुं).—(Measure). *See* GUAGE.

To GAGGLE, *v. n.* हंसनादं कृ, हंसवत् कूज् (c. 1. कूजति -जितुं).

GAGGLING, *s.* हंसनादः, हंसरुतं, हंसकूजनं, कूजनं.

GAIETY, *s.* *See* GAYETY.

GAILY, *adv.* (Joyfully) सहर्षं, सानन्दं, हृष्टमनसा, प्रफुल्लमनसा, प्रसन्नचेतसा, प्रमोदेन.—(Splendidly) अतिशोभनं, शोभनं, सशोभं; 'gaily dressed,' शोभनवेशी -शिनी -शि (न्), उज्ज्वलवेशधारी -रिणी -रि (न्).

GAIN, *s.* लाभः, लब्धिः *f.*, प्राप्तिः *f.*, फलं, अर्ज्जनं, उपार्ज्जनं, लभ्यं, लभ्यांशः, प्रतिपत्तिः *f.*, आयः, फलोदयः, अर्थः, उत्पन्नं, पण्यफलत्वं, योगक्षेमः, वृद्धिः *f.*, विवृद्धिः *f.*, प्रयोगः.

To GAIN, *v. a.* (Obtain, acquire) अर्ज् (c. 10. अर्जयति -यितुं), उपार्ज्; लभ् (c. 1. लभते, लब्धुं), उपलभ्, आप् (c. 5. आप्नोति, आप्तुं), प्राप् सम्प्राप्, अवाप्, समाप्; आसद् (c. 10. -सादयति -यितुं), समासद्, अधिगम् (c. 1. -गच्छति -गन्तुं), गम्, प्रतिपद् (c. 4. -पद्यते -पत्तुं), आपद्, आविश् (c. 6. -विशति -वेष्टुं), समाविश्, अश् (c. 5. अश्नुते, अशितुं), समश्, उपाश्, विद् (c. 6. विन्दति, वेत्तुं, वेदितुं), अभिविद्, प्रतिविद्, इ (c. 2. एति -तुं), स्वीकृ.—(Gain by conquest) निर्जि (c. 1. -जयति -जेतुं).—(Gain over) अनुरञ्ज् (c. 10. -रञ्जयति -यितुं), प्रसाध् (c. 10. -साधयति -यितुं); 'to one's own party,' आत्मपक्षीकृ.—(Gain ground) वृध् (c. 1. वर्धते -र्धितुं), प्रभू.

To GAIN, *v. n.* (Have advantage) लाभं कृ, फलं कृ.—(Grow rich, prosper) समृद्धीभू, समृध् (c. 5. -ऋध्नोति -अर्धितुं), वृध् (c. 1. वर्धते -र्धितुं).—(Advance on, encroach) क्रमे क्रमे प्रसृप् (c. 1. -सर्पति -सप्तुं) or प्रगम् (c. 1. -गच्छति -गन्तुं).—(Prevail against) अतिरिच् in pass. (-रिच्यते), अभिभू, प्रभू, जि (c. 1. जयति, जेतुं).

GAINABLE, *a.* प्राप्यः -प्या -प्यं, लभ्यः -भ्या -भ्यं, आसादनीयः -या -यं.

GAINED, *p. p.* प्राप्तः -प्ता -प्तं, आप्तः -प्ता -प्तं, अवाप्तः -प्ता -प्तं, लब्धः -ब्धा -ब्धं, अर्ज्जितः -ता -तं, उपार्ज्जितः -ता -तं, आसादितः -ता -तं, समासादितः -ता -तं, अधिगतः -ता -तं, आपन्नः -न्ना -न्नं, उपात्तः -त्ता -त्तं, कलितः -ता -तं; 'gained with difficulty,' कृच्छ्राप्तः -प्ता -प्तं.

GAINER, *s.* अर्जयिता *m.* (तृ), अर्जकः, उपार्जकः, प्रापकः, फलप्रापकः, लब्धा (ब्धृ).

GAINFUL, *a.* फली -लिनी -लि (न्), फलदः -दा -दं, सफलः -ला -लं, अर्थकरः -री -रं, अर्थदः -दा -दं, लाभजनकः -का -कं, प्राप्तिजनकः -का -कं.

GAINFULLY, *adv.* सफलं, सलाभं, सार्थं, लाभेन, फलोदयेन.

GAINFULNESS, *s.* सफलता, सलाभता, सार्थत्वं, लाभः, लब्धिः *f.*, प्राप्तिः *f.*

GAINLY, *adv.* दक्षं, सदाक्ष्यं, युक्त्या, सपाटवं, चतुरं, पर्य्याप्तं.

To GAINSAY, *v. a.* विपरीतं वद् (c. 1. वदति -ते -दितुं), विवद्, अपवद्, प्रत्याख्या (c. 2. -ख्याति -तुं), अन्तःख्या, अपलप् (c. 1. -लपति -पितुं), विरुध् (c. 7. -रुणद्धि -रोद्धुं), अधरीकृ, बाध् (c. 1. बाधते -धितुं).

GAINSAYED, *p. p.* प्रत्याख्यातः -ता -तं, अपह्नुतः -ता -तं, बाधितः -ता -तं.

GAINSAYER, *s.* विपरीतवादी *m.* (न्), प्रत्याख्याता *m.* (तृ), अपवादकः, विवादी *m.* (न्), प्रतिवादी *m.*, विरोधी *m.* (न्), विघ्नकारी *m.* (न्).

GAIRISH, *a.* अतिशोभनः -ना -नं, एकान्तशोभनः -ना -नं, शोभामात्रसेवी -विनी -वि (न्), अलङ्करिष्णुः -ष्णुः -ष्णु, दाम्भिकः -की -कं, रूपाध्मातः -ता -तं.

GAIRISHLY, *adv.* अतिशोभनं, एकान्तशोभापूर्व्वं, रूपाध्मातवत्, सदम्भं, दाम्भिकवत्.

GAIRISHNESS, *s.* अतिशोभा, एकान्तशोभा, दम्भः, दाम्भिकत्वं, रूपाध्मातत्वं.

GAIT, *s.* गतिः *f.*, गमनं, गतं, चारः, चरणं, चलनं, सरणं, व्रजनं, अयनं; 'graceful in gait,' सुगः -गा -गं -गामी -मिनी -मि (न्), शुभगः -गा -गं, हंसगामी &c., चारचणः -णा -णं.

GAITER, *s.* स्थूलवस्त्रमयं जङ्घात्राणं or जङ्घारक्षणं, जङ्घोत्तरीयं.

GALA, *s.* उत्सवः -वदिनं, महोत्सवः, पर्व्व *n.* (न्), पर्व्वाहः, उद्धर्षः.

GALACTOPHAGIST, *s.* क्षीरपः -पायी *m.* (न्), दुग्धपः, पयस्पः, क्षीरादः, क्षीराशी *m.* (न्).

GALAXY, *s.* (Milky way) मन्दाकिनी, आकाशगङ्गा, स्वर्गङ्गा, नागवीथी, हरिताली.—(Assemblage of splendid objects) शोभनवस्तुमण्डलं, सुप्रभवस्तुसमूहः.

GALE, *s.* प्रबलवायुः *m.*, प्रचण्डवायुः *m.*, अतिवातः, वात्या, वात्यावेगः, चण्डवातः, वाताली, वातरूषः, वातगुल्मः, झञ्झावातः, झञ्झा, पवनः, पवनाघातः, जवानिलः, ध्राजिः *f.*, व्राजिः *f.*, करीषङ्कषा, फः; 'tossed by gales,' पवनक्षिप्तः -प्ता -प्तं, पवनवेगक्षिप्तः -प्ता -प्तं.

GALIOT, *s.* शीघ्रगामी लघुनौकाविशेषः.

GALL, *s.* (Bitter fluid, bile) पित्तं, तिक्तपित्तं, मायुः *m.*—(Rancour) विषं, विषहृदयत्वं, कालकूटं, दंशः, दुष्टभावः, दुर्बुद्धिः *f.*, द्रोहः, द्वेषः, कटुता, तीक्ष्णता, तिग्मता, उग्रत्वं, अरुन्तुदत्वं, कठोरता, क्रोधः.—(Excrescence on a tree) वृक्षफेनः -नकः.

GALL-BLADDER, *s.* पित्ताधारः, तिक्तपित्ताधारः, तिक्तपित्ताशयः.

GALL-STONE, *s.* पित्ताशयजा शर्करा.

To GALL, *v. a.* (Excoriate by friction) घर्षणेन चर्म्मक्षतं कृ or त्वक्छेदं कृ or त्वगुल्लेखनं कृ, चर्म्म घृष् (c. 1. घर्षति -र्षितुं) or कृष् (c. 10. कर्षयति -यितुं).—(Vex, harass) तप् (c. 10. तापयति -यितुं), परितप्, सन्तप्, पीड् (c. 10. पीडयति -यितुं), अभिपीड्, आपीड्, क्लिश् (c. 9. क्लिश्नाति, क्लेष्टुं), बाध् (c. 1. बाधते -धितुं), अर्द् (c. 10. अर्दयति -यितुं), समर्द्, मर्म्मपीडां कृ, अरुन्तुदः -दा -दं भू.

To GALL, *v. n.* (Vex one's self) आत्मानं तप् (c. 10. तापयति -यितुं), or पीड् (c. 10. पीडयति -यितुं) or बाध् (c. 1. बाधते -धितुं), परितप् in pass. (-तप्यते).

GALLANT, *a.* (Brave, heroic) वीरः -रा -रं, प्रवीरः -रा -रं, महावीर्य्यः -र्य्या -र्य्यं, शूरः -रा -रं, पराक्रान्तः -न्ता -न्तं, विक्रान्तः -न्ता -न्तं, विक्रमी -मिणी -मि (न्), साहसिकः -की -कं, माहात्मिकः -की -कं, उदारचेताः -ताः -तः (स्).—(Courteous, inclined to courtship) सभ्यः -भ्या -भ्यं, सभ्यशीलः -ला -लं, सुशीलः -ला -लं, स्त्र्युपासनशीलः -ला -लं, स्त्र्युपचारशीलः -ला -लं, सुजनः -ना -नं, प्रेमशीलः -ला -लं.

GALLANT, *s.* (Courtly man) सभ्यजनः, सुजनः.—(One attentive to ladies) स्त्र्युपासकः, स्त्र्युपचारकः -चारपरः.—(Lover) प्रणयी *m.* (न्), कामिजनः, कामी *m.* (न्), कामुकः, नायकः, रमकः.—(Paramour) जारः, रमणः, उपपतिः *m.*, पापपतिः *m.*, विटः, चेटकः.

GALLANTLY, *adv.* (Bravely) सवीर्य्यं, महावीर्य्येण, महावीरवत्, शूरवत्, समहाशौर्य्यं, सपराक्रमं, सविक्रमं, उदारवत्, प्रसभं.—(Like one inclined to courtship) स्त्र्युपासकवत्, स्त्र्युपचारकवत्, रमणवत्.

GALLANTRY, *s.* (Bravery) वीर्य्यं, महावीर्य्यं, शौर्य्यं, वीरता, शूरता,

पौरुषं, विक्रमः, पराक्रमः, धाम *n.* (न्).—(Nobleness) उदारता, औदार्य्यं, माहात्म्यं.—(Courtliness, attention to ladies) सभ्यता, सुशीलता, सुजनता, स्त्र्युपासनं, स्त्र्युपचारः.

GALLED, *p. p.* (Having the skin torn by friction) क्षतचर्म्मा -र्म्मी -र्म्म (न्), घर्षितचर्म्मा &c., छिन्नत्वक् *m. f. n.*—(Harassed) सन्तापितः -ता -तं, क्लिष्टः -ष्टा -ष्टं, पीडितः -ता -तं, बाधितः -ता -तं.

GALLEON, *s.* सुवर्णरूप्यसन्नाहरथे प्रयुक्ता बृहती विदेशीयनौका.

GALLERY, *s.* (Covered way) छन्नपथः, छन्नमार्गः.—(In a building) हर्म्ये or महाभवने इतस्ततो भ्रमणयोग्यः पथः.—(Elevated floor furnished with seats) दीर्घासनयुक्तो मञ्चः or मञ्चकः.—(Covered terrace outside a house) बहिर्द्वारप्रकोष्ठकं, वरण्डः, निष्काशः.

GALLEY, *s.* (Long, light boat) दीर्घपरिमाणा लघुनौका, मङ्गुः *m.*—(Cook-room of a ship of war) युद्धनौकायाः पाकस्थानं.

GALLEY-SLAVE, *s.* आमृत्योर् मङ्गुदण्डसञ्चारणे नियुक्तो महापातकी *m.* (न्).

GALLIARD, *a.* हृष्टः -ष्टा -ष्टं, प्रफुल्लः -ल्ला -ल्लं, उल्लसः -सा -सं, रसिकः -का -कं.

GALLICISM, *s.* फ्रान्सीयरीत्यनुसारी वाग्व्यापारः.

GALLIGASKINS, *s.* नीचभाषायां स्थूलवस्त्रमयं जङ्घोत्तरीयं or जङ्घापरिधानं.

GALLIMATIA, *s.* असम्बद्धप्रलापः, अनर्थकवाक्यं, वृथाकथा, प्रलपितं.

GALLIMAUFRY, *s.* सन्निपातः, सान्निपातिकं, प्रकीर्णकं, सङ्कीर्णकं.

GALLINACEOUS, *a.* गृह्यकुक्कुटसम्बन्धी -न्धिनी -न्धि (न्) or -वाचकः -का -कं; 'a gallinaceous fowl,' कुक्कुटः -टी, कृकवाकुः *m.*, ताम्रचूडः, चरणायुधः.

GALLING, *s.* घर्षणेन चर्म्मक्षतिः *f.* or त्वक्परिक्षतिः *f.*, चर्म्मदारणं, चर्म्मनिर्घर्षणं.

GALLINULE, *s.* कालकण्ठः -ण्ठकः, नीलकण्ठः, दात्यूहः, आत्यूहः, नत्यूहः, जलरङ्कुः, पीतमुखः, मद्गुलः, मासङ्गः, डाहुकः, खेगमनः, डुडुक्कः, मादकः.

GALLIPOT, *s.* भेषजविक्रेतृभिः प्रयुक्तं मृण्मयम् औषधपात्रं, चलुकः, चुलुकः.

GALL-NUT, *s.* मसीजलकरणे प्रयुक्तः फलाकारो वृक्षकोषः.

GALLON, *s.* द्रवद्रव्याणां परिमाणविशेषः, अङ्गैप्रस्थः.

GALLOON, *s.* स्वर्णरूप्यसूत्रमयम् ताम्बूलालङ्कारविशेषः.

To GALLOP, *v. n.* प्लु (c. 1. प्लवते, प्लोतुं), वल्ग् (c. 1. वल्गति -ल्गितुं), आवल्ग्, धोर् (c. 1. धोरति -रितुं), धाव् (c. 1. धावति -वितुं), पुलायितं कृ, प्लुतगत्या or वल्गितेन चल् (c. 1. चलति -लितुं).

GALLOP, *s.* वल्गितं, पुलायितं, पुलः, प्लुतः -तं, प्लवः -वनं, विप्लावः, विक्रान्तिः *f.*, तरङ्गः, धोरणं, धोरितं -तकं, धौरितकं.

GALLOPADE, *s.* द्रुतनृत्यविशेषो यत्र नर्त्तकाः प्लुतगत्या चलन्ति.

GALLOPER, *s.* प्लवगः -गतिः *m.*, प्लवकः, वल्गितकारी *m.* (न्), पुलायितकृत्.

To GALLOW, *v. a.* त्रस् in caus. (त्रासयति -यितुं), भी in caus. (भाययति -यितुं).

GALLOWAY, *s.* मध्यमपरिमाणो न बृहन् न क्षुद्रः तुरङ्गभेदः.

GALLOWS, *s.* उद्बन्धनकाष्ठं, उद्बन्धनवृक्षः, वधस्थानं, घातस्थानं.

GALOCHE, GALOSHE, *s.* काष्ठपादुका, उत्तरपादुका, उपपादुका.

GALVANIC, *a.* वक्ष्यमाणवैद्युतशक्तिसम्बन्धी -न्धिनी -न्धि (न्).

GALVANISM, *s.* गल्वानिनाम्ना विदेशीयधिदुषा परिकल्पिता विद्युतीयशक्तिः or वैद्युतशक्तिः or आकर्षकशक्तिः, विद्युद्विद्याङ्गं.

GALVANIST, *s.* पूर्व्वोक्तविद्युद्विद्याशास्त्रज्ञः.

To GALVANIZE, *v. a.* पूर्व्वोक्तविद्युतीयशक्त्या आकृष् (c. 1. -कर्षति -क्रष्टुं) or उपहन् (c. 2. -हन्ति -न्तुं).

GALVANIZED, *p. p.* पूर्व्वोक्तवैद्युतशक्त्युपहतः -ता -तं.

To GAMBLE, *v. n.* (With dice, &c.) अक्षैः or अक्षान् दिव् (c. 4. दीव्यति -ते, देवितुं) or प्रदिव् or प्रतिदिव्, अक्षैः क्रीड् (c. 1. क्रीडति -डितुं), अक्षादिक्रीडां कृ, द्यूतक्रीडां कृ, अक्षद्यूतं कृ.

GAMBLER, *s.* द्यूतकरः -कारः, अक्षद्यूतः, अक्षद्यूः *m.*, अक्षदेवी *m.* (न्), अक्षधूर्त्तः, धूर्त्तः, कितवः, द्यूतक्रीडकः, आक्षिकः. *See* GAMESTER.

GAMBLING, *s.* अक्षद्यूतं, द्यूतं, द्यूतक्रीडा, अक्षादिक्रीडा, देवनं, अक्षवती, द्यूतसेवा, कैतवं, ग्रहः, पणः, दुरोदरं.

GAMBOGE, *s.* पीतवर्णः पूर्व्वदेशीयवृक्षनिर्य्यासः.

To GAMBOL, *v. n.* (Frolic) क्रीड् (c. 1. क्रीडति -डितुं), विक्रीड्, परिक्रीड्, दिव् (c. 4. दीव्यति -ते, देवितुं), चित्तप्रहर्षाद् इतस्ततः प्लु (c. 1. प्लवते, प्लोतुं) or नृत् (c. 4. नृत्यति, नर्त्तितुं), खेला (nom. खेलायति -यितुं), कुमार (nom. कुमारयति -यितुं).

GAMBOL, *s.* क्रीडा -डनं, देवनं, खेला, केलिः *m. f.*, लीला, नृत्यं, लास्यं.

GAMBOLING, *part.* क्रीडन् -डनी -डत् (त्), क्रीडमानः -ना -नं, दीव्यन्, -व्यती -व्यत् (त्).

GAME, *s.* (Sport) क्रीडा, खेला, केलिः *m. f.*, लीला, नर्म्म *n.* (न्), परीहासः, कूर्दनं, विलासः.—(Game of play) रासः, रासेरकः.—(Wild animals) जाङ्गलं, जङ्गलपक्ष्यादि, वन्यपश्वादि, आरण्यपशुपक्ष्यादि.—(The chase) मृगव्यं, मृगया.—(Scheme) सङ्कल्पः, निश्चितं, व्यवसितं, व्यवसायः, कल्पना.

To GAME, *v. n.* क्रीड् (c. 1. क्रीडति -डितुं), दिव् (c. 4. दीव्यति -ते, देवितुं).—(With dice, &c.) अक्षैः क्रीड् or दिव् द्यूतक्रीडां कृ.

GAME-COCK, *s.* चरणायुधः, नखायुधः, युद्धे शिक्षितः कृकवाकुः.

GAMEKEEPER, *s.* वन्यपक्षिरक्षकः, जाङ्गलपक्षिप्रतिपालकः, वन्यजन्तुपोषकः.

GAME-LEG, *s.* खञ्जजङ्घा, पङ्गुजङ्घा, गतिविकलः पादः, पङ्गुपादः.

GAMESOME, *a.* क्रीडापरः -रा -रं, क्रीडावान् -वती -वत् (त्), लीलावान् &c., खेलापरः -रा -रं, विलासी -सिनी -सि (न्), केलिकः -का -कं.

GAMESOMENESS, *s.* क्रीडापरत्वं, खेलापरत्वं, सविलासता, लीलावत्त्वं, उल्लसता.

GAMESTER, *s.* द्यूतकरः -कारः, द्यूतकृत् *m.*, अक्षदेवी *m.* (न्), अक्षद्यूतः, अक्षद्यूः *m.*, अक्षधूर्त्तः, द्यूतवृत्तिः *m.*, द्यूतसेवी *m.* (न्), द्यूतप्रसक्तः, अक्षक्रीडकः, धूर्त्तः, कितवः, अक्षादिसेवी *m.*, दुरोदरः, [illegible]लः.

GAMING, *s.* अक्षद्यूतं, द्यूतं -तः, द्यूतकर्म्म *n.* (न्), द्यूतक्रीडा, [illegible]क्षादिक्रीडा, अक्षवती, देवनं, कैतवं, ग्रहः, पणः, दुरोदरं.

GAMING-HOUSE, *s.* द्यूतसभा, द्यूतस्थानं, द्यूतशाला, द्यूतगृहं; 'keeper of one,' द्यूतसभाधिकारी *m.* (न्), सभिकः, द्यूताधिकारी *m.*, द्यूतकार -रकः, द्यूतवृत्तिः *m.*

GAMMON, *s.* (Dried hog's flesh) वल्लूरं, शूकरस्य शुष्कमांसं or वासितमांसं.—(Game) चर्म्मपट्टिकाक्रीडा, शारिक्रीडा.—(Imposition, hoax) छलं, वञ्चनं, कपटः, दम्भः.

To GAMMON, *v. a.* शूकरमांसं शुष्कीकृ or लवणीकृ, वल्लूरं कृ.—(Hoax) प्रलभ् (c. 1. -लभते -लब्धुं), अभिसन्धा (c. 3. -दधाति -धातुं), वञ्च् (c. 10. वञ्चयति -यितुं).

GAMUT, *s.* (Musical scale) ग्रामः. The seven musical notes of the Hindú gamut are called निषादः, ऋषभः, गान्धारः, षड्जः, मध्यमः, धैवतः, पञ्चमः.

GANDER, *s.* वरटः, हंसः, राजहंसः, कलहंसः, चक्रः, चक्रवाकः, चक्राङ्गः.

GANDHARBA, *s.* (A celestial musician. These are demigods who inhabit heaven, and form the orchestra at the banquets of the gods) गन्धर्व्वः, हाहाः(स्), हुहुः *m.*, हुहूः *m.*, हाहः *m.*

GANESHA, *s.* (Son of Siva and Párvatí, the god of wisdom, and remover of difficulties and obstacles, addressed at the commencement of all undertakings, and at the opening of all compositions. He is called 'Ganesha,' as presiding over the troop of deities attendant on Siva) गणेशः, गणनाथः, गणाधिपः, गणनायकः, गणपतिः *m.*, गणाग्रणीः *m.*

गजः, हेमाङ्गः, हेरम्बः, हस्तिमल्लः,—(As remover of obstacles) विघ्नेशः, विघ्नराजः, विघ्ननाशकः -ज्ञनः, विघ्नविनायकः, विनायकः, विघ्नहारी *m.* (न्).—(Elephant-faced) गजाननः, गजवदनः, गजास्यः.—(Elephant-toothed) गजदन्तः.—(One-toothed) एकदन्तः.—(Big-bellied) लम्बोदरः.—(Two-bodied) द्विदेहः.—(Having two mothers) द्वैमातुरः.

GANG, *s.* (Company of persons) गणः, जनसमूहः, जनसंसर्गः, जननिवहः, सङ्घः, सङ्गः; 'of thieves,' चौरगणः.

GANG-BOARD, *s.* नौकारोहणावरोहणार्थं दीर्घकाष्ठफलकं.

GANG-DAYS, *s.* भ्रमणदिवसाः *m. pl.*, परिक्रमदिवसाः, पर्य्यटनकालः.

GANGES, *s.* (The River) गङ्गा, गङ्गाका, गङ्गिका. The name Gangá is derived from the root *gam*, 'to go,' *i. e.* 'that which goes or flows on the earth,' whence also the name भवायना, 'going in the world.' (Daughter of Jahnu. The Ganges in its course from heaven disturbed the devotions of this saint, upon which he drank up its waters, but released them again at the intercession of the sage Bhagíratha. Hence the following names) जाह्नवी, जह्नुतनया, जह्नुसुता, भागीरथी, (Crest of Siva. The Ganges, in its descent from heaven, alighted on the head of Siva, where it wandered for a time in the tresses of his hair) हरशेखरा. (River of heaven) स्वर्नदी, सुरनदी, सुरनिम्नगा, सरापगा, स्वर्गगङ्गा, स्वर्वापी, खापगा, सिद्धापगा.—(Flowing in heaven, earth, and hell) त्रिपथगा, त्रिस्रोताः *f.* (स्).—(Flowing from the foot of Vishnu) विष्णुपदी.—(Mother of Bhíshma) भीष्मसूः *f.*—(The very auspicious one) महाभद्रा.

GANGLION, *s.* स्नायुस्फोटः -टकः, शिरास्फोटकः, नाडीविस्फोटः.

GANGRENE, *s.* कोथः, पूतिमांसं, विद्रधिः *m.*, व्रणं, नालीव्रणः, मांसपाकः, रक्तविद्रधिः *m.*, मांसपूतिः, शरीरस्य परभागे सत्यै सति एकभागस्य पूतीभावः.

To GANGRENE, *v. n.* मांसैकदेशे पूतीभू, पूतमांसीभू, कोथीभू.

GANGRENOUS, *a.* कोथवान् -वती -वत् (त्), कोथीयः -या -यं, पूतिमांसवान् &c.

GANGWAY, *s.* नौकायां गमनागमनपथः or आरोहणावरोहणपथः.

GANTLET, GANTLOPE, *s.* सेनायां दण्डार्हस्य दण्डविशेषः; 'to run the gantlet,' महापातकिवत् सैन्यानां यष्टिपाणीनां द्विपंक्तिमध्ये धाव् (c. 1. धावति -ते -वितुं) यावद् एकैकेन यष्ट्याघातः क्रियते.

GAOL, *s.* कारा, कारागारं, कारावेश्म *n.* (न्), बन्धनागारं, बन्धनालयः, बन्धनगृहं, बन्धनस्थानं, गुप्तिः *f.*

To GAOL, *v. a.* कारायां बन्ध् (c. 9. बध्नाति, बन्धुं) or निरुध् (c. 7. -रुणद्धि -रोद्धुं).

GAOL-DELIVERY, *s.* कारामुक्तिः *f.*, कारागारशोधनं, बन्धनागारविशोधनं.

GAOLER, *s.* कारागाराध्यक्षः, कारारक्षकः, बन्धनालयरक्षकः.

GAP, *s.* (In a wall) सन्धिः *m.*, गृहरन्ध्रं, सुरङ्गा, कुड्यच्छेदः.—(Breach, chasm) भङ्गः, भेदः, छेदः, रन्ध्रं, छिद्रं, विवरं, विच्छेदः, गर्तः, खहः -हनं.

To GAPE, *v. n.* जृम्भ् (c. 1. जृम्भते -म्भितुं), विजृम्भ्, प्रजृम्भ्, जभ् or जम्भ् (c. 1. जभते, जम्भते -म्भितुं), मुखं व्यादा (c. 3. -ददाति -दातुं) or विस्तृ in caus. (-स्तारयति -यितुं), जृम्भां कृ, ह्वै (c. 1. ह्वायति, ह्वातुं).—(Open in fissures) स्फुट् (c. 6. स्फुटति -टितुं), विदल् (c. 1. -दलति -लितुं), विदृ in pass. (-दीर्य्यते).

GAPER, *s.* जृम्भी *m.* (न्), जृम्भकः, जृम्भणकारी *m.* (न्), मुखव्यादानकारी.

GAPING, GAPE, *s.* जृम्भः -म्भा -म्भणं -म्भिका, जृम्भितं, विजृम्भितं, विजृम्भणं, हर्म्मे *n.* (न्), हाम्भिका, उपपुष्पिका.—(Opening the mouth) मुखव्यादानं, मुखविवृतिः *f.*

GAPING, *part.* जृम्भः -म्भा -म्भं, जृम्भमाणः -णा -णं, जृम्भी -म्भिणी -म्भि (न्), जृम्भावान् -वती -वत् (त्), जृम्भितः -ता -तं, विजृम्भितः -ता -तं, व्याक्तमुखः -खा -खं, विवृतमुखः -खा -खं.

GAP-TOOTHED, *a.* विरलदन्ती -न्तिनी -न्ति (न्), विच्छिन्नदन्ती &c.

GARB, *s.* वेशः, वेषः, वासः *n.* (स्), परिधानं, परिच्छदः, अक्षरं, वस्त्रं, वसनं, आच्छादनं, सज्जा, प्रसाधनं.

GARBAGE, *s.* उच्छिष्टं, उच्छिष्टार्हं, शेषार्हं, पशोर् अन्त्रादि, मलं.

To GARBLE, *v. a.* (Pick out the best parts of a book to serve a purpose) छलार्थं or वञ्चनार्थं ग्रन्थस्य उत्तमवचनानि or उत्तमदेशान् उद्धृ (c. 1. -हरति -हर्तुं) or समुद्धृ or ग्रन्थचूर्णिं कृ, ग्रन्थं खण्ड् (c. 10. खण्डयति -यितुं).—(Pervert) साचीकृ, वक्रीकृ, विकृ, विकलीकृ.

GARBLED, *p. p.* साचीकृतः -ता -तं, छलेन विकलीकृतः -ता -तं *or* खण्डितः -ता -तं.

GARBOIL, *s.* कोलाहलः, तुमुलं, हलहलाशब्दः, हाहाकारः.

GARDEN, *s.* उद्यानं, आरामः, उपवनं, पुष्पवाटी -टिका, पुष्पवनं, वाटिका, वृक्षवाटिका, कुसुमाकरः, वेलं, तेवनं, पुष्पफलोपचयहेतुर् भूभागः; 'pleasure-garden,' क्रीडार्थो भूमिः, क्रीडावाटिका, क्रीडावनं; 'garden near a house,' गृहवाटिका, गृहारामः; 'kitchen-garden,' शाकशाकटं, शाकशाकिनं, शाकवाटिका.

To GARDEN, *v. n.* उद्यानं कृ, पुष्पफलोत्पत्तियोग्यं भूमिभागं कृष् (c. 6. कृषति, क्रष्टुं), उद्यानकर्मेषं कृ.

GARDENER, *s.* उद्यानपालः -लकः, उद्यानरक्षकः, उद्यानसेवकः, मालिकः, माली *m.* (न्).

GARDENING, *s.* उद्यानकरणं, उद्यानकर्मेषं, उद्यानसेवनं, पुष्पफलोत्पत्तिकर्म्म *n.* (न्).

GARDEN-PLOT, *s.* पुष्पफलोत्पत्तियोग्यो भूमिभागः, पुष्पस्थलं, स्थलं -लो.

GARDEN-STUFF, *s.* उद्यानजं, उद्यानोद्भिद् *m. f. n.*, उद्यानजं शाकादि.

GARDEN-WALL, *s.* उद्यानपरिसरः, वाटिकापरिसरः, उद्यानप्राकारः.

GARGARISM, *s.* आचाम्यं, आचमनीयं, कवलः, मुखप्रक्षालनजलं.

To GARGARIZE, *v. a.* आचम् (c. 1. -चामति -चमितुं), जलम् उपस्पृश् (c. 6. -स्पृशति -स्प्रष्टुं).

GARGLE, *s.* आचाम्यं, आचमनीयं, कवलः, मुखक्षालनार्थं जलादि.

To GARGLE, *v. a.* जलम् आचम् (c. 1. -चामति -चमितुं) or उपस्पृश् (c. 6. -स्पृशति -स्प्रष्टुं), आचमनं कृ, उपस्पर्शं कृ, जलोपस्पर्शं कृ, जलादिना मुखं मृज् (c. 2. मार्ष्टि -ष्टुं) or धाव् (c. 10. धावयति -यितुं).

GARGLED, *p. p.* आचान्तः -न्ता -न्तं, उपस्पृष्टः -ष्टा -ष्टं.

GARISH, *a.* *See* GAIRISH.

GARLAND, *s.* माला, माल्यं, स्रक् *f.* (ज्), दाम *n.* (न्), हारः, आवलिः -ली *f.*, प्रालम्बः -म्बिका; 'of flowers,' कुसुममाला, पुष्पावली, कुसुमस्तबकः, कुसुमावतंसकं; 'of pearls,' मुक्तावली, देवच्छन्दः, शतयष्टिकः; 'other kinds of garlands,' गुल्मः, गुल्माडिः, गोल्मनः.

To GARLAND, *v. a.* मालया or स्रजा अलङ्कृ, मालायुक्तं -क्तां -क्तं कृ.

GARLANDED, *p. p.* माली -लिनी -लि (न्), स्रग्वी -ग्विनी -ग्वि (न्), स्रग्धरः -रा -रं.

GARLIC, *s.* लशुनं, रशुनं, लशूनं, लसुनः, रसुनः, रसोनः -नकः, गृञ्जनः, महौषधं, महाकन्दः, अरिष्टः, सोनहः, उग्रगन्धः, दीर्घपत्रः, ग्रन्थिमूलं, अमीलकः, मुखदूषणः, राहूच्छिष्टः, तरिता.

GARLIC-EATER, *s.* लशुनाशी *m.* (न्), लशुनभोजी *m.* (न्), लशुनादः.

GARLICKY, *a.* लशुनीयः -या -यं, रशुनीयः -या -यं.

GARMENT, *s.* वस्त्रं, वेशः, वेषः, वासस् *n.*, वसनं, परिधानं, परिच्छदः, अक्षरं, आच्छादनं, प्रच्छादनं, प्रसाधनं, संव्यानं, प्रवारः, झम्मेरः; 'under-

garment,' अन्तरीयं, अन्तर्वासस्, अधोवसनं; 'upper,' उत्तरीयं, प्रावारः.

GARNER, *s.* कुशूलः, धान्यागारं, अन्नकोष्ठः, कोष्ठः-ष्ठकं, भाण्डागारं, व्रीह्यगारं, कण्डोलः-लकः, काण्डालः, पिटः, कृदरः.

To GARNER, *v. a.* कुशूले निविश् (c. 10. -वेशयति -यितुं) or सञ्चि (c. 5. -चिनोति -चेतुं).

GARNERED, *p. p.* कुशूलभूतः -ता -तं, कोष्ठभूतः -ता -तं, कुशूलीकृतः -ता -तं.

GARNET, *s.* रक्तमणी मणिविशेषः, पद्मरागविशेषः, सर्पेमणिः *m. f.*

To GARNISH, *v. a.* शुभ् (c. 10. शोभयति -यितुं), उपशुभ्, भूष् (c. 10 भूषयति -यितुं), विभूष्, अलङ्कृ, समलङ्कृ, परिष्कृ, रञ्ज् (c. 10. रञ्जयति -यितुं).

GARNISH, *s.* अलङ्कारः, अलङ्क्रिया, शोभा -भनं, भूषणं, विभूषणं, आभरणं. सज्जा, प्रसाधनं. *See* GARNISHMENT.

GARNISHED, *p. p.* शोभितः -ता -तं, उपशोभितः -ता -तं, अलङ्कृतः -ता -तं, भूषितः -ता -तं, विभूषितः -ता -तं, परिष्कृतः -ता -तं, प्रसाधितः -ता -तं, कृतशोभः -भा -भं.

GARNISHMENT, GARNITURE, *s.* सज्जा, उपकरणानि *n. pl.*, शोभार्थैम् अनुबन्धाः *m. pl.*

GARRET, *s.* उपरिस्थः कोष्ठः, क्षोमः -मं, क्षौमः -मं, अट्टः, अट्टालः, कूटागारं, चन्द्रशाला -लिका, चूला.

GARRISON, *s.* दुर्गनिवासिनः सैन्याः *m. pl.*, दुर्गस्थाः सैन्याः, दुर्गस्थसैन्यं, दुर्गसैन्यं, दुर्गबलं, दुर्गरक्षिणः *m. pl.*, दुर्गरक्षकाः *m. pl.*, रक्षिणः *m. pl.*, रक्षकाः *m. pl.*, रक्षिवर्गः.

To GARRISON, *v. a.* नगररक्षार्थं दुर्गे सैन्यान् or रक्षकान् निविश् in caus. (-वेशयति -यितुं), नगररक्षणे सैन्यगुल्मं नियुज् (c. 7. युनक्ति -योक्तुं).

GARRISONED, *p. p.* रक्षकयुक्तः -क्ता -क्तं, रक्षार्थं सैन्ययुक्तः -क्ता -क्तं.

GARRULITY, *s.* वाचदूकता, वाचालता, बहुवादित्वं, बहुभाषिता, अतिशयोक्तिः *f.* जल्पकता, जल्पाकत्वं, वाग्मित्वं, अतिभाषणं, अत्यालापः, अतिवादः.

GARRULOUS, *a.* वाचदूकः -का -कं, वाचालः -ला -लं, बहुभाषी -षिणी -षि (न्), बहुवादी -दिनी -दि (न्), जल्पकः -का -कं, जल्पाकः -का -कं, वाग्मी -ग्मिनी -ग्मि (न्), गदयिलुः -लुः -लु, मुखरः -रा -रं, वक्ता -क्त्री -क्तृ (क्तृ).

GARTER, *s.* जङ्घाबन्धनी, पादबन्धनी, जङ्घाबन्धः, जङ्घावस्त्ररक्षणी.

GARUDA, *s.* (The bird on which the god Vishnu is carried, represented as being something between a man and a bird, and considered as the lord of the feathered tribe. He is the son of Kasyapa by Vinatá, and younger brother of Aruna) गरुडः, गरुत्मान् *m.* (-त्मत्), तार्क्ष्यः, खगेश्वरः, सुपर्णः, विष्णुरथः, वैनतेयः, विनतासूनुः *m.*, नागान्तकः, पन्नगाशनः, भुजगदारणः, सितानतः, दक्षाय्यः. The son of Garuda is called सम्पातिः -तिकः.

GAS, *s.* वायुः *m.*, वाष्पः, वातः, धूमः, धूमिका, अङ्गारजो वायुः *m.*

GASH, *s.* दीर्घच्छेदः, गम्भीरच्छेदः, दीर्घक्षतं, गम्भीरक्षतं, दीर्घगम्भीरस् त्वग्भेदः or त्वक्छेदः.

To GASH, *v. a.* दीर्घच्छेदं कृ, गम्भीरच्छेदं कृ, दीर्घगम्भीरं त्वग्भेदं कृ.

GASOMETER, *s.* वायुमापनयन्त्रं, अङ्गारजवायुनिर्म्माणस्थानं.

To GASP, *v. n.* मुखं व्यादाय कृच्छ्रेण श्वासप्रश्वासं कृ, कृच्छ्रेण श्वस् (c. 2. श्वसिति -तुं) or प्राण् (c. 2. प्राणिति -तुं), दुःश्वासं कृ, प्राणकृच्छ्रोपहतः -ता -तं भू.

GASP, *s.* दुःश्वासः, श्वासः, श्वसितं, दुःश्वसितं, उच्छ्वासः, उच्छ्वसितं, प्राणः.

GASPING, *part.* उच्छ्वसन् -सन्ती -सती -सत् (त्), कृच्छ्रेण श्वसन् &c., उच्छ्वसितः -ता -तं, काशश्वासः -सा -सं, दुःश्वासी -सिनी -सि (न्), श्वासकृच्छ्रोपहतः -ता -तं, यष्टिप्राणः -णा -णं.

GASTRIC, *a.* जाठरः -री -रं, औदरिकः -की -कं, उदरीयः -या -यं, जठरीयः -या -यं; 'gastric juice,' कोष्ठाग्निः *m.*, अग्निः.

GASTRONOME, *s.* उदरपरायणः, उदरसेवी *m.* (न्), कुक्षिम्भरिः *m.*, सर्व्वान्नरसज्ञः.

GASTRONOMY, *s.* सर्व्वान्नरसविद्या, परमान्नरसविद्या, उदरसेवा.

GASTROTOMY, *s.* उदरच्छेदः -दनं, जठरच्छेदः -दनं.

GATE, *s.* द्वारं, द्वाः *f.* (र्), प्रतीहारः, प्रतिहारः, अरः -री -रं, गृहमुखं, द्वारकवाटकः; 'back-gate,' पश्चद्वारं; 'private-gate,' अन्तर्द्वारं, प्रच्छन्नद्वारं; 'city-gate,' पुरद्वारं, नगरद्वारं, गोपुरं; 'raised place over it,' हस्तिनखः; 'outer-gate,' बहिर्द्वारं.

GATE-POST, *s.* द्वारस्तम्भः, द्वारस्थूणा, द्वारदारुः *m.*; 'its ornament,' तोरणः.

GATE-WAY, *s.* द्वारवर्त्म *n.* (न्), द्वारपथः, निःसरणं.

To GATHER, *v. a.* (Collect) चि (c. 5. चिनोति, चेतुं), अवचि, समाचि, सञ्चि, आचि, प्रचि, समानी (c. 1. -नयति -नेतुं), समुपानी, समाहृ (c. 3. -ददाति -दातुं), समाहृ (c. 1. -हरति -हर्तुं), उपसंहृ, समूह् (c. 1. ऊहते -हितुं), सङ्गृह् (c. 9. -गृह्णाति -ग्रहीतुं), ग्रह् सम्भृ (c. 1. -भरति, c. 3. -बिभर्त्ति -भर्त्तुं), संवृ (c. 5. -वृणोति, c. 1. -वरति -रितुं), एकीकृ, एकत्र कृ.—(Gather flowers, &c.) पुष्पाणि चि or अवचि or लू (c. 9. लुनाति, लवितुं).—(Select) उद्धृ, समुद्धृ, वृ, उद्धृ.—(Deduce, infer) अनुमा (c. 2. -माति -तुं, c. 3. -मिमीते), ऊह् (c. 1. ऊहते -हितुं), अपोह्, अवगम् (c. 1. -गच्छति -गन्तुं).

To GATHER, *v. n.* (Congregate) सङ्गम् (c. 1. -गच्छति -गन्तुं), समागम्, समे (सम् and आ with rt. इ, समैति -तुं), एकत्र मिल् (c. 6. मिलति, मेलितुं), सम्मिल्, एकत्र आगम्.—(Increase) वृध् (c. 1. वर्धते -धितुं), उपचि in pass. (-चीयते).—(Form matter) पूय् (c. 1. पूयते -यितुं), पूयं बन्ध् (c. 9. बध्नाति, बन्धुं), पूयपूर्णः -र्णा -र्णं भू.

GATHER, *s.* (Fold) वस्त्रपुटः, ऊर्म्मिः *m. f.*, ऊर्म्मिका, व्यावर्त्तनं, चूडः.

GATHERED, *p. p.* चितः -ता -तं, सञ्चितः -ता -तं, अवचितः -ता -तं, उपचितः -ता -तं, समूढः -ढा -ढं, सङ्गृहीतः -ता -तं, लूनः -ना -नं.

GATHERER, *s.* अवचायी *m.* (न्), सञ्चयी *m.* (न्), सङ्गृहीता *m.* (तृ), सङ्ग्राहकः; 'gatherer of taxes,' करग्रहः, शुल्कग्राही *m.* (न्); 'of flowers,' पुष्पावचायी *m.*

GATHERING, *s.* (Act of collecting) चयनं, सञ्चयनं, चायः, अवचयः, अवचायः, लावः, सङ्ग्रहः -हणं, एकत्रकरणं; 'of flowers,' पुष्पचयः, कुसुमावचयः, पुष्पप्रचायः.—(Crowd, assembly) समूहः, सङ्घः, सञ्चयः, सङ्घातः, समागमः, समवायः, समाहारः, सन्नयः; 'of people,' जनसमूहः, जननिवहः, लोकसङ्घः.—(Abscess) विद्रधिः *m.*, पूयसम्भूतिः स्फोटः.—(Gathering of clouds) घनचयः, घनौघः, घनजालं, घनघनौघः.

GAUDERY, *s.* अलङ्कारः, चित्रविचित्राभरणानि *n. pl.*, शोभाकरद्रव्याणि *n. pl.*

GAUDILY, *adv.* सचित्रालङ्कारं, शोभाकरणार्थं, एकान्तशोभनं, चित्रविचित्रं; 'gaudily dressed,' उज्ज्वलवेशधारी -रिणी -रि (न्).

GAUDINESS, *s.* रक्तता, सरागत्वं, रागः, रङ्गः, चित्रता, चित्रविचित्रता, शोभा, एकान्तशोभा, अतिशोभा, वर्णः, नानावर्णत्वं, कबुरता, वाक्छटिः *f.*

GAUDY, *a.* बहुवर्णः -र्णा -र्णं, नानावर्णः -र्णा -र्णं, चित्रः -त्रा -त्रं, विचित्रः -त्रा -त्रं, अतिशोभनः -ना -नं, एकान्तशोभनः -ना -नं, रक्तः -क्ता -क्तं, अतिरागी -गिणी -गि (न्), चित्रालङ्कारवान् -वती -वत् (त्), उज्ज्वलः -ला -लं.

GAUDY, *s.* (A feast) उत्सवः, उत्सवदिनं, पर्व्वाहः, उडवः.

To GAUGE, *v. a.* प्रमाणदण्डेन भाण्डभरकं मा (c. 2. माति -तुं, c. 10. मापयति -यितुं).

GAUGE, *s.* (Measure) परिमाणं, प्रमाणं, मानं, परिमाणविधिः *m.*, परिमाणरीतिः *f.*—(Instrument for measuring) मापनयन्त्रं, परिमाणदण्डः, प्रमाणदण्डः, भाण्डपूरकमापनार्थं यष्टिः *m.* *See* GAGE.

GAUGER, *s.* प्रमाणदण्डद्वारेण भाण्डभरकमापकः, परिमाणकर्त्ता *m.* (र्त्तृ).
GAUGING, *s.* प्रमाणदण्डेन भाण्डभरकमापनं or भाण्डपूरकपरिमापणं.
GAUNT, *a.* कृशः -शा -शं, परिकृशः -शा -शं, कृशाङ्गः -ङ्गी -ङ्गं, क्षीणशरीरः -रा -रं, क्षीणमांसः -सा -सं, श्यामः -मा -मं, शुष्काङ्गः &c., क्षुत्क्षामः &c.
GAUNTLET, *s.* लोहनिर्म्मितं हस्ताच्छादनं or हस्तत्राणं; 'to throw the gauntlet,' पूर्व्वोक्तहस्ताच्छादनं भूमौ प्रक्षिप्य युद्धार्थम् आह्वे (c. 1. -ह्वयति -ह्वातुं).
GAUR, *s.* (The country) गौडः; 'its inhabitants,' गौडाः *m. pl.*
GAUZE, *s.* विरलतन्तुः स्वच्छवस्त्रविशेषः, विरलांशुकं, सूक्ष्मांशुकं.
GAVOT, *s.* गवोत्संज्ञको लघुनृत्यविशेषः.
GAWK, *s.* मूर्खः, मूढः, स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, जडधीः *m.*
GAWKY, *a.* स्थूलः -ला -लं, स्थूलशरीरः -रा -रं, दीर्घस्थूलः -ला -लं, दीर्घदेहः -हा -हं, अदक्षः -क्षा -क्षं, विरूपः -पी -पं.
GAY, *a.* (Merry) उल्लसः -सा -सं -सितः -ता -तं, आनन्दी -न्दिनी -न्दि (न्), हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, हृष्टहृदयः -या -यं, प्रमुक्तः -क्ता -क्तं, उल्लासितः -ता -तं, समुल्लसितः -ता -तं, विलासी -सिनी -सि (न्), केलिकः -का -कं, मुदितः -ता -तं, प्रमोदी -दिनी -दि (न्), ललितः -ता -तं, परिहासशीलः -ला -लं, हासी -सिनी -सि (न्).—(Showy) नानावर्णः -र्णा -र्णं, बहुवर्णः -र्णा -र्णं, चित्रविचित्रः -त्रा -त्रं, अतिशोभनः -ना -नं.
GAYETY, *s.* उल्लसता, उल्लासः, आनन्दः, आह्लादः, सानन्दता, हर्षः, प्रहर्षः, प्रमुक्तता, मुदा, प्रमोदः, चित्रप्रसन्नता, प्रहसनं.—(Merry making) उत्सवः, महोत्सवः, उत्सवकरणं.
GAYLY, *adv.* सानन्दं, सहर्षं, प्रमोदेन, उल्लासेन, प्रहृष्टवत्.—(Showily) बहुवर्णैः, चित्रविचित्रं, अतिशोभनं; 'gayly dressed,' उज्ज्वलवेशधारी -रिणी -रि (न्).
To GAZE, *v. a.* and *n.* ईक्ष् (c. 1. ईक्षते -क्षितुं), प्रेक्ष्, निरीक्ष्, वीक्ष्, अभिवीक्ष्, समीक्ष्, आलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं), बद्धदृष्ट्या or स्थिरदृष्ट्या or अनिमिषनयनाभ्यां निरीक्ष् or दृश् (c. 1. पश्यति, द्रष्टुं), स्थिरदृष्टिं कृ, दृष्टिं or लक्षं बन्ध् (c. 9. बध्नाति, बन्धुं).
GAZE, *s.* स्थिरदृष्टिः *f.*, बद्धदृष्टिः *f.*, अनिमिषदृष्टिः *f.*, दृष्टिः *f.*, आलोकनं, ईक्षणं, निरीक्षा, वीक्षणं, वीक्षितं, प्रेक्षणं, प्रेक्षितं, दर्शनं, लक्षः -क्षणं; 'with fixed gaze,' बद्धदृष्टिः -ष्टिः -ष्टि, अनिमिषनयनः -ना -नं.
GAZEHOUND, *s.* दृष्टिमात्रेण शशकाद्यनुसरणशीलो मृगव्यकुक्कुरः.
GAZELLE, *s.* तनुशरीरो हरिणभेदः, मृगः -गी; 'gazelle-eyed,' मृगीदृक् *m. f. n.* (श्).
GAZETTE, *s.* वार्त्तिकपत्रं, समाचारपत्रं, संवादपत्रं, सन्देशपत्रं.
To GAZETTE, *v. a.* वार्त्तिकपत्रेण प्रकाश् (c. 10. -काशयति -यितुं).
GAZETTEER, *s.* अमुकदेशे यत्किञ्चिद् नगरग्राममार्गादि विद्यते तदाकारनामादिवाचकं पुस्तकं.
GAZING, *part.* स्थिरदृष्ट्या प्रेक्षमाणः -णा -णं or आलोकयन् -यन्ती -यत् (न्); 'gazing up to heaven,' नभोदृष्टिः -ष्टिः -ष्टि; 'in various directions,' इतस्ततो दत्तदृष्टिः.
GAZING-STOCK, *s.* तिरस्कारविषयः, अवहासभूमिः *f.*, परिभवास्पदं, कौतुकं.
GEAR, *s.* उपकरणं, सामग्री -ग्यं, सज्जा, परिच्छदः, पारिणाह्यं, आभरणं, प्रसाधनं, प्रतिकर्म्म *n.* (न्); 'plough-gear,' हलोपकरणं.
GEESE, *s. pl.* हंसाः *m. pl.* *See* GOOSE.
GELATIN, *s.* क्लथितमांसनिर्म्मितं घनीभूतं or श्यानीभूतं स्वच्छद्रव्यं.
GELATINOUS, *a.* पूर्व्वोक्तश्यानद्रव्यगुणविशिष्टः -ष्टा -ष्टं, श्यानः -ना -नं, क्षीणः -णा -णं, सान्द्रः -न्द्रा -न्द्रं, संलग्नशीलः -ला -लं, अवलेखः -खा -खं.
To GELD, *v. a.* वृषणौ उत्कृत् (c. 6. -कृन्तति -कर्त्तितुं) or छिद् (c. 7. छिनत्ति, छेत्तुं), वृषणच्छेदम् उत्पद् (c. 10. -पादयति -यितुं).

GELDED, *p. p.* छिन्नवृषणः -णा -णं, छिन्नशुष्कः -ष्का -ष्कं, शुष्कशून्यः -न्या -न्यं.
GELDING, *s.* (Horse) अवृषणो वाजी *m.* (न्).
GELID, *a.* अतिशीतलः -ला -लं, अत्यन्तशिशिरः -रा -रं, हिमः -मा -मं.
GELIDITY, GELIDNESS, *s.* अतिशीतलता, अतिशैत्यं, शीतता, शिशिरत्वं.
GELLY, *s.* क्लथितमांसनिर्म्मितो घनीभूतः or श्यानीभूतः स्वच्छरसः.
GEM, *s.* (Precious stone) मणिः *m. f.* -णी, रत्नं, चारुशिला, प्रस्तरः, मणिरत्नं; 'necklace of gems,' मणिमाला, मणिसरः, रत्नावलिः *f.*; 'its central gem,' तरलः; 'mine of gems,' रत्नाकरः.—(Bud) मुकुलं, बालकं, पल्लवः -वं, कुट्मलं.
To GEM, *v. a.* मणिभिः or रत्नैर् अलङ्कृ or भूष् (c. 10. भूषयति -यितुं).
To GEM, *v. n.* (Bud) मुकुल् (c. 1. मुकुलति -लितुं), अङ्कुर (nom. अङ्कुरयति -यितुं).
To GEMINATE, *v. a.* द्विगुणीकृ, द्विगुण (nom. द्विगुणयति -यितुं), द्वैधीकृ, द्विकं -कां -कं कृ.
GEMINATION, *s.* द्विगुणीकरणं, द्वैगुण्यं, द्विरावृत्तिः *f.*, पुनरुक्तिः *f.*
GEMINI, *s. pl.* (Twins) यमौ m. du., यमजौ m. du.—(Constellation) द्वन्द्वः, मिथुनः, जिह्मः.
GEMINOUS, *a.* द्विगुणः -णा -णं, द्विकः -का -कं, द्वैधः -धी -धं, द्विविधः -धा -धं, यमः -मा -मं, यमकः -का -कं.
GEMINY, *s.* मिथुनं, द्वन्द्वं, यमकं, यमलं, युगं, युग्मं, युगलं, द्वयं.
GEMMATE, *a.* मुकुलितः -ता -तं, मुकुलवान् -वती -वत् (त्), पल्लवितः -ता -तं.
GEMMED, *p. p.* रत्नवान् -वती -वत् (त्), मणिमान् -मती -मत् (त्), रत्नमयः -यी -यं, रत्नानुविद्धः -द्धा -द्धं, रत्नालङ्कृतः -ता -तं, मणिभूषितः -ता -तं.
GEMMY, *a.* मणिशः -शा -शं, रत्नद्योती -तिनी -ति (न्), मणिमयः -यी -यं.
GENDER, *s.* लिङ्गं, प्रकृतिः *f.*; 'masculine gender,' पुंलिङ्गं, पुरुषः; 'feminine gender,' स्त्रीलिङ्गं; 'a noun of invariable gender,' अजहल्लिङ्गः
To GENDER, *v. a.* जन् in caus. (जनयति -यितुं), सञ्जन्, प्रसू or प्रसु (c. 2. -सूते, c. 4. -सूयते -सोतुं), उत्पद् in caus. (-पादयति -यितुं).
To GENDER, *v. n.* स्त्रीपुरुषवत् सङ्गम् (c. 1. -गच्छति -गन्तुं) or मैथुनं कृ.
GENEALOGICAL, *a.* वंशावलीविषयः -या -यं, वंशान्वयविषयकः -का -कं, वंशक्रमसम्बन्धी -न्धिनी -न्धि (न्).
GENEALOGIST, *s.* अन्वयज्ञः, वंशावलिज्ञः, घटकः, कुलाचार्य्यः, वंशावलिरचकः, वंशपरम्पराज्ञः.
GENEALOGY, *s.* वंशावली -लिः *f.*, आवलिः *f.*, वंशान्वयः, अन्वयः, वंशश्रेणी, वंशक्रमः, वंशपरम्परा, वंशानुचरितं, वंशविततिः *f.*, वंशविचरणं; 'of kings,' राजावलिः *f.*, नृपावलिः, पार्थिवावलिः.
GENERAL, *a.* (Common to many, or all) साधारणः -णा -णी -णं, सामान्यः -न्या -न्यं, सङ्घसामान्यः -न्या -न्यं, बहुसामान्यः -न्या -न्यं, सङ्घसाधारणः -णी -णं, सङ्घः -ङ्घी -ङ्घं, साङ्घः -ङ्घी -ङ्घं, साङ्घिकः -की -कं, सङ्घीयः -या -यं, सङ्घजनीयः -या -यं, साङ्घजनिकः -की -कं, सङ्घजनीनः -ना -नं, विश्वजनीनः -ना -नं, विश्वजनीयः -या -यं, विश्वजन्यः -न्या -न्यं, साङ्घलौकिकः -की -कं, लौकिकः -की -कं, व्यापकः -का -कं, सङ्घव्यापकः -का -कं, सङ्घमयः -यी -यं, औत्सर्गिकः -की -कं.—(Not particular) अविशेषकः -का -कं, अवच्छेदावच्छेदकः -का -कं.—(Usual) प्रायिकः -की -कं, लोकसिद्धः -द्धा -द्धं, आचारिकः -की -कं, सङ्घेच प्रचलः -ला -लं or प्रचलितः -ता -तं; 'general practice,' जनरीतिः *f.*, लोकव्यवहारः; 'general order,' सामान्यशासनं; 'general opinion,' बहुमतं; 'general collection,' सङ्घसङ्ग्रहः; 'general reader,' चुञ्चकः, प्रघटाविद् *m.*; 'in general,' प्रायेण, प्रायशस्, बहुशस्. *See* GENERALLY.

GENERAL, *s.* (Of an army) सेनापतिः *m.*, वाहिनीपतिः *m.*, सेनानीः *m.*, सेनाधिपः, सेनाग्रणीः, चमूपतिः *m.*, योधमुख्यः, सेनाध्यक्षः, सैन्याध्यक्षः, बलाध्यक्षः, दण्डनायकः, महासेनः; 'skilful general,' सांयुगीनः.—(Total, whole) साकल्यं, सामान्यं, साधारण्यं, समुदायः.

GENERALISSIMO, *s.* प्रधानसेनापतिः *m.*, अग्रसेनानीः *m.*, प्रधानसैन्याध्यक्षः.

GENERALITY, *s.* (State of being general) सामान्यं -न्यत्वं, साधारण्यं, साधारणत्वं.—(Greatest part) प्रधानभागः, अधिकभागः, बहुतरभागः, प्रधानांशः.

GENERALIZATION, *s.* अवच्छेदावच्छेदः, व्यापकत्वं, जातिनिर्देशः, बहुसामान्यकरणं, गणीकरणं.

To GENERALIZE, *v. a.* अवच्छेदावच्छेदं कृ, बहुव्यापकं -कां -कं कृ, बहुसामान्यं -न्यां -न्यं कृ, गणीकृ, जातिनिर्देशं कृ.

GENERALLY, *adv.* प्रायस्, प्रायशस्, प्रायेण, भूयस्, बहुशस्, बाहुल्येन, भूयिष्ठं, बहुतरं, साधारण्येन, सामान्यतस्, साकल्येन.

GENERALNESS, *s.* साधारणत्वं, सामान्यत्वं, व्यापकत्वं, बाहुल्यं, प्रसिद्धत्वं.

GENERALSHIP, *s.* सैनापत्यं, सेनापतित्वं.—(Skill in tactics) व्यूहपाण्डित्यं, रणपाण्डित्यं, सेनाव्यूहनैपुण्यं, बलविन्यासकौशल्यं, सेनानयप्रवीणता.

GENERALTY, *s.* साकल्यं, समस्तत्वं, सामान्यं, कार्त्स्न्यं, आखिल्यं, समुदायः.

To GENERATE, *v. a.* जन् in caus. (जनयति -यितुं), सञ्जन्, प्रसू or प्रसु (c. 1. -सवति, c. 2. -सूते, c. 4. -सूयते -सोतुं), सू, उत्पद् in caus. (-पादयति -यितुं).

GENERATED, *p. p.* जातः -ता -तं, जनितः -ता -तं, उपजातः -ता -तं, सञ्जातः -ता -तं, उत्पादितः -ता -तं, समुत्पादितः -ता -तं, प्रसूतः -ता -तं, प्ररूढः -ढा -ढं, कृतजन्मा -न्मा -न्म (न्), उद्भवः -वा -वं, प्रभवः -वा -वं; 'generated in water,' जलोद्भवः -वा -वं.

GENERATION, *s.* (Production) जननं, प्रजननं, जन्म *n.* (न्), उत्पादनं, उत्पत्तिः *f.*, प्रसूतिः *f.*, प्रसवः, सम्भवः, उद्भवः, प्रभवः.—(Race) जातिः *f.*, वंशः, सन्तानः, सन्ततिः *f.*, कुलं, अन्वयः, प्रवरं.—(The people living at the same time) समवयस्काः or समकालजीविनः पुरुषाः *m. pl.*—(Series of descendants) वंशावली, वंशपरम्परा, वंशश्रेणी; 'extending to seven generations,' सप्तपौरुषः -षी -षं; 'organ of generation,' उपस्थः.

GENERATIVE, *a.* जनकः -का -कं, उत्पादकः -का -कं, सावकः -विका -कं.

GENERATOR, *s.* जनयिता *m.* (तृ), जनिता *m.* (तृ), जननः, जनकः, जन्मदः -दाता *m.* (तृ), बीजप्रदः, बीजी *m.* (न्), उत्पादकः.

GENERIC, GENERICAL, *a.* सामान्यः -न्या -न्यं, साधारणः -णा -णी -णं, वर्गीयः -या -यं, जातीयः -या -यं, जातिसम्बन्धीयः -या -यं, व्यापकः -का -कं; 'generic property,' जातित्वं, जातिधर्मः, जातिस्वभावः, सामान्यं, समानाधिकरणं; 'generic characteristic,' जातिलक्षणं, सामान्यलक्षणं.

GENERICALLY, *adv.* जातिमुद्दिश्य, वर्गमुद्दिश्य, जातितस्, सामान्यतस्.

GENEROSITY, *s.* (Liberality) औदार्यं, उदारता, दानशीलता, त्यागशीलता -त्वं, त्यागः, त्यागिता, बहुप्रदत्वं, अतिसर्जनं, अतिदानं, वदान्यता, अकार्पण्यं, विलम्भः.—(Nobleness of soul) माहात्म्यं, औदार्यं, उदीर्णता.

GENEROUS *a.* (Liberal) उदारः -रा -री -रं, दानशीलः -ला -लं, त्यागशीलः -ला -लं, बहुप्रदः -दा -दं, बहुदः -दा -दं, अतिदाता -त्री -तृ (तृ), दायकः -का -कं, दानरतः -ता -तं, वदान्यः -न्या -न्यं, अकृपणः -णा -णं, स्थूललक्ष्यः -क्ष्या -क्ष्यं, उदात्तः -त्ता -त्तं.—(Noble-minded) उदारचेताः -ताः -तः (स्), उदारधीः -धीः -धि, उदारचरितः -ता -तं, माहात्मिकः -की -कं, महामनाः -नाः -नः (स्), महानुभावः -वा -वं, महेच्छः -च्छा -च्छं, उदीर्णः -र्णा -र्णं.—(Of honourable birth) सत्कुलीनः -ना -नं, महाकुलः -ला -लं.

GENEROUSLY, *adv.* उदारवत्, वदान्यवत्, औदार्येण, दानशीलत्वात्, माहात्म्येन.

GENEROUSNESS, *s.* औदार्यं, उदारता, माहात्म्यं. *See* GENEROSITY.

GENESIS, *s.* धर्मग्रन्थानां मध्यात् प्रथमग्रन्थः, जगत्सृष्टिविषयकं मूसालिखितम् आदिपुस्तकं.

GENET, *s.* (Horse) सुरूपी विदेशीयः क्षुद्रवाजी *m.* (न्).—(Civet) गन्धमार्जारः.

GENETHLIAC, *s.* (Birthday poem) जन्मदिवसमुद्दिश्य काव्यं.

GENIAL, *a.* (Contributing to propagation) सावकः -का -कं, प्रसवकारी -रिणी -रि (न्), प्रसूतिवर्धकः -का -कं.—(Contributing to life and cheerfulness) जीवदः -दा -दं, तेजोवर्धकः -का -कं, आनन्दकरः -रा -रं, रम्यः -म्या -म्यं, रमणीयः -या -यं, मनोरमः -मा -मं, सुखकरः -री -रं, प्रसन्नः -न्ना -न्नं, सुभगः -गा -गं, प्रसादकरः -रा -रं, रुचिरः -रा -रं.

GENIALLY, *adv.* प्रसन्नं, प्रसादेन, सप्रसादं, सानन्दं, प्रमोदेन, सहर्षं.

GENIALNESS, *s.* सुनन्दता, रम्यता, रमणीयत्वं, प्रसन्नता, सानन्दता.

GENICULATED, *a.* जानुपङ्क्तीकारग्रन्थियुक्तः -क्ता -क्तं, ग्रन्थिलः -ला -लं.

GENITAL, *a.* प्रसवसम्बन्धी -न्धिनी -न्धि (न्), जननसम्बन्धी &c., योनिः -नी -नं.

GENITALS, *s. pl.* उपस्थः, शिश्नादि *n.*, भगादि *n.*, अधोङ्गं, जननाङ्गं.

GENITIVE, *a.* or *s.* (In grammar) सम्बन्धः, शेषः, षष्ठी विभक्तिः *f.*

GENITOR, *s.* जनयिता *m.* (तृ), जनिता *m.* (तृ), जनकः, जननः, जन्मदः.

GENIUS, *s.* (Natural disposition) स्वभावः, प्रकृतिः *f.*, शीलः, गुणः.—(Strength of mind, power of intellect) धीशक्तिः *f.*, बुद्धिशक्तिः *f.*, मनःशक्तिः *f.*, मनोयुक्तिः *f.*, बुद्धिसामर्थ्यं, बुद्धिप्रभावः, मतिप्रयोगता.—(Power of invention) कल्पनाशक्तिः *f.*—(Man endowed with talent) गुणी *m.* (न्), गुणवान् *m.* (त्), धीशक्तियुक्तः, बुद्धिशक्तिमान् *m.* (त्), युक्तबुद्धिः *m.*, बुद्धिमान् *m.* (त्), धीमान् *m.* (त्).—(Peculiar characteristic) विशेषणं, लक्षणं, स्वभावः, स्वधर्मः, वृत्तिः *f.*; 'poetical genius,' कविताशक्तिः *f.*

GENIUS, *s.* (Demon) भूतः, असुरः, दैत्यः, दानवः, प्रेतः, पिशाचः; 'evil genius,' दुर्दैवं; 'good genius,' सुदैवं, शुभदैवं.

GENTEEL, *a.* सभ्यः -भ्या -भ्यं, सभ्याचारी -रिणी -रि (न्), आर्यः -र्या -र्यं, आर्यव्यवहारः -रा -रं, आर्यवृत्तः -त्ता -त्तं, सद्वृत्तः -त्ता -त्तं, सज्जनः -ना -नं, साधुवृत्तः -त्ता -त्तं, साधुव्यवहारः -रा -रं, सुशीलः -ला -लं, अग्राम्यः -म्या -म्यं, शिष्टाचारी -रिणी -रि (न्), महानुभावः -वा -वं.—(Elegant) विनीतः -ता -तं, चारुः -रुः -रु, ललितः -ता -तं.

GENTEELLY, *adv.* सभ्यवत्, सुशीलवत्, आर्यवत्, सुजनवत्, सभ्याचारानुसारेण.

GENTEELNESS, *s.* सभ्यता, आर्यत्वं, सभ्याचारत्वं, आर्यवृत्तत्वं, सुशीलता, शिष्टाचारत्वं, सौजन्यं, सुजनता, साधुता, विनीतत्वं.

GENTIAN, *s.* (Plant) किरातः, किराततिक्तः, अनार्यतिक्तः, चिरातिक्तः, चिरतिक्तः, काण्डतिक्तकः, कैरातं, भूनिम्बः, भूतीकः.

GENTILE, *s.* अन्यदेशीयः, भिन्नदेशीयः, भिन्नदेशीयलोकः, अन्यदेशीयलोकः, देवतार्चकः, देवताभ्यर्चकः, देवार्चकः.—(Kindred) गोत्रजः; 'in grammar,' ज्ञातिवाचकः.

GENTILE, *a.* अन्यदेशीयः -या -यं, भिन्नदेशीयः -या -यं, जातीयः -या -यं.

GENTILISM, *s.* देवार्चकत्वं, देवताभ्यर्चनं -ना, देवताभ्यर्चनं, भिन्नदेशीयता.

GENTILITIAL, *a.* कौलिकः -की -कं, कूलजः -जा -जं, वंशिकः -की -कं, वंश्यः -श्या -श्यं, जातीयः -या -यं, दैशिकः -की -कं.

GENTILITY, *s.* (Politeness of manners) सभ्यता, सभ्याचारत्वं, सुशीलता, शिष्टाचारत्वं, आर्यत्वं, आर्यवृत्तत्वं, सौजन्यं, सुजनता, साधुवृत्तत्वं, सुविनीतता, महानुभावता.—(Good birth) कुलीनता, महाकुलत्वं, वंशविशुद्धता, कुलोत्कर्षः.

GENTLE, *a.* (Well-born) कुलीनः -ना -नं, सत्कुलीनः -ना -नं, महाकुल-

-ला -लं, महाकुलप्रसूतः -ता -तं, साधुजः -जा -जं, साधुवंशजः -जा -जं, आर्यवंशजः -जा -जं, सुजन्मा -न्मा -न्म (न्); 'a maid of gentle birth,' कुलकन्यका.—(Mild, soft, bland) मृदुः -दुी -दु, मृदुलः -ला -लं, मन्दः -न्दा -न्दं, कोमलः -ला -लं, सौम्यः -म्या -म्यी -म्यं, स्निग्धः -ग्धा -ग्धं, सुकुमारः -रा -री -रं, मसृणः -णा -णं, अनुग्रः -ग्रा -ग्रं, अकर्कशः -शा -शं, अपरुषः -षा -षं, अचण्डः -ण्डा -ण्डी -ण्डं, अखरः -रा -रं, असाहसिकः -की -कं, सुकरः -रा -री -रं; 'of a gentle disposition,' मृदुभावः -वा -वं, मृदुस्वभावः -वा -वं.—(Quiet, tame) शान्तः -न्ता -न्तं, उपशान्तः -न्ता -न्तं, शमी -मिनी -मि (न्), दान्तः -न्ता -न्तं; 'a gentle breeze,' मन्दानिलः, मृदुवातः; 'a gentle laugh,' मन्दहास्यं, मन्दस्मितं, ईषद्धासः; 'gentle remedy,' सौम्योपचारः, सामोपचारः; 'by gentle means,' साम्ना; 'gentle speech,' प्रियवाक्यं, प्रियोदितं.

GENTLE, *s.* (Maggot) अलिः *m.*, अली *m.* (न्), कोषकारी *m.* (न्).

GENTLEFOLK, *s.* आर्यलोकाः *m. pl.*, साधुजनाः *m. pl.*, आर्यमिश्राः *m. pl.*, कुलीनलोकाः.

GENTLEMAN, *s.* आर्यः, आर्यजनः, आर्यमिश्रः, साधुः *m.*, साधुजनः, महाशयः, महानुभावः, कुलीनः, कुलीनजनः, सत्कुलीनः, सुजनः, सुजन्मा *m.* (न्), सज्जनः, सज्जातिः *m.*, महाजनः, सत्कुलजातः, सुविनीतः, श्री prefixed.

GENTLEMAN-COMMONER, *s.* राजविद्यालये अन्तेवासिनां मध्यात् प्रथमपदस्थः.

GENTLEMANLIKE, GENTLEMANLY, *a.* आर्यव्यवहारानुसारी -रिणी -रि (न्), सभ्याचारानुसारी &c., सभ्यः -भ्या -भ्यं, आर्यवृत्तः -त्ता -त्तं, सुशीलः -ला -लं, सुविनीतः -ता -तं, शिष्टाचारयोग्यः -ग्या -ग्यं; 'gentlemanly deportment,' आर्यवृत्तिः *f.*, सौजन्यं.

GENTLEMANLINESS, *s.* आर्यत्वं, सुशीलता, सौजन्यं, सुविनीतता.

GENTLENESS, *s.* मृदुता, सदिना *m.* (न्), मार्दवं, मन्दता, कोमलता, सौम्यता -म्यं, स्निग्धता, सौकुमार्यं, सुकुमारता, अनुग्रता, अकार्कश्यं, अकर्कशत्वं, अपरुषता, अपारुष्यं, अचण्डता, असाहसं; 'of disposition,' भावमृदुता.

GENTLEWOMAN, *s.* आर्या, कुलीना स्त्री, सुशीला स्त्री, सुविनीता स्त्री.

GENTLY, *adv.* शनैस्, शनैः शनैस्, शनकैस्, मन्दं मन्दं, मृदु, अनुग्रं, अकर्कशं, अपरुषं, अचण्डं, साहसं विना.

GENTRY, *s.* आर्यलोकाः *m. pl.*, आर्याः *m. pl.*, साधुलोकाः *m. pl.*, कुलीनलोकाः *m. pl.*, कुलीनवर्गः, सुजनवर्गः, सुजनता, सौजन्यं.

GENUFLEXION, *s.* पूजार्थं जानुभ्यां नतिः *f.* or आनतिः *f.*, जानुनतिः *f.*

GENUINE, *a.* सत्यः -त्या -त्यं, प्रकृतः -ता -तं, वास्तवः -वी -वं -विकः -की -कं, अकल्पितः -ता -तं, अकृत्रिमः -मा -मं, अकपटः -टा -टं, निष्कपटः -टा -टं, निर्व्याजः -जा -जं, निर्श्लीकः -का -कं, यथार्थः -र्थी -र्थं, सारः -रा -रं.

GENUINELY, *adv.* सत्यं, निष्कपटं, कपटं विना, निर्व्याजं, निर्श्लीकं, यथार्थं.

GENUINENESS, *s.* सत्यता, प्रकृतत्वं, अकृत्रिमता, अकल्पितत्वं, याथार्थ्यं, यथार्थता, निर्श्लीकता, निर्व्याजत्वं, वास्तविकता, सारता.

GENUS, *s.* (In logic) परं.—(A class) जातिः *f.*, गणः, वर्गः, जातिमार्गः, गोत्रं.

GEOGRAPHER, *s.* भूपृष्ठविद्याज्ञः, भूगोलविद्याज्ञः, भूगोलशास्त्रज्ञः, भूपृष्ठलेखकः, भूगोलज्ञानी *m.* (न्), भूगोलस्य यत् किञ्चिद् देशसमुद्रनगरादि विद्यते तदाकारनामादिलेखकः, भूपृष्ठस्य देशसमुद्रपर्वतनद्यादिव्याख्याता *m.* (तृ), भूपृष्ठविवरणकृत्.

GEOGRAPHICAL, *a.* भूगोलविषयः -या -यं, भूपृष्ठविषयकः -का -कं, भूगोलशास्त्रविषयः -या -यं, भूपृष्ठसम्बन्धी -न्धिनी -न्धि (न्), भूगोलशास्त्रीयः -या -यं.

GEOGRAPHICALLY, *adv.* भूगोलशास्त्रानुसारेण, भूगोलशास्त्रवत्.

GEOGRAPHY, *s.* भूपृष्ठविद्या, भूगोलविद्या, भूपृष्ठविषयकं ज्ञानं, भूगोलस्य यत् किञ्चिद् देशसमुद्रनगरादि विद्यते तदाकारनामादिव्याख्या, भूपृष्ठस्य देशसमुद्रपर्वतनद्यादीनां ज्ञानं or विवरणं, भूगोलशास्त्रं.

GEOLOGICAL, *a.* पार्थिवांशविषयः -या -यं, पृथिवीविद्यासम्बन्धी -न्धिनी -न्धि (न्), पृथिवीसंस्थानविषयकः -का -कं.

GEOLOGIST, *s.* पार्थिवांशविद्याज्ञः, पृथिवीविद्याज्ञः, पृथिवीसंस्थानव्याख्याता *m.* (तृ), मृत्तिकाभावगुणादिविवरणकृत् *m.*

GEOLOGY, *s.* पार्थिवांशानां ज्ञानं or विद्या, पार्थिवांशविषयं ज्ञानं, पृथिवीविद्या, पार्थिवांशानां प्राचीनेतिहासः, पृथिवीसंस्थानविद्या, मृत्तिकासंस्थानविद्या, मृत्तिकाभावगुणादिविवरणविद्या.

GEOMETRAL, GEOMETRIC, GEOMETRICAL, *a.* क्षेत्रः -त्री -त्रं, क्षेत्रपरिमाणविषयः -या -यं, क्षेत्रगतः -ता -तं, क्षेत्रविद्यानुसारी -रिणी -रि (न्), रेखागणितसम्बन्धी -न्धिनी -न्धि (न्); 'geometrical proof,' क्षेत्रगतोपपत्तिः *f.*

GEOMETRICALLY, *adv.* क्षेत्रविद्यानुसारेण, रेखागणितशास्त्रवत् or -तस्.

GEOMETRICIAN, *s.* क्षेत्रविद्याज्ञः, रेखागणितविद् *m.*, क्षैत्रज्ञः, रेखागणितशास्त्रदर्शी *m.* (न्), क्षेत्रपरिमाणविद्यावान् *m.* (त्).

GEOMETRY, *s.* क्षैत्रं, क्षेत्रं, क्षेत्रविद्या, क्षेत्रपरिमाणविद्या, क्षेत्रपरिमाणविषया विद्या, रेखागणितं, रेखागणितशास्त्रं, रेखागणनाविद्या; 'proof by geometry,' क्षेत्रगतोपपत्तिः *f.*

GEORGIC, *s.* गोमेषादिविषयं गीतं, कृषिविद्याविषयकं काव्यं.

GERANIUM, *s.* वकमुखाकारबीजकोषः सुपुष्पवान् ओषधिभेदः.

GERFALCON, *s.* श्येनभेदः, कपोतारिः *m.*, वात्रिपक्षी *m.* (न्).

GERM, GERMEN, GERMIN, *s.* (The embryo of fruit, a bud) पल्लवः -वं, अङ्कुरः, अभिनवोद्भिद् *m.*, बालकं, शारकः, शोधिका, कुन्दुकं; 'of leaves,' भाङ्गिः *f.*—(Origin, that from which any thing springs) बीजं, योनिः *m. f.*, आदिः *m.*, आरम्भः, गर्भः, मूलं.

GERMAN, *a.* (Related) सम्बन्धी -न्धिनी -न्धि (न्), सभ्यकी -किकी -कि (न्); 'cousin german,' पितृव्यपुत्रः -त्री, मातुलपुत्रः -त्री.—(Belonging to Germany) जर्मणिदेशसम्बन्धी &c., जर्मणिदेशजः -जा -जं; 'language,' जर्मणिदेशभाषा.

GERMANDER, *s.* अनेकौषधीनां सामान्यनाम *n.* (न्), ओषधिगणसंज्ञा.

GERMANISM, *s.* जर्मणिदेशभाषासम्बन्धी सम्प्रदायः.

GODLIKE, *a.* देवतुल्यः -ल्या -ल्यं, देवोपमः -मा -मं, देवरूपी -पिणी -पि (न्), दिव्यः -व्या -व्यं, देवाहः -ही -हँ, ईश्वरीयः -या -यं, ईश्वरमूर्त्तिः -र्त्तिः -र्त्ति.

GODLINESS, *s.* ईश्वरसेवा -चर्या, ईश्वरभक्तिः *f.*, देवभक्तिः *f.*, ईश्वरश्रद्धा, ईश्वरपूजा, धर्मत्वं, धार्मिकता, धर्मसेवा, ब्रह्मण्यता, पुण्यशीलता.

GODLY, *a.* ईश्वरसेवी -विनी -वि (न्), ईश्वरभक्तः -क्ता -क्तं, ईश्वरपूजकः -का -कं, देवपूजकः -का -कं, पुण्यशीलः -ला -लं, पुण्यात्मा -त्मा -त्म (न्), भक्तिमान् -मती -मत् (त्), धर्मी -र्मिणी -र्मि (न्), धार्मिकः -की -कं, धर्माचारी -रिणी -रि (न्), ब्रह्मण्यः -ण्या -ण्यं.

GODLY, *adv.* ईश्वरभक्तवत्, देवपूजकवत्, धार्मिकवत्, पुण्यं.

GODMOTHER, *s.* धर्ममाता *f.* (तृ), जलसंस्कारकाले ख्रीष्टीयधर्मशिक्षणाय प्रतिजानीते या बालकस्य कृत्रिममाता.

GODSEND, *s.* देवदत्तं, ईश्वरदत्तं, लक्ष्मीदत्तं, श्रीदत्तं, सौभाग्यं.

GODSHIP, *s.* ईश्वरत्वं -ता, देवत्वं -ता, देवभावः, देवभूयं, भगवत्त्वं.

GODSON, *s.* धर्मपुत्रः, धर्मसुतः, जलसंस्कारकाले ख्रीष्टीयधर्मशिक्षणार्थं स्वीकृतः पुत्रः.

GODWIT, *s.* दीर्घमुखः पक्षिभेदः, दीर्घचञ्चुः *m.*, दीर्घजङ्घः, दीर्घपाद् *m.*

GOER, *s.* गामी *m.* (न्), गन्ता *m.* (न्तृ), यायी *m.* (न्), सरः, सारी *m.* (न्), क्रमिता *m.* (तृ), चलः, गमनकारी *m.* (न्); 'a quick goer,' अविलम्बितक्रमः, द्रुतक्रमः.

To GOGGLE, *v. n.* चक्षुषी इतस्ततो लुल् (c. 1. लोलति -लितुं, c. 10. लोलयति -यितुं), विवृताक्षः -क्षा -क्षं भू, तिर्य्यग्दृष्टिः -ष्टिः -ष्टि भू.

GOGGLE-EYE, *s.* लोलनयनं, लोलनेत्रं, फुल्लनयनं, विवृतचक्षुस् *n.*

GOGGLE-EYED, *a.* लोलनयनः -ना -नं, लोलाक्षिः -क्षिः -क्षि, उत्फुल्लनयनः -ना -नं, फुल्ललोचनः -ना -नं, तिर्य्यग्दृष्टिः -ष्टिः -ष्टि, वक्रदृष्टिः -ष्टिः -ष्टि, उन्नेत्रः -त्रा -त्रं, उद्गतनयनः -ना -नं.

GOING, *part.* चरन् -रन्ती -रत् (त्), चलन् -लन्ती -लत् (त्), क्रामन् -मन्ती -मत् (त्), सरन् -रन्ती -रत् (त्), यानी -यिनी -यि (न्), सरः -रा -रं, सरणः -णा -णं, चरः -रा -रं; 'going in a straight line,' सरल-यायी -यिनी -यि (न्).

GOING, *s.* गमः -मनं, सरणं, चरणं, चारः, चलनं, व्रजनं, गतिः *f.*, गतं, अयनं, क्रमः -मणं; 'going away,' अपगमः, व्यपगमः, अपयानं, अपसरणं, अपायः, प्रस्थानं; 'going out,' निष्क्रमः -मणं, निष्क्रान्तिः *f.*, निर्गमः, निर्यायणं, बहिर्गमनं; 'going and coming,' गमागमः, गमनागमनं, गतागतं, यातायातं.

GOITRE, *s.* गडुः *m.*, गण्डिः *m.*; 'having it,' गडुकण्डः -ण्डी -ण्डं.

GOITROUS, *a.* गडुपीडितः -ता -तं, गडुकण्डः -ण्डी -ण्डं.

GOLD, *s.* सुवर्णं, स्वर्णं, कनकं, काञ्चनं, हिरण्यं, हेम *n.* (न्), हेमं, रुक्मं, रुग्मं, भर्म *n.* (न्), भर्मं, जातरूपं, जाम्बूनदं, शातकुम्भं, शातकुम्भः, शातकौम्भं, चामीकरं, निष्कं, हाटकं, हिरण्यं, तपनीयं, महारजतं, कलधौतं, कलधूतं, कार्त्तस्वरं, अष्टापदः -दं, कवुरं, कवूरं, गाङ्गेयं, गौरं, दीप्तं, भास्करं, जातरूपं, तेजस्, शातकाण्डं, महाधातुः *m.*, सौमेरुकं, लोहोत्तमं, पिञ्जानं, सुराहँ, दाक्षायणं, सानसिः *m.*, पुरटं, पुरुदं, बहिर्दीप्तं, अकुप्यं, मृदुबकं; 'pure gold,' कुमारं; 'virgin gold,' पिङ्गाशं; 'false gold,' कूटस्वर्णं; 'gold for ornaments,' शुक्तिकनकं; 'a heap of gold,' काञ्चनचयः; 'a piece of gold,' कनकभङ्गः; 'a gold coin,' सुवर्णमुद्रा; 'a weight of gold,' कनकपलः, सुवर्णः -र्णी.

GOLD, *a.* सुवर्णी or स्वर्णी or कनक or काञ्चन &c. in comp.; as, 'a gold bracelet,' सुवर्णीकङ्कणं; 'gold stick,' कनकदण्डः; 'gold-mine,' कनकस्थली, काञ्चनकन्दरः; 'gold necklace,' हेमसूत्रकं, कनकसूत्रं. *See* GOLDEN.

GOLD-BEATER, *s.* स्वर्णपत्रकारः -कृत्, सुवर्णीकारविशेषो यो मुद्गरादिना सुवर्णम् अतिसूक्ष्मीकरोति or अतिशयेन तनूकरोति or उद्वर्त्तयति.

GOLD-DRAWER, *s.* सुवर्णीद्वर्त्तनकारी *m.* (न्), कनकोद्वर्त्तनकृत् *m.*

GOLD-DUST, *s.* कनकपरागः, काञ्चनभूः *f.*, कनकरेणुः *m.*

GOLDEN, *a.* सौवर्णः -र्णी -र्णं, स्वर्णमयः -यी -यं, स्वर्णनिर्म्मितः -ता -तं, स्वर्णकः -का -कं, सुवर्णवान् -वती -वत् (त्), काञ्चनः -नी -नं, काञ्चनमयः -यी -यं, कनकमयः -यी -यं, सुवर्णीकृतः -ता -तं, रुक्मवान् -वती -वत् (त्), तापनीयः -यी -यं; 'golden ornament,' कनकभूषणं. *See* GOLD, *a.*

GOLDFINCH, *s.* कनकवर्णपक्षयुक्तो मधुररुतविशिष्टः क्षुद्रपक्षी *m.* (न्).

GOLD-FISH, *s.* चीनदेशजः कनकवर्णो मत्स्यभेदः.

GOLD-LEAF, *s.* स्वर्णपत्रं, कनकपत्रं, अष्टापदपत्रं, पत्रं.

GOLDSMITH, *s.* स्वर्णकारः, सुवर्णकारः, हेमकारः, रुक्मकारकः, नाडिन्धमः, हेमलः, कलादः, कणादः, गौड्डिकः, सुवर्णस्य विकारानारकृत् *m.*

GOLD-THREAD, *s.* कनकसूत्रं, हेमसूत्रं, सुवर्णतन्तुः *m.*

GOLF, *s.* कन्दुकक्रीडा, कन्दुकलीला, गुलिकाक्रीडा.

GONDOLA, *s.* वेनिशनगरवासिभिः प्रयुक्तो लघुनौकाविशेषः.

GONDOLIER, *s.* पूर्व्वोक्तनौकावाहकः, पूर्व्वोक्तनौकादण्डधरः.

GONE, *p. p.* गतः -ता -तं, यातः -ता -तं, चलितः -ता -तं, सृतः -ता -तं, चरितः -ता -तं, व्रजितः -ता -तं, इतः -ता -तं, पन्नः -न्ना -न्नं; 'gone away,' अपगतः -ता -तं, व्यपगतः -ता -तं; 'gone out,' निर्गतः -ता

-तं, निष्क्रान्तः -न्ता -न्तं, बहिर्गतः -ता -तं.—(Past) वृत्तः -त्ता -त्तं, भूतः -ता -तं, अतीतः -ता -तं, अतिक्रान्तः -न्ता -न्तं.

GONFALON, GONFANON, *s.* पताका, ध्वजः, केतुः *m.*, वैजयन्ती.

GONG, *s.* कांस्यं, घनं, गभीरिका.

GONIOMETER, *s.* कोणपरिमापकयन्त्रं, असमापनयन्त्रं.

GONORRHŒA, *s.* रक्षणीरकः, रक्षणारकः, धातुक्षरणं, मूत्रमार्गरोगः.

GOOD, *a.* (Not bad, excellent) साधुः -धुः -ध्वी -धु, भद्रः -द्रा -द्रं, उत्तमः -मा -मं, प्रशस्तः -स्ता -स्तं, प्रशस्यः -स्या -स्यं, शस्तः -स्ता -स्तं, शस्यः -स्या -स्यं, शिष्टः -ष्टा -ष्टं, शुभः -भा -भं, कुशलः -ला -लं, कल्याणः -णा -णं, सन् सती सत् (त्), सत्तमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं, सारः -रा -रं, सारवान् -वती -वत् (त्), आर्य्यः -र्य्या -र्य्यं, वरः -रा -रं, निर्दोषः -षा -षं, अदुष्टः -ष्टा -ष्टं, often expressed by सु prefixed; as, 'a good action,' सुक्रिया; 'a good man,' साधुजनः, सज्जनः; 'a good road,' सुपथः, सन्मार्गः.—(Virtuous) धार्म्मिकः -की -कं, सच्चरितः -ता -तं, सदाचारः -रा -रं, साधुवृत्तः -त्ता -त्तं, आर्य्यवृत्तः -त्ता -त्तं, शुभाचारः -रा -रं, सुकर्म्मा -र्म्मा -र्म्म (न्), सुकृती -तिनी -ति (न्), सुकृत् *m. f. n.*, सुचरितः -ता -तं, कुशली -लिनी -लि (न्), पुण्यः -ण्या -ण्यं, पुण्यकर्म्मा -र्म्मा -र्म्म (न्), पुण्यशीलः -ला -लं, पुण्यात्मा -त्मा -त्म (न्), वृत्तवान् -वती -वत् (त्).—(Suitable, fit) योग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं, उपयुक्तः -क्ता -क्तं, उचितः -ता -तं, समुचितः -ता -तं, हितः -ता -तं, सुहितः -ता -तं, sometimes expressed by the fut. pass. part.; as, 'good to eat,' खाद्यः -द्या -द्यं, खादनीयः -या -यं.—(Wholesome) पथ्यः -थ्या -थ्यं.—(Useful) उपयोगी -गिनी -गि (न्), सोपकारः -रा -रं.—(Kind) हितः -ता -तं, हितकामः -मा -मं, सुजनः -ना -नं, प्रियङ्करः -रा -रं, प्रियकारः -रा -रं, उपकारकः -का -कं.—(Tending to promote) उत्पादकः -का -कं.—(Sound, undamaged) अक्षतः -ता -तं, अदूषितः -ता -तं.—(Entire, complete) सम्पूर्णः -र्णा -र्णं, सकलः -ला -लं, कृत्स्नः -त्स्ना -त्स्नं.—(Considerable, great) बहुः -ह्वी -हु, अनल्पः -ल्पा -ल्पं, महान् -हती -हत् (त्), भूरिः -रिः -रि, प्रचुरः -रा -रं, सु or अति prefixed; as, 'a good deal vexed,' सुदुःखितः -ता -तं, अतिदुःखितः -ता -तं; 'a good distance,' सुदूरं; 'a good while ago,' सुदीर्घकाले गते.—(Valid) धर्म्यः -र्म्या -र्म्यं, अविशुद्धः -द्धा -द्धं. 'Good quality,' गुणः; 'endowed with good qualities,' गुणी -णिनी -णि (न्), सद्गुणः -णा -णं; 'good wishes,' कल्याणवचनं, आशीर्वचनं; 'good and bad,' शुभाशुभः -भा -भं, हिताहितः -ता -तं, सारासारः -रा -रं; 'beloved by the good,' आर्य्यहृद्यः -द्या -द्यं; 'to make good,' सम्पद् (c. 10. -पादयति -यितुं), सम्पॄ (c. 10. -पूरयति -यितुं), साध् (c. 10. साधयति -यितुं); 'make good a promise,' प्रतिज्ञाम् अपवृज् (c. 10. -वर्जयति -यितुं); 'make good a debt,' ऋणं शुध् (c. 10. शोधयति -यितुं) or अपाकृ; 'a good fellow,' भद्रः; 'in good time,' उपयुक्तकाले.

GOOD, *s.* (Benefit, welfare) हितं, श्रेयस् *n.*, भद्रं, शुभं, कल्याणं, कुशलं, क्षेमं, मङ्गलं, भूतिः *f.*; 'for the good of the world,' लोकहिताय, भूतये भुवः; 'good and evil,' हिताहितं, शुभाशुभं, भद्राभद्रं, मङ्गलामङ्गलं; 'good and bad,' सारासारं.—(Utility) उपयोगः, अर्थः, फलं, लाभः.—(Virtue) पुण्यं, सुकृतं, सुचरितं, साधुवृत्तं, धर्म्मः; 'to do good,' हितं कृ, क्षेमं कृ, उपकृ.

GOOD, *adv.* सु prefixed, सुष्ठु; 'as good as,' समं; 'this is as good as a sixteenth part,' एतत् षोडशांशेन समं.

GOOD, *interj.* भद्रं, बाढं, कामं, भवतु, अस्तु, एवमस्तु, तथेति.

GOOD-BREEDING, *s.* सभ्यता, विनयः, सुविनयः, सुशीलता; 'a man of good breeding,' सुविनीतः, सुशीलः.

GOOD-CONDITIONED, *a.* सुस्थः -स्था -स्थं, सुस्थितः -ता -तं, सुवृत्तः -त्ता -त्तं.

GOOD-FELLOW, *s.* भद्रः, भद्रजनः, साधुजनः, सहपायी *m.* (न्), रसिकजनः.

GOOD-FELLOWSHIP, *s.* उत्सवकारिणां संसर्गः, सुसङ्गः, सुसाहित्यं, सुमैत्र्यं.

GOOD-FORTUNE, *s.* सौभाग्यं, भाग्यं, कल्याणं, भद्रं, शुभं, मङ्गलं, माङ्गल्यं, कुशलं, कौशल्यं, दैवं, सुदैवं, श्रीः *f.*, लक्ष्मीः *f.*, शर्म्म *n.* (न्), सम्पद्, सम्पत्तिः *f.*, पुण्योदयः.

GOOD-FRIDAY, *s.* ख्रीष्टस्य क्रूशारोपणमुद्दिश्य महोपवासदिनं.

GOOD-HUMOUR, *s.* सद्भावः, सुस्वभावः, सुशीलता, चित्तप्रसन्नता, सत्प्रकृतिः *f.*

GOOD-HUMOURED, *a.* सुप्रकृतिः -तिः -ति, सत्प्रकृतिः -तिः -ति, हृष्टभावः -वा -वं, हृष्टचित्तः -त्ता -त्तं, प्रसन्नस्वभावः -वा -वं.

GOOD-HUMOUREDLY, *adv.* सद्भावेन, सुस्वभावात्, सुशीलवत्, हृष्टवत्.

GOOD-LOOKING, *a.* सुदृश्यः -श्या -श्यं, सुदर्शनः -ना -नं, सुरूपः -पी -पं.

GOOD-LUCK, *s.* सौभाग्यं. *See* GOOD-FORTUNE.

GOOD-MANNERS, *s.* विनयः, विनीतता, मर्य्यादा, सुशीलता, सभ्यता, सदाचारता, सुनीतिः *f.*, सुचरित्रं, सच्चरित्रं.

GOOD-NATURE, *s.* सद्भावः, सुस्वभावः, सुप्रकृतिः *f.*, सत्प्रकृतिः *f.*, सुशीलता, साधुशीलत्वं, साधुत्वं, आर्य्यता.

GOOD-NATURED, *a.* सुप्रकृतिः -तिः -ति, सत्प्रकृतिः -तिः -ति, सुशीलः -ला -लं, सुभाववान् -वती -वत् (त्), साधुशीलः -ला -लं, सुहृदयः -या -यं, सुहृदयवान् &c.

GOOD-SENSE, *s.* सुविवेकः, सुबोधः, बुद्धिमत्त्वं, विज्ञता, प्रज्ञता.

GOOD-WILL, *s.* हितता, सुहितता, हितेच्छा, प्रीतिः *f.*, हितकाम्या, सौहृद्यं प्रियता, अनुकूलता.

GOOD-WOMAN, *s.* गृहिणी, गृहमेधिनी, गृहव्यापारकुशला or -दक्षा.

GOODLINESS, *s.* रूपलावण्यं, सौन्दर्य्यं, शोभा, चारुता, रूपवत्त्वं.

GOODLY, *a.* (Graceful) सुन्दरः -रा -री -रं, चारुः -र्व्वी -रु, सुदृश्यः -श्या -श्यं, सुदर्शनः -ना -नं, सुरूपः -पी -पं, लावण्यवान् -वती -वत् (त्).—(Pleasant) रम्यः -म्या -म्यं, रमणीयः -या -यं, रुचिरः -रा -रं.

GOODMAN, *s.* गृही *m.* (न्), गेही *m.* (न्), कुटुम्बी *m.* (न्), स्वामी *m.* (न्).

GOODNESS, *s.* (Excellence) साधुता -त्वं, सत्त्वं, प्रशस्तता, प्राशस्त्यं, प्रशस्तिः *f.*, उत्तमता, श्रेष्ठता, उत्कृष्टता, सारत्वं, प्रकृष्टता, विशिष्टता, कौशलं, सौष्ठवं, आर्य्यता.—(Virtue, piety) पुण्यता, पुण्यशीलता, साधुशीलता, धर्म्मत्वं, सदाचारता, साधुवृत्तत्वं, धार्म्मिकत्वं, देवभक्तिः *f.*—(Kindness) सुजनत्वं, सौजन्यं, प्रियता, दया, कृपा.

GOODS, *s. pl.* (Property, effects) द्रव्यं, द्रव्याणि *n. pl.*, वस्तूनि *n. pl.*, विभवः, सामग्री -ग्र्यं, रिक्थं.—(Moveable household furniture) अस्थावरद्रव्याणि *n. pl.*, गृहोपस्करादि *n.*, गृहोपकरणानि.—(Merchandise) भाण्डानि *n. pl.*, भाण्डकं, पण्यं, पण्यानि *n. pl.*, विट्पण्यं.

GOOSE, *s.* हंसः -सी, राजहंसः -सी, वरटः -टा -टी, वरला, चक्राङ्गः -ङ्गी, श्वेतपत्रः, श्वेतच्छदः, श्वेतगरुत् *m.*, सितपक्षः, शितिच्छदः, शितिपक्षः, जालपाद् *m.*, नीलाक्षः, मानसालयः, मानसौकाः *m.* (स्), मञ्जुगमना, धार्त्तराष्ट्रः, पुरुदंशकः, मल्लिकः, शकवः, सरःकाकः -की, कलहंसः -सी; 'ruddy goose,' चक्रः, चक्रवाकः, रथाङ्गः, कोकः, द्वन्द्वचरः -चारी; 'wild goose,' चक्राङ्की; 'tame goose,' ग्राम्यहंसः.—(Fool) मूर्खः, निर्बुद्धिः *m.*

GOOSEBERRY, *s.* कण्टकितगुल्मोत्पन्नम् अम्लफलं.

GOOSEBERRY-FOOL, *s.* क्षीरेण सह क्वथितः पूर्व्वोक्तफलरसः.

GOR-BELLIED, *a.* महोदरः -रा -रं, स्थूलोदरः -रा -रं, लम्बोदरः -रा -रं, तुन्दी -न्दिनी -न्दि (न्), वृहत्कुक्षिः -क्षिः -क्षि, वृद्धनाभिः -भिः -भि.

GOR-BELLY, *s.* महोदरं, स्थूलोदरं, वृहत्तुन्दं, वृहत्कुक्षिः *m.*

GORE, *s.* (Blood) रक्तं, असृक् *n.* (ज्), लोहितं, रुधिरं, शोणितं, सृतजं. —(Clotted blood) घनरक्तं, घनलोहितं, रक्तगुल्मः.—(Triangular piece of cloth sewed into a garment to widen it) वस्त्रपृथूकरणार्थं तन्निवेशितम् त्र्यस्राकारः पटखण्डः.

To GORE, *v. a.* (Pierce with a pointed instrument) शूलादिना त्वचं भिद् (c. 7. भिनत्ति, भेत्तुं) or निर्भिद् or छिद् (c. 7. छिनत्ति, छेत्तुं) or व्यध् (c. 4. विध्यति, व्यद्धुं).—(With the point of a horn) शृङ्गाग्रेण त्वचं निर्भिद् or व्यध्.

GORED, *p. p.* छिन्नत्वक् *m. f. n.*, सृतचर्म्मा -र्म्मा -र्म्म (न्), विदारितत्वक् *m. f. n.*, उल्लिखितचर्म्मा &c., विद्धः -द्धा -द्धं.

GORGE, *s.* (Gullet) निगरणः, अन्नवाहिस्रोतस् *n.*, गलः, कण्ठः.—(Defile between mountains) सङ्कटं, सङ्कटपथः, दुर्गमागः, कन्दरः -री, पर्व्वतरन्ध्रं, रन्ध्रं, सञ्चरः, सञ्चारः, पर्व्वतमध्ये सञ्चारपथः.

To GORGE, *v. a.* (Swallow) गॄ (c. 6. गिरति, गरितुं -रीतुं), निगॄ, ग्रस् (c. 1. ग्रसते -सितुं).—(Fill with food) अन्नेन पॄ (c. 10. पूरयति -यितुं), or परिपॄ or अत्यर्थं तृप् (c. 10. तर्पयति -यितुं).

To GORGE, *v. n.* अन्नेन पॄ in pass. (पूर्य्यते) or अत्यर्थं पॄ.

GORGED, *p. p.* अन्नपूरितः -ता -तं, अतिपूरितः -ता -तं, अतितृप्तः -प्ता -प्तं.

GORGEOUS, *a.* तेजस्वी -स्विनी -स्वि (न्), तैजसः -सी -सं, महाप्रतापः -पा -पं, प्रतापी -पिनी -पि (न्), प्रतापवान् -वती -वत् (त्), अतिशोभनः -ना -नं, सुप्रभः -भा -भं, शुभ्रः -भ्रा -भ्रं, उज्ज्वलः -ला -लं, स्पर्धी -र्धिनी -र्धि (न्).

GORGEOUSLY, *adv.* अतितेजसा, महाप्रतापेन, अतितैजसं, सुप्रभं.

GORGEOUSNESS, *s.* अतितेजस् *n.*, सुप्रतापः, अतिशोभा, सुप्रभा, उज्ज्वलता.

GORGET, *s.* ग्रीवाभरणं, गलभरणं, कण्ठावरणं, अर्द्धचन्द्राकृति कवचं.

GORGING, *s.* निगरणं, ग्रसनं, अत्याहारः, अतिभोजनं, अन्नपूरणं.

GORGON, *s.* सर्पाकारकेशविशिष्टा भयङ्करमूर्त्तिः स्त्री.

GORMAND, *s.* अत्याहारी *m.* (न्), अतिभोजी *m.* (न्). *See* GOURMAND.

To GORMANDIZE, *v. n.* अत्यर्थं भुज् (c. 7. भुङ्क्ते, भोक्तुं), अत्याहारं कृ, अतिभोजनं कृ.

GORMANDIZER, *s.* अत्याहारी *m.* (न्), बह्वाशी *m.* (न्), अतिभोजी *m.* (न्), अतिबुभुक्षुः *m.*, भक्षकः, घस्मरः, अग्नरः, कुक्षिम्भरिः *m.*, उदरम्भरिः *m.*, पात्रसमितः.

GORMANDIZING, *s.* अत्याहारः, अतिभोजनं, घस्मरता, बह्वाशित्वं, गृध्नता.

GORY, *a.* रक्तविलिप्तः -प्ता -प्तं, रक्ताक्तः -क्ता -क्तं, असृग्लिप्तः -प्ता -प्तं, रक्तगुल्लमयः -यी -यं, रक्तमलिनः -ना -नं.

GOSHAWK, *s.* अतिगृध्रशीलः श्येनभेदः, श्येनकः.

GOSLING, *s.* हंसशावकः, वरटशावकः, हंसशिशुः *m.*

GOSPEL, *s.* सुसंवादः, मङ्गलसंवादः, मङ्गलसमाचारः, सुवार्त्ता, शुभवार्त्ता.

GOSPELER, *s.* ख्रीष्टसमाचाररक्षकः, सुसंवादलेखकः, सुसंवादप्रचारकः, ख्रीष्टीयधर्म्मप्रवक्ता *m.* (क्तृ).

To GOSPELIZE, *v. a.* सुसंवादं प्रचर् in caus. (-चारयति -यितुं).

GOSSAMER, *s.* ग्रीष्मसमये वायुप्रेरिता मर्कटवासतन्तवः *m. pl.*, वाततूलं.

GOSSIP, *s.* (Tattler) जल्पकः, जल्पाकः, उपजल्पी *m.* (न्), परार्थवादी *m.* (न्), परकार्य्यचञ्चकः, वावदूकः, प्रलापी *m.* (न्), गायनः.—(Tattle) जल्पितं, जल्पः, प्रजल्पः, प्रलापः.—(Tippling companion) सहपायी *m.* (न्), पानमित्रं.

To GOSSIP, *v. n.* जल्प् (c. 1. जल्पति -ल्पितुं), प्रलप् (c. 1. -लपति -पितुं), संलप्, अनर्थककथां कृ, वृथाकथां कृ, कथोपकथनं कृ.

GOSSIPING, *s.* जल्पः -ल्पनं, जल्पितं, प्रजल्पः, संलापः, वाक्चापल्यं, आलस्यवचनं, गायनं, निरर्थककथा, वावदूकता, वाचालता.

GOT, GOTTEN, *p. p.* प्राप्तः -प्ता -प्तं, अवाप्तः -प्ता -प्तं, लब्धः -ब्धा -ब्धं, अधिगतः -ता -तं, आसादितः -ता -तं, आयत्तः -त्ता -त्तं, प्रपन्नः -न्ना -न्नं.

GOUGE, *s.* अर्द्धचन्द्राकारफलको व्रश्चनविशेषः, तक्षणी.

To GOUGE, *v. a.* (The eye) लोचनम् उत्पद् (c. 10. -पाटयति -यितुं).

GOURD, *s.* अलाबूः *f.*, अलाबुः *f.*, आलाबुः, लाबुः, तुम्बी -म्बिः *f.*, तुम्बः -म्बकः -कं, विम्बिका, सुपक्वी, कुष्माण्डकः, कूष्माण्डकः, कर्कारुः *m.*, कर्कटः; 'bitter gourd,' तिक्तिका, कटुतुम्बी, इक्ष्वाकुः *f.*

GOURMAND, *s.* अत्याहारी *m.* (न्), बहुभक्षकः, बहुभोजी *m.* (न्), भक्षकः, कुक्षिम्भरिः *m.*, उदरम्भरिः *m.*, औदरिकः.

GOUT, *s.* वातः, वातरोगः, वातव्याधिः *m.*, वातगुल्मः, वातरक्तं, वातपुडा, वातशोणितं, पादशोफः, पादगण्डिरः, पादकल्मीकं.

GOUTINESS, *s.* वातुलता, वातूलत्वं, वातिकत्वं, सवातत्वं.

GOUTY, *a.* वातकी -किनी -कि (न्), वातरोगी -गिणी -गि (न्), वातुलः -ला -लं, वातूलः -ला -लं, वातग्रस्तः -स्ता -स्तं, वातिकः -की -कं, वातासहः -हा -हं.

To GOVERN, *v. a.* शास् (c. 2. शास्ति, शासितुं), अनुशास्, प्रशास्, समनुशास्, यम् (c. 1. यच्छति, यन्तुं), नियम्, संयम्, विनियम्, सन्नियम्, ईश् (c. 2. ईष्टे, ईशितुं), पाल् (c. 10. पालयति -यितुं), परिपाल्, विनी (c. 1. -नयति -नेतुं), प्रणी, वशीकृ, विधा (c. 3. -दधाति -धातुं), अध्यास् (c. 2. -आस्ते -आसितुं), गुप् (c. 1. गोपायति, c. 10. गोपयति -यितुं).—(Keep in subjection, restrain) वशीकृ, यम्, विनियम्, संयम्, निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), विनिग्रह्, संरुध् (c. 1. -रुणद्धि -रोद्धुं), दम् (c. 10. दमयति -यितुं), यन्त्र् (c. 10. यन्त्रयति -यितुं), नियन्त्र्; 'to govern a country well,' राष्ट्रं सम्यक् पाल्; 'governing noun,' अन्वयी *m.* (न्).

To GOVERN, *v. n.* राज्यं कृ, राज्याधिकारं कृ, राज्यपालनं कृ, राज्यशासनं कृ, राजकार्य्यं कृ, राज्यव्यवहारं कृ, आधिपत्यं कृ.

GOVERNABLE, *a.* शास्यः -स्या -स्यं, शासनीयः -या -यं, वश्यः -श्या -श्यं, विधेयः -या -यं, प्रणेयः -या -यं, विनेयः -या -यं, विनीतः -ता -तं, आज्ञाधीनः -ना -नं.

GOVERNANCE, *s.* शासनं, शास्तिः *f.*, अनुशासनं, पालनं, प्रतिपालनं, आधिपत्यं, अधिकारः, नीतिः *f.*, विनयः, वशः, वशिता, संयमः, विनियमः, यमः.

GOVERNED, *p. p.* शासितः -ता -तं, अनुशासितः -ता -तं, प्रशासितः -ता -तं, पालितः -ता -तं, वशीकृतः -ता -तं, संयतः -ता -तं, विनियतः -ता -तं, नियमितः -ता -तं, निगृहीतः -ता -तं; 'governed by another,' पराधीनः -ना -नं, परतन्त्रः -त्रा -त्रं.

GOVERNESS, *a.* बालाध्यापका, बालोपदेशिका, बालोपदेशिनी, शिक्षाकरी.

GOVERNMENT, *s.* (Administration of government) राज्यं, राज्याधिकारः, राज्यधुरा, राजधुरा, राज्यनीतिः *f.*, राज्यपालनं, राज्यव्यवहारः, नीतिः *f.*, वैशस्यं.—(Control, regulation) शासनं, शास्तिः *f.*, अनुशासनं, वशः -शं, यमः, संयमः, विनियमः, निग्रहः, दमः -मनं, यन्त्रणं.—(Authority) अधिकारः, अधीकारः, आधिपत्यं, प्रभुत्वं, ईशित्वं, ऐश्वर्य्यं.—(Empire) राज्यं, राजत्वं, आधिपत्यं.—(The king's ministers) राजधुर्वहाः *m. pl.*, राजमन्त्रिणः *m. pl.*, राजसचिवाः *m. pl.*; 'form of government,' राज्यरीतिः *f.*, राज्यविधिः *m.*; 'government affairs,' राज्यव्यवहारः, राजकार्य्यं; 'good government,' सम्यक् पालनं; 'bad government,' असम्यक् पालनं.

GOVERNOR, *s.* अधिपतिः *m.*, अधिष्ठाता *m.* (तृ), अधिकारी *m.* (न्), अध्यक्षः, अधिपः, शासिता *m.* (तृ), प्रशासिता *m.*, शास्ता *m.*, शासकः, अनुशासकः, अधिकृतः, ईशिता *m.* (तृ), ईश्वरः, ईशः, पालयिता *m.* (तृ), नियन्ता *m.* (न्तृ), राष्ट्रियः.

GOVERNORSHIP, *s.* आधिपत्यं, अधिष्ठातृत्वं, अध्यक्षता, अधिकारिता.

GOWN, *s.* शाटी, शाटकः, स्त्रीकटीवस्त्रं, कटिवस्त्रं, कटीपटः, पटवासः, चोटी, चलनकं.

GOWNED, *a.* सशाटकः -का -कं, कटिवस्त्रवेष्टितः -ता -तं.

GOWNSMAN, *s.* पण्डितवेशधारी *m.* (न्), पण्डितवेशः.—(In an university) राजविद्यालये अन्तेवासिवेशधारी *m.* (न्).

GRAB, *s.* ग्रहः, ग्रहणं, सङ्ग्रहः -हणं, सङ्ग्राहः, धरणं, धृतिः *f.*

GRABBED, *p. p.* अकस्मात् सङ्गृहीतः -ता -तं or धृतः -ता -तं.

To GRABBLE, *v. n.* (Grope) परामृश् (c. 6.- मृशति -ष्टुं).—(Lie prostrate on the belly) उदरेण भूमिं गम् (c. 1. गच्छति, गन्तुं), क्षिप्तदेहः -हा -हं भू, अवमूर्द्धशयः -या -यं भू.

GRACE, *s.* (Favor) प्रसादः, अनुग्रहः, दया, कृपा, अनुकम्पा, प्रसन्नता, अनुकूलता, अनुरोधः.—(Good-will, kindness) प्रीतिः *f.*, प्रियता, हितता, हितेच्छा.—(Beauty, elegance) शोभा, लावण्यं, विलासः, चारुता, सौन्दर्य्यं, विनीतता, लालित्यं, श्रीः *f.*—(Pardon) क्षमा, पापशोधनं, पापमार्जनं, निष्कृतिः *f.*—(Blessing before or after meat) भोजनात् पूर्व्वं परं वा धन्यवादः.—(Goddess of beauty) श्रीदेवता, श्रीः *f.*

To GRACE, *v. a.* शुभ् (c. 10. शोभयति -यितुं), उपशुभ्, अलङ्कृ, समलङ्कृ, भूष् (c. 10. भूषयति -यितुं), विभूष्, शोभां कृ or दा, मन् (c. 10. मानयति -यितुं).

GRACED, *p. p.* शोभितः -ता -तं, उपशोभितः -ता -तं, कृतशोभः -भा -भं.

GRACEFUL, *a.* विलासी -सिनी -सि (न्), चारुः -रुः -रुः, लावण्यवान् -वती -वत् (त्), सुन्दरः -रा -री -रं, सुरूपः -पी -पं, सुललितः -ता -तं, ललितः -ता -तं, विनीतः -ता -तं, लीलावान् -वती -वत् (त्), शुभगः -गा -गं, सुगः -गा -गं; 'graceful walk,' शुभगतिः *f.*, सुगतिः *f.*; 'graceful speech,' वाग्विलासः; 'having a graceful gait,' शुभगतिः -तिः -ति.

GRACEFULLY, *adv.* सविलासं, विलासेन, विलासतया, सलावण्यं, लावण्येन, सुन्दरं, सौन्दर्य्येण, सुललितं, विनीतं, चारु.

GRACEFULNESS, *s.* चारुता, सौन्दर्य्यं, लावण्यं, रूपलावण्यं, विलासः -सिता, लालित्यं, सुलालित्यं, विनीतता -त्वं, रूपवत्त्वं, शोभा, श्रीः *f.*, वामता, सुरूपत्वं.

GRACELESS, *a.* अन्तर्दुष्टभावः -वा -वं, दुराचारः -रा -रं, मन्दचरित्रः -त्रा -त्रं, नष्टभावः -वा -वं, अतिदुष्टः -ष्टा -ष्टं, ईश्वरप्रसादबहिष्कृतः -ता -तं.

GRACELESSNESS, *s.* अन्तर्दुष्टता, अतिदुष्टता, दुराचारता, नष्टता.

GRACIOUS, *a.* प्रसन्नः -न्ना -न्नं, सुप्रसन्नः -न्ना -न्नं, अनुग्राही -हिणी -हि (न्), अनुकूलः -ला -लं, आनुग्राहकः -की -कं, प्रसादितः -ता -तं, अनुकम्पी -म्पिनी -म्पि (न्), दयावान् -वती -वत् (त्), दयाशीलः -ला -लं, दयालुः -लुः -लु, कृपावान् &c., सानुकम्पः -म्पा -म्पं, हितः -ता -तं, हितबुद्धिः -द्धिः -द्धि, सानुक्रोशः -शा -शं, कृपालुः -लुः -लु, उपकारी -रिणी -रि (न्), उपकारकः -का -कं, भक्तवत्सलः -ला -लं; 'be thou gracious,' प्रसीद.

GRACIOUSLY, *adv.* प्रसन्नं, सुप्रसन्नं, प्रसादेन, सप्रसादं, अनुग्रहेण, सानुग्रहं, अनुकूलं, सानुकूल्यं, सानुकम्पं, कृपया, दयया, हितेच्छया.

GRACIOUSNESS, *s.* प्रसन्नता, सुप्रसन्नता, प्रसादः, अनुग्रहः, अनुकूलता, आनुकूल्यं, अनुकम्पा, दयालुत्वं, कृपालुत्वं -ता, हितता, हितबुद्धित्वं, सानुकम्पता.

GRADATION, *s.* क्रमः -मणं, अनुक्रमः -मणं, पर्य्यायः, आनुपूर्व्यं, आनुपूर्व्ये -र्व्यी -र्व्यैकं, परम्परा, अन्वयः, समन्वयः, उत्तरोत्तरं, अल्पाल्पता, अनुयायित्वं; 'in regular gradation,' यथाक्रमं, क्रमशस्, अनुपूर्व्वशस्, क्रमे क्रमे, पर्य्यायेण.

GRADE, *s.* क्रमः, पदं, पदवीः *f.* -वी, आस्पदं, अवस्था; 'highest grade,' परमपदं.

GRADIENT, *a.* (Moving by steps) क्रामन् -मन्ती -मत् (त्), क्रममाणः -णा -णं.—(Rising and descending) उन्नतानतः -ता -तं; 'gradients,' पातोत्पाताः *m. pl.*

GRADUAL, *a.* क्रमकः -का -कं, क्रमिकः -का -कं, अल्पाल्पः -ल्पा -ल्पं, उत्तरोत्तरः -रा -रं, आनुक्रमिकः -की -कं, आनुपदिकः -की -कं, अनुपूर्व्वः -र्व्वी -र्व्वं, आनुपूर्व्विकः -की -कं.

GRADUALLY, *adv.* क्रमशस्, क्रमतस्, क्रमेण, क्रमे क्रमे, पदे पदे, पदशस्, प्रतिपदं, अनुपदं, पदात्पदं, शनैः, शनैः शनैः.

To GRADUATE, *v. a.* राजविद्यालये पदं प्राप् in caus. (-आपयति -यितुं) or पदे नियुज् (c. 7. -युंक्ते -योक्तुं).—(Mark with degrees) आनुक्रमिकचिह्नैर् अङ्क् (c. 10. अङ्कयति -यितुं), अनुक्रमेण चिह्नैर् अङ्क्, क्रमकछेदैर् अङ्क्.

To GRADUATE, *v. n.* (Receive a degree at an university) राजविद्यालये पदं प्राप् (c. 5. -आप्नोति -आप्तुं).

GRADUATE, *a.* महाविद्यालये पदप्राप्तः or पदयुक्तः or पदवान् *m.* (त्).

GRADUATED, *p. p.* राजविद्यालये पदयुक्तः -क्ता -क्तं.—(Marked with degrees) आनुक्रमिकचिह्नैर् अङ्कितः -ता -तं, आनुक्रमिकछेदाङ्कितः -ता -तं.

GRADUATION, *s.* अनुक्रमः -मणं, क्रमः -मणं, पर्य्यायः, आनुपूर्व्यं.—(Marking with degrees) आनुक्रमिकचिह्नाङ्कनं, आनुक्रमिकछेदाङ्कनं.

GRAFT, *s.* वृक्षशाखानिवेशितो भिन्नवृक्षपल्लवः -वं or भिन्नवृक्षकिसलयः.

To GRAFT, *v. a.* एकवृक्षशाखायां भिन्नवृक्षपल्लवं निविश् (c. 10. -वेशयति -यितुं), एकवृक्षपल्लवं भिन्नवृक्षपल्लवेन संयुज् (c. 10. -योजयति -यितुं) or संलग्नीकृ.

GRAFTED, *p. p.* भिन्नवृक्षशाखानिवेशितः -ता -तं, भिन्नवृक्षविटपसंयुक्तः -क्ता -क्तं.

GRAFTING, *s.* एकवृक्षशाखायां भिन्नवृक्षपल्लवनिवेशनं.

GRAIN, *s.* (Seed of corn) धान्यं, धान्यादि *n.*—(Corn in general) शस्यं, सीत्यं, गारित्रः, सस्यकरिः *m.*, बीजरुहः, जीवसाधनं.—(Seed) बीजं -जकं.—(A particle) कणः -णिकः -का, लवः, लेशः, अक्षः *m.*, रेणुः *m.*; 'a grain of rice,' तण्डुलकणः.—(Seed used as a weight) काकिणी.—(Vein of wood) काष्ठरेखा, काष्ठलेखा, काष्ठशिरा; 'against the grain,' प्रतिलोमः -मा -मं, प्रतीपः -पा -पं; 'with the grain,' अनुलोमः -मा -मं; 'grain freed from chaff,' धान्यास्थि; 'fried grain,' लाजा -जाः *m. pl.*, अक्षतं; 'wetted grain,' लाजः.

To GRAIN, *v. a.* काष्ठरेखानुकारेण चित्र् (c. 10. चित्रयति -यितुं) or चित्रीकृ.

GRAINED, *p. p.* or *a.* (Painted in imitation of the fibres of wood) काष्ठरेखासमवर्णेन चित्रितः -ता -तं or लिखितः -ता -तं, दारुरेखानुकृतवर्णः -र्णा -र्णं.

GRAINY, *a.* धान्यमयः -यी -यं, शस्यमयः -यी -यं, धान्यवान् -वती -वत् (त्).

GRAMINEOUS, *a.* तृणमयः -यी -यं, तृणसः -सा -सं, शाद्वलः -ला -लं.

GRAMINIVOROUS, *a.* तृणभक्षकः -का -कं, तृणखादकः -का -कं, तृणभोजी -जिनी -जि (न्), तृणजम्भः -म्भा -म्भं, घासादः -दा -दं, घासाहारी -रिणी -रि (न्).

GRAMMAR, *s.* व्याकरणं, व्याकृतिः *f.*, व्याकरणशास्त्रं, शब्दशास्त्रं, शास्त्रचक्षुस् *n.*, व्युत्पत्तिः *f.*, व्युत्पत्तिवादः, शब्दव्युत्पत्तिः *f.*, शब्दशुद्धिः *f.*

GRAMMAR-SCHOOL, *s.* व्याकरणशिक्षाशाला, व्याकरणपाठशाला.

GRAMMARIAN, *s.* वैयाकरणः, वैयाकरणीयः, व्याकरणशास्त्रज्ञः, शब्दशास्त्रज्ञः, व्याकरणज्ञः, व्याकरणाध्यापकः, शाब्दिकः, व्याकरणव्युत्पन्नः.

GRAMMATICAL, *a.* वैयाकरणः -णी -णं -णीयः -या -यं, शाब्दिकः -की -कं, व्याकरणसम्बन्धी -न्धिनी -न्धि (न्).—(According to grammar) व्याकरणानुसारी -रिणी -रि (न्), व्याकरणाविरुद्धः -द्धा -द्धं; 'grammatical accuracy,' शब्दशुद्धिः *f.*

GRAMMATICALLY, *adv.* व्याकरणानुसारेण, व्याकरणाविरोधेन, शब्दशास्त्रवत्

GRANARY, *s.* कुशूलः, धान्यागारं, शस्यागारं, व्रीह्यगारं, अक्षकोष्ठः -ष्ठकं, कोष्ठकं, कक्षोलः -लकः, कायस्थालः, पिटः, कृदरः, मरारः.

GRAND, *a.* (Great) महान् -हती -हत् (त्), बृहन् -हती -हत् (त्).—(Splendid) प्रतापी -पिनी -पि (न्), प्रतापवान् -वती -वत् (त्), सुप्रभः -भा -भं, तेजसः -सी -सं, तेजस्वी -स्विनी -स्वि (न्), उज्ज्वलः -ला -लं.—(Principal) प्रधान in comp., प्रमुखः -खा -खं, मुख्यः -ख्या -ख्यं, अग्र्यः -ग्रा -ग्र्यं, अग्र्यः -ग्र्या -ग्र्यं, अग्रीयः -या -यं, उत्तमः -मा -मं.—(Noble) उत्कृष्टः -ष्टा -ष्टं.

GRANDAM, *s.* मातामही, पितामही.—(Old woman) वृद्धा स्त्री, जरिणी.

GRANDCHILD, *s.* पुत्रसुतः -ता, पुत्रात्मजः -जा, पौत्रः -त्री, दौहित्रः -त्री.

GRANDDAUGHTER, *s.* पौत्री, नप्त्री, पुत्रसुता, पुत्रपुत्री, सुतात्मजा, पुत्रात्मजा.—(Daughter's daughter) दौहित्री, पुत्रिकासुता; 'great granddaughter,' प्रपौत्री, प्रतिनप्त्री.

GRANDEE, *s.* कुलीनजनः, कुलश्रेष्ठी *m.* (न्), राजन्यः, उच्चपदस्थः, उत्कृष्टपदस्थः, सत्कुलीनः, अभिजनवान् *m.* (त्).

GRANDEUR, *s.* (Greatness) महत्त्वं, महिमा *m.* (न्), बृहत्त्वं.—(Splendor, dignity) प्रतापः, विभूतिः *f.*, वैभवं, तेजस् *n.*, उज्ज्वलता, सुप्रभता, ओजस्विता, प्रभावः, ऐश्वर्यं, सम्पत्तिः *f.*—(Nobleness, elevation) माहात्म्यं, औदार्यं, उदारता, उत्कर्षः, उत्कृष्टता, श्रेष्ठत्वं.

GRANDEVITY, *s.* चिरजीवः -वा -वितं, दीर्घवयस्कत्वं, वृद्धता.

GRANDEVOUS, *a.* चिरजीवी -विनी -वि (न्), दीर्घजीवी &c., दीर्घायूः -यूः -युः (स्).

GRANDFATHER, *s.* (Paternal) पितामहः, पितृपिता *m.* (तृ).—(Maternal) मातामहः, मातृपिता *m.* (तृ), आर्यकः; 'great grandfather,' प्रपितामहः, प्रमातामहः; 'great great grandfather,' वृद्धप्रपितामहः, 'great great grandmother,' वृद्धप्रमातामहः.

GRANDILOQUENCE, *s.* गर्ज्जितवाक्यं, अतिशयोक्तिः *f.*, अत्युक्तिः *f.*, चिचोक्तिः *f.*, दर्पवाक्यं, दर्पाभ्मातवचनं.

GRANDILOQUENT, *a.* गर्ज्जितवाक्यः -क्या -क्यं, उच्चवादी -दिनी -दि (न्).

GRANDINOUS, *a.* करकामयः -यी -यं, शिलावृष्टिमान् -मती -मत् (त्).

GRANDLY, *adv.* तेजसा, प्रतापेन, सप्रतापं, सुप्रभं, विभूत्या, वैभवेन, ऐश्वर्येण, उज्ज्वलं, उत्कर्षेण, उत्कृष्टं, श्रेष्ठं, प्रभावेण.

GRANDMOTHER, *s.* (Paternal) पितामही, पितृमाता *f.* (तृ), पितृप्रसूः *f.*—(Maternal) मातामही, मातृमाता *f.* (तृ); 'great grandmother,' प्रपितामही, प्रमातामही.

GRAND-NEPHEW, *s.* भ्रातृपौत्रः, भ्रातृनप्ता *m.* (तृ), स्वसृपौत्रः, स्वसृनप्ता *m.*

GRANDNESS, *s.* महत्त्वं, महिमा *m.* (न्), वैभवं, प्रतापः. *See* GRANDEUR.

GRAND-NEICE, *s.* भ्रातृपौत्री, भ्रातृनप्त्री, स्वसृनप्त्री, स्वसृपौत्री.

GRANDSIRE, *s.* पितामहः, मातामहः, आर्यकः, पितृपिता *m.* (तृ).

GRANDSON, *s.* (Son's son) पौत्रः, नप्ता *m.* (तृ), पुत्रसुतः, पुत्रपुत्रः, सुतात्मजः, पुत्रात्मजः.—(Daughter's son) दौहित्रः, पुत्रिकापुत्रः, पुत्रिकासुतः; 'great grandson,' प्रपौत्रः, प्रतिनप्ता *m.* (तृ); 'great great grandson,' परप्रपौत्रः, परप्रतिनप्ता *m.* (तृ), परस्परः.

GRANGE, *s.* क्षेत्रं, भूमिः *f.*, क्षेत्रभूमिः *f.*, क्षेत्रिकगृहादि *n.*

GRANITE, *s.* ग्रावशितसंज्ञकः सुदृढप्रस्तरविशेषः.

GRANIVOROUS, *a.* शस्यभक्षकः -का -कं, शस्यादः -दा -दं, धान्यभुक् *m. f. n.*

GRANT, *s.* प्रदानं, सम्प्रदानं, दानं, दत्तं, प्रदा, वितरणं, विसर्जनं, उत्सर्गः, उत्सर्जनं, दायः, विहापितं; 'grant of maintenance,' वृत्तिदानं; 'a written grant,' लेखपत्रं, समर्पणपत्रं; 'a royal grant,' शासनं, शासनपत्रं, पट्टः; 'grant of property,' निबन्धः -न्धनं; 'grant of safe conduct,' अभयप्रदानं.

To GRANT, *v. a.* (Give, confer) दा (c. 3. ददाति, c. 1. यच्छति, दातुं), प्रदा, अनुदा, वितृ (c. 1. -तरति -रितुं -रीतुं), प्रतिपद् (c. 10. -पादयति -यितुं), दिश् (c. 6. दिशति, देष्टुं), उपकृ, उपाकृ.—(Admit) स्वीकृ, स्वीकारं कृ, अङ्गीकृ, ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), अनुग्रह्.—(Allow) अनुज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), अभ्यनुज्ञा, अनुमन् (c. 4. -मन्यते -मन्तुं).

GRANTED, *p. p.* प्रदत्तः -त्ता -त्तं, प्रहः -ह्ता -ह्तं, दत्तः -त्ता -त्तं, वितीर्णः -र्णा -र्णं, स्वीकृतः -ता -तं, अङ्गीकृतः -ता -तं, अनुज्ञातः -ता -तं, अनुमतः, -ता -तं; 'be it so,' भवतु, एवमस्तु, अस्त्वेवं.

GRANTEE, *s.* दानग्रहीता *m.* (तृ), आदाता *m.* (तृ), दानभोगी *m.* (न्).

GRANTOR, *s.* दाता *m.* (तृ), दानकर्त्ता *m.* (र्तृ), उत्सर्गकर्त्ता *m.*

GRANULAR, GRANULARY, *a.* बीजमयः -यी -यं, शस्यबीजाकारः -रा -रं.

To GRANULATE, *v. a.* बीजाकारं -रां -रं कृ, क्षुद्रपिण्डीकृ, शस्यबीजाकारेण घनीकृ or सान्द्रीकृ or संहतीकृ or खण्डीकृ.

To GRANULATE, *v. n.* बीजाकारपिण्डान् बन्ध् (c. 9. बध्नाति, बन्धुं), बीजाकारीभू, सूक्ष्मपिण्डीभू, शस्यबीजाकारेण घनीभू.

GRANULATED, *p. p.* शस्यबीजाकारः -रा -रं.—(Sugar) खण्डमोदकः, शर्करा.

GRANULATION, *s.* बीजाकारपिण्डबन्धनं, क्षुद्रपिण्डबन्धनं.—(Of flesh) उत्सादनं, अर्बुदं.

GRANULE, *s.* कणिका, बीजकं, लवः, अणुः *m.*, गुटिका, क्षुद्रगुटिका.

GRAPE, *s.* द्राक्षा, मृद्वीका, मृद्वी, स्वाद्वी, स्वादुरसा, मधुरसा, गोस्तनी -ना, रसा, रसाला, चारुफला, कापिशायनी, साध्वी, हरहूरा; 'made of grapes,' माद्वीकः -की -कं; 'juice of grapes,' द्राक्षारसः.

GRAPERY, *s.* द्राक्षारोहणयोग्यं गृहं, द्राक्षावाटिका.

GRAPE-SHOT, *s.* युद्धनाडेः प्रक्षेपणीयो द्राक्षास्तवकरूपेण पिण्डीभूतो गुलिकासमूहः.

GRAPE-STONE, *s.* द्राक्षाबीजं -जकं, द्राक्षाफलस्य अस्थिः *f.* or अष्ठीला.

GRAPHIC, GRAPHICAL, *a.* सुचित्रितः -ता -तं, सुवर्णितः -ता -तं, सुनिर्द्दिष्टः -ष्टा -ष्टं, सुलिखितः -ता -तं, सुकथितः -ता -तं, सुनिर्देशकः -का -कं.

GRAPHICALLY, *adv.* सुवर्णनेन, सुनिर्देशेन, सुविवरणेन, सुचित्रितं, सुनिर्द्दिष्टं.

GRAPNEL, *s.* चतुर्दन्तयुक्तो लङ्गरविशेषः, चतुर्दन्तयुक्तम् आकर्षणयन्त्रं, आकर्षणी -र्षिणी.

To GRAPPLE, *v. a.* (Lay hold of, seize) सङ्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), उपसङ्ग्रह्, धृ (c. 1. धरति, धर्त्तुं), आकृष् (c. 1. -कर्षति, c. 6. -कृषति -क्रष्टुं).

To GRAPPLE WITH, *v. n.* बाहूबाहवि or हस्ताहस्ति युध् (c. 4. युध्यते, योद्धुं), बाहुयुद्धे सङ्गम् (c. 1. -गच्छति -गन्तुं).

GRAPPLE, *s.* (Hold) सङ्ग्राहः, आग्रहः, धृतिः *f.*—(Close fight) बाहुयुद्धं.—(Hook) आकर्षणी -र्षिणी.

GRAPPLED, *p. p.* सङ्गृहीतः -ता -तं, धृतः -ता -तं, आकर्षितः -ता -तं.

GRAPPLING-IRONS, *s. pl.* लोहमयम् आकर्षणयन्त्रं, आकर्षणी -र्षिणी.

GRAPY, *a.* द्राक्षामयः -यी -यं, द्राक्षासरसः -सा -सं, द्राक्षोपमः -मा -मं.

GRASHOPPER, *s.* *See* GRASSHOPPER.

To GRASP, *v. a.* and *n.* ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), सङ्ग्रह्, परिग्रह्, अभिग्रह्, उपसङ्ग्रह्, मुष्टिना ग्रह् or सङ्ग्रह्, धृ (c. 1. धरति, धर्त्तुं), ग्रस् (c. 1. ग्रसते -सितुं), परामृश् (c. 6. -मृशति -मर्ष्टुं), अवलम्ब् (c. 1. -लम्बते -म्बितुं), सङ्ग्राहं कृ.—(Grasp at, try to seize) ग्रह् in des. (जिघृक्षति -ते -क्षितुं), हृ (c. 1. हरति, हर्त्तुं), संहृ, अपहृ, हृ in des. (जिहीर्षति -ते -र्षितुं); 'one who has grasped his sword,' गृहीतखड्गः.

GRASP, *s.* मुष्टिसङ्ग्राहः, ग्रहः -हणं, मुष्टिग्रहणं, सङ्ग्रहः, सङ्ग्राहः, हस्तग्रहः, आग्रहः, धृतिः *f.*, हस्तधृतिः *f.*, धरणं, अवलम्बनं, करालम्बनं; 'tightness of grasp,' दृढमुष्टिता; 'within the grasp,' ग्राह्यः -ह्या

-र्हं, ग्रहणीयः -या -यं.

GRASPED, *p. p.* गृहीतः -ता -तं, मुष्टिसङ्गृहीतः -ता -तं, मुष्टिसङ्ग्राहपीडितः -ता -तं, धृतः -ता -तं, ग्रस्तः -स्ता -स्तं, लग्नः -ग्ना -ग्नं, कुण्ठितः -ता -तं.

GRASPER, *s.* ग्राहकः, मुष्टिसङ्ग्राहकृत्, सङ्गृहीता *m.* (तृ), हस्तौ *m.* (द्वि).

GRASPING, *s.* ग्रहणं, सङ्ग्राहः, सङ्ग्रहः, धृतिः *f.*, धरणं, हरणं.

GRASPING, *part.* or *a.* जिघृक्षुः -क्षुः -क्षु, जिहीर्षुः -र्षुः -र्षु, पुरोभागी -गिनी -गि (न्), ग्रहणशीलः -ला -लं.

GRASS, *s.* तृणं, घासः, यवसः, भवसः, शादः, अक्ष्मुनं -नी, खटः, खेटं; 'sacrificial grass,' कुशं -शः, दर्भः, कुथः, पवित्रं; 'young grass,' बालतृणं, शष्पं; 'fragrant grass,' ऋतृणं, सौगन्धिकं, देवजग्धं -ग्धकं, पौरं, ध्यामं, रौहिषं; 'abounding with grass,' तृणपूर्णः -र्णा -र्णं, बहुतृणः -णा -णं, महाघासः -सा -सं.

To GRASS, *v. a.* तृणेन आछद् (c. 10. -छादयति -यितुं), सतृणं -र्णां -र्णं कृ.

GRASSHOPPER, *s.* शरभः, शलभः, पतङ्गः, त्रिशङ्कुः *m.*

GRASSINESS, *s.* सतृणत्वं, सघासत्वं, शाद्वलता, बहुघासत्वं.

GRASSLESS, *a.* तृणहीनः -ना -नं, अतृणः -णा -णं, तृणवर्जितः -ता -तं.

GRASS-PLOT, *s.* तृणावृतो भूमिभागः or भूप्रदेशः, सतृणस्थलं.

GRASSY, *a.* तृणसः -सा -सं, तृणमयः -यी -यं, सतृणः -णा -णं, तृणावृतः -ता -तं, तृणाच्छादितः -ता -तं, घासमयः -यी -यं, बहुघासः -सा -सं, बहुतृणः -णा -णं, महाघासः -सा -सं, शाद्वलः -ला -लं, साद्वलः -ला -लं.—(Green, verdant) हरितः -ता -तं, शादहरितः -ता -तं.

GRATE, *s.* (Fire-place) इध्मगुप्तिः *f.*, अङ्गारगुप्तिः *f.*, अङ्गारिणी, अग्निकुण्डं, चुल्ली, इध्मवारणी, अङ्गारवारणी, वितानं.—(Iron-lattice) लौहजालं, लौहजालकः, व्यत्यस्तलोहदण्डयुक्तम् अवरोधकं or व्यवधानं.

To GRATE, *v. a.* (Rub) घृष् (c. 1. घर्षति -र्षितुं), पिष् (c. 7. पिनष्टि, पेष्टुं), निष्पिष्, मृद् (c. 9. मृद्नाति, मर्दितुं), सङ्घट्ट (c. 10. -घट्टयति -यितुं); 'to grate the teeth,' दन्तान् दन्तैर् घृष् or निष्पिष्.—(Fret, irritate) व्यथ् (c. 10. व्यथयति -यितुं), बाध् (c. 1. बाधते -धितुं), तप् (c. 10. तापयति -यितुं), मर्म्मणि तुद् (c. 6. तुदति, तोत्तुं) or स्पृश् (c. 6. स्पृशति, स्प्रष्टुं).—(Furnish with an iron lattice) लौहजालेन युज् (c. 10. योजयति -यितुं), व्यत्यस्तलोहदण्डैर् युज्.—(Reduce to powder by rubbing) घर्षणेन चूर्णीकृ or खोदीकृ.

To GRATE, *v. n.* परस्परघर्षणं कृ, परस्परघर्षणजं कर्कशशब्दं कृ.

GRATED, *p. p.* (Rubbed) घर्षितः -ता -तं, आघर्षितः -ता -तं, पिष्टः -ष्टा -ष्टं, चूर्णीकृतः -ता -तं, खोदितः -ता -तं.—(Furnished with a grating) लोहजालयुक्तः -क्ता -क्तं.

GRATEFUL, *a.* (Having a due sense of benefits) कृतज्ञः -ज्ञा -ज्ञं, कृतवेदी -दिनी -दि (न्), कृत्यवेदी -दिनी -दि (न्), उपकृतज्ञः -ज्ञा -ज्ञं, उपकारस्मर्त्ता -र्त्री -र्त्तृ (तृ), कृतोपकारस्य स्मर्त्ता &c., उपकृतस्मरः -रन्ती -रत् (त्).—(Agreeable) रम्यः -म्या -म्यं, रमणीयः -या -यं, सुभगः -गा -गं, हृद्यः -द्या -द्यं.—(To the taste) सुस्वादः -दा -दं, सुरसः -सा -सं.

GRATEFULLY, *adv.* कृतज्ञवत्, उपकारस्मरणात्.—(Agreeably) रम्यं, सुभगं.

GRATEFULNESS, *s.* (Gratitude) कृतज्ञता, उपकृतज्ञता, उपकारस्मरणं, कृतोपकारस्मरणं.—(Agreeableness) रम्यता, रमणीयता, सुभगता.

GRATER, *s.* घर्षणी, घर्षणयन्त्रं, निर्घर्षणकः, घर्षणालुः, आघट्टकः.

GRATIFICATION, *s.* (Act of pleasing, indulging) सन्तोषणं, तोषः -षणं, तुष्टिकरणं, तुष्टिदानं, तर्पणं, प्रीतिकरणं, आराधनं, अनुरोधः -धनं, अनुवर्त्तनं, प्रसादनं, आनमनं, आनतिः *f.*; 'gratification of an humour,' छन्दोनुवर्त्तनं, छन्दोनुवृत्तं; 'of a wish,' मनोरथसिद्धिः *f.*, इच्छासाधनं, इच्छादानं.—(Pleasure, satisfaction) तुष्टिः *f.*, सन्तोषः, परितोषः, तोषः, प्रीतिः *f.*, तृप्तिः *f.*, सुखं, सौख्यं, आनन्दः, आह्लादः, रतिः *f.*, अभिरुचिः *f.*

GRATIFIED, *p. p.* तुष्टः -ष्टा -ष्टं, सन्तोषितः -ता -तं, परितुष्टः -ष्टा -ष्टं, सन्तुष्टः -ष्टा -ष्टं, प्रीतः -ता -तं, तृप्तः -प्ता -प्तं, तर्पितः -ता -तं, आराधितः -ता -तं, प्रसादितः -ता -तं, आनन्दितः -ता -तं, प्रमोदितः -ता -तं, प्रतिभाहितः -ता -तं; 'in mind,' प्रीतमनाः -नाः -नः (स्); 'having every wish gratified,' सङ्कल्पसिद्धार्थः -र्था -र्थं, पूर्णकामः -मा -मं, कृतार्थः -र्था -र्थं, चरितार्थः -र्था -र्थं.

To GRATIFY, *v. a.* (Please) तुष् (c. 10. तोषयति -यितुं), सन्तुष् (c. 10. -तोषयति -यितुं), परितुष्, नन्द् (c. 10. नन्दयति -यितुं), आनन्द्, प्री (c. 9. प्रीणाति, c. 10. प्रीणयति -यितुं), तृप् (c. 10. तर्पयति -यितुं), प्रमुद् (c. 10. -मोदयति -यितुं), रम् (c. 10. रमयति -यितुं), ह्लाद् (c. 10. ह्लादयति -यितुं), हृष् (c. 10. हर्षयति -यितुं), सभाज् (c. 10. सभाजयति -यितुं), रुच् (c. 1. रोचते -चितुं) with dat. of person, सुखं कृ, प्रीतिं दा.—(Indulge, humour, soothe) अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), आराध् (c. 10. -राधयति -यितुं), प्रसद् (c. 10. -सादयति -यितुं), अनुरुज् (c. 10. -रञ्जयति -यितुं), अनुरुध् (c. 4. -रुध्यते -रोद्धुं), लल् (c. 10. लालयति -यितुं).

GRATIFYING, *part.* or *a.* परितोषकः -का -कं, सन्तोषकः -का -कं, तुष्टिकरः -रा -रं, तुष्टिदः -दा -दं, परितोषजनकः -का -कं, तुष्टिजननः -नी -नं, सुखकरः -रा -रं, सुखदः -दा -दं, प्रीतिकरः -री -रं, प्रीतिदः -दा -दं, आनन्ददः -दा -दं, मन्दकः -का -कं, तर्पी -र्पिणी -र्पि (न्), रमणः -णा -णं, आराधकः -का -कं, अनुरञ्जकः -का -कं.

GRATING, *part.* or *a.* कर्कशः -शा -शं, निष्ठुरः -रा -रं, खरः -रा -रं, अरुन्तुदः -दा -दं, कटुः -टुः -टुः -टु; 'to the ears,' कर्णकटुः -टुः -टु.

GRATING, *s.* परस्परघर्षणं, परस्परघर्षणजः कर्कशशब्दः.—(Partition of iron bars) लोहजालं, लौहजालकः, व्यत्यस्तलोहदण्डयुक्तम् अवरोधकं or व्यवधानं.

GRATINGLY, *adv.* कर्कशं, निष्ठुरं, अरुन्तुदं, कटु, कार्कश्येन.

GRATIS, *adv.* मूल्यं विना, मूल्यव्यतिरेकेण, निर्मूल्यं, धर्म्मार्थं.

GRATITUDE, *s.* कृतज्ञता, उपकारज्ञता, उपकृतज्ञता, उपकारस्मरणं, कृतोपकारस्मरणं, प्रत्युपकारकरणेच्छा.

GRATUITOUS, *a.* मूल्यं विना दत्तः -त्ता -त्तं, निर्मूल्यः -ल्या -ल्यं, प्रकाशं or स्वेच्छातो दत्तः -त्ता -त्तं, धर्म्मार्थिकः -का -कं; 'gratuitous labour,' विष्टिः *f.*—(Groundless) अहेतुकः -का -कं, निर्निमित्तः -त्ता -त्तं, निष्कारणः -णा -णं.

GRATUITOUSLY, *adv.* मूल्यं विना, मूल्यव्यतिरेकेण, धर्म्मार्थं, निर्मूल्यं.

GRATUITY, *s.* पारितोषिकं, शुल्कः -ल्कं, उपायनं, प्रदानं, दानं.

To GRATULATE, *v. a.* अभिनन्द् (c. 1. -नन्दति -न्दितुं), अभिवन्द् (c. 1. -वन्दते -न्दितुं), कल्याणवचनं वद् (c. 1. वदति -दितुं), कल्यं वद्, सुखलापं कृ. *See* CONGRATULATE.

GRATULATION, *s.* अभिनन्दा -न्दनं, अभिवन्दनं, कल्याणवादः, कल्यवादः.

GRATULATORY, *a.* कल्यवादी -दिनी -दि (न्), अभिनन्दकः -का -कं.

GRAVE, *s.* (Place for the dead) समाधिः *m.*, अवटः, श्मशानं, मृतशरीरस्थानं, स्थण्डिलं, सन्धिः *m.*, शवधासः, शवगर्त्तः.

GRAVE, *a.* (Serious) गुरुः -रुः -रु, अलघुः -घुः -घु, मन्दः -न्दा -न्दं, जडः -डा -डं.—(Momentous) गुरुवर्थः -र्था -र्थं, महार्थः -र्था -र्थं, गम्भीरार्थः -र्था -र्थं,—(Deep in sound) गम्भीरः -रा -रं, गभीरः -रा -रं, मन्द्रः -न्द्रा -न्द्रं, मन्दः -न्दा -न्दं, मन्द्यरः -रा -रं, आनन्द्रः -न्द्रा -न्द्रं, धीरः -रा -रं, घनः -ना -नं.—(In grammar) प्लुतः -तं; 'the grave accent,' अनुदात्तः.

To GRAVE, *v. a.* and *n.* तक्ष् (c. 1. तक्षति -क्षितुं, c. 5. तक्ष्णोति), तक्ष् (c. 1.

त्रसति -सितुं), मुद्र् (nom. मुद्रयति -यितुं), मुद्रीकृ.

GRAVE-CLOTHES, *s.* शववस्त्रं, शवाच्छादनं, मृतशरीरपरिधानं.

GRAVE-DIGGER, *s.* समाधिखनकः, अवटखनिता *m.* (तृ), शवगर्तखनकः.

GRAVE-STONE, *s.* चित्यं, चैत्यं, चैत्यः, चितापूडकं, मृतजनस्मरणप्रस्तरः, श्मशानप्रस्तरः, समाधिप्रस्तरः.

GRAVEL, *s.* शर्करा, वालुका, चूर्णाश्मः, चूर्णः -र्णं, शिलाश्मः, पाषाणश्मः, शिलाचूर्णं, पाषाणचूर्णं.—(The disease) शर्करा, अश्मरी, अश्मरीः -रं, मूत्राश्मः, पाण्डुशर्करा.

To GRAVEL, *v. a.* सशर्करं -रां -रं कृ, शर्करान्वितं -तां -तं कृ, शर्करावृतं -तां -तं कृ, शर्करीकृ.—(Perplex) विमुह् (c. 10. -मोहयति -यितुं), शल्यं कृ.

GRAVELLY, *a.* शार्करीयः -यी -यं, शार्करः -री -रं, शार्करकः -का -कं, शर्करावान् -वती -वत् (त्), शार्करिकः -की -कं, शर्करिलः -ला -लं, सशर्करः -रा -रं.

GRAVEL-WALK, *s.* शर्करावृतः पथः, शर्करावान् उद्यानमार्गः.

GRAVELY, *adv.* गुरु, अलघु, गौरवेण, सगौरवं, गम्भीरं, भावगम्भीरं, गाम्भीर्येण, धीरं, मन्दं.

GRAVEN, *p. p.* तष्टः -ष्टा -ष्टं, तक्षितः -ता -तं, मुद्रितः -ता -तं.

GRAVENESS, *s.* गुरुता -त्वं, गौरवं, गरिमा *m.* (न्), गम्भीरता, गाम्भीर्यं, धीरत्वं -ता, अलघुता, अलाघवं, जडता, जाड्यं.

GRAVEOLENCE, *s.* दुर्गन्धः, कुत्सितगन्धः, दौर्गन्ध्यं *n.*, पूतिगन्धः.

GRAVEOLENT, *a.* दुर्गन्धी -न्धिनी -न्धि (न्), कुत्सितगन्धः -न्धा -न्धं.

GRAVER, *s.* तक्षकः, तष्टा *m.* (ष्टृ), तक्षणकर्त्तृ *m.* (र्तृ), मुद्राकरः.

GRAVID, *a.* गर्भिणी, गर्भवती, पूर्णगर्भा, गृहीतगर्भा, जनारापत्या.

GRAVING, *s.* तक्षणं, तक्षणकर्म्म *n.* (न्), तक्षणकार्य्यं.

To GRAVITATE, *v. n.* स्वभारगुरुत्वाद् भूमिं प्रति पत् (c. 1. पतति -तितुं) or पत् in des. (पिपतिषति -षितुं, पित्सति) or अधः पत्, or अधो गम् (c. 1. गच्छति, गन्तुं) or अन्यमूर्त्तिं प्रति आकृष् in pass. (-कृष्यते).

GRAVITATION, *s.* स्वभारगुरुत्वाद् भूमिं प्रति पतनशीलता or पातुकत्वं or पिपतिषा or अधःपातुकता or अन्यमूर्त्तिं प्रति आकर्षणशीलता.

GRAVITY, *s.* (Weight) गुरुत्वं, गौरवं, गरिमा *m.* (न्), भारः, भारगुरुता.—(Seriousness) गुरुता, गौरवं, गम्भीरता, गाम्भीर्यं, धीरत्वं -ता, अलघुता, अलाघवं, जडता, जाड्यं, मन्दता.—(Tendency of a body towards the earth, or towards another body) स्वभारगुरुत्वाद् भूमिं प्रति पातुकत्वं or अन्यमूर्त्तिं प्रति आकर्षणशीलता.—(Specific gravity) भारमानं.

GRAVY, *s.* मांसयूषं, मांसजूषं, मांसव्यञ्जनं, व्यञ्जनं, उपस्करः, तेमनं, लालसीकं, प्रहितं, मिश्रावं, प्रदिग्धः.

GRAY, *a.* धूसरः -री -रं, धूमरः -री -रं, पांशुवर्णः -र्णा -र्णं, भस्मवर्णः -र्णा -र्णं, ईषत्पाण्डुः -ण्डुः -ण्डु, ईषद्धवलः -ला -लं, आशुक्लः -क्ला -क्लं, शुक्लकृष्णः -ष्णा -ष्णं.—(As the hair) पलितः -ता -तं, धवलः -ला -लं, पक्वः -क्वा -क्वं; 'gray hair,' पलितं.—(Old) जीर्णः -र्णा -र्णं, वृद्धः -द्धा -द्धं, पक्वः -क्वा -क्वं.

GRAY, *s.* (The colour) धूसरः, धूमरः, धूसरवर्णः, पांशुवर्णः.

GRAY-BEARD, *s.* शुक्लश्मश्रुः *m.*, धवलश्मश्रुः *m.*, जीर्णैकवृद्धः.

GRAY-EYED, *a.* पाण्डुनयनः -ना -नं, धूसरनेत्रः -त्रा -त्रं.

GRAY-HAIRED, *a.* पलितः -ता -तं, पलिन्नी *f.*, धवलकेशः -शी -शं, शुक्लकेशः -शी -शं, पक्वकेशः -शी -शं.

GRAY-HEADED, *a.* पलितशिराः -राः -रः (स्), पलिततल्लकः -का -कं.

GRAY-HOUND, *s.* *See* GREY-HOUND.

GRAYISH, *a.* ईषद्धूसरः -रा -रं, आधूसरः -रा -रं, ईषत्पांशुवर्णः -र्णा -र्णं.

GRAYLING, *s.* स्वच्छनदीजो मत्स्यप्रभेदः.

GRAYNESS, *s.* धूसरत्वं, धूसरवर्णत्वं, पांशुवर्णत्वं.—(Of the hair) पलितं, केशधावल्यं, केशशुक्लता, केशपक्वता.—(Oldness) वृद्धत्वं, जीर्णता, पक्वता.

To GRAZE, *v. a.* (Touch lightly, rub) घृष् (c. 1. घर्षति -र्षितुं), लघु तड् (c. 10. ताडयति -यितुं), लघुगत्या अतिक्रम्य घृष्.—(Feed cattle with grass) चर् in caus. (चारयति -यितुं), तृणम् अद् in caus. (आदयति -यितुं) or भुज् in caus. (भोजयति -यितुं) or खाद् in caus. (खादयति -यितुं), तृणं दा.

To GRAZE, *v. n.* (Feed on grass) चर् (c. 1. चरति -रितुं), तृण् (c. 8. तृणोति, तृणोति, तर्णितुं), तृणं खाद् (c. 1. खादति -दितुं) or अद् (c. 9. अत्ति, अत्तुं) or भक्ष् (c. 10. भक्षयति -यितुं).

GRAZED, *p. p.* (Rubbed) घृष्टः -ष्टा -ष्टं, घर्षितः -ता -तं, लघु ताडितः -ता -तं.—(Eaten by cattle) गोचरितः -ता -तं, गोभक्षितः -ता -तं, आशितक्लवीनः -ना -नं, अशितक्लवीनः -ना -नं.

GRAZER, *s.* तृणखादकः, तृणभक्षकः, तृणाशी *m.* (न्), चरिता *m.* (तृ).

GRAZIER, *s.* गोचारकः, गवादिचारकः, गोपालकः, पशुपोषकः.

GRAZING, *s.* गोचरः -रणं, गोप्रचारः, प्रचारः, तृणखादनं.

GREASE, *s.* वसा, घृतं, मेदस् *n.*, स्नेहः, मांसस्नेहः, मांससारः, वपा, तैलं, तिलस्नेहः, अभ्यञ्जनं.

To GREASE, *v. a.* वसया or घृतेन or स्नेहेन लिप् (c. 6. लिम्पति, लेपुं) or अञ्ज् (c. 7. अनक्ति, अंक्तुं, c. 10. अञ्जयति -यितुं) or दिह् (c. 2. देग्धि -ग्धुं), घृताक्तं -क्तां -क्तं कृ, स्निग्धीकृ, स्नेहाक्तीकृ.

GREASED, *p. p.* वसालिप्तः -प्ता -प्तं, घृताभ्यक्तः -क्ता -क्तं, स्नेहाक्तः -क्ता -क्तं, वसाभ्यक्तः -क्ता -क्तं, घृतोक्षितः -ता -तं, अभ्यक्तः -क्ता -क्तं.

GREASILY, *adv.* चिक्कणं, स्निग्धं, वसया, सस्नेहं, सघृतं, घृतेन.

GREASINESS, *s.* चिक्कणता -त्वं, स्निग्धता, स्नैग्ध्यं, घृताक्तत्वं, घृतवत्त्वं, स्नेहवत्त्वं, सस्नेहत्वं, मेदस्विता, वसालिप्तता.

GREASY, *a.* वसामयः -यी -यं, घृतवान् -वती -वत् (त्), घृताक्तः -क्ता -क्तं, वसाभ्यक्तः -क्ता -क्तं, चिक्कणः -णा -णं, स्निग्धः -ग्धा -ग्धं, स्नेहवान् -वती -वत् (त्), सस्नेहः -हा -हं, स्नेही -हिनी -हि (न्), स्नेहाक्तः -क्ता -क्तं, मेदस्वी -स्विनी -स्वि (न्), प्रमेदितः -ता -तं, वसायुक्तः -क्ता -क्तं, सतैलः -ला -लं.

GREAT, *a.* (Large) महान् -हती -हत् (त्), बृहन् -हती -हत् (त्), विशालः -ला -लं, विपुलः -ला -लं, पृथुः -थुः -थ्वी -थु, पृथुलः -ला -लं, उरुः -रुः -रु, स्थूलः -ला -लं, विकटः -टा -टं, करालः -ला -लं, विशङ्कटः -टा -टी -टं, बहुः -हुः -ही -हु, बहुलः -ला -लं, बहुसंख्यकः -का -कं, भूरिः -रिः -रि, प्रचुरः -रा -रं.—(Extensive) विस्तीर्णः -र्णा -र्णं, पृथुपरिणाहः -हा -हं.—(Noble, eminent) महात्मा -त्मा -त्म (न्), विश्रुतः -ता -तं, महायशस्कः -स्का -स्कं, प्रसिद्धः -द्धा -द्धं, उत्कृष्टः -ष्टा -ष्टं, श्रेष्ठः -ष्ठा -ष्ठं, महाभागः -गा -गं, प्रतिष्ठः -ष्ठा -ष्ठं.—(Chief, principal) प्रधान in comp., मुख्यः -ख्या -ख्यं, अग्र्यः -ग्र्या -ग्र्यं, परमः -मा -मं.—(Important) गुरुः -रुः -रु, परमः -मा -मं, अलघुः -घुः -घु.—(Expressing a great degree of any thing) अति or सु or महा prefixed, अत्यन्तः -न्ता -न्तं, गाढः -ढा -ढं, अतिमात्रः -त्रा -त्रं, अधिकः -का -कं, नितान्तः -न्ता -न्तं, एकान्तः -न्ता -न्तं, भृशः -शा -शं, अतिरिक्तः -क्ता -क्तं, परः -रा -रं; 'great fear,' महाभयं, अतिभयं; 'great vigour,' सुवीर्यं; 'great heat,' अतिदाहः, सुदाहः, गुरुतापः; 'great rain,' भूरिवृष्टिः *f.*; 'to a great distance,' सुदूरं -रे -रतस्, अतिदूरं -रे; 'to a great degree,' अत्यन्तं, अत्यर्थं, अतिमात्रं, भृशं, अतिशयं -येन, निर्भरं, गाढं, बहु; 'great grandson,' प्रपौत्रः; 'great grandfather,' प्रपितामहः; 'a great many people' बहुजनाः *m. pl.*

GREAT, *s.* (The whole) साकल्यं, समुदायः, समासः, समस्तिः *f.*, सामग्र्यं. —(Great people) कुलीनजनाः *m. pl.*, सेव्यजनाः *m. pl.*, उत्कृष्टपदस्थाः *m. pl.*, महाजनाः *m. pl.*; 'fit for the great,' माहाजनिकः -की -कं.

GREAT-COAT, *s.* उत्तरीयं, उत्तरीयवस्त्रं, प्रावारः -रकः, निचोलः -ली.

GREAT-HEARTED, GREAT-MINDED, *a.* महात्मा -त्मा -त्म (न्), महामनाः -नाः-नः (स्), उदारचेताः-ताः-तः (स्), महासत्त्वः-त्त्वा-त्त्वं, महेच्छः-च्छा -च्छं.

GREATER, *a.* महत्तरः -रा -रं, विशालतरः -रा -रं, वृहत्तरः -रा -रं, गुरुतरः -रा -रं, गरीयान् -यसी -यः (स्), उत्तरः -रा -रं.—(Greater number) बहुतरः -रा -रं, भूयान् -यसी -यः (स्), भूयिष्ठः -ष्ठा -ष्ठं, अधिकः -का -कं, अधिकतरः -रा -रं, परः -रा -रं, परतरः -रा -रं, अपरः -रा -रं; 'greater and greater,' अधिकाधिकं, उत्तरोत्तरं.

GREATEST, *a.* महत्तमः -मा -मं, वृहत्तमः -मा -मं, सुमहान् -हती -हत् (त्). गुरुतमः -मा -मं, गरिष्ठः -ष्ठा -ष्ठं, अधिकतमः -मा -मं; 'in the greatest degree,' सुभृशं, सुमहत्, अतिमहत्, सुतरां, अतितरां.

GREATLY, *adv.* (In a great degree) सु or अति or अतिशय prefixed, भृशं, सुभृशं, अत्यन्तं, निर्भरं, अतिशयं -येन, अतिमात्रं, अत्यर्थं, भूरि, गाढं, नितान्तं, सुतरां, अतितरां, अधिकं, अतीव, परं, बलवत्; 'greatly grieved,' सुदुःखितः-ता-तं.—(Nobly) माहात्म्येन, उदारवत्.

GREATNESS, *s.* (Largeness) महत्त्वं, महिमा *m.* (न्), वृहत्त्वं, विशालता, विपुलता, पृथुता -त्वं, प्रथिमा *m.* (न्), पार्थवं, स्थूलता, स्थौल्यं, उरुता -त्वं, विकटता, वैकट्यं, व्रडिमा *m.* (न्), परिव्रडिमा *m.*—(Extent) विस्तीर्णता, सुविस्तीर्णता.—(Bulk) परिमाणं.—(Eminence) उत्कर्षः, उत्कृष्टता, प्रसिद्धता, श्रेष्ठत्वं, यशस्विता, विश्रुतिः *f.*, आधिक्यं.—(Grandeur) विभूतिः *f.*, वैभवं, प्रभावः, ऐश्वर्य्यं.—(Greatness of mind) माहात्म्यं, उदारता, औदार्य्यं.—(Of rank) कुलीनता, कुलोत्कर्षः, अभिजातता, सेव्यता.

GREAVES, *s. pl.* जङ्घात्राणं, मंक्षणं, मंक्षुणं, जङ्घाकवचं, जङ्घारक्षणी, ऊरुत्राणं, ऊरुवर्म्म *n.* (न्).

GRECIAN, *a.* ग्रीकदेशीयः -या -यं, ग्रीकदेशजः -जा -जं, यावनः -नी -नं, यवनीयः -या -यं, यवनदेशीयः -या -यं.

GRECIAN, *s.* ग्रीकदेशवासी *m.* (न्), यवनः, यवनदेशजः.

GRECISM, *s.* ग्रीकभाषानुसारिणी वाग्वृत्तिः, ग्रीकभाषासम्प्रदायः.

GREECE, *s.* ग्रीकदेशः, यवनः, यवनदेशः.

GREEDILY, *adv.* अतिलोभेन -भात्, अतिलौल्यात्, लुब्धजनवत्, गृध्रवत्, अतिशयलिप्सया, अतिशयजिघृक्षया, लोभावेशात्, अत्यभिलाषेण, अतीच्छया, अतिस्पृहातस्.

GREEDINESS, *s.* लुब्धता, लोभवत्त्वं, लोभः, अतिभोजनं, अत्याहारः, गृध्रता, गृध्नुता, अतिबुभुक्षा, अधिकभोजनं, घस्मरता, लोलता, लौल्यं, अग्नरता, अतृप्तिः *f.*, अपरितोषः, अत्याकांक्षा, अतिलिप्सा, लिप्सातिशयः, उदरभरणं, जिघृक्षा, गर्द्धः, भक्षकत्वं, अत्यभिलाषः, अतिस्पृहा.

GREEDY, *a.* (Voracious) लुब्धः -ब्धा -ब्धं, आहारलुब्धः -ब्धा -ब्धं, लोभी -भिनी -भि (न्), भक्षकः -का -कं, बहुभक्षकः -का -कं, बह्वाशी -शिनी -शि (न्), बहुभुक् *m. f. n.*, घस्मरः -रा -रं, अग्नरः -रा -रं, गृध्रः -ध्रा -ध्रं, गृध्नुः -ध्नुः -ध्नु, गर्धी -र्धिनी -र्धि (न्), गर्धनः -ना -नं, जिघृक्षुः -क्षुः -क्षु, बुभुक्षुः -क्षुः -क्षु, अतिभोजी -जिनी -जि (न्), अत्याहारी -रिणी -रि (न्), अपरिमिताहारी &c., कुक्षिम्भरिः -रिः-रि, उदरम्भरिः-रिः -रि, आत्मम्भरिः-रिः -रि, औदरिकः-की-कं, स्वोदरपूरकः-का-कं, उदरपिशाचः -ची -चं, लोलुभः -भा -भं, लोलः -ला -लं, लोलुपः -पा -पं, लोभाविष्टः -ष्टा -ष्टं.—(Eager after) अत्यभिलाषी -षिणी -षि (न्), अभिलाषकः-का-कं, अतीच्छः -च्छा -च्छं, तृष्णकः -का -कं, अत्याकांक्षी -क्षिणी -क्षि (न्), मत्सरः -रा -रं; 'to be greedy,' गृध् (c. 4. गृध्यति, गर्धितुं), लुभ् (c.4. लुभ्यति, लोब्धुं).

GREEK, *a.* ग्रीकदेशीयः -या -यं, यवनदेशीयः -या -यं.

GREEK, *s.* ग्रीकदेशजः, यवनदेशवासी *m.* (न्), यवनः.—(Language of Greece) ग्रीकभाषा.

GREEN, *a.* हरितः -ता -रिणी -तं, हरित् *m. f. n.*, हरितवर्णः -र्णा -र्णं, हरिद्वर्णः -र्णा -र्णं, हरिः -रिः -रि, पलाशः -शी -शं, पालाशः -शी -शं, श्यामः -मा -मं, भरितः -ता -तं, तालकाभः -भा -भं, श्यामवर्णः -र्णा -र्णं; 'green wood,' आर्द्रकाष्ठं; 'to make green,' हरितीकृ; 'to become green,' हरित (nom. हरितायते).

GREEN, *s.* (The colour) हरित् *m.*, हरितः, हरिः *m.*, पालाशः, तालकाभः.—(Grassy plat) हरिततृणावृतो भूमिभागः, हरितस्थानं, हरितस्थलं -स्थानं.

GREENED, *p. p.* हरितीकृतः -ता -तं, हरितीभूतः -ता -तं.

GREEN-FINCH, *s.* हरितपक्षयुक्तः पक्षिभेदः.

GREENGAGE, *s.* हरितवर्णः फलविशेषः.

GREEN-GROCER, *s.* शाकफलादिविक्रेता *m.* (तृ), शाकादिविक्रयी *m.* (न्).

GREENHORN, *s.* अविपक्वबुद्धिः *m.*, अपक्वधीः *m.*, अकोविदः.

GREEN-HOUSE, *s.* बालवृक्षादिरक्षणार्थं काचपटलं गृहं.

GREENISH, *a.* ईषद्धरितः -ता -तं, ईषत्पलाशः -शी -शं, आश्यामः -मा -मं.

GREEN-LEAVED, *a.* हरितच्छदः -दा -दं, हरित्पर्णः -र्णा -र्णं, हरितपत्रः -त्रा -त्रं.

GREENNESS, *s.* हरितत्वं, हरित्त्वं, पलाशता, पालाशता, श्यामता -त्वं.—(Immaturity) अपक्वता, अविपक्वता; 'of mind,' अपक्वबुद्धित्वं.

GREEN-ROOM, *s.* शाणी, नेपथ्यं, नेपथ्यशाला.

GREENS, *s. pl.* शाकादि *n.*, हरितकं, खादनीयशाकाः *m. pl.*

GREEN-SICKNESS, *s.* स्त्रीरोगविशेषो यस्मिन् मुखं श्यामवर्णं भवति देहस्य चावसादो जायते.

GREEN-SWARD, *s.* घासावृता भूमिः, हरितभूमिः, सतृणस्थलं.

To GREET, *v. a.* अभिनन्द् (c. 1. -नन्दति -न्दितुं), अभिवन्द् (c. 1. -वन्दते -न्दितुं), वन्द्, अभिवद् (c. 10. -वादयते -ति -यितुं), कुशलवाक्यैर् अभिवद् or अभिभाष् (c. 1. -भाषते -षितुं), अर्च् (c. 1. अर्चति -र्चितुं, c. 10. अर्चयति -यितुं), अभ्यर्च्, नमस्कृ, नमस्कारं कृ, सत्कृ, कुशलवादं कृ, प्रणम् (c. 1. -णमति -णन्तुं), प्रणतिं कृ; 'to greet in return,' प्रत्यभिवद्, प्रत्यर्च्.

GREETED, *p. p.* अभिनन्दितः -ता -तं, अभिवादितः -ता -तं, कुशलवाक्यैः सम्भाषितः -ता -तं or अभिभाषितः -ता -तं, नमस्कृतः -ता -तं, सत्कृतः -ता -तं.

GREETER, *s.* अभिवादयिता *m.* (तृ), अभिवादकः, अभिनन्दकः.

GREETING, *s.* अभिनन्दा -न्दनं, अभिवादः -दनं, वन्दनं, अभिवन्दनं, कुशलवाक्यैः सम्भाषणं or अभिभाषणं, कुशलप्रश्नः, सत्कारः, सत्कृतिः *f.*, नमस्कारः, नमस्क्रिया, कौशलं -ली, कुशलवादः; 'greeting in return,' प्रत्यभिवादः -दनं.

GREGARIOUS, *a.* यूथचारी -रिणी -रि (न्), अनेकचरः -रा -रं, सङ्घचारी &c.

GREGARIOUSLY, *adv.* यूथशस्, सङ्घशस्, अनेकशस्, गणशस्.

GREGARIOUSNESS, *s.* यूथचारित्वं, सङ्घचारित्वं, अनेकचारित्वं.

GRENADE, *s.* युद्धे हस्तप्रक्षेपणीया आग्नेयचूर्णगर्भा लोहगुली या अन्तरग्निबलेन शतखण्डशो विदीर्णा भूत्वा रिपुनाशं करोति.

GRENADIER, *s.* दीर्घशिरस्कभृत् पूर्व्वोक्ताग्नेयास्त्रपाणिः सैन्यविशेषः.

GREY, *a.* *See* GRAY.

GREYHOUND, *s.* दृष्टिगोचरशशकानुसरणे शिक्षितः सुतनुशरीरो मृगयाकुक्कुरः.

GRICE, *s.* शूकरशावकः, शूकरशिशुः *m.*, वराहशावकः.

To GRIDE, *v. a.* कर्कशशब्दपूर्व्वं छिद् (c. 7. छिनत्ति, छेत्तुं).

GRIDELIN, *a.* शुक्लरक्तः -क्ता -क्तं, धवलरक्तः -क्ता -क्तं.

GRIDIRON, *s.* विरलाधोभागो भर्ज्जनयन्त्रविशेषः, अङ्गरीषं, भ्राष्ट्रः -ष्ट्रं, भृज्जनं, भृजीर्षं.

GRIEF, *s.* शोकः, खेदः, दुःखं, सन्तापः, क्लेशः, शुक् *f.* (च्), मन्युः *m.*, व्यथा, विषादः, पीडा, मनोदुःखं, मनस्तापः, मनःपीडा, मनोव्यथा, निर्वेदः, आधिः *m.*, उद्वेगः, परितापः, अनिर्वृतिः *f.*, कृच्छ्रं, मनःकृच्छ्रं, मनोवेदना, आर्त्तिः *f.*; 'grief for the loss of any one,' उत्कण्ठा, औत्कण्ठ्यं, उद्वेगः, उत्सुकता, उत्कः.

GRIEVANCE, *s.* कष्टं, क्लिष्टिः *f.*, क्लेशः, दुःखं, पीडा, बाधा, आबाधा, बाधकं, क्लेशकं, आर्त्तिः *f.*, द्रोहः, कष्टकरं किञ्चित्; 'infantine grievance,' शिशुक्रन्दः.

To GRIEVE, *v. a.* दुःख् (c. 10. दुःखयति -यितुं), शुच् (c. 10. शोचयति -यितुं), पीड् (c. 10. पीडयति -यितुं), आपीड्, उपपीड्, अभिपीड्, परिपीड्, व्यथ् (c. 10. व्यथयति -यितुं), क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं, क्लेष्टुं), संक्लिश्, खिद् (c. 10. खेदयति -यितुं), तप् (c. 10. तापयति -यितुं), परितप्, सन्तप्, अनुतप्, अभितप्, उपतप्, उद्विज् (c. 10. -वेजयति -यितुं), आयस् (c. 10. -यासयति -यितुं), दु (c. 5. दुनोति, दोतुं), विदु, शोकं दा or जन् (c. 10. जनयति -यितुं), क्लेशं कृ, व्यथां कृ, मनोदुःखं कृ.

To GRIEVE, *v. n.* शुच् (c 1. शोचति -चितुं), अनुशुच्, परिशुच्, अनुप्रशुच्, शोकार्त्तीभू, खिद् (c. 4. खिद्यते, खेत्तुं), परिखिद्, दुःख (nom. दुःखायते or दुःखीयते), तप् in pass. (तप्यते), परितप्, सन्तप्, अनुतप्, अभितप्, उपतप्, उद्विज् (c. 6. -विजते -जितुं), व्यथ् (c. 1. व्यथते -थितुं), प्रव्यथ्, सम्प्रव्यथ्, क्लिश् (c. 4. क्लिश्यते -ति, क्लेशितुं), परिक्लिश्, संक्लिश्, दु (c. 5. दुनोति, c. 4. दूयते, दोतुं), विदु, दुर्मनस् (nom. दुर्मनायते), उन्मनस्, कृच्छ्र (nom. कृच्छ्रायते), मन्यु (nom. मन्यूयते), शोचनं कृ; 'to grieve for,' अनुशुच्.

GRIEVED, *p. p.* दुःखितः -ता -तं, दुःखी -खिनी -खि (न्), दुःखार्त्तः -र्त्ता -र्त्तं, शोचितः -ता -तं, शोकार्त्तः -र्त्ता -र्त्तं, शोकातुरः -रा -रं, पीडितः -ता -तं, पीड्यमानः -ना -नं, सन्तप्तः -प्ता -प्तं, सन्तापितः -ता -तं, अभिसन्तप्तः -प्ता -प्तं, तापितः -ता -तं, खेदितः -ता -तं, क्लेशितः -ता -तं, क्लिष्टः -ष्टा -ष्टं, क्लिश्यमानः -ना -नं, व्यथितः -ता -तं, उद्वेजितः -ता -तं, उद्विग्नः -ग्ना -ग्नं, दूनः -ना -नं, विदूनः -ना -नं, बाधितः -ता -तं, अनुभूतशोकः -का -कं, आर्त्तः -र्त्ता -र्त्तं or आतुरः -रा -रं in comp.

GRIEVING, *part.* शोचमानः -ना -नं, शोचनः -ना -नं, खिद्यमानः -ना -नं, क्लिश्यमानः -ना -नं, परितप्यमानः -ना -नं, विदूयमानः -ना -नं.

GRIEVINGLY, *adv.* सशोकं, सखेदं, सदुःखं, सक्लेशं, सोद्वेगं, शोकेन, उद्वेगेन.

GRIEVOUS, *a.* दुःखकरः -री -रं, दुःखमयः -यी -यं, दुःखी -खिनी -खि (न्), शोकजनकः -का -कं, क्लेशकः -का -कं, क्लेशी -शिनी -शि (न्), क्लेशदः -दा -दं, उग्रः -ग्रा -ग्रं, पीडाकरः -रा -रं, व्यथकः -का -कं, व्यथाकरः -री -रं, कष्टकरः -री -रं -कारकः -का -कं, शोचनीयः -या -यं, शोच्यः -च्या -च्यं, सशोकः -का -कं, उपतापनः -ना -नं, उद्वेजकः -का -कं, सवेदनः -ना -नं, बाधकः -का -कं, गुरुः -र्वी -रु, आत्ययिकः -की -कं, दुर् दुस्, दुष्, दुस् or दुः in comp.

GRIEVOUSLY, *adv.* उग्रं, शोचनीयं, सशोकं, यथा शोकः or क्लेशो जायते तथा.

GRIEVOUSNESS, *s.* उग्रत्वं -ता, शोच्यता, शोचनीयता, सशोकत्वं, क्लेशः, क्लिष्टता, दुःखं, दुःखिता, घोरता, कष्टं.

GRIFFIN, GRIFFON, *s.* कविकल्पित उत्क्रोशोड्डैकायः सिंहाधःकायो जन्तुविशेषः.

GRIFFIN-LIKE, *a.* पूर्व्वोक्तजन्तुसरूपः -पी -पं or -समभावः -वा -वं.

GRIG, *s.* चञ्चलशीलः क्षुद्रजलव्यालः, कुक्किकाभेदः.

To GRILL, *v. a.* भर्ज्ज् (c. 6. भृर्जति, भर्ष्टुं), भृज् (c. 1. भर्जते -र्जितुं), भ्रस्ज् (c. 1. भ्रस्जते -ष्टुं), तप् (c. 10. तापयति -यितुं), पच् (c. 1. पचति, पक्तुं).

GRILLED, *p. p.* भृष्टः -ष्टा -ष्टं, भर्जितः -ता -तं, तापितः -ता -तं.

GRIM, *a.* घोरः -रा -रं, उग्रः -ग्रा -ग्रं, दारुणः -णा -णं, भयानकः -का -कं, रौद्रः -द्री -द्रं, करालः -ला -लं, विकटः -टा -टं, कुत्सितः -ता -तं; 'in appearance' घोराकृतिः -तिः -ति, उग्राकारः -रा -रं, उग्रमुखः -खी -खं, उग्रदर्शनः -ना -नं, रौद्रदर्शनः -ना -नं, कुरूपः -पी -पं, अपरूपः -पी -पं, कदाकारः -रा -रं, दुर्दर्शनः -ना -नं, कुदृश्यः -श्या -श्यं.

GRIM-FACED, *a.* उग्रमुखः -खी -खं, घोरवदनः -ना -नं, करालवदनः -ना -नं.

GRIMACE, *s.* वदनविकृतिः *f.*, मुखविकृतिः *f.*, मुखविकारः, मुखवैरूप्यं, मुखविरूपता, मुखवक्रता, वक्रमुखं, विकृतमुखं, वक्रास्यं, कुमुखं.

GRIMALKIN, *s.* वृद्धविडालः, वृद्धमार्जारः, जीर्णविडालः.

GRIME, *s.* मलं, किट्टं, कल्कं, अमेध्यं, कलुषं, मालिन्यं.

To GRIME, *v. a.* मलिन (nom. मलिनयति -यितुं), कलुष (nom. कलुषयति -यितुं), मलेन दुष् (c. 10. दूषयति -यितुं).

GRIMED, *p. p.* मलिनितः -ता -तं, मलदूषितः -ता -तं, अमेध्यलिप्तः -प्ता -प्तं.

GRIMLY, *adv.* उग्रं, घोरं, दारुणं, भयानकं, रौद्रं, घोराकारेण.

GRIMNESS, *s.* घोरता, उग्रता -त्वं, रौद्रता, दारुण्यं, उग्राकारत्वं, करालता, उग्रमुखत्वं, करालमुखत्वं, कुदृश्यत्वं, कुरूपत्वं.

GRIMY, *a.* समलः -ला -लं, अमेध्याक्तः -क्ता -क्तं, कल्की -ल्किनी -ल्कि (न्).

To GRIN, *v. n.* कुस्मि (c. 1. -स्मयते -यितुं -स्मेतुं), कुस्मितं कृ, कु हस् (c. 1. हसति -सितुं), कुहासं कृ, विकृतं स्मि or हस्, विकृतमुखेन स्मि, मुखविकारेण हस्, कुस्मितं कृत्वा दन्तान् दृश् (c. 10. दर्शयति -यितुं), दन्तान् घृष् (c. 1. घर्षति -र्षितुं).

GRIN, *s.* कुस्मितं, कुहासः, कुहसितं, कुविहसितं, विकृतस्मितं, विकृतहासः, वक्रस्मितं, दन्तदर्शनं, दन्तघर्षणं.

To GRIND, *v. a.* (Comminute by attrition) चूर्ण् (c. 10. चूर्णयति -यितुं), प्रचूर्ण्, विचूर्ण्, चूर्णीकृ, पिष् (c. 7. पिनष्टि, पेष्टुं), निष्पिष्, विनिष्पिष्, प्रतिपिष्, उत्पिष्, मृद् (c. 9. मृद्नाति, मर्द्दितुं, c. 10. मर्दयति -यितुं), अवमृद्, विमृद्, प्रमृद्, अभिमृद्, क्षुद् (c. 7. क्षुणद्धि, क्षोत्तुं), क्षोदीकृ, खरड् (c. 10. खरडयति -यितुं), गुरड् (c. 1. गुरडति, c. 10. गुरडयति -यितुं), कुट्ट् (c. 10. कुट्टयति -यितुं).—(Sharpen by friction) घर्षणेन निश्शो (c. 4. -श्यति -शातुं) or तिज् (c. 10. तेजयति -यितुं) or तीक्ष्णीकृ or तीक्ष्णधारीकृ.—(Rub one against another) घृष् (c. 1. घर्षति -र्षितुं), परस्परघर्षणं कृ; 'to grind the teeth,' दन्तान् दन्तैर् निष्पिष् or घृष्, दन्तघर्षणं कृ, क्ष्विड् (c. 1. क्ष्वेडति -डितुं), दन्तक्ष्वेडनं कृ.—(Oppress) बाध् (c. 1. बाधते -धितुं), पीड् (c. 10. पीडयति -यितुं).

To GRIND, *v. n.* पेषणं कृ, चूर्णीभू, क्षोदीभू, सम्पिष्टीभू, खण्डीभू.

GRINDER *s.* (One who grinds) पेषणकारी *m.* (न्), पेषकः, पेष्टरः.—(Instrument for grinding) पेषणं -णी, पेषणयन्त्रं.—(Tooth that chews) दाढा, चर्वणदन्तः, महादन्तः.

GRINDING, *s.* पेषणं, निष्पेषणं, चूर्णीकरणं, मर्दनं, विमर्दनं, कुट्टनं, अवहननं, घर्षणं; 'of the teeth,' दन्तघर्षणं, क्ष्वेडनं.

GRINDSTONE, *s.* (For grinding) पेषणं -णी -णिः *f.*, पेषणशिला, पेषणप्रस्तरः, पेषाकः, शिला, शिलापट्टः, क्षोदः.—(For sharpening) शाणः -णी, शानः, भमः -मिः *f.*, शाणप्रस्तरः.

GRINNER, *s.* कुस्मितकारी *m.* (न्), कुस्मेरः, कुहासी *m.* (न्), विकृतहासी *m.*, विकृतमुखः, दन्तदर्शकः.

GRIPE, *s.* (Grasp) सङ्ग्राहः, ग्रहः -हणं, मुष्टिसङ्ग्राहः, मुष्टिबन्धः, हस्तग्रहः, दुर्मोचहस्तग्रहः, धृतिः *f.*, हस्तधृतिः *f.*—(Squeeze, pressure) पीडा -डनं, निपीडनं.—(Handful) मुष्टिः *f.*

To GRIPE, *v. a.* (Grasp) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), सङ्ग्रह्, मुष्टिना ग्रह् or सङ्ग्रह्, हस्तेन धृ (c. 1. धरति, धर्त्तुं), सङ्ग्राहं कृ.—(Close

the fist) मुष्टिं or हस्तं बन्ध् (c. 9. बध्नाति, बन्धुं), मुष्टिबन्धं कृ.—(Squeeze) पीड् (c. 10. पीडयति -यितुं), सम्पीड्.—(Pain in the bowels) अन्त्रवेदनां कृ or जन् (c. 10. जनयति -यितुं).

GRIPED, *p. p.* मुष्टिसङ्ग्राहपीडितः -ता -तं, हस्तधृतः -ता -तं.

GRIPER, *s.* ग्राहकः, मुष्टिसङ्ग्राहकृत् *m.*—(Oppressor) परस्वग्राहकः, बाधकः, पीडकः.

GRIPES, *s. pl.* अन्त्रशूलं, नाडिशूलं, अन्त्रवेदना, जठरव्यथा.

GRISETTE, *s.* वणिक्पुत्री, वणिजः स्त्री or दुहिता *f.* (तृ), कन्या.

GRISLINESS, *s.* उग्रता -त्वं, घोरता, दारुणता, रौद्रता, क्रूरता.

GRISLY, *a.* उग्रः -ग्रा -ग्रं, घोरः -रा -रं, दारुणः -णा -णं, भयानकः -का -कं, क्रूरः -रा -रं, करालः -ला -लं, घोराकृतिः -तिः -ति, उग्रभयदृश्यः -श्या -श्यं, उग्रदर्शनः -ना -नं, करालवदनः -ना -नं, कुदृश्यः -श्या -श्यं.

GRIST, *s.* (Corn ground) गोधूमचूर्णं, गोधूमक्षोदः, पिष्टधान्यं, पिष्टं.—(Corn for grinding) पेषणाय धान्यं, पेषणयोग्यं शस्यं, पेषणीयधान्यं, यच्छस्यम् एकवारे पेष्टुं शक्यते.

GRISTLE, *s.* तरुणास्थि *n.*, कोमलास्थि *n.*, उपास्थि *n.*, शिथिलास्थि *n.*, सन्धिबन्धनं, दृढमांसं.

GRISTLY, *a.* तरुणास्थिमयः -यी -यं, कोमलास्थिमान् -मती -मत् (त्), उपास्थिसमभावः -वा -वं.

GRIT, *s.* (Sand, gravel) शर्करा, चूर्णखण्डः, शिलाखण्डः, चूर्णः -र्णं, वालुका.—(Coarse part of meal) शक्तुशर्करा, घनशक्तुः *m.*, शक्तुघनः.

GRITTINESS, *s.* शार्करीयता, शर्करावत्त्वं, सशर्करत्वं.

GRITTY, *a.* शार्करीयः -यी -यं, शर्करावान् -वती -वत् (त्), शार्करिकः -की -कं, शर्करिलः -ला -लं, सशर्करः -रा -रं.

GRIZZLE, *s.* (Gray colour) धूसरः, धूसरवर्णः, पांशुवर्णः.

GRIZZLY, *a.* ईषद्धूसरः -रा -रं, ईषत्पांशुवर्णः -र्णा -र्णं, ईषत्पाण्डुः -ण्डुः -ण्डु, शुक्लकृष्णः -ष्णा -ष्णं; 'grizzly bear,' धूम्रौक्षवर्णविशिष्टो वृहद्दृक्षः.

To GROAN, *v. n.* वेदनोपहतत्वाद् दीर्घनादं कृ or दीर्घरावं कृ or दीर्घं निःश्वस् or निश्वस् (c. 2. -श्वसिति -तुं) or दीर्घं रु (c. 2. रौति, रवितुं) *or* नद् (c. 1. नदति -दितुं) *or* क्रुश् (c. 1. क्रोशति, क्रोष्टुं), दुःखार्त्तत्वाद् दीर्घचित्कारं कृ, आर्त्तनादं कृ, आर्त्तरावं कृ, आर्त्तवद् दीर्घं नद् or स्तन् (c. 1. स्तनति -नितुं) or विस्तन्, or निष्टन्, स्तननं कृ, दीर्घनिश्वासं कृ, गम्भीरनादं कृ, गम्भीरनिश्वासं कृ.

GROAN, *s.* आर्त्तनादः, आर्त्तरावः, दुःखार्त्तस्य दीर्घनादः or दीर्घरावः or दीर्घचित्कारः, दीर्घनिश्वासः, दीर्घनिःश्वासः, सदीर्घनिश्वासो गम्भीरनादः, सीत्कारः, सीत्कृतं, चीत्कारः, स्तननं, परिदेवनं -वितं.

GROANING, *part.* वेदनोपहतत्वाद् दीर्घनादी -दिनी -दि (न्) or दीर्घनिश्वासी &c.

GROANING, *s.* दीर्घनादकरणं, आर्त्तनादः, दीर्घनिश्वसितं, स्तननं.

GROAT, *s.* तास्रमुद्राविशेषः.

GROCER, *s.* उपस्करादिविक्रेता *m.* (तृ), मिष्टान्नादिविक्रयी *m.* (न्), शुष्कफलादिविक्रेता *m.*, शर्करादिविक्रयी *m.*

GROCERY, *s.* मिष्टान्नादि *n.*, उपस्करादिद्रव्यं, शुष्कफलादि *n.*, शर्करादिद्रव्यं.

GROG, *s.* मदिरा, सुरा -री, वारुणी, शीधुः *m.* -धु *n.*, शुण्डा.

GROG-DRINKER, *s.* सुरापः -पी, शुण्डापायी *m.* -यिनी *f.*, शौधुपः.

GROIN, *s.* वंक्षणः -णं, वाटः, ऊरुसन्धिः *m.*, सक्थिसन्धिः *m.*

GROOM, *s.* अश्वपालः -लकः, सायी *m.* (न्), पालकः, भोगपालः, भोगिकः, चारकः, अश्वरक्षः -क्षकः, अश्वसेवकः, किरातः.

To GROOM, *v. a.* अश्वलोम मृज् (c. 2. मार्ष्टि -ष्टुं), अश्वं पाल् (c. 10. पालयति -यितुं).

GROOVE, *s.* शुषिरं, दीर्घशुषिरं, दीर्घरेखारूपेण खनितं शुषिरं, दीर्घगर्त्तः, दीर्घकुहरं, दीर्घशून्यं, स्तम्भरेखा, स्तम्भसीता.

To GROOVE, *v. a.* शुषिरीकृ, दीर्घरेखारूपेण खन् (c. 1. खनति -नितुं) or उत्खन्, दीर्घशुषिरं कृ, दीर्घरेखां कृ, सीतां कृ.

To GROPE, *v. a.* and *n.* तमसि or अन्धकारे परामृश् (c. 6. -मृशति -ष्टुं) or परिमृश्, तमसि परीक्ष् (c. 1. -ईक्षते -क्षितुं) or अन्विष् (c. 4. -इष्यति, c. 1. -इच्छति -एषितुं) or निरूप् (c. 10. -रूपयति -यितुं), तमः प्रविश्य हस्तेन परीक्ष् or निरूप्, निरूपणार्थं or हस्तपरामर्शार्थं तमः प्रविश् (c. 6. -विशति -वेष्टुं) or तमःप्रवेशं कृ.

GROPER, *s.* अन्धकारे हस्तपरामर्शकारी *m.* (न्), तमसि परीक्षकः or निरूपकः, तमःप्रवेशकः.

GROPING, *s.* अन्धकारे हस्तद्वारेण परामर्शः, तमसि हस्तेन जिज्ञासा or अन्वेषणं or निरूपणं.

GROSS, *a.* (Bulky) स्थूलः -ला -लं, स्थूलकायः -या -यं, बृहद् -हती -हत् (त्), बृहदङ्गः -ङ्गी -ङ्गं.—(Fat, corpulent) पीनः -ना -नं, पीवरः -रा -रं, मेदस्वी -स्विनी -स्वि (न्), बृहत्कुक्षिः -क्षिः -क्षि.—(Coarse, thick, not fine) घनः -ना -नं, स्थूलः -ला -लं, असूक्ष्मः -क्ष्मा -क्ष्मं, सान्द्रः -न्द्रा -न्द्रं, निविडः -डा -डं, निरन्तरः -रा -रं, नीरन्ध्रः -न्ध्रा -न्ध्रं, स्थानः -ना -नं.—(Indelicate, vulgar) अशुद्धः -द्धा -द्धं, अवाच्यः -च्या -च्यं, गर्ह्यः -र्ह्या -र्ह्यं, कुत्सितः -ता -तं, असभ्यः -भ्या -भ्यं, ग्राम्यः -म्या -म्यं, नीचः -चा -चं.—(Unrefined, impure) अशिष्टः -ष्टा -ष्टं, अविनयः -या -यं, अविनीतः -ता -तं, अपरिष्कृतः -ता -तं, दुर्मर्य्यादः -दा -दं, अमेध्यः -ध्या -ध्यं, मलीमसः -सा -सं.—(Great, excessive) अत्यन्तः -न्ता -न्तं, अति or सु or महा prefixed; as, 'a gross blunder,' अतिदोषः.—(Disgraceful) अयशस्करः -री -रं, लज्जाकरः -री -रं.—(Dull) मन्दः -न्दा -न्दं, मूढः -ढा -ढं, जडः -डा -डं; 'gross measurement,' स्थूलमानं 'gross ignorance,' घनाज्ञानं; 'gross darkness,' अन्धतमस्, अन्धतामसं.

GROSS, *s.* (The bulk, chief part) प्रधानभागः, प्रधानांशः, अधिकभागः, स्थूलांशः, बहुतरभागः, साकल्यं, सामस्त्यं, समुदायः, समासः, समष्टिः *f.*; 'in the gross,' साकल्येन.—(Twelve dozen) द्वादशद्वादशकं, एकशतं चतुश्चत्वारिंशत्.

GROSSLY, *adv.* (Coarsely, not finely) स्थूलं, घनं, सान्द्रं, निविडं.—(Not delicately) अशुद्धं, असभ्यं, अशिष्टं, अविनीतं, विमर्य्यादेन, मर्य्यादाविरुद्धं.—(Greatly, enormously) अत्यन्तं, अतिशयेन, अतिमात्रं, अति or महा prefixed; as, 'grossly indecent,' अतिगर्हितः -ता -तं; 'grossly criminal,' महापातकी *m.* (न्).

GROSSNESS, *s.* (Bulkiness) स्थूलता, स्थौल्यं, बृहत्त्वं.—(Fatness) शरीरस्थूलता, स्थूलकायत्वं, पीनता, मेदस्विता.—(Density) घनता, सान्द्रता, स्थूलत्वं, नैविड्यं, नैरन्तर्य्यं, स्थानं, स्थानता.—(Coarseness, want of refinement) अशुद्धता, अशुद्धिः *f.*, अशिष्टता, असभ्यत्वं, अविनयः, अविनीतत्वं, अमर्य्यादा, गर्ह्यता, अमेध्यता.—(Enormity) अत्यन्तता, अतिरिक्तता, आधिक्यं, गाढता, महत्त्वं.

GROT, GROTTO, *s.* (Cave) कन्दरः -रा, गह्वरं -री, कुहरं, शैलरन्ध्रं, गुहा, शैलविवरं.—(Natural grotto) देवखातं -तकं, देवखातविलं.—(Artificial) क्रीडाकन्दरः, क्रीडागह्वरं, कुञ्जः, कुञ्जकुटीरः.

GROTESQUE, *a.* अपरूपः -पा -पी -पं, असङ्गतरूपः -पा -पं, हास्यरूपः -पा -पं, असङ्गताकारः -रा -रं, कदाकारः -रा -रं, हास्यः -स्या -स्यं, विषमः -मा -मं, विलक्षणः -णा -णं.

GROTESQUELY, *adv.* असङ्गतरूपेण, हास्यरूपेण, विषमं, असङ्गतं.

GROTESQUENESS, *s.* अपरूपता, असङ्गतत्वं, हास्यता, वैषम्यं.

GROUND, *s.* (Earth) भूमिः *f.*, भूः *f.*, मही, पृथिवी, पृथ्वी, धरणी, धरा,

वसुधा, क्षितिः *f.*, अवनिः *f.* -नी, उर्व्वी, मेदिनी, वसुमती, वसुन्धरा, धारिणी, क्षोणी -णिः *f.*, क्षौणिः *f.*—(Surface of the earth) भूतलं, महीतलं, महीपृष्ठं, भूपृष्ठं, पृथिवीतलं, क्षितितलं, क्षौणितलं, क्षितिपीठं, धरोपस्थः.—(Land, estate) भूमिः *f.*, क्षेत्रं.—(Foundation, basis of any thing) मूलं, उपष्टम्भः, उपस्तम्भः, वस्तु.—(Fundamental cause, reason) हेतुः *m.*, आदिहेतुः *m.*, कारणं, आदिकारणं, निमित्तं, निदानं, प्रयोजनं, उपपत्तिः *f.*—(First principle) तत्त्वं.—(Ground for the site of a house) गृहभूमिः *f.*, वेश्मभूः *f.*, भित्तिमूलं, तलिमं, कुट्टिमं, वास्तुः *m.*, पोतः, गृहपोतकः, गृहप्रतिष्ठा.—(Soil) मृत् *f.*, मृत्तिका, मृदा, मृत्खण्डः.—(Field of action) रणभूमिः *f.*, रणक्षेत्रं.—(First colour) आदिवर्णः.—(First form) प्रथमसंस्कारः; 'to gain ground,' वृध् (c. 1. वर्धते -धितुं), प्रवृध्, उत्तरोत्तरं वृध्; 'lose ground,' क्षि in pass. (क्षीयते), अपचि in pass. (-चीयते), शनैः शनैर् निवृत् (c. 1. -वर्त्तते -र्त्तितुं).

To GROUND, *v. a.* (Lay on the ground) भूमौ न्यस् (c. 4. -अस्यति -असितुं) or निधा (c. 3. -दधाति -धातुं).—(Fix, found) मूलं न्यस् or स्था in caus. (स्थापयति -यितुं) or प्रतिष्ठा; often expressed by मूलः -ला -लं in comp.; as, 'faith grounded on knowledge,' ज्ञानमूलः प्रत्ययः.—(Settle in rudiments of knowledge) विद्यारम्भान् or विद्यातत्त्वानि शिक्ष् (c. 10. शिक्षयति -यितुं); 'in grammar,' व्याकरणारम्भान् शिक्ष्.

To GROUND, *v. n.* (As a ship) उत्कूल (nom. उत्कूलयति -यितुं), उत्कूलीभू.

GROUND, *p. p.* (Reduced to powder) चूर्णितः -ता -तं, चूर्णीकृतः -ता -तं, पिष्टः -ष्टा -ष्टं, निष्पिष्टः -ष्टा -ष्टं, सम्पिष्टः -ष्टा -ष्टं, मर्दितः -ता -तं, विमर्दितः -ता -तं, मृदितः -ता -तं, परिमृदितः -ता -तं, क्षोदितः -ता -तं, क्षोदीकृतः -ता -तं, क्षुण्णः -ण्णा -ण्णं, खण्डितः -ता -तं, गुण्डितः -ता -तं, रुषितः -ता -तं, घर्षितः -ता -तं, घृष्टः -ष्टा -ष्टं.

GROUNDED, *p. p.* (Run aground) उत्कूलितः -ता -तं; 'grounded on the rudiments of knowledge,' सुशिक्षितविद्यारम्भः -म्भा -म्भं; 'in grammar,' स्वधीतव्याकरणः -णा -णं.

GROUND-FLOOR, *s.* गृहस्य अधःकोष्ठाः *m. pl.* or भूमिष्ठाः शालाः *f. pl.* or भूमिष्ठो भागः or भूमिष्ठभागः, गृहतलं, गृहतलिमं, गृहकुट्टिमं.

GROUND-IVY, *s.* नीलपुष्पः क्षुद्रलताविशेषः.

GROUNDLESS, *a.* निर्मूलः -ला -लं, अमूलः -ला -लं -लकः -का -कं, निर्हेतुः -तुः -तु, अहेतुकः -का -कं, निष्प्रयोजनः -ना -नं, निर्निमित्तः -त्ता -त्तं, निष्कारणः -णा -णं, अनर्थकः -का -कं; 'groundless charge,' मिथ्याभियोगः; 'groundless enmity,' शुष्कवैरं.

GROUNDLESSLY, *adv.* निष्कारणं, अकारणं, हेतुना विना, हेतुं विना, निष्प्रयोजनं, कारणं विना, प्रयोजनं विना, मिथ्या.

GROUNDLESSNESS, *s.* अहेतुता, निर्हेतुता, निष्कारणत्वं, अकारणं, निर्मूलत्वं, निर्निमित्तत्वं.

GROUND-PLOT, *s.* गृहभूमिः *f.*, वेश्मभूः *f.*, वास्तुः *m.* -स्तु, कुट्टिमं, तलिमं.

GROUND-RENT, *s.* भूमिकरः, भूमिशुल्कः -ल्कं, भूस्वामियाग्यः शुल्कः.

GROUNDS, *s. pl.* (Dregs) मलं, किट्टं, उच्छिष्टं, शेषं, सलं, कल्कं, कलङ्कः, असारः.

GROUNDSEL, *s.* क्षुद्रपक्षिखाद्य ओषधिभेदः.

GROUNDSIL, *s.* देहली, गृहावग्रहणी, गृहतटी.

GROUNDWORK, *s.* मूलं -लत्वं, आरम्भः, प्रारम्भः, आदिकर्म्म *n.* (न्), मूलकर्म्म *n.*

GROUP, *s.* सङ्घः, समूहः, सङ्घातः, समुदायः, समवायः, सञ्चयः, गणः, गुल्मः, गुच्छः -च्छकः, गुम्फः, स्तवकः, ओघः, वृन्दं; 'a group of people,' जनसमूहः, जनौघः, जनसङ्घः, जननिवहः, जनता; 'of houses,' सङ्घवनं, सन्निचितिः *f.*, चतुःशालं; 'of flowers,' पुष्पगुम्फः; 'in groups,' सङ्घशस्, गुल्मशस्.

To GROUP, *v. a.* सङ्घशः कृ, एकत्र कृ, एकीकृ, सङ्घीकृ, समूहीकृ, गुल्मीकृ, वृन्दीकृ, गणीकृ, सञ्चि (c. 5. -चिनोति -चेतुं).

GROUPED, *p. p.* कृतसङ्घः -घा -घं, कृतसमूहः -हा -हं, गणीभूतः -ता -तं.

GROUSE, *s.* वन्यपक्षिभेदः, जङ्गलप्रियः कृष्णवर्णः पक्षिभेदः.

GROUT, *s.* (Coarse meal) घनशक्तुः *m.*—(Lees) उच्छिष्टं, शेषं, किट्टं, असारः.

GROVE, *s.* वनं, उपवनं, काननं, विपिनं, वृक्षवाटिका, वृक्षजालं, वनिका, वनान्तः, आरामः, गहनं, अरण्यं, अटविः *f.* -वी, वृक्षखण्डं, वृक्षच्छाया, प्रपावनं; 'a grove near a house,' गृहारामः, निष्कुटः; 'a number of groves,' वन्या, वनसमूहः.

To GROVEL, *v. n.* कीटवद् भूमौ सृप् (c. 1. सर्पति, सप्तुं), सर्पवद् उरसा चल् (c. 1. चलति -लितुं), उरोगमनं कृ.—(Act in a mean manner) नीचवत् or अधमवत् or अपकृष्टवत् or निकृष्टवद् आचर् (c. 1. -चरति -रितुं), तुच्छीभू.

GROVELING, *part.* or *a.* (Creeping) भूमौ सर्पी -र्पिणी -र्पि (न्).—(Abject) नीचः -चा -चं, अधमः -मा -मं, निकृष्टः -ष्टा -ष्टं, अपकृष्टः -ष्टा -ष्टं, कृपणः -णा -णं, अधमाचारः -रा -रं, क्षुद्रः -द्रा -द्रं, तुच्छः -च्छा -च्छं.

To GROW, *v. n.* (As a plant) रुह् (c. 1. रोहति, रोढुं), प्ररुह्, संरुह्, स्फुट् (c. 6. स्फुटति -टितुं), फुल्ल् (c. 1. फुल्लति -ल्लितुं); 'the lotus does not grow on the top of mountains,' न पर्वताग्रे नलिनी प्ररोहति.—(Increase) वृध् (c. 1. वर्धते -धितुं), विवृध्, संवृध्, अभिवृध्, प्रवृध्, परिवृध्, संविवृध्, एध् (c. 1. एधते -धितुं), समेध्, क्षुध् (c. 5. क्षुध्नोति, c. 4. क्षुध्यति, अधितुं), उपचि in pass. (-चीयते), प्यै (c. 1. प्यायते, प्यातुं), आप्यै, पुष् (c. 4. पुष्यति, पोष्टुं), स्फाय् (c. 1. स्फायते -यितुं), आस्फाय्, वृद्धिम् इ (c. 2. एति -तुं) or या (c. 2. याति -तुं), स्फीतीभू.—(Extend) विस्तृ in pass. (-स्तीर्य्यते), व्याप् (c. 5. -आप्नोति -आप्तुं), विततीभू.—(Improve) आगमं कृ; 'in knowledge,' विद्यागमं कृ, विद्याप्राप्तिं कृ.—(Become) भू, सम्भू, जन् (c. 4. जायते); 'to grow fat,' स्थूलीभू, पीवरीभू, पुष्टीभू; 'to grow lean,' कृशीभू, कृशाङ्गः -ङ्गी -ङ्गं भू.—(Proceed from, arise) जन्, उपजन्, प्रजन्, सञ्जन्, विजन्, अभिजन्, उत्पद् (c. 4. -पद्यते -पत्तुं), उदि (c. 1. -अयति -एतुं), उद्भू, प्रभ, सम्भू.—(Grow up, arrive at manhood) प्रौढीभू, अतीतशैशवः -वा -वं भू.—(Grow old) जॄ (c. 4. जीर्य्यति, जरितुं -रीतुं), जीर्णीभू.

To GROW, *v. a.* (Cause to grow) रुह् in caus. (रोपयति -यितुं), निरुह्, संरुह्, वृध् in caus. (वर्धयति -यितुं).

GROWER, *s.* रोपयिता *m.* (तृ), वर्धकः; 'of trees,' वृक्षरोपयिता *m.*

GROWING, *part.* (As a plant, &c.) रोही -हिणी -हि (न्), रुहः -हा -हं, प्रजनिष्णुः -ष्णुः -ष्णु, उद्भवः -वा -वं or प्रभवः -वा -वं or भवः -वा -वं or जः जा जं or उत्थः -त्था -त्थं or जातः -ता -तं or भूः भूः भु in comp.; as, 'growing in water,' जलरुहः -हा -हं, जलरुह् *m. f. n.* (ह्), जलोद्भवः -वा -वं, जलजः -जा -जं -जातः -ता -तं, जलभूः -भूः -भु; 'growing on the rocks,' शिलाभवः -वा -वं, शिलोत्थः -त्था -त्थं, शिलाजः -जा -जं; 'growing on the head,' शिरोरुहः -हा -हं.—(Increasing) वर्धमानः -ना -नं, वर्धी -धिनी -धि (न्), वर्धनः -नी -नं, वर्धिष्णुः -ष्णुः -ष्णु, एधमानः -ना -नं, उपचीयमानः -ना -नं, विस्तीर्य्यमाणः -णा -णं, विजृम्भाणः -णा -णं; 'growing in size,' वर्धमानशरीरः -रा -रं, प्रचीयमानावयवः -वा -वं; 'growing old,' जीर्य्यन् -र्य्यन्ती -र्य्यत् (त्).

GROWL, *s.* गर्जनं, गर्जितं, घुर्घुरा, घर्घरितं, भषणं, रायणं, रुतं.

To GROWL, *v. n.* गर्ज् (c. 1. गर्जति -र्जितुं), अभिगर्ज्, परिगर्ज्, गर्जनं कृ, घुर्घुरां कृ, भष् (c. 1. भषति -षितुं), रै (c. 1. रायति, रातुं), घुर् (c. 6. घुरति -रितुं).

GROWN, *p. p.* रूढः -ढा -ढं, वर्धितः -ता -तं, प्ररूढः -ढा -ढं, संवर्धितः -ता -तं, प्रवृद्धः -द्धा -द्धं, उपचितः -ता -तं, एधितः -ता -तं, समेधितः -ता -तं, समृद्धः -द्धा -द्धं, स्फीतः -ता -तं, आप्यायितः -ता -तं, वृंहितः -ता -तं.—(Produced) जातः -ता -तं, उत्पन्नः -न्ना -न्नं, उपजातः -ता -तं.—(Grown in size) वर्धितदेहः -हा -हं, प्ररूढकायः -या -यं.—(Full grown) प्रौढः -ढा -ढं, प्रौढशरीरः -रा -रं, प्रवृद्धः -द्धा -द्धं, गतशैशवः -वा -वं, अतीतशैशवकालः -ला -लं, वयःप्राप्तः -प्ता -प्तं, वृद्धः -द्धा -द्धं.

GROWTH, *s.* रूढिः *f.*, प्ररूढिः *f.*—(Increase) वृद्धिः *f.*, वर्धनं, विवृद्धिः *f.*, विवर्धनं, प्रवृद्धिः *f.*, ऋद्धिः *f.*, उपचयः, स्फातिः *f.*, स्फीतिः *f.*, अभ्युदयः, समुत्थानं, आप्यायनं, विस्तारः, व्याप्तिः *f.*—(Production) उत्पत्तिः *f.*, उत्पादनं, जन्म *n.* (न्), जननं, प्रजननं, उद्भवः, प्रभवः.—(Improvement) वृद्धिः, आगमः.—(Full growth) प्रौढिः *f.*, प्रौढता, प्रवृद्धता.

To GRUB, *v. n.* खन् (c. 1. खनति -नितुं); 'grub up,' उत्खन्, प्रोत्खन्.

GRUB, *s.* कीटः, कृमिः *m.*, कीटडिम्भः, कीटाण्डजं, कोशस्थः.—(Dwarf, short, thick man) वामनः, खर्वः, ह्रस्वस्थूलः.

GRUBBER, *s.* खनकः, खनिता *m.* (तृ).—(Instrument) खनित्रं, खात्रं.

To GRUBBLE, *v. n.* अन्धकारे हस्तेन परामृश् (c. 6. -मृशति -र्ष्टुं) or आलभ् (c. 1. -लभते -लब्धुं) or स्पर्शेन निरूप् (c. 10. -रूपयति -यितुं).

To GRUDGE, *v. a.* and *n.* (Envy) असूय (nom. असूयति -ते -यितुं), ईर्ष्य् (c. 1. ईर्ष्यति -र्ष्यितुं), स्पृह् (c. 10. स्पृहयति -यितुं), अभिलष् (c. 1. -लषति, c. 4. -लष्यति -षितुं), न सह् (c. 1. सहते, सोढुं), न मृष् (c. 4. मृष्यति, मर्षितुं), मात्सर्यं कृ.—(Give or take unwillingly) अकामतस् or अकामेन or अनिच्छातो दा or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).—(Do any thing reluctantly or grudgingly) अकामतस् or अनिच्छातस् or दुःखेन or कृच्छ्रेण or सासूयं or असूयया किञ्चित् कृ.—(Refuse) प्रत्याख्या (c. 2. -ख्याति -तुं).—(Complain, murmur) विलप् (c. 1. -लपति -पितुं).

GRUDGE, *s.* (Malice, ill-will) मात्सर्यं, असूया, अभ्यसूया, ईर्ष्या, द्रोहः, द्रोहचिन्तनं, दुष्टभावः.—(Enmity) वैरं, वैरिता, वैरभावः.—(Hatred) द्वेषः, विद्वेषः, विद्विष्टता, दीर्घद्वेषः, चिरद्वेषः, द्वेष्यता.

GRUDGINGLY, *adv.* सासूयं, असूयया, अभ्यसूयया, मात्सर्येण, समात्सर्यं, दुष्टभावेन, अकामतस्, अकामं -मेन, अनिच्छातस्, दुःखेन, कृच्छ्रेण, कार्त्स्न्येन.

GRUEL, *s.* काञ्जिकः.—(Rice-gruel) यवागूः *f.*, आरा, तरला, विलेपी, उष्णिका, सिद्धजलं.—(Sour gruel) आरनालं -लकं, सौवीरं, कुल्माषं, कुल्मासः, कुल्माषाभिषुतं, अभिषवं, अभिषुतं, काञ्जिका -कं, काञ्जिकं, काञ्जीकं, कुजलं, धान्याम्लं, अवनिसोमं.

GRUFF, *a.* कर्कशस्वभावः -वा -वं, कर्कशः -शा -शं, रूक्षः -क्षा -क्षं, परुषः -षा -षं, निष्ठुरः -रा -रं, कटुः -टुः -टुः -टु, कठोरः -रा -रं, कठिनः -ना -नं.—(As tone) मन्द्रः -न्द्रा -न्द्रं, आमन्द्रः -न्द्रा -न्द्रं, गम्भीरः -रा -रं; 'a gruff voice,' गम्भीरस्वरः.

GRUFFLY, *adv.* कर्कशं, रूक्षं, परुषं, निष्ठुरं, कठिनं, कठोरं, मन्द्रं.

GRUFFNESS, *s.* कर्कशत्वं -ता, कार्कश्यं, रूक्षता, रौक्ष्यं, परुषता, निष्ठुरत्वं, नैष्ठुर्यं, कटुत्वं, कठोरता, काठिन्यं, स्वभावकटुता.—(Of tone) मन्द्रता, गम्भीरता, गाम्भीर्यं.

To GRUMBLE, *v. n.* (Make a low, harsh sound) गर्ज् (c. 1. गर्जति -र्जितुं), परिगर्ज्, गर्जनं कृ, स्तन् (c. 1. स्तनति -नितुं), स्तनितं कृ, घुर् (c. 6. घुरति -रितुं), गुञ्ज् (c. 1. गुञ्जति -ञ्जितुं), मन्द्रशब्दं कृ, गम्भीरशब्दं कृ.—(Complain discontentedly) असन्तुष्टत्वाद् विलप् (c. 1. -लपति -पितुं) or परिदेव् (c. 1. -देवते -वितुं).

GRUMBLER, *s.* असन्तुष्टत्वात् सदापरिदेवी *m.* (न्), असन्तुष्टजनः.

GRUMBLING, *s.* गर्जनं, गर्जितं, परिगर्जनं, स्तनितं, स्तननं, मन्द्रशब्दः, गम्भीरशब्दः, गम्भीरनादः, गम्भीरध्वनिः *m.*, गभीरशब्दः.—(Sound of complaint) परिदेवनं -वितं, विलपनं.

GRUMBLING, *part.* गम्भीरनादी -दिनी -दि (न्), मन्द्रशब्दकारी -रिणी -रि (न्).

GRUME, *s.* गुल्मः, पिण्डः -ण्डं, घनता; 'of blood,' रक्तगुल्मः, घनलोहितं.

GRUMOUS, *a.* पिण्डीभूतः -ता -तं, घनीभूतः -ता -तं, श्यानः -ना -नं, साम्द्रः -न्द्रा -न्द्रं, गुल्मी -ल्मिनी -ल्मि (न्); 'grumous blood,' घनलोहितं.

To GRUNT, *v. n.* शूकरवद् घर्घरितं कृ or कखडनादं कृ or गम्भीरनादं कृ, गर्ज् (c. 1. गर्जति -र्जितुं), घुर्घुराशब्दं कृ.

GRUNT, GRUNTING, *s.* घर्घरितं, शूकरनादः, शूकरगर्जितं, शूकरस्य कखडनादः or गम्भीरनादः.

GRUNTLING, *s.* शूकरशावकः, शूकरशिशुः *m.*, बालशूकरः.

GUARANTEE, *s.* (One who is surety for another) प्रतिभूः *m.*, प्रतिनिधिः *m.*, मध्यस्थः.—(Security) प्रातिभाव्यं, पारिभाव्यं, प्रात्ययिकः, प्रत्ययकारिणी, लग्नकः, बन्धकः.

To GUARANTEE, *v. a.* प्रतिभूः or प्रतिनिधिः भू, प्रातिभाव्यं कृ, पारिभाव्यं कृ, लग्नकं or प्रात्ययिकं or बन्धकं दा, प्रत्ययं कृ.

To GUARD, *v. a.* and *n.* रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, परिरक्ष्, संरक्ष्, प्रतिरक्ष्, पाल् or पा (c. 10. पालयति -यितुं, c. 2. पाति -तुं), अनुपाल्, परिपाल्, प्रतिपाल्, सम्पाल्, अभिपाल्, उपपाल्, गुप् (c. 1. गोपायति, गोपितुं, c. 10. गोपयति -यितुं), अनुगुप्, अभिगुप्, प्रगुप्, अभिसङ्गुप्, त्रै (c. 1. त्रायते, त्रातुं), परित्रै, सन्त्रै, अव् (c. 1. अवति -वितुं), पर्याप् in des. (-ईप्सति -प्सितुं), परिप्राप्.—(Ward off) वृ (c. 10. वारयति -यितुं), निवृ.—(Guard against) अवधा (c. 3. -धत्ते -धातुं), अवहितः -ता -तं भू, सावधानः -ना -नं भू, अवधानं कृ; 'guard against avarice,' लोभात् सावधानो भव.—(Keep guard) रक्षां कृ, रक्षायै जागृ (c. 2. जागर्ति, जागरितुं).

GUARD, *s.* (Act of guarding) रक्षणं, रक्षा, रक्षणः, पालनं, त्राणं, गुप्तिः *f.*, गोपनं, अवनं.—(A sentry) रक्षकः, रक्षी *m.* (न्), सैन्यः, सैनिकः, सेनारक्षः, परिचरः, उपरक्षणं, परिधिस्थः, रक्षिवर्गः, अनीकस्थः, सज्जनं; 'captain of the guards,' गुल्मस्थानाधिकारी *m.* (न्), गुल्मस्थानाधिपः, रक्षाधिकृतः.—(That which protects any part of the body from injury) त्राणं, त्रं affixed, त्रारणं; 'a finger-guard,' अङ्गुलित्राणं, अङ्गुलित्रं; 'guard for the arm in shooting,' गोधा, तलं -ला, ज्याघातवारणं; 'to stand on one's guard,' सावधानः -ना -नं or सचेतनः -ना -नं स्था or भू; 'be on your guard,' सावधानो भव, सावहितो भव.

GUARD-ROOM, *s.* उन्नाटः, रक्षकाणां वासागारं, सैन्यस्थानं, सैनिकशाला.

GUARDABLE, *a.* रक्षणीयः -या -यं, रक्ष्यः -क्ष्या -क्ष्यं, पालनीयः -या -यं.

GUARDED, *p. p.* रक्षितः -ता -तं, अभिरक्षितः -ता -तं, पालितः -ता -तं, उपपालितः -ता -तं, गुप्तः -प्ता -प्तं, गोपायितः -ता -तं, त्रातः -ता -तं, त्राणः -णा -णं, अवितः -ता -तं.—(Cautious) अवहितः -ता -तं, सवहितः -ता -तं, सावधानः -ना -नं.

GUARDEDLY, *adv.* सावधानं, अवधानेन, अवहितं, सवहितं, सुविमृश्य.

GUARDEDNESS, *s.* अवधानता, सावधानता, सवहितत्वं, समीक्ष्यकारित्वं.

GUARDER, *s.* रक्षकः, रक्षी *m.* (न्), परिरक्षी *m.*, रक्षिता *m.* (तृ), पालयिता *m.* (तृ), पालकः, पालः -ली *m.* (न्), गोप्ता *m.* (तृ), गोपः -पकः, गोपायकः, गोपी *m.* (न्), गोपिलः, त्राता *m.* (तृ), पः in comp.

GUARDFUL, *a.* सावधानः -ना -नं, अवहितः -ता -तं, सवहितः -ता -तं.

GUARDIAN, *s.* पालकः, प्रतिपालकः, रक्षकः, गोप्ता *m.* (तृ), पालः, नाथः, अध्यक्षः.—(Of an orphan) पितृस्थानः -नीयः, मातृपितृस्थानः, नाथः; 'guardian deity,' लोकपालः -लकः.

GUARDIANSHIP, *s.* रक्षणं, रक्षा, रक्षकत्वं, पालकत्वं, रक्षितृपदं.

GUARDSHIP, *s.* रक्षणं, रक्षा, पालनं, त्राणं, गुप्तिः *f.*, गोपनं.

GUDGEON, *s.* वडिशद्वारेण सुग्रहणीयः क्षुद्रमत्स्यभेदः.—(A person easily cheated) सुवञ्चनीयः, सुप्रतारणीयः.

GUERDON, *s.* फलं, प्रतिफलं, पारितोषिकं, वेतनं.

To GUESS, *v. a.* and *n.* अनुमा (c. 2. -माति, c. 4. -मायते, c. 3. -मिमीते -मातुं), तर्क् (c. 10. तर्कयति -यितुं), वितर्क्, ऊह् (c. 1. ऊहते -हितुं), अवगम् (c. 1. -गच्छति -गन्तुं), शङ्क् (c. 1. शङ्कते -ङ्कितुं), अनिश्चयपूर्वं अनुभू, अनिश्चयपूर्वं निरूप् (c. 10. -रूपयति -यितुं) or प्रदृश् (c. 1. -पश्यति -द्रष्टुं) or विवेचनां कृ or मन् (c. 4. मन्यते, मन्तुं).

GUESS, *s.* अनुमानं, अनुमितिः *f.*, अनुमानोक्तिः *f.*, वितर्कः -र्कणं, ऊहा -हनं, शङ्का, अनुभवः, अनुभूतिः *f.*, अनिश्चयपूर्वं निरूपणं, अनिश्चयपूर्वा विवेचना, अदृढप्रमाणः परामर्शः, अवगतिः, उपलब्धिः *f.*, उपलक्ष्यः.

GUESSED, *p. p.* अनुमितः -ता -तं, वितर्कितः -ता -तं, शङ्कितः -ता -तं.

GUESSER, *s.* अनुमाता *m.* (तृ), अनुमानकर्त्ता *m.* (र्त्तृ), वितर्ककः.

GUEST, *s.* अतिथिः *m. f.* -थी *f.*, अभ्यागतः, अभ्यागतजनः, गृहाभ्यागतः, गृहागतः, आगन्तुः *m. f.*, आगान्तुः, आगन्तुकः -का -कं, आवेशिकः -की -कं, प्राघुणः, प्राघुणिकः, प्रघूणः, साङ्गतिकः; 'proper for a guest,' आतिथ्यः -थ्यी -थ्यं, आतिथेयः -यी -यं.

GUEST-CHAMBER, *s.* अतिथिशाला, अतिथिसत्कारयोग्या शाला.

GUEST-RITE, *s.* अतिथिसत्कारः -सत्क्रिया, अतिथिक्रिया, अतिथिसेवा.

To GUGGLE, *v. n.* *See* GURGLE.

GUIDANCE, *s.* नयः, नायः, नीतिः *f.*, प्रणयनं, नेतृत्वं, विनियमः, पथदर्शनं.—(Direction) निर्देशः, निदेशः, उपदेशः, शास्तिः *f.*, शासनं, अनुशास्तिः *f.*, अनुशासनं, विधानं; 'good guidance,' सुनयः, सुनीतिः *f.*

To GUIDE, *v. a.* नी (c. 1. नयति, नेतुं), आनी, समानी, मार्गं or पथं दृश् (c. 10. दर्शयति -यितुं), गम् (c. 10. गमयति -यितुं).—(Direct) निर्दिश् (c. 6. -दिशति -देष्टुं), उपदिश्, उद्दिश्, शास् (c. 2. शास्ति, शासितुं), अनुशास्, समनुशास्, प्रणी, विनियम् (c. 1. -यच्छति -यन्तुं), विधृ (c. 10. -धारयति -यितुं), विधा (c. 3. -दधाति -धातुं).

GUIDE, *s.* नेता *m.* (तृ), नायकः, नेचः, विनेता *m.* (तृ), पथदर्शकः, मार्गदर्शकः, दर्शकः, दर्शयिता *m.* (तृ), प्रदर्शकः, निर्देष्टा *m.* (ष्टृ), निर्देशकः, उद्देशकः, उपदेशी *m.* (न्), उपदेशकः, देशकः, उपदेष्टा *m.* (ष्टृ), आदेष्टा *m.*, पथिकः, सञ्चारकः, शासिता *m.* (तृ), शास्ता *m.*, अनुशासकः, अध्यक्षः.

GUIDED, *p. p.* नीतः -ता -तं, आनीतः -ता -तं, समानीतः -ता -तं, नीयमानः -ना -नं, गमितः -ता -तं, शासितः -ता -तं, अनुशासितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं.

GUIDE-POST, *s.* पथदर्शनार्थं or मार्गसूचनार्थं स्थूणा.

GUILD, *s.* श्रेणी -णिः *m.*, सहकारिजनसमूहः, नगरकार्य्यसम्पादनार्थं जनसंसर्गः, नागरसमाजः, वणिक्समाजः, निगमः, नैगमः, महाजनसंसर्गः.

GUILD-HALL, *s.* सहकारिणां वाणिजजनानां समागमशाला, निगमशाला, नगरकार्य्यसम्पादनार्थं महाचत्वरं.

GUILE, *s.* माया, कपटः -टं, छलं -लना, शठता, शाठ्यं, खलता, धूर्त्तता, व्याजः, विदग्धता, वैदग्ध्यं, छद्म *n.* (न्), कूटः -टं, कौटिल्यं, कैतवं, वक्रता, कापट्यं, वञ्चनं -ना, असारल्यं.

GUILEFUL, *a.* मायावान् -वती -वत् (त्), मायी -यिनी -यि (न्), मायामयः -यी -यं, मायान्वितः -ता -तं, मायावी -विनी -वि (न्), छली -लिनी -लि (न्), छलान्वितः -ता -तं, विदग्धः -ग्धा -ग्धं, कापटिकः -की -कं, वञ्चकः -का -कं, वञ्चनशीलः -ला -लं, शठः -ठा -ठं, खलः -ला -लं, कुटिलः -ला -लं, विजिह्मः -ह्मा -ह्मं, सव्याजः -जा -जं, धूर्त्तः -र्त्ता -र्त्तं, वक्रः -क्रा -क्रं, वक्रभावः -वा -वं.

GUILEFULLY, *adv.* मायया, समायं, शाठ्येन, छलेन, खलवत्, शठवत्, धूर्त्तवत्, सव्याजं, कितववत्, कैतवेन, विदग्धं.

GUILEFULNESS, *s.* मायावत्त्वं, शठता, शाठ्यं, कौटिल्यं, वक्रता, विजिह्मता, विदग्धता, सव्याजत्वं, असारल्यं.

GUILELESS, *a.* अमायी -यिनी -यि (न्), अमायिकः -की -कं, मायाहीनः -ना -नं, निष्कपटः -टा -टं, कपटहीनः -ना -नं, निर्व्याजः -जा -जं, छलरहितः -ता -तं, शुद्धमतिः -तिः -ति, सरलः -ला -लं, अजिह्मः -ह्मा -ह्मं, अवक्रः -क्रा -क्रं, अकुटिलः -ला -लं, विमलात्मा -त्मा -त्म (न्), निर्व्यलीकः -का -कं, दक्षिणः -णा -णं, अकृत्रिमः -मा -मं, अकूचैः -चैः -चैः.

GUILELESSLY, *adv.* मायां विना, मायया विना, मायाव्यतिरेकेण, कपटं विना, निष्कपटं, निर्व्याजं, सरलवत्.

GUILELESSNESS, *s.* मायाहीनता, सारल्यं, अवक्रता, अजिह्मता, शुद्धता.

GUILLOTINE, *s.* शिरश्छेदनयन्त्रं, अतितीक्ष्णयन्त्रं यदाघातेन निमेषमात्रेण शीर्षच्छेदः क्रियते.

To GUILLOTINE, *v. a.* पूर्व्वोक्तयन्त्रेण मस्तकं छिद् (c. 7. छिनत्ति, छेत्तुं).

GUILT, *s.* (Criminality) अपराधिता -त्वं, सापराधता, पापित्वं, सपापत्वं, अपराद्धता, दोषिता -त्वं, सदोषता, पापवत्त्वं, दोषवत्त्वं.—(Crime) पापं, अपराधः, दोषः, पातकं, दुष्कृतं, दुष्कर्म्म *n.* (न्), पापकर्म्म *n.*, कल्मषं, एनस् *n.*, आगस् *n.*, अघं, दुरितं, मन्युः *m.*

GUILTILY, *adv.* सापराधं, सपापं, सदोषं, सपातकं, अपराद्धवत्.

GUILTINESS, *s.* अपराधिता, अपराद्धता, सापराधत्वं, पापित्वं, सपापता, दोषिता -त्वं, सदोषता, पापवत्ता, दोषवत्ता.

GUILTLESS, *a.* निष्पापः -पा -पं -पी -पिनी -पि (न्), अपापः -पा -पं, निरपराधः -धा -धं, अनपराधी -धिनी -धि (न्), निर्दोषः -षा -षं -षी -षिनी -षि (न्), पापहीनः -ना -नं, शुद्धः -द्धा -द्धं, शुद्धमतिः -तिः -ति, अनघः -घा -घं.

GUILTLESSLY, *adv.* निष्पापं, पापं विना, निरपराधं, अपराधेन विना.

GUILTLESSNESS, *s.* निष्पापत्वं, निर्दोषत्वं, निरपराधिता, शुद्धता.

GUILTY, *adv.* अपराधी -धिनी -धि (न्), अपराद्धः -द्धा -द्धं, सापराधः -धा -धं, कृतापराधः -धा -धं, प्राप्तापराधः -धा -धं, पापी -पिनी -पि (न्), पापवान् -वती -वत् (त्), पापकर्म्मा -र्म्मा -र्म्म (न्), सपापः -पा -पं, दोषी -षिणी -षि (न्), दोषवान् -वती -वत् (त्), सदोषः -षा -षं, पातकी -किनी -कि (न्), दुष्कृती -तिनी -ति (न्), एनस्वी -स्विनी -स्वि (न्), कृतैनाः -नाः -नः (स्), अनिष्कृतैनाः &c., कृतागाः -गाः -गः (स्), अभिपन्नः -न्ना -न्नं; 'rashly guilty,' चिकुटः -टा -टं, चपलः -ला -लं.

GUINEA, *s.* सुवर्णमुद्राविशेषः, सुवर्णीः.

GUINEA-HEN, *s.* चित्रशरीरविशिष्टा विदेशीयकुक्कुटी.

GUINEA-PIG, *s.* अत्यल्पशरीरो विदेशीयशूकरभेदः.

GUISE, *s.* वेशः, वेषः, वासस् *n.*, परिधानं, अक्षरं, वस्त्रं, वसनं, आकारः, रूपं, व्यवहारः, रीतिः *f.*; 'in the guise of a herdsman,' गोपवेशः; 'of a Brahmin,' द्विजरूपी *m.* (न्).

GUITAR, *s.* वीणा, वल्लकी, विपञ्ची -ञ्चिका, तन्त्री, रुद्री, सारङ्गी, शारङ्गी, पिनाकी, ततं, परिवादिनी.

GULF, *s.* (A bay) अखातं, खातं, समुद्रबङ्कः, पुटभेदः.—(Abyss) अगाधदरी, अगाधरन्ध्रं, अतलस्पर्शखातं, गम्भीररन्ध्रं, नरकः.—(Whirlpool) आवर्त्तः, जलावर्त्तः, जलगुल्मः, अवघूर्णः, घूर्णः, घूर्णजलं.

GULFY, *a.* घूर्णजलपूर्णः -र्णा -र्णं, जलगुल्ममयः -यी -यं.

To GULL, *v. a.* वञ्च् (c. 10. वञ्चयते -ति -यितुं), परिवञ्च्, छल् (c. 10.

छलयति -यितुं), प्रतॄ (c. 10. -तारयति -यितुं).

Gull, *s.* (Bird) जलकुक्कुटः -टी, विश्वका, गङ्गाचिल्ली, देवट्टी, ध्वांक्षः. —(One easily cheated) सुवञ्चनीयः, सुप्रतारणीयः.

Gull-catcher, *s.* वञ्चकः, प्रतारकः, छली *m.* (न्), कूटकारः.

Gulled, *p. p.* वञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, प्रतारितः -ता -तं.

Gullery, *s.* वञ्चनं, छलं, कपटः -टं, प्रतारणा, व्याजः, कैतवं.

Gullet, *s.* निगरणस्रोतस् *n.*, निगरणः, अन्नवाहिस्रोतस् *n.*

Gullibility, *s.* सुवञ्चनीयता, सुखवञ्चनीयत्वं, सुप्रतारणीयता.

Gullible, *a.* सुवञ्चनीयः -या -यं, सुखेन प्रतारणीयः -या -यं.

Gully, *s.* नालः, प्रणालः -ली -लिका, खातं, कुल्या, जलमार्गः, उदकगमनमार्गः, जलवाहनी, परीवाहः, सारणिः -णी *f.*

To gully, *v. a.* भूमिम् उत्खन् (c. 1. -खनति -नितुं), प्रणालिकां कृ, कुल्यां कृ.

Gully-hole, *s.* कर्दमाटकरन्ध्रं, प्रणालिकारन्ध्रं, प्रणालीविवरं.

Gulosity, *s.* अतिभोजनं, अत्याहारः, घस्मरता, अतृप्तिः *f.*

To gulp, *v. a.* जलं बहुशो गॄ (c. 6. गिरति, गरितुं -रीतुं) or निगॄ or अवगॄ or ग्रस् (c. 1. ग्रसते -सितुं).—(Disgorge) उद्गॄ, उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

Gulp, *s.* गरणं, गरा, गीर्णिः *f.*, गिरिः *f.*, निगारः, निगरणं, ग्रसनं, ग्रासः, एकवारे निगीर्णं यत्किञ्चित्.—(Disgorging) उद्गारः -रणं, उद्गिरणं, उद्गमः -मनं.

Gum, *s.* (Fleshy covering of the teeth) दन्तमांसं, दन्तवेष्टः -ष्टनं, दन्तशिरा, दन्तमूलं, वेला.—(Exudation from trees) निर्यासः, वृक्षनिर्यासः, वृक्षरसः.—(Adhesive substance) श्यानद्रव्यं, सान्द्रद्रव्यं.

To gum, *v. a.* पूर्वोक्तनिर्यासेन or श्यानद्रव्येण लिप् (c. 6. लिम्पति, लेप्तुं) or संयुज् (c. 7. -युनक्ति -योक्तुं) or संलग्नीकृ.

Gum-arabic, *s.* सूक्ष्मपत्रः, सूक्ष्मपत्ररसः.

Gum-boil, *s.* दन्तविस्फोटः, दन्तस्फोटः -टकः, दन्तव्रणः -णं, दन्तार्बुदः, द्विजव्रणः, वैदर्भः, उपकुशः.

Gumminess, *s.* सान्द्रत्वं, श्यानत्वं, स्निग्धता, संलग्नशीलता.

Gummy, *a.* वृक्षनिर्यासमयः -यी -यं, श्यानः -ना -नं, सान्द्रः -न्द्रा -न्द्रं.

Gun, *s.* अग्न्यस्त्रचलेन गुलिकाप्रक्षेपणी लोहनाडिः or -डी, गुलिकाप्रक्षेपणी सुषिरनाली, गुलिकाप्रक्षेपार्थं शुषिरयन्त्रं, लोहसुषिः *f.*

Gunner, *s.* पूर्वोक्तनाडिद्वारा गुलिकाप्रक्षेपकः, लोहनाडिधारी *m.* (न्), अग्न्यस्त्रधारी *m.*, आग्नेयास्त्रप्रक्षेपकः.

Gunnery, *s.* अग्न्यस्त्रविद्या, लोहनाडिद्वारेण गुलिकाप्रक्षेपणविद्या.

Gunpowder, *s.* आग्नेयचूर्णं, शीघ्रदाह्यचूर्णं, आग्नेयक्षोदः, महाशब्दपूर्वम् अग्निसम्पर्कात् सद्योदाह्यचूर्णं.

Gun-shot, *s.* लोहगुलिकागोचरं, लोहगुलिविषयः, युद्धनाडिक्षेपणं.

Gun-smith, *s.* अग्न्यस्त्रकारः, आग्नेयशस्त्रकारः, आग्नेयनाडिनिर्म्माता *m.* (तृ), युद्धनाडिनिर्म्माणशिल्पज्ञः.

Gun-stock, *s.* आग्नेयनाडिदण्डः, लोहनाडिदारुः *m.*, नाडिवारुजः.

Gunwale, gunnel, *s.* नौपार्श्वधारा -रः, नौपार्श्वस्य उपरिकाष्ठं, नावुत्सङ्गः.

Gurge, *s.* जलावर्त्तः, जलभ्रमः, जलावघूर्णः, जलगुल्मः, घूर्णजलं.

To gurgle, *v. n.* जलवद् घर्घराशब्देन स्रु (c. 1. स्रवति, स्रोतुं), घर्घराशब्दं कृ, घर्घ or गर्ग (nom. घर्घायते, गर्गायते), गर्घ् (c. 1. गर्घति -र्घितुं).

Gurgling, *s.* घर्घराशब्देन जलप्रस्रावः, घर्घरा.

To gush, *v. n.* प्रपत् (c. 1. -पतति -तितुं), निर्पत्, बहुशः प्रस्रु (c. 1. -स्रवति -स्रोतुं) or प्रस्यन्द् (c. 1. -स्यन्दते -न्दितुं) or क्षर् (c. 1. क्षरति -रितुं), वेगेन or वेगतो निःसृ (c. 1. -सरति -सर्तुं); 'tears gushed from (her) eyes,' जलं नेत्राभ्यां प्रापतत्.

Gush, gushing, *s.* बहुप्रस्रावः, जलप्रपातः, उत्सेकः, उत्सेचनं, उत्पीडः.

Gusset, *s.* वस्त्रनिवेशित उपवस्त्रखण्डः or अधिकवस्त्रखण्डः.

Gust, *s.* (Blast of wind) निर्घातः, प्रभञ्जनः, व्योममुद्गरः, वातरूषः, वायुगुल्मः, वायुवेगः, वात्या, प्रबलवायुः *m.*, प्रचण्डवायुः *m.*, चण्डवातः, तीव्रवातः, पवनाघातः, जवानिलः.—(Taste) स्वादः, आस्वादः, रसनेन्द्रियं, रुचिः *f.*, अभिरुचिः *f.*

Gustation, *s.* स्वादनं, आस्वादनं, प्राशनं, लेहनं.

Gustful, *a.* रुच्यः -च्या -च्यं, रुचिरः -रा -रं, सरसः -सा -सं.

Gustless, *a.* विरसः -सा -सं, निःस्वादुः -दुः -दु, अस्वादुः -दुः -दु.

Gusto, *s.* रुचिः *f.*, अभिरुचिः *f.*, रसः, सुरसः, आस्वादः.

Gusty, *a.* वातलः -ला -लं, वातवान् -वती -वत् (त्), वातीयः -या -यं, वातमयः -यी -यं, बहुपवनः -ना -नं, पवनक्षिप्तः -प्ता -प्तं.

Gut, *s.* नाडिः -डी *f.*, अन्ननाडी, नाली -लिः *f.*, धमनी -निः *f.*, शिरा, सिरा, अन्त्रं, पुरीतत् *m. n.*, कोष्ठः.—(Stomach) उदरं, जठरः -रं.

To gut, *v. a.* निरन्त्रीकृ, निरन्त्र (nom. निरन्त्रयति -यितुं), नाडीः or अन्त्राणि बहिष्कृ.—(Plunder) द्रव्याणि अपहृ (c. 1. -हरति -हर्तुं).

Gutta serena, *s.* तिमिरं; 'an eye affected with it,' तिमिरदोषहतं चक्षुस्.

Gutted, *p. p.* निरन्त्रीकृतः -ता -तं, हृतसर्वद्रव्यः -व्या -व्यं.

Gutter, *s.* प्रणालः -ली -लिका, नालः, जलनिर्गमः, जलमार्गः, परीवाहः, जलवाहनी, सारणिः *f.* -णी, उदकगमनमार्गः.

To gutter, *v. a.* प्रणालीरूपेण उत्खन् (c. 1. -खनति -नितुं) or शुषिरीकृ.

To gutter, *v. n.* प्रणालीरूपेण उत्खन् in pass. (-खन्यते) or शुषिरीभू, प्रणालिकां कृ, ज्वलदीपिकारूपेण लवशः स्यन्द् (c. 1. स्यन्दते -न्दितुं).

Guttler, *s.* बहुभक्षकः, अतिभोजी *m.* (न्), कुक्षिम्भरिः *m.*

Guttural, *a.* कण्ठ्यः -ण्ठ्या -ण्ठ्यं, कण्ठस्थः -स्था -स्थं, ग्रैवः -वी -वं, ग्रैवेयः -यी -यं; 'guttural letter,' कण्ठ्यं; 'guttural sound,' कुहरं.

Guzarat, *s.* (The country) गुर्जरः.—(The people) गुर्जराः *m. pl.*

To guzzle, *v. a.* बहुशो गॄ (c. 6. गिरति, गरितुं -रीतुं) or निगॄ or ग्रस् (c. 1. ग्रसते -सितुं) or पा (c. 1. पिबति, पातुं), पानरतः -ता -तं भू.

Guzzler, *s.* अतिपायी *m.* (न्), अतिभोजी *m.* (न्), पानरतः.

Gymnasium, *s.* व्यायामशाला, मल्लयुद्धशाला, मल्लशाला, विहारः.

Gymnastic, *a.* व्यायामी -मिनी -मि (न्), व्यायामसम्बन्धी -न्धिनी -न्धि (न्), मल्लयुद्धसम्बन्धी &c., व्यायामशीलः -ला -लं.

Gymnastics, *s. pl.* व्यायामः, मल्लयुद्धं, व्यायामविद्या.

Gypsy, gypsey. *See* Gipsy.

To gyrate, *v. n.* परिवृत् (c. 1. -वर्त्तते -र्त्तितुं), भ्रम् (c. 4. भाम्यति, c. 1. भ्रमति -मितुं), घूर्ण् (c. 6. 1. घूर्णति -ते -र्णितुं), परिघूर्ण्, विघूर्ण्, व्याघूर्ण्.

Gyration, *s.* परिवर्त्तनं, आवर्त्तः, भ्रमः -मणं, भ्रमिः *f.*, घूर्णिः *f.*, घूर्णनं; 'of a bird,' परिडीनकं.

Gyre, *s.* चक्रावर्त्तः, चक्रगतिः *f.*, आवृत्तिः *f.*, मण्डलं, परिमण्डलं.

To gyre, *v. a.* निगडेन बन्ध् (c. 9. बध्नाति, बन्धुं), निगड (nom. निगडयति -यितुं), पाश (nom. पाशयति -यितुं).

Gyves, *s. pl.* निगडः -डं, पाशः, बन्धनं -नानि *n. pl.*, पादपाशः, शृङ्खला.

H.

Ha, *interj.* हा, हहा, आहा, अहो, आहो, अहहः, अहोवत्, ह, अह, आ, अयि, आश्चर्यं.

Habeas corpus, *s.* मिथ्यानिरोधनिषेधार्थकं पूर्वकालीनशासनपत्रं.

Haberdasher, *s.* वस्त्रादिविक्रेता *m.* (तृ), वसनादिविक्रेता *m.*, अंशुकादिविक्रयी *m.* (न्), क्षुद्रद्रव्यविक्रेता *m.*

Haberdashery, *s.* पूर्वोक्तव्यापारिणा विक्रीता वस्त्रादिद्रव्यसामग्री.

HABERGEON, *s.* वक्षस्त्राणं, उरस्त्राणं, उरश्छदः, लघुस्थकवचं.

HABILIMENT, *s.* वेशः, परिधानं, परिच्छदः, वसनं, वस्त्रं, आभरणं, अक्षरं, वासस् *n.*, प्रसाधनं, आच्छादनं, सज्जा.

HABIT, *s.* (Dress) वेशः, वेषः, वसनं, वस्त्रं, वासस् *n.*, परिधानं, परिच्छदः, अक्षरं.—(State, condition) अवस्था, स्थितिः *f.*, भावः, वृत्तिः *f.*, दशा, संस्थितिः *f.*, स्वभावः; 'habit of body,' शरीरस्थितिः *f.*, देहस्वभावः; 'habit of mind,' चित्तवृत्तिः *f.*—(Temperament, disposition) प्रकृतिः *f.*, शीलः -लता, स्वभावः, अन्तःकरणं.—(Custom, practice, established manner) आचारः, अभ्यासः, व्यवहारः, समाचारः, नित्यकृत्यं, नित्यक्रिया, रीतिः *f.*, व्यवहृतिः *f.*, शीलः, प्रचारः, चरितं, चर्य्या, क्रमः, नियमः, आवृत्तिः *f.*, व्यापारः, प्रवृत्तिः *f.*, मार्गः, अनुशीलनं; 'bad habit,' व्यसनं; 'having bad habits,' दुराचारः -रा -रं, पापसमाचारः -रा -रं, पापचर्य्यः -र्य्या -र्य्यं, दुर्वृत्तः -त्ता -त्तं, दुश्चरित्रः -त्रा -त्रं, व्यसनी -निनी -नि (न्).

To HABIT, *v. a.* वेष् (c. 1. वेष्टते -ष्टितुं), परिवेष्, आच्छद् (c. 10. -छादयति -यितुं), वस्त्र (nom. वस्त्रयति -यितुं), परिधा in caus. (-धापयति -यितुं).

HABITABLE, *a.* वासनेयः -यी -यं, वास्तव्यः -व्या -व्यं, वासयोग्यः -ग्या -ग्यं, वासक्षमः -मा -मं, आजीव्यः -व्या -व्यं, उपजीव्यः -व्या -व्यं.

HABITANT, *s.* वासी *m.* (न्), निवासी *m.*, निलायी *m.* (न्), वासकृत्.

HABITATION, *s.* वासः, वासस्थानं, निवासः, वसतिः *f.*, निषत्तिः *f.*, गृहं, गेहः -हं, वेश्म *m.* (न्), निलयः -यनं, आलयः, आयतनं, निवेशनं, निकेतः -तनं, आगारः, भवनं, वसितं, समावासः, अवस्थानं, आवसथः, स्थानं, ओकस् *n.*, धाम *n.* (न्).

HABITUAL, *a.* आभ्यासिकः -की -कं, अभ्यस्तः -स्ता -स्तं, आचारिकः -की -कं, आचरितः -ता -तं, व्यावहारिकः -की -कं, व्यवहारिकः -की -कं, नित्यः -त्या -त्यं, स्वाभाविकः -की -कं, अनुशीलितः -ता -तं, नैयमिकः -की -कं, प्राथिकः -की -कं.

HABITUALLY, *adv.* नित्यं, नित्यशस्, यथाव्यवहारं, यथारीति, साभ्यासं, अभ्यासेन, अभ्यासपूर्वं, यथाभ्यासं.

To HABITUATE, *v. a.* अभ्यस् (c. 4. -अस्यति -असितुं), अभ्यासं कृ, अभ्यस्तं -स्तां -स्तं कृ, शिक्ष् (c. 10. शिक्षयति -यितुं), शील् (c. 10. शीलयति -यितुं); 'to be habituated,' अभ्यस्तः -स्ता -स्तं भू.

HABITUATED, *p. p.* अभ्यस्तः -स्ता -स्तं, शिक्षितः -ता -तं, कृताभ्यासः -सा -सं, शीलितः -ता -तं, अनुशीलितः -ता -तं, शीलः -ला -लं in comp.

HABITUDE, *s.* (Custom) व्यवहारः, आचारः, रीतिः *f.*, चरितं, चर्य्या, नित्यकृत्यं.—(Relation) सम्बन्धः, सम्यकैः, प्रतीक्षा.—(Intercourse) संसर्गः.

To HACK, *v. a.* (Mangle) व्यवछिद् (c. 7. -छिनत्ति -छेत्तुं), व्रश्च् (c. 6. वृश्चति, व्रश्चितुं), प्रव्रश्च्, विदृ (c. 10. -दारयति -यितुं), बहुलवशः खण्ड् (c. 10. खण्डयति -यितुं) or छिद्, बहुखण्डशः कृ, खण्डं खण्डं कृ, बहुखण्डीकृ, क्षतविक्षतीकृ.

To HACK, *v. n.* (For hire) अतिशरीरायासेन नीचकर्म्म कृ, निरन्नरायासं कृ, पण्यः -ण्या -ण्यं भू, सर्व्वप्रयोज्यः -ज्या -ज्यं भू, सर्व्वसाधारणीभू.

HACK, *s.* (Cut) प्रहारः, छेदः, आघातः, क्षुरिकाघातः.—(Horse kept for hire, worn out horse) कदश्वः, पण्याश्वः, भाटकीयवाजी *m.* (न्), साधारणवाजी *m.*, सर्व्वप्रयोज्यवाजी *m.*, पण्यपोटकः, अश्वकः; 'hack-carriage,' पण्यवाहनं, साधारणरथः.—(Drudge) निरन्नरायासी *m.* (न्), अतिदेहक्लेशेन नीचकर्म्मकारी *m.* (न्), हीनवृत्तिः *m.*, क्षुद्रीनः.

HACKED, *p. p.* व्यवछिन्नः -न्ना -न्नं, क्षतविक्षतः -ता -तं, वृक्णः -क्णा -क्णं.

To HACKLE, *v. a.* वक्ष्यमाणयन्त्रेण शणं or क्षतसीं मृज् (c. 2. मार्ष्टि -ष्टुं) or सम्मृज्, or परिष्कृ or शुध् (c. 10. शोधयति -यितुं) or पृथक्कृ.

HACKLE, *s.* क्षतसीमार्जनी, शणमार्जकः, उमाशोधनी.

HACKNEY, *s.* (Horse) कदश्वः, अश्वकः, पण्याश्वः, पण्यपोटकः, साधारणवाजी *m.* (न्), भाटकीयवाजी *m.*—(Any thing much used, a drudge, a hireling) नीचकर्म्मणि नियुक्तः, नीचकर्म्मकारी *m.* (न्), निरन्नरायासी *m.* (न्), हीनवृत्तिः *m.*, वैतनिकः, पण्यः, साधारणः, सर्व्वप्रयोज्यः.—(Prostitute) पण्यस्त्री, साधारणस्त्री.

To HACKNEY, *v. a.* नीचकर्म्मणि नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), पण्यीकृ, साधारणीकृ, सर्व्वप्रयोज्यं -ज्यां -ज्यं कृ, जीर्णीकृ.

HACKNEY-COACH, *s.* साधारणरथः, पण्यरथः, पण्यवाहनं, सर्व्वप्रयोज्यरथः.

HACKNEYED, *p. p.* सर्व्वप्रयुक्तः -क्ता -क्तं, सर्व्वसाधारणः -णा -णी -णं, सर्व्वपण्यः -ण्या -ण्यं, अपकर्म्मनियुक्तः -क्ता -क्तं, जीर्णः -र्णा -र्णं.

HADDOCK, *s.* हड्डुकसंज्ञकः समुद्रीयमत्स्यभेदः.

HADES, *s.* प्रेतलोकः, अधोलोकः, अधोभुवनं, नरकः, पातालं.

HAFT, *s.* (Handle) त्सरुः *m.*, तलः, धारकः, मुष्टिः *m.* -ष्टी *f.*, दण्डः, कर्णः.

To HAFT, *v. a.* त्सरौ or तले or धारके निविश् (c. 10. -वेशयति -यितुं).

HAG, *s.* कुरूपी -पिणी, कुट्टिनी, डाकिनी, वृद्धा स्त्री, जरिणी.

HAGGARD, *a.* कृशाननः -ना -नं, क्षीणवदनः -ना -नं, श्यामवदनः -ना -नं, शुष्कवदनः -ना -नं, उग्रमुखः -खा -खं, उग्रदर्शनः -ना -नं.

HAGGISH, *a.* कुरूपिणी, अपरूपिणी, विरूपिणी, जरापरिणता.

To HAGGLE, *v. a.* व्यवछिद् (c. 7. -छिनत्ति -छेत्तुं), क्षतविक्षतीकृ, खण्डशः कृ.

To HAGGLE, *v. n.* (In bargaining) क्रयकाले विलस् (c. 1. -लसते -सितुं) or विचर् (c. 10. -चारयति -यितुं) or इतावत् दातुम् इच्छामीति वादानुवादं कृ or न्यूनमूल्यं दित्सामीति वद् (c. 1. वदति -दितुं).

HAGGLER, *s.* क्रयकाले विलसी *m.* (न्) or इतावन्मूल्यं न दातुम् इच्छामीति वादानुवादकारी *m.* (न्).

HAGIOGRAPHA, *s.* धर्म्मग्रन्थः, धर्म्मशास्त्रसंहिता, धर्म्मपुस्तकं.

HAH, *interj.* हा, अहो, अहोवत्, अहह, हाहा, आ, अयि, आश्चर्य्ये.

HAIL, *s.* (Frozen rain) करका, करकावृष्टिः *f.*, शिला, शिलावृष्टिः *f.*, वर्षोपलः, पयोधनः, पयोगडः, घनकफः, मेघास्थि *n.*, मेघकफः, मेघगर्भः, धारा, तोयडिम्भः, महत्फलं, पिण्डाभं, धाराङ्कुरः, मटती, शिलीन्ध्रं, वार्षिला.

HAIL, *exclam.* नमस्, स्वस्ति, कुशलं, कुशलं भूयात्, सुखं भूयात्, कल्याणं भूयात्, क्षेमं भवतु, शेवं, अभिवादये, अभिवन्दे.

To HAIL, *v. n.* (Pour down hail) करकासारं वृष् (c. 1. वर्षति -र्षितुं), शिला वृष्, उपलान् वृष् or पत् (c. 10. पातयति -यितुं).

To HAIL, *v. a.* (Call from a distance) दूराद् आह्वे (c. 1. -ह्वयति -ह्वातुं) or ह्वे or सम्बोधनं कृ or आक्रन्द् (c. 1. -क्रन्दति -न्दितुं) or आमन्त्र् (c. 10. -मन्त्रयते -यितुं) or समामन्त्र् or अभिभाष् (c. 1. -भाषते -षितुं) or आभाष्.—(Salute) वन्द् (c. 1. वन्दते -न्दितुं), अभिवन्द्, अभिवद् (c. 10. -वादयति -ते -यितुं), नमस्कृ, आमन्त्र्, उपास् (c. 2. -आस्ते -आसितुं).

HAILED, *p. p.* दूराद् आहूतः -ता -तं or अभिहितः -ता -तं or आमन्त्रितः -ता -तं, सम्बोधितः -ता -तं, आक्रन्दितः -ता -तं.

HAIL-STONE, *s.* शिला, वर्षोपलः, पयोधनः, करका, पयोगडः.

HAIL-STORM, *s.* करकासारः, करकावृष्टिः *f.*, शिलासारः.

HAILY, *a.* करकामयः -यी -यं, शिलामयः -यी -यं, वर्षोपलमयः &c.

HAIR, *s.* केशः, बालः, कचः, चिकुरः, वृजनः -जिनः, कुन्तलः.—(Of the head) केशः, शिरोरुहः, शिरोरुह् *m.*, शिरसिजः, मूर्द्धजः, कृशला.—(Of the body) लोम *n.* (न्), रोम *n.* (न्), तनुरुहः -हं, तनूरुहः -हं, तनुरुह् *m.* (ह्), तनुजं, अङ्गुः; 'a head of hair,' कैश्यं, कैशिकं; 'a quantity of hair,' केशकलापः, केशपक्षः, केशोच्चयः, केशपाशः, कचपाशः, कचपक्षः, कचहस्तः, चिकुरपाशः, चिकुरपक्षः, चिकुरहस्तः; 'having much or fine hair,' केशी -शिनी -शि (न्), केशवान् -वती -वत् (त्), केशवः -वा -वं, केशिकः -की -कं; 'a fine head

of hair,' केशभारः, कबरीभारः -भरः; 'a braid of hair,' कबरी, केशगर्भः -र्भकः, केशवेशः; 'braided hair,' धम्मिल्लः, वेणिः -णी *f.*, वेल्लिका, प्रवेणिः -णी *f.*; 'a lock of hair,' अलकः -कं, चूर्णकुन्तलः, भ्रमरकः, काकपक्षः, शिखण्डः -ण्डकः, केशपाशी, चूडा, शिखा; 'clotted hair,' जटा, सटा; 'unentangled hair,' शीर्षण्यः, शिरस्यः; 'covered with hair,' लोमशः -शा -शं, बहुलोमा -मा -म (न्), रोमाक्रान्तः -न्ता -न्तं; 'point of hair,' बालाग्रं; 'erection of the hair,' रोमहर्षणं, उद्धर्षणं. *See* ERECTION.—(Filament of a plant) केशरः, केसरः.

HAIR-BELL, *s.* घण्टाकारपुष्पविशिष्ट ओषधिभेदः.

HAIR-BREADTH, *s.* एककेशान्तरं, एककेशपरिमाणं, अत्यल्पान्तरं.

HAIR-BROOM, *s.* केशनिर्म्मिता मार्जनी, लोममयी शोधनी.

HAIR-BRUSH, *s.* केशमार्जनी, केशशोधनी, केशनिर्घर्षणकः.

HAIR-CLOTH, *s.* लोमनिर्म्मितं वस्त्रं, केशमयः पटः.

HAIR-CUTTER, *s.* केशच्छिद् *m.* -च्छेत्ता *m.* (तृ), शिरोरुहच्छेदकः.

HAIR-DRESSER, *s.* केशरचकः, केशविरचकः, केशसंस्कारकृत् *m.*

HAIR-DRESSING, *s.* केशरचना, केशविरचनं -ना, केशसंस्कारः.

HAIRED, *a.* केशी -शिनी -शि (न्), केशवान् -वती -वत् (त्).

HAIRINESS, *s.* लोमशत्वं, रोमशत्वं, बहुलोमत्वं, लोमप्राचुर्य्यं.

HAIRLESS, *a.* अकेशः -शा -शं, विकेशः -शा -शं, केशहीनः -ना -नं, निर्लोमा -मा -म (न्), लोमरहितः -ता -तं, अविद्यमानलोमा &c.

HAIRY, *a.* लोमशः -शा -शं, रोमशः -शा -शं, बहुलोमा -मा -म (न्), प्रचुरलोमा &c., बहुकेशः -शा -शं, केशी -शिनी -शि (न्), केशकः -का -कं, केशिकः -की -कं, केशवः -वा -वं, बहुकेशवान् -वती -वत् (त्), लोमवान् &c., लोममयः -यी -यं, लोमपूर्णः -र्णा -र्णं.

HAKE, *s.* समुद्रीयमत्स्यभेदः.

HALBERD, *s.* युद्धे प्रयुक्तः काष्ठदण्डो लोहायः शूलविशेषः, प्रासः, शक्तिः *f.*

HALBERDIER, *s.* पूर्व्वोक्तशूलधरः, शक्तिग्रहः, शाक्तीकः, प्रासिकः.

HALCYON, *s.* (Kingfisher) मत्स्यरङ्कः -ङ्कः, सुचिचकः, कुट्टकः.

HALCYON, *a.* प्रसन्नः -न्ना -न्नं, शान्तः -न्ता -न्तं, प्रशान्तः -न्ता -न्तं, निर्वेगः -गा -गं, निराकुलः -ला -लं, निर्वृतः -ता -तं, निर्वातः -ता -तं, सुखी -खिनी -खि (न्).

HALE, *a.* निरामयः -या -यं, नीरोगः -गा -गं, नीरुजः -जा -जं, नीरुक् *m. f. n.* (ज्), कल्यः -ल्या -ल्यं, आधिव्याधिरहितः -ता -तं, अक्षतः -ता -तं.

To HALE, *v. a.* कृष् (c. 1. कर्षति, क्रष्टुं), आकृष्, अपकृष्, अपहृ (c. 1. -हरति -हर्त्तुं).

HALF, *s.* अर्द्धं -र्द्धः, अर्द्धभागः, अर्द्धांशः; 'half an hour,' अर्द्धदण्डः; 'half a league,' अर्द्धक्रोशः; 'half a hundred,' अर्द्धशतं; 'half the body,' अर्द्धाङ्गं; 'a year and a half,' सार्द्धवत्सरः; 'a hundred and a half,' सार्द्धशतं; 'the best half,' उत्तमार्द्धं -र्द्धी; 'the last half,' अपरार्द्धं, पश्चार्द्धं; 'sharing a half,' अर्द्धभागी -गिनी -गि (न्), अर्द्धांशी -शिनी -शि (न्), अर्द्धी -र्द्धिनी -र्द्धि (न्); 'lasting half a month,' आर्द्धमासिकः -की -कं.

HALF, *a.* अर्द्धः -र्द्धा -र्द्धं, आर्द्धिकः -की -कं, अर्द्धिकः -का -कं; 'half assent,' अर्द्धाङ्गीकारः; 'half moon,' अर्द्धचन्द्रः.

HALF, *adv.* अर्द्धं, अर्द्धेन, सामि; 'half-man, half-woman,' अर्द्धेन पुरुषोऽर्द्धेन स्त्री; 'half-eaten,' अर्द्धभुक्तः -क्ता -क्तं, जग्धार्द्धः -र्द्धा -र्द्धं, सामिभुक्तः -क्ता -क्तं; 'half-drank,' अर्द्धपीतः -ता -तं, सामिपीतः -ता -तं; 'half-read,' अर्द्धपाठितः -ता -तं; 'half-spoken,' अर्द्धोक्तः -क्ता -क्तं; 'half-closed,' अर्द्धसंवृतः -ता -तं, मुकुलितः -ता -तं, निमीलितः -ता -तं.

HALF-BLOOD, *s.* or *a.* भिन्नोदरः -रा -रं, भिन्ननाभिः -भिः -भि, भिन्नगर्भः -र्भा -र्भं, असमानोदरः -रा -रं, भिन्नोदर्य्यः, अन्योदर्य्यः, भिन्नशरीरान्वयः.

HALF-BROTHER, *s.* वैमात्रः -त्रेयः, भ्राता द्वैमातुरः, अन्योदर्य्यः, सापत्नः.

HALF-DEAD, *a.* मृतकल्पः -ल्पा -ल्पं, मृतप्रायः -या -यं, मुमूर्षुः -र्षुः -र्षु, आसन्नमृत्युः -त्युः -त्यु, मरणोन्मुखः -खी -खं, अर्द्धमृतः -ता -तं, क्वासगतप्राणः -णा -णं.

HALF-HEARD, *a.* अर्द्धश्रुतः -ता -तं, ईषच्छ्रुतः -ता -तं.

HALF-HOLIDAY, *s.* अर्द्धोत्सवः, अर्द्धमहोत्सवः, अर्द्धावध्यायः.

HALF-LEARNED, *a.* अल्पज्ञानी -निनी -नि (न्), किञ्चिज्ज्ञः -ज्ञा -ज्ञं, चुच्चकः.

HALF-LOST, *a.* नष्टप्रायः -या -यं, आसन्ननाशः -शा -शं, नाशोन्मुखः -खी -खं.

HALF-MOON, *s.* अर्द्धचन्द्रः, चन्द्रार्द्धं, अर्द्धेन्दुः *m.*; 'shaped like a half-moon,' अर्द्धचन्द्राकारः -रा -रं, अर्द्धचन्द्राकृतिः -तिः -ति.

HALF-PAY, *s.* निवृत्तयुद्धस्य सैन्यस्य प्रकल्पितम् अर्द्धवेतनं.

HALF-PENNY, *s.* ताम्रमुद्रार्द्धं, ताम्रमुद्राविशेषः.

HALF-PIKE, *s.* लघुशूलः -लं, अदीर्घपरिमाणः शूलविशेषः, परिघः.

HALF-SEAS-OVER, *s.* ईषन्मग्नः -ग्ना -ग्नं, ईषदुन्मग्नः -ग्ना -ग्नं, ईषत्स्रावः -वा -वं.

HALF-SISTER, *s.* वैमात्री, वैमात्रेयी, स्वसा द्वैमातुरी, अन्योदर्य्या.

HALF-SPHERE, *s.* अर्द्धमण्डलं, अर्द्धगोलः, मण्डलार्द्धं, भूगोलार्द्धं.

HALF-STARVED, *a.* अनाहारेण म्रियमाणः -णा -णं or मृतप्रायः -या -यं, क्षुधावसन्नः -न्ना -न्नं.

HALF-UTTERED, *a.* अर्द्धोक्तः -क्ता -क्तं, अर्द्धोदितः -ता -तं, अर्द्धकथितः -ता -तं.

HILARITY, *s.* आह्लादः, उल्लसता, उल्लासः, हर्षः, प्रहर्षः, आनन्दः, सानन्दता, प्रफुल्लता, मुदा, प्रहसनं, हासिका, सामोदः, कौतुकं, उत्सवः.

HILL, *s.* पर्व्वतः, गिरिः *m.*, शैलः, अद्रिः *m.*, भूधरः, अचलः, महीधरः, सानुमान् *m.* (न्); 'hill near a mountain,' पादः, प्रत्यन्तपर्व्वतः.

HILLOCK, *s.* क्षुद्रपर्व्वतः, वल्मीकं, वप्रः -प्री, मृत्तिकाचयः, वामलूरः, नाकुः *m.*, उन्नतभूभागः.

HILLY, *a.* पर्व्वतीयः -या -यं, पार्व्वतीयः -यी -यं, सपर्व्वतः -ता -तं, सगिरिः -रिः -रि, उच्चनीचः -चा -चं, विषमः -मा -मं.

HILT, *s.* (Of a sword, &c.) त्सरुः *m.*, मुष्टिः *m.*, खड्गमुष्टिः, तलः, तालः, वारङ्गः.

HILTED, *a.* त्सरुमान् -मती -मत् (त्), मुष्टिविशिष्टः -ष्टा -ष्टं, दृढमुष्टिः -ष्टिः -ष्टि.

HIM, *pron.* तं acc. *m.* (तद्), एतं acc. *m.* (एतद्), एनं acc. *m.* (इदं).

HIMÁLAYA, *s.* (Mountain) हिमालयः, हिमाद्रिः *m.*, हिमवान् *m.* (त्), हिमप्रस्थः, हिमः, तुषाराद्रिः *m.*, उदगद्रिः *m.*, गिरीशः, तुहिनशैलः.

HIND, *s.* (Female of a deer) मृगी, हरिणी, कुरङ्गी, एणी, मृगवधूः *f.*, समीची, रोहित् *f.*, पृषती.—(A boor) ग्राम्यजनः, वृषलः.—(A servant) दासः, भृत्यः.

HIND, HINDER, *a.* पश्चिमः -मा -मं, जघन्यः -न्या -न्यं, अवरः -रा -रं, अपरः -रा -रं, पाश्चात्यः -त्या -त्यं, पश्चात्तीयः -या -यं.—(The hinder part) पृष्ठदेशः, पश्चादेशः, पश्चाद्भागः, पश्चिमभागः, पृष्ठं, नितम्बः; 'in the hinder part,' पश्चाद्भागे, अवरतस्, अवरस्तात्; 'hind quarter of an elephant,' अपरं; 'of a ship,' नावः पश्चिमभागः or पश्चाद्भागः.

To HINDER, *v. a.* वृ (c. 10. वारयति -यितुं), निवृ, विनिवृ, प्रतिवृ, आवृ, रुध् (c. 7. रुणद्धि, रोद्धुं), प्रतिरुध्, निरुध्, संरुध्, अवरुध्, उपरुध्; बाध् (c. 1. बाधते -धितुं), विहन् (c. 2. -हन्ति -न्तुं), व्याहन्, प्रतिहन्, विघ्न (nom. विघ्नयति -यितुं), स्तम्भ् (c. 10. स्तम्भयति -यितुं), विष्टम्भ्, प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं), प्रतिषिध् (c. 1. -षेधति -षेद्धुं).

HINDERANCE, *s.* विघ्नः, प्रत्यूहः, अन्तरायः, व्याघातः, विघातः, बाधः -धा, बाधकः -कता, विरोधः, अवरोधः, निरोधः, संरोधः, प्रतिरोधः, उपरोधः, रोधः -धनं, वारणं, निवारणं, आवरणं, स्तम्भः -भनं, विष्टम्भः, प्रतिष्टम्भः, प्रतिबन्धः -न्धकं -न्धकता, विष्कम्भः, प्रतिषेधः, हेठः.

HINDERED, *p. p.* वारितः -ता -तं, निवारितः -ता -तं, रुद्धः -द्धा -द्धं, विरुद्धः -द्धा -द्धं, निरुद्धः -द्धा -द्धं, उपरुद्धः -द्धा -द्धं, अवरुद्धः -द्धा -द्धं, बाधितः -ता -तं, विघ्नितः -ता -तं, विहतः -ता -तं, व्याहतः -ता -तं, प्रतिहतः -ता -तं, पराहतः -ता -तं, स्तम्भितः -ता -तं, स्तब्धः -ब्धा -ब्धं, विष्टब्धः -ब्धा -ब्धं, प्रतिबद्धः -द्धा -द्धं, प्रतिषिद्धः -द्धा -द्धं, सार्गलः -ला -लं.

HINDERER, *s.* विरोधी *m.* (न्), वारकः, निवारकः, बाधकः, विघ्नकारी *m.* (न्), प्रतिबन्धकः, स्तम्भकरः -कारी *m.*, प्रतिबन्धकः.

HINDERING, *part.* रुन्धन् -न्धती -न्धत् (त्), विरुन्धानः -ना -नं, रोधनः -नी -नं.

HINDERMOST, *a.* पश्चिमः -मा -मं, जघन्यः -न्या -न्यं, पाश्चात्यः -त्या -त्यं, पश्चात्तीयः -या -यं, अवरः -रा -रं, अवरतमः -मा -मं, अवरतस् indec., अवरस्तात् indec.

HINDRANCE, *s.* *See* HINDERANCE.

HINGE, *s.* द्वारसन्धिः *m.*, सन्धिः *m.*, द्वारयन्त्रिः *m.*, केन्द्रं.

To HINT, *v. a.* इङ्गितं कृ, सङ्केतं कृ, उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्, सूच् (c. 10. सूचयति -यितुं), आकूतं कृ.—(Suggest) उपन्यस् (c. 4. -अस्यति -असितुं).

HINT, *s.* इङ्गितं, इङ्गः, सङ्केतः, आकारः, आकूतं, भीलितं, अङ्गविकृतं, भावः, सूचना, सूचितं.—(Suggestion) उपन्यासः; 'understanding a hint,' इङ्गितकोविदः.

HINTED, *p. p.* उद्दिष्टः -ष्टा -ष्टं, सूचितः -ता -तं.

HIP, *s.* (Joint of the thigh) कटिः *m.* -टी, कटः, श्रोणिः *f.* -णी, श्रोणिफलकं, कलत्रं, अङ्गः, जघनं, प्रोथः, क्रोडः, पालिः *f.*, वरारोहा, ककुद्मती, मेखलापदं.—(Lowness of spirits) विषादः, अवसादः.

HIPPISH, *a.* विषादी -दिनी -दि (न्), विषण्णः -ण्णा -र्णं, दुर्मनाः -नाः -नः (स्).

HIPPOGRIFF, *s.* कविकल्पितः पक्षवान् अश्वविशेषः.

HIPPOPOTAMUS, *s.* विदुः *m.*, करियादस् *n.*, शुण्डा, ग्राहः, अवहारः.

HIPSHOT, *s.* त्रुटितश्रोणिः -णिः -णि, विसन्धितकटिः -टिः -टि.

To HIRE, *v. a.* निरूपितकालं यावद् वेतनेन or मूल्येन ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), मूल्यं or वेतनं दत्त्वा सन्दिष्टकालं यावद् ग्रह् or प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं, c. 10. -योजयति -यितुं) or उपभुज् (c. 7. -भुनक्ति -भुंक्ते -भोक्तुं) or सेव् (c. 1. सेवते -वितुं), भट् (c. 1. भटति, टितुं), भृ (c. 1. भरति -र्तुं, भर्त्तुं), भाटक (nom. भाटकयति -यितुं), परिक्री (c. 9. -क्रीणाति -क्रेतुं), आनिर्दिष्टकालाद् भृतिं दा.—(Hire labourers) मूल्यं दत्त्वा or प्रतिज्ञाय आविहितकालात् कर्म्मणि नियुज् or प्रयुज् or आपृ (c. 10. -पारयति -यितुं), कर्म्मकरान् उपनी (c. 1. -नयते -नेतुं).

HIRE, *s.* (Act of hiring) निरूपितकालं यावद् वेतनेन or मूल्येन ग्रहणं, मूल्यं दत्त्वा आसन्दिष्टकालाद् ग्रहणं, प्रयोगः, वेतनदानं.—(Wages) भृतिः *f.*, भृत्या, भरणं, भरण्यं, भाटिः *f.*, भाटकः, वेतनं, मूल्यं, निर्वेशः, कर्म्मण्या, वर्त्त, निष्क्रयः, भर्म्म *n.* (न्), भर्म्मं, विधा, विष्टिः *f.*, पणः, हार्त्रं, विरहिणी, वेष्या; 'for hire,' निरूपितमूल्येन ग्रहणीयः -या -यं or प्रयोज्यः -ज्या -ज्यं, पण्यः -ण्या -ण्यं, साधारणः -णी -णं; 'working for hire,' भृतिभुक् *m. f. n.*, भरण्यभुक्.

HIRED, *p. p.* आनिरूपितकालाद् वेतनेन गृहीतः -ता -तं, भृतः -ता -तं, कृतवेतनः -ना -नं, प्रकल्पितवेतनः -ना -नं, भाटकितः -ता -तं, भाटकीयः -या -यं; 'hired labourer,' भृतकः, भृतिभुक् *m.* (ज्); 'teacher,' भृतकाध्यापकः.

HIRELING, *s.* भृतकः, भृतिभुक् *m.* (ज्), भरण्यभुक् *m.*, भृत्यः, वैतनिकः, वेतनार्थी *m.* (न्), वस्त्रिकः, कर्म्मकरः.

HIRER, *s.* भृतिदाता *m.* (तृ), वेतनदाता *m.* (तृ), मूल्यदाता *m.*

HIRSUTE, *a.* प्रचुरलोमा -मा -म (न्), बहुलोमा -मा -म (न्), लोमशः -शा -शं.

HIS, *pron. poss.* तस्य gen. c. (तद्), अस्य gen. c. (इदं), तदीयः -या -यं or expressed by स्व in comp.; as, 'his house,' स्वगृहं.

To HISS, *v. a.* and *n.* (As a serpent, &c.) सर्पवत् श्वस् (c. 2. श्वसिति -तुं), सर्पनादं कृ, सर्पशब्दं कृ, सीत्कारं कृ, शीशशब्दं कृ.—(Hiss off, show disapprobation by hissing) ककैशशब्देन अप्रसादं सूच् (c. 10. सूचयति -यितुं) or अवज्ञास्पदं कृ.

HISS, HISSING, *s.* श्वासः, सर्पश्वासः, सर्पनादः, सर्पशब्दः, ककैशशब्दः, सीत्कारः, सीत्कृतं, शीशशब्दः, ककैशशब्देन अप्रसादसूचनं.

HIST, *adv.* तूष्णीं भव, मौनीभव, निःशब्दो भव, वाचं यम.

HISTORIAN, *s.* ऐतिहासिकः, इतिहासरचकः, इतिहासलेखकः, पुरावृत्तरचकः, वृत्तरचकः, भूतरचकः, पुराभूतलेखकः, पुरारचकः, पुराणोपाख्यानरचकः, शिष्टसमाचाररचकः, चरित्रलेखकः.

HISTORIC, HISTORICAL, *a.* ऐतिहासिकः -की -कं, इतिहासविषयः -या -यं, इतिहाससम्बन्धी -न्धिनी -न्धि (न्), पुरावृत्तविषयः -या -यं, वृत्तरचनासम्बन्धी &c., शिष्टसमाचारसम्बन्धी &c., पौराणिकः -की -कं.

HISTORICALLY, *adv.* इतिहासक्रमेण, इतिहासानुसारेण, पुराणोपाख्यानक्रमेण.

To HISTORIFY, *v. a.* इतिहासं लिख् (c. 6. लिखति, लेखितुं) or रच् (c. 10. रचयति -यितुं). पुरावृत्तानि रच्.

HISTORIOGRAPHER, *s.* इतिहासरचकः, इतिहासलेखकः, पुराणोपाख्यानरचकः, पुरावृत्तरचकः.

HISTORY, *s.* इतिहासः, पुरावृत्तं, उपाख्यानं, पुराणोपाख्यानं, पुरावृत्तोपाख्यानं, शिष्टसमाचारः, उदन्तः; 'writing of history,' इतिहासरचना, पुरावृत्तरचना, पुराभूतविचरणं, शिष्टसमाचारविरचना, उपाख्यानरचना, चरित्रलिखनं.

HISTRIONIC, HISTRIONICAL, *a.* नाटकीयः -या -यं, नाट्यसम्बन्धी -न्धिनी -न्धि (न्), रङ्गसम्बन्धी &c., रङ्गयोग्यः -ग्या -ग्यं, नाट्यशालायोग्यः -ग्या -ग्यं.

HIT, *s.* (Blow, stroke) आघातः, घातः, अभिघातः, प्रहारः, क्षतिः *f.*, आहतिः *f.*, ताडनं, पातः.—(Chance) दैवं, सङ्गतिः *f.*; 'good hit,' सुदैवं, शुभगतिः *f.*, सौभाग्यं, सम्यद् *f.*

To HIT, *v. a.* ताड् (c. 10. ताडयति -यितुं), क्षितड्, प्रह (c. 1. -हरति -हर्तुं), हन् (c. 2. हन्ति -न्तुं), अभिहन्, निहन्, विहन्, आहन्, समाहन्, अभ्याहन्, तुद् (c. 6. तुदति -ते, तोत्तुं), आतुद्, वितुद्, व्यध् (c. 4. विध्यति -ते, व्यद्धुं), प्रतिव्यध्; 'to hit the mark,' लक्षं व्यध्.—(Attain) आप् (c. 5. -आप्नोति -आप्तुं), गम् (c. 1. गच्छति, गन्तुं), या (c. 2. याति -तुं), इ (c. 2. एति -तुं), स्पृश् (c. 6. स्पृशति, स्प्रष्टुं), आविश् (c. 6. -विशति -वेष्टुं); 'to hit upon,' आसद् (c. 10. -सादयति -यितुं), उपगम्, उपागम्.

To HIT, *v. n.* (Clash) परस्परं सङ्घट् (c. 1. -घट्टते -ट्टितुं), परस्परसमाघातं कृ.—(Succeed) सिध् (c. 4. सिध्यति, सेद्धुं), सम्यद् (c. 4. -यद्यते -यत्तुं).

HIT, *p. p.* ताडितः -ता -तं, हतः -ता -तं, आहतः -ता -तं, समाहतः -ता -तं, अभिहतः -ता -तं, प्रहृतः -ता -तं; 'hit upon,' आसादितः -ता -तं, विहितः -ता -तं; 'hit off,' उपपन्नः -न्ना -न्नं.

To HITCH, *v. n.* (Lay hold) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), धृ (c. 1. धरति, धर्तुं), अनुबन्ध् (c. 9. -बध्नाति -बन्धुं), आकृष् (c. 1. -कर्षति -क्रष्टुं).—(Be caught, held) धृतः -ता -तं भू, रुद्धः -द्धा -द्धं भू, बन्ध् in pass. (बध्यते), अनुबन्ध्, बद्धः -द्धा -द्धं भू, सम्भितः -ता -तं भू.

HITHE, *s.* घट्टः, उमः, गुल्फः, तरस्थानं, उत्तरणस्थानं.

HITHER, *adv.* इतस्, अत्र, इह, इहस्थाने, अस्मिन् देशे; 'come hither,' उपैहि, इत इतस्; 'hither and thither,' इतस्ततस्, इतश्चेतस्.

HITHER, *a.* ऐहिकः -की -कं, ऐहस्थानिकः -की -कं, उपस्थः -स्था -स्थं, उपगः -गा -गं, आसन्नतरः -रा -रं, नेदीयान् -यसी -यः (स्).

HITHERMOST, *s.* आसन्नतमः -मा -मं, समीपतमः -मा -मं, निकटस्थः -स्था -स्थं, सन्निहितः -ता -तं, अन्तिकः -का -कं, उपस्थः -स्था -स्थं, नेदिष्ठः -ष्ठा -ष्ठं.

HITHERTO, *adv.* अद्य यावत्, अद्यपर्य्यन्तं, तत्कालपर्य्यन्तं, एतत्कालपर्य्यन्तं, वर्त्तमानकालपर्य्यन्तं, आवर्त्तमानकालात्, तत्क्षणपर्य्यन्तं, एतत्क्षणपर्य्यन्तं, अद्यावधि.

HITHERWARD, *adv.* इतस्, इह, अत्र, इहस्थानं प्रति.

HIVE, *s.* मधुकोषः, करकः, क्षुपकः, चषालः, मधुमक्षिकागारः, मधुकरवासः, मधुकरालयः, मधुकरपोषणस्थानं.

To HIVE, *v. a.* मधुकोषे निविश् (c. 10. -वेशयति -यितुं), करकं (nom. करकयति -यितुं).

To HIVE, *v. n.* मधुकोषं निविश् (c. 6. -विशति, वेष्टुं), सङ्घशः करकं निविश्.

HO, HOA, *interj.* हो, अहो, हूहो, हैं, हे, हौ, होहौ, हे, अरे, अरेरे.

HOAR, *a.* धवलः -ला -लं, शुक्लः -क्ला -क्लं, श्वेतः -ता -तं, शुभ्रः -भ्रा -भ्रं, गौरः -रा -री -रं, विशदः -दा -दं.

HOARD, *s.* अतिसञ्चयः, निभृतसञ्चयः, गूढसञ्चयः, सञ्चयः, निचयः, चयः, प्रचयः, समुच्चयः, समुदायः, सङ्घातः, सञ्चयः, पुञ्जः, पूगः, गणः, समूहः, संहारः, सङ्ग्रहः, समाहारः, निर्हारः, निधानं, निधिः *m.*, राशिः *m.*; 'hoard of barbarians,' म्लेच्छगणः.

To HOARD, *v. a.* निभृतं सञ्चि (c. 5. -चिनोति -चेतुं) or समाचि, गूढसञ्चयं कृ, अतिसञ्चयं कृ, पुञ्जीकृ, राशीकृ.

HOARDED, *p. p.* सञ्चितः -ता -तं, समाचितः -ता -तं, पुञ्जीकृतः -ता -तं.

HOARDER, *s.* सञ्चयी *m.* (न्), अतिसञ्चयकारी *m.* (न्), गूढचयकारी *m.*

HOAR-FROST, *s.* नीहारः, तुषारः, तुषारकणः, प्रालेयं, हिमं, हिमानी, हैमं, तुहिनं, खजलं, खवाष्पः.

HOARINESS, *s.* धावल्यं, धवलता, शुक्लता, गौरता, वेशद्यं, शुक्लिमा *m.* (न्); 'of the hair,' केशधावल्यं, केशशुक्लता, केशपक्वता, पलितं, पलितत्वं.

HOARSE, *a.* रूक्षस्वरः -रा -रं, रूक्षाभिभाषी -षिणी -षि (न्), स्वरभग्नः -ग्ना -ग्नं, भग्नस्वरः -रा -रं, गम्भीरस्वरः -रा -रं, कक्षः -क्षा -क्षं.

HOARSELY, *adv.* रूक्षस्वरेण, गम्भीरस्वरेण, भग्नस्वरेण, रूक्षं, गभीरं.

HOARSENESS, *s.* स्वररूक्षता, स्वरगम्भीरता, स्वरभङ्गः, स्वरभग्नता, स्वरभेदः, कक्षत्वं -ता.

HOARY, *a.* शुक्लः -क्ला -क्लं, धवलः -ला -लं, श्वेतः -ता -तं, गौरः -रा -री -रं, शुभ्रः -भ्रा -भ्रं, विशदः -दा -दं.—(Gray-haired) पलितः -ता -लिन्नी -तं, पलितकेशः -शी -शं, शुक्लकेशः -शी -शं, धवलकेशः -शी -शं, पक्वकेशः -शी -शं.

HOAX, *s.* वञ्चनं -ना, प्रवञ्चना, छद्म *n.* (न्), कपटः -टं, प्रलारणं -णा.

To HOAX, *v. a.* वञ्च् (c. 10. वञ्चयते -ति -यितुं), प्रवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), छल् (c. 10. छलयति -यितुं), प्रतृ, c. 10. (-तारयति -यितुं), अपदिश् (c. 6. -दिशति -देष्टुं).

HOAXED, *p. p.* वञ्चितः -ता -तं, विप्रलब्धः -ब्धा -ब्धं, मोहितः -ता -तं.

HOB, *s.* (A clown) वृषलः, ग्राम्यजनः, प्राकृतजनः, जानपदः.

To HOBBLE, *v. n.* (Limp) खञ्ज् (c. 1. खञ्जति -ञ्जितुं), लङ्ग् (c. 1. लङ्गति -ङ्गितुं), वङ्ग् (c. 1. वङ्गति -ङ्गितुं), खोर् (c. 1. खोरति -रितुं), खोल् (c. 1. खोलति -लितुं), खोड् (c. 1. खोडति -डितुं), खोद् (c. 1. खोदति -दितुं), गतिविकलः -ला -लं भू.

HOBBLE *s.* (Limping) लङ्गः, खञ्जता, पङ्गुता.—(Evil plight) दुर्दशा.

HOBBLER, *s.* खञ्जः, लङ्गगतिः, लङ्गगामी *m.* (न्), गतिविकलः.

HOBBLING, *s.* खञ्जत्वं, पङ्गुता, खोरता, लङ्गः, गतिवैकल्यं.

HOBBLINGLY, *adv.* खञ्जवत्, पङ्गुवत्, खोरवत्, लङ्गगत्या.

HOBBY, *s.* (Species of hawk) श्येनभेदः, उल्कोशभेदः.—(Fancy) छन्दस् *n.*, चापलं, बुद्धिचापल्यं, निर्बन्धः, लहरी, असद्दृष्टिः *m.*, रुचिः *f.*, अभिरुचिः *f.*, मनोरथः, प्रियद्रव्यं, प्रियवस्तु *n.*—(A stupid fellow) मूढः, मूर्खः, जडः, स्थूलजनः.

HOBBY-HORSE, *s.* क्रीडामृगः, क्रीडाश्वः, चर्ममृगः, क्रीडनकं, क्रीडाद्रव्यं.

HOBGOBLIN, *s.* राक्षिचरः, रात्रिचरः, रजनीचरः, क्षपदाचरः, नक्तचरः -चारी *m.* (न्), निशाटः, भूतः, वेतालः, प्रेतः, पिशाचः, राक्षसः, असुरः, क्रव्याद् *m.*, कर्बुरः, अपदेवता.

HOBNAIL, *s.* अश्वपादुकाकीलः, अश्वपादुकाशङ्कुः *m.*, वृहत्कीलः.

HOBSON'S CHOICE, *s.* विकल्पाभावः, अधिकल्पः, विकल्पं विना.

HOCK, *s.* (Kind of wine) मद्यविशेषः.—(Of quadrupeds) चतुष्पदानां पश्चिमजङ्घामा मध्यसन्धिः or अरन्तिरूपः सन्धिः.

To HOCK, *v. a.* पूर्वोक्तसन्धिशिरां छिद् (*c.* 7. छिनत्ति, छेत्तुं), पश्चिमजङ्घा-शिरां छिद्.

HOCUS-POCUS, *s.* तन्त्रमन्त्रं, माया, कुहकः, जालं, मूलकर्म्म *n.* (न्).

HOD, *s.* लेपकारिभिः स्कन्धेन धृतं काष्ठमयं लेपपात्रं, लेपाधारः, विलेपभाजनं.

HODGE-PODGE, *s.* सन्निपातः, प्रकीर्णकं, सङ्कीर्णकं, नानाद्रव्यसमूहः.

HODIERNAL, *a.* अद्यतनः -नी -नं, वर्त्तमानदिवसीयः -या -यं.

HOE, *s.* खनित्रं, खार्त्रं, खड्गः, खड्गधनः, खड्गघातः, खड्गहननं -नी, खड्गहा *m.* (न्), आखनः -निकः, आखानं.

To HOE, *v. a.* खनित्रेण खन् (*c.* 1. खनति -ते -नितुं), खात्रेण भूमिं भिद् (*c.* 7. भिनत्ति, भेत्तुं) or दृ (*c.* 10. दारयति -यितुं), खनित्रेण कण्डान् उद्धृ (*c.* 1. -हरति -हर्त्तुं) or उत्खन्.

HOG, *s.* शूकरः, सूकरः, वराहः, क्रोडः, दंष्ट्री *m.* (न्), वक्रदंष्ट्रः, चक्रदंष्ट्रः, चक्रदः, चक्रमुखः, पोत्री *m.* (न्), स्थूलनासः, दीर्घरदः, मुसलाङ्गुलः, भूदारः, किरः, किरिः *m.*, किटिः *m.*, बहुप्रजः, बहुपात्रः, घृष्टिः *m.*, गृष्टिः *m.*, घोणी *m.* (न्), खड्गरोमा *m.* (न्), क्रोडः; 'village hog,' ग्राम्यः, विट्चरः.

HOG-HERD, *s.* शूकरपालः -लकः, शूकरपोषकः, वराहरक्षी *m.* (न्).

HOGGISH, *a.* शूकरीयः -या -यं, सौकरः -री -रं, वाराहः -ही -हं, शूकरोपमः -मा -मं, शूकरसगुणः -णा -णं, वराहसगुणः -णा -णं.

HOGGISHNESS, *s.* शूकरीयता, सौकर्य्यं, शौकर्य्यं, पशुत्वं, अतिलोभः.

HOGO, *s.* अतिस्वादः, तीक्ष्णस्वादः, सूक्ष्मस्वादः.

HOGSHEAD, *s.* द्रवद्रव्याणां परिमाणविशेषः.

HOGSTY, *s.* शूकरस्थानं, शूकरालयः, शूकरगृहं, शूकरवासः.

HOGWASH, *s.* शूकरखाद्यं भुक्तावशेषं or उच्छिष्टान्नं.

HOGWEED, *s.* पुनर्नवा, शोथघ्नी.

HOIDEN, *s.* प्रगल्भा स्त्री, निर्लज्जा स्त्री, पुंश्चली, स्वैरिणी, बन्धकी, असभ्या स्त्री, ग्रामिणी.

To HOIDEN, *v. n.* पूर्वोक्ता स्त्री यत्नकारेण तत्नकारेण चर् (*c.* 1. चरति -रितुं) or आचर् or वृत् (*c.* 1. वर्त्तते -र्त्तितुं).

To HOIST, *v. a.* उच्चुल् (*c.* 10. -लोलयति -यितुं), तुल्, उद्धृ (*c.* 1. -हरति -हर्त्तुं), उन्नी (*c.* 1. -नयति -नेतुं), उद्गद् (*c.* 10. -घाटयति -यितुं), उच्छ्रि (*c.* 1. -श्रयति -यितुं, rt. श्रि), उद्यम् (*c.* 1. -यच्छति -यन्तुं), उत्था in caus. (-थापयति -यितुं, rt. स्था), उच्चीकृ, ऊर्द्धीकृ.

HOISTED, *p.p.* उच्चोलितः -ता -तं, उद्धृतः -ता -तं, उच्छ्रितः -ता -तं, उद्गर्हितः -ता -तं, उद्गाहितः -ता -तं, उद्घाटितः -ता -तं, उद्यतः -ता -तं.

To HOLD, *v. a.* (Keep) धृ (*c.* 1. धरति, धर्त्तुं, *c.* 10. धारयति -यितुं), धा (*c.* 3. दधाति, धत्ते, धातुं), रक्ष् (*c.* 1. रक्षति -क्षितुं); 'hold in the hand,' हस्तेन धृ.—(Maintain) भृ (*c.* 1. भरति, *c.* 3. बिभर्त्ति, भर्त्तुं), धृ, सन्धृ, पाल् (*c.* 10. पालयति -यितुं); 'hold an opinion,' मतं धृ (*c.* 10. धार-यति), मतम् अवलम्ब् (*c.* 1. -लम्बते -म्बितुं) or समालम्ब्.—(Possess) धा (*c.* 3. दधाति, धत्ते, धातुं), विधा, आधा, भृ, धृ (*c.* 10.), शील् (*c.* 10. शीलयति -यितुं), आप् (*c.* 5. आप्नोति, आप्तुं).—(Esteem) मन् (*c.* 4. मन्यते, मन्तुं); 'hold in high estimation,' बहु मन्; 'hold in contempt,' अवमन्, तृणाय मन्, लघूकृ, तुच्छीकृ, कदर्थीकृ.—(Detain) धृ, सन्धृ, रुध् (*c.* 7. रुणद्धि, रोद्धुं), निरुध्, अवरुध्.—(Hold in confinement) कारायां निरुध् or बन्ध् (*c.* 9. बध्नाति, बन्धुं) or धृ.—(Hold back, withhold) निवृ (*c.* 10. -वारयति -यितुं), नियह् (*c.* 9. -गृह्णाति -ग्रहीतुं), विनियह्, सन्नियह्, उपसंह् (*c.* 1. -हरति -हर्त्तुं), संह्, विधृ.—(Contain) धा, आधा, धृ, भृ, आदा (*c.* 3. -ददाति -दत्ते -दातुं), ग्रह्, परिग्रह्; 'room to hold all,' सर्वेषां धारणे स्थानं.—(Take hold, lay hold) ग्रह्, परिग्रह्, सङ्ग्रह्, हस्तेन ग्रह्, भृ, हस्तेन धृ, परामृश् (*c.* 6. -मृशति -मर्षुं), हस्तेन अवलम्ब् (*c.* 1. -लम्बते -म्बितुं) or समालम्ब्.—(Celebrate as a festival) सेव् (*c.* 1. सेवते -वितुं), विधिवत् कृ, यथाविधि अनुष्ठा (*c.* 1. -तिष्ठति -ष्ठातुं) or पाल्.—(Carry on, perform) कृ, विधा, सम्यद् (*c.* 10. -पादयति -यितुं), निर्वह् (*c.* 10. -वाहयति -यितुं), अनुष्ठा.—(Hold out, extend) प्रसृ (*c.* 10. -सारयति -यितुं), प्रयह्.—(Hold out, offer) प्रयम् (*c.* 1. -यच्छति -यन्तुं), उपनी (*c.* 1. -नयति -नेतुं), उपन्यस् (*c.* 4. -अस्यति -असितुं), उपस्था in caus. (-स्थापयति -यितुं), उपह्.—(Hold up, raise aloft) उच्चीकृ, उच्चैः कृ, ऊर्द्धीकृ, उद्यम् (*c.* 10. -नमयति -यितुं), उच्छ्रि (*c.* 1. -श्रयति -यितुं), उद्यम्.—(Hold up, sustain) धृ, सन्धृ, आलम्ब् (*c.* 1. -लम्बते, *c.* 10. -लम्बयति -यितुं), अवलम्ब्, समवलम्ब्, उत्तम्भ् (*c.* 10. -तम्भयति -यितुं, rt. स्तम्भ्), भृ.—(Hold one's tongue) जिह्वां रक्ष् or धृ.

To HOLD, *v. n.* (Stand, remain firm) स्था (*c.* 1. तिष्ठति, स्थातुं), स्थिरीभू.—(Last, endure) स्था, संस्था, चिरस्थायी -यिनी -यि भू, ध्रुवीभू.—(Refrain) आत्मानं संयम् (*c.* 1. -यच्छति -यन्तुं), आत्मानं यम्, विरम् (*c.* 1. -रमति -रन्तुं) with abl. c., निवृत् (*c.* 1. -वर्त्तते -र्त्तितुं) with abl. c., परिह् (*c.* 1. -हरति -हर्त्तुं), संह्.—(Adhere) अनुबन्ध् (*c.* 9. -बध्नाति -बन्धुं or in pass. -बध्यते), अनुलग्नीभू, संलग्नीभू, अवलम्ब् (*c.* 1. -लम्बते -म्बितुं), अवलग्नी -ग्निनी -ग्नि भू.—(Be dependent on) अधीनः -ना -नं भू, आश्रितः -ता -तं भू, अवलम्ब्.—(Hold off) विलम्ब्.—(Hold on) संस्था, पर्यवस्था, निर्बन्धं कृ.—(Hold out, resist) चिरेण सह् (*c.* 1. सहते, सोढुं), चिरकालेन प्रतिकृ.—(Hold together) संलग्नीभू, सलग्न् in pass. (-ग्यते).

HOLD, *s.* (Act of holding) धृतिः *f.*, धरणं, धारणं, ग्रहणं, आग्रहः, सङ्ग्राहः.—(Taking hold) ग्रहणं, सङ्ग्रहणं, सङ्ग्राहः, ग्रहः, हस्तेन ग्रहणं, हस्तेन धृतिः *f.* or धरणं; 'letting go the hold,' मुक्तहस्तः -स्ता -स्तं.—(Place of holding) धारङ्गः.—(Place of custody) कारा, कारागारं, बन्धनस्थानं, निरोधस्थानं, गुप्तिः *f.*—(Fortified place) दुर्गं, कोटिः *f.*—(Support) आलम्बः -म्बनं, अवलम्बनं, धारणं, आधारः, उपस्तम्भः, आग्रहः, सङ्ग्रहः.—(Influence) अधिकारः, भारः, गौरवं, वशः -शं.—(Hold of a ship) गुप्तिः *f.*, नौगुप्तिः *f.*, नौकोदरं, नौकाधोभागः.

HOLDER, *s.* धारी *m.* (न्), धारकः, धरः, धारणकर्त्ता *m.* (र्त्तृ), धारयः, ग्राहकः, ग्राही *m.* (न्).

HOLDFAST, *s.* (Any thing that takes hold) ग्राहकः -कं, ग्रहणीं, धरः -री -रं, बन्धनी, कुडुपः.—(Parsimonious man) दृढमुष्टिः *m.*, गाढमुष्टिः *m.*, बद्धमुष्टिः *m.*, अमुक्तहस्तः.

HOLDING, *s.* धरणं, धारणं, ग्रहणं, आधानं, आदानं, रक्षणं.

HOLDING, *part.* धारी -रिणी -रि (न्), धारयन् -यन्ती -यत् (न्), धरः -रा -री -रं, आददानः -ना -नं, आदधानः -ना -नं; 'holding' may be expressed by हस्त in comp.; as, 'holding a stick,' दण्डहस्तः -स्ता -स्तं; 'holding a sword,' खड्गहस्तः -स्ता -स्तं.

HOLE, *s.* विवरं, बिलं, गर्त्तः, रन्ध्रं, छिद्रं, कुहरं, शुषिरं, शुषिः *f.* -षी, कूपः, अवटः -टिः *m.*, गुहा, विरोकं, रोकं, रुहकं, रोपं, सङ्कुः *m.*, मकरः, भूकं, दूकं, निर्व्यथनं.—(Cave) गह्वरं, कन्दरः -रां, दरी, खातं, निर्दरिः *m.*, गुहा, शैलरन्ध्रं.—(Of a beast) आभं, विवरं; 'of a serpent,' सर्पविवरं; 'rat-hole,' मूषिकाविवरं; 'full of holes,' अनेकरन्ध्रः -न्ध्रा -न्ध्रं, सरन्ध्रः &c., बहुविवरः -रा -रं, बहुबिलः -ला -लं; 'one who picks holes in the character of others,' छिद्रान्वेषी -षिणी -षि (न्), छिद्रानुसारी -रिणी -रि (न्).

HOLIDAY, *s.* *See* HOLYDAY.

HOLILY, *adv.* पुण्यं, पुण्यवत्, पुण्यशीलवत्, पवित्रं, पवित्रवत्, धर्म्मशी-

लवत्, शुचिवत्, शौचेन.

HOLINESS, *s.* पुण्यता -त्वं, पुण्यशीलता, पवित्रता -त्वं, शुचिता -त्वं, शौचं, धर्म्मशीलता, साधुत्वं -ता, धर्म्मत्वं -ता, देवभक्तिः *f.*, पुण्यवत्त्वं, ब्रह्मवर्च्चसं, ब्रह्मण्यता, वृत्ताध्ययनर्द्धिः *f.*; 'his holiness,' भगवान् *m.* (त्).

HOLLO, *interj.* भो, भोः, भोस्, भोभो, हलहला, हे, है, अहो, हं, हंहो.

To HOLLO, *v. n.* हे, है, भो, हलहला इत्यादिशब्दान् कृ or इत्यादिशब्दैर् दूरस्थजनम् आह्वे (c. 1. -ह्वयति -ह्वातुं), उच्चैःस्वरेण दूरस्थं कञ्चिज्जनम् आह्वे, हलहला (nom. हलहलायते).

HOLLAND, *s.* (Country) हल्लण्डसंज्ञको देशः.

HOLLANDER, *s.* हल्लण्डीयः, हल्लण्डीयजनः, हल्लण्डदेशजः.

HOLLANDS, *s.* (Spirits) शुण्डा, सुरा -री, वारुणी, हाला.

HOLLOW, *a.* (Empty within) शून्यः -न्या -न्यं, शून्यमध्यः -ध्या -ध्यं, शून्यगर्भः -र्भा -र्भं, शून्योदरः -रा -रं, शुषिरः -रा -रं, रिक्तमध्यः -ध्या -ध्यं, रिक्तगर्भः -र्भा -र्भं, उत्तानः -ना -नं, वितानः -ना -नं, पुटाकारः -रा -रं, गर्भाकारः -रा -रं, उदराकृतिः -तिः -ति.—(In sound) मन्दः -न्दा -न्दं, मन्थरः -रा -रं, मन्द्रः -न्द्रा -न्द्रं, गभीरः -रा -रं, गम्भीरः -रा -रं.—(Worthless, unsubstantial) निःसारः -रा -रं, असारः -रा -रं, सारहीनः -ना -नं, निःसत्त्वः -त्त्वा -त्त्वं.—(Vain) मोघः -घा -घं, निरर्थकः -का -कं.—(False) असत्यः -त्या -त्यं, निःसत्यः -त्या -त्यं, वितथः -था -थं, कृत्रिमः -मा -मं, मिथ्या in comp.; 'a hollow reed,' शून्या.

HOLLOW, *s.* (Cavity, hole) विवरं, बिलं, कुहरं, गर्त्तः, कोष्ठः, शुषिरं, शून्यः, अवटः -टिः *m.*, कूपः, गुहा.—(Inner part) गर्भः, उदरं, अभ्यन्तरं, क्रोडं.—(Hollow ground) दरा -री, दरीभूः *f.*, कन्दरः -री, निम्नभूमिः *f.*, द्रोणी, अद्रिद्रोणी.—(Excavation) खातं, खातभूः *f.*—(Natural hollow) देवखातं.—(Cavern) गह्वरं, कन्दरः, गुहा, कुहरं.—(Canal) कुल्या, प्रणाली, सारणिः *f.*—(Hollow of a tree) कोटरः -रं, वृक्षभवनं, तरुक्रोडं, प्रान्तरं, निर्गूढः, चत्वालः, निष्कुहः; 'hollow of the hand,' पुटः, पुटितं, करकोषः; 'hollow of the ear,' ऋषभः; 'hollow of the loins,' गर्त्तः, जघनकूपकौ *m.* du.; 'hollow of a boiler,' स्थालीबिलं.

To HOLLOW, *v. a.* शून्यीकृ, शुषिरीकृ, खन् (c. 1. खनति -ते -नितुं), उत्खन्, पुट् (c. 10. पुटयति -यितुं), पुटीकृ.

HOLLOWED, *p. p.* खातः -ता -तं, उत्खातः -ता -तं, पुटितः -ता -तं, शून्यीकृतः -ता -तं, शुषिरीकृतः -ता -तं.

HOLLOWNESS, *s.* शून्यता -त्वं, शुषिरता -त्वं, रिक्तता.—(Of sound) मन्दता, मन्द्रता, गभीरता, गम्भीरता -त्वं, गाम्भीर्य्यं.—(Worthlessness) निःसारता, असारता, मोघता, फल्गुता.—(Falsity) असत्यता, निःसत्यता, कृत्रिमता, कूटता, कापट्यं.

HOLLY, *s.* कण्टकितपत्रविशिष्टः सदाहरितो गुल्मभेदः.

HOLLYHOCK, *s.* नानावर्णपुष्पविशिष्ट ओषधिभेदः.

HOLM-OAK, *s.* चिरस्थायी महावृक्षभेदः.

HOLOCAUST, *s.* होमः, हुतं, हव्यं, हुतहोमं, आहुतं, आहवनीयं.

HOLPEN, *p. p.* उपकृतः -ता -तं, कृतोपकारः -रा -रं, कृतसाहाय्यः -य्या -य्यं.

HOLY, *a.* पुण्यः -ण्या -ण्यं, पुण्यवान् -वती -वत् (त्), पुण्यशीलः -ला -लं, पुण्यात्मा -त्मा -त्म (न्), पवित्रः -त्रा -त्रं, धर्म्मशीलः -ला -लं, शुचिः -चिः -चि, शुचिमनाः -नाः -नः (स्), शुचिव्रतः -ता -तं, विमलः -ला -लं, अमलात्मा -त्मा -त्म (न्), निर्म्मलाकरणः -णा -णं, शुद्धमतिः -तिः -ति, पवित्रमतिः -तिः -ति, शुद्धात्मा &c., शुद्धहृदयः -या -यं, धार्म्मिकः -की -कं, साधुः -धुः -ध्वी -धु; 'holy land,' पुण्यभूमिः *f.*, पुण्यभूः *f.*; 'holy writ,' श्रुतिः *f.*; 'holy place of pilgrimage,' तीर्थः -र्थं, पुण्यतीर्थं, क्षेत्रं, पुण्यस्थानं.

HOLYDAY, *s.* (Sacred day) पुण्याहं, पुण्यदिनं, पुण्यदिवसः.—(Festival) उत्सवः, उत्सवदिनं, पर्व्वाहः, उद्धर्षदिनं, आनन्ददिवसः, यात्रा, रासेरसः.—(Day on which there is intermission of study) अनध्यायः, अनध्यायदिवसः, अनध्यायमहोत्सवः, अस्वाध्यायतिथिः *m. f.*, विश्रामदिवसः; 'holyday folk,' यात्राजनः, यात्रालोकः.

HOLY-WATER, *s.* पुण्यजलं, पुण्योदकं, पुण्यासु *n.*, पुण्यवारि *n.*

HOMAGE, *s.* पूजा, प्रणामः, प्रणतिः *f.*, प्रणिपातः -पतनं, अर्च्चनं -ना, अर्च्चा, अभ्यर्च्चा, अभ्यर्च्चनं, नमस्कारः, मानं, सम्मानं, सत्कारः, पादवन्दनं, सेवा, सेवाञ्जलिः *m.*, आदरः, भक्तिः *f.*, प्रभुभक्तिः *f.*, प्रतीतिः *f.*, विनीतिः *f.*, उपासना, शेवं.

To HOMAGE, *v. a.* पूज् (c. 10. पूजयति -यितुं), सम्पूज्, अर्च् (c. 1. अर्च्चति -र्च्चितुं, c. 10. अर्च्चयति -यितुं), प्रणिपत् (c. 1. -पतति -तितुं), उपास् (c. 2. -आस्ते -आसितुं), प्रणम् (c. 1. -णमति -णन्तुं), सत्कृ; 'he paid homage,' प्रणतवान्.

HOMAGER, *s.* पूजकः, प्रणामकृत् *m.*, प्रणिपातकारी *m.* (न्), सम्मानकृत् *m.*

HOME, *s.* स्वगृहं, गृहं, स्वस्थानं, स्वदेशः, स्ववासः, स्वविषयः, स्वगेहः, स्ववेश्म *n.* (न्), निजगृहं, निजालयः, निजगेहः, स्वभवनं, स्वनिलयः; 'devoted to home,' गृहारूढचेताः -ताः -तः (स्).

HOME, *adv.* गृहं प्रति, स्वगृहं प्रति; 'he went home,' गृहं ययौ.—(Close) निकटे; 'speech that strikes home,' सङ्गतवाक्यं, हृदयङ्गमवाक्यं.

HOME-BORN, *a.* गृहजातः -ता -तं, स्वगृहजः -जा -जं, स्वदेशजः -जा -जं; 'home-born slave,' गृहजातो दासः, ज्ञातिदासः.

HOME-BRED, *a.* गृहजः -जा -जं, गृह्यः -ह्या -ह्यं, आन्तर्वेश्मिकः -की -कं.

HOME-FELT, *a.* अन्तरस्थः -स्था -स्थं, अन्तरतमः -मा -मं, अन्तर्भूतः -ता -तं.

HOMELESS, *a.* निरालयः -या -यं, निरास्पदः -दा -दं, निराश्रयः -या -यं.

HOMELINESS, *s.* ग्राम्यता, ग्रामीयत्वं, गृह्यता, असभ्यता, नीचता, अश्लीलता, अशुद्धत्वं, अशिष्टत्वं.

HOMELY, *a.* ग्राम्यः -म्या -म्यं, ग्रामिकः -की -कं, ग्रामीयः -या -यं, ग्रामीणः -णा -णं, गृह्यः -ह्या -ह्यं, गृहजः -जा -जं, प्राकृतः -ती -तं, असभ्यः -भ्या -भ्यं, अश्लीलः -ला -लं, नीचः -चा -चं, अधमः -मा -मं, अशुद्धः -द्धा -द्धं, अशिष्टः -ष्टा -ष्टं, असंस्कृतः -ता -तं, अपरिष्कृतः -ता -तं; 'homely speech,' ग्राम्यं.

HOMELY, *adv.* ग्राम्यं, ग्राम्यप्रकारेण, असभ्यं, नीचं, गृह्यतस्.

HOME-MADE, *a.* गृहनिर्म्मितः -ता -तं, गृहकृतः -ता -तं, गृहोत्पन्नः -न्ना -न्नं.

HOME-SPUN, *a.* गृहजातः -ता -तं, गृहजः -जा -जं, गृह्यः -ह्या -ह्यं.

HOME-STALL or HOME-STEAD, *s.* गृहं, वासस्थानं, वसतिः *f.*, आवासः.

HOMEWARD, *adv.* गृहं प्रति, स्ववासं प्रति, स्वस्थानं प्रति.

HOMICIDAL, *a.* नृहत्याकारी -रिणी -रि (न्), मनुष्यघाती -तिनी -ति (न्).

HOMICIDE, *s.* नृहत्या, मनुष्यहत्या, मनुष्यवधः, मनुष्यघातः.—(One who kills a man) नृहन्ता *m.* (न्तृ), मनुष्यघातकः.

HOMILY, *s.* पूजाशालासु श्रावणीयं धर्म्मविषयं वाक्यं.

HOMOGENEAL, HOMOGENEOUS, *a.* समानजातीयः -या -यं, सजातीयः -या -यं, समानजातिः -तिः -ति, सजातिः -तिः -ति, समभावः -वा -वं, समानभावः -वा -वं, समधर्म्मा -र्म्मा -र्म्म (न्), एकजातिः -तिः -ति, एकधर्म्मा &c., स्वभावीयः -या -यं.

HOMOGENEALNESS, HOMOGENEITY, HOMOGENEOUSNESS, *s.* समानजातिता, सजातिता, भावसमता, भावसमानता, जातिसमता.

HOMOLOGOUS, *a.* तुल्याकारः -रा -रं, तुल्यपरिमाणः -णा -णं, समपरिमाणः -णा -णं.

HOMONYMOUS, *a.* भिन्नार्थः -र्था -र्थं, सन्दिग्धार्थः -र्था -र्थं, [illegible]

समसंज्ञकः -का -कं, समनामा -मा -म (न्).

HOMONYMY, *s.* भिन्नार्थता, विभिन्नार्थता, अर्थभेदः, द्व्यर्थता, नामसमता.

HONE, *s.* शाणः -णी, शाणाश्म *n.* (न्), शानः, क्षुरधारातेजनप्रस्तरः.

HONEST, *a.* (Upright, just) सरलः -ला -लं, दक्षिणः -णा -णं, शुचिः -चिः -चि, न्यायाचारः -रा -रं, न्यायवर्त्ती -र्त्तिनी -र्त्ति (न्), न्याय्यः -य्या -य्यं, ऋजुः -जुः -जु, सच्चरितः -ता -तं, सात्त्विकः -की -कं, शुद्धमतिः -तिः -ति, शुद्धात्मा -त्मा -त्म (न्), अजिह्मः -ह्मा -ह्मं, अकुटिलः -ला -लं, अशठः -ठा -ठं, अशठधीः -धीः -धि, मायाहीनः -ना -नं, अमायः -या -यं -यिकः -की -कं, अकपटः -टा -टं, निष्कपटः -टा -टं, कपटहीनः -ना -नं, निर्व्याजः -जा -जं, विमलात्मा -त्मा -त्म (न्), निर्व्यलीकः -का -कं, अवक्रः -क्रा -क्रं, धार्म्मिकः -की -कं, दम्भरहितः -ता -तं, धर्म्मकारी -रिणी -रि (न्), भद्रः -द्रा -द्रं, साधुः -धुः -ध्वी -धु, सन् सती -सत् (त्), उत्तमः -मा -मं, सरलयायी -यिनी -यि (न्), श्लक्ष्णः -क्ष्णा -क्ष्णं, प्राञ्जलः -ला -लं, प्रगुणः -णा -णं.—(True) सत्यः -त्या -त्यं, सत्यकः -का -कं, सत्यशीलः -ला -लं, सत्यवृत्तः -त्ता -त्तं, सत्यवादी -दिनी -दि (न्).

HONESTLY, *adv.* सरलं, सारल्येन, न्यायेन, न्यायतस्, न्याय्यं, निष्कपटं, कपटं विना, निर्व्याजं, निर्व्यलीकं, अमायया, मायां विना, सरलवत्, शुचिवत्, अजिह्मं, सदाक्षिण्यं.

HONESTY, *s.* सारल्यं, सरलता, दाक्षिण्यं, शुचिता -त्वं, ऋजुता, आर्जवं, अमाया, मायाहीनता, अकपटः, अकापट्यं, कपटहीनता, अव्याजः, न्यायिता, न्यायाचारता, अजिह्मता, अकौटिल्यं, अशठता, निर्व्यलीकता, अवक्रता, अस्तेयं, अपैशुनं, भद्रता, साधुता, शुद्धत्वं, धार्म्मिकत्वं, सत्यता, सत्यशीलता, सत्यवादित्वं, नैर्मल्यं, विमलता, अदत्तानुपादानं.

HONEY, *s.* मधु *n.*, क्षौद्रं, पुष्पनिर्यासः, पुष्परसः, पुष्पसारः, पुष्पासवं, कुसुमासवं, माक्षिकं, छात्रं -त्रकं, सारघं, कापिशायनं; 'honey of flowers,' सघं; 'become honey,' मधुसाद्भूतः -ता -तं.

To HONEY, *v. n.* मधुरवचोभिः or मधुरवाक्यैः सान्त्व् (c. 10. सान्त्वयति -यितुं).

HONEY-COMB, *s.* मधुकोषः, मधुवासः, मधुचक्रं, माक्षिकाश्रयं, मधुक्रमः, करण्डः.

HONEY-MOON, *s.* आनन्दमासः, विवाहात् परं प्रथममासो यस्मिन् स्त्रीपुरुषौ प्रेममात्रं कुरुतः.

HONEY-SUCKLE, *s.* सुरभिगन्धविशिष्टो लताविशेषः.

HONEY-SWEET, *a.* मधुरः -रा -रं, मधुवत् स्वादुः -दुः -द्वी -दु, मधुसात् ind.

HONEY-TONGUED, *a.* मधुरभाषी -षिणी -षि (न्), मधुरवादी -दिनी -दि (न्).

HONIED, *a.* मधुमान् -मती -मत् (त्), मधुमयः -यी -यं, मधुरः -रा -रं.

HONORARY, *a.* सम्मानकरः -रा -रं, मानदः -दा -दं, यशस्यः -स्या -स्यं, यशस्वी -स्विनी -स्वि (न्), कीर्त्तिकरः -रा -रं, यशस्करः.—(Conferring honour only, without gain) सम्मानमात्रदः -दा -दं, कीर्त्तिमात्रकरः -री -रं, अलाभकरः -री -रं.

HONOUR, *s.* (Fame, reputation) कीर्त्तिः *f.*, यशस् *n.*, ख्यातिः *f.*, सुख्यातिः *f.*, विख्यातिः *f.*, प्रतिष्ठा, विश्रुतिः *f.*, समाख्या, प्रतिपत्तिः *f.* —(Reverence) सम्मानं, मानं, पूजा, अर्चनं -ना, अर्चा, अभ्यर्चा -र्चनं, नमस्कारः, सेवा, अर्हा, अर्हणं -णा, आदरः, सम्भावना, सत्कारः, आराधनं, पुरस्कारः, सम्भ्रमः, श्लाघा.—(Dignity, honourable rank) उत्कर्षः, उत्कृष्टता, उत्कृष्टपदं, कुलीनपदं, प्रतिपत्तिः *f.*, प्रधानपदं, प्रधानता, प्राधान्यं, श्रेष्ठत्वं, उन्नतिः *f.*, मर्य्यादा, अभिजातता, पूज्यता, मान्यता -त्वं, अभ्यर्हणीयता.—(Family honour) मर्य्यादा, कुलमर्य्यादा.

To HONOUR, *v. a.* पूज् (c. 10. पूजयति -यितुं), सम्पूज्, अभिपूज्, मन् (c. 10. मानयति -यितुं), सम्मन्, प्रतिमन्, अर्च् (c. 1. अर्चति -र्चितुं, c. 10. अर्चयति -यितुं), अभ्यर्च्, समभ्यर्च्, समर्च्, सेव् (c. 1. सेवते -वितुं, c. 10. सेवयति -यितुं), अर्ह् (c. 10. अर्हयति -यितुं), सम्भू (c. 10. -भावयति -यितुं), आदृ (c. 6. -द्रियते -दर्त्तुं), नमस्कृ, सत्कृ, पुरस्कृ, आराध् (c. 10. -राधयति -यितुं), श्रु in des. (शुश्रूषते -षितुं), अञ्च् (c. 1. अञ्चति -ञ्चितुं), मह् (c. 1. महति -हितुं), अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), पूजां कृ, सम्मानं कृ.—(Accept a bill) लेख्यपत्रं ग्रह् or स्वीकृ or आदृ.

HONOURABLE, *a.* पूज्यः -ज्या -ज्यं, पूजनीयः -या -यं, पूजयितव्यः -व्या -व्यं, सम्पूजनीयः -या -यं, सम्मान्यः -न्या -न्यं, मान्यः -न्या -न्यं, मानी -निनी -नि (न्), पूजार्हः -र्हा -र्हं, अर्चार्हः -र्हा -र्हं, अर्ह्यः -र्ह्या -र्ह्यं, अर्हणीयः -या -यं, श्लाघ्यः -घ्या -घ्यं, आदरणीयः -या -यं, पुरस्करणीयः -या -यं, मर्य्यादावान् -वती -वत् (त्), मर्य्यादान्वितः -ता -तं.—(Illustrious) ख्यातः -ता -तं, सुख्यातः -ता -तं, यशस्वी -स्विनी -स्वि (न्), महायशाः -शाः -शः (स्), कीर्त्तिमान् -मती -मत् (त्), प्रतिपत्तिमान् -मती -मत् (त्), विश्रुतः -ता -तं, प्रसिद्धः -द्धा -द्धं.—(Conferring honour) कीर्त्तिकरः -री -रं, यशस्करः -री -रं, यशस्यः -स्या -स्यं.—(Upright, equitable) सच्चरितः -ता -तं, न्यायाचारः -रा -रं, धार्म्मिकः -की -कं, शुचिः -चिः -चि, दक्षिणः -णा -णं, सात्त्विकः -की -कं, शुद्धात्मा -त्मा -त्म (न्), निर्व्यलीकः -का -कं, निष्कपटः -टा -टं, विमलात्मा -त्मा -त्म (न्), अवक्रः -क्रा -क्रं, ऋजुः -जुः -जु, साधुः -धुः -ध्वी -धु.—(Noble) कुलीनः -ना -नं, उदारः -रा -रं, उदारचेताः -ताः -तः (स्).

HONOURABLY, *adv.* समानं, सम्मानपूर्व्वं, शुचिवत्, धार्म्मिकवत्, साधुवत्, उदारवत्, सौदार्य्यं, सत्कारपूर्व्वं, नमस्कारपूर्व्वं, श्लाघ्यप्रकारेण, सुकीर्त्तिपूर्व्वं, सुयशसा, निर्व्यलीकं, सम्पूजनीयं.

HONOURED, *p. p.* पूजितः -ता -तं, सम्पूजितः -ता -तं, अर्चितः -ता -तं, अभ्यर्चितः -ता -तं, सम्मानितः -ता -तं, पुरस्कृतः -ता -तं, सेवितः -ता -तं, अर्हितः -ता -तं, सेव्यमानः -ना -नं, निषेव्यमाणः -णा -णं, आदृतः -ता -तं, अञ्चितः -ता -तं, सत्कृतः -ता -तं, महितः -ता -तं, आराधितः -ता -तं, शुश्रूषितः -ता -तं, अनिन्दितः -ता -तं.—(Accepted as a bill) गृहीतः -ता -तं, स्वीकृतः -ता -तं, आदृतः -ता -तं; 'to be honoured,' पूज् in pass. (पूज्यते), मह (nom. महीयते).

HOOD, *s.* स्त्रीवस्त्रानुबद्धं मस्तकाच्छादनं or मस्तकावरणं or मस्तकपिधानं, फणाकारं मस्तकाच्छादनं, शिरस्कं, शिरस्त्रं -स्त्राणं, शिरोवस्त्रं; 'of a snake,' फणः -णा -णं, भोगः, स्फोटा.

To HOOD, *v. a.* पूर्व्वोक्तपिधानेन मस्तकम् आछद् (c. 10. -छादयति -यितुं), मस्तकावरणेन पिधा (c. 3. -दधाति -धातुं).

To HOODWINK, *v. a.* चक्षुषी वस्त्रेण रुध् (c. 7. रुणद्धि, रोद्धुं), नयने पिधानेन आवृ (c. 5. -वृणोति -वरितुं -रीतुं) or आछद् (c. 10. -छादयति -यितुं), नयनरोधं कृ.

HOOF, *s.* खुरः, क्षुरः, शफः -फं, वर्त्तकः -का, निघृष्वः, पुटः, विक्लः, रिक्लः; 'hoof of a cow,' गोक्षुरं, गोष्पदं; 'mark of a hoof,' खुरपदवी, खुरचिह्नं.

HOOFED, *a.* खुरी -रिणी -रि (न्), क्षुरी -रिणी -रि (न्), खुरयुक्तः -क्ता -क्तं.

HOOK, *s.* (Any thing bent that catches hold) आकर्षी -र्षिणी, अङ्कुशः, आकर्षणार्थं वक्रयन्त्रं or वक्रलोहः, ग्रहणी, धरणी.—(Fish-hook) वडिशं -शा -शी, वरिशी, बलिशं -शी, मत्स्यवेधनं -नी.—(Hook for driving an elephant) अङ्कुशः -शं, अङ्कूषः -षं, शृणिः *f.*—(Bill-hook) दात्रं.

To HOOK, *v. a.* (Fish) वडिशेन मत्स्यान् व्यध् (c. 4. विध्यति, व्यद्धुं) or धृ (c. 1. धरति, धर्त्तुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or बन्ध् (c. 9. बध्नाति, बन्द्धुं), धरणं कृ, ग्रहणं कृ.

HOOKED, *a.* (Bent in the form of a hook) वक्रः -क्रा -क्रं, अङ्कुशाकारः -रा -रं, अङ्कुशी -शिनी -शि (न्), अनृजुः -जुः -जु, कुञ्चितः -ता -तं.

HOOP, *s.* (Any thing circular) चक्रं, चक्रवालं, वलयः -यं.—(For playing with) क्रीडाचक्रं, क्रीडावलयः.

To HOOP, *v. a.* (Bind with hoops) लोहवलयान् बन्ध् (c. 9. बध्नाति, बन्धुं), लोहचक्रादिभिर् युज् (c. 10. योजयति -यितुं).—(Shout out) धिक्कारं कृ, धिक्कारशब्दं कृ, उच्चैःस्वरेण उद्घुष् (c. 10. -घोषयति -यितुं).

HOOPER, *s.* (A cooper) लोहवलयबन्धा *m.* (न्), काष्ठभाण्डकारः.

HOOPING-COUGH, *s.* श्वासोपक्लेदकाशः, हूपशब्दपूर्वकः काशः, बालकानां काशः.

To HOOT, *v. n.* रु (c. 2. रौति, रवितुं), विरु, दीर्घरवं कृ, दीर्घरावं कृ, घूत्कृ, घूत्कारं कृ, धिक्कारं कृ, उच्चैःस्वरेण उद्घुष् (c. 10. -घोषयति -यितुं); 'to hoot at,' हे, रे, अरे, धिक्, हून्, घूत् इत्यादिशब्दैर् अवमानं or अवज्ञां or अप्रसादं सूच् (c. 10. सूचयति -यितुं) or इत्यादिशब्दैर् अवज्ञास्पदं कृ.

HOOT, HOOTING, *s.* दीर्घरवः, दीर्घरावः, रावः, घूत्कारः, घूत्कृतं, धिक्कारः, हे, रे, धिक्, घूत् इत्यादिशब्दैर् अवमानसूचनं or अप्रसादसूचनं.

To HOP, *v. n.* प्लु (c. 1. प्लवते, प्लोतुं), वल्ग् (c. 1. वल्गति -लितुं), नृत् (c. 4. नृत्यति, नर्त्तितुं), एकपादेन प्लु or वल्ग्.

HOP, *s.* (The plant) लताविशेषो यस्य पुष्पाणि यवरसेन सह संसृज्यन्ते तेन च यवसुरा उत्पद्यते.—(Jump) प्लवः, प्लुतं, वल्गितं, लम्फः, नृत्यं, नर्त्तनं, एकपादेन प्लुतं, वल्गितं.

HOPE, *s.* आशा, प्रत्याशा, आशंसा, आकांक्षा, आशाबन्धः, मनोरथः, अपेक्षा, व्यपेक्षा, प्रतीक्षा, सम्प्रतीक्षा, स्पृहा, निरीक्षा, उदीक्षणं, ईप्सितं, मनस्विता; 'hope of a good issue,' फलाकांक्षा; 'having one's hopes fulfilled,' पूर्णमनोरथः, आशाप्राप्तः; 'hopes whose fulfilment is delayed,' विलम्बितफला मनोरथाः; 'hope-inspiring,' आशाजननः -ना -नं.

To HOPE, *v. a.* and *n.* आशंस् (c. 1. -शंसते -सितुं), आकांक्ष् (c. 1. -कांक्षति -क्षितुं), प्रत्याकांक्ष्, प्रतीक्ष् (c. 1. -ईक्षते -क्षितुं), अपेक्ष्, व्यपेक्ष्, उदीक्ष्, स्पृह् (c. 10. स्पृहयति -यितुं), वाञ्छ् (c. 1. वाञ्छति -ञ्छितुं), अभिवाञ्छ्, आशां कृ, प्रत्याशां कृ, आशंसां कृ, आशास् (c. 2. शास्ते -शासितुं); 'I hardly hoped to see you again,' न खलु मे आसीद् आशंसा यथा पुनरपि त्वां प्रेक्षिष्ये; 'I hope' may be expressed by the particle कच्चित्; as, 'I hope the fever does not pain you much,' कच्चित् त्वां नातिबाधते ज्वरः.

HOPEFUL, *a.* (Full of hope) आशावान् -वती -वत् (त्), आशान्वितः -ता -तं, आशायुक्तः -क्ता -क्तं, आशाविष्टः -ष्टा -ष्टं, आशाबद्धः -द्धा -द्धं, स्पृहयालुः -लुः -लु, आकांक्षी -क्षिणी -क्षि (न्), सम्प्रत्याशः -शा -शं, प्रत्याशी -शिनी -शि (न्), अपेक्षी -क्षिणी -क्षि (न्), अपेक्षकः -का -कं.—(Promising, exciting hope) आशाजननः -ना -नं, आशाकारी -रिणी -रि (न्).

HOPEFULLY, *adv.* सप्रत्याशं, साशंसं, आशापूर्वं, आशंसापूर्वं.

HOPEFULNESS, *s.* आशावत्त्वं, आशाविष्टत्वं, सप्रत्याशत्वं.

HOPELESS, *a.* आशाहीनः -ना -नं, निराशः -शा -शं, आशारहितः -ता -तं, गतआशः -शा -शं, अप्राप्ताशः -शा -शं, निःप्रत्याशः -शा -शं, हताशः -शा -शं.

HOPELESSLY, *adv.* निराशं, निःप्रत्याशं, आशां विना, गताशं.

HOPELESSNESS, *s.* नैराश्यं, निराशता, आशाहीनता, आशारहितत्वं.

HOPPER, *s.* (One who hops) एकपादेन प्लुतकारी *m.* (न्), एकपादेन नर्त्तकः.—(In a mill) शस्याधारः, शस्यपात्रं.

HOPPING, *s.* एकपादेन नर्त्तनं or नृत्यं or प्लुतकरणं or वल्गितकरणं.

HORAL, HORARY, *a.* मौहूर्त्तिकः -की -कं, घटिकाविषयः -या -यं.

HORDE, *s.* अस्थिरवासिनां or पर्य्यटनकारिणां म्लेच्छपुरुषाणां समूहः or सङ्घः or वृहत्कुलं or वृहद्गणः, शबरगणः, किरातगणः.

HORIZON, *s.* दिक्चक्रवालं, नभश्चक्रं, नभश्चक्रवालं, चक्रं, दिगन्तः, आकाशकक्षा, अक्षरान्तं -न्तः, नभःपालः. 'The eastern horizon,' प्राची दिक्, प्राचीमूलं.

HORIZONTAL, *a.* अनुप्रस्थः -स्था -स्थं, अन्वायतनः -ना -नं, दिगन्तसमः -मा -मं, समः -मा -मं, समरेखः -खा -खं, समस्थः -स्था -स्थं, सपाटः -टा -टं; 'a horizontal line,' द्विज्यामार्गे, समरेखा; 'plane,' समानभूभागः.

HORIZONTALLY, *adv.* अनुप्रस्थं, अन्वायतनं, समं, समरेखं, समानरूपेण.

HORN, *s.* (Of an animal) शृङ्गं, विषाणः -णी -णं, कूणिका, काहलः -ला -लिका; 'of a buffalo,' गवलं.—(Wind-instrument) शृङ्गः, काहलः -ला; 'to blow a horn,' शृङ्गं भा (c. 1. भाति, भातुं) or प्रभा.—(Of the moon) चन्द्रशिखा, चन्द्रशृङ्गं, चन्द्रार्यं.

HORN-BOOK, *s.* बालकस्य आरम्भपुस्तकं or आदिपुस्तकं or प्रथमपाठग्रन्थः.

HORNED, *a.* शृङ्गी -ङ्गिणी -ङ्गि (न्), शृङ्गिणः -णा -णं, विषाणी -णिनी -णि (न्), शृङ्गविशिष्टः -ष्टा -ष्टं; 'in the form of a horn,' शृङ्गाकारः -रा -रं; 'horned moon,' सिनीवाली.

HORNET, *s.* वृहद्भ्रमरभेदः, वृहद्भृङ्गरोलः, विषशृङ्गी *m.* (न्), विषशृङ्गकः.

HORNLESS, *a.* अशृङ्गः -ङ्गा -ङ्गं, शृङ्गहीनः -ना -नं; 'hornless bull,' नूवरः.

HORN-OWL, *s.* उलूकभेदः, शृङ्गिणपेचकः, शृङ्गिकौशिकः.

HORN-PIPE, *s.* नृत्यविशेषः यस्मिन् नर्त्तको हस्तपादादि इतस्ततः क्षिप्रं सञ्चालयति, नाविकनृत्यं.

HORNY, *a.* शार्ङ्गः -र्ङ्गी -र्ङ्गं, शृङ्गमयः -यी -यं, शृङ्गगुणः -णा -णं.

HOROLOGE, HOROLOGY, *s.* घटी, यामघोषा, कालमापनयन्त्रं.

HOROSCOPE, *s.* जन्मपत्रं -त्रिका, जन्मनक्षत्रपत्रं, जन्मयोगपत्रं, जन्मकालग्रहः.

HORRIBLE, *a.* दारुणः -णा -णं, घोरः -रा -रं, सुभैरवः -वी -वं, भैरवः -वी -वं, रौद्रः -द्री -द्रं, भयङ्करः -री -रं, सुभयानकः -की -कं, भयानकः -की -कं, भीमः -मा -मं, उग्रः -ग्रा -ग्रं, भीषणः -णा -णं, भासकरः -रा -रं, भयावहः -हा -हं, विकटः -टा -टं, करालः -ला -लं, भीष्मः -ष्मा -ष्मं.—(In appearance) घोरदर्शनः -ना -नं, रौद्रदर्शनः -ना -नं, भीमदर्शनः -ना -नं.

HORRIBLY, *adv.* दारुणं, घोरं, भयानकं, सुभैरवं, रौद्रं, उग्रं, विकटं.

HORRID, *a.* घोरः -रा -रं, दारुणः -णा -णं, उग्रः -ग्रा -ग्रं, कुत्सितः -ता -तं, भयानकः -का -कं, भयङ्करः -री -रं, भीमः -मा -मं, भीषणः -णा -णं, रौद्रः -द्री -द्रं, भैरवः -वी -वं, विकटः -टा -टं, करालः -ला -लं.

HORRIDLY, *adv.* घोरं, दारुणं, उग्रं, कुत्सितं, अतिकुत्सितं, रौद्रं.

HORRIDNESS, *s.* घोरता, दारुणता, उग्रता, कुत्सितत्वं, भयानकत्वं, रौद्रता.

HORRIFIC, *a.* भैरवकारकः -का -कं, भैरवजनकः -का -कं, सुभयङ्करः -री -रं, सुभयानकः -का -कं, साध्वसकारी -रिणी -रि (न्).

HORRIFIED, *p. p.* भयसंहृष्टरोमा -मा -म (न्), साध्वसोपहतः -ता -तं.

To HORRIFY, *v. a.* भैरवं जन् (c. 10. जनयति -यितुं), ससाध्वसं -सां -सं कृ.

HORRIPILATION, *s.* रोमहर्षः -र्षणं, लोमहर्षणं, संहर्षः, उद्भैर्यं, रोमाञ्चः -ञ्चनं, रोमोद्गमः, रोमोद्भेदः, पुलकः, पुलकोद्गमः, उद्भूर्षणं.

HORROR, *s.* भैरवं, भयसंहर्षः, भयजन्यः, साध्वसं, भीषणं, भीष्मं, भीमं, घोरं, भयानकं, भयङ्करं, त्रासः, सन्त्रासः, परिक्लम्यः.

HORSE, *s.* अश्वः, हयः, तुरङ्गः -ङ्गमः, तुरगः, वाजी *m.* (न्), घोटकः, वाहः, ताक्ष्यः, अर्वा *m.* (न्), सैन्धवः, सप्तिः *m.*, किस्वी *m.* (न्), प्रचेलकः, श्रीभाता *m.* (तृ), पीतिः *m.*, पीती *m.* (न्), पीतिः *m.*, परुष्टारः, मुखभुक् *m.* (ज्), मुखभोजी *m.* (न्), मन्थशूः; 'a well-bred horse,' आजानेयः, कुलीनः, सिन्धुवारः, भूमिपक्षः, भूमिरक्षकः; 'a well-trained horse,' विनीतः, साधुवाही *m.* (न्); 'a white horse,' कक्षः; 'a bay horse,' उकनाहः, किपाहः; 'a fleet horse,' जवनः, जवाधिकः, प्रजवी *m.* (न्); 'a good horse,' वल्लभः, हयोत्तमः; 'a chariot horse,' रथ्यः; 'a pack-horse,' पृष्ठ्यः, स्थौरी *m.* (न्), स्थुरी *m.*, स्थोरी *m.*; 'a horse for sacrifice,' मयुः *m.*, अश्वमेधीयः; 'four-horsed carriage,' चतुरश्वो रथः.—

(Cavalry) आश्वं, आश्विकं, अश्वारूढाः *m. pl.*—(Support for towels, &c.) मार्जनपटाधारः, चरकाधारः; 'relating to a horse,' अश्वीयः -या -यं, आश्विकः -की -कं, आश्वः -श्वी -श्वं.—(A number of horses,' अश्वीयं, आश्वं.

To HORSE, *v. a.* अश्वम् आरुह् in caus. (-रोपयति -यितुं), अश्वारूढं-ढां-ढं कृ.

HORSE-BACK, *s.* अश्वपृष्ठं, अश्वस्थितिः *f.*; 'on horse-back,' अश्वपृष्ठे loc. c.; 'going on horse-back,' तुरङ्गयायी *m.* (न्).

HORSE-BEAN, *s.* क्षुद्रशिम्बिकभेदः, शिग्रा, मुद्गः, माषः.

HORSE-BOAT, *s.* अश्ववहनं, अश्ववहनयोग्या नौका.

HORSE-BREAKER. *s.* अश्वदमकः, अश्वविनेता *m.* (तृ), अश्वशिक्षकः, अश्वशिक्षाजीवी *m.* (न्).

HORSE-BREAKING, *s.* अश्वदमनं, अश्वशिक्षा, अश्वविनयः.

HORSE-CHESTNUT, *s.* (Tree) श्यामफलविशिष्टो वृक्षभेदः.

HORSE-CLOTH, *s.* अश्वास्तरणं, आस्तरः, अश्वपरिस्तोमः.

HORSE-COMB, *s.* अश्वमार्जनी, अश्वलोमशोधनी.

HORSE-DEALER, *s.* अश्वव्यापारी *m.* (न्), हयज्ञः, हेडावुक्कः, हेलावुक्कः, हयविद्याविशारदः.

HORSE-DRIVING, *s.* अश्वसारथ्यं, अश्वप्रेरणं, हयप्रेरणं.

HORSE-DUNG, *s.* अश्वशकृत् *n.*, अश्वपुरीषं, अश्वमलं, अश्वहलं.

HORSE-FACED, *a.* अश्वमुखः -खी -खं, अश्ववदनः -ना -नं, हयमुखः -खी -खं, तुरङ्गवक्त्रः -क्त्रा -क्त्रं, तुरङ्गाननः -ना -नं, तुरङ्गास्यः -स्या -स्यं.

HORSE-FLESH, *s.* अश्वमांसं, घोटकमांसं, तुरगमांसं.

HORSE-FLY, *s.* अश्वदंशकः, हयदंशी, अश्वमक्षिका.

HORSE-GUARDS, *s.* अश्वारूढसैनिकाः *m. pl.*, राजशरीररक्षकम् अश्वारूढसैन्यं.

HORSE-HAIR, *s.* अश्वलोम *n.* (न्), अश्वरोम *n.* (न्), अश्ववालः.

HORSE-LAUGH, *s.* अट्टहासः, अतिहासः, अतिहसितं, महाहासः, आच्छुरितं, लोत्रासः.

HORSE-LEECH, *s.* अश्वदंशका जलौका, अश्वरक्तपायिनी.—(Farrier) अश्वचिकित्सकः, अश्ववैद्यः.

HORSEMAN, *s.* अश्वारूढः, अश्वारोहः -ही *m.* (न्), हयारूढः, हयारोहः, सादी *m.* (न्), अश्वसादी *m.* (न्), तुरगी *m.* (न्), तुरङ्गी *m.* (न्), अश्ववहः, अश्ववारः, सायी *m.* (न्), हयविद्याविशारदः.

HORSEMANSHIP, *s.* अश्वविद्या, हयविद्या, अश्वारोहणविद्या, हयज्ञता, हयारोहः, अश्वहृदयं.

HORSE-MEAT, *s.* अश्वाहारः, अश्वभोजनं, अश्वसाद्यं, पशुखाद्यद्रव्यं.

HORSE-POND, *s.* अश्वतडागः, अश्वपुष्करिणी, अश्ववापी.

HORSE-RACE, *s.* अश्वचर्या, अश्वमार्गः, अश्वधावनं.

HORSE-RADISH, *s.* कुरुकन्दकः -कं, कन्दमूलभेदः.

HORSE-SHOE, *s.* अश्वखुरत्रं, अश्वखुरत्राणं, अश्वखुरबन्धनं, अश्वपादुका.

HORSE-STEALER, *s.* अश्वहारकः, वाजिहर्ता *m.* (र्तृ), अश्वमुक् *m.* (च्).

HORSE-TRAPPINGS, *s.* आदानं, अश्वपरिस्तोमः, अश्वसज्जा, अश्वास्तरणं.

HORSE-WAY, *s.* अश्वपथः, अश्वमार्गः, अश्ववर्त्म *n.* (न्).

HORSE-WHIP, *s.* कशा, अश्वकशा, अश्वताडनी, अश्वप्रतोदः, प्रतिष्कशः, प्रतिष्कषः, चर्मदण्डः.

To HORSE-WHIP, *v. a.* कशया or चर्मदण्डेन तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or ग्रह् (c. 1. -गृह्णाति -ग्रहीतुं), कशाघातं कृ.

HORTATION, *s.* उपदेशः, उपदेशवाक्यं, प्रबोधनं, प्रबोधवाक्यं, मन्त्रणं.

HORTATORY, *a.* उपदेशकः -का -कं, प्रबोधकः -का -कं, आदेशकः -का -कं.

HORTICULTURAL, *a.* उद्यानविद्यासम्बन्धी -न्धिनी -न्धि (न्), उद्यानविषयः -या -यं.

HORTICULTURE, *s.* उद्यानविद्या, उद्यानकर्मणविद्या, उद्यानकर्मणं, उद्यानकरणविद्या, उद्यानकरणं, उद्यानकृषिकर्मन् *n.* (न्), पुष्पफलोत्पत्तिकर्मन् *n.* (न्).

HORTICULTURIST, *s.* उद्यानविद्याज्ञः, उद्यानकर्मवेत्ता, उद्यानकर्मणाजीवी *m.* (न्).

HORTULAN, *a.* उद्यानसम्बन्धी -न्धिनी -न्धि (न्).

HORTUS SICCUS, *s.* शुष्कोद्यानं, शुष्कौषधिपुस्तकं, शुष्कौषधिसङ्ग्रहः, शुष्कतृणादिसङ्ग्रहः, शुष्कौषधयः *f. pl.*

HOSE, *s.* जङ्घामयं पादत्राणं, जौर्णपादत्रं, पादरक्षणं, जङ्घापरिधानं.

HOSIER, *s.* यूनोक्तपादत्रविक्रेता *m.* (तृ), जौर्णपादत्रविक्रयी *m.* (न्).

HOSPITABLE, *a.* आतिथ्यः -थ्या -थ्यं, आतिथेयः -यी -यं, अतिथिसेवकः -का -कं, अतिथिपूजकः -का -कं, आतिथ्यकारी -रिणी -रि (न्), शिवातिथिः -थिः -थि, वह्वभातिथिः -थिः -थि, सत्कारशीलः -ला -लं.

HOSPITABLY, *adv.* आतिथ्यपूर्वं, सातिथ्यं, सत्कारेण, सत्कारपूर्वं, आतिथेयं; 'to receive hospitably,' सत्कृ, आतिथ्यं कृ.

HOSPITAL, *s.* आरोग्यशाला, चिकित्साशाला, चिकित्सागारं, रोगग्रस्तागारशाला, रोगोपचारशाला, रोगार्तलोकपोषणस्थानं, दरिद्रलोकानां रोगचिकित्सनशाला, धर्मशाला.

HOSPITALITY, *s.* आतिथ्यं, अतिथित्वं, अतिथिक्रिया, आतिथ्यकर्मन् *n.* (न्), अतिथिसत्कारः, अतिथिसत्क्रिया, सत्कारः, सत्क्रिया, सत्कर्मन् *n.* (न्), सत्कृतिः *f.*, सत्कृतं, अतिथिसेवा, अतिथिपूजनं, मनुष्ययज्ञः, नृयज्ञः.

HOST, *s.* (Entertainer) सत्कारी *m.* (न्), सत्कृत् *m.*, आमन्त्रयिता *m.* (तृ), निमन्त्रणकृत् *m.*, निमन्त्रकः, भोजनदाता *m.* (तृ), आतिथ्यकृत् *m.*—(Army) चमूः *f.*, सेना, अनीकं, वाहिनी, अनीकिनी, वरूथिनी, योधसमूहः.—(A great number) समूहः, सङ्घः, सङ्घातः, गणः, कुलं, समवायः, समुदायः, निवहः, निकायः; 'a host of persons,' जनसमूहः, लोकसङ्घः, जनीघं; 'a host of enemies,' शत्रुनिकायः; 'a host of excellencies,' गुणग्रामः.

To HOST, *v. n.* (Lodge) वस् (c. 1. वसति, वस्तुं), निवस्, अतिथिर् भू or अस्.—(Encounter in battle) युद्धे समागम् (c. 1. -गच्छति -गन्तुं) or सङ्गम्.

HOSTAGE, *s.* शरीरबन्धकः, बन्धकः, सन्धिनियमस्योपरि विश्वासार्थं यः शरीरबन्धकः.

HOSTEL, HOSTELRY, *s.* उत्तरणस्थानं, उत्तरणगृहं, उपकारी -रिका.

HOSTESS, *s.* आतिथ्यकारिणी, सत्कारिणी, निमन्त्रणकारिणी, भोजनदात्री.

HOSTILE, *a.* वैरी -रिणी -रि (न्), विरुद्धः -द्धा -द्धं, विरोधी -धिनी -धि (न्), विपक्षः -क्षा -क्षं, प्रतिकूलः -ला -लं, विपरीतः -ता -तं, अहितः -ता -तं, अहितकारी -रिणी -रि (न्), प्रातिपक्षः -क्षी -क्षं, विद्वेषी -षिणी -षि (न्), द्वेषी &c., द्वेषणः -णा -णं, विद्विषः -षा -षं, शात्रवीयः -यी -यं, द्रोहवृत्तिः -त्तिः -त्ति, अपकारी -रिणी -रि (न्), प्रतिरोधी -धिनी -धि (न्), पर्य्येक्ष्याता -त्री -तृ (तृ), सवैरः -रा -रं; 'a hostile invasion,' शत्रुविग्रहः; 'to be hostile,' विपक्षीभू, प्रतिकूल (nom. प्रतिकूलयति -यितुं), विरुध् (c. 7. -रुणद्धि -रोद्धुं), वैर (nom. वैरायते), शत्रु (nom. शत्रूयति), द्विष् (c. 2. द्वेष्टि -ष्टुं), विद्विष्, पर्य्येक्ष्य (c. 1. -ईक्षते -क्षितुं).

HOSTILELY, *adv.* शत्रुवत्, रिपुवत्, विरोधेन, विरुद्धं, विपरीतं, विपक्षवत्.

HOSTILITY, *s.* वैरिता, वैरभावः, वैरं, शत्रुता, रिपुता, विपक्षता, विरोधः, विरुद्धता, विद्वेषः, द्वेषः, शात्रवं, अरिता, प्रतिपक्षता, विद्विषता, अप्रीतिः *f.*, प्रतिस्पर्द्धं, परता -त्वं; 'natural hostility,' जातिवैरं.—(War, state of war) युद्धं, युद्धभावः, युद्धावस्था, विग्रहः, संग्रामः.

HOSTLER, *s.* अश्वपालः -लकः, अश्वरक्षकः, उत्तरस्थाने अभ्यागतान् अश्वान् पालयति यो जनः.

HOT, *a.* (Contrary to cold) उष्णः -ष्णा -ष्णं, तप्तः -प्ता -प्तं, चण्डः -ण्डा -ण्डं, प्रचण्डः -ण्डा -ण्डं, उग्रचण्डः -ण्डा -ण्डं, सन्तप्तः -प्ता -प्तं, उपतप्तः -प्ता -प्तं, तापी -पिनी -पि (न्), ओष्णः -ष्णा -ष्णं, सोष्मः -ष्मा -ष्मं, सौष्मा

-ष्मा -ष्म (न्), नैदाघः -घी -घं, अशिशिरः -रा -रं, अशीतः -ता -तं, तिग्मः -ग्मा -ग्मं, तीव्रः -व्रा -व्रं, तीक्ष्णः -क्ष्णा -क्ष्णं, खरः -रा -रं, ग्रीष्मः -ष्मा -ष्मं, घर्म्म in comp.; 'hot season, hot weather,' उष्णकालः, उष्णसमयः, ग्रीष्मः, ग्रीष्मकालः, निदाघः, निदाघकालः, उष्णागमः; 'hot water,' उष्णोदकं, घर्म्मोदकं, घर्म्माम्बु *n.*—(Hot to the taste) तिग्मः -ग्मा -ग्मं, तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं, खरः -रा -रं, कटुः -टुः -टु, उग्रः -ग्रा -ग्रं.—(Passionate) चण्डः -ण्डा -ण्डं, चण्डवान् -वती -वत् (त्), तीक्ष्णः -क्ष्णा -क्ष्णं, तिग्मः -ग्मा -ग्मं, उग्रः -ग्रा -ग्रं, शीघ्रकोपी -पिनी -पि (न्), रागी -गिणी -गि (न्), उष्णः -ष्णा -ष्णं.—(Impetuous) तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), संरम्भी -म्भिणी -म्भि (न्), उत्तप्तः -प्ता -प्तं; 'to make hot,' तप् (c. 10. तापयति -यितुं); 'to be hot,' उष्णीभू, उष्म (nom. उष्मायते).

HOTBED, *s.* गोहयशकृदादिप्रक्षेपेण तप्तीकृतम् उद्यानस्थलं, उष्णस्थलं.

HOTCH-POTCH, *s.* नानाखाद्यद्रव्यसंयोगः, नानाशाकादिसम्मिश्रणं, सन्निपातः, प्रकीर्णकं.

HOTEL, *s.* उत्तरणशाला, उत्तरणगृहं, उत्तरणस्थानं, उपकारी -रिका, उपकार्य्या, औपकार्य्यं, प्रवासीयगृहं.

HOT-HEADED, *a.* साहसिकः -की -कं, साहसी -सिनी -सि (न्), उच्चण्डः -ण्डा -ण्डं, उत्तप्तः -प्ता -प्तं, संरम्भी -म्भिणी -म्भि (न्), शीघ्रकोपी -पिनी -पि (न्), तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्); 'hot-headed zeal,' उत्तापः.

HOT-HOUSE, *s.* उद्याने विदेशीयवृक्षरक्षणार्थं काचाच्छादितं तप्तगृहं or उष्णगृहं.

HOTLY, *adv.* तीक्ष्णं, तीव्रं, तिग्मं, सतैक्ष्ण्यं, चण्डं, प्रचण्डं, उच्चण्डं, उग्रं, उग्रतया, उत्तापेन, सोष्मं, उत्तप्तं, उष्णं.

HOT-MOUTHED, *a.* तीक्ष्णवादी -दिनी -दि (न्), उग्रमुखः -खी -खं, दुर्मुखः -खी -खं.

HOTNESS, *s.* उष्णता, औष्म्यं, तापः, तप्तत्वं, चण्डता, प्रचण्डता, अशिशिरता, तिग्मता, तैग्म्यं, तीक्ष्णता, निदाघः.—(To the taste) तिग्मता, तीक्ष्णता, तीव्रता, कटुता, उग्रता -त्वं.—(Ardor, vehemence) उत्तापः, उच्चण्डता, व्यग्रता, तीक्ष्णता, उष्मः, संरम्भः.—(Of temper) चण्डता, शीघ्रकोपित्वं.

HOTSPUR, *s.* साहसिकजनः, तीक्ष्णस्वभावो जनः, संरम्भी *m.* (न्).

HOVEL, *s.* कुटीरः, कुटेरः, कुटी, तृणकुटी, उटजः, मण्डपः, गोष्ठं.

To HOVEL, *v. a.* कुटीरे वस् (c. 1. वसति, वस्तुं) or निवस्, कुटीरम् अधिवस्.

HOVEN, *a.* उच्छूनः -ना -नं, प्रस्फुरितः -ता -तं, उत्थितः -ता -तं.

To HOVER, *v. n.* विहायसा or व्योममध्ये वृत् (c. 1. वर्त्तते -र्त्तितुं) or व्यावृत्, आकाशमध्ये मस्तकोपरि वृत्, प्रडीनम् अकृत्वा ऊर्द्ध्वविथति विसृप् (c. 1. -सर्पति -सप्तुं) or विचल् (c. 1. -चलति -लितुं), व्योममध्ये पक्षास्फालनं कृत्वा निश्चलो वृत्.—(Hesitate, waver) विलम्ब् (c. 1. -लम्बते -म्बितुं), दोल (nom. दोलायते), आन्दोल (nom. आन्दोलयति -यितुं), विकॢप् (c. 1. -कल्पते -ल्पितुं), विचर् (c. 10. -चारयति -यितुं), विशङ्क् (c. 1. -शङ्कते -ङ्कितुं).

HOUGH, *s.* जङ्घास्थिशिरा, जङ्घास्थिस्नायुः *m.* जङ्घासन्धिबन्धनं.

To HOUGH, *v. a.* जङ्घास्थिशिरां छिद् (c. 7. छिनत्ति, छेत्तुं).

HOUND, *s.* मृगयाकुक्कुरः, मृगव्यकुक्कुरः, मृगयार्थं कुक्कुरः, आखेटकाद्यर्थं श्वा *m.* (न्), आखेटिकः, मृगारिः *m.*, मृगदंशकः, वृकारिः *m.*, विश्वकद्रुः *m.*

To HOUND, *v. a.* मृगव्यकुक्कुरैर् अनुसृ (c. 1. -सरति -सर्त्तुं).

HOUR, *s.* घटिका, होरा, केरली, दिवसस्य चतुर्विंशभागः or चतुर्विंशतितमांशः, दिनांशः; 'an hour of forty eight minutes,' मुहूर्त्तः -र्त्तं; 'a space of twenty-four minutes,' दण्डः; 'half-an-hour,' अर्द्धघटिका; 'an hour and a half,' अर्द्धयामः.

HOUR-GLASS, *s.* यामनाली, वालुकायन्त्रं, कालपरिमापकयन्त्रं.

HOURI, *s.* दिव्याङ्गना, दिव्यकन्या, देवकन्या, स्वर्गकन्या, स्वर्वेश्या.

HOURLY, *adv.* प्रतिमुहूर्त्तं, मुहूर्त्ते मुहूर्त्ते, दण्डे दण्डे, प्रतिदण्डं.

HOUR-PLATE, *s.* मुहूर्त्तदण्डादिपरिमापकं मण्डलं, यामघोषा, घटीमुखं.

HOUSE, *s.* गृहं, गेहं -हः, वेश्म *n.* (न्), भवनं, आलयः, निलयः, आयतनं, निकेतः -तनं -तकं, निवेशनं, सदनं, मन्दिरं, वासः, संवासः, वासस्थानं, आगारः -रं, अगारः -रं, निवासः, निवासस्थानं, निवसतिः *f.*, वसितं, समावासः, आवसथः, निकाय्यः, अवस्थानं, वस्त्यं, उदवसितं, वास्तुः *m.* ओकस् *n.*, धाम *n.* (न्), छत्वरः, निशान्तं, कुटः -टी, शाला, सभा, स्थानं; 'house and land,' गृहक्षेत्रादि; 'a number of houses,' सन्नचितिः *f.*; 'house of confinement,' बन्धनगृहं, बन्धनागारं, बन्धनालयः; 'confined to the house,' गृहानुबद्धः -द्धा -द्धं.—(Family, race) कुलं, वंशः, कुटुम्बः, जातिः *f.*—(Family, household) गृहजनः, परिजनः, परिवारः, स्वजनः, कुटुम्बकं, स्त्रीपुत्रकन्यादि.

To HOUSE, *v. a.* गृहे निविश् (c. 10. -वेशयति -यितुं), गृहं प्रविश् (c. 10. -वेशयति -यितुं), वेश्मनि वस् (c. 10. वासयति -यितुं), आश्रयं दा, वासस्थानं दा.

HOUSE-BREAKER, *s.* गृहभेदकः, आगारभेदकः, भित्तिचौरः, वन्दिचौरः सन्धिचौरः, कारुचौरः, कुड्यच्छेदी, कपाटघ्नः, खानिलः, कुजम्भलः -म्भिलः.

HOUSE-BUILDER, *s.* गृहकारकः, गृहकारी *m.* (न्), गृहकर्म्मी *m.* (न्), गृहनिर्माता *m.* (तृ).

HOUSE-BURNER, *s.* गृहदाहकः, आगारदाहकः, गृहदाहनकृत् *m.*

HOUSE-BURNING, *s.* गृहदाहः -हनं, गृहदहनं, गृहप्लोषः, आगारदाहः.

HOUSEDOG, *s.* गृहकुक्कुरः, गृहरक्षकः श्वा *m.* (न्).

HOUSEDOOR, *s.* गृहद्वारं, गेहद्वारं.

HOUSEHOLD, *s.* गृहजनः, परिजनः, गृहपरिजनः, गृहपरिवारः, स्वजनः, परिवारः, अभिजनः, कुटुम्बकं.

HOUSEHOLD, *a.* गृह्यः -ह्या -ह्यं, गृहसम्बन्धी -न्धिनी -न्धि (न्), आवसथिकः -की -कं or expressed by गृह in comp.; as, 'household affairs,' गृहकार्य्यं, गृहकरणं, गृहव्यापारः; 'household utensils,' गृहोपस्करः; 'household gods,' गृह्या देवताः *f. pl.*, कुलदेवताः *f. pl.*; 'household bread,' गृहापूपः.

INFRACTION, *s.* भङ्गः, भञ्जनं, खण्डनं, भेदः, अतिक्रमः, व्यतिक्रमः -मणं, लङ्घनं, उल्लङ्घनं; 'of an agreement,' संविद्व्यतिक्रमः; 'of a law,' व्यवस्थालङ्घनं.

INFRANGIBLE, *a.* अभेद्यः -द्या -द्यं, अभेदनीयः -या -यं, अखण्डनीयः -या -यं, अखण्डः -ण्डा -ण्डं, अनतिक्रमणीयः -या -यं, अलङ्घनीयः -या -यं.

INFREQUENCY, *s.* विरलता, वैरल्यं, अबहुत्वं, अनभीक्ष्णता, अनाभीक्ष्ण्यं, अनित्यता, कादाचित्कत्वं, क्वाचित्कत्वं, अपौनःपुन्यं, असामान्यं.

INFREQUENT, *a.* विरलः -ला -लं, विरलागतः -ता -तं, अनभीक्ष्णः -क्ष्णा -क्ष्णं, अबहुशो वर्त्तमानः -ना -नं, अनित्यः -त्या -त्यं, अनैत्यिकः -की -कं, कादाचित्कः -त्की -त्कं, क्वाचित्कः -त्का -त्कं, अपौनःपुनिकः -की -कं, असततः -ता -तं, असामान्यः -न्या -न्यं.

INFREQUENTLY, *adv.* अबहुशस्, अनभीक्ष्णं, अनित्यं, विरलं, कदाचित्.

To INFRINGE, *v. a.* (Break) भञ्ज् (c. 7. भनक्ति, भंक्तुं), खण्ड् (c. 10. खण्डयति -यितुं), भिद् (c. 7. भिनत्ति, भेत्तुं), भङ्गं कृ.—(Violate) अतिक्रम् (c. 1. -क्रामति -क्रमितुं), व्यतिक्रम्, लङ्घ् (c. 10. लङ्घयति -यितुं), उल्लङ्घ्, विलङ्घ्, लुप् (c. 10. लोपयति -यितुं), विलुप्, अतिचर् (c. 1. -चरति -रितुं), अतिवृत् (c. 1. -वर्त्तते -र्त्तितुं).

INFRINGED, *p. p.* भग्नः -ग्ना -ग्नं, लङ्घितः -ता -तं, उल्लङ्घितः -ता -तं, अतिक्रान्तः -न्ता -न्तं, लुप्तः -प्ता -प्तं, खण्डितः -ता -तं, विच्छिन्नः -न्ना -न्नं.

INFRINGER, *s.* भङ्क्तृकरः, भञ्जकः, भङ्क्तृकारी *m.* (न्), लङ्घनकारी, अतिक्रमी *m.* (न्), विच्छेदकः, लोपकरः, अतिचर्त्ता *m.* (न्).

INFRINGEMENT, *s.* भङ्गः, भञ्जनं, भेदः, खण्डनं, अतिक्रमः -मणं, व्यतिक्रमः -मणं, लङ्घनं, उल्लङ्घनं, लोपः -पनं, विच्छेदः, अतिचर्त्तनं; 'of a compact,' संविद्व्यतिक्रमः, नियमातिक्रमः, नियमभङ्गः; 'of a law,' व्यवस्थालङ्घनं, व्यवस्थालोपः.

INFURIATE, *a.* कोपाकुलः -ला -लं, क्रोधाकुलः -ला -लं, रोषवेगाकुलः -ला -लं, संरम्भः -म्भा -म्भं, क्रोधान्धः -न्धा -न्धं, उन्मादसंरम्भः -म्भा -म्भं, मदोत्कटः

-टा -टं, क्रोधविक्षिप्तः -प्ता -प्तं.

To INFURIATE, *v. a.* कोपाकुलीकृ, रोषवेगेन व्याकुलीकृ, संरम्भीकृ.

To INFUSCATE, *v. a.* तिमिर (nom. तिमिरयति -यितुं), तिमिरीकृ, कृष्णीकृ, श्यामीकृ.

To INFUSE, *v. a.* (Pour in, mix) आसिच् (c. 6. -सिञ्चति -सेक्तुं), निषिच्, सिच्, प्रक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), निक्षिप्, मिश्र् (c. 10. मिश्रयति -यितुं), सम्मिश्र् संसृज् (c. 6. -सृजति -स्रष्टुं), मिश्रीकृ, मिश्रणं कृ.—(Introduce) निविश् (c. 10. -वेशयति -यितुं), प्रविश्, आविश्; 'infuse into the mind,' चित्ते निविश्, उपदिश् (c. 6. -दिशति -देष्टुं), उपदेशं कृ.—(Steep) वास् (c. 10. वासयति -यितुं), क्वथ् (c. 1. क्वथति -थितुं), भू (c. 10. भावयति -यितुं).

INFUSED, *p. p.* आसिक्तः -क्ता -क्तं, सिक्तः -क्ता -क्तं, प्रक्षिप्तः -प्ता -प्तं, निक्षिप्तः -प्ता -प्तं, मिश्रितः -ता -तं, व्याप्तः -प्ता -प्तं, संसृष्टः -ष्टा -ष्टं, निवेशितः -ता -तं, विलीनः -ना -नं.—(Steeped) वासितः -ता -तं, भावितः -ता -तं.

INFUSIBLE, *a.* (That may be infused) प्रक्षेपणीयः -या -यं, मिश्रणीयः -या -यं, निवेशनीयः -या -यं.—(Incapable of fusion) अद्राव्यः -व्या -व्यं, अद्रवणीयः -या -यं.

INFUSION, *s.* (Act of pouring in) आसेकः, आसेचनं, प्रक्षेपः -पणं, मिश्रणं, मिश्रीकरणं, सम्मिश्रणं.—(Act of introducing) निवेशनं, प्रवेशनं.—(Suggestion, instruction) उपन्यासः, प्रबोधः -धनं, उपदेशः.—(Process of steeping) वासनं, भावनं, क्वथनं, निष्क्वाथः.—(The liquor in which plants are steeped) कषायः -यं, रसः, निर्य्यासः, निर्य्यूहः, क्वाथः.

INGATHERING, *s.* शस्यसङ्ग्रहः, शस्यसञ्चयः, शस्यसङ्ग्रहकालः.

INGELABLE, *a.* घनीकरणीयः -या -यं, घनीकरणाशक्यः -क्या -क्यं.

To INGEMINATE, *v. a.* द्विगुणीकृ, द्विगुण (nom. द्विगुणयति -यितुं), पुनःपुनः कृ, वारं वारं कृ, द्विवारं कृ, मुहुर्मुहुः कृ, असकृत् कृ.

INGEMINATE, *a.* द्विगुणितः -ता -तं, पुनःपुनः कृतः -ता -तं.

INGEMINATION, *s.* द्विगुणीकरणं, पुनःपुनःकरणं, द्विवारकरणं, असकृत्करणं.

INGENERATE, INGENERATED, *a.* अन्तर्जातः -ता -तं, सहजः -जा -जं, निजः -जा -जं.

INGENIOUS, *a.* (Possessed of invention, prompt to invent) युक्तिमान् -मती -मत् (न्), यौक्तिकः -की -कं, उपायज्ञः -ज्ञा -ज्ञं, उपायी -यिनी -यि (न्), कल्पकः -का -कं, परिकल्पकः -का -कं, विज्ञः -ज्ञा -ज्ञं, चतुरः -रा -रं, निपुणः -णा -णं, सुप्रयोगवान् -वती -वत् (न्), विदग्धः -ग्धा -ग्धं, प्रवीणः -णा -णं, सूक्ष्मबुद्धिः -द्धिः -द्धि, तीक्ष्णबुद्धिः -द्धिः -द्धि, पटुः -टुः -टु, उपकारकः -का -कं, व्यवसायी -यिनी -यि (न्), विचक्षणः -णा -णं, दक्षः -क्षा -क्षं.—(Of curious design or structure) सुयुक्तिकृतः -ता -तं, सुयुक्तिनिष्पन्नः -न्ना -न्नं, सुप्रयोगकृतः -ता -तं, सुप्रयुक्तः -क्ता -क्तं.

INGENIOUSLY, *adv.* युक्त्या, सुयुक्त्या, सुप्रयोगेन, विज्ञवत्, चातुर्य्येण, चतुरं, निपुणं, निपुणवत्, विचक्षणवत्, सपाटवं, दाक्षेण, दक्षवत्.

INGENUITY, INGENIOUSNESS, *s.* युक्तिः *f.*, सुयुक्तिः *f.*, सुप्रयोगः, युक्तिमत्त्वं, कल्पना, कल्पनाशक्तिः *f.*, कल्पकत्वं, विज्ञता, उपायज्ञता, चतुरता, चातुर्य्यं, निपुणता, नैपुण्यं, सूक्ष्मता, बुद्धिसूक्ष्मता, बुद्धितीक्ष्णता, पटुता, पाटवं, विदग्धता, वैदग्ध्यं, प्रवीणता, वैचक्षण्यं, दक्षता, दाक्ष्यं, कला, मनुष्यकला, व्यवसायः.

INGENUOUS, *a.* निष्कपटः -टा -टं, अकपटः -टा -टं, विमलात्मा -त्मा -त्म (न्), विमलाशयैकः -का -कं, मायाहीनः -ना -नं, अमायः -या -यं, अमायिकः -की -कं, निर्य्याजः -जा -जं, अवक्रः -क्रा -क्रं, सरलः -ला -लं, शुद्धमतिः -तिः -ति, अजिह्मः -ह्मा -ह्मं, ऋजुः -जुः -जु, निर्व्यलीकः -का -कं, दक्षिणः -णा -णं, अगूढभावः -वा -वं, शुचिः -चिः -चि, शुचिमनाः -नाः -नः (स्), निर्म्मलचित्तः -त्ता -त्तं, अकृपणः -णा -णं.—(Generous, noble) उदारः -रा -रं, उदारचेताः -ताः -तः (स्), महानुभावः -वा -वं.

INGENUOUSLY, *adv.* निष्कपटं, कपटं विना, अवक्रं, अमायया, सरलं, सरलवत्, सारल्येन, निर्व्यलीकं, निर्य्याजं, दाक्षिण्येन, उदारवत्.

INGENUOUSNESS, *s.* उदारत्वं, औदार्य्यं, कपटहीनता, निष्कपटत्वं, निष्कापट्यं, अकापट्यं, अमायता, मायाहीनता, सरलता, सारल्यं, अवक्रता, अजिह्मता, ऋजुता, आर्जवं, निर्व्यलीकता, दाक्षिण्यं, शुचिता, विमलात्मता, चित्तनिर्म्मलत्वं, भावगूढता, शुद्धमतित्वं, भावशुद्धत्वं, अव्याजः, अकार्पण्यं, उदीर्णता.

INGLORIOUS, *a.* अयशस्वी -स्विनी -स्वि (न्), अयशस्यः -स्या -स्यं, अकीर्त्तिमान् -मती -मत् (न्), अकीर्त्तिकरः -री -रं, अकीर्त्तिदः -दा -दं, अयशस्करः -री -रं, अपयशस्करः -री -रं, अख्यातः -ता -तं, अश्रीमान् -मती -मत् (न्), निःश्रीकः -का -कं, अपमानजनकः -का -कं, कलङ्ककरः -री -रं, निःप्रतापः -पा -पं, लज्जाकरः -री -रं.

INGLORIOUSLY, *adv.* अयशस्यं, सापमानं, सकलङ्कं, अकीर्त्तिपूर्व्वं.

INGOT, *s.* तूलिकाविलीनः सुवर्णादिपिण्डः, तूलिकाकारः सुवर्णरूप्यादिपिण्डः, सुवर्णादिकीलः; 'ingot mould,' तूलिका, तुलिका, ईषीका, ईषिका.

To INGRAFT, *v. a.* एकवृक्षशाखायाम् अन्यवृक्षपल्लवं निविश् (c. 10. -वेशयति -यितुं), एकवृक्षपल्लवम् अन्यवृक्षपल्लवेन संयुज् (c. 10. -योजयति -यितुं).

INGRAFTED, *p. p.* निवेशितः -ता -तं, निहितः -ता -तं, संलग्नीकृतः -ता -तं.

INGRAFTMENT, *s.* एकवृक्षशाखायाम् अन्यवृक्षपल्लवनिवेशनं, संलग्नीकरणं.

INGRATE, *a.* अकृतज्ञः -ज्ञा -ज्ञं, कृतघ्नः -घ्नी -घ्नं, अकृतवेदी -दिनी -दि (न्), अनुपकृतज्ञः -ज्ञा -ज्ञं, उपकारविस्मर्त्ता -र्त्री -र्त्तृ (र्त्तृ), कृतनाशकः -की -कं.

To INGRATIATE, *v. a.* (Conciliate favor for one's self) आराध् (c. 10. -राधयति -यितुं), अनुरञ्ज् (c. 10. -रञ्जयति -यितुं), सान्त्व् (c. 10. सान्त्वयति -यितुं), प्रसद् (c. 10. -सादयति -यितुं), प्रसाध् (c. 10. -साधयति -यितुं), लल् (c. 10. लालयति -यितुं), अनुग्रहं प्राप् (c. 5. -आप्नोति -आप्तुं), अनुरागं कृ, स्नेहं कृ, अनुरुध् (c. 4. -रुध्यति -रोद्धुं).

INGRATITUDE, *s.* अकृतज्ञता, कृतघ्नता, उपकृतघ्नता, उपकारविस्मृतिः *f.*, उपकारविस्मरणं, उपकृतविस्मृतिः *f.*, कृतपूर्व्वनाशनं, कृतनाशनं, उपकारनाशनं, कृतपूर्व्वविस्मृतिः *f.*, अनुपकारिता, निरुपकारिता, प्रत्युपकाराभावः.

INGREDIENT, *s.* भागः, अंशः, द्रव्यं, साधनद्रव्यं, उपकरणं, अङ्गं, वस्तु; 'any thing mixed as an ingredient in drugs in the course of decoction,' प्रक्षिप्तं, भावितं.

INGRESS, *s.* प्रवेशः -शनं, निवेशः -शनं, आवेशः -शनं, समावेशः, वेशः -शनं, वेषणं, वेशिका, सन्निवेशः, सञ्चारः; 'of the sun into a sign,' संक्रान्तिः *f.*, संक्रमः; 'of a luminary at an eclipse,' वेधः.

INGUINAL, *a.* वङ्क्षणसम्बन्धी -न्धिनी -न्धि (न्), वङ्क्षणीयः -या -यं.

To INGULF, *v. a.* *See To* ENGULPH.

To INGURGITATE, *v. a.* जलादि बहुशो गॄ (c. 6. गिरति, गरितुं -रीतुं) or निगॄ or अवगॄ or ग्रस् (c. 1. ग्रसते -सितुं).

INGUSTABLE, *a.* रसनेन्द्रियातीतः -ता -तं, रसनेन्द्रियाविषयः -या -यं.

To INHABIT, *v. a.* वस् (c. 1. वसति, वस्तुं), निवस्, प्रतिवस् all with loc. c., आवस्, समावस्, अधिवस्, अधिनिवस्, अध्यावस्, उपवस्, सन्निवस् with acc. c. or loc. c., अध्यास् (c. 2. -आस्ते -आसितुं), समध्यास् with acc. c., आस् with loc. c., आश्रि (c. 1. -श्रयति -श्रयितुं) with acc. c., सेव् (c. 1. सेवते -वितुं), निषेव्, उपसेव् with acc. c., अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं) with acc. c. or loc. c., स्था with loc. c., जुष् (c. 6. जुषते, जोषितुं) with acc. c., निली (c. 4. -लीयते -लेतुं), वासं कृ.

INHABITABLE, *a.* वस्तव्यः -व्या -व्यं, वास्तव्यः -व्या -व्यं, वासतेयः -यी -यं,

वसनीयः -या -यं, आवसनीयः -या -यं, निवसनीयः -या -यं, वासयोग्यः -ग्या -ग्यं, वासक्षमः -मा -मं, वासार्हः -र्हा -र्हं, आजीव्यः -व्या -व्यं, उपजीव्यः -व्या -व्यं.

INHABITANT, *s.* वासी *m.* (न्), निवासी *m.*, वासकारी *m.* (न्), निवासकारी *m.*, निलायी *m.* (न्), स्थायी *m.* (न्), अवस्थायी *m.*, स्थः or संस्थः in comp.

INHABITATION, *s.* वासः, निवासः, निवसनं, वसतिः *f.*, निवसतिः *f.*, निलयः -यनं.

INHABITED, *p. p.* उषितः -ता -तं, अध्युषितः -ता -तं, अध्यासितः -ता -तं, सेवितः -ता -तं, अधिष्ठितः -ता -तं, निषेवितः -ता -तं, जुष्टः -ष्टा -ष्टं; 'formerly inhabited by cattle,' उषितकुचीनः -ना -नं; 'an inhabited country,' जनपदः, जानपदः.

INHABITING, *part.* वसन् -सन्ती -सती -सत् (त्), निवसन् -सन्ती -सत् (त्), निवासी -सिनी -सि (न्), कृतालयः -या -यं, आश्रितः -ता -तं, समाश्रितः -ता -तं, सेवी -विनी -वि (न्), अधिशयानः -ना -नं.

To INHALE, *v. a.* श्वस् (c. 2. श्वसिति -तुं), निःश्वस्, उरःस्थानं or वक्षःस्थानं or हृदयस्थानं श्वासेन पॄ (c. 10. पूरयति -यितुं) or वायुना पॄ, श्वासं कॄ, निपा (c. 1. -पिबति -पातुं).

INHARMONIOUS, *a.* विस्वरः -रा -रं, अपस्वरः -रा -रं, ककैशस्वनः -ना -नं.

To INHERE, *v. n.* निष्ठा (c. 1. -तिष्ठति -ष्ठातुं), अन्तः स्था, अधिष्ठा, अन्तर्भू, अन्तर्वृत् (c. 1. -वर्तते -र्त्तितुं), अन्तर् जा in pass. (जायते), सहजः -जा -जं भू.

INHERENCE, INHERENCY, *s.* निष्ठा -ष्ठानं, निष्ठितिः *f.*, अन्तःस्थितिः, अधिष्ठितिः *f.*, अधिष्ठानं, संस्था, संस्थितिः *f.*, स्थितिः *f.*, अन्तर्भावः, अन्तर्वर्त्तनं, अन्तर्वृत्तिः *f.*, अनुषक्तः -क्तिका, निरूढिः *f.*, समवायः, समवायसम्बन्धः.

INHERENT, *a.* निष्ठः -ष्ठा -ष्ठं, निष्ठितः -ता -तं, अन्तर्भवः -वा -वं, अन्तर्भूतः -ता -तं, अन्तर्जातः -ता -तं, अन्तरस्थः -स्था -स्थं, अन्तःस्थः -स्था -स्थं, अन्तःस्थायी -यिनी -यि (न्), अन्तर्वर्त्ती -र्त्तिनी -र्त्ति (न्), निजः -जा -जं, सहजः -जा -जं, निरूढः -ढा -ढं, अनुषक्ती -क्तिनी -क्ति (न्), अनुषङ्गिकः -की -कं, आनुषङ्गिकः -की -कं, प्रासङ्गिकः -की -कं, आवेशिकः -की -कं, समवायी -यिनी -यि (न्), समवेतः -ता -तं, व्यस्तः -स्ता -स्तं, समस्तः -स्ता -स्तं; 'inherent in the body,' देहनिष्ठः -ष्ठा -ष्ठं. —(Naturally pertaining to) स्वाभाविकः -की -कं, स्वभावजः -जा -जं, प्रकृतिस्थः -स्था -स्थं, नैसर्गिकः -की -कं, औत्सर्गिकः -की -कं, सांसिद्धिकः -की -कं; 'inherent nature,' अन्तर्भावः, स्वभावः.

To INHERIT, *v. a.* अधिकॄ, उत्तरेण or उत्तरम् अधिकॄ, वंशक्रमागतेन प्राप् (c. 5. -आप्नोति -आप्तुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), पितुः प्राप्, पितृतः प्राप्, क्रमागतत्वेन प्राप्, अन्वयागतेन प्राप्, वंशाधिकारेण प्राप्, पारम्पर्येण प्राप्, वंशक्रमेण पितुः प्राप्, पैतृकाधिकारं प्राप्, अधिकारी -रिणी -रि भू, उत्तराधिकारी भू, दायादो भू; 'to inherit property,' पैतृकरिक्थं प्राप्, गोत्ररिक्थं प्राप्, क्रमागतरिक्थं प्राप्.

INHERITABLE, *a.* पितृप्राप्यः -प्या -प्यं, पितृपुत्रपरम्पराभोग्यः -ग्या -ग्यं, उत्तराधिकारोपभोग्यः -ग्या -ग्यं, औद्धारिकः -की -कं, दाययोग्यः -ग्या -ग्यं.

INHERITANCE, *s.* (Act of receiving an inheritance) पैतृकरिक्थग्रहणं, रिक्थप्राप्तिः *f.*, अधिकारप्राप्तिः *f.*, रिक्थग्रहणं, वंशग्रहणं, रिक्थभागग्रहणं, दायभागप्राप्तिः *f.* —(Right of inheritance) उत्तराधिकारः -रिता, अधिकारः -रिता -त्वं, रिक्थाधिकारः, दायत्वं, दायाधिकारः. —(Heritage, estate, patrimony) पैतृकरिक्थं, पैतृकं रिक्थं or ऋक्थं, गोत्ररिक्थं, पैतृकधनं, गोत्रधनं, दायः, ऋक्थभागः, पैतृकं, औद्धारिकं, क्रमागतरिक्थं, क्रमागतधनं. —(Portioning of inheritance) दायविभागः, दायभागः, रिक्थविभागः, उद्धारविभागः, रिक्थवण्टनं; 'to divide an inheritance,' पैतृकरिक्थं भज् (c. 1. भजति -ते, भक्तुं) or विभज्. —(Share of an inheritance) भागः, अंशः, उद्धारः.

INHERITED, *p. p.* पितृप्राप्तः -प्ता -प्तं, पितृगृहीतः -ता -तं, क्रमागतेन प्राप्तः -प्ता -प्तं, क्रमागतः -ता -तं, क्रमायातः -ता -तं, क्रमाद् आगतः -ता -तं, अन्वयागतः -ता -तं, परम्पराप्राप्तः -प्ता -प्तं, परम्परायातः -ता -तं, पारम्पर्येणागतः -ता -तं, परम्परीणः -णा -णं.

INHERITOR, *s.* अधिकारी *m.* (न्), उत्तराधिकारी *m.*, दायादः, भागी *m.* (न्), भाक् in comp. (क्), अंशी *m.* (न्); 'inheritor of property,' धनाधिकारी *m.*, रिक्थभागी *m.* (न्). *See* HEIR.

INHERITRESS, INHERITRIX, *s.* अधिकारिणी, उत्तराधिकारिणी, दायादी.

To INHIBIT, *v. a.* नियम् (c. 1. -यच्छति -यन्तुं), संयम्, निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), निरुध् (c. 7. -रुणद्धि -रोद्धुं), अवरुध्, वॄ (c. 10. वारयति -यितुं), निषॄ, निषिध् (c. 1. -षेधति -षेद्धुं).

INHIBITION, *s.* संयमः, निग्रहः, निवारणं, निरोधः, संरोधः, निषेधः.

INHOSPITABLE, *a.* अनातिथेयः -यी -यं, अनातिथ्यः -थ्यी -थ्यं, अतिथिद्वेषी -षिणी -षि (न्), अभ्यागतद्वेषी &c., आतिथ्यविमुखः -खा -खं, सत्कारद्वेषी &c., सत्कारविमुखः -खा -खं, असत्कारशीलः -ला -लं, अभ्यागतानुपकारी -रिणी -रि (न्), अभ्यागताश्रद्धः -द्धा -द्धं, अभ्यागतार्हितः -ता -तं, अभ्यागतानादरी -रिणी -रि (न्).

INHOSPITABLENESS, INHOSPITALITY, *s.* अनातिथ्यं, अनातिथेयत्वं, अनतिथित्वं, असत्कारः, असत्कर्म्म *n.* (न्), अतिथिद्वेषः, अभ्यागतद्वेषः, अतिथ्यनादरः, अतिथ्यसत्कारः.

INHOSPITABLY, *adv.* अनातिथेयं, अनातिथ्यपूर्व्वं, असत्कारेण, असत्कारपुरःसरं, अतिथिद्वेषिवत्.

INHUMAN, *a.* अमनुष्यः -ष्या -ष्यं, अमनुष्यधर्म्मा -र्म्मी -र्म्म (न्), मनुष्यविधर्म्मा &c. —(Cruel) निर्दयः -या -यं, दयाहीनः -ना -नं, क्रूरः -रा -रं, क्रूरकर्म्मा -र्म्मी -र्म्म (न्), निष्ठुरः -रा -रं, निष्कृपः -पा -पं, निष्करुणः -णा -णं, निर्घृणः -णा -णं, राक्षसधर्म्मा &c., कठिनहृदयः -या -यं.

INHUMANITY, *s.* अमनुष्यत्वं, निर्दयता -त्वं, क्रूरता, क्रौर्य्यं, दयाहीनता, निष्ठुरता, नैष्ठुर्य्यं, निष्करुणता, कृपाहीनता, दौरात्म्यं.

INHUMANLY, *adv.* अमनुष्यवत्, निर्दयं, निष्ठुरं, नैष्ठुर्य्येण, क्रूरवत्, क्रौर्य्येण, निष्करुणं, राक्षसवत्, निष्कृपं, दुरात्मवत्.

INHUMATION, *s.* भूमिखननं, निखननं, निखातत्वं, भूमौ निखननं, भूमिसमर्पणं, भूमिनिक्षेपः, भूमिनिवेशनं, क्षितिन्यासः.

To INHUME, *v. a.* भूमौ निखन् (c. 1. -खनति -नितुं) or निधा (c. 3. -दधाति -धातुं) or स्था in caus. (स्थापयति -यितुं) or सम् in caus. (-अर्पयति -यितुं) or निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or न्यस् (c. 4. -अस्यति -असितुं).

INIMICAL, *a.* वैरी -रिणी -रि (न्), अहितः -ता -तं, अहितकारी -रिणी -रि (न्), द्वेषी -षिणी -षि (न्), द्वेषणः -णा -णं, विद्वेषी &c., विद्वेष्टृ -ष्ट्री -ष्टृ (ष्टृ), सवैरः -रा -रं, अपथ्यकारी &c., अपकारी &c., प्रतिकूलः -ला -लं, विरोधी -धिनी -धि (न्), विपक्षः -क्षा -क्षं, प्रतिपक्षः -क्षा -क्षं, द्रोहबुद्धिः -द्धिः -द्धि, द्रोहवृत्तिः -त्तिः -त्ति, शात्रवः -वी -वं, शात्रवीयः -यी -यं, अहितमनाः -नाः -नः (स्), अहितशीलः -ला -लं, अमित्रः -त्रा -त्रं, अखिन्नः -न्ना -न्नं, असुहृद् *m. f. n.*, अनुपकारी -रिणी -रि (न्), अननुकूलः -ला -लं, विपरीतः -ता -तं.

INIMICALLY, *adv.* शत्रुवत्, अहितवत्, सवैरं, अमित्रवत्, अखिन्नवत्, शत्रुबुद्ध्या, द्रोहबुद्ध्या, प्रतिकूलं, विरोधेन, विरुद्धं, विपक्षवत्, अननुकूलं, विपरीतं, रिपुवत्.

INIMITABILITY, *s.* अनुपमेयता, अननुकार्य्यता, अनन्यसाध्यत्वं, अद्वितीयता.

INIMITABLE, *a.* अनुपमेयः -या -यं, अननुकार्य्यः -र्य्या -र्य्यं, अननुकरणीयः

-या -यं, अनुपमः -मा -मं, अप्रतिमः -मा -मं, उपमातीतः -ता -तं, अनुकरणातिगः -गा -गं, अनन्यसाध्यः -ध्या -ध्यं, अनन्यशक्यः -क्या -क्यं, अन्यासाध्यः -ध्या -ध्यं, अन्याशक्यः -क्या -क्यं, अतुल्यः -ल्या -ल्यं, अद्वितीयः -या -यं, असाधारणः -णा -णी -णं.

INIMITABLY, *adv.* अनुपमेयं, अननुकरणीयं, अतुल्यं, अनुपमं.

INIQUITOUS, *a.* अन्यायी -यिनी -यि (न्), अन्याय्यः -य्या -य्यं, अयथान्यायः -या -यं, न्यायविरुद्धः -द्धा -द्धं, अधर्माभिकः -की -कं, अधर्मी -र्मिणी -र्मि (न्), धर्मोपेतः -ता -तं, पापः -पा -पं, पापी -पिनी -पि (न्), पापिष्ठः -ष्ठा -ष्ठं, खलः -ला -लं, दुर्वृत्तः -त्ता -त्तं, दुराचारः -रा -रं, कुकर्मी -र्मिणी -र्मि (न्), दुष्टः -ष्टा -ष्टं, क्रिल्बिषी -षिणी -षि (न्).

INIQUITOUSLY, *adv.* अन्यायतस्, अयथान्यायं, न्यायविरुद्धं, न्यायविरोधेन, अधर्मतस्, अधर्मेण, पापिष्ठवत्, दुष्टवत्, खलवत्, दुराचारवत्.

INIQUITY, *s.* अधर्मः -र्मता -त्वं, अन्यायः, अन्याय्यत्वं -ता, अन्यायिता, धर्मविरोधः, न्यायविरोधः, न्यायविरुद्धता, धर्मोपेतत्वं, पापं, दुष्टता, पापिष्ठता, खलता, दुर्वृत्तिः *f.*, दुर्वृत्तत्वं, अनीतिः *f.*, नीतिविरोधः, कुकर्म *n.* (न्), दुष्कर्म *n.*, कुक्रिया, दुराचारत्वं, अपकर्म *n.*, अपचारः, शठता, दौरात्म्यं, कुवृत्तिः *f.*, व्यसनं.

INITIAL, *a.* आदि in comp., आद्यः -द्या -द्यं, आदिकः -का -कं, आदिमः -मा -मं, आदिस्थः -स्था -स्थं, आदिवर्ती -र्तिनी -र्ति (न्), प्राथमिकः -की -कं, प्रथमः -मा -मं, पूर्वः -र्वा -र्वं, पौर्विकः -की -कं, पौरस्यः -स्या -स्यं, आरम्भकः -का -कं, आरम्भस्थः -स्था -स्थं.

INITIAL, *s.* (First letter of a name) नामादिवर्णः, नामाद्यक्षरं, आद्यवर्णः, प्रथमवर्णः.

To INITIATE, *v. a.* (Instruct in rudiments or principles) विद्यारम्भान् or विद्यातत्त्वानि or प्रथमतत्त्वानि उपदिश् (c. 6. -दिशति -देष्टुं), प्रथमोपदेशं कृ, प्रथमशिक्षां कृ, विद्याप्रवेशं कृ, विद्याभिनिवेशं कृ, विद्योपन्नं कृ.—(Introduce by initiatory ceremonies) दीक्ष् (c. 1. दीक्षते -क्षितुं), उपनी (c. 1. -नयति -नेतुं), दीक्षापूर्वेण् उपनी, दीक्षाकर्मपूर्वं or संस्कारपूर्वं or अभिमन्त्रणपूर्वं or मन्त्रपूर्वं प्रविश् (c. 10. -वेशयति -यितुं), दीक्षां कृ, दीक्षाकर्म कृ.—(Instruct in initiatory ceremonies) दीक्षाकर्म उपदिश्, संस्कारमन्त्रान् or दीक्षामन्त्रान् उपदिश्.

INITIATED, *p. p.* दीक्षितः -ता -तं, कृतदीक्षः -क्षा -क्षं, संस्कृतः -ता -तं, कृतसंस्कारः -रा -रं, जातसंस्कारः -रा -रं, संस्कारितः -ता -तं, अभिसंस्कृतः -ता -तं, अभिमन्त्रितः -ता -तं, मन्त्रवान् -वती -वत् (न्), उपनीतः -ता -तं, उपनीयमानः -ना -नं, कृताभिषेकः -का -कं, राद्धः -द्धा -द्धं, उपदिष्टः -ष्टा -ष्टं, कृतविद्यारम्भः -म्भा -म्भं, कृतविद्योपन्नः -न्ना -न्नं, कृतविद्याप्रवेशः -शा -शं, विद्याग्रविष्टः -ष्टा -ष्टं.

INITIATION, *s.* (Instruction in rudiments or principles) विद्यारम्भोपदेशः, विद्यातत्त्वोपदेशः, प्रथमतत्त्वोपदेशः, प्रथमोपदेशः, प्रथमशिक्षा, विद्याप्रवेशः -शनं, विद्याभिनिवेशः -शनं.—(Introduction by initiatory ceremonies, &c.) दीक्षा, दीक्षाकरणं, दीक्षाकर्म *n.* (न्), उपनयः -यनं, उपनायः, दीक्षापूर्वम् उपनयनं, दीक्षापूर्वं प्रवेशनं, संस्कारः, अभिमन्त्रणं, अभिषेकः.—(Instruction in initiatory ceremonies) दीक्षाकर्मोपदेशः, मन्त्रोपदेशः, उपदेशः.

INITIATIVE, *s.* (Introductory step) आरम्भः, प्रत्युत्तमनः, प्रत्युत्तमनिः *f.*

INITIATIVE, INITIATORY, *a.* आरम्भकः -का -कं, प्रारम्भकः -का -कं, आद्यः -द्या -द्यं, आदिमः -मा -मं, आदिकः -का -कं.—(Relating to introductory ceremonies) दीक्षाकर्मसम्बन्धी -न्धिनी -न्धि (न्).

To INJECT, *v. a.* अन्तःक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अन्तःप्रक्षिप्, निःक्षिप्, अन्तःक्षेपं कृ, अन्तःप्रक्षेपं कृ, अन्तःकृ.—(With a syringe) वस्तिद्वारेण अन्तःक्षिप् or अन्तःप्रक्षिप्.

INJECTED, *p. p.* अन्तःक्षिप्तः -प्ता -प्तं, अन्तःप्रक्षिप्तः -प्ता -प्तं, निःक्षिप्तः -प्ता -प्तं.

INJECTION, *s.* अन्तःक्षेपः -पणं, अन्तःप्रक्षेपः -पणं, निःक्षेपणं.—(Clyster) वस्तिः *m. f.*

To INJOIN. *See To* ENJOIN.

INJUDICIOUS, *a.* अविवेकी -किनी -कि (न्), अविवेचकः -का -कं, विवेकशून्यः -न्या -न्यं, विवेचनाशून्यः -न्या -न्यं, अविवेकदूषा -षा -षं (न्), अविज्ञः -ज्ञा -ज्ञं, अविचक्षणः -णा -णं, अबुद्धिमान् -मती -मत् (त्), अविचारी -रिणी -रि (न्), अविचारकः -का -कं, विचारशून्यः -न्या -न्यं, अपरिच्छेदी -दिनी -दि (न्).

INJUDICIOUSLY, *adv.* अविवेकेन, अविवेचकवत्, विवेकं विना, अविज्ञवत्, अविचारेण, विचारं विना, अविचक्षणवत्.

INJUDICIOUSNESS, *s.* अविवेकः -कता -कित्वं, अविवेचकत्वं, विवेकशून्यता, अविवेचना, अविज्ञता, अविचारः, विचारशून्यता, अविचक्षणता, अविचक्षण्यं, अबुद्धिमत्त्वं, अपरिच्छेदः, परिच्छेदहीनता.

INJUNCTION, *s.* आज्ञा, आदेशः, निदेशः, निर्देशः, नियोगः, चोदनं -ना, नियमः, निदर्शनं, विधानं, शासनं, वचनं; 'sacred injunction,' विधिः *m.*, कल्पः; 'chief injunction,' मुख्यः; 'secondary,' अनुकल्पः.

To INJURE, *v. a.* हिंस् (c. 7. हिनस्ति, c. 1. हिंसति -सितुं), विहिंस्, उपहिंस्, आहिंस्, अपकृ, अर्तिं कृ, अर्तं कृ, अर्ण् (c. 8. अर्णोति -र्णितुं), परिक्षण्, विक्षत्, पीड् (c. 10. पीडयति -यितुं), अद् (c. 10. अदयति -यितुं), समद्, व्यथ् (c. 10. व्यथयति -यितुं), रिष् (c. 1. रेषति, c. 4. रिष्यति, रेषितुं, रेष्टुं), क्षि (c. 5. क्षिणोति, c. 1. क्षयति, क्षेतुं), दुष् (c. 10. दूषयति -यितुं), नश् (c. 10. नाशयति -यितुं), हन् (c. 2. हन्ति -न्तुं), विहन्, उपहन्, धृष् (c. 10. धर्षयति -यितुं), द्रोहं कृ, द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं), अपराध् (c. 5. -राध्नोति, c. 4. -राध्यति -राद्धुं) with gen. c., रिष् (c. 1. रेषति, रेढुं), अतिवृत् (c. 1. -वर्तते -र्तितुं), अपकारं कृ, अपायं कृ, हिंसां कृ, अहितं कृ, अन्यायं कृ, हानिं कृ, ध्वंसं कृ, दुःखं दा, क्लेशं दा, अनिष्टं कृ.

INJURED, *p. p.* हिंसितः -ता -तं, विहिंसितः -ता -तं, अपकृतः -ता -तं, प्राप्तापकारः -रा -रं, कृतापकारः -रा -रं, क्षतः -ता -तं, परिक्षतः -ता -तं, विक्षतः -ता -तं, अर्दितः -ता -तं, पीडितः -ता -तं, निपीडितः -ता -तं, व्यथितः -ता -तं, रिष्टः -ष्टा -ष्टं, कृतध्वंसः -सा -सं, दूषितः -ता -तं, विहतः -ता -तं, प्राप्तापायः -या -यं, प्राप्तहानिः -निः -नि, आपन्नः -न्ना -न्नं, व्यापादितः -ता -तं.

INJURER, *s.* हिंसकः, हिंसाकारी *m.* (न्), अपकारी *m.*, अपकारकः, अहितकारकः, अन्यायकारी *m.*, परापकारी *m.*, अनिष्टकारी *m.*, अहितकारी *m.*, द्रोहकारी *m.*, रेष्टा *m.* (ष्टृ), नक्षिता *m.* (तृ), नंष्टा *m.* (ष्टृ), द्रोही *m.* (न्), क्षेपी *m.* (न्), विक्षेटकः.

INJURIOUS, *a.* हिंसकः -का -कं, हिंसः -सा -सं, हिंसालुः -लुः -लु -लुकः -का -कं, हिंसात्मकः -का -कं, अपकारी -रिणी -रि (न्), अपकारकः -का -कं, आपकरः -री -रं, अहितकरः -री -रं, अहितजनकः -का -कं, हानिकरः -री -रं जनकः -का -कं, अहितकरः -री -रं, अनिष्टकरः -री -रं, अहितः -ता -तं, नृशंसः -सा -सं, शरारुः -रुः -रु, शारुकः -का -कं, रिष्यः -ष्या -ष्यं, घातुकः -का -कं, उपघातकः -का -कं, नंशुकः -का -कं, बाधकः -का -कं, द्रोही -हिणी -हि (न्), भूतघ्नुक् *m. f. n.* (ट्).

INJURIOUSLY, *adv.* हिंसापूर्वं, हिंसया, सापकारं, सापायं, अपकारेण, अहितं, क्षतिपूर्वं, द्रोहपूर्वं, क्षतपूर्वं, द्रोहेण, हिंसप्रकारेण, नृशंसं, यथा हिंसा क्रियते तथा, यथा क्षतं or अपायो जायते तथा, सद्रोहं, सदघर्षं.

INJURY, *s.* (Wrong) हिंसा -सनं, अपकारः, अपकृतं, अपकृतिः *f.*, अपक्रिया, द्रोहः, अभिद्रोहः, अन्यायः, अपराधः, हिंसाकर्म *n.* (न्), निकारः,

विप्रकारः, पीडा -डनं, प्राणिपीडा, अहिंसनं, अनिष्टं, व्यापादः -दनं, विहेठः -ठनं.—(Hurt, harm, detriment) क्षतिः *f.*, क्षतं, परिक्षतिः *f.*, परिक्षतं, अपकारः, अपकृतं, अपायः, हानिः *f.*, नाशः, ध्वंसः, अपचयः, अपचितिः *f.*, दूषणं, अदेना, व्ययः, उपक्षयः, बाधः, दुःखं, दोषः, भंशः.

Injustice, *s.* अधर्मः -र्मता -र्त्वं, अन्यायः -यता -यत्वं, अन्याय्यता, अन्यायिता, धर्मविरोधः, धर्मविरुद्धता, धर्मापेतता, न्यायविपर्ययः, न्यायविरोधः, न्यायविरुद्धता, अनीतिः *f.*, अनयः, दुर्नीतिः.

Ink, *s.* मसिः *f.* -सी, मषिः *f.* -षी, मसिका, मसीजलं, मलिनाम्बु *n.*, पत्राञ्जनं, अञ्जनं, कालिका, कालौ, वर्णिका, मेला, गोला; 'red ink,' अलक्तरसः, अलक्तः -क्तकं.

To ink, *v. a.* मस्या लिप् (c. 6. लिम्पति, लेप्तुं) or मलिन (nom. मलिनयति -यितुं) or दुष् (c. 10. दूषयति -यितुं), मसिदूषितं -तां -तं कृ, कालीकृ.

Ink-horn, *s.* मसिधानी, मसिकूपी, मसिभाजनं, मसिपात्रं, मस्याधारः.

Inkling, *s.* ईषज्ज्ञानं, किंचिज्ज्ञानं, ईषद्बोधनं, ईषत्सूचना -नं, किंचित्सूचितं, इङ्गितं, सङ्केतः, भासः, आभासः, वासना.

Inkstand, *s.* मसिधानी -नं, मसिकूपी, मसिभाजनं, मस्याधारः, मसिपात्रं, मेलान्धुः *m.*, वार्हलः -लं, लिपिसज्जापात्रं, लेखसाधनपात्रं, लिपिसामग्र्यभाजनं.

Inky, *a.* मसिमयः -यी -यं, मसिवर्णः -र्णा -र्णं, समसिः -सिः -सि, मसीयः -या -यं, मसिलिप्तः -प्ता -प्तं, मसिदूषितः -ता -तं.

Inlaid, *p. p.* खचितः -ता -तं, अनुविद्धः -द्धा -द्धं, प्रतिबद्धः -द्धा -द्धं, प्रणिहितः -ता -तं, छुरितः -ता -तं, पिनद्धः -द्धा -द्धं, जडितः -ता -तं, करसः -सा -सं -सितः -ता -तं; 'is inlaid,' प्रणिधीयते.

Inland, *a.* मध्यदेशीयः -या -यं, मध्यदेशी -शिनी -शि (न्), मध्यदेशस्थः -स्था -स्थं, देशमध्यस्थः -स्था -स्थं, देशमध्यवर्त्ती -र्त्तिनी -र्त्ति (न्), समुद्रदूरस्थः -स्था -स्थं, समुद्रदूरवर्त्ती -र्त्तिनी -र्त्ति (न्), समुद्रानिकटवर्त्ती &c., असमुद्रतीरस्थः -स्था -स्थं.—(Not foreign, domestic) अविदेशीयः -या -यं, देशीयः -या -यं, दैशिकः -की -कं, देश in comp.

Inlander, *s.* समुद्रदूरवासी *m.* (न्), मध्यदेशजः, मध्यदेशवासी *m.*

To inlapidate, *v. a.* पाषाणीकृ, प्रस्तरीकृ, पाषाणवत् कठिनीकृ.

To inlay, *v. a.* नानावर्णद्रव्यैः खच् (c. 10. खचयति -यितुं) or अनुव्यध् (c. 4. -विध्यति -व्यद्धुं) or छुर् (c. 6. छुरति -रितुं) or बन्ध् (c. 9. बध्नाति, बन्द्धुं), निधा (c. 3. -दधाति -धातुं), प्रणिधा, चित्रविचित्रीकृ, करसीकृ, नानाविधद्रव्यैः खचितं -तां -तं कृ or जडितं कृ.

Inlayer, *s.* प्रणिधाता *m.* (तृ), नानावर्णद्रव्यनिबन्धा *m.* (न्धृ), प्रणिधायी *m.* (न्).

Inlaying, *s.* नानावर्णद्रव्यनिबन्धनं, प्रणिधानं, विचित्रीकरणं.

Inlet, *s.* (Entrance, place of ingress) द्वारं, प्रवेशद्वारं, प्रवेशमार्गः, पथः, मार्गः.—(Creek, or recess in the shore of the sea) समुद्रभङ्गः, वङ्गः, खङ्गः, तटभङ्गः, तीरभङ्गः, तीरभेदः, पुटभेदः, खातं.

To inlist, *v. a.* *See* Enlist.

Inly, *a.* आन्तरिकः -की -कं, अन्तरस्थः -स्था -स्थं. *See* Internal, Inward.

Inmate, *s.* सहवासी *m.* (न्), निवासी *m.* (न्), सहवर्त्ती *m.* (न्), सहस्थायी *m.*, एकगृहवासी *m.*, एकगृहस्थायी *m.*

Inmost, *a.* अन्तरतमः -मा -मत्, अन्तरतमस्थः -स्था -स्थं, अत्यभ्यन्तरः -रा -रं, अत्यभ्यन्तरस्थः -स्था -स्थं, अत्यन्तरस्थः &c., अत्यभ्यन्तरवर्त्ती -र्त्तिनी -र्त्ति (न्), अत्यान्तरिकः -की -कं, अत्यन्तगतः -ता -तं, अत्यन्तभूतः -ता -तं.

Inn, *s.* (House for the lodging of travellers) उत्तरणगृहं, उत्तरणशाला, उत्तरणस्थानं, उत्तरणीयगेहं, उपकारी -रिका, उपकारिकागृहं, उपकार्य्या, औपकार्य्या -र्य्यं, प्रवासीयगृहं.—(Tavern) गन्धा -न्धिका, मदिरागृहं, मदिराशाला.—(Residence of lawyers) स्मृतिशास्त्रज्ञमठः, स्मृतिशास्त्रज्ञवेश्म *n.* (न्).

To inn, *v. n.* उत्तरणगृहे वस् (c. 1. वसति, वस्तुं), उत्तरणशालां निविश् (c. 6. -विशति -वेष्टुं), अध्वमध्ये रथाद् अवतीर्य्य पूर्व्वोक्तगृहं निविश्.

To inn, *v. a.* उत्तरणगृहे वस् (c. 10. वासयति -यितुं), उत्तरणशालां निविश् (c. 10. -वेशयति -यितुं).

Inn-keeper, *s.* उत्तरणगृहपतिः *m.*, उत्तरणशालास्वामी *m.* (न्), उपकारिकागृहाधिकारी *m.* (न्), शौण्डिकः.

Innate, *a.* सहजः -जा -जं, सहजातः -ता -तं, अन्तर्जातः -ता -तं, निजः -जा -जं, अन्तर्भवः -वा -वं, अन्तरुत्पन्नः -न्ना -न्नं, अन्तर्भूतः -ता -तं, अन्तर्वर्त्ती -र्त्तिनी -र्त्ति (न्), अन्तरस्थः -स्था -स्थं, स्वाभाविकः -की -कं, स्वभावजः -जा -जं, नैसर्गिकः -की -कं, निसर्गजः -जा -जं, औत्सर्गिकः -की -कं, प्रकृतिस्थः -स्था -स्थं, प्राकृतिकः -की -कं, औत्पत्तिकः -की -कं, अन्तरीयः -या -यं.

Innately, *adv.* स्वभावात् -वेन, स्वभावतस्, सहजं, निजभावेन.

Innateness, *s.* स्वाभाविकत्वं, सहजत्वं, अन्तर्भावः, अन्तर्जातत्वं, नैसर्गिकत्वं.

Innavigable, *a.* अनौताय्यः -य्या -य्यं, अनाय्यः -य्या -य्यं, नावताय्यः -य्या -य्यं, नावगम्यः -म्या -म्यं, अनौगम्यः -म्या -म्यं, नौगमनाशक्यः -क्या -क्यं.

Inner, *a.* अन्तरस्थः -स्था -स्थं, आन्तरिकः -की -कं, आन्तरः -री -रं, अन्तरीयः -या -यं, आभ्यन्तरः -री -रं, अभ्यन्तर or अन्तर or अन्तर् in comp., अन्तर्भवः -वा -वं, अन्तर्गतः -ता -तं, अन्तर्भूतः -ता -तं, अन्तर्वर्त्ती -र्त्तिनी -र्त्ति (न्), अन्तरतमः -मा -मत्, अन्तःस्थितः -ता -तं, मध्यस्थः -स्था -स्थं, गर्भस्थः -स्था -स्थं, अन्तरङ्गः -ङ्गा -ङ्गं; 'inner apartments,' अन्तर्गृहं, अन्तर्भवनं, भवनोदरं, वासगृहं.

Innermost, *a.* अन्तरतमः -मा -मत्. *See* Inmost.

Innocence, innocency, *s.* (Freedom from guilt) शुचिता, शुद्धता -त्वं, निष्पापत्वं, निरपराधता -धिता, अनपराधता, निर्दोषत्वं, अपापत्वं, दोषहीनता, अपराधहीनता, अपराधशून्यता, निष्कालङ्कता -त्वं, अनघता, निर्म्मलता, शुद्धमतित्वं, विमलचित्तत्वं, मतिशुद्धता, चित्तशुद्धिः *f.*, शुद्धिः *f.*—(Guilelessness) निष्कापट्यं, अकापट्यं, मायाहीनता, छलहीनता, सारल्यं, अदुष्टता; 'innocence and guilt,' शुचिपापौ *m.* du.

Innocent, *a.* शुचिः -चिः -चि, निरपराधः -धा -धं, अनपराधः -धा -धं -धी -धिनी -धि (न्), निर्दोषः -षा -षं -षी -षिणी -षि (न्), अदोषः -षा -षं, निष्पापः -पा -पं -पी -पिनी -पि (न्), अपापः -पा -पं, पापहीनः -ना -नं, अपराधहीनः -ना -नं -शून्यः -न्या -न्यं, पापरहितः -ता -तं, शुद्धः -द्धा -द्धं, शुद्धमतिः -तिः -ति, शुचिमनाः -नाः -नः (स्), शुचिकर्म्मा -र्म्मा -र्म्म (न्), शुक्लकर्म्मा &c., अकृष्णकर्म्मा &c., शिष्प्रदानः -ना -नं, निष्कलङ्कः -ङ्का -ङ्कं, अनघः -घा -घं, अकृतापराधः -धा -धं, अकृतैनाः -नाः -नः (स्), अकृतपापः -पा -पं, निर्म्मलः -ला -लं, निर्म्मलचित्तः -त्ता -त्तं, विमलचित्तः -त्ता -त्तं, अदूष्यदोषः -षा -षं, अदूष्यापराधः -धा -धं, अहेतुकः -का -कं.—(Guileless) निष्कपटः -टा -टं, निर्व्याजः -जा -जं, छलरहितः -ता -तं, निर्व्यलीकः -का -कं, विमलात्मा -त्मा -त्म (न्), मायाहीनः -ना -नं, सरलः -ला -लं, निष्कृत्रिमः -मा -मं, अकृत्रिमः -मा -मं, अदुष्टः -ष्टा -ष्टं.

Innocent, *s.* (A guiltless person) शुचिजनः, निरपराधी *m.* (न्).

Innocently, *adv.* अनपराधेन, निरपराधं, पापं विना, निष्पापं, शुचि, शुचिवत्, शुचिमनसा, निर्म्मलचेतसा, अनघं, अनघवत्, निर्व्यलीकं, निष्कपटं.

Innocuous, *a.* अहिंसकः -का -कं, अहिंस्रः -स्रा -स्रं, हिंसारहितः -ता -तं, अहिंसाकरः -री -रं, अनपकारी -रिणी -रि (न्), अनपकारकः -का -कं, अक्षतिकारकः -का -कं, अद्रोही -हिणी -हि (न्).

Innocuously, *adv.* अहिंसया, अहिंसापूर्व्वं, अक्षतिपूर्व्वं, अद्रोहेण.

INNOCUOUSNESS, *s.* अहिंसा, अनपकारः -रकता, अहिंसकत्वं, अद्रोहः.

To INNOVATE, *v. a.* (Introduce new customs) नूतनरीतिं or नवव्यवहारान् स्था in caus. (स्थापयति -यितुं) or संस्था or प्रवृत् (c. 10. -वर्तयति -यितुं) or कॢप् (c. 10. कल्पयति -यितुं) or प्रकॢप्, व्यवहारान्तराणि स्था, कुलव्यवहारभिन्नान् नवाचारान् स्था, कुलाचारभिन्नान् नवीनव्यवहारान् कॢप्, देशव्यवहारभिन्नान् नूतनव्यवहारान् प्रकॢप्, देशाचारान् परिवृत् or नवीकृ, नूतनसम्प्रदायान् or मतान्तराणि स्था, अन्यसम्प्रदायान् कृ or कॢप्, नूतनकर्म्माणि प्रवृत् (c. 10. -वर्तयति -यितुं).

INNOVATION, *s.* (The act) नवव्यवहारस्थापनं, नूतनरीतिसंस्थापनं, व्यवहारान्तरकल्पनं, नवीनाचारसंस्थापनं, नूतनसम्प्रदायकल्पनं, देशाचारपरिवर्त्तनं, कुलाचारपरिवर्त्तनं, नूतनकर्म्मप्रवर्त्तनं, नवीकरणं.—(The change made) नूतनरीतिः *f.*, नवरीतिः *f.*, नवीनव्यवहारः, व्यवहारान्तरं, रीत्यन्तरं, नवाचारः, नवाचरितं, नवचरितं, नवमार्गः, नवधारा.

INNOVATOR, *s.* नवरीतिस्थापकः, नूतनव्यवहारस्थापकः, व्यवहारान्तरप्रकल्पकः, नवव्यवहारप्रवर्त्तकः, देशव्यवहारपरिवर्त्तकः, कुलाचारपरिवर्त्तकः, नवसम्प्रदायप्रवर्त्तकः, मतान्तरस्थापकः.

INNOXIOUS, *a.* अहिंसकः -का -कं, अहिंसः -सा -सं, अनपकारी -रिणी -रि (न्), अक्षतिकरः -री -रं, अघातुकः -का -कं, अद्रोही -हिणी -हि (न्), अरिष्यः -ष्या -ष्यं, अशास्त्रकः -की -कं.

INNOXIOUSLY, *adv.* अहिंसया, अनपकारेण, अद्रोहेण, अक्षतिपूर्व्वं.

INNOXIOUSNESS, *s.* अहिंसता -त्वं, अनपकारः -रकत्वं, अहिंसकत्वं -ता, अघातुकत्वं, अशास्त्रकत्वं, हिंसात्यागः.

INNUENDO, *s.* वक्रोक्तिः *f.*, व्यंग्योक्तिः *f.*, व्यंग्यः -ग्यं, भङ्गिः *f.*, भंग्युक्तिः *f.*, श्लेषोक्तिः *f.*, पर्य्यायोक्तिः *f.*

INNUMERABLE, *a.* अगणनीयः -या -यं, अगण्यः -ण्या -ण्यं, असंख्येयः -या -यं, असंख्यः -ख्या -ख्यं, असंख्यः -ख्या -ख्यं, गणनातीतः -ता -तं, गणनाशक्यः -क्या -क्यं, संख्यातीतः -ता -तं, लक्षगुणः -णा -णं, कोटिगुणः -णा -णं, अगणितः -ता -तं; 'in innumerable numbers,' कोटिशस्.

INNUMERABLENESS, *s.* अगणनीयता, अगण्यता, असंख्येयता, असंख्यता.

INNUTRITION, *s.* [illegible]ष्टिः *f.*, अपोषणं, पोषणाभावः, अभरणं.

INNUTRITIOUS, *a.* अपुष्टिदः -दा -दं, [illegible]ष्टिकरः -री -रं, अपोषकः -का -कं.

INOBSERVABLE, *a.* अलक्ष्यः -क्ष्या -क्ष्यं, दुर्लक्ष्यः &c., अदृश्यः -श्या -श्यं.

To INOCULATE, *v. a.* (A tree) एकवृक्षशाखायां भिन्नवृक्षपल्लवं निविश् (c. 10. -वेशयति -यितुं), जालकं निविश्.—(Insert infectious matter in the flesh) विस्फोटरसबिन्दुं बाहुमांसे निविश् (c. 10. -वेशयति -यितुं), रक्तवरटीजपूयलवम् अन्यमांसे निविश् or त्वक्छेदनानन्तरं बाहुमांसे निविश्, विस्फोटजरसनिवेशनेन रक्तवरटीरोगम् अन्यस्मिन् संक्रम् (c. 10. -क्रामयति -यितुं) or सञ्चर् (c. 10. -चारयति -यितुं).

INOCULATED, *p. p.* (Budded) भिन्नवृक्षशाखानिवेशितः -ता -तं.—(Infected by inoculation with small-pox, &c.) स्फोटजरसनिवेशनेन रक्तवरटीरोगदूषितः -ता -तं.

INOCULATION, *s.* (Budding) एकवृक्षशाखायां भिन्नवृक्षपल्लवनिवेशनं.—(Inserting infectious matter in the flesh) मुख्यजनमांसे विस्फोटपूयलवनिवेशनं, स्फोटजरसनिवेशनेन रक्तवरटीरोगदूषणं or रक्तवरटीरोगसञ्चारणं.

INOCULATOR, *s.* (Of plants) वृक्षशाखायां भिन्नवृक्षपल्लवनिवेशकः.—(Of infectious matter) विस्फोटपूयलवनिवेशकः, रक्तवरटीरोगसञ्चारकः.

INODOROUS, *a.* निर्गन्धः -न्धा -न्धं, अगन्धः -न्धा -न्धं, गन्धहीनः -ना -नं.

INOFFENSIVE, *a.* अनपकारी -रिणी -रि (न्), अनपकारकः -का -कं, अनपकारशीलः -ला -लं, अनपराधी -धिनी -धि (न्), निरपराधः -धा -धं, अहिंसकः -का -कं, अहिंसः -सा -सं, हिंसारहितः -ता -तं, अहिंसाकरः -री -रं, अपरद्रोही -हिणी -हि (न्), अद्रोहशीलः -ला -लं, निर्द्रोही &c., अपरद्रुःखदः -दा -दं, अपरक्लेशदः -दा -दं, अघातुकः -का -कं, अबाधकः -का -कं, अविरोधी -धिनी -धि (न्), निर्दोषी -षिणी -षि (न्), निरुपद्रवी -विणी -वि (न्), सात्विकः -की -कं, सत्वशीलः -ला -लं, अप्रतिभुक् *m. f. n.* (ज्).

INOFFENSIVELY, *adv.* अनपकारेण, अहिंसया, अद्रोहेण, अनपराधेन, निरपराधं.

INOFFENSIVENESS, *s.* अहिंसा, अनपकारः -रिता -रकता, अनपकारशीलता, अहिंसाशीलता, अहिंसा, अद्रोहः, अद्रोहशीलता, अबाधकता, सत्वशीलता, अनपराधिता, हिंसात्यागः.

INOFFICIAL, *a.* अनाधिकारिकः -की -कं, अनधिकारप्रयुक्तः -क्ता -क्तं.

INOPERATIVE, *a.* असाधकः -का -कं, अकार्य्यसाधकः -का -कं, अकार्य्यकारकः -का -कं -री -रिणी -रि (न्), अकिञ्चित्करः -री -रं, अमङ्गलोत्पादकः -का -कं.

INOPPORTUNE, *a.* अकालिकः -की -कं, आकालिकः -की -कं, अप्राप्तकालः -ला -लं, अकालीनः -ना -नं, अनवसरः -रा -रं, अप्राप्तावसरः -रा -रं, असामयिकः -की -कं, असमयोचितः -ता -तं, असमयोपयुक्तः -क्ता -क्तं, अप्रसङ्गोचितः -ता -तं, अप्राप्तप्रसङ्गः -ङ्गा -ङ्गं, अप्रास्ताविकः -की -कं, अकालसदृशः -शी -शं, अप्रस्तावसदृशः -शी -शं, अप्रस्तावयोग्यः -ग्या -ग्यं, असमयानुरूपः -पा -पं, अयथाकालः -ला -लं, अस्थानः -ना -नं, अयोग्यः -ग्या -ग्यं.

INOPPORTUNELY, *adv.* अकाले -लेन, अस्थाने -नं, अनवसरं -रेण, असमयेन, अकालसदृशं, असमयानुरूपेण, अयोग्यं, अयथाकालं, अप्रसङ्गवत्, अपदं, असाम्प्रतं, असम्प्रति.

INOPPORTUNENESS, *s.* अकालिकत्वं, आकालिकत्वं, अकालीनता, असामयिकत्वं, अनवसरः, असमयः, अयोग्यता.

INORDINATE, *a.* अपरिमितः -ता -तं, अत्यन्तः -न्ता -न्तं, आत्यन्तिकः -की -कं, अतिमर्य्यादः -दा -दं, अमर्य्यादः &c., उन्मर्य्यादः &c., मर्य्यादातीतः -ता -तं, अतिक्रान्तमर्य्यादः -दा -दं, मर्य्यादातीतः -ता -तं, अतिमात्रः -त्रा -त्रं, अमितः -ता -तं, अपरिमाणः -णा -णं, अतिमितः -ता -तं, अनियमितः -ता -तं, लंघितमर्य्यादः -दा -दं, लंघितनियमः -मा -मं, उद्रिक्तः -क्ता -क्तं, अतिरिक्तः -क्ता -क्तं.

INORDINATELY, *adv.* अपरिमितं, अत्यन्तं, अतिमर्य्यादं, अतिमात्रं, अतिशयेन, नितान्तं, अतिशयं, अतितरां, सुतरां, अत्यर्थं, तीव्रं, सुभृशं.

INORDINATENESS, *s.* अपरिमितता -त्वं, अपरिमाणं, अमितत्वं, मर्य्यादातिक्रमः, नियमातिक्रमः, आत्यन्तिकत्वं, अमर्य्यादा, उद्रिक्तता, अतिरिक्तता.

INORGANIC, *a.* अप्राणी -णिनी -णि (न्), निर्जीवः -वा -वं, जीवितसाधनहीनः -ना -नं, प्राणवायुसञ्चारहीनः -ना -नं, जडः -डा -डं, निरवयवः -वा -वं, अङ्गरहितः -ता -तं.

INOSCULATION, *s.* अवयवयसन्धिः *m.* -न्धानं, पार्श्वद्वयसंयोगः.

INQUEST, *s.* (Judicial inquiry) विचारः -रणं -रणा, व्यवहारपरीक्षा, व्यवहारदर्शनं.—(Inquiry into the cause of a sudden death) अपमृत्युपरीक्षा, अपमृत्युकारणविचारः, अपमृत्युवृत्तान्तविचारः.

INQUIETUDE, *s.* अशान्तिः *f.*, अशान्तभावता, चित्ताशान्तिः *f.*, चित्तोद्वेगः, उद्विग्नता, अनिर्वृतिः *f.*, चित्तानिर्वृतिः *f.*, मनस्तापः, चित्तवेदना, चित्तव्यथा, मनोदुःखं, मनःपीडा, कष्टं, असास्थ्यं, असस्थता, असमाधानं, आधिः *m.*, क्लेशः, व्याकुलता, आमोहः, मानसी व्यथा, व्यस्तता, अस्थिरता, अस्थैर्य्यं, औत्सुक्यं, वैक्लव्यं.

To INQUINATE, *v. a.* दुष् (c. 10. दूषयति -यितुं), मलिन (nom. मलिनयति -यितुं).

To INQUIRE, *v. a.* (Ask a question) प्रच्छ् (c. 6. पृच्छति, प्रष्टुं), अनुप्रच्छ्, परिप्रच्छ्, समनुप्रच्छ्, प्रश्नं कृ, पृच्छनं कृ, अनुयुज् (c. 7. -युनक्ति

-युंक्ते -योक्ष्यते), अनुयोगं कृ, अभिषद् (c. 10. -षादयति -यितुं).—(Investigate, examine into) परीक्ष् (c. 1. -ईक्षते -क्षितुं), निरूप् (c. 10. -रूपयति -यितुं), अनुसन्धा (c. 3. -दधाति -धातुं), ज्ञा in des. (जिज्ञासते -सितुं), अन्विष् (c. 4. -इष्यति -एषितुं), अन्वेष् (c. 1. -एषते -षितुं), विचर् (c. 10. -चारयति -यितुं), विमृश् (c. 6. -मृशति -ष्टुं), चर्च् (c. 1. चर्चति -र्चितुं), निर्णी (c. 1. -णयति -णेतुं), निश्चि (c. 5. -चिनोति -चेतुं), विनिश्चि, मार्ग् (c. 1. मार्गति, c. 10. मार्गयति -यितुं), मृग् (c. 10. मृगयते -यितुं), गवेष् (c. 10. गवेषयति -यितुं), अभिनिस्थी (c. 1. -ष्थायति -ष्थातुं), जिज्ञासां कृ, अन्वेषणं कृ.—(Inquire about one's health, &c.) कुशलप्रश्नं कृ, कुशलसम्प्रश्नं कृ, सम्प्रश्नं कृ.

INQUIRED, *p. p.* पृष्टः -ष्टा -ष्टं, अनुयुक्तः -क्ता -क्तं, परीक्षितः -ता -तं, जिज्ञासितः -ता -तं, निर्णीतः -ता -तं, चर्चितः -ता -तं, निरूपितः -ता -तं.

INQUIRER, *s.* (One who asks a question) प्रष्टा *m.* (ष्टृ), पृच्छकः, प्रश्नकारी *m.* (न्), अनुयोक्ता *m.* (क्तृ), अनुयोगकृत् *m.*—(One who investigates) परीक्षकः, निरूपकः, विचारकः, अनुसन्धाता *m.* (तृ), निर्णेता *m.* (तृ), जिज्ञासुः *m.* -सकः, अन्वेषकः, जिज्ञासाकृत् *m.*—(Inquirer after knowledge) ज्ञानेप्सुः *m.*, ज्ञानेच्छुः *m.*

INQUIRING, *a.* जिज्ञासुः -सुः -सु, ज्ञानेप्सुः -प्सुः -प्सु, ज्ञानेच्छुः -च्छुः -च्छु.

INQUIRY, *s.* (Question, interrogation) प्रश्नः, सम्प्रश्नः, पृच्छा -च्छनं, अनुयोगः -योजनं.—(Investigation) परीक्षा -क्षणं, निरूपणं, अनुसन्धानं, जिज्ञासा, विचारः -रणं -णा, अन्वेषणं -षा, चर्चा, समीक्षा -क्षणं, निर्णयः, पर्येषणा, गवेषणं -षा, परीष्टिः *f.*, निश्चयः, अनुसरणं, विमर्शः, विवेचना, शोधः -धनं; 'spirit of inquiry,' ज्ञानेच्छा, ज्ञानेप्सा; 'friendly inquiry respecting health,' &c. कुशलप्रश्नः, सम्प्रश्नः, सान्त्वना.

INQUISITION, *s.* (Examination) परीक्षा -क्षणं, अनुसन्धानं, जिज्ञासा, अनुयोगः, समीक्षणं, संवीक्षणं.—(Judicial) विचारः -रणा.—(Court for religious inquiry) धर्मपरीक्षणसभा, धर्मविचारणसभा.

INQUISITIVE, *a.* विपृच्छिषुः -षुः -षु, पृच्छकः -का -कं, प्रश्नशीलः -ला -लं, पृच्छनशीलः -ला -लं, कुतूहली -लिनी -लि (न्), कौतूहलपरः -रा -रं, कौतूहलान्वितः -ता -तं, कौतुकाविष्टः -ष्टा -ष्टं, जिज्ञासुः -सुः -सु, अनुसन्धानेच्छुः -च्छुः -च्छु, अनुसन्धानशीलः -ला -लं, अन्वेषणशीलः -ला -लं, अन्वेषणासक्तः -क्ता -क्तं.—(Inclined to seek knowledge) ज्ञानेच्छुः -च्छुः -च्छु, ज्ञानेप्सुः -प्सुः -प्सु.

INQUISITIVELY, *adv.* कौतूहलेन -लात्, कुतूहलेन, जिज्ञासया, अन्वेषणशीलत्वात्, कौतुकेन, सकौतुकं.

INQUISITIVENESS, *s.* कौतूहलं, कुतूहलं, जिज्ञासाकुतूहलं, ज्ञानकुतूहलं, अनुसन्धानेच्छा, विपृच्छिषा, जिज्ञासा, कौतुकं, कुतुकं, निरूपणेच्छा, ज्ञानेच्छा, अन्वेषणाकांक्षा, अन्वेषणासक्तिः *f.*, अन्वेषणशीलता, पृच्छनशीलता, अनुसन्धानशीलत्वं, असति प्रयोजने किमेतदिति जिज्ञासा.

INQUISITOR, *s.* परीक्षकः, विचारकः, अनुसन्धाता *m.* (तृ), निरूपकः.—(Member of court of inquisition) धर्मपरीक्षासभासद् *m.*, धर्मविचारसभासद्.

INQUISITORIAL, *a.* परीक्षकः -का -कं, अतिपरीक्षकः -का -कं, अनुसन्धायी -यिनी -यि (न्), निरूपकः -का -कं, चर्चकः -का -कं, परीक्षासम्बन्धी -न्धिनी -न्धि (न्).

INQUISITORIALLY, *adv.* अतिपरीक्षापूर्वं, सत्यनुसन्धानपूर्वं, अतिचर्चया.

To INRAIL, *v. a.* अङ्कुपंक्त्या परिवेष् (c. 10. -वेष्टयति -यितुं) or आवृ (c. 5. -वृणोति -वरितुं -रीतुं) or अवरुध् (c. 7. -रुणद्धि -रोद्धुं).

INROAD, *s.* उपद्रवः, अभिद्रवः, अवस्कन्दः -न्दनं, उपप्लवः, विप्लवः, अभिक्रमः -मणं, अकस्माद् आक्रमणं, अभिमर्दः, अभिनिर्यायणं; 'to make inroads,' अवस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), उपद्रु (c. 1. -द्रवति -द्रोतुं).

INSALUBRIOUS, *a.* अनारोग्यः -ग्या -ग्यं, अनारोग्यकरः -री -रं, रोगकरः &c., रोगजनकः -का -कं, व्याधिकरः &c., अस्वास्थ्यकारकः -का -कं, अक्षेम्यः -म्या -म्यं, अक्षेमकरः -रा -रं, बाधकः -का -कं.

INSALUBRITY, *s.* अनारोग्यं, रोगजनकत्वं, व्याधिजनकत्वं, अक्षेम्यता.

INSALUTARY, *a.* अहितः -ता -तं, अक्षेमकरः -रा -रं, अक्षेमङ्करः -री -रं, अक्षेम्यः -म्या -म्यं, अहितकरः -री -रं, अनिष्टकरः &c.

INSANABLE, *a.* अचिकित्स्यः -त्स्या -त्स्यं, अशमनीयः -या -यं. *See* INCURABLE.

INSANE, *a.* उन्मत्तः -त्ता -त्तं, उन्मादवान् -वती -वत् (त्), उन्मादः -दा -दं -दी -दिनी -दि (न्), सोन्मादः -दा -दं, उन्मदः -दा -दं, उन्मत्तिष्णुः -ष्णुः -ष्णु, प्रमदः -दा -दं, मत्तः -त्ता -त्तं, विक्षिप्तबुद्धिः -द्धिः -द्धि -मनस्कः -स्का -स्कं, हतबुद्धिः &c., नष्टबुद्धिः &c., भ्रष्टबुद्धिः &c., बुद्धिभ्रष्टः -ष्टा -ष्टं, नष्टमतिः -तिः -ति, विक्षिप्तमतिः &c., नष्टेन्द्रियः -या -यं, भ्रान्तचित्तः -त्ता -त्तं, विप्लुतचित्तः -त्ता -त्तं, मूढचेताः -ताः -तः (स्), हतज्ञानः -ना -नं, वातुलः -ला -लं, वातूलः -ला -लं, क्षीवः -वा -वं.

INSANELY, *adv.* उन्मत्तवत्, मत्तवत्, सोन्मादं, वातुलवत्, उन्मादेन.

INSANENESS, INSANITY, *s.* उन्मत्तता, मत्तता, सोन्मादत्वं, बुद्धिभ्रंशः, बुद्धिविक्षिप्तता, चित्तविभ्रमः, चित्तविप्लवः, बुद्धिनाशः, इन्द्रियनाशः, ग्रामाद्यं, वातुलता.

INSATIABLE, INSATIATE, *a.* अतर्पणीयः -या -यं, अतर्पः -र्प्या -र्प्यं, अनातृप्यः -प्या -प्यं, अशमतृप्तिः -प्तिः -प्ति, तर्पणाशक्यः -क्या -क्यं, दुष्पूरः -रा -रं, अशमनीयः -या -यं, अतोषणीयः -या -यं, अतृप्तः -प्ता -प्तं.—(Very greedy) अतिलुब्धः -ब्धा -ब्धं, अतिलोभी -भिनी -भि (न्), लोलुपः -पा -पं, बह्वाशः -शा -शं, बहुभक्षकः -का -कं, मासरः -रा -रं.

INSATIABLENESS, *s.* अतर्पणीयता -त्वं, अतर्प्यत्वं, अतृप्तिः *f.*, अतिलुब्धता.

INSATIABLY, *adv.* अतर्पणीयं, यथा तृप्तिः or तुष्टिर् न जायते तथाप्रकारेण.

INSATISFACTION, *s.* अतुष्टिः *f.*, असन्तोषः, अपरितोषः, अतृप्तिः *f.*, असमाधानं.

To INSCRIBE, *v. a.* अभिलिख् (c. 6. -लिखति -लेखितुं), लिख्, पत्रे or लेख्ये सम् in caus. (-अर्पयति -यितुं) or निविश् (c. 10. -वेशयति -यितुं) or आरुह् in caus. (-रोपयति -यितुं) or न्यस् (c. 4. -अस्यति -असितुं), अक्षराणि पत्रे निविश् or सम् or न्यस्, पत्रान्तर्गतं -तां -तं कृ, अन्तर्गतं -तां -तं कृ.—(Mark with letters) वर्णाङ्कितं -तां -तं कृ, वर्णैर् अङ्क् (c. 10. अङ्कयति -यितुं), अक्षराङ्कितं -तां -तं कृ.—(Dedicate a book) नामलिखनपूर्वं or नामाङ्कनपूर्वं ग्रन्थं सम् in caus., or निवेद् (c. 10. -वेदयति -यितुं).

INSCRIBED, *p. p.* अभिलिखितः -ता -तं, लिखितः -ता -तं, न्यस्ताक्षरः -रा -रं, निवेशिताक्षरः -रा -रं, समर्पिताक्षरः -रा -रं, लेख्यारूढः -ढा -ढं, लेख्यारोपितः -ता -तं, पत्रनिवेशितः -ता -तं, पत्रान्तर्गतः -ता -तं, अङ्कितः -ता -तं.

INSCRIPTION, *s.* (Writing) अभिलेखनं, अभिलिखितं, लिखितं, लिखनं, लेखनं, लेखः -ख्या, लेख्यं, लिपिः *f.*, लिपिका.—(Writing on a stone) पाषाणलेखः, शिलालेखः, अङ्कितलेखः, मुद्रितलेखः.—(Dedication of a book) नामलिखनपूर्वं ग्रन्थसमर्पणं, नामाङ्कनपूर्वं ग्रन्थनिवेदनं.

INSCRUTABLE, *a.* अतर्क्यः -र्क्या -र्क्यं, दुर्ज्ञेयः -या -यं, बोधागम्यः -म्या -म्यं, बुद्ध्यतीतः -ता -तं, अवोधगम्यः -म्या -म्यं, अप्रतर्क्यः -र्क्या -र्क्यं, अज्ञेयः -या -यं, अलक्ष्यः -क्ष्या -क्ष्यं, दुर्लक्ष्यः -क्ष्या -क्ष्यं, अचिन्यः -न्या -न्यं, अचिन्तनीयः -या -यं, अनुपलभ्यः -भ्या -भ्यं, इन्द्रियागोचरः -रा -रं, गहनः -ना -नं, परमगहनः -ना -नं, अगाधः -धा -धं; 'whose ways are inscrutable,' अनुपलक्ष्यवर्त्मा -र्त्मा -र्त्म (न्).

INSCRUTABLY, *adv.* परमगहनं, दुर्ज्ञेयं, अचिन्तनीयं, अतर्क्यप्रकारेण.

To INSCULP, *v. a.* तक्ष् (c. 1. तक्षति -क्षितुं), उपस्कृ, मुद्रीकृ, लक्षणं कृ.

INSECT, *s.* कीटः -टकः, कृमिः *m.*, क्रिमिः *m.*, नीलङ्गुः *m.*, नीलाङ्गुः, सर्पः -र्पी -र्पिणी.

INSECTILE, *a.* कीटजातीयः -या -यं, कीटधर्म्मी -र्म्मी -र्म्मि (न्).

INSECTIVOROUS, *a.* कीटभोजी -जिनी -जि (न्), कीटभक्षकः -का -कं, कीटाशी &c.

INSECURE, *a.* सशङ्कः -ङ्का -ङ्कं, शङ्कनीयः -या -यं, शंक्यः -क्या -क्यं, शङ्कान्वितः -ता -तं, सभयः -या -यं, संशयापन्नः -न्ना -न्नं, शङ्कास्पदः -दा -दं, संशयास्पदः -दा -दं, संशयात्मकः -का -कं, भययुक्तः -क्ता -क्तं, शङ्कास्पदं.

INSECURITY, *s.* सभयता, सशङ्कता -त्वं, शङ्कनीयता, संशयापन्नता, भयशङ्का, भयसंशयः, भयं, शङ्का, संशयः, अक्षेमः -मं.

INSENSATE, *a.* निर्बोधः -धा -धं, निर्बुद्धिः -द्धिः -द्धि, अबुद्धिमान् -मती -मत् (त्), प्रमूढः -ढा -ढं, प्रमुग्धः -ग्धा -ग्धं, अचेतनः -ना -नं.

INSENSIBILITY, INSENSIBLENESS, *s.* (Want of corporeal sensibility) अचैतन्यं, अचेतना, इन्द्रियक्षयः, इन्द्रियसुप्तिः *f.*, सुप्तिः *f.*, स्पर्शज्ञानं, स्पर्शानभिज्ञता, नष्टेन्द्रियता, इन्द्रियनाशः.—(Want of emotion or tenderness) रागहीनता, विकाराभावः, भावहीनता, रसहीनता, दयाहीनता, कृपाहीनता.—(Dullness, torpor) जडता, जडिमा *m.* (न्), जाड्यं, अचिन्ता, कुण्ठता.—(Loss of consciousness, fainting) चेतनाहानिः *f.*, चैतन्यहानिः *f.*, चैतन्यनाशः, नष्टचेष्टता, संज्ञाहानिः *f.*, संज्ञानाशः, चित्तवैकल्यं, मोहः, प्रमोहः, प्रलयः, मूर्च्छा -र्च्छना.

INSENSIBLE, *a.* (Imperceptible) अगोचरः -रा -रं, इन्द्रियागोचरः -रा -रं, इन्द्रियाग्राह्यः -ह्या -ह्यं, इन्द्रियाविषयः -या -यं, अतीन्द्रियः -या -यं, अलक्ष्यः -क्ष्या -क्ष्यं.—(Wanting corporeal sensibility) अचेतनः -ना -नं, विचेतनः -ना -नं, विसंज्ञः -ज्ञा -ज्ञं, नष्टेन्द्रियः -या -यं, सुप्तेन्द्रियः -या -यं, सुप्तः -प्ता -प्तं, स्पर्शज्ञानभिज्ञः -ज्ञा -ज्ञं.—(Void of emotion, feeling, or tenderness) रागहीनः -ना -नं, रसहीनः -ना -नं, दयाहीनः -ना -नं, निर्दयः -या -यं, कृपारहितः -ता -तं, अनार्द्रचित्तः -त्ता -त्तं, अनुर्वचित्तः -त्ता -त्तं.—(Dull, torpid) जडः -डा -डं, कुण्ठः -ण्ठा -ण्ठं, अचिन्तः -न्ता -न्तं.—(Void of consciousness, fainted) नष्टचेतनः -ना -नं, गतचेतनः -ना -नं, चैतन्यरहितः -ता -तं, अचेतनः -ना -नं, विचेतनः -ना -नं, निश्चेतनः -ना -नं, गतचेताः -ताः -नः (स्), नष्टसंज्ञः -ज्ञा -ज्ञं, निःसंज्ञः -ज्ञा -ज्ञं, संज्ञाहीनः -ना -नं, नष्टचेष्टः -ष्टा -ष्टं, निश्चेष्टितः -ता -तं, असंज्ञः -ज्ञा -ज्ञं, गतसंज्ञः -ज्ञा -ज्ञं, मृतकल्पः -ल्पा -ल्पं, प्रमूढः -ढा -ढं, प्रमुग्धः -ग्धा -ग्धं, मोहितः -ता -तं, प्रमोहितः -ता -तं, प्रलीनः -ना -नं, मूर्च्छितः -ता -तं.

INSENSIBLY, *adv.* (Imperceptibly) इन्द्रियागोचरं, अव्यक्तं, अलक्ष्यप्रकारेण, दुर्लक्ष्यं.—(Gradually) क्रमे क्रमे, क्रमशस्, क्रमेण, शनैः, पदशस्, पदे पदे, शनैः शनैः.

INSENTIENT, *a.* अचेतनः -ना -नं, विचेतनः -ना -नं, अप्राणभृत्. *See* INSENSIBLE.

INSEPARABLE, *a.* अवियोज्यः -ज्या -ज्यं, अवियोजनीयः -या -यं, अभेद्यः -द्या -द्यं, अभेदनीयः -या -यं, अविभेद्यः -द्या -द्यं, वियोजनाशक्यः -क्या -क्यं, अविभजनीयः -या -यं, अपृथक्करणीयः -या -यं, अद्वैधीकरणीयः -या -यं, नित्यसम्बन्धी -न्धिनी -न्धि (न्), नित्यसहचरी -रिणी -रि (न्), समवायसम्बन्धी &c., समवायी &c.; 'inseparable relation,' समवायसम्बन्धः, समवायिकरणं.

INSEPARABLENESS, *s.* अवियोज्यता, अभेद्यता, अविभेद्यता, नित्यसम्बन्धः.

INSEPARABLY, *adv.* अविभेदनीयं, अवियोजनीयं, नित्यसम्बन्धेन, दृढसम्बन्धेन, समवायसम्बन्धेन, यथा वियोक्तुं न शक्यते तथाप्रकारेण.

To INSERT, *v. a.* निविश् (c. 10. -वेशयति -यितुं), प्रविश, आविश्, समाविश्, अन्तर्गतं -तां -तं कृ, अन्तरस्थं -स्थां -स्थं कृ, अन्तःस्थितं -तां -तं कृ, अन्तः स्था in caus. (स्थापयति -यितुं), निधा (c. 3. -दधाति -धातुं), न्यस् (c. 4. -अस्यति -असितुं); 'insert in writing,' अभिलिख् (c. 6. -लिखति -लेखितुं), पत्रे or लेख्ये समृ in caus. (-सर्पयति -यितुं) or आरुह् in caus. (-रोपयति -यितुं).

INSERTED, *p. p.* निवेशितः -ता -तं, प्रवेशितः -ता -तं, समावेशितः -ता -तं, निविष्टः -ष्टा -ष्टं, अन्तर्गतः -ता -तं, अन्तरस्थः -स्था -स्थं, निहितः -ता -तं, प्रत्याकलितः -ता -तं; 'in writing,' अभिलिखितः -ता -तं, लेख्यारूढः -ढा -ढं, लेख्यारोपितः -ता -तं.

INSERTION, *s.* निवेशः -शनं, प्रवेशः -शनं, आवेशनं, समावेशनं, अन्तःस्थापनं, निधानं, आरोपणं, समर्पणं; 'in writing,' अभिलिखनं, लेख्यारोपणं, लेख्यसमर्पणं.

To INSHRINE, *v. a.* *See To* ENSHRINE.

INSIDE, *s.* (Interior of any thing) अभ्यन्तरं, अन्तरं, गर्भः, उदरं, क्रोडं, अन्तःभागः, अभ्यन्तरभागः, बिलं, विवरं, कुहरं; 'the inside of a house,' गृहाभ्यन्तरं, अन्तर्गृहं, अन्तर्भवनं, भवनोदरं; 'the inside of a boiler,' स्थालीबिलं; 'the inside of a tree,' तरुकोटरः -रं, तरुक्रोडं.

INSIDE, *adv.* अभ्यन्तरे, अन्तर्, अन्तरे; 'inside the house,' गृहाभ्यन्तरे.

INSIDIOUS, *a.* छली -लिनी -लि (न्), छलनापरः -रा -रं, कपटी -टिनी -टि (न्), कापटिकः -की -कं, मायी -यिनी -यि (न्), बहुमायः -या -यं, भूरिमायः -या -यं, मायान्वितः -ता -तं, मायाकरः -री -रं, मायापटुः -टुः -टु, कौटिकः -की -कं, सव्याजः -जा -जं, छाद्मिकः -की -कं, प्रतारकः -का -कं, उपजापकः -का -कं, वञ्चकः -का -कं, मोही -हिनी -हि (न्), प्रलोभकः -का -कं.

INSIDIOUSLY, *adv.* छलेन, सकपटं, समायं, मायया, सव्याजं, उपजापकवत्, प्रलोभनार्थं, सकूटं, छद्मपूर्व्वं, वञ्चनार्थं, कितववत्, धूर्त्तवत्.

INSIDIOUSNESS, *s.* सकपटत्वं, कापट्यं, कूटता, सकूटता, सव्याजता, कापटिकत्वं, वञ्चकत्वं, कौटिकत्वं, छाद्मिकत्वं, उपजापः.

INSIGHT, *s.* अभिनिवेशः, निवेशः, प्रवेशः, परिज्ञानं, अभिज्ञानं, ज्ञानं, परिचयः, निरीक्षणं, अवेक्षणं, आलोचना.

INSIGNIA, *s.* चिह्नं, लक्षणं, लिङ्गं, व्यञ्जनं, उपकरणं; 'insignia of royalty,' राजलक्षणं, राजचिह्नं, नृपलक्ष्म *n.* (न्); these are 'the parasol,' छत्रं, and 'the fan,' चामरं; 'bearing of royal insignia,' प्रक्रिया, अधिकारः.

INSIGNIFICANCE, INSIGNIFICANCY, *s.* (Want of meaning) अनर्थकत्वं, निरर्थकत्वं, आनर्थक्यं, अर्थहीनता, अर्थशून्यता, अर्थाभावः, अनर्थवत्त्वं.—(Unimportance) लघुता, लाघवं, लघिमा *m.* (न्), प्रभावहीनता, अल्पप्रभावत्वं, अल्पत्वं, अगुरुता, अगौरवं, गौरवहीनता.—(Meanness) लाघवं, लघुवृत्तिता, क्षुद्रता, कदर्य्यत्वं, तुच्छत्वं, अपकृष्टता, अपकर्षः, कुत्सितत्वं, दीनता, निःसत्त्वं, सत्त्वहीनता, क्षुद्रकत्वं.

INSIGNIFICANT, *a.* (Void of meaning) अनर्थकः -का -कं, निरर्थकः -का -कं, निरर्थः -र्था -र्थं, अर्थहीनः -ना -नं, अर्थशून्यः -न्या -न्यं, अर्थावाचकः -का -कं, अवाचकः -का -कं.—(Unimportant) लघुः -घुः -घ्वी -घु, अगुरुः -रुः -र्वी -रु, अल्पप्रभावः -वा -वं, प्रभावहीनः -ना -नं, गौरवहीनः -ना -नं, अल्पः -ल्पा -ल्पं, स्वल्पः -ल्पा -ल्पं, अकिञ्चित्करः -री -रं.—(Mean) क्षुद्रः -द्रा -द्रं, कदर्य्यः -र्य्या -र्य्यं, लघुवृत्तिः -त्तिः -त्ति, तुच्छः -च्छा -च्छं, अपकृष्टः -ष्टा -ष्टं, कुत्सितः -ता -तं, निःसत्त्वः -त्त्वा -त्त्वं, सत्त्वहीनः -ना -नं, तृणप्रायः -या -यं, अल्पिष्ठकीर्त्तिः -र्त्तिः -र्त्ति, किम्वान् -म्वती -म्वत् (न्); 'insignificant person,' क्षुद्रजनः, अजनः.

INSIGNIFICANTLY, *adv.* (Without meaning) अर्थं विना, अनर्थकं, निरर्थकं.—(Without importance) लघु, अगुरु, अगौरवेण, लाघवेन, अल्पभावेन.

INSINCERE, *a.* असत्यः -त्या -र्यं, निःसत्यः -त्या -र्यं, असरलः -ला -लं, कृत्रिमः -मा -मं, कल्पितः -ता -तं, काल्पनिकः -की -कं, कृतकः -का -कं, कूटार्थः -र्थी -र्थं, मिथ्यार्थकः -का -कं, मृषार्थकः -का -कं, कपटी -टिनी -टि (न्), कापटिकः -की -कं, शाठिकः -की -कं, अनृतुः -तुः -तु, शिवः -वा -वं, वक्रः -क्रा -क्रं, कुटिलः -ला -लं, मायी -यिनी -यि (न्), मायिकः -की -कं, अयथार्थः -र्थी -र्थं, अनृतः -ता -तं, अलीकः -का -कं, विलपः -पा -पं, अतात्त्विकः -की -कं, असात्त्विकः -की -कं, अशुद्धः -द्धा -द्धं, अनिर्मलः -ला -लं, मिथ्या or मृषा in comp.

INSINCERELY, *adv.* असरलं, असत्यं, निःसत्यं, कृत्रिमं, अनृतं, अयथार्थं, मायया, सत्यं, अशुद्धं, मिथ्या, मृषा.

INSINCERITY, *s.* निःसत्यता, असत्यता, असारल्यं, असरलता, कृत्रिमता, काल्पनिकत्वं, कूटार्थत्वं, कापट्यं, सकपटत्वं, कपटता, अनृतुता, शिवता, वक्रता, अनृतत्वं; कुटिलता, माया, कौटिल्यं *m.*, मायिकत्वं, कुहना, छद्म *n.* (न्), शाठिकत्वं, छद्मवेशः, दम्भः, दाम्भिकत्वं, कुहकवृत्तिः *f.*, अयथार्थता, अलीकता, वितथता, अपह्नवः, निह्नवः.

To INSINUATE, *v. a.* (Introduce gently) शनैः शनैः or मन्दे मन्दे प्रविश् (c. 10. -वेशयति -यितुं) or निविश् or आविश्.—(Work one's self into favor by gentle means) शनैः शनैः सान्त्वादिना or लालनादिकर्म्मणा परानुग्रहं प्राप् (c. 5. -आप्नोति -आप्तुं) or सम्पद् (c. 10. -पादयति -यितुं), परानुग्रहसम्पादनार्थं सामादिना लल् (c. 10. लालयति -यितुं) or सान्त्व् (c. 10. सान्त्वयति -यितुं) or आराध् (c. 10. -राधयति -यितुं) or अनुरञ्ज् (c. 10. -रञ्जयति -यितुं), मन्दं मन्दं लालनाद्युपायैः परप्रीतिं गम् (c. 1. गच्छति, गन्तुं) or अधिगम्.—(Hint by oblique allusion) वक्रोक्त्या उद्दिश् (c. 6. -दिशति -देष्टुं) or सूच् (c. 10. सूचयति -यितुं) or उपन्यस् (c. 4. -अस्यति -असितुं) वक्रोक्तिं कृ, छेकोक्तिं कृ, छेकोक्त्या सूच्, सङ्केतं कृ अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उपक्षिप्.

To INSINUATE, *v. n.* (Creep in) मन्दं मन्दं निविश् (c. 6. -विशति -वेष्टुं) or प्रविश् or सृप् (c. 1. सर्पति, सर्तुं) or उपसृप् or आगम् (c. 1. -गच्छति -गन्तुं) or अन्तर्गम्.

INSINUATED, *p. p.* (Introduced gently) शनैः शनैः or मन्दं मन्दं निवेशितः -ता -तं or प्रवेशितः -ता -तं.—(Hinted) वक्रोक्त्या सूचितः -ता -तं or उद्दिष्टः -ष्टा -ष्टं, अवक्षिप्तः -प्ता -प्तं, उपक्षिप्तः -प्ता -प्तं.

JOINT-HEIR, *s.* समांशी *m.* (न्), समभागी *m.* (न्), समाधिकारी *m.* (न्), समांशहारी *m.* (न्), भागी *m.* (न्), संविभागी, भागहर:, समभागहारी *m.*, भागधेय:, सहाधिकारी *m.* *See* COHEIR.

JOINTLY, *adv.* संयोगतस्, योगतस्, सहितं, समं, सह, सम्भूय, एकचित्तीभूय, अपृथक्, युगपत्, साकं.

JOINTURE, *s.* विवाधनं, स्त्रीधनं, स्त्रीवृत्ति: *f.*, भर्तृदत्तं, स्वामिदत्तं.

JOIST, *s.* गृहतलालम्बी दीर्घदार:, हर्म्यतलोत्तम्भकं दीर्घकाष्ठं.

JOKE, *s.* परिहास:, हास्यं, हासिका, परिहासवाक्यं, परिहासोक्ति: *f.*, रस:, रसिकवाक्यं, नर्म्म *n.* (न्), विनोद:, विनोदोक्ति: *f.*, लालिका, खेप:, टट्टरी, व्याहार:, प्रपञ्च:, कौतुकं; 'in joke,' परिहासेन; 'jokes to the bridegroom,' अवृल:.

To JOKE, *v. a.* हस् (c. 1. हसति -सितुं), प्रहस्, विहस्, संविहस्, व्यतिहस्, सम्प्रहस्, परिहस्, परिहासं कृ, हास्यं कृ, परिहासवाक्यं वद् (c. 1. वदति -दितुं), विनोदं कृ, विनोदवाक्यं वद्, भण्ड् (c. 1. भण्डते -डितुं), विलस् (c. 1. -लसति -सितुं), खेला (nom. खेलायति), नर्म्म कृ; 'speak in joke,' परिहासेन वद्.

JOKER, *s.* परिहासवेदी *m.* (न्), परिहासक:, हास्यकारी *m.* (न्), विनोदभावी *m.* (न्), वैहासिक:, विदूषक:, विलासी *m.* (न्).

JOLE, *s.* गण्ड: -ण्डं, कपोल:, गण्डस्थल: -ली; 'cheek by jole,' गण्डागण्डि.

JOLLITY, JOLLINESS, *s.* उत्सवकरणं, उत्सव:, समुत्सव:, उल्लसता, उल्लास:, आनन्द:, आह्लाद:, हर्ष:, प्रहर्ष:, प्रमोद:, प्रहसनं, प्रहास:, प्रहसितं, प्रहृष्टता, प्रफुल्लता, सानन्दता, आमोद:, मुदा.

JOLLY, *a.* उत्सवकारी -रिणी -रि (न्), सोत्सव: -वा -वं, हृष्ट: -ष्टा -ष्टं, प्रहृष्ट: -ष्टा -ष्टं, आनन्दी -न्दिनी -न्दि (न्), सानन्द: -न्दा -न्दं, हृष्टहृदय: -या -यं, हर्षण: -णा -णं, उल्लस: -सा -सं, उल्लसित: -ता -तं, उल्लासी -सिनी -सि (न्), प्रहासी -सिनी -सि (न्), प्रमोदी -दिनी -दि (न्), मुदित: -ता -तं, प्रफुल्ल: -ल्ला -ल्लं, हासी &c., परिहासशील: -ला -लं, विलासी -सिनी -सि (न्), कृतकौतुक: -का -कं, सुमना: -ना: -न: (स्).

JOLLY-BOAT, *s.* बृहन्नौकासन्धिनी क्षुद्रनौका.

To JOLT, *v. a.* क्षुभ् (c. 10. क्षोभयति -यितुं), क्षोभं कृ, विषमभूमिगमनप्रयुक्तं क्षोभं कृ, आकस्मिकक्षोभं कृ.

To JOLT, *v. n.* विषमभूमिगमनत्वात् क्षुभ् (c. 4. क्षुभ्यति, क्षोभितुं).

JOLT, *s.* क्षोभ:, रथक्षोभ:, विषमभूमिगमनप्रयुक्त: क्षोभ:, आकस्मिकक्षोभ:.

JOLTED, *p. p.* क्षुभ्त: -ता -तं, विक्षुभ्त: -ता -तं, क्षोभित: -ता -तं.

JOLTHEAD, *s.* स्थूलबुद्धि: *m.*, मन्दबुद्धि: *m.*, मूर्ख:, वटुक:.

JONQUIL, *s.* उत्पलजातीयो नानावर्ण: पुष्पभेद:.

To JOSTLE, *v. a.* जनसम्मर्दे स्कन्धेन ताडयित्वा क्षुभ् (c. 10. क्षोभयति -यितुं) or निरस् (c. 4. -अस्यति -असितुं) or नि:सृ (c. 10. -सारयति -यितुं) or निराकृ or सञ्चाल् (c. 1. -चालयते -यितुं).

JOSTLING, *s.* जनसम्मर्दे परस्परसंक्षोभ: or परस्परसमाघात:, परस्परघर्षणं, परस्परसम्मर्द:, स्कन्धताडनं, प्रतिघात:.

JOT, *s.* लव:, लवमात्रं, कणमात्रं, बिन्दुमात्रं, लवलेश:, लेश:, अणु: *m.*, परमाणु: *m.*, कणिका, रज:कण:, तिलमात्रं.

To JOT, *v. a.* स्मरणार्थं क्षिप्तिद् लिख् (c. 6. लिखति, लेखितुं) or प्रतिलिख्.

JOTTING, *s.* स्मरणार्थं क्षिप्तिलिखनं, स्मरणार्थलिखितं.

JOURNAL, *a.* (Diary) दिनवृत्तपत्रं, दिनव्यवहारलेख्यं, आह्निकव्यवहारपुस्तकं, दिनचर्य्यालेख:, दैनिकवृत्तान्तपुस्तकं, दिनचरितलेख:, आह्निकपत्रकं, दैनिकपत्रकं, पञ्जिका, पञ्जि: -ञ्जी *f.*, पदभञ्जिका.—(Newspaper published daily) प्रतिदिनं प्रकाशीकृतं समाचारपत्रं, वार्त्तापत्रं, वार्त्तिकपत्रं.

JOURNALIST, *s.* आह्निकपत्रलेखक:, दैनिकपत्रलिक् *m.* (ख्).—(Conductor of a newspaper) समाचारपत्रप्रकाशक:, वार्त्तापत्रलेखक:.

JOURNEY, *s.* अध्वा *m.* (न्), अध्वगमनं, मार्ग:, मार्गगमनं, मार्गक्रमणं, यात्रा, यात्राकरणं, यानं, प्रयाणं, प्रस्थानं, प्रस्थिति: *f.*, व्रज्या, भ्रमणं, देशभ्रमणं, पर्य्यटनं, प्रवास:, प्रवासगमनं; 'a long journey,' दीर्घाध्वा *m.* -ध्व *n.* (न्); 'a day's journey,' एकाहगम: -मनं; 'to return from a journey,' प्रवासाद् आगम् (c. 1. -गच्छति -गन्तुं); 'a pleasant journey to you,' शिवास् ते पन्थान: सन्तु.

To JOURNEY, *v. n.* अध्वना or मार्गेण गम् (c. 1. गच्छति, गन्तुं) or या (c. 2. याति -तुं) or व्रज् (c. 1. व्रजति -जितुं) or चर् (c. 1. चरति -रितुं), मार्गगमनं कृ, अध्वगमनं कृ, यात्रां कृ, देशभ्रमणं कृ, देशाद्देशं भ्रम् (c. 4. भाम्यति, भमितुं) or परिभ्रम् or पर्य्यट् (c. 1. अटति -टितुं).

JOURNEYER, *s.* अध्वग: -गामी *m.* (न्), अध्वनीन:, अध्वन्य:, यात्रिक:, यायी *m.* (न्), पथिक:, सारथिक:, यादधिक:.

JOURNEYING, *s.* अध्वगमनं, मार्गगमनं, यात्राकरणं, देशभ्रमणं.

JOURNEYMAN, *s.* वेतनार्थं कर्म्मकार: or कर्म्मकर: or शिल्पकार: or शिल्पकर्म्मकर:, हस्तकर्म्मकार:, वैतनिक:, वेतनार्थी *m.* (न्), भृतीन:.

JOURNEY-WORK, *s.* शिल्पकर्म्म *n.* (न्), हस्तकर्म्म *n.*, वैतनिककर्म्म *n.*, शिल्पं.

JOVE, *s.* (The god). *See* INDRA.

JOVIAL, *a.* उत्सवकारी -रिणी -रि (न्), नित्योत्सवी -विनी -वि (न्), सदोत्सवी &c., कृत्योत्सव: -वा -वं, उल्लासी -सिनी -सि (न्), सदानन्दी -न्दिनी -न्दि (न्), प्रहृष्ट: -ष्टा -ष्टं, परिहासशील: -ला -लं, सदाप्रमोदी -दिनी -दि (न्), उत्सवप्रिय: -या -यं.

JOVIALLY, *adv.* सोत्सवं, महोत्सवेन, सदानन्दपूर्णं, उल्लसत्, प्रहृष्यत्.

JOVIALITY, JOVIALNESS, *s.* उत्सवकरणं, नित्योत्सव:, सदानन्द:, नित्यानन्द:, उल्लसता, नित्योल्लास:, हर्ष:, प्रहर्ष:, आह्लाद:, प्रहसनं, हास्यं, प्रहास:, प्रहृष्टता.

JOWL, *s.* (Cheek) गण्ड:, कपोल:. *See* JOLE.

JOWLER, *s.* मृगयाकुक्कुर:, मृगयाश्वा *m.* (न्), मृगदंशक:.

JOY, *s.* आनन्द:, हर्ष:, आह्लाद:, प्रह्लाद:, प्रमोद:, आमोद:, नन्द:, ह्लाद: -दनं, मोद:, मुदा, मुद् *f.*, तुष्टि: *f.*, हृष्टता, प्रहर्ष:, प्रहृष्टता, मद:, प्रमद:, माद:, तुष्टि: *f.*, तोष:, परितोष:, सन्तोष:, सन्तुष्टि: *f.*, विलास:, उल्लास:, उल्लसता -त्वं, प्रफुल्लता, प्रीति: *f.*, प्रीतता, सुखं, सौख्यं, चित्तप्रसन्नता, शर्म्म *n.* (न्), नन्दथु: *m.*, धन्यता, आनन्दथु: *m.*, उत्सव:, रभस:, उत्साह:.—(The cause of joy) नन्दन: -ना -नं, आनन्दन: -ना -नं; 'joy and sorrow,' हर्षोद्वेगं.

To JOY, *v. n.* नन्द् (c. 1. नन्दति -न्दितुं), आनन्द्, हृष् (c. 4. हृष्यति, हर्षितुं), ह्लाद् (c. 1. ह्लादते -दितुं), उल्लस् (c. 1. -लसति -सितुं), रम् (c. 4. रम्यते, रन्तुं), तुष् (c. 4. तुष्यति, तोष्टुं), मद् (c. 4. माद्यति, मदितुं).

To JOY, *v. a.* (Cause joy) नन्द् (c. 10. नन्दयति -यितुं), हृष् (c. 10. हर्षयति -यितुं), प्रहृष्.—(Give one joy, congratulate) अभिनन्द्, अभिवन्द् (c. 1. -वन्दते -न्दितुं), धन्यवादं कृ. *See To* CONGRATULATE.

JOYFUL, *a.* आनन्दी -न्दिनी -न्दि (न्), आनन्दित: -ता -तं, सानन्द: -न्दा

-र्दं, हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, हृष्टमानसः -सा -सं, हृष्टहृदयः -या -यं, प्रहर्षितः -ता -तं, हर्षितः -ता -तं, प्रहर्षवान् -वती -वत्, हर्षमाणः -णा -णं, हर्षवान् -वती -वत्, आह्लादी -दिनी -दि (न्), ह्लादी &c., प्रह्लादितः -ता -तं, आह्लादितः -ता -तं, ह्लादितः -ता -तं, प्रमोदी -दिनी -दि (न्), प्रमुदितः -ता -तं, मुदितः -ता -तं, मुदान्वितः -ता -तं, हर्षान्वितः -ता -तं, प्रमुद् *m. f. n.*, प्रमुदः -दा -दं, हर्षयुक्तः -क्ता -क्तं, तुष्टः -ष्टा -ष्टं, परितुष्टः -ष्टा -ष्टं, उल्लसः -सा -सं, उल्लासी -सिनी -सि (न्), उल्लसितः -ता -तं, प्रीतः -ता -तं, प्रह्लसः -सा -सं, आनन्दमयः -यी -यं, हर्षाक्रान्तः -न्ता -न्तं, हर्षाविष्टः -ष्टा -ष्टं, सुखी -खिनी -खि (न्), मग्नः -ग्ना -ग्नं, विशोकः -का -कं.—(Causing joy) हर्षकः -का -कं, हर्षदः -दा -दं, हर्षावहः -हा -हं, आनन्ददः -दा -दं, आनन्दकरः -री -रं, मोदकः -का -कं, सुभगः -गा -गं.

Joyfully, *adv.* सानन्दं, सहर्षं, साह्लादं, हर्षेण, प्रहर्षेण, प्रह्लादेन, प्रमोदेन, प्रामोदं, उल्लासेन, सोल्लासं, आनन्दपूर्वं, हृष्टमनसा, हृष्टवत्, सन्तोषेण.

Joyfulness, *s.* सानन्दत्वं, हृष्टता, प्रहृष्टता, प्रमुदता, आनन्दः. *See* Joy.

Joyless, *a.* निरानन्दः -न्दा -न्दं, आनन्दहीनः -ना -नं, आनन्दशून्यः -न्या -न्यं, अहर्षः -र्षा -र्षं, अहृष्टः -ष्टा -ष्टं, अहर्षितः -ता -तं, हर्षहीनः -ना -नं, ह्लादहीनः -ना -नं, निराह्लादः -दा -दं, अनाह्लादी -दिनी -दि (न्), असुखी -खिनी -खि (न्), असुखः -खा -खं.—(Giving no joy) असुखदः -दा -दं, असुखावहः -हा -हं, अनानन्ददः -दा -दं, अहर्षदः -दा -दं.

Joylessness, *s.* निरानन्दत्वं, आनन्दहीनता, निराह्लादत्वं, हर्षशून्यता.

Joyous, *a.* आनन्दी -न्दिनी -न्दि (न्), सानन्दः -न्दा -न्दं, प्रहृष्टः -ष्टा -ष्टं, आनन्दवृत्तिः -त्तिः -त्ति, प्रसन्नचित्तः -त्ता -त्तं, उल्लासी -सिनी -सि (न्). *See* Joyful.

Joyously, *adv.* सानन्दं, सहर्षं, साह्लादं, हृष्टचेतसा, प्रसन्नमनसा.

Joyousness, *s.* हृष्टता, प्रहृष्टता, सानन्दत्वं, चित्तप्रसन्नता, प्रमुदता.

Jubilant, *a.* जयशब्दकारी -रिणी -रि (न्), जयशब्दोच्चारी -रिणी -रि (न्), जयध्वनिकारी &c., जयप्रशंसाकारी &c., जयशब्दघोषी -षिणी -षि (न्).

Jubilee, *s.* महोत्सवः, महोत्सवकालः, समुत्सवः, उत्सवः, उत्सवकालः.

Jucundity, *s.* रम्यता, रमणीयता, प्रियता, मनोज्ञत्वं, कान्तत्वं.

Judaic, judaical, *a.* यिहुदीयः -या -यं, यिहुदीयव्यवहारः -रा -रं.

Judge, *s.* (Officer who hears and determines causes) धर्माध्यक्षः, धर्माधिकारी *m.* (न्), न्यायाधीशः, न्यायाधिपतिः *m.*, प्राड्विवाकः, विचारकर्ता *m.* (र्तृ), विचारकः, दण्डनायकः, व्यवहर्ता *m.* (र्तृ), अक्षदर्शकः, आक्षपाटिकः, स्थेयः, आधिकरणिकः, निर्णेता *m.* (तृ), निर्णयकारः.—(One who has skill to decide on the merits of any thing, a connoisseur) गुणग्राही *m.* (न्), गुणग्राहकः, गुणज्ञः, अभिज्ञः, विज्ञः, ज्ञानी *m.* (न्), परीक्षकः, तद्विद् *m.*, रसज्ञः, विवेकी *m.* (न्), विवेचकः, विवेकदृश्वा *m.* (न्), परिच्छेदकः.

To judge, *v. n.* (Form an opinion, determine) विचर् (c. 10. -चारयति -यितुं), विचारं कृ, निर्णी (c. 1. -णयति -णेतुं), निर्णयं कृ, निश्चि (c. 5. -चिनोति -चेतुं), निश्चयं कृ, निर्धृ (c. 10. -धारयति -यितुं), अवधृ, निर्धारणं कृ.—(Weigh, consider, deliberate) मनसा विचर्, वितर्क् (c. 10. -तर्कयति -यितुं), वितर्कं कृ, विमृश् (c. 6. -मृशति -ष्टुं), विगण् (c. 10. -गणयति -यितुं), विकॢप् (c. 10. -कल्पयति -यितुं), समर्थ (nom. समर्थयति -यितुं), समर्थनां कृ, मनसा विवेचनं कृ.—(Discriminate) विज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), परिच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विविच् (c. 7. -विनक्ति -वेक्तुं, c. 10. -वेचयति -यितुं), विभू (c. 10. -भावयति -यितुं), विचर्, विवेकं कृ, परिच्छेदं कृ.—(Examine) परीक्ष् (c. 1. -ईक्षते -क्षितुं), परीक्षां कृ.—(Determine causes judicially, pass sentence) विचर्, विचारं कृ, निर्णी, निर्णयं कृ, व्यवहारदर्शनं कृ, तीर् (c. 10. तीरयति -यितुं), न्यायं कृ.

To judge, *v. a.* (Examine, bring under investigation) परीक्ष् (c. 1. -ईक्षते -क्षितुं), अनुसन्धा (c. 3. -दधाति -धातुं), अनुयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), परीक्षितं -तां कृ.—(Judicially) विचर् (c. 10. -चारयति -यितुं), निर्णी (c. 1. -णयति -णेतुं), तीर् (c. 10. तीरयति -यितुं), विचारणं कृ, निर्णयं कृ.—(Censure, impute fault) निन्द् (c. 1. निन्दति -न्दितुं), दोषीकृ, दोषारोपणं कृ, अपवद् (c. 1. -वदति -दितुं), दोषप्रसङ्गं कृ.—(Consider, reckon) तर्क् (c. 10. तर्कयति -यितुं), मन् (c. 4. मन्यते, मन्तुं).

Judgeship, *s.* धर्माध्यक्षत्वं, न्यायाधीशत्वं, धर्माधिकारः -रिता.

Judgment, *s.* (Discrimination) विवेकः, विवेचनं, परिच्छेदः, विचारः -रणं -णा, विज्ञानं, विभावनं, विवेकदृश्वत्वं, अवबोधः, धिषिः *f.*—(Exercise of judgment after deliberation) विचारः -रणं -णा, विवेचना, सम्प्रधारणा.—(Knowledge derived from the comparison of ideas) अनुभवः, अनुभूतिः, अनुमानं, अनुमितिः *f.*, तर्कः, परामर्शः, ज्ञानं.—(Notion, opinion) बुद्धिः *f.*, मतिः *f.*, मतं, सङ्कल्पः, बोधः; 'according to one's judgment,' यथाबुद्धि, यथामति.—(The faculty concerned in weighing the merits or advantages of any thing) गुणागुणविषयका बुद्धिः, हिताहितविषयका बुद्धिः or धीशक्तिः.—(Determination, decision) निर्णयः, निश्चयः, निश्चितं, विचारः, सङ्कल्पः, निर्धारणं, अवधारणं, निष्पत्तिः *f.*—(Judicial sentence) निर्णयपादः, निर्णयः, विचारः, दण्डाज्ञा, आधर्षणं, तीरणं, तीरितं.—(Divine ordinance) ईश्वरविधिः *m.*, ईश्वरविधानं, ईश्वरनियमः, ईश्वराज्ञासनं.

Judgment-day, *s.* विचारदिनं, विचारदिवसः, न्यायकरणदिवसः.

Judgment-hall, *s.* विचारसभा, धर्मसभा, न्यायसभा, विचारशाला.

Judgment-seat, *s.* धर्मासनं, न्यायासनं, विचारासनं.

Judicatory, *s.* (Court of justice) धर्मसभा, विचारसभा, विचारस्थानं, न्यायसभा, व्यवहारसदनः, व्यवहारदर्शनशाला, राजद्वारं, धर्माधिकरणं, न्यायागारं, सदस् *n.*

Judicature, *s.* (Power of administering justice) व्यवहारदर्शनाधिकारः, विचाराध्यक्षता, न्यायाधिकारः, न्यायकरणाधिकारः, धर्माधिकरणं, विचारकरणाधिकारः; 'simple judicature,' व्यवहारमातृका.—(Court of judicature) धर्मसभा. *See* Judicatory.

Judicial, *a.* (Pertaining to the practice of courts of justice) व्यावहारिकः -की -कं, व्यवहारिकः -की -कं, व्यवहारी -रिणी -रि (न्), व्यवहारसम्बन्धी -न्धिनी -न्धि (न्), व्यवहारविषयः -या -यं; 'judicial proceedings or investigation,' व्यवहारः, व्यवहारदर्शनं, क्रिया, विचारः.—(Pertaining to the administration of justice) व्यवहारदर्शनसम्बन्धी &c., न्यायकरणसम्बन्धी &c.—(Proceeding from court of justice) व्यवहारदर्शनप्रयुक्तः -क्ता -क्तं, व्यवहारदर्शनप्रयुक्तः -क्ता -क्तं.—(Inflicted as a penalty) दण्डरूपः -पा -पं, शिक्षार्थकृतः -क्ता -क्तं.

Judicially, *adv.* विचारानुसारेण, विचारानुक्रमेण, धर्मानुसारात्, व्यवहारानुक्रमेण, यथाव्यवहारं, विचारसभासकाशात्.

Judiciary, *a.* विचारकः -का -कं, व्यावहारिकः -की -कं, निर्णायकः -का -कं, व्यवहारदर्शनसम्बन्धी -न्धिनी -न्धि (न्), धर्मसभासम्बन्धी &c.

Judicious, *a.* (According to sound judgment) विवेकानुसारी -रिणी -रि (न्), सुयुक्तः -क्ता -क्तं, युक्तः -क्ता -क्तं, उपयुक्तः -क्ता -क्तं, यथोचितः -ता -तं, उचितः -ता -तं, समञ्जसः -सा -सं, न्याय्यः -य्या -य्यं, सङ्गतः -ता -तं, सविवेकः -का -कं.—(Acting with judgment.

possessing judgment, said of persons) विवेकी -किनी -कि (न्), विवेकदृष्टा -ष्टा -ष्ट (न्), बुद्धिमान् -मती -मत् (त्), मतिमान् &c., नीतिमान् &c., नीतिज्ञः -ज्ञा -ज्ञं, विज्ञः -ज्ञा -ज्ञं, प्राज्ञः -ज्ञा -ज्ञं, मनस्वी -स्विनी -स्वि (न्), विमृश्यकारी -रिणी -रि (न्), समीक्ष्यकारी &c., ज्ञानी -निनी -नि (न्), विशेषज्ञः -ज्ञा -ज्ञं, हिताहितदर्शी &c., सदसद्दर्शी &c., सुपरिच्छेदकः -का -कं, उचितज्ञः -ज्ञा -ज्ञं.

JUDICIOUSLY, *adv.* विवेकानुसारेण, सविवेकं, विज्ञवत्, प्राज्ञवत्, नीतिज्ञवत्, सपरिच्छेदं, विद्वज्जनवत्, बुधवत्, युक्तं, यथोचितं, समञ्जसं, सम्यक्, सुष्ठु, सुविमृश्य, सुविचार्य्य.

JUDICIOUSNESS, *s.* युक्तता, उपयुक्तता, सविवेकत्वं, बुद्धिमत्त्वं, विज्ञता.

JUG, *s.* कुम्भः, मृत्कांस्यं, मृत्कांस्यं, कांस्यं, कंसः -सं, कंशः, मृद्भाण्डं, पुटग्रीवः, कलशः, कलसः, जलपात्रं, उदपात्रं.

To JUGGLE, *v. a.* (Play tricks by sleight of hand) मायां कृ, इन्द्रियमायां कृ, दृष्टिमायां कृ, इन्द्रियमोहं कृ, दृष्टिमोहं कृ, कुहकं कृ, इन्द्रियजालं कृ, हस्तलाघवं कृ, कुसृतिं कृ, दृष्टिबन्धनं कृ.—(Deceive by trick) मुह् (c. 10. मोहयति -यितुं), छल् (c. 10. छलयति -यितुं), वञ्च (c. 10. वञ्चयते -ति -यितुं).

JUGGLE, *s.* माया, मोहः, कुहकः, छलं, कूटता, कूटः, वञ्चनं.

JUGGLER, *s.* मायी *m.* (न्), मायाकारः, मायाजीवी *m.* (न्), मायावी *m.* (न्), कुहककारः, कुहकजीवी *m.*, कुहकः, इन्द्रजालिकः, ऐन्द्रजालिकः, इन्द्रियमोही *m.* (न्), प्रतिहारः -रकः, प्रातिहारिकः -रकः, कौसृतिकः, योगी *m.* (न्), सम्प्रयोगी *m.*, अभिचारविद् *m.*, शौभिकः, आहितुण्डिकः; 'female juggler,' माया, मायिनी, मायाजीविनी, शाम्बरी.

JUGGLERY, JUGGLING, *s.* (Legerdemain) हस्तलाघवं, हस्तचापल्यं, माया, कुहकः, कुहकवृत्तिः *f.*, इन्द्रजालं, इन्द्रियमोहः, कुसृतिः *f.*, दृष्टिमोहः, दृष्टिबन्धः, अभिचारः, जालं, योगः, सम्प्रयोगः.—(Trickery) कूटता, छलं, वञ्चना.

JUGULAR, *a.* कण्ठ्यः -ण्ठ्या -ण्ठ्यं, कण्ठसम्बन्धी &c., कण्ठस्थः -स्था -स्थं, ग्रीवासम्बन्धीयः -या -यं.

JUICE, *s.* रसः, द्रवः, निर्यासः, सारः, सुधा, आसवः, नीरं, मज्जा, स्वेदः.—(From the elephant's temples) मदः, दानं, हस्तिमदः, गण्डकुसुमं; 'its issue from the forehead,' मदप्रयोगः.

JUICELESS, *a.* नीरसः -सा -सं, विरसः -सा -सं, अरसः -सा -सं, निरसः -सा -सं, रसहीनः -ना -नं, रसशून्यः -न्या -न्यं, असारः -रा -रं, निस्सारः -रा -रं, सारवर्जितः -ता -तं, शुष्कः -ष्का -ष्कं, पिण्डीरः -रा -रं.

JUICINESS, *s.* सरसता, रसवत्त्वं, रसिकत्वं, रसबाहुल्यं, बहुरसत्वं.

JUICY, *a.* सरसः -सा -सं, रसवान् -वती -वत् (त्), रसी -सिनी -सि (न्), रसिकः -का -कं, रसाढ्यः -ढ्या -ढ्यं, रस्यः -स्या -स्यं, बहुरसः -सा -सं, सारवान् &c., बहुसारः -रा -रं.

JUJUBE, *s.* (The tree) बदरः -री *f.* -रिः *m.*, बदरिकः, बदरिकः, राजबदरः, कर्कन्धूः *m. f.* -न्धुः, कोलिः -ली *f.*, कुकोलं, सौवीरं, कर्कशी -शिका, कुवलः; 'the fruit,' बदरं.

JULY, *s.* आषाढः -ढकः, श्रावणः -णिकः, उत्तराषाढः, पूर्व्वश्रावणः, आषाढश्रावणं, सप्तममासः.

To JUMBLE, *v. a.* सम्मिश्र् (c. 10. -मिश्रयति -यितुं), सम्मिश्रीकृ, व्यामिश्र्, मिश्र्, सङ्कृ (c. 6. -किरति -करितुं -रीतुं), सङ्करीकृ, सङ्कीर्णीकृ, सङ्कुलीकृ, अस्तव्यस्तीकृ, संक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), विक्षिप्.

To JUMBLE, *v. n.* (Be jumbled) सम्मिश्रीभू, सङ्कृ in pass. (-कीर्य्यते), सङ्कीर्णीभू, सङ्करीभू, सङ्कुलीभू, सम्मिश्रितः -ता -तं भू.

JUMBLE, *s.* सम्मिश्रणं, मिश्रणं, सङ्करः, साङ्कर्य्यं, सङ्कीर्णत्वं, अस्तव्यस्तता, सङ्कुलता, सन्निपातः, संक्षोभः, व्यतिकरः, सङ्कलनं.

JUMBLED, *p. p.* सम्मिश्रितः -ता -तं, सम्मिश्रः -श्रा -श्रं, सम्मिश्रीकृतः -ता -तं, मिश्रितः -ता -तं, सङ्करीकृतः -ता -तं, सङ्कीर्णः -र्णा -र्णं, सङ्कुलः -ला -लं, अस्तव्यस्तः -स्ता -स्तं, सन्निपतितः -ता -तं, संक्षुब्धः -ब्धा -ब्धं.

JUMNA, *s.* (A river which rises in a mountain called Kalinda, in the Himalaya range, and, after a course of 378 miles, falls into the Ganges below Allahabad; she is daughter of the sun and sister of Yama) यमुना, कालिन्दी, कलिन्दकन्या, कलिन्दनन्दिनी, कलिन्दशैलजाता.—(As daughter of the sun) सूर्य्यजा, सूर्य्यतनया, सूर्य्यपुत्री, देवाकरी.—(As sister of Yama) यमस्वसा *f.* (सृ), यमभगिनी.—(Of a dark blue colour) श्यामा.

To JUMP, *v. a.* प्लु (c. 1. प्लवते, प्लोतुं), वल्ग् (c. 1. वल्गति -ल्गितुं), आवल्ग्, स्कन्द् (c. 1. स्कन्दते, स्कन्तुं), झम्पं कृ; 'to jump over,' लङ्घ् (c. 10. लङ्घयति -यितुं), अभिलङ्घ्; 'to jump over a wall,' प्राकारलङ्घनं कृ; 'jump up,' उत्प्लु, समुत्प्लु, उत्पत् (c. 1. -पतति -तितुं), प्रोत्पत्, उत्सृप् (c. 1. -सर्पति -सप्तुं); 'jump down,' अवप्लु, अवस्कन्द्; 'to jump out from,' प्रस्कन्द्; 'to jump about,' नृत् (c. 4. नृत्यति, नर्त्तितुं); 'having jumped up,' उत्प्लुत्य.

JUMP, *s.* प्लवः, प्लवनं, प्लुतं, उत्प्लवनं, उत्प्लुतं, झम्पः -म्पा, वल्गितं, उत्फालः, उत्पतनं, उत्सर्पणं, अवस्कन्दः.

JUMPED, *p. p.* प्लुतः -ता -तं, उत्प्लुतः -ता -तं, वल्गितः -ता -तं, उत्पतितः -ता -तं.

JUMPER, *s.* प्लवकः, प्लवनकारी *m.* (न्), झम्पकारी *m.*, झम्पी *m.* (न्), उत्प्लवकः, उत्पतिता *m.* (तृ); 'going by jumps,' प्लवगः -गतिः *m.*

JUMPING, *s.* (Act of jumping) प्लवनं, उत्प्लवनं, उत्पतनं, उत्सर्पणं.

JUMPING, *part.* प्लवमानः -ना -नं, वल्गन् -ल्गन्ती -ल्गत् (त्), उत्पतिष्णुः -ष्णुः -ष्णु, उत्पतिता -त्री -तृ (तृ).

JUNCATE, *s.* किलाटपिष्टकः, दधिशर्करादिमयो मोदकः, मिष्टान्नं.

JUNCOUS, *a.* दूर्व्वाविकीर्णः -र्णा -र्णं, नडकीयः -या -यं.

JUNCTION, *s.* योगः, संयोगः, संयोजनं, समायोगः, सम्प्रयोगः, युक्तिः *f.*, सन्धिः *m.*, सन्धानं, श्लेषः, संश्लेषः, सङ्गः -ङ्गमः -ङ्गतिः *f.* -तं, समागमः, संहतिः *f.*, संघातः, संसक्तिः *f.*, समासक्तिः *f.*, संसृष्टिः *f.*, संसर्गः, मेलनं, सम्पर्कः, सम्बन्धः, सक्तिः *f.*, आसक्तिः *f.*, प्रसक्तिः *f.*—(Point of union) सन्धिस्थानं.

JUNCTURE, *s.* (Point of time, crisis) लग्नं, सन्धिः *m.*, कालसन्धिः *m.*, सन्धिवेला, समयः, वेला, कालः, प्रसङ्गः, अवकाशः.—(Joint, articulation) सन्धिः *m.*, ग्रन्थिः *m.*—(Seam) सीवनं.

JUNE, *s.* ज्येष्ठः, आषाढः -ढकः, ज्यैष्ठः, ज्येष्ठामूलीयः, पूर्व्वाषाढः, उत्तरज्येष्ठः, ज्येष्ठाषाढकं.

JUNGLE, *s.* जङ्गलं, जाङ्गलं, प्रस्तारः, जङ्गलस्थानं, गुल्मावृतस्थानं.

JUNGLY, *a.* जाङ्गलः -ली -लं, जङ्गली -लिनी -लि (न्), प्रस्तारी &c.

JUNIOR, *a.* अवरः -रा -रं, अवरवयस्कः -स्का -स्कं, अवरवयाः -याः -यः (स्) अवरजः -जा -जं, अवरजातः -ता -तं, अनुजः -जा -जं, अनुजातः -ता -तं, अनुजन्मा -न्मा -न्म (न्), जघन्यजः -जा -जं, यवीयान् -यसी -यः (स्), कनीयान् -यसी -यः (स्), यविष्ठः -ष्ठा -ष्ठं, कनिष्ठः -ष्ठा -ष्ठं.

JUNIPER, *s.* जूणिपराख्यो वृक्षप्रभेदः.

JUNK, *s.* चीनदेशीयो वृहन्नौकाविशेषः, चीननौका.—(Pieces of old cable) जीर्णरज्जुखण्डाः *m. pl.*

JUNKET, *s.* निभृते कृतं परमान्नभोजनं or उत्तमान्नसम्भोजनं or सहभोजनं, छलेन कृतो महोत्सवः, निभृतोत्सवः.

To JUNKET, *v. n.* निभृतोत्सवं कृ, निभृते or छलेन सहभोजनं कृ or उत्सवं कृ.

JUNTA, JUNTO, *s.* (Council) सभा, समाजः, शिष्टसभा, महासभा.—(Cabal) गोपनीयकर्म्मसाधनार्थं कतिपयजनसंसर्गः, कुसंसर्गः.

JUPITER, *s.* (The planet) बृहस्पतिः *m.*, गुरुः *m.*, वाक्पतिः *m.*, ग्रहराजः. *See* VRIHASPATI. (The god). *See* INDRA.

JURIDICAL, *a.* धर्म्मसभासम्बन्धी &c., विचारसभासम्बन्धी &c., न्यायसभासम्बन्धी &c., व्यावहारिकः -की -कं, व्यवहारिकः -की -कं.

JURIDICALLY, *adv.* विचारानुसारेण, व्यवहारानुसारेण, धर्म्मानुसारात्, यथाव्यवहारं, यथान्यायं.

JURISCONSULT, *s.* स्मृतिशास्त्रज्ञः, धर्म्मशास्त्रज्ञः, व्यवहारपण्डितः, व्यवहारसचिवः, व्यवस्थाज्ञः, धर्म्मप्रवक्ता *m.* (क्तृ).

JURISDICTION, *s.* अधिकारः -रिता, विचारकरणाधिकारः, न्यायकरणाधिकारः, आधिपत्यं, प्रभुत्वं, व्यवहारदर्शनाधिकारः, धर्म्माधिकारः.

JURISPRUDENCE, *s.* व्यवहारः, व्यवहारशास्त्रं, व्यवहारविधिः *m.*, व्यवहारज्ञानं, व्यवहारविद्या, धर्म्मशास्त्रं, स्मृतिशास्त्रं; 'a title or head of jurisprudence,' व्यवहारविषयः, व्यवहारमार्गः, व्यवहारस्थानं, व्यवहारपदं.

JURISPRUDENT, *a.* व्यवहारज्ञः -ज्ञा -ज्ञं, व्यवहारशास्त्रज्ञः &c., स्मृतिशास्त्रज्ञः &c., धर्म्मशास्त्रज्ञः &c., व्यवहारपण्डितः -ता -तं.

JURIST, *s.* धर्म्मशास्त्री *m.* (न्), धर्म्मज्ञः, व्यवहारवेत्ता *m.* (तृ), स्मृतिज्ञः.

JUROR, *s.* ज्ञापितजनः, ज्ञापितपुरुषः, धर्म्मसभायां सुविचारार्थं ज्ञापितः प्रमाणपुरुषः or स्थेयः or मध्यस्थः.

JURY, *s.* धर्म्मसभायां सुविचारार्थं ज्ञापितानां द्वादशप्रमाणपुरुषाणां गणः, ज्ञापितप्रमाणपुरुषपंक्तिः *f.*, स्थेयगणः.

JURYMAN, *s.* सुविचारार्थं ज्ञापितः प्रमाणपुरुषः. *See* JUROR.

JUST, *a.* (Upright, honest, equitable) न्यायाचारः -रा -रं -री -रिणी -रि (न्), न्यायी -यिनी -यि (न्), न्यायवृत्तिः -त्तिः -त्ति, न्यायवर्त्ती -र्त्तिनी -र्त्ति (न्), न्यायकारी -रिणी -रि (न्), धार्म्मिकः -की -कं, धर्म्मैकारी &c., न्यायशीलः -ला -लं, न्यायपरः -रा -रं, धर्म्मी -र्म्मिणी -र्म्मि (न्), शुचिः -चिः -चि, साञ्जिकः -की -कं, महासत्त्वः -त्त्वा -त्त्वं, सच्चरितः -ता -तं, साधुः -धुः -ध्वी -धु, साधुवृत्तिः -त्तिः -त्ति, ऋजुः -जुः -जु, विमलात्मा -त्मा -त्म (न्), मायाहीनः -ना -नं, नीतिमान् -मती -मत् (त्), निष्कपटः -टा -टं, निर्व्वलीकः -का -कं, अकूटव्यवहारः -रा -रं.—(According to equity) न्याय्यः -य्या -य्यं, यथान्यायः -या -यं, न्यायानुसारी -रिणी -रि (न्), यथानीतिः -तिः -ति, याथार्थिकः -की -कं, तात्त्विकः -की -कं, न्यायसिद्धः -द्धा -द्धं.—(Exact, correct, right, proper) यथार्थः -र्था -र्थं, याथार्थिकः -की -कं, समञ्जसः -सा -सं, अञ्जसः -सा -सं, शुद्धः -द्धा -द्धं, सत्यः -त्या -त्यं, तथ्यः -थ्या -थ्यं, सम्यक् समीची सम्यक्, युक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, यथायोग्यः -ग्या -ग्यं, उचितः -ता -तं, सङ्गतः -ता -तं.—(Impartial, fair) विपक्षपातः -ता -तं, समदर्शी -र्शिनी -र्शि (न्), समः -मा -मं, समानवृत्तिः -त्तिः -त्ति, मध्यः -ध्या -ध्यं.—(Full) अन्यूनः -ना -नं, अविकलः -ला -लं, सम्पूर्णः -र्णा -र्णं.

JUST, *adv.* (Close, near to, in reference to place) निकटे, समीपं, उपान्ते, अन्तिके, अभितस्.—(Nearly in time, almost) प्रायस्, प्रायशस्, भूयिष्ठं, कल्पः; 'just dead,' मृतप्रायः, मृतकल्पः or expressed by the desid. adj. मुमूर्षुः; 'just going,' जिगमिषुः -षुः -षु; 'just finished,' समाप्तभूयिष्ठः -ष्ठा -ष्ठं.—(In the instant, just now) सद्यस्, मात्रं; 'just heated,' सद्यस्तप्तः -प्ता -प्तं; 'just born,' सद्योजातः -ता -तं, जातमात्रः -त्री -त्रं; 'just dead,' सद्योमृतः -ता -तं; 'just done,' सद्यःकृतः -ता -तं.—(Exactly) यथार्थं, युक्तं, सम्यक्, यथावत्, अञ्जसा, समञ्जसं, यथातथं, तावत्; 'just so far, just so much,' तावन्मात्रं, तदन्तं; 'just so,' युक्तं, युज्यते, एवमेव, तथैव; 'just the same, neither more nor less,' नाधिकं न च न्यूनं; 'just as,' यद्वत्, यत्प्रकारेण.—(Merely, barely) मात्रं, कष्टेन, कृच्छ्रेण. 'Just' is often used redundantly, in which case it is expressed by तावत्; as, 'just wait a moment,' क्षिप्रं तावन् मुहूर्त्तं.

JUST, *s.* (A tournement) सादिनां or अश्वारोहिणां क्रीडायुद्धं.

To JUST, *v. n.* पूर्व्वोक्तक्रीडायुद्धं कृ, पूर्व्वोक्तप्रकारेण परस्परसनाथार्थं कृ.

JUSTICE, *s.* (The virtue which consists in giving what is due, integrity, honesty) धर्म्मः, न्यायः, नीतिः *f.*, नयः, धर्म्मन्यायः, न्यायशीलता, न्यायिता, न्यायाचारता, धार्म्मिकत्वं, ऋजुता, शुचिता, साधुता.—(Equity, agreeableness to right) न्याय्यत्वं -ता, न्यायता, युक्तिः *f.*, योग्यता, उपयुक्तता, यथायोग्यता, यथार्थता, याथार्थ्यं, सामञ्जस्यं, सम्यक्त्वं.—(Right application of justice, redress of wrong) न्यायः, दण्डः, दण्डयोगः.—(Impartiality) साम्यं, समता, सर्व्वसमता, अपक्षपातः.—(Merited punishment, retribution) उपयुक्तदण्डः, न्याय्यदण्डः, यथापराधदण्डः, यथापराधशासनं, योग्यशिक्षा, प्रतिक्रिया.—(One who administers justice) धर्म्माधिकारी *m.* (न्), धर्म्माध्यक्षः, न्यायाधिकारी *m.*, दण्डनायकः; 'administration of justice,' न्यायप्रणयनं, न्यायकरणं, न्यायदर्शनं, व्यवहारदर्शनं; 'court of justice,' धर्म्मसभा. *See* JUDICATORY.

JUSTICESHIP, *s.* धर्म्माध्यक्षता -त्वं, न्यायाधीशत्वं, धर्म्माधिकारः -रिता.

JUSTICIABLE, *a.* व्यवहार्यः -र्य्या -र्य्यं, व्यवहर्त्तव्यः -व्या -व्यं.

JUSTICIARY, *s.* न्यायाध्यक्षः, न्यायदर्शी *m.* (न्), न्यायप्रणेता *m.* (तृ). *See* JUDGE.

JUSTIFIABLE, *a.* निरसनीयदोषः -षा -षं, निराकरणीयदोषः -षा -षं, आरोपितदोषमोचनीयः -या -यं, शोधनीयदोषः -षा -षं, शोधनीयः -या -यं, परिशोधनीयः -या -यं, शोध्यः -ध्या -ध्यं, क्षालनीयदोषारोपः -पा -पं, अनारोपणीयदोषः -षा -षं, दोषनिरासक्षमः -मा -मं, निवार्य्यदोषः -षा -षं, मार्ज्जनीयदोषः -षा -षं, दोषमोचनीयः -या -यं, यथान्यायः -या -यं, रक्षणीयः -या -यं.

JUSTIFIABLENESS, *s.* शोधनीयत्वं, शोध्यता, परिशुद्धिक्षमता, दोषमोच्यता.

JUSTIFIABLY, *adv.* परिशोधनीयं, यथा दोषो निरसितुं शक्यते तथा.

JUSTIFICATION, *s.* शुद्धिः *f.*, शोधनं, परिशुद्धिः *f.*, परिशोधनं, विशुद्धिः *f.*, दोषशुद्धिः *f.*, दोषशोधनं, दोषमार्ज्जना -नं, दोषमोचनं, दोषमुक्तिः *f.*, निर्दोषीकरणं, आरोपितदोषमुक्तिः *f.*, आरोपितदोषशोधनं, आरोपितदोषमार्ज्जना, दोषप्रतीकारः, दोषनिराकरणं, दोषनिवारणं, दोषनिरसनं.

JUSTIFICATORY, *a.* शोधकः -का -कं, परिशोधकः -का -कं, शुद्धिकरः -रा -रं.

JUSTIFIED, *p. p.* शोधितः -ता -तं, परिशोधितः -ता -तं, निर्दोषीकृतः -ता -तं, दोषमुक्तः -क्ता -क्तं, मुक्तदोषः -षा -षं, निर्धृतदोषः -षा -षं, निरस्तदोषः -षा -षं, निवारितदोषः -षा -षं.

JUSTIFIER, *s.* शोधकः, परिशोधकः, परिशुद्धिकरः, दोषमोचकः, निर्दोषीकर्त्ता *m.* (र्त्तृ), दोषनिवारकः, दोषप्रतिकारकः.

To JUSTIFY, *v. a.* शुध् (c. 10. शोधयति -यितुं), परिशुध्, दोषात् परिशुध् or मुच् (c. 6. मुञ्चति, मोक्तुं), निर्दोषीकृ, निरपराधीकृ, निष्कलङ्कीकृ, आरोपितदोषाद् मुच्, आरोपितदोषं निराकृ or प्रतिकृ or निषृ (c. 10. -वारयति -यितुं), दोषशोधनं कृ, अपराधशोधनं कृ, दोषनिराकरणं कृ, दोषनिरसनं कृ.

To JUSTLE, *v. a.* and *n.* *See To* JOSTLE.

JUSTLY, *adv.* (Conformably to justice or propriety) यथान्यायं, न्यायानुसारेण, न्यायेन, न्यायतस्, न्यायवत्, धर्म्मतस्, धर्म्मेण, यथार्थं, युक्तं, उपयुक्तं, यथायोग्यं, सम्यक्, यथोचितं, समञ्जसं.—(According to truth) यथार्थं, याथार्थ्येन, सत्यं, यथातथ्यं, अविपर्य्यं, अविपरीतं, परमार्थतस्.—(Fairly, honestly) समं, साम्येन, सार्त्तं, निर्व्याजं, निर्व्वलीकं, सारल्येन.—(Exactly, accurately, fitly) यथावत्.

यथार्थं, अन्वक्षं, समन्वक्षं, यथार्हं -हैतस्, यथार्थं, युक्तं, स्याने.

JUSTNESS, *s.* (Exactness, accuracy) यथार्थता, याथार्थ्यं, सम्यक्त्वं, सामञ्जस्यं, समन्वक्षं, याथातथ्यं, शुद्धता, युक्तता.—(Conformity to truth) सत्यता, यथार्थता, अविसंवादित्वं, तथ्यत्वं, युक्तता.—(Justice, equity) न्याय्यत्वं -ता, न्यायता, युक्तिः *f.*, युक्तत्वं, योग्यता, यथायोग्यता, याथार्थ्यं, सामञ्जस्यं, सम्यक्त्वं, शस्तत्वं.—(Impartiality) समता, साम्यं, सद्वृत्तसमता, अपक्षपातः.

To JUT, *v. n.* (Project) बहिःस्था (c. 1. -तिष्ठति -ष्ठातुं), बहिर्नी (c. 1. -नयति -नेतुं), बहिर्भू, बहिर्लंब् (c. 1.-लम्बते -म्बितुं), बहिःप्रलम्ब्, अतिवृत्, अतिक्रम् (c. 4. -क्राम्यति -क्रमितुं).

JUT, *s.* बहिर्यंत्रनं, बहिर्लम्बनं, प्रलम्बता, उदयता, आभोगः, प्रसरः.

JUTTING, *part.* प्रलम्बः -म्बा -म्बं, बहिर्लंबः -म्बा -म्बं, उदग्रः -ग्रा -ग्रं.

JUVENILE, *a.* यौवनवान् -वती -वत् (त्), युवा युवति -तौ or यूनी युव (न्), यौवनेयकः -की -कं, तरुणः -णा -णं, कौमारः -री -रं, अल्पवयस्कः -स्का -स्कं, अभिनववयस्कः -स्का -स्कं, प्रत्यग्रवयस्कः -स्का -स्कं, तरुणवयस्कः -स्का -स्कं, बालिशः -शा -शं, युवकालीनः -ना -नं.

JUVENILITY, *s.* यौवनं, यौवनावस्था, तारुण्यं, तारुण्यावस्था, कुमारभावः, कौमारं, सौकुमार्यं, बालत्वं, बाल्यं.

JUXTAPOSITION, *s.* संस्थितिः *f.*, उपस्थानं, संस्थानं, संस्थत्वं, समीपता, सन्निधिः *m.*, सान्निध्यं, संसर्गः, नैकट्यं, उपश्लेषः, उपन्यासः.

K.

KALE, *s.* शाकभेदः, शाकं, हरितकं, शूरणं, शिग्रुः *m.*

KALENDAR, *s.* *See* CALENDAR.

KÁMADEVA, *s.* (The god of love or Hindu Cupid, son of Vishnu or Krishna by Lakshmí, who is then called Máyá or Rukminí. According to another account he was first produced in the heart of Brahmá, and coming out in the form of a beautiful female, was looked upon by Brahmá with amorous emotions. He is usually represented as a handsome youth, sometimes riding on a parrot, and attended by nymphs, one of whom bears his banner, which consists of a fish on a red ground. Endeavouring to influence Śiva with the passion of love for his wife Párvatí, he discharged an arrow at him; but Śiva, enraged at the attempt, reduced him to ashes, or as some say, to a mere mental essence, by a beam of fire darted from his central eye. Afterwards the relenting god declared that he should be born again in the form of Pradyumna, son of Krishna by Máyá or Rukminí. The bow of Kámadeva is made of flowers, with a string formed of bees, and his five arrows are each tipped with the blossom of a flower which is devoted to, and supposed to preside over, a sense. He is lord of the Apsarasas. As god of desire he is called) कामः, कामदेवः, कमनः, रमः -मणः, रमणिः *m.*, रामिलः, कृष्णरथोत्पत्तिः *m.*, रागरज्जुः *m.*, रागवृन्तः, रागचूर्णः, रतनारीचः.—(The mind-agitator) मन्मथः.—(The maddener) मदनः.—(The inflamer) दर्पकः.—(The inflamer of Brahmá) कन्दर्पः.—(Born in the heart) मनसिजः, चित्तजन्मा *m.* (न्), मनोजन्मा *m.*, चित्तभूः *m.*, चेतोभूः, मनोभूः *m.*, मनोभवः, मनसिशयः, हृच्छयः, मनोयोनिः *m.*—(Born *only* in the heart, self-born) अनन्यजः, आत्मभूः *m.*, आत्मयोनिः *m.*—(The ideal one) स्मरः.—(The son of Lakshmí) लक्ष्मीपुत्रः, श्रीनन्दनः, श्रीजः.—(The son of Krishna) प्रद्युम्नः.—(The son of Lakshmí in the form of Máyá or Illusion) मायी *m.* (न्), मायासुतः.—(The bodiless one) अनङ्गः, अशरीरः.—(The fish-bannered one) मकरकेतुः *m.*, मीनकेतनः, मकरध्वजः, झषकेतनः.—(Having a bow made of flowers) पुष्पधनुः *m.*, पुष्पधन्वा *m.* (न्), पुष्पचापः, कुसुमकार्मुकः, पुष्पशरासनः.—(Having arrows of flowers) कुसुमायुधः, पुष्पशरः, पुष्पेषुः *m.*, पुष्पास्त्रः, कुसुमेषुः *m.*, प्रसूनेषुः *m.*, सुरभिबाणः.—(Having five arrows) पञ्चबाणः, पञ्चशरः, पञ्चेषुः *m.*—(Having a flower as a symbol) पुष्पकेतनः, पुष्पकेतुः *m.*—(The beautiful) सुन्दरः.—(The destroyer) मारः.—(The lord) ईश्वरः.—(The destroyer of the Daitya, Śambara) शम्बरसूदनः, शम्बरारिः *m.*—(The destroyer of devotional tranquillity) शमान्तकः.—(The water-born) इराजः.—(The husband of Rati) रतिरमणः, रतिपतिः *m.* Another name of this god is मनुरः. The wife of Kámadeva is called Rati. *See* RATI. His son is called अनिरुद्धः, सुबाहुः, उषापतिः *m.*, उषेशः; 'his daughter,' वृषा; 'his son's wife,' प्रीतिसुधा and उषा; 'his fish,' जलरूपः.

KANDAHAR, *s.* (The country) गान्धारः.

KANGAROO, *s.* (The animal) कान्गुरुसंज्ञको विदेशीयजन्तुभेदः.

KANSA, *s.* (The uncle and enemy of Krishna) कंसः, उग्रसेनजः, उग्रसेनपुत्रः, उग्रसेनतनयः, उग्रसेनसुतः.

KÁRTIKEYA, *s.* (The god of war, or Hindu Mars, generated from the vivifying principle of Śiva cast into Agni, or Fire, who, unable to retain it, cast it into Gangá, or the Ganges. On the banks of this river was born the beautiful boy who was destined to lead the armies of the gods, and to be the destroyer of Táraka, a demon who, by his austerities, had alarmed both gods and men, and gained the dominion of the universe. When born, Kártikeya was nursed by six nymphs, called the Krittikás, or Pleiades, who each called him her son, and, offering her breast, the child assumed to himself six mouths, and received nurture from each. He is considered to be the brother of Ganeśa, who was the reputed eldest son of Śiva and Párvatí. He is represented riding on a peacock. (As having the six Krittikás for his foster-mothers, he is called) कार्त्तिकेयः, कृत्तिकासुतः, मायातुरः, बाहुलेयः, चित्रशाखः.—(As god of war he is called) स्कन्दः, महासेनः, सेनापतिः *m.*, सेनानीः *m.*—(As born in the fire) अग्निभूः *m.*, अग्निभुवः.—(The beautiful boy) कुमारः.—(Born on the Ganges) गङ्गापुत्रः, गङ्गासुतः.—(Brought up in thickets of grass) शरजन्मा *m.* (न्), शरजः.—(Son of Párvatí) पार्वतीनन्दनः, गौरीजः, गौरीपुत्रः.—(The six-faced) षडाननः, षण्मुखः.—(The twelve-eyed) द्वादशलोचनः, द्वादशाक्षः.—(The twelve-handed) द्वादशकरः.—(The conqueror of Táraka) तारकजित् *m.*, तारकारिः *m.*, तारकरिपुः *m.*, तारकहा *m.* (न्), तारकसूदनः.—(The destroyer of the demon Krauncha) क्रौञ्चदारणः, क्रौञ्चारातिः *m.*, क्रौञ्चारिः *m.*—(The mysterious one) गुहः.—(The spear-holder) शक्तिधरः, शक्तिग्रहः, शक्तिपाणिः *m.*, शक्तिभृत् *m.*—(Borne on the

peacock) शिखिवाहनः, वह्निवाहनः. His wife is called सेना.

KASKAS, *s.* (Grass) मृणालं, अमृणालं.

To KAW, *v. n.* कै (c. 1. कायति, कातुं), द्रांक्ष् (c. 1. द्रांक्षति -क्षितुं) or ध्रांक्ष् or ध्वांक्ष् or ध्मांक्ष् (c. 1. ध्मांक्षति -क्षितुं), काकवद् रु (c. 2. रौति, रवितुं).

KAW, *s.* काकरुतं, काकरावः, काकरवः, काकशब्दः, ध्वांक्षरुतं. का शब्दः.

To KECK, *v. n.* वम् (c. 1. वमति -मितुं), उद्वम्, उद्वमनं कृ, अजीर्णशोधनं कृ.

KEEL, *s.* नौकातलं, नौकातले दीर्घकाष्ठं, नौकाधोभागे दीर्घदारुः *m.*

KEEN, *a.* (Sharp, having a fine edge) तीक्ष्णः -क्ष्णा -क्ष्णं, तीक्ष्णधारः -रा -रं, शितः -ता -तं, निशितः -ता -तं, शितधारः -रा -रं, धाराधरः -रा -रं, तीक्ष्णधाराधरः -रा -रं, खरः -रा -रं, तीव्रः -व्रा -व्रं, तिग्मः -ग्मा -ग्मं, ज्ञातः -ता -तं, निशातः -ता -तं, तेजोवान् -वती -वत् (त्), तीक्ष्णायः -या -यं, प्रखरः -रा -रं.—(As hunger, cold, &c.) तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं.—(Eager, vehement) तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), तीक्ष्णस्वभावः -वा -वं, व्यग्रः -ग्रा -ग्रं, कुतूहली -लिनी -लि (न्), उत्सुकः -का -कं, उत्साही &c., अत्यभिलाषी &c., उत्सुकः -का -कं.—(In mind) सूक्ष्मबुद्धिः -द्धिः -द्धि, तीक्ष्णबुद्धिः &c., कुशाग्रीयमतिः -तिः -ति, विदग्धः -ग्धा -ग्धं.—(Acrimonious) तिग्मः -ग्मा -ग्मं, अरुन्तुदः -दा -दं, कटुः -टुः -टुी -टु, उग्रः -ग्रा -ग्रं, दंशी -शिनी -शि (न्), दंशकः -का -कं; 'keen words,' वागसिः *f.*, वागिषुः *m. f.*

KEENLY, *adv.* तीक्ष्णं, तीव्रं, तैक्ष्ण्येन, सतैक्ष्ण्यं, तिग्मं, सतैग्म्यं, कटु, उग्रं, तीक्ष्णतया, उग्रतया, निष्ठुरं, खरं, प्राखर्य्येण, तेजसा.

KEENNESS, *s.* (Sharpness of edge) तीक्ष्णता, तैक्ष्ण्यं, धारातीक्ष्णता, धाराशितत्वं, निशितत्वं, तीव्रता, तीक्ष्णायत्वं, तिग्मता.—(Eagerness, vehemence) तीक्ष्णता, स्वभावतीक्ष्णता, व्यग्रता, कौतूहलं, उत्सुकता, अत्यभिलाषः, उत्साहः, अनुरागः.—(Of mind) बुद्धिसूक्ष्मता -सौक्ष्म्यं, बुद्धितीक्ष्णता -तैक्ष्ण्यं, कुशाग्रीयमतित्वं, विदग्धता.—(Acrimony) तिग्मता, तैग्म्यं, कटुता, उग्रता, अरुन्तुदत्वं, प्राखर्य्यं, निष्ठुरता, नैष्ठुर्य्यं.

To KEEP, *v. a.* (Hold) धृ (c. 1. धरति, धर्त्तुं, c. 10. धारयति -यितुं), सन्धृ, धा (c. 3. धत्ते, धातुं), रक्ष् (c. 1. रक्षति -क्षितुं), संरक्ष्; 'to keep in the memory or heart,' हृदये कृ or धृ.—(Have in custody) रक्ष्, अभिरक्ष्, परिरक्ष्, संरक्ष्, पाल् (c. 10. पालयति -यितुं), गुप् (c. 1. गोपायति, गोतुं), रक्षणं कृ, रक्षां कृ, पालनं कृ.—(Preserve, guard) रक्ष्, प्रतिरक्ष्, पाल् or पा (c. 2. पाति -तुं), परिपाल्, अनुपाल्, प्रतिपाल्, सम्पाल्, अभिपाल्, उपपाल्, गुप् (c. 1. or c. 10. गोपयति -यितुं), अनुगुप्, अभिगुप्, प्रगुप्, त्रै (c. 1. त्रायते, त्रातुं), परित्रै, संत्रै, अव् (c. 1. अवति -वितुं), गुप्तिं कृ, गोपनं कृ.—(Detain) धृ, निरुध् (c. 7. -रुणद्धि -रोद्धुं), अवरुध्, रुध्, बन्ध् (c. 9. बध्नाति, बन्द्धुं), प्रतिबन्ध्.—(Restrain) निरुध्, वृ (c. 10. वारयति -यितुं), निषृ, निषिध् (c. 1. -षेधति -षेद्धुं), प्रतिषिध्.—(Tend, feed) पाल्, रक्ष्; 'keep cattle,' गोपालनं कृ, गोरक्षणं कृ, पाशुपाल्यं कृ.—(Practise, perform, observe) आचर् (c. 1. -चरति -रितुं), समाचर्, सेव् (c. 1. सेवते -वितुं), आस्था (c. 1. -तिष्ठति -स्थातुं), अनुष्ठा, समास्था, समुपास्था, विधा (c. 3. -दधाति -धातुं), भज् (c. 1. भजते, भक्तुं), आलस् (c. 1. -लसते -सितुं), समालस्, अवलस्; 'keep silence,' मौनं भज् or सेव् or अवलस्.—(Fulfil) साध् (c. 10. साधयति -यितुं); 'keep a promise,' प्रतिज्ञां शुध् (c. 10. शोधयति -यितुं), प्रतिज्ञां पाल्.—(Not to divulge) धृ (c. 10. धारयति), न प्रकाश् (c. 10. काशयति -यितुं); 'to keep a secret,' रहस्यं धृ or रक्ष् or गुप्, रहस्यगोपनं कृ.—(Maintain, board) भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्त्तुं), सम्भृ, भरणं कृ, भृतिं कृ or दा, पाल्, पुष् (c. 10. पोषयति -यितुं), पोषणं कृ, पालनं कृ.—(Entertain) सत्कृ.—(Have in pay) वेतनं दा.—(Keep back) निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), विनिग्रह्, सन्निग्रह्, संह् (c. 1. -हरति -हर्त्तुं), उपसंह्, विधृ, निवृ, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उपसंहरणं कृ.—(Keep company with) सह चर्, सह वस् (c. 1. वसति, वस्तुं), संवस्.—(Keep in, conceal) गुह् (c. 1. गूहति -हितुं), निगुह्, छद् (c. 10. छादयति -यितुं), अनर्घा, अपवृ, संवृ, गोपनं कृ.—(Keep off) प्रतिवृ, निवृ, वृ, प्रतिहन् (c. 2. -हन्ति -न्तुं), प्रतिकृ, निरुध्, व्यपोह् (c. 1. -जहते -हितुं), अपसिध्, प्रतिषिध्.—(Keep under) वशीकृ, स्वाधीनीकृ, निग्रह्, प्रत्याह्.—(Keep up, maintain) धृ, सन्धृ, भृ, सम्भृ, प्रवृत् (c. 10. -वर्त्तयति -यितुं), संस्था in caus. (-स्थापयति -यितुं), पाल्, प्रवर्त्तनं कृ.—(Keep out) निषिध्, निवृ.

To KEEP, *v. n.* (Remain, continue) स्था (c. 1. तिष्ठति -ष्ठे, स्थातुं), वृत् (c. 1. वर्त्तते -र्त्तितुं); 'to keep on doing any thing,' may be expressed by आस् (c. 2. आस्ते) with the pres. or indec. part. of another verb; as, 'he keeps following me,' मम पश्चाद् आगच्छन् आस्ते. *See* CONTINUE, *v. n.* (Last, endure) स्था, चिरस्थायी -यिनी -यि भू.—(Persevere) पर्य्यवस्था, निर्बन्धं कृ, आग्रहं कृ.—(Adhere, cohere) संसञ्ज् in pass. (-सज्यते -सक्तते), संश्लिष् in pass. (-श्लिष्यते), अनुषञ्ज् in pass. (-षज्यते), संलग्नीभू, अनुलग्नीभू.—(Lodge) वस् (c. 1. वसति, वस्तुं), निवस्.—(Keep from) निवृत् (c. 1. -वर्त्तते -र्त्तितुं), परिहृ (c. 1. -हरति -हर्त्तुं), वृज् (c. 10. वर्जयति -यितुं), परिवृज्, विवृज्.—(Keep on) प्रवृत्, प्रारभ् सम्पद् (c. 10. -पादयति -यितुं).

KEEP, *s.* (Custody, charge) रक्षा -क्षणं, पालनं, गुप्तिः *f.*, गोपनं.—(Condition) अवस्था, स्थितिः *f.*, भावः, वृत्तिः *f.*; 'in good keep,' सुस्थितः -ता -तं.—(Board, maintenance) भृतिः *f.*, ग्रासाच्छादनं, अन्नजलं, भोजनं.—(Stronghold) दुर्गं.—(Dungeon) कारा, कारागारं, निरोधस्थानं, बन्धनागारं, गुप्तिः *f.*

KEEPER, *s.* रक्षकः, रक्षी *m.* (न्), पालकः, पालः, पालयिता *m.* (तृ), रक्षिता *m.* (तृ), अध्यक्षः, पतिः *m.* पः in comp.; as, 'keeper of sheep or cattle,' पशुपालः, मेषपोषकः, गोरक्षकः, गोपालः, गोपः, गवीश्वरः; 'of a prison,' कारारक्षकः, कारागाराध्यक्षः, बन्दिपालः; 'of mad people,' उन्मत्तपालकः; 'of a park,' उद्यानपालः -लकः, उद्यानरक्षकः; 'of a gaming-house,' सभापतिः *m.*, सभिकः, द्यूतसभाधिकारी *m.* (न्).

KEEPERSHIP, *s.* रक्षकत्वं, पालकत्वं, अध्यक्षत्वं, अधिकारित्वं.

KEEPING, *s.* (Custody, guard) रक्षा -क्षणं, गुप्तिः *f.*, पालनं, गोपनं.—(Congruity, harmony) रेकं, सङ्गतत्वं, साङ्गत्यं, सादृश्यं, अविरोधः, योग्यता, आनुरूप्यं.

KEEPSAKE, *s.* स्मरणार्थकदानं, स्मरणार्थं दत्तं द्रव्यं or वस्तु, स्मरणार्थं गृहीतं द्रव्यं, स्मृतिजनकदानं, स्मृतिदानं, प्रीतिदानं, प्रीतिदार्यं.

KEG, *s.* क्षुद्रभाण्डं, काष्ठभाण्डं, दीर्घगोलाकारं क्षुद्रभाजनं.

To KEN, *v. a.* (Descry) दूराद् आलोक् (c. 1. -लोकते, c. 10. -लोकयति -यितुं) or अवलोक् or दृश् (c. 1. पश्यति, द्रष्टुं) or प्रदृश्.—(Know) ज्ञा (c. 9. जानाति, ज्ञातुं).

KEN, *s.* (Reach of sight) चक्षुर्विषयः, नयनविषयः.—(Reach of understanding) बुद्धिविषयः; 'beyond the ken,' अविषयः -या -यं, बुद्धातीतः -ता -तं.

KENNEL, *s.* (House for dogs) श्वशाला, कुक्कुरालयः, श्वगृहं, कुक्कुरागारं.—(Pack of hounds) श्वगणः, कुक्कुरगणः, मृगयाकुक्कुरगणः.—(Water-course) प्रणाली, जलमार्गः, जलवाहनी.

To KENNEL, *v. n.* कुक्कुरालये वस् (c. 1. वसति, वस्तुं) or स्था (c. 1. तिष्ठति, स्थातुं), श्वपद् or शृगालवद् गर्ते वस् or स्था.

To KENNEL, *v. a.* कुक्कुरालये वासय् (c. 10. वासयति -यितुं).

KEPT, *p. p.* धृतः -ता -तं, धारितः -ता -तं, रक्षितः -ता -तं, पालितः -ता -तं, गुप्तः -प्ता -प्तं, भृतः -ता -तं, पोषितः -ता -तं.

KERCHIEF, *s.* (Head-dress) मस्तकाभरणं, मुकुटं, किरीटः, शेखरः; 'handkerchief,' नक्षकः, चरकं, मुखमार्जनी; 'neckkerchief,' कण्ठवेष्टनं, ग्रीवावेष्टनं, कण्ठवस्त्रं.

KERNEL, *s.* बीजं, गर्भः, फलबीजं, फलगर्भः, अष्ठिः *f.*, अष्ठीला -लिका. —(Central part of any thing) मध्यं, गर्भः, उदरं, हृदयं, अभ्यन्तरं.

KERNELLY, *a.* बीजी -जिनी -जि (न्). बीजवान् -वती -वत् (त्), बीजपूर्णः -र्णा -र्णं, बीजमयः -यी -यं, बीजाकारः -रा -रं.

KESTREL, *s.* श्येनजातीयः पक्षिभेदः, कपोतारिः *m.*

KETCH, *s.* द्विकूपकविशिष्टा नौका, कूपकद्वययुक्ता नौः.

KETTLE, *s.* स्थाली, उदस्थाली, पिठरः -रं, कटाहः, उखा, पिष्टपचनं, कन्दुः *m. f.*, चुल्लीयं.

KETTLE-DRUM, *s.* भेरी, मृदङ्गः, मुरजः, पटहः, दुन्दुभिः *m.*, महेलः, डिण्डिमः, आनकः, डङ्का.

KETTLE-DRUMMER, *s.* भाईङ्गः -ङ्गिकः, भैरजिकः, भेरीताडकः, पटहताडकः.

KEY, *s.* उद्घाटनं, उद्घाटकः -कं, उद्घाटकयन्त्रं, कुञ्चिका, कूञ्चिका, ताली, तञ्चिका, अङ्कुटः.—(Explanation) निर्वचनं, व्याख्या.—(Key-note) षादी *m.* (न्); 'change of key in music,' शुद्धामयुक् *f.* (ज्).

KEY-HOLE, *s.* उद्घाटनच्छिद्रं, कुञ्चिकाछिद्रं, उद्घाटनरन्ध्रं, कुञ्चिकारन्ध्रं.

KEY-STONE, *s.* बन्धनप्रस्तरः, सन्धानप्रस्तरः, संयोगप्रस्तरः, मध्यमप्रस्तरः, मध्यस्थप्रस्तरः.

KIBE, *s.* पादस्फोटः, पाददारी, विपादिका, स्फुटिः *f.*, अलसः.

To KICK, *v. a.* or *n.* पादेन तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रह (c. 1. -हरति -हर्तुं), खुरेण or पार्ष्णिना तड् or आहन्, पादाघातं कृ, पादप्रहारं कृ, खुराघातं कृ, खुरक्षेपं कृ, खुरं क्षिप् (c. 6. क्षिपति -क्षेप्तुं) or प्रक्षिप्, पार्ष्णिं क्षिप्, पादं प्रक्षिप्.

KICK, *s.* पादाघातः, पादप्रहारः, पादाहतिः *f.*, पादाभिघातः, खुराघातः, खुराभिघातः, खुरक्षेपः, पार्ष्णिः *m.*, पार्ष्णिक्षेपः, पदाघातः.

KICKED, *p. p.* पादाहतः -ता -तं, खुराहतः -ता -तं, पदाहतः -ता -तं.

KICKER, *s.* पादाघातकृत् *m.*, पादप्रहारकर्त्री *m.* (र्त्तृ), खुरक्षेपकः.

KICKING, *s.* पादाघातकरणं, पादप्रहरणं, खुरक्षेपणं, खुराघातः.

KID, *s.* (Young goat) छागशावकः, अजशावकः, छागवत्सः, छागशिशुः *m.*, अजपोतकः.—(Fagot) काष्ठभारः, काष्ठकूटः.

To KID, *v. n.* छागशावकं सू (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसू or जन् (c. 10. जनयति -यितुं) or उत्पद् (c. 10. -पादयति -यितुं).

KIDDER, *s.* धान्यादीनां पूर्वक्रेता *m.* (तृ) or पूर्वग्राहकः.

To KIDNAP, *v. a.* बालकस्तेयं कृ, मनुष्यस्तेयं कृ, बालकं हृ (c. 1. हरति, हर्तुं) or अपहृ or अभिहृ or चुर् (c. 10. चोरयति -यितुं), बालापहरणं कृ, मनुष्यापहरणं कृ.

KIDNAPPED, *p. p.* चौरहृतः -ता -तं, चौरापहृतः -ता -तं, बलादपहृतः -ता -तं.

KIDNAPPER, *s.* बालकस्तेयकृत् *m.*, मनुष्यस्तेयकृत्, बालापहारकः.

KIDNAPPING, *s.* बालकस्तेयं, मनुष्यस्तेयं, बालापहरणं, मनुष्यापहारः.

KIDNEY, *s.* वृक्कः -क्का -क्कं, वृक्कः, वृक्कः, वृक्का *m.* (न्), मूत्रपिण्डः.

KIDNEY-BEAN, *s.* मुद्गः, मुद्गपर्णी, मुद्गः -द्गकः, माषः, माषपर्णी, शिम्बिकः, शिम्बिपर्णी -म्बिका, मकुष्टकः, मकुष्टकः; 'a field of kidney beans,' माष्यं, माषीयं.

KILDERKIN, *s.* दीर्घगोलाकारं काष्ठभाण्डं, मानविशेषः.

To KILL, *v. a.* हन् (c. 2. हन्ति -न्तुं), निहन्, अभिहन्, आहन्, अभ्याहन्, समाहन्, विनिहन्, विहन्, प्रहन्, प्रक्षिहन्, निग्रहन्; 'the two last require the gen. c. of the object; हन् in caus. (घातयति -यितुं), व्यापद् (c. 10. -पादयति -यितुं), मृ (c. 10. मारयति -यितुं), सूद् (c. 10. सूदयति -यितुं), निसूद्, अभिसूद्, विनिसूद्, अवसूद्, वध्,—(Defective, usually found in the 3d pret. अवधीत् and fut. वधिष्यति -ते), नश् (c. 10. नाशयति -यितुं), विनश्, प्रमी in caus. (-माप-यति -यितुं), शद् (c. 10. शातयति -यितुं), शस् (c. 1. शसति -सितुं), विशस्, अव् (c. 8. अवोति -वितुं), परिक्षप्, विक्षप्, निपत् (c. 10. -पातयति -यितुं), विनिपत्, क्षि (c. 5. क्षिणोति, क्षेतुं or caus. क्षययति क्षपयति -यितुं), हिंस् (c. 7. हिनस्ति, c. 1. हिंसति -सितुं), तृह् (c. 6. तृणत्ति, c. 7. तृणेढि, तर्हितुं), रुभ् (c. 9. रुम्भाति, रोभितुं), तुप्, तुम्, तुष्, तुम्प्, तुम्फ्, उच्छ् (c. 10. -छासयति -यितुं), with gen. c., कृत् (c. 6. कृणत्ति, कर्तितुं), निकृत्, निष्कृत्, वधं कृ, प्राणहत्यां कृ, प्राण-घातं कृ, जीवहत्यां कृ, पञ्चत्वं गम् (c. 10. गमयति -यितुं), लोकान्तरं गम् or प्राप् (c. 10. -आपयति -यितुं).

KILLED, *p. p.* हतः -ता -तं, निहतः -ता -तं, विहतः -ता -तं, आहतः -ता -तं, अभिहतः -ता -तं, समाहतः -ता -तं, विनिहतः -ता -तं, व्यापादितः -ता -तं, व्यापन्नः -न्ना -न्नं, घातितः -ता -तं, मारितः -ता -तं, सूदितः -ता -तं, निसूदितः -ता -तं, नाशितः -ता -तं, विनाशितः -ता -तं, विशसितः -ता -तं, निपातितः -ता -तं, विनिपातितः -ता -तं, क्षतः -ता -तं, क्षिप्तः -ता -तं, हतप्राणः -णा -णं, हतजीवितः -ता -तं, नष्टजीवितः -ता -तं, नष्टप्राणः -णा -णं, हतचैतन्यः -न्या -न्यं; 'being killed,' हन्यमानः -ना -नं, निहन्यमानः -ना -नं; 'to be killed,' हननीयः -या -यं, घातव्यः -व्या -व्यं, व्यापादनीयः -या -यं, व्यापादयितव्यः -व्या -व्यं.

KILLER, *s.* हन्ता *m.* (तृ), निहन्ता *m.*, घातकः, घातीं *m.* (न्), मारकः, वधकारी *m.* (न्), वधकः, प्राणहन्ता *m.*, जीवहन्ता *m.*, हत्याकृत्, प्राण-हत्याकृत्, नाशकः, विनाशकः, विशसिता *m.* (तृ), अन्तकः in comp., सूदनः, घ्नः in comp.

KILLING, *s.* घातः -तनं, हननं, निहननं, व्यापादनं, मारणं, वधः, प्राण-घातः -तनं, प्राणहत्या, प्रमापणं, सूदनं, निसूदनं, क्षपणं, नाशः, प्राणनाशः, शसनं, विशसनं, विदारणं -णा, विनहनं, महेनं, मथनं, प्रमथनं, प्रमयः, विशरः, विशारणं, निशारणं, निकारणं, निर्हिंसनं, निवहेणं, निकृन्तनं, जालम्भः, हत्या in comp.

KILN, *s.* पाकभुवी, आपाकः, पवनं; 'brick-kiln,' इष्टकापचनस्थानं.

KIMBO, *s.* विभुग्नः -ग्ना -ग्नं, अवभुग्नः -ग्ना -ग्नं, कुटिलः -ला -लं, वक्रः -क्रा -क्रं; 'arms a-kimbo,' विभुग्नभुजौ *m.* du., वहिर्भुग्नभुजौ.

KIN, *s.* (Relationship) ज्ञातित्वं, ज्ञातिभावः, बन्धुता, बान्धवत्वं.—(Kin-dred) स्वकुलं, कुलं, ज्ञातयः *m. pl.*, स्वज्ञातयः, बान्धवाः *m. pl.*, सपिण्डाः *m. pl.*, सगोत्राः *m. pl.*, सबन्धिनः *m. pl.*, गोत्रं; 'of kin,' सगोत्रः -त्रा -त्रं, समानगोत्रः &c., स्वजातीयः -या -यं, सजातीयः -या -यं, गोत्रसम्बन्धी &c.; 'next of kin,' अनन्तरः -रा -रं, अनन्तर-जातीयः -या -यं, अनन्तरजन्मा -न्मा -न्म (न्).

KIND, *a.* (Disposed to make others happy, benevolent) प्रियकरः -री -रं, प्रियङ्करः -री -रं, प्रियकारः -री -रं, प्रियकृत् *m. f. n.*, प्रियः -या -यं, प्रीतः -ता -तं, प्रीतिमान् -मती -मत् (त्), हितः -ता -तं, प्रियैषी -षिणी -षि (न्), हितैषी &c., हितवान् -वती -वत् (त्), सुहृदः -दा -दं, हितकामः -मा -मं, हितकरः -री -रं, हितबुद्धिः -द्धिः -द्धि, उपकार-शीलः -ला -लं, उपकारी -रिणी -रि (न्), उपकारपरः -रा -रं, परोप-कारी &c., लोकोपकारी &c., उपकारबुद्धिः -द्धिः -द्धि, स्निग्धः -ग्धा -ग्धं, स्नेहशीलः -ला -लं, स्नेही -हिनी -हि (न्), हृदयालुः -लुः -लु,

सुहृदयः -या -यं, सुहृत्तमः -मा -मं, अनुकूलः -ला -लं, कृपालुः -लुः -लु, कृपाशीलः -ला -लं, अनुकम्पकः -का -कं, अनुकम्पी -म्पिनी -म्पि (न्), दयालुः -लुः -लु, करुणात्मा -त्मा -त्म (न्), दयावान् &c., लोकानुकम्पनः -ना -नं, अद्रोही -हिणी -हि (न्), परहितेच्छुः -च्छुः -च्छु, परकल्याणेच्छुः &c., सुशीलः -ला -लं, प्रसन्नः -न्ना -न्नं, अनुनयी -यिनी -यि (न्), अनुग्राही &c.; 'kind to servants,' भृत्यकामकृत्; 'kind to the poor,' दरिद्रोपकारी &c., दीनानुकम्पनः -ना -नं, दीनवत्सलः -ला -लं; 'kind offices,' उपकारः, उपचारः; 'kind act,' सुकृतं, सुकृतिः *f.*, प्रीतिकर्म्म *n.* (न्); 'kind words,' प्रीतिवचस् *n.*, प्रियभाषणं; 'speaking kind words,' प्रियवादी -दिनी -दि (न्), प्रियंवदः -दा -दं; 'kind present,' प्रीतिदानं.

KIND, *s.* (Genus, class) जातिः *f.*, गणः, वर्णः, वर्गः, सामान्यं.—(Sort) विशेषः, भेदः, प्रभेदः, प्रकारः, आकारः, जातिः *f.* -तं, रूपं, विधिः *m.*, विधानं, विधः in comp.; 'a kind of fish,' मत्स्यभेदः, मत्स्यविशेषः; 'of various kinds,' विविधः -धा -धं, नानाविधः -धा -धं, नानारूपः -पी -पं; 'of many kinds,' बहुविधः -धा -धं, बहुरूपः -पी -पं, अनेकाकारः -रा -रं, अनेकरूपः -पी -पं; 'of two kinds,' द्विविधः -धा -धं; 'of four kinds,' चतुर्विधः -धा -धं, चतुःप्रकारः -रा -रं; 'of all kinds,' सर्व्वप्रकारः -रा -रं; 'all kinds of food,' सर्व्वप्रकारमन्नं; 'of the same kind,' सविधः -धा -धं, सजातिः -तिः -ति, सजातीयः -या -यं, समानजातीयः -या -यं; 'of such a kind,' एवंविधः -धा -धं, तथाविधः -धा -धं, एवंरूपः -पा -पं.—(Manner, way) रीतिः *f.*, प्रकारः, विधानं, प्रभृतिः *f.*

KIND-HEARTED, *a.* सुहृदयः -या -यं, सुहृदयवान् -वती -वत् (त्), हृदयालुः -लुः -लु, हृदयी -यिनी -यि (न्), हृदयिकः -का -कं, चित्तवान् &c.

To KINDLE, *v. a.* ज्वल् (c. 10. ज्वलयति, ज्वालयति -यितुं), प्रज्वल्, संज्वल्, समिन्ध् (c. 7. -इन्द्धे -इन्धितुं), तप् (c. 10. तापयति -यितुं, c. 1. तपति, तप्तुं), सन्तप्, दीप् (c. 10. दीपयति -यितुं), प्रदीप्, आदीप्, सन्दीप्, उपदीप्, उद्दीप्, सन्धुक्ष् (c. 10. -धुक्षयति -यितुं), दह् (c. 1. दहति, दग्धुं), प्रदह्, परिदह्, सम्प्रदह्.—(Excite) उत्तप्, उत्तिज् (c. 10. तेजयति -यितुं), समुत्तिज्, उत्सह् (c. 10. -साहयति -यितुं), प्रोत्सह्.—(Provoke) प्रकुप् (c. 10. -कोपयति -यितुं).

To KINDLE, *v. n.* समिन्ध् in pass. (-इध्यते), समिद्धीभू, दह् (c. 4. दह्यति -ते, दग्धुं), दीप् (c. 4. दीप्यते, दीपितुं), सन्दीप्, प्रदीप्, ज्वल् (c. 1. ज्वलति -लितुं), प्रज्वल्, तप् (c. 1. तपति, तप्तुं or in pass. तप्यते), सन्धुक्ष् (c. 1. -धुक्षते -क्षितुं), अग्निदीप्तः -प्ता -प्तं भू.

KINDLED, *p. p.* समिद्धः -द्धा -द्धं, इद्धः -द्धा -द्धं, दीप्तः -प्ता -प्तं, प्रदीप्तः -प्ता -प्तं, दीपितः -ता -तं, उद्दीप्तः -प्ता -प्तं, ज्वलितः -ता -तं, प्रज्वालितः -ता -तं, तप्तः -प्ता -प्तं, सन्तप्तः -प्ता -प्तं, तापितः -ता -तं, सन्धुक्षितः -ता -तं, दग्धः -ग्धा -ग्धं, उत्तेजितः -ता -तं; 'one whose anger is kindled,' समिद्धकोपः -पा -पं, कोपज्वलितः -ता -तं.

KINDLINESS, *s.* मृदुता, सौम्यता -त्वं, स्निग्धता, कोमलता, प्रीतता, प्रीतिः *f.*

KINDLY, *a.* (Congenial) समशीलः -ला -लं, समानशीलः -ला -लं, समानभावः -वा -वं, अनुगुणः -णा -णं, अनुकूलः -ला -लं.—(Bland, gentle) सौम्यः -म्या -म्यं, मृदुः -दुः -द्वी -दु, स्निग्धः -ग्धा -ग्धं, कोमलः -ला -लं, प्रीतः -ता -तं, दयालुः -लुः -लु.

KINDLY, *adv.* प्रीत्या, प्रीतिपूर्व्वं, सुशीलवत्, सुशीलत्वात्, सुजनत्वात्, सानुनयं, सद्भावात्, कृपया, दयया, सदयं, प्रियं, हितं, स्नेहेन, सस्नेहं, सानुग्रहं, परहितेच्छया, उपकारशीलत्वात्, सानुकूल्यं; 'kindly affected,' सुरक्तः -क्ता -क्तं, अनुरक्तः -क्ता -क्तं, हितबुद्धिः -द्धिः -द्धि; 'speaking kindly,' प्रियवादी -दिनी -दि (न्).

KINDNESS, *s.* (Of disposition) प्रीतता, प्रीतिः *f.*, उपकारशीलता, स्निग्धता, स्नेहशीलता, स्नेहः, कृपालुता, दयालुता, प्रियता, दयाशीलता, कृपाशीलता, सुहितत्वं, हितत्वं, हितेच्छा, परहितेच्छा, हितकाम्या, सौजन्यं, सुजनत्वं, अनुग्रहः, प्रसादः, प्रसन्नता, उपकारबुद्धिः *f.*, परहितबुद्धिः *f.*, लोककृपा, सौहृद्यं, प्रेम *n.* (न्), अनुकूलता, आनुकूल्यं, अनुरोधः, मृदुशीलता, सौम्यत्वं.—(Act of kindness) उपकारः, उपकृतं -तिः *f.*, सुकृतं, सुकृतिः *f.*, प्रियं, परोपकारः, कृतोपकारः, हितं.

KINDRED, *s.* (Relationship) ज्ञातित्वं -ता, ज्ञातिभावः, सजातित्वं, बन्धुता, बान्धवत्वं, कुलसन्निधिः *m.*, सपिण्डता, एकपिण्डता, सगोत्रता, सम्बन्धित्वं; सगर्भत्वं.—(Relatives) ज्ञातयः *m. pl.*, बान्धवाः *m. pl.*, बन्धुजनः, बन्धुवर्गः, ज्ञातिवर्गः, बान्धवगणः, बान्धवजनः, स्वजनः -नाः *m. pl.*, सगोत्राः *m. pl.*, सकुल्याः *m. pl.*, स्वजातीयाः *m. pl.*, सजातीयाः, सम्बन्धिनः *m. pl.*, गोत्रं, बान्धवसमुदायः, गोत्रसमुदायः, गोत्रजाः *m. pl.*, कुलसन्निधिः *m.*

KINDRED, *a.* (Related) सजातीयः -या -यं, समानजातीयः -या -यं, सगोत्रः -त्रा -त्रं, समानगोत्रः -त्रा -त्रं, सकुल्यः -ल्या -ल्यं, समानवंशः -शा -शं, सवंशीयः -या -यं, सवर्णः -र्णा -र्णं, सम्बन्धी -न्धिनी -न्धि (न्), सम्बन्धीयः -या -यं.—(Congenial) समधर्म्मा -र्म्मा -र्म्म (न्), सधर्म्मा &c., समगुणः -णा -णं, तुल्यगुणः -णा -णं, समानभावः -वा -वं, तुल्यवृत्तिः -त्तिः -त्ति, अनुगुणः -णा -णं.

KINE, *s. pl.* गावः *m. pl.*, गोकुलं, गोवृन्दं, गोसमूहः.

Liquid, *a.* द्रवः -वा -वं, द्रुतः -ता -तं, द्रवरूपः -पा -पं, सद्रवः -वा -वं, विद्रुतः -ता -तं, विलीनः -ना -नं, लीनः -ना -नं, गलितः -ता -तं, तरलः -ला -लं, विह्वलः -ला -लं, प्रवाही -हिणी -हि (न्), प्रवाहधर्मकः -का -कं, पयस्यः -स्या -स्यं.

Liquid, *s.* द्रवः, द्रवद्रव्यं, द्रवपदार्थः, द्रववस्तु *n.*, सद्रवपदार्थः, रसः, आर्द्रद्रव्यं, आर्द्रवस्तु *n.*, जलं, वारि *n.*, पयस् *n.*

To liquidate, *v. a.* शुध् (c. 10. शोधयति -यितुं), परिशुध्, मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), विमृज् (c. 6. -मृजति -ष्टुं, c. 10. -सर्जयति -यितुं), निस्तृ (c. 10. -तारयति -यितुं), अपनी (c. 1. -नयति -नेतुं), विनी, अपवृज् (c. 10. -वर्जयति -यितुं), अपाकृ, साध् (c. 10. साधयति -यितुं); 'settle a debt,' ऋणं शुध् or अपनी or विनी or अपाकृ or अपवृज् or साध्, ऋणशोधनं कृ, ऋणसिद्धिं कृ, ऋणमुक्तिं कृ.

Liquidated, *p. p.* शोधितः -ता -तं, परिशोधितः -ता -तं, परिशुद्धः -द्धा -द्धं, सिद्धः -द्धा -द्धं, साधितः -ता -तं, ऋणमुक्तः -क्ता -क्तं, ऋणमोचितः -ता -तं, अपाकृतः -ता -तं, विगणितः -ता -तं, निस्तारितः -ता -तं, उत्तीर्णः -र्णा -र्णं.

Liquidation, *s.* शोधनं, परिशोधनं, शुद्धिः *f.*, परिशुद्धिः *f.*, मुक्तिः *f.*, विमुक्तिः *f.*, मोक्षः -क्षणं, परिमोक्षणं, निस्तारः, उत्तरणं, अपाकरणं, सिद्धिः *f.*, साधनं, अपनयनं; 'of a debt,' ऋणशोधनं, ऋणसिद्धिः *f.*, ऋणापाकरणं, ऋणमुक्तिः *f.*, ऋणापनयनं, ऋणापनोदनं, विगणनं, निरादेशः.

Liquidity, liquidness, *s.* द्रवत्वं -ता, द्राव्यत्वं -ता, विद्रुतत्वं, विलीनता, गलितत्वं, द्रवभावः, रसता, प्रवाहधर्मत्वं.

Liquor, *s.* (Fluid) द्रवः, द्रवद्रव्यं, द्रवपदार्थः, सद्रवपदार्थः, द्रववस्तु *n.*, रसः, जलं.—(Drink) पेयं, पानीयं, पेयद्रव्यं.—(Spirituous liquor) मद्यं, मदिरा, मदः, सुरा -री, वारुणी, शुण्डा, शीधुः *m.* -धु, सीधुः *m.*, हाला, आसवं, कल्यं -ल्या, कश्यं; 'drinker of spirituous liquor,' सुरापः -पी *f.*, मद्यपः -पी *f.*, शीधुपः -पी *f.*, शुण्डापायी *m.* -यिनी *f.*

Liquor-shop, *s.* मदिरागृहं, मद्यविक्रयस्थानं, शुण्डापानं.

Liquorice, *s.* मधुयष्टिका, यष्टिमधु *n.*, मधुकं, मधूली. *See* Licorice.

To lisp, *v. a.* or *n.* गद्गद् (nom. गद्गदायति), गद्गदवाचा वद् (c. 1. वदति -दितुं), बालकवद् उच्चर् (c. 10. -चारयति -यितुं), भग्नदन्तैर् इव उच्चर्, भग्नदन्तोच्चारणं कृ, भग्नस्वरेण or भिन्नस्वरेण वद् or उच्चर्, अस्पष्टवाचा or अस्फुटवाचा उच्चर्, अस्पष्टोच्चारणं कृ, अस्फुटोच्चारणं कृ, जल्प् (c. 1. जल्पति -ल्पितुं).

Lisp, lisping, *s.* गद्गदः, गद्गदवाक् *f.* (च्), गद्गदपदं, गद्गदवाक्यं, भग्नदन्तोच्चारणं, भग्नस्वरोच्चारणं, भिन्नस्वरोच्चारणं, अस्फुटोच्चारणं, अस्पष्टोच्चारणं, बालकवद् उच्चारणं.

Lisped, *p. p.* भग्नदन्तोच्चारितः -ता -तं, अस्पष्टोच्चारितः -ता -तं.

Lisper, lisping, *a.* अस्फुटवाक् *m. f. n.* (च्), अस्पष्टवाक् *m. f. n.*, गद्गदवाक् *m. f. n.*, अस्फुटजल्पः -ल्पा -ल्पं, चिन्नजल्पः &c., लोहलः -ला -लं, भग्नदन्तोच्चारणकृत्.

Lispingly, *adv.* अस्फुटवाचा, अस्पष्टवाचा, गद्गदवाचा, बालकवत्.

List, *s.* (Catalogue) आवलिः -ली *f.*, अनुक्रमणिका, परिसंख्या, परिसंख्यापत्रं, परिगणना, सूचिः -ची *f.*, सूचिपत्रं; 'a list of names,' नामावलिः -ली *f.*, नामावलिपत्रं, नामपरिसंख्यापत्रं; 'list of errata,' शुद्धिपत्रं.—(Strip of cloth) पट्टः -ट्टकः, पटखण्डः, वस्त्रखण्डः.—(Border or edge of cloth) वस्त्रधारः, वस्त्रप्रान्तः, वसनप्रान्तः, वस्त्रान्तः, वसनान्तः, वस्तिः *m.*, तरी, दशा.—(Ground enclosed as a field of combat) रङ्गभूमिः *f.*, रणभूमिः, रङ्गाङ्गनं, रङ्गः, युद्धभूमिः *f.*, युद्धक्षेत्रं, रणाजिरं, मल्लभूमिः *f.*, मल्लभूः *f.*—(Liking, desire) इच्छा, रुचिः *f.*, अभिरुचिः *f.*, स्पृहा.

To list, *v. a.* (Enroll) नामावलिपत्रे or नामपरिसंख्यापत्रे नामानि समारुह् in caus. (-रोपयति -यितुं) or आरुह् or अभिलिख् (c. 6. -लिखति -लेखितुं) or लिख्.—(Cover with strips of cloth) पट्टेन or पटखण्डेन छद् (c. 10. छादयति -यितुं) or आछद्, पट्टबन्धनं कृ.—(Sew together strips of cloth) पटखण्डान् सेविव् (c. 4. -सीव्यति, सेवितुं) or निसिव्.—(Hearken) आकर्णे (c. 10. -कर्णयति -यितुं), कर्णं दा.

To list, *v. n.* (Desire, choose) इष् (c. 6. इच्छति, एषितुं), अभिलष् (c. 1. -लषति -षितुं), रुच् (c. 1. रोचते) used impersonally; 'doing as one lists,' कामचारी -रिणी -रि (न्), कामचारः -री -रं, 'going as one lists,' कामगामी -मिनी &c., कामगः -गा -गं; 'as one lists,' कामतस्, कामचारतस्. *See* Like.

To Listen, *v. n.* आकर्णे (c. 10. -कर्णयति -यितुं), श्रु (c. 5. शृणोति,

ओतुं), आधु, उपधु, निशम् (c. 10. -शामयति -यितुं), कर्णौ दा (c. 3. ददाति, दातुं), अवधां कृ.—(Heed, lend the mind) अवधा (c. 3. -धत्ते -धातुं), मनो धा, सावधानः -ना -नं भू, अवहितः -ता -तं भू or अस्, अवधानं कृ; 'listen,' शृणु, कर्णौ देहि, अवधीयतां.—(Obey, follow admonition) श्रु in des. (शुश्रूषते -षितुं), अनुविधा in pass. (-धीयते), अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं).

Listener, *s.* श्रोता *m.* -त्री *f.* (तृ), अवधानकर्त्ता *m.* -त्री *f.* (र्तृ), निशमनकारी *m.* -रिणी *f.* (न्).

Listless, *a.* अनुत्सुकः -का -कं, निरुत्सुकः -का -कं, अनिच्छुः -च्छुः -च्छु, अनिच्छुकः -का -कं, निरिच्छः -च्छा -च्छं, निःस्पृहः -हा -हं, निरीहः -हा -हं, उदासीनः -ना -नं, उदासी -सिनी -सि (न्), निरपेक्षः -क्षा -क्षं, विरक्तः -क्ता -क्तं, वीतरागः -गा -गं, विकौतुकः -का -कं, अनभिलाषः -षा -षं, अनवधानः -ना -नं, अनवहितः -ता -तं, निरुद्योगः -गा -गं, निरुद्यमः -मा -मं, अप्रयत्नः -त्ना -त्नं, अप्रयत्नशीलः -ला -लं, अनास्थः -स्था -स्थं, आस्थाहीनः -ना -नं, सुप्तबुद्धिः -द्धिः -द्धि, जडः -डा -डं, जडबुद्धिः &c., अव्ययः -या -यं, निःसङ्गः -ङ्गा -ङ्गं, ग्लानः -ना -नं, प्रमादी -दिनी &c. *See* Languid.

Listlessly, *adv.* अनुत्सुकं, निरुत्सुकं, अनिच्छया, अनौत्सुक्येन, उदासीनवत्, अनभिलाषेण, अनवधानेन, अनवहितं, अनपेक्षया, जडवत्, अव्ययं. *See* Languidly.

Listlessness, *s.* अनुत्सुकता, अनौत्सुक्यं, निरुत्सुकता, अनिच्छा, अनीहा, निरीहता -त्वं, अस्पृहा, निःस्पृहता, अनभिलाषः, उदासीनता, औदास्यं, विरक्तिः *f.*, विरक्तता, वैराग्यं, अननुरागः, अनपेक्षा, अनवेक्षा, अनुत्साहः, अनुद्योगः, अप्रयत्नः -त्नता, अनास्था, आस्थाहीनता, सुप्तबुद्धित्वं, जडता, जाड्यं, अव्ययता, मान्द्यं, ग्लानिः *f.* *See* Languor.

Litany, *s.* ख्रीष्टीयमतधारिभिर् व्यवहृतः प्रार्थनामार्गः, ख्रीष्टीयसमाजव्यवहारिता प्रार्थना.

Literal, *a.* (Not figurative) मूलार्थकः -का -कं, मुख्यार्थकः -का -कं, मुख्यः -ख्या -ख्यं, अरूपकः -का -कं, अव्यञ्जकः -का -कं, विवक्षितः -ता -तं, शक्यः -क्या -क्यं; 'literal occupation,' मुख्यत्वं, मुख्यार्थः, मूलार्थः, प्रकृतार्थः.—(Following the letter or exact words) मूलशब्दानुसारी -रिणी -रि (न्), मूलशब्दानुयायी -यिनी &c., मूलपदानुसारी &c., शब्दार्थानुसारी &c., अवयवार्थानुसारी &c., शब्दानुसारी &c., यथाशब्दः -ब्दा -ब्दं, शाब्दिकः -की -कं.—(Consisting of letters) अक्षरी -रिणी &c., अक्षरमयः -यी -यं.

Literality, *s.* मुख्यत्वं -ता, मुख्यार्थत्वं, मूलार्थत्वं, मुख्यार्थः, मूलार्थः, प्रकृतार्थः, शब्दार्थः, अव्यञ्जनं -ना, अरूपकं.

Literally, *adv.* (Not figuratively) मूलार्थानुसारेण, मुख्यार्थानुसारेण, मूलार्थतस्.—(Close to the letter or exact words) शब्दतस्, ग्रन्थतस्, यथाशब्दं, शब्दानुसारेण -रतस्, मूलशब्दानुसारेण, मूलपदानुसारात्, शब्दार्थतस्.—(Letter by letter) अक्षरशस्.

Literary, *a.* (Pertaining to literature) विद्यासम्बन्धी -न्धिनी -न्धि (न्), विद्याविषयः -या -यं, अक्षरसम्बन्धी &c., शास्त्रिकः -की -कं, शास्त्रीयः -या -यं, विद्याप्रकरणसम्बन्धी &c., साहित्यसम्बन्धी &c.—(Versed in literature, fond of it) विद्यावान् -वती -वत् (त्), शास्त्राभिज्ञः -ज्ञा -ज्ञं, विद्याप्रियः -या -यं, विद्यासेवी -विनी &c., विद्यानुसेवी &c., विद्यानुरागी -गिणी &c., विद्याव्यवसायी -यिनी &c., विद्यानुपाल्ली -लिनी &c., विद्याविशिष्टः -ष्टा -ष्टं, विद्यासम्पन्नः -न्ना -न्नं.

Literate, *a.* पण्डितः -ता -तं, विद्यावान् -वती -वत् (त्), विद्यासम्पन्नः -न्ना -न्नं, व्युत्पन्नः -न्ना -न्नं, विद्वान् -दुषी -द्वत् (स्), विपश्चित् *m. f. n.*, साक्षरः -रा -रं.

Literati, *s. pl.* पण्डितमण्डली -लं, पण्डितसमाजः, विद्वत्समाजः, पण्डितगणः, पण्डितवर्गः, पण्डितसमूहः, विद्वद्वृन्दं.

Literature, *s.* (Learning) विद्या, शास्त्रं, शास्त्रविद्या, अक्षरं, साहित्यं, वाङ्मयं.—(Collective body of literary productions) शास्त्रसमुदायः, शास्त्रसमवायः, शास्त्रसमूहः, often expressible by शास्त्र in the sing. number; as, 'poetical literature,' काव्यशास्त्रं; 'branch of literature,' अङ्गं, उपशास्त्रं.

Lithe, *a.* शिथिलः -ला -लं, मृदुः -दुः -दुी -दु, सुखनमनीयः -या -यं.

Litheness, *s.* शिथिलता, शैथिल्यं, सुखनमनीयता, मृदुता, कोमलता.

To Lithograph, *v. a.* प्रस्तरोपरि or शिलोपरि लिख् (c. 6. लिखति, लेखितुं) or आलिख्, प्रस्तरं रेखादिना मुद्रीकृ or मुद्र (nom. मुद्रयति -यितुं) or अङ्क् (c. 10. अङ्कयति -यितुं).

Lithograph, *s.* प्रस्तरमुद्रा, शिलामुद्रा, पाषाणमुद्रा, प्रस्तरालेख्यं, पटुः.

Lithographer, *s.* प्रस्तरलेखकः, प्रस्तरलिख् *m.* (ख्), प्रस्तरमुद्राकृत्, शिलामुद्राकृत्, शिलालेखकः, प्रस्तरालेख्यकृत्.

Lithography, *s.* प्रस्तरलिखनविद्या, प्रस्तरमुद्राङ्कनविद्या, शिलालिखनविद्या, शिलामुद्राङ्कनं, पाषाणलिखनं.

Lithontriptic, lithontryptic, lithonthryptic, *a.* अश्मरीघ्नः -घ्नी -घ्नं, अश्मरीहरः -रा -रं, मूत्राश्मनाशकः -का -कं.

Lithotomy, *s.* मूत्राश्मोच्छेदः, वस्तिस्थशर्करोच्छेदः, उच्छेदनद्वारा मूत्राश्मनिष्कर्षणं, वस्तिच्छेदनं, मूत्राधारच्छेदः.

Lithotripsy, *s.* अश्मरीघर्षणं, अश्मरीसङ्घर्षः, अश्मरीसम्मर्दः, अश्मरीसम्भेदः.

Litigant, *a.* विवादी -दिनी -दि (न्), विवदमानः -ना -नं, विवादार्थी -र्थिनी -र्थि (न्), व्यवहारी -रिणी &c., व्यावहारिकः -की -कं, व्यवहारिकः &c., कार्य्यवान् -वती -वत् (त्), कार्य्यी -र्य्यिणी &c., विवदन् -दन्ती -दत् (त्).

Litigant, *s.* व्यवहर्त्ता *m.* (र्तृ), विवादी *m.* (न्), विवादार्थी, वादी *m.*, अर्थी *m.*, कार्य्यवान् *m.* (त्), कार्य्यी *m.*

To Litigate, *v. n.* विवद् (c. 1. -वदते -दितुं), व्यवह (c. 1. -हरति -र्त्तुं -र्हितुं), विवादं कृ, विवादार्थी -र्थिनी भू or अस्.

To Litigate, *v. a.* विवादास्पदीकृ, व्यवहारास्पदीकृ, वादग्रस्तं -स्तां कृ.

Litigated, *p. p.* विवादास्पदीकृतः -ता -तं, विवादास्पदीभूतः -ता -तं, विवादानुगतः -ता -तं, वादानुगतः -ता -तं, वादग्रस्तः -स्ता -स्तं, विवादग्रस्तः -स्ता -स्तं.

Litigation, *s.* विवादः, विवादकरणं, वादः, वादकरणं, व्यवहारः, व्यवहारकरणं, रिक्कं; 'under litigation,' विवादास्पदीभूतः -ता -तं, वादग्रस्तः -स्ता -स्तं. *See* Litigated.

Litigious, *a.* विवादी -दिनी -दि (न्), विवादशीलः -ला -लं, विवादप्रियः -या -यं, विवादार्थी -र्थिनी &c., वादप्रियः -या -यं, विवादप्रवणः -णा -णं, विवादबुद्धिः -द्धिः -द्धि, विवादासक्तः -क्ता -क्तं, विवादरतः -ता -तं.

Litigiousness, *s.* विवादशीलता, विवादार्थित्वं, विवादासक्तिः *f.*, विवादबुद्धिः *f.*

Litter, *s.* (Bed borne on the shoulders) शिबिका, वाह्यशयनं, डयनं, डलकं, प्रवहणं, डया, शिरस्का.—(Bed of straw) तृणशय्या, तृणशयनं, तृणसंस्तरः, तृणास्तरणं.—(Brood of young animals) शावकगणः, यः शावकगण एकवारे जायते, शावकसमूहः; 'of pigs,' शूकरशावकगणः.—(Shreds scattered about) इतस्ततो विक्षिप्तो वस्त्रखण्डाः.—(Confusion of things scattered about) द्रव्यविक्षिप्तता, द्रव्यविकीर्णता, द्रव्यव्यस्तता, द्रव्यमङ्गः, साङ्कर्यं, अव्यवस्था.

To Litter, *v. a.* (Bring forth a number of young ones) शावकगणं सू (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसू or जन् (c. 10. जनयति -यितुं) or प्रजन् (c. 4. -जायते -जनितुं) or उत्पद् (c. 10. -पादयति

-यितुं), प्रस्तरं कृ.—(Cover with straw) तृणावृतं -तां कृ, तृणास्तीर्णं -र्णां कृ, तृणाच्छन्नं -न्नां कृ, सतृणं -णां कृ, तृणास्तरणं कृ.—(Scatter about confusedly) इतस्ततो विकृ (c. 6. -किरति -करितुं -रीतुं) or आकृ or विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अस्तव्यस्तीकृ.

LITTERED, *p. p.* (Covered with straw) तृणावृतः -ता -तं, तृणास्तीर्णः -र्णा -र्णं, तृणाच्छन्नः -न्ना -न्नं.—(Scattered about) इतस्ततो विकीर्णः -र्णा -र्णं or आकीर्णः -र्णा -र्णं, अस्तव्यस्तः -स्ता -स्तं, बहुधा विक्षिप्तः -प्ता -प्तं, बहुधास्तीर्णः -र्णा -र्णं.

LITTLE, *a.* (Small in size or extent, not great) अल्पः -ल्पा -ल्पं, क्षुद्रः -द्रा -द्रं, अल्पकः -का -कं, क्षुद्रकः -का -कं, अल्पपरिमाणः -णा -णं, क्षुद्रपरिमाणः -णा -णं, सूक्ष्मः -क्ष्मा -क्ष्मं, तनुः -नुः -नु, स्तोकः -का -कं, लघुः -घुः -घु, लघुपरिमाणः -णा -णं, दृस्वः -स्वा -स्वं, क्षुल्लकः -का -कं, अल्पः -ल्पा -ल्पं, कृशः -शा -शं, दभ्रः -भ्रा -भ्रं, कणीकः -का -कं, अणुकः -का -कं, अणुः -णी -णु, कणः, लेशः, लवः, मात्रा *f.*, बुद्निः -ट्टी *f.*—(Small in body) अल्पतनुः -नुः -नु, अल्पशरीरः -रा -रं, क्षुद्रतनुः &c., दृस्वशरीरः -रा -रं, स्तोककायः -या -यं, अल्पमूर्त्तिः -र्त्तिः -र्त्ति.—(Small in quantity, not much) अल्पः -ल्पा -ल्पं, अल्पमात्रः -त्रा -त्रं, स्तोकः -का -कं, अवद्युः -द्युः -द्वी -द्यु, अवद्युलः -ला -लं, अप्रपुरः -रा -रं, ईषत् in comp.—(Very little) अतल्पः -ल्पा -ल्पं, अल्पतमः -मा -मं, अल्पीयान् -यसी -यः (स्), अल्पिष्ठः -ष्ठा -ष्ठं, कनीयान् &c., अणीयान् &c., स्तोदीयान् &c., स्तोदिष्ठः &c.; 'not a little,' अनल्पः -ल्पा -ल्पं; 'little finger,' कनिष्ठाङ्गुलिः -लीf.; 'a little wealth,' अल्पधनं, अर्थलेशः; 'having little wealth,' अल्पधनः -ना -नं; 'of little merit,' ईषद्गुणः -णा -णं; 'a little hot,' ईषदुष्णः -ष्णा -ष्णं; 'a little animal,' क्षुद्रजन्तुः *m.*; 'of little weight,' अल्पप्रभावः -वा -वं, अल्पप्रमाणः -णा -णं; 'for a little while,' किञ्चित्कालं, कियत्कालं.

LITTLE, *s.* (Small quantity) अल्पभागः, अल्पांशः, किञ्चित्, अल्पं, स्तोकं, ईषत् ind., अल्पिका, अल्पमात्रं, मात्रा, किञ्चिद्भागः, किञ्चन, लवं, अवद्युभागः, अवाद्युल्यं, अप्राचुर्यं; 'little or much,' स्तोकं प्रचुरं वा; 'by little and little,' अल्पशस्, अल्पात्, स्तोकशस्; 'desiring little,' अल्पाकांक्षी -क्षिणी -क्षि (न्); 'doing little,' ईषत्करः -री -रं.

LITTLE, *adv.* ईषत्, कियत्, स्तोकं, मनाक्, अल्पमात्रं, अवद्यु, अभूशं, अभूरि, मात्रया; 'a little distance, a little way,' कियद्दूरं, ईषद्दूरं, नातिदूरं -रे, कियत्पर्य्यन्तं; 'a little less,' किञ्चिन्यूनः -ना -नं, ईषदूनः -ना -नं; 'little drunk,' ईषत्पानः -ना -नं, ईषत्पीतः -ता -तं; 'little-minded,' कृपणबुद्धिः -द्धिः -द्धि, कृपणधीः -धीः -धि.

LITTLENESS, *s.* अल्पता -त्वं, क्षुद्रता -त्वं, सूक्ष्मता, सौक्ष्म्यं, तनुता, स्तोकता, लघुता, लाघवं, लघिमा *m.* (न्), ह्रस्वता.—(Of body) अल्पशरीरता, शरीरह्रस्वता, शरीरक्षुद्रता.—(Meanness) कृपणता, कार्पण्यं, तुच्छत्वं, दीनता, वदर्य्यता, अपकृष्टता; 'of mind,' बुद्धिकार्पण्यं.

LITTORAL, *a.* तीरस्थः -स्था -स्थं, तटस्थः -स्था -स्थं, तीरसम्बन्धी -न्धिनी &c.

LITURGICAL, *a.* समाजप्रार्थनापद्धतिसम्बन्धी -न्धिनी -न्धि (न्), प्रार्थनपद्धतिविषयः -या -यं, प्रार्थनाविधिसम्बन्धी &c.

LITURGY, *s.* खृीष्टीयसमाजप्रार्थनापद्धतिः *f.*, प्रार्थनापद्धतिः, सामाजिकप्रार्थनापद्धतिः, सामाजिकप्रक्रियामार्गः, प्रार्थनामार्गः, खृीष्टीयप्रार्थनाविधिः *m.*

To LIVE, *v. n.* (Have the vital principle) जीव् (c. 1. जीवति -वितुं), प्राण् (c. 2. प्राणिति -तुं, rt. अन्), श्वस् (c. 2. श्वसिति -तुं), जीवत्प्राणं कृ.—(Exist, be in existence) वृत् (c. 1. वर्त्तते -र्त्तितुं), प्रभू, विद् in pass. (विद्यते), भू in pass. (भियते -त्तिं); 'as long as you live,' यावद् धरिष्यसे, यावत्ते प्राणा धरिष्यन्ति, यावज्जीवं.—(Pass life or time) जीवनं or कालं वृत् (c. 10. वर्त्तयति -यितुं) or वह् (c. 10. वाहयति -यितुं) or निर्वह् or गम् (c. 10. गमयति -यितुं) or नी (c. 1. नयति, नेतुं), कालनिर्वाहं कृ, जीवनिर्वाहं कृ.—(Dwell, remain) वस् (c. 1. वसति, वस्तुं), निवस्, अधिवस्, स्था (c. 1. तिष्ठति, स्थातुं), अधिष्ठा, वृत् आस् (c. 2. आस्ते -सितुं), वासं कृ.—(Subsist) उपजीव्, उपजीवनं कृ, निर्वह् (c. 1. -वहति -वोढुं), निर्वाहं कृ, शरीरयात्रां कृ, प्राणयात्रां कृ, प्राणधारणं कृ, उदरनिर्वाहं कृ.

LIVE, *a.* जीवी -विनी -वि (न्), जीवन् -वन्ती -वत् (न्). *See* LIVING, *part.*

LIVELIHOOD, *s.* जीविका, उपजीविका, उपजीवनं, उपजीव्यं, आजीवः -वनं, प्रजीवनं, जीवनं, जीवनोपायः, उपजीवनोपायः, वृत्तिः *f.*, वर्त्तनं, वार्त्ता, वृत्तिता, वृत्त्युपायः, जीवनवृत्तिः *f.*, जीवनसाधनं, जीवसाधनं, उपजीवनसाधनं, जीवनीयः, शरीरयात्रा, प्राणयात्रा; 'bare livelihood,' ग्रासाच्छादनं, अन्नाच्छादनं, अन्नवाच्छादनं -ने *n. du.*, अन्नोदकं, दिननिर्वाहः, दिनचर्य्या; 'obtaining a livelihood,' जीविकाप्राप्तिः -प्तौ.

LIVELINESS, *s.* तेजस् *n.*, तेजस्विता, तेजोयुक्तं, उल्लसता, उल्लासः, प्रफुल्लता, प्रहृष्टता, प्रहर्षः, सानन्दता, सत्त्वं, तीव्रता, सजीवत्वं, लघुता, लाघवं, क्षिप्रत्वं; 'of countenance,' वदनप्रफुल्लता, मुखश्रीः *f.*

LIVELONG, *a.* दीर्घकालीनः -ना -नं, दीर्घकालिकः -की -कं, चिरकालीनः &c.

LIVELY, *a.* तेजोवान् -वती -वत् (त्), तेजस्वी -स्विनी -स्वि (न्), उल्लसः -सा -सं, उल्लासी -सिनी &c., प्रफुल्लः -ल्ला -ल्लं, प्रहृष्टः -ष्टा -ष्टं, आनन्दी -न्दिनी &c., सानन्दः -न्दा -न्दं, उल्लासवृत्तिः -त्तिः -त्ति, आनन्दवृत्तिः &c., सत्त्वपूर्णः -र्णा -र्णं, तीव्रः -व्रा -व्रं, तीक्ष्णः -क्ष्णा -क्ष्णं, बहुसत्त्वः -त्त्वा -त्त्वं, सत्त्वः &c.—(In countenance) प्रफुल्लवदनः -ना -नं, हास्यमुखः -खी -खं, सुहसाननः -ना -नं, हास्यवदनः &c., प्रसन्नमुखः &c.—(Energetic) तीक्ष्णकर्म्मा -र्म्मी -र्म्म (न्), उद्योगशीलः -ला -लं, उत्साहशीलः -ला -लं.

LIVELY, LIVELILY, *adv.* तेजसा, तेजोपूर्णं, उल्लासेन, उल्लसत्, प्रफुल्लवत्.

LIVER, *s.* (One who lives) जीवी *m.* (न्), उपजीवी *m.*, जीवकः. *See* LIVING, *part.* (The organ which secretes the bile) यकृत्, कालखण्डं, कालखं, कालिका, कालेयं, कालखञ्जनं, पित्ताशयः, पित्ताधारः; 'enlargement of the liver,' यकृद्वृद्धिः.

LIVER-COLOR, *a.* यकृद्वर्णीयः -यी -यं, कालेयः -यी -यं, नीलरक्तः -क्ता -क्तं.

LIVERY, *s.* (Particular dress) वेषः, वेशः, कुलवेशः, कुलवेषः, कुलचिह्नं.—(Of a servant) सेवकवेषः, भृत्यवेशः, परिचरवेषः, कुलसेवकवेषः.—(Keeping a horse at a certain rate) निरूपितमूल्यमवेक्ष्य अश्वपोषणं or अश्वपालनं.

LIVERY-MAN, *s.* कुलवेशधारी *m.* (न्), कुलवेशभृत् *m.*—(Freeman) पौरवेशः, पौरलिङ्गी *m.* (न्), पौरलिङ्गधारी *m.* (न्).

LIVERY-STABLE, *s.* अश्वपोषणशाला, अश्वपालनशाला, अश्वशाला.

LIVE-STOCK, *s.* जीवधनं, जीवत् *n.*

LIVID, *a.* नीलः -ला -लं, नीलवर्णः -र्णा -र्णं, नीलकृष्णः -ष्णा -ष्णं, कृष्णवर्णः -र्णा -र्णं, सीसकवर्णः &c., कालः -ला -लं, कालिकः -की -कं.

LIVIDITY, LIVIDNESS, *s.* नीलता, नीलवर्णः, नीलिमा *m.* (न्), कृष्णता, कृष्णिमा *m.*, सीसकवर्णः.

LIVING, *part.* or *a.* (Having life) जीवी -विनी -वि (न्), जीवन् -वन्ती -वत् (न्), सजीवः -वा -वं, जीवितः -ता -तं, जीवभूतः -ता -तं, जीवनः -नी -नं, प्राणी -णिनी -णि (न्), प्राणन् -णनी -णत् (न्), प्राणभृत् *m. f. n.*, प्राणधारी -रिणी &c., प्राणमयः -यी -यं, सप्राणः -णा -णं, चेतनः -ना -नं, चेतनावान् -वती -वत् (त्), सचेष्टः -ष्टा -ष्टं, चेष्टितः -ता -तं; 'a living being,' जन्तुः *m.*, प्राणी *m.* (न्), प्राणभृत् *m.*,

जन्मी *m.*, शरीरी *m.*, देही *m.*, चेतनः, भृतं, सत्त्वं; 'living creatures,' प्राणिनः *m. pl.*, जीवन्तः *m. pl.*, चेतनाः *m. pl.*; 'the land of the living,' जीवलोकः.—(Existent) वर्त्तमानः -ना -नं, म्रियमाणः -णा -णं, विद्यमानः -ना -नं, वर्त्तिष्णुः -ष्णुः -ष्णु, वर्त्ती -र्त्तिनी &c.—(Subsisting) उपजीवी -विनी &c., उपजीवकः -का -कं, आजीवी -विनी &c., आजीवः -वा -वं; 'living by agriculture,' कृष्युपजीवी &c.; 'living by learning,' विद्योपजीवी -विनी &c.; 'living by arms,' शस्त्रोपजीवी &c., शस्त्राजीवः -वा -वं; 'living virtuously,' सद्वर्त्ती -र्त्तिनी &c., सद्वृत्तिः -त्तिः -त्ति, सद्वृत्तः -त्ता -त्तं, सद्व्यवहारः -रा -रं; 'living wickedly,' असद्वृत्तिः &c., कुवृत्तिः &c., कुवर्त्ती -र्त्तिनी &c.; 'a living sacrifice,' जीवोपहारः; 'a living death,' जीवितमरणं.

LIVING, *s.* (The act) जीवनं, प्राणधारणं, वर्त्तनं, वृत्तिः *f.*, वासः, निवासः.—(Subsistence, means of subsistence) उपजीविका, जीविका, उपजीवनं, उपजीव्यं, आजीवः -वनं, जीवनोपायः, उपजीवनोपायः, वृत्त्युपायः, वृत्तिः, वर्त्तनं, जीवसाधनं, प्राणयात्रा, यात्रा, शरीरयात्रा, प्राणस्थितिः *f.*, निर्वाहः, जीवनिर्वाहः, प्राणनिर्वाहः, उदरनिर्वाहः; 'living by learning,' विद्योपजीवनं; 'living by husbandry,' कृष्युपजीवनं; 'having a living,' वृत्तिमान् -मती -मत् (त्); 'good living,' सुभोजनं, मिष्टभोजनं, परमान्नभोजनं, उत्तमान्नभोजनं, आप्यायनं; 'poor living,' कुभोजनं, कदन्नभोजनं.—(Benefice) धर्म्मदायः, धर्म्माध्यापकवृत्तिः *f.*, धर्म्मशिक्षकवृत्तिः.

LIXIVIAL, LIXIVIOUS, *a.* क्षाराम्बुसंसृष्टः -ष्टा -ष्टं, क्षारव्याप्तः -प्ता -प्तं, क्षारविशिष्टः -ष्टा -ष्टं, क्षाराक्तः -क्ता -क्तं, लवणाक्तः &c.

LIXIVIUM, *s.* क्षाराम्बु *n.*, क्षारजलं, क्षारसंसृष्टजलं, क्षारितजलं.

LIZARD, *s.* सरटः, सरटुः *m.*, सरट् *m.*, कृकलासः, कृकवाकुः *m.*, कृकुलासः, कृकलाशः, गोधा -धिका, प्रतिसूर्य्यः -र्य्यकः, पल्लिः -ल्लिका, लक्तिका, शरण्डः, बहुरूपः, अण्डजः, क्रकचपाद् *m.*, शुष्काङ्गी, वेदारः, विदारुः *m.*, साञ्जनः, साशयन्दकः, वृक्षशः; 'house-lizard,' गृहगोधा -धिका, गृहगोलिका, गृहालिका, मुसली, मुषली, मुशली, टट्टनी, ज्येष्ठा -ष्ठी.

Lo! *exclam.* पश्य, पश्यत, प्रेक्षस्व.

LOAD, *s.* भारः, धुरा, धूः *f.* (धुर्), स्थौरं, पर्य्याहारः; 'a heavy load,' सुभारः, अतिभारः, दुर्भारः, गुरुभारः.—(Encumbrance, any thing grievous) बाधा, पीडा, कष्टं; 'bearing a load,' भारवाहनः -ना -नं, भारवाही -हिनी -हि (न्), भारवाहिकः -की -कं, भारसहः -हा -हं, धुरन्धरः -रा -रं, धुर्वहः -हा -हं, भारहरः -रा -रं, भारहारिकः -की -कं; 'the act of bearing a load,' भारवहनं, भारोद्वहनं, भारोद्धरणं.

To LOAD, *v. a.* भारं न्यस् (c. 4. -अस्यति -असितुं) or निविश् (c. 10. -वेशयति -यितुं) or निधा (c. 3. -दधाति -धातुं) or आरुह् in caus. (-रोपयति -यितुं) or स्था in caus. (स्थापयति -यितुं), भारवन्तं -वतीं -वत् कृ, भाराक्रान्तं -न्तां -न्तं कृ, सभारं -रां कृ, भारेण पीड् (c. 10. पीडयति -यितुं), भारग्रस्तं -स्तां कृ.—(With powder) आग्नेयचूर्णं निविश्, चूर्णगर्भं -र्भां कृ, आग्नेयचूर्णेन पॄ (c. 10. पूरयति -यितुं).

LOADED, *p. p.* भारवान् -वती -वत् (त्), भारी -रिणी -रि (न्), सभारः -रा -रं, भाराक्रान्तः -न्ता -न्तं, भारग्रस्तः -स्ता -स्तं, अर्पितभारः -रा -रं, निवेशितभारः -रा -रं, आरोपितभारः -रा -रं, धुरीणः -णा -णं, गर्भः -र्भा -र्भं in comp.; 'loaded with powder,' चूर्णगर्भः -र्भा -र्भं, आग्नेयचूर्णपूरितः -ता -तं, दाह्यचूर्णपूर्णः -र्णा -र्णं; 'heavily loaded,' सुभरः -रा -रं, सुभारवान् &c., सुभारी &c., अतिभारी &c.

LOADER, *s.* भारकर्त्ता *m.* (र्तृ), भारदाता *m.* (तृ), भारारोपकः.

LOADING, *s.* (The act) भारार्पणं, भारारोपणं.—(Cargo) भारः.

LOADSTONE, *s.* लोहचुम्बकः, चुम्बकः, चुम्बकप्रस्तरः, चुम्बकमणिः *m.*, लोहकान्तः -न्तं, अयस्कान्तः, आकर्षः -र्षकः, आकर्षकप्रस्तरः, महालोहं, कृष्णलोहं, द्रावकः, भ्रामरः, वैक्रान्तं.

LOAF, *s.* अपूपः, पूपः, पिष्टकः, उण्डेरकः, ओकुलः, पोलिका, करम्भः -म्भकः.—(A mass) पिण्डः.

LOAM, *s.* चिक्कणमृत्तिका, स्निग्धमृत्तिका, पङ्कवालुकायुक्तो मृत्तिकाविशेषः, पङ्किलमृत्तिका, पङ्कः, चिकिलः.

LOAMY, *a.* चिक्किणः -णा -णं, चिक्किणमृत्तिकामयः -यी -यं.

LOAN, *s.* (Of money) ऋणं, ऋणदानं, धनप्रयोगः, प्रयोगः, कुसीदं, कलाम्रिः *f.* -म्रिका, निरूपितकालपर्य्यन्तं धनप्रयोगः.—(Temporary use of any thing) निरूपितकालपर्य्यन्तं द्रव्यप्रयोजनं or द्रव्यप्रयोगः.—(Something to be given back) प्रतिदेयं.

LOATH, *a.* अनिच्छुः -च्छुः -च्छु, अनिच्छुकः -का -कं, अनिच्छन् -च्छन्ती -च्छत् (त्), विरक्तः -क्ता -क्तं, विमुखः -खा -खं, पराङ्मुखः -खा -खं, विमतः -ता -तं, असम्मतः -ता -तं, अकामः -मा -मं, निष्कामः -मा -मं, निस्स्पृहः -हा -हं.

To LOATHE, *v. a.* अत्यन्तं द्विष् (c. 2. द्वेष्टि -ष्टुं) or प्रद्विष्, अतिद्वेषं कृ. गर्ह् (c. 1. गर्हते -र्हितुं), बाध् in des. (बीभत्सते -त्सितुं), घृण् (c. 1. घृणते -णितुं), घृणां कृ, बीभत्सं कृ.

LOATHED, *p. p.* अतिद्विष्टः -ष्टा -ष्टं, गर्हितः -ता -तं, घृणितः -ता -तं.

LOATHFUL, *a.* अतिद्वेषी -षिणी -षि (न्), घृणाकारी -रिणी &c., बीभत्सकारी &c., बीभत्सः -त्सा -त्सं, बीभत्सजनकः -का -कं.

LOATHING, *s.* बीभत्सः -त्सं, घृणा, गर्हा -र्हणं, अतिद्वेषः -षणं, अत्यन्तद्वेषः, विकृतं, वैकृतं -त्यं, कुत्सा, विरक्तिः *f.*, निर्वेदः, न्यक्कारः.

LOATHINGLY, *adv.* सबीभत्सं, बीभत्सपूर्व्वं, अतिद्वेषेण, घृणापूर्व्वं, कुत्सापूर्व्वं.

LOATHSOME, *a.* बीभत्सजनकः -का -कं, घृणाजनकः -का -कं, घृणोत्पादकः -का -कं, अतिगर्हितः -ता -तं, गर्हितः -ता -तं, गर्हणीयः -या -यं, गर्ह्यः -र्ह्या -र्ह्यं, कुत्सितः -ता -तं, घृणार्हः -र्हा -र्हं, द्वेष्यः -ष्या -ष्यं, अतिद्वेषणीयः -या -यं, विरक्तिजनकः &c.

LOATHSOMELY, *adv.* गर्हितं, गर्हणीयं, अतिद्वेषणीयं, गर्ह्यप्रकारेण.

LOATHSOMENESS, *s.* गर्ह्यता, गर्हणीयता, कुत्सितत्वं, कौत्सित्यं, घृणाजनकत्वं, घृणार्हता, बीभत्सजनकता, द्वेष्यता.

LOB, LOB-COCK, *s.* स्थूलशरीरः, स्थूलकायः, स्थूलबुद्धिः *m.*, स्थूलजनः.

LOBBY, *s.* सभोपशाला, सभोपगृहं, उपशाला, बाह्यशाला, गमनागमनशाला.

LOBE, *s.* (Of the ear) कर्णलतिका, पालिका, कर्णपालिः *f.* -ली -लिका.—(Of the lungs) फुप्फुसभागः, फुप्फुसलतिका.—(Of the liver) यकृद्भागः, यकृदंशः.—(Part, division) अंशः, भागः.

LOBED, *a.* पालिकाविशिष्टः -ष्टा -ष्टं, भागी गिनी -गि (न्).

LOBSTER, *s.* कर्कटजातीयो दीर्घनखविशिष्टो मत्स्यभेदः.

LOCAL, *a.* दैशिकः -की -कं, देश्यः -श्या -श्यं, देशी -शिनी -शि (न्), देशीयः -या -यं, स्थानिकः -की -कं, स्थानीयः -या -यं, ऐहस्थानिकः -की -कं, ऐहदेशिकः -की -कं, देश or स्थान in comp.; as, 'local usage,' देशव्यवहारः, देशाचारः; 'local law,' देशधर्म्मः.—(Relating to a place) देशसम्बन्धी -न्धिनी &c., स्थानसम्बन्धी -न्धिनी &c.—(Limited to a particular place) एकदेशिकः -का -कं, एकदेशीयः -या -यं, एकदेशी -शिनी &c., एकस्थानिकः -की -कं, विशेषदेशीयः -या -यं, विशेषस्थानिकः -की -कं.

LOCALITY, *s.* स्थानं, देशः, प्रदेशः, स्थलं, आस्पदं, स्थानता, देशता, देशसम्बन्धः, स्थानसम्बन्धः, स्थितिः *f.*

LOCALLY, *adv.* स्थानविषये, स्थानतस्, स्थानमुद्दिश्य, देशमुद्दिश्य, देशे.

To LOCATE, *v. a.* स्था in caus. (स्थापयति -यितुं), अवस्था, प्रतिष्ठा, विन्यस् (c. 4. -अस्यति -असितुं), निविश् (c. 10. -वेशयति -यितुं), रुह् in caus. (रोपयति -यितुं), स्थापनं कृ.

LOCATED, *p. p.* स्थापितः -ता -तं, प्रतिष्ठापितः -ता -तं, अवस्थितः -ता -तं, निवेशितः -ता -तं, विनिवेशितः -ता -तं, रोपितः -ता -तं.

LOCATION, *s.* (Act of placing) स्थापनं, प्रतिष्ठापनं, निवेशनं, रोपणं, विन्यासः.—(Situation) स्थानं, अवस्थानं, अवस्थितिः *f.*, प्रतिष्ठा, प्रतिष्ठानं, स्थितिः *f.*, आधिकारण्यं, आधिकरण्यं.—(In grammar) अधिकरणं, आधिकरण्यं.

LOCATIVE, *s.* (Case in grammar) अधिकरणं, सप्तमी विभक्तिः.

LOCH, *s.* *See* LAKE.

LOCK, *s.* (Instrument for fastening doors, &c.) तालयन्त्रं, तालकं, तालः, अर्गलं, पितडः, द्वारयन्त्रं, द्वारकीलः.—(Of a gun) चूर्णोज्ज्वलनयन्त्रं, अग्निदयन्त्रं, अग्निजनकयन्त्रं.—(Of hair) अलकः, केशपाशः -शौ, जटा, शिरोरुहः, काकपक्षः; 'clotted lock of an ascetic,' जटा, सटा, झटा; 'lock left on the crown or sides of the head at tonsure,' चूडा, शिखा, शिखण्डः -ण्डकः, शिखण्डिका, शिखाण्डकः, काकपक्षः, केशपाशी.—(In a river or canal) जलबन्धनी, जलप्रतिबन्धकं, जलबन्धनी, जलबन्धनयन्त्रं, महायन्त्रं.—(Hug) आलिङ्गनं, गाढालिङ्गनं, अङ्कसङ्गः.

To LOCK, *v. a.* (Fasten with a lock) तालयन्त्रेण बन्ध् (c. 9. बध्नाति बन्धुं), कील् (c. 10. कीलयति -यितुं), तालकेन or अर्गलेन बन्ध्, तालचडं -डां कृ; 'lock a door,' द्वारं बन्ध् or रुध् (c. 7. रुणद्धि, रोद्धुं), द्वाररोधं कृ.—(Close) पिधा (c. 3. -दधाति -धातुं), अपिधा, बन्ध्.—(Confine) रुध्, निरुध्.—(Embrace closely) गाढम् आलिङ्ग् (c. 1. -लिङ्गति -ङ्गितुं), गाढालिङ्गनं कृ.

To LOCK, *v. n.* (Be fastened) तालकेन बन्ध् in pass. (बध्यते) or बद्धीभू.—(Unite by mutual embrace) परस्परालेषेण or परस्परालिङ्गनेन संलग्नीभू or सङ्गीभू, परस्परं संश्लिष्टः -ष्टा -ष्टं भू.

LOCKED, *p. p.* (Fastened by a lock) तालयन्त्रेण बद्धः -द्धा -द्धं, तालकबद्धः -द्धा -द्धं, अर्गलबद्धः &c., कीलितः -ता -तं.—(Confined) रुद्धः -द्धा -द्धं, निरुद्धः -द्धा -द्धं.—(Closely embraced) गाढालिङ्गितः -ता -तं, गाढाश्लिष्टः -ष्टा -ष्टं.

LOCKED-JAW, LOCK-JAW, *s.* हनुस्तम्भः, हनुग्रहः.

LOCKER, *s.* तालकयुक्तं कोष्ठकं, कोष्ठः, सम्पुटः -टकः, भाजनं.

LOCKET, *s.* (Clasp, catch) कुटुपः.—(Ornament) स्मरणकेशाधारः.

LOCKSMITH, *s.* तालककारः, तालककृत् *m.*, तालयन्त्रकारी *m.* (न्).

LOCOMOTION, *s.* (Act of moving from place to place) स्थानान्तरगमनं, स्थलान्तरगमनं, स्थानात् स्थानं गमनं, गमनागमनं, इतस्ततो गमनं or चलनं, स्थानान्तरकरणं, स्थलान्तरकरणं, स्थानान्तरं, स्थलान्तरं, वीक्षा.—(Power of moving from place to place) स्थानान्तरगमनशक्तिः *f.*, चलनशक्तिः *f.*, गमनागमनशक्तिः *f.*

LOCOMOTIVE, *a.* जङ्गमः -मा -मं, चलः -ला -लं, चलनः -ना -नं, चलनशीलः -ला -लं, चलनधर्मकः -का -कं, चलनशक्तिकः -का -कं, चरः -रा -री -रं, चरिष्णुः -ष्णुः -ष्णु, मृत्वरः -रा -रं, गामुकः -का -कं, गतिमान् -मती -मत् (त्), गत्वरः -री -रं, गमनशक्तिविशिष्टः -ष्टा -ष्टं, यायुकः -का -कं.

LOCUM-TENENS, *s.* प्रतिनिधिः *m.*, प्रतिपुरुषः, प्रतिहस्तकः.

LOCUS, *s.* (In astronomy or geometry) निधिः *m.*

LOCUST, *s.* शलभः, शरभः, शकुनिका, शिरिः *m.*, पतङ्गः, शुककीटः.

LOCUTION, *s.* उक्तिः *f.*, वाक्यं, उक्तं, वाक् *f.* (च्), वाग्व्यापारः.

LODE, *s.* (Metallic vein) धातुरेखा, धातुपङ्क्तिः -क्तौ *f.*

LODESTONE, *s.* *See* LOADSTONE.

LODH, *s.* (Tree, the bark of which is used in dyeing) लोधः, लोध्रः, पट्टिका, पट्टी, क्रमुकः, लाक्षाप्रसादनः, गालवः, शावरः, तिरीटः, तिस्वः, माञ्जिनः.

To LODGE, *v. a.* (Furnish with a temporary habitation) वस् (c. 10. वासयति -यितुं), निवस्, वासस्थानं दा, आश्रयं दा, निरूपितकालपर्य्यन्तं वस्.—(Fix, set, place) स्था in caus. (स्थापयति -यितुं), न्यस् (c. 4. -अस्यति -असितुं), निधा (c. 3. -दधाति -धातुं), प्रक्षिप्, प्रतिनिधा, निविश् (c. 10. -वेशयति -यितुं), रुह् in caus. (रोपयति -यितुं), रुह् in caus. (रोपयति -यितुं).

To LODGE, *v. n.* (Reside temporarily) वस् (c. 1. वसति, वस्तुं), निवस्, आवस्, प्रतिवस्, समावस्, सन्निवस्, आश्रि (c. 1. -श्रयति -ते -यितुं), वासं कृ, निवासं कृ, आश्रयं कृ, निरूपितकालपर्य्यन्तं वस्; 'having lodged,' उषित्वा, उष्य, उष्य; 'having lodged for a night,' रात्रिम् एकां उषित्वा.—(Rest, remain) स्था (c. 1. तिष्ठति, स्थातुं), वृत् (c. 1. वर्त्तते -र्त्तितुं), लिली (c. 4. -लीयते -लेतुं), संली.—(Become fixed, adhere) सज्जध्न् (c. 9. -बध्नाति -बन्धुं or pass. -बध्यते), लग् (c. 1. लगति -गितुं).

LODGE, *s.* उद्यानगृहं, उद्यानस्थगृहं, उपगृहं, उटजः, कुटीरः.

LODGED, *p. p.* वासितः -ता -तं, कृतावासः -सा -सं.—(Placed, fixed, deposited) स्थापितः -ता -तं, न्यस्तः -स्ता -स्तं, निहितः -ता -तं, प्रक्षिप्तः -प्ता -प्तं, अर्पितः -ता -तं, निवेशितः -ता -तं, निविष्टः -ष्टा -ष्टं, निक्षिप्तः -प्ता -प्तं, निरूढः -ढा -ढं.

LODGER, *s.* (One who lies or boards in another's house at a settled rate) निरूपितमूल्येन परगृहे निवासी *m.* (न्) or भोजनशयनादिकर्त्ता *m.* (र्त्तृ), निरूपितकालपर्य्यन्तं परगृहे वासी *m.* or वासकृत् *m.*

LODGING, *s.* वासः, निवासः, वासस्थानं, आवासः, आवासस्थानं, वसतिः *f.*, निवसतिः *f.*, निवेशनं, निकेतः -तनं, आयतनं, निलयः -यनं, आलयः, अवस्थानं, आवसथः, आश्रयः, संश्रयः, कृतावासः, वेश्मन् *n.* (न्); 'he asked a lodging,' आवासं प्रार्थितवान्.

LODGMENT, *s.* (The act) स्थापनं, संस्थापनं -ना, निवेशनं, वासः -सनं.—(The state) स्थितिः *f.*, अवस्थितिः *f.*, संस्थितिः *f.*—(Encampment) निवेशनं, समावासः.

LOFT, *s.* उपरिकोष्ठः, उपरिस्थकोष्ठः, उपरिस्थः प्रकोष्ठः, अट्टः -ट्टालः.

LOFTILY, *adv.* (Haughtily) सदर्पं, सगर्वं, साटोपं, सावहेलं, सावलेपं, दर्पेण, गर्वेण, उद्धतं, औद्धत्येन.—(On high) उच्चैस्, उच्चकैस्, ऊर्द्धं.

LOFTINESS, *s.* (Height) उच्चत्वं -ता, उच्चतिः *f.*, समुन्नतिः *f.*, उत्कर्षः, उत्कृष्टता, तुङ्गता, उच्चुङ्गता, उच्चयः, समुच्चयः, उच्छ्रितिः *f.*, उत्सेधः, समुत्सेधः, उच्चता, ऊर्द्धत्वं -ता, प्रोन्नता, प्रांशुता, औन्नत्यं.—(Haughtiness) उद्धतिः *f.*, औद्धत्यं, चित्तसमुन्नतिः *f.*, चित्तोन्नतिः *f.*, साटोपत्वं, आटोपः, अभिमानं -निता, अवहेला, अवलेपः, अवलिप्तता, सावलेपत्वं, दर्पः, दृप्तता, गर्वः, औद्धत्यं, औद्धत्यं, प्रौढता, प्रगल्भता.

LOFTY, *a.* (High) उच्चः -च्चा -च्चं, अत्युच्चः &c., प्रांशुः -शुः -शु, तुङ्गः -ङ्गा -ङ्गं, उच्चुङ्गः -ङ्गा -ङ्गं, उन्नतः -ता -तं, समुन्नतः -ता -तं, उच्छ्रितः -ता -तं, समुच्छ्रितः -ता -तं, अभ्युच्छ्रितः -ता -तं, उच्चयः -या -यं, उदयः -या -यं, ऊर्द्धः -र्द्धा -र्द्धं, उत्कृष्टः -ष्टा -ष्टं, सोच्छ्रायः -या -यं, उन्नतः -ता -तं, दुष्प्रालः -ला -लं, करालः -ला -लं, विलङ्घिताकाशः -शा -शं.—(Haughty) उद्धतः -ता -तं, समुद्धतः -ता -तं, गर्वोद्धतः -ता -तं, दर्पोद्धतः -ता -तं, दृप्तः -प्ता -प्तं, उन्नतचेताः -ताः -तः (स्), उन्नद्धचेताः &c., उत्सिक्तः -क्ता -क्तं, गर्वी -र्विणी -र्वि (न्), गर्वितः -ता -तं, साटोपः -पा -पं, अवलिप्तः -प्ता

-मं, सावहेलः -ला -लं, ऊर्द्धदृष्टिः -ष्टिः -ष्टि, मदोद्धतः -ता -तं, मदोदयः -या -यं, शौटीरः -रा -रं, शौण्डीरः -रा -रं, प्रौढः -ढा -ढं.

Log, *s.* (Shapeless or bulky piece of wood) स्थूलकाष्ठं, स्थूलदारु: *m.*, काष्ठखण्डः -ण्डं, वृहत्काष्ठं, दारुखण्डः, वृहद्दारुखण्डः, काष्ठं.—(Machine for measuring the velocity of a ship) नौकागतिमापकयन्त्रं, परिमापककाष्ठं.

Log-book, *s.* नौकागतिविषयकं दैनिकविवरणपुस्तकं.

Logarithm, *s.* घातप्रमापकः, घातप्रमापकसंख्या, लाग्यत्तमाख्यसंख्या, परिकर्म्मे *n.* (न्).

Logarithmic, *a.* घातप्रमापकसम्बन्धी -न्धिनी -न्धि (न्).

Loggerhead, *s.* स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, मूढः, मूर्खः, जडः, जडबुद्धिः *m.*, जडमतिः *m.*, वर्ब्बरः, वटुकः.

Loggerheaded, *a.* स्थूलबुद्धिः -द्धिः -द्धि, स्थूलधीः -धीः -धि, जडबुद्धिः.

Logic, *s.* तर्कः, तर्कविद्या, तर्कशास्त्रं, न्यायः, न्यायविद्या, न्यायशास्त्रं, विचारविद्या, ऊहः, प्रोहः, अभ्यूहः, निरूहः, अहः, वैशेषिकं, आन्वीक्षिकी, अनुमानोक्तिः *f.*, प्लवः. The न्याय school was instituted by the sage Gautama, the branch of it called वैशेषिकं was founded by Kaṇáda. The following are some of the terms of logic; 'universal pervadence or extension,' व्याप्तिः *f.*, अभिव्याप्तिः; 'extreme extension or conclusion unwarranted by the premises,' अतिव्याप्तिः; 'individual or particular extension,' अव्याप्तिः *f.*, अव्याप्यवृत्तिः *f.*; sign of the existence of an inherent property,' व्याप्तिलक्षणं; 'subject of an inference,' व्याप्यं. Other terms are उपलम्भप्रक्षेपः, उत्थापाकांक्षा, प्रवृत्तिनिमित्तं, कैमर्थ्यं, व्याप्यकोटिः *f.*, सिद्धसाधनदोषः.

Logical, *a.* (Pertaining to logic) तार्किकः -की -कं, न्यायी -यिनी -यि (न्), नैयायिकः -की -कं, तर्कसम्बन्धी -न्धिनी &c., तर्कविद्यासम्बन्धी &c., तर्कविद्याविषयः -या -यं, तर्कशास्त्रविषयः &c., प्रोहः -हा -हं, ऊही -हिनी &c., यौक्तिकः -की -कं; 'logical conclusion,' विनिगमः, निगमनं.—(According to the rules of logic) तर्कशास्त्रसिद्धः -द्धा -द्धं, न्यायशास्त्रसिद्धः &c., युक्तिसिद्धः &c., तर्कानुसारी -रिणी &c., न्यायानुसारी &c., न्यायशास्त्रानुसारी &c., तर्कशास्त्रसम्मतः -ता -तं, न्यायशास्त्रसम्मतः -ता -तं, तर्कशास्त्रानुयायी -यिनी &c.

Logically, *adv.* न्यायतस्, यथान्यायं, तर्कानुसारेण, न्यायानुसारेण, तर्कशास्त्रानुसारेण, तर्कशास्त्रानुरूपेण, न्यायशास्त्रवत्.

Logician, *s.* तर्की *m.* (न्), तार्किकः, नैयायिकः, न्यायविद् *m.*, तर्कशास्त्रज्ञः, न्यायशास्त्रज्ञः, न्यायशास्त्रपण्डितः, न्यायशास्त्रवेत्ता *m.* (तृ), तर्कशास्त्री *m.*, (न्), न्यायशास्त्री *m.*, सांवादिकः, ऊही *m.*; 'versed in the system of Gautama,' आक्षपादः, अक्षपादः; 'in that of Kaṇáda,' वैशेषिकः.

Logomachy, *s.* वाग्युद्धं, वाक्कलहः -हं.—(Dispute about words) शब्दवादः, शब्दविवादः, शब्दयुद्धं.

Logwood, *s.* (A kind of wood used in dyeing) पत्तङ्गः.

Loin, *s.* श्रोणिः -णी *f.*, कटिः -टी *f.*, कटिदेशः, श्रोणिदेशः, श्रोणिफलकं, श्रोणितटं, कटीतटं, कटितटं, नितम्बः, जघनं, ककुभती, कलत्रं, प्रोथः, कटः, कटिशीर्षकं; 'girding the loins,' कटिबन्धनं; 'having the loins girded,' बद्धकटिः -टिः -टि; 'the cavities of the loins,' कुकुन्दरे *n.* du., ककुन्दरे *n.* du., कटीरे *n.* du., कटीरः, कटः; 'girdle worn round the loins,' कटिसूत्रं, कटिशृङ्खला, श्रोणिविसं; 'sprung from one's loins,' अङ्गजः -जा -जं, अङ्गजातः -ता -तं.

To loiter, *v. n.* विलम् (c. 1. -लम्बते -लम्बितुं), मन्द (nom. मन्दायते), विलम्बनं कृ, विलम्बं कृ, कालं क्षिप् (c. 6. क्षिपति, क्षेप्तुं), कालक्षेपं कृ, अवस्था (c. 1. -तिष्ठति -स्थातुं), चिर (nom. चिरयति, चिरायति), चिरं or चिरकालं स्था or अवस्था, मन्दं मन्दं चल् (c. 1. चलति -लितुं) or चर् (c. 1. चरति -रितुं), विलम्बेन गम् (c. 1. गच्छति, गन्तुं).

Loiterer, *s.* विलम्बी *m.* (न्), विलम्बकारी *m.*, विलम्बगतिः *m.*, विलम्बगामी *m.* (न्), मन्दगामी *m.*, मन्दगतिः *m.*, कालक्षेपकः.

Loitering, *part.* मन्दायमानः -ना -नं, मन्दयमानः -ना -नं, विलम्बी -म्बिनी -म्बि (न्), विलम्बगामी -मिनी &c., चिरायमाणः -णा -णं.

Loitering, *s.* विलम्बनं, विलम्बगमनं, मन्दगमनं, कालक्षेपः.

To loll, *v. n.* (Recline lazily) आलस्येन शी (c. 2. शेते, शयितुं) or अवलम् (c. 1. -लम्बते -म्बितुं) or संविश् (c. 6. -विशति -वेष्टुं), सुखेन शी or अवलम्.—(Loll the tongue) जिह्वां लल् or लड् (c. 1. ललति, लडति, c. 10. लालयति, लडयति -यितुं), जिह्वाललनं कृ, जिह्वां बहिष्कृ; 'one who lolls the tongue,' ललजिह्वः -ह्वा -ह्वं.

Lolling, *s.* (Of the tongue) ललनं, जिह्वाललनं.—(Lolling and languishing as indicative of passion) लालितं, ललितं, लालनं.

Lone, lonely, *a.* (Solitary, unfrequented) निर्जनः -ना -नं, विजनः -ना -नं, विलोकः -की -कं, निर्मनुजः -जा -जं, निर्मनुष्यः -ष्या -ष्यं, एकान्तः -न्ता -न्तं, विविक्तः -क्ता -क्तं, निभृतः -ता -तं, जनानाकीर्णः -र्णा -र्णं, जनैरनाकीर्णः &c., निःशलाकः -का -कं, निश्शलाकः &c., न्यूनसञ्चारः -रा -रं, हीनसञ्चारः -रा -रं; 'a lonely place,' निर्जनस्थानं.—(Single, standing by itself) एकाकी -किनी -कि (न्), एकः -का -कं, असहायः -या -यं, असङ्गः -ङ्गा -ङ्गं, केवलः -ला -लं, केवली -लिनी &c.—(Fond of solitude) विविक्तप्रियः -या -यं, विविक्तसेवी -विनी &c., एकान्तप्रियः -या -यं, एकान्तसेवी &c.

Loneliness, *s.* (Solitude, retirement) निर्जनता, विजनता, विविक्तता, विविक्तं, निर्मनुष्यता, निभृतता, एकान्तत्वं, निःशलाकता, सञ्चारहीनता, सञ्चारन्यूनता, एकाकिता -त्वं, असहायता, असङ्गता.—(Love of retirement) विविक्तसेवा, विविक्तप्रीतिः *f.*, विविक्तरुचिः *f.*, एकान्तप्रीतिः *f.*

Lonesome, *a.* निर्जनः -ना -नं, विजनः -ना -नं, दारुणः -णा -णं, निरानन्दः -न्दा -न्दं; 'a lonesome road,' प्रान्तरं.

Lonesomeness, *s.* निर्जनता, विजनता, विविक्तता, निरानन्दता, दारुणता.

Long, *a.* (In time or space) दीर्घः -र्घा -र्घं, द्राघिमवान् -वती -वत् (न्), आयतः -ता -तं, आयामी -मिनी -मि (न्), आयामवान् -वती &c., व्यायतः -ता -तं, आयतिमान् -मती &c., लम्बः -म्बा -म्बं, चिर in comp., this last is restricted to time. (Long in extent or size) दीर्घपरिमाणः -णा -णं, दीर्घाकारः -रा -रं, दीर्घाकृतिः -तिः -ति, दीर्घतनुः -नुः -नु.—(Extended) आयतः -ता -तं, समायतः -ता -तं, आयामितः -ता -तं, विस्तीर्णः -र्णा -र्णं, विस्तृतः -ता -तं, प्रसृतः -ता -तं.—(Tedious, dilatory) दीर्घसूत्रः -त्रा -त्रं, चिरकारी -रिणी &c., चिरक्रियः -या -यं, विलम्बकारी &c., विलम्बी -म्बिनी &c., दीर्घसूत्री -त्रिणी &c., प्रलम्बः -म्बा -म्बं.—(Continuing for a long time) दीर्घकालीनः -ना -नं, चिरकालीनः -ना -नं, दीर्घकालिकः -की -कं, चिरकालिकः &c., चिरस्थः -स्था -स्थं, चिरस्थायी -यिनी &c., चिरस्थितः -ता -तं, चिरजानः -नी -नं, चिराजः -जी -जं, दीर्घकालस्थायी -यिनी &c., चिरकालस्थायी -यिनी &c.—(Long, in the sense of distant) दूरः -रा -रं, विदूरः -रा -रं; 'going a long way,' दूरगः -गा -गं; 'a long way off,' दूरस्थः -स्था -स्थं, दूरस्थायी -यिनी &c.—(Extended to any measure) expressed by परिमाणः -णा -णं or परिमितः -ता -तं or मितः -ता -तं in comp., as, 'a line an inch long,' अङ्गुलपरिमाणा or अङ्गुलपरिमिता or

अङ्गुलमिता रेखा; 'four fingers long,' चतुरङ्गुलः -ली -लं, चतुरङ्गुलपरिमितः -ता -तं.—(A long period) दीर्घकालः, चिरकालः, बहुकालः, अनेककालः, आयतयामितः *f.*; 'for a long time,' दीर्घकालं, चिरकालं, बहुकालं -लात्, अनेककालं, चिरं -रेण -रात्, -राय, चिरदिवसं, चिररात्रं -त्राय, दीर्घरात्रं; 'long absent,' चिरगतः -ता -तं, चिरप्रवासी -सिनी &c.; 'long ill,' दीर्घरोगी -गिणी &c., दीर्घामयः -या -यं, चिररोगी &c.; 'long sought for,' चिरचेष्टितः -ता -तं; 'cherished for a long time,' चिरकालपालितः -ता -तं, चिरपालितः &c.; 'accumulated after a long time,' चिरकालोपार्जितः -ता -तं, चिरलग्नः -ग्ना -ग्नं; 'living long,' दीर्घजीवी -विनी &c., चिरजीवी &c.; 'a long life,' दीर्घजीवः; 'long since abandoned,' चिरोज्झितः -ता -तं, 'for a short time,' अल्पकालं, अल्पमात्रं, क्षियत्कालं, 'lasting for a short time,' क्षणस्थायी -यिनी &c., 'the long run,' आयतिः *f.*, 'long-haired,' दीर्घकेशः -शी -शं; 'long-leaved,' दीर्घपत्रः -त्रा -त्रं, दीर्घपर्णः -र्णी -र्णं; 'long-tongued,' दीर्घजिह्वः -ह्वा -ह्वं, दीर्घरसनः -ना -नं, 'having a long line of ancestors,' दीर्घवंशः -शा -शं, 'a long journey,' दीर्घयानं *n.* (न्), दीर्घाध्वा *n.* (न्), 'a long vowel,' दीर्घस्वरः, 'the long sound of vowels,' ह्रस्वः, ह्रस्वः -स्वं, 'long syllable,' दीर्घाक्षरं, हारः.

Long, *adv.* (To a great extent in space) दूरं, विदूरं, दूरतस्, दूरपर्यन्तं, दीर्घपर्यन्तं, दीर्घपरिमाणं -णेन.—(To a great extent in time, for a long period) दीर्घकालं, चिरकालं -लात्, बहुकालं -लात्, अनेककालं, चिरं -रेण -राय -रात् -रस्य -रे, चिरदिवसं, चिररात्रं -त्राय, दीर्घरात्रं -त्राय, बहुकालपर्यन्तं, दीर्घकालपर्यन्तं; 'very long,' सुचिरं -रेण -रात्; 'how long?' कियत्कालं, कियन्तं कालं, कियता कालेन, कियत्कालपर्यन्तं, कियत्कालं यावत्, कतिकालं; 'how long!' कियच्चिरं -रेण -रात्; 'ere long,' अचिरेण -रात्; 'long ago,' प्रागेव, प्राक्काले, पूर्वं, पूर्वकाले, अतीतदीर्घकाले, गतदीर्घकाले, अव्यवहितपूर्वकाले; 'not long ago,' अव्यवहितपूर्वकाले; 'as long,' यत्कालं, यावत्कालं, यत्प्रमाणं; 'so long,' तत्कालं, तावत्कालं, तत्प्रमाणं.—(Through the whole extent or duration of) पर्यन्तं affixed, आ prefixed, यावत्; as, 'the whole year long,' वर्षपर्यन्तं, आवर्षात्; 'whole life, as long as one lives,' यावज्जीवं, आमरणात्, मरणं यावत्; 'long-absent, long-ill, long-sought, &c.' *See* under Long, *a.*

To Long, *v. n.* (Desire eagerly) अत्यन्तम् अभिलष् (c. 1. -लषति, c. 4. -लष्यति -लषितुं) or वाञ्छ् (c. 1. वाञ्छति -ञ्छितुं) or अभिवाञ्छ् or कांक्ष् (c. 1. कांक्षति -क्षितुं) or आकांक्ष् or अभिकांक्ष् or अनुकांक्ष्, अतिशयेन स्पृह् (c. 10. स्पृहयति -यितुं) or इष् (c. 6. इच्छति, एषितुं) or आप् in des. (ईप्सति -प्सितुं) or अभ्याप् or पर्याप् or लभ् in des. (लिप्सते -प्सितुं) or अभिलभ् or अभिरुच् (c. 10. -रोचयति -यितुं) or काम् (c. 10. कामयते -यितुं) or ईह् (c. 1. ईहते -हितुं) or समीह्, लुभ् (c. 4. लुभ्यति, लोभुं), गृध् (c. 4. गृध्यति, गर्धितुं), भुज् in des. (बुभुक्षति -क्षे -क्षितुं), तृष् (c. 4. तृष्यति, तर्षितुं), आशंस् (c. 1. -शंसते -सितुं), आशास् (c. 2. -शास्ते, c. 1. -शासते -सितुं), अभिध्यानं कृ.—(As a pregnant woman) दोहदं कृ, दोहदवती भू, दौहृदिनी भू.

Longanimity, *s.* सहनशीलता, चिरसहिष्णुता, क्षमा, क्षान्तिः *f.*

Long-armed, *a.* दीर्घबाहुः -हुः -हु, दीर्घभुजः -जा -जं, लम्बहस्तः -स्ता -स्तं.

Long-bellied, *a.* लम्बोदरः -रा -रं, लम्बजठरः -रा -रं, दीर्घोदरः -रा -रं.

Long-boat, *s.* दीर्घनौका, बृहन्नौका, महानौका, उपनौका.

Long-concealed, *a.* चिरगुप्तः -प्ता -प्तं, चिरकालप्रच्छन्नः -न्ना -न्नं.

Long-continued, *a.* चिरस्थितः -ता -तं, चिरकालस्थायी -यिनी -यि (न्).

Long-eared, *a.* लम्बकर्णः -र्णी -र्णं, दीर्घकर्णः -र्णी -र्णं, आयतकर्णः -र्णी -र्णं.

Long-eyed, *a.* आयताक्षः -क्षी -क्षं, आयतनेत्रः -त्री -त्रं, दीर्घनयनः -नी -नं.

Long-faced, *a.* दीर्घमुखः -खी -खं, दीर्घवक्त्रः -क्त्रा -क्त्रं, दीर्घाननः -ना -नं.

Long-forgotten, *a.* चिरविस्मृतः -ता -तं, चिरकालविस्मृतः -ता -तं.

Long-headed, *a.* चिदग्धमतिः -तिः -ति, उत्पन्नमतिः &c., निपुणमतिः &c., सूक्ष्मबुद्धिः -द्धिः -द्धि, दीर्घसन्धानी -निनी -नि (न्).

Long-lasting, *a.* चिरस्थायी -यिनी -यि (न्), चिरकालस्थायी &c., चिरस्थः -स्था -स्थं, चिरकालीनः -ना -नं, चिरकालिकः -की -कं, दीर्घकालिकः -की -कं.

Long-legged, *a.* दीर्घजङ्घः -ङ्घा -ङ्घं, दीर्घपादः -दा -दं, आयतजङ्घः &c., कङ्केभानुः -नुः -नु, कङ्केभः -भा -भं, कङ्केषुः -षुः -षु, दीर्घसक्थः -क्था -क्थं.

Long-lived, *a.* दीर्घजीवी -विनी -वि (न्), चिरजीवी &c., चिरञ्जीवी &c., चिरजीवकः -का -कं, दीर्घायुः -युः -यु or दीर्घायूः -यूः -यूः (स्), चिरायुः &c., दीर्घायुष्कः -ष्का -ष्कं, चिरायुष्कः &c., आयुष्यः -ष्या -ष्यं, जीवथः -था -थं, जैवातृकः -का -कं, आयुष्मान् -ष्मती -ष्मत् (त्); this last is generally used in addressing a king or superior in the voc. c.; as, 'O long-lived one,' आयुष्मन्.

Long-lost, *a.* चिरगतः -ता -तं, चिरभ्रष्टः -ष्टा -ष्टं, चिरकालगतः -ता -तं.

Long-necked, *a.* दीर्घग्रीवः -वा -वं, आयतग्रीवः &c., दीर्घकण्ठः -ण्ठा -ण्ठं.

Long-pepper, *s.* पिप्पली -लिः *f.*, शौण्डी, कोला, उषणा, कृष्णा, उपकुल्या, मागधी, वैदेही, चपला, कणा, वशिरः, वसिरः, श्रेयसी, करिपिप्पली, कपिवल्ली, कोलवल्ली, चव्यं -व्या, चवी, चविका -कं.—(Its root) पिप्पलीमूलं, ग्रन्थिकं, ग्रन्थिकाशिरस् *n.*

Long-sighted, *a.* दीर्घदर्शी -र्शिनी -र्शि (न्), दीर्घदृष्टिः -ष्टिः -ष्टि, दूरदर्शी &c., दूरदृष्टिः -ष्टिः -ष्टि.

Long-sightedness, *s.* दीर्घदृष्टिः *f.*, दीर्घदर्शनं, दूरदृष्टिः *f.*, दूरदर्शनं.

Long-sufferance, Long-suffering, *s.* सहनशीलता, सहिष्णुता, चिरसहिष्णुता -त्वं, चिरसहनं, बहुक्षमता, क्षमा, क्षान्तिः *f.*, सहनं, तितिक्षा, अपकारे ऽपि चिरस्थायिकारः.

Long-suffering, *a.* सहनशीलः -ला -लं, सहिष्णुः -ष्णुः -ष्णु, चिरसहिष्णुः -ष्णुः -ष्णु, बहुक्षमः -मा -मं, बहुसहः -हा -हं, सञ्जसहः -हा -हं, क्षमावान् -वती -वत् (न्), क्षमः -मा -मं, क्षमी -मिणी -मि (न्), तितिक्षुः -क्षुः -क्षु.

Long-winded, *a.* दीर्घसूत्रः -त्रा -त्रं -त्री -त्रिणी -त्रि (न्), कहजमकः -का -कं.

Longer, *a.* दीर्घतरः -रा -रं, द्राघीयान् -यसी -यः (स्); 'for a longer period,' दीर्घतरकालं, बहुतरकालं; 'why do you delay any longer?' किम् अतःपरं विलम्बसे.

Longest, *a.* दीर्घतमः -मा -मं, द्राघिष्ठः -ष्ठा -ष्ठं; 'for the longest period,' दीर्घतमकालं, सुदीर्घकालं.

Longeval, Longevous, *s.* दीर्घजीवी -विनी -वि (न्), चिरजीवी &c. *See* Long-lived.

Longevity, *s.* दीर्घजीवः, चिरजीवित्वं, दीर्घजीवित्वं, चिरञ्जीवित्वं, दीर्घायुर्थं, चिरायुर्थं, चिरायुस् *n.*, दीर्घायुस् *n.*, आयुस् *n.*; 'conducive to longevity,' आयुष्यः -ष्या -ष्यं.

Longimanous, *a.* दीर्घहस्तः -स्ता -स्तं, दीर्घपाणिः -णिः -णि, लम्बहस्तः &c.

Longimetry, *s.* दूरान्तमितिः *f.*, दूरान्तमापनं, दैर्घ्यमानं, दैर्घ्यमापनं.

Longing, *s.* अत्यभिलाषः, अतिस्पृहा, अत्यन्तवाञ्छा, अतीच्छा, अतिशयेच्छा, अतिकांक्षा, अत्याकांक्षा, लालसा, उत्कण्ठा, औत्सुक्यं, कामः, गृध्या, अतिलिप्सा, इच्छा, आशा, कांक्षा, अभिकांक्षा, नितान्तस्पृहा; 'longing of a pregnant woman,' दोहदं.

LONGING, *part.* or *a.* (Eagerly desirous) अत्यभिलाषी -षिणी -षि (न्), अत्याकांक्षी -क्षिणी &c., आकांक्षन् -क्षन्ती -क्षत् (त्), अतीच्छः -च्छा -च्छं, अतिलिप्सुः -प्सुः -प्सु, कुतूहली -लिनी &c., उत्सुकः -का -कं, उत्कः -त्का -त्कं, उत्कण्ठितः -ता -तं, ऋषः -षा -षं, लालसी -सिनी &c., स्पृहयालुः -लुः -लु; 'a longing woman,' दोहदवती, दौहदिनी, दोहदान्विता.

LONGITUDE, *s.* द्राघिमा *m.* (न्), ध्रुवकः.—(Position to east or west) रेखामारं, रेखांशः; 'of a country,' देशमारं.—(Of the earth) रेखांशः, रेखापरिधिः *m.*, रेखागणः, रेखासमूहः.—(Of any point or object in the heavens) भोगः; 'of the sun,' रविभोगः; 'of a planet reckoned from the vernal equinoctial point,' सायनं.—(Meridian or circle of longitude) याम्योत्तरवृत्तं, रेखावृत्तं, रेखांशवृत्तं.

LONGITUDINAL, *a.* अन्वायतनः -ना -नं, अनुदैर्घ्यः -र्घ्या -र्घ्यं, अनुद्राघिमा -मा -म (न्), आयतः -ता -तं, आयतनानुसारी -रिणी -रि (न्), अन्वायतिः -तिः -ति.

LOOBILY, *adv.* स्थूलजनवत्, असभ्यजनवत्, ग्राम्यजनवत्, वृषलवत्.

LOOBY, *s.* स्थूलजनः, ग्राम्यजनः, असभ्यजनः, स्थूलबुद्धिः *m.*, वृषलः.

To LOOK, *v. a.* (Direct the eye, look at) दृश् (c. 1. पश्यति, द्रष्टुं) अनुदृश्, प्रतिदृश्, अभिदृश्, परिदृश्, सन्दृश्, ईक्ष् (c. 1. ईक्षते -क्षितुं), समीक्ष्, वीक्ष्, अभिवीक्ष्, प्रेक्ष्, अभिप्रेक्ष्, सम्प्रेक्ष्, अवेक्ष्, अन्वीक्ष्, निरीक्ष्, उदीक्ष्, आलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं), समालोक्, अवलोक्, विलोक्, आलोच् (c. 10. -लोचयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), निर्वर्ण् (c. 10. -वर्णयति -यितुं), लक्ष् (c. 10. लक्षयति -ते -यितुं), आलक्ष्, समालक्ष्, उपलक्ष्, संलक्ष्, दृष्टिं कृ, विलोकनं कृ, अवलोकनं कृ.—(Look about) समन्तात् or समन्ततस् or इतस्ततो दृश्.—(Look after, search for) अन्विष् (c. 4. -ष्यति -ष्टुं), निरूप्, अवेक्ष्, परीक्ष्.—(Look after, take care of) पाल् (c. 10. पालयति -यितुं), रक्ष् (c. 1. रक्षति -क्षितुं), गुप् (c. 1. गोपायति, गोतुं), अवेक्ष्.—(Look at, consider) अवेक्ष्, समीक्ष्, आलोक्, आलोच्, आलक्ष्, निरूप्, मन् (c. 4. मन्यते, मन्तुं), अवेक्षां कृ.—(Look down) अवलोक्, अधो दृश्.—(Look down on, despise) अवमन्, उपेक्ष्, उपप्रेक्ष्.—(Look for, expect) प्रतीक्ष्, अपेक्ष्, व्यपेक्ष्, सम्प्रतीक्ष्, उदीक्ष्, निरीक्ष्, प्रतिपाल्, उदृश्.—(Look into) निरीक्ष्, परीक्ष्, निरूप्; 'look into affairs,' कार्य्यदर्शनं कृ, कार्य्येक्षणं कृ, कार्य्यावेक्षणं कृ.—(Look on, regard) अवेक्ष्, अपेक्ष्, प्रतीक्ष्, आलोक्, निरूप्, मन्, दृश्.—(Look on, be a spectator) प्रेक्ष्, दृश्, मिष् (c. 6. मिषति, मेषितुं), प्रेक्षकः -का -कं भू.—(Look over) परीक्ष्, अनुसन्धा (c. 3. -दधाति -धातुं), निरूप्.—(Look out, be on the watch) अवधा, सावधानः -ना -नं भू, सावहितः -ता -तं भू, अवधानं कृ.—(Look up) उदीक्ष्, उन्नीक्ष्, उदृश्, ऊर्द्धं दृश्, उन्मुखीभू; 'to look up to heaven,' नभोदृष्टिः -ष्टिः -ष्टि भू.—(Look up to, esteem) सम्मन्, प्रतिमन्, मन्.—(Seem, appear) प्रतिभा (c. 2. -भाति -तुं), सम्प्रभा, आभा, निभा, दृश् in pass. (दृश्यते), लक्ष् in pass. (लक्ष्यते); 'to look well,' शुभ् (c. 1. शोभते -भितुं); 'he looks astonished,' विस्मित इव प्रतिभाति; 'look, look ye!' पश्य, पश्यत.

LOOK, *s.* दृष्टिः *f.*, दर्शनं, ईक्षणं, प्रेक्षणं -क्षा, प्रेक्षितं, वीक्षणं, वीक्षितं, आलोकनं, अवलोकनं, विलोकनं, दृष्टिपातः, दृष्टिनिपातः; 'a look of displeasure,' अदृष्टिः *f.*; 'side-look,' कटाक्षः, ऋजवीक्षणं, ऋजुदृष्टिः *f.*, अपाङ्गदृष्टिः *f.*, अपाङ्गदर्शनं.—(Air, appearance) रूपं, आकारः, आकृतिः *f.*, दर्शनं, रीतिः *f.*, चर्य्या, प्रतिभा, आभा, छाया.

—(Cast of countenance) वदनाकारः, मुखछाया, मुखं, वदनं.

LOOKED, *p. p.* दृष्टः -ष्टा -ष्टं, आलोकितः -ता -तं, ईक्षितः -ता -तं, दत्तदृष्टिः -ष्टिः -ष्टि; 'to be looked for,' अपेक्षणीयः -या -यं; 'having looked,' दृष्ट्वा, अवलोक्य, वीक्ष्य, निर्वर्ण्य, निरूप्य.

LOOKER, *s.* द्रष्टा *m.* (ष्टृ), दर्शी *m.* (न्), वीक्षकः, आलोचकः, विलोकनकृत्, अवलोकनकृत्.—(Looker on) प्रेक्षकः, प्रेक्षणिकः, प्रेक्षमाणकः.

LOOKING, *part.* पश्यन् -श्यन्ती -श्यत् (त्), ईक्षमाणः -णा -णं, प्रेक्षमाणः -णा -णं, दर्शी -र्शिनी -र्शि (न्), दृष्टि in comp.; as, 'looking in all directions,' इतस्ततो दत्तदृष्टिः -ष्टिः -ष्टि; 'looking up,' ऊर्द्धदृष्टिः -ष्टिः -ष्टि, उन्मुखः -खा -खं; 'looking up to heaven,' नभोदृष्टिः -ष्टिः -ष्टि.—(Looking well, good-looking) सुदर्शनः -ना -नं, शुभदर्शनः -ना -नं, सुदृश्यः -श्या -श्यं, दर्शनीयः -या -यं, दृश्यः -श्या -श्यं, शुभाननः -ना -नी -नं, सुरूपः -पी -पं.

LOOKING, *s.* (Act of directing the eye) दर्शनं, दृष्टिः *f.*, दृष्टिपातः, ईक्षणं, वीक्षणं, प्रेक्षणं -क्षा, प्रेक्षा, आलोकः -कनं, आलोचनं, विलोकनं, अवलोकनं, सन्दर्शनं, निरूपणं, निर्वर्णनं, निध्यानं.—(Search) अन्वेषणं, संवीक्षणं, अनुसन्धानं.—(Looking for) अपेक्षा, प्रतीक्षा, व्यपेक्षा.

LOOKING-GLASS, *s.* दर्पणः -णं, आदर्शः, दर्शनं, आत्मदर्शः, प्रतिबिम्बाकः, सम्मुखी *m.* (न्), मुकुरः, मकुरः, मङ्कुरः, कर्करः, मण्डलकं; 'surface of a looking-glass,' आदर्शतलं.

LOOKING-GLASS MAKER, *s.* दर्पणकारः, दर्पणकृत्, दर्पणविक्रयी *m.* (न्).

LOOK-OUT, *s.* सुसमीक्षा, इतस्ततः समीक्षा, अवेक्षा, अवधानं, सावधानता.

LOOM, *s.* वेमा *m.* -म *n.* (न्), वेमः, वायदण्डः, वापदण्डः, पाणदण्डः, सूत्रयन्त्रं, आवापनं, तन्त्रं, तन्त्रयन्त्रं, कृविः *m.*

To LOOM, *v. n.* समुद्रमध्ये सुदूरस्थितत्वाद् अस्पष्टाकारः -रा -रं or अतिस्थूलाकारः -रा -रं भू or विद् in pass. (विद्यते) or अस्पष्टरूपेण दृश् in pass. (दृश्यते).

LOON, *s.* कापुरुषः, दुर्जनः, धूर्तः, लटकः, कितवः, दुर्जनः.

LOOP, *s.* (A folding, noose) पाशः, शिक्यं -क्या, काचः, पुटः, आवर्त्तनं.—(Opening, aperture) छिद्रं, रन्ध्रं; 'suspended in a loop,' काचितः -ता -तं, शिक्यितः -ता -तं.

LOOP-HOLE, *s.* (Small opening in a wall, &c.) गवाक्षः -क्षं, जालं, वातायनं, रन्ध्रं, छिद्रं, प्रच्छन्नं.—(Means of escape) निर्गमः, निर्गतिः *f.*, निर्गमोपायः, निर्गमद्वारं, पलायनं, अपक्रमः, उत्तरणं, मुक्तिः *f.*, मोक्षः.

To LOOSE, LOOSEN, *v. a.* (Relax) शिथिलीकृ, शिथिल (nom. शिथिलयति -ते -यितुं), श्रथ् (c. 10. श्रथयति -यितुं), अथ् (c. 1. अथति, c. 10. अथयति, आथयति -यितुं), अन्थ् (c. 9. अन्थ्नाति, अन्थितुं), श्रथीकृ, प्रश्रथीकृ, संस् (c. 10. संसयति -यितुं), विसंस्, विगल् (c. 10. -गलयति -यितुं), विस्रस्तीकृ.—(Set free) मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), अवमुच्, प्रमुच्, विमुच्, प्रविमुच्, निर्मुच्, उन्मुच्; मोक्ष (c. 10. मोक्षयति -यितुं), विमोक्ष्.—(Untie, unbind, unfasten) उद्ग्रन्थ् (c. 9. -ग्रथ्नाति, c. 1. -ग्रन्थति -न्थितुं), समुद्ग्रन्थ्, उन्मुच्, अवमुच्, वियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), विसन्धा (c. 3. -दधाति -धातुं), विसन्धीकृ, विपाश् (nom. -पाशयति -यितुं), उन्मूलीकृ.

To LOOSE, LOOSEN, *v. n.* (Become loose) शिथिलीभू, शिथिल (nom. शिथिलायते), श्रथ (nom. श्रथायते -ति), अथ (nom. अथायते), अन्थ् (c. 1. अन्थते -न्थितुं), श्रथीभू, संस् (c. 1. संसते -सितुं), उन्मूलीभू.—(Loose a ship) नौकां मुच् (c. 6. मुञ्चति, मोक्तुं) or चल् (c. 10. चालयति -यितुं).

LOOSE, *a.* (Not tight, lax) शिथिलः -ला -लं, श्रथः -था -थं, अश्रथः -था -थं, सस्तः -स्ता -स्तं, विसस्तः -स्ता -स्तं, विगलितः -ता -तं, अश्लिष्टः

MOMENT, *s.* (Minute portion of time) क्षणः, विपलं, पलं, त्रुटिः *f.*, निमेषः, निमिषः, मात्रा; 'the present moment,' आपातः; 'for the present moment,' आपाततस्; 'in a moment,' क्षणात् क्षणेन, निमेषमात्रेण, क्षणमात्रेण, क्षणान्तरे, एकपदे, एकविपले; 'for a moment,' क्षणं -णेन, क्षणमात्रं, निमेषमात्रं, मुहूर्त्तं; 'at that moment,' तत्क्षणात् -णे, तत्काले, तदानीमेव; 'every moment,' प्रतिक्षणं, अनुक्षणं, क्षणे क्षणे; 'the next moment,' क्षणान्तरं; 'auspicious moment,' लग्नं. *See* INSTANT. (Importance) गुरुता -त्वं, गौरवं, प्रभावः, भारः.

MOMENTARILY, *adv.* क्षणे -णं -णात्, तत्क्षणे, प्रतिक्षणं, सद्यस्, सपदि, क्षणमात्रं, निमेषमात्रं.

MOMENTARY, *a.* क्षणिकः -का -की -कं, क्षणी -णिनी -णि (न्), क्षणभृतः -ता -तं, क्षणमात्रस्थायी -यिनी &c., क्षणस्थायी &c., अत्यल्पकालस्थायी &c., अल्पकालीनः -ना -नं, अत्यल्पकालीनः -ना -नं, अचिरः -रा -रं, अचिरस्थायी &c., साद्यस्कः -स्की -स्कं, नैमिषः -षी -षं, नैमिषिकः -की -कं, तत्क्षणिकः -की -कं, तात्कालिकः -की -कं, क्षण in comp.; as, 'a momentary obstacle,' क्षणविघ्नः; 'a momentary flash,' क्षणप्रभा.

MOMENTOUS, *a.* गुरुः -र्वी -रु, गुर्वर्थः -र्था -र्थं, बह्वर्थः &c., महार्थः &c. गुरुप्रभावः -वा -वं, अलघुः -घुः -घु; 'a momentous affair,' गुरुकार्य्यं. *See* IMPORTANT.

MOMENTOUSNESS, *a.* गुरुता -त्वं, गौरवं, गुर्वर्थता, प्रभावः, अलघुता.

MOMENTUM, *s.* वेगः, आवेगः, संवेगः, आपातः, गतिवेगः.

MONACHAL, *a.* मठवाससम्बन्धी -न्धिनी -न्धि (न्). *See* MONASTIC.

MONACHISM, *s.* मठवासः, मठाध्यासनं, वनवासः, वानप्रस्थता, अरण्यवासः, वैखानसवृत्तिः *f.*, संसारत्यागः, उदासीनता.

MONAD, MONADE, *s.* तन्मात्रं, मात्रं, अणुमात्रं, अभेद्यवस्तु *n.*, अच्छेद्यवस्तु *n.*, अदृश्यवस्तु *n.*, अखण्डनीयवस्तु.

MONARCH, *a.* राजा *m.* (न्), नृपतिः *m.*, भूपतिः *m.*, नृपः, पार्थिवः, भूपः, नरपतिः *m.*, महीपतिः *m.*, अधिपः, अधिपतिः *m.*, महाराजः, अधिराजः, ईश्वरः, अधीश्वरः; 'universal monarch,' सम्राट् *m.* (ज्), मण्डलेश्वरः, चक्रवर्ती *m.* (न्). *See* KING.

MONARCHAL, MONARCHIC, MONARCHICAL, *a.* (Relating or suited to a monarch) राजकीयः -या -यं, राजयोग्यः -ग्या -ग्यं, राजोचितः -ता -तं, आधिराजिकः -की -कं, राज in comp.—(Vested in a single ruler) एकराजाधीनः -ना -नं, एकराजायत्तः -त्ता -त्तं, सम्राडधीनः -ना -नं, एकराजकः -का -कं, एकप्रभुकः -का -कं.

MONARCHY, *s.* एकराजशासनं, एकराजाधिपत्यं, एकाधिपत्यं, एकराजकत्वं, एकभर्तृकत्वं, एकस्वामित्वं, राजत्वं, राज्यं, नृपत्वं, नरेन्द्रत्वं.

MONASTERY, *s.* मठः, आश्रमः, वानप्रस्थाश्रमः, मुनिवासः, मुनिवासस्थानं, धर्मशाला, पुण्यस्थानं, पुण्यालयः, पुण्यवनं.

MONASTIC, MONASTICAL, *a.* मठवाससम्बन्धी -न्धिनी -न्धि (न्), आश्रमसम्बन्धी &c., आश्रमी -मिणी &c., आश्रमिकः -की -कं, मुनिसम्बन्धी &c.

MONDAY, *s.* सोमवारः, चन्द्रवारः, इन्दुवारः, सोमवासरः.

MONETARY, *a.* मुद्रासम्बन्धी -न्धिनी -न्धि (न्), मौद्रिकः -की -कं.

MONEY, *s.* (Coin) मुद्रा, दीनारः, नाणकं, टङ्कः, टङ्ककः, निष्कः -ष्कं, कार्षापणं.—(Riches, wealth) धनं, अर्थः, वित्तं, द्रव्यं, विभवः, वैभवं, सम्पत्तिः *f.*, रिक्थं, धनसम्पत्तिः *f.*, धनबाहुल्यं, धनसमृद्धिः *f.*, धनवैपुल्यं, 'love of money,' धनलोभः, अर्थलोभः, धनाशा; 'making money,' धनार्जनं, द्रव्यार्जनं.

MONEY-BAG, *s.* कोषः, कोशः, धनकोषः, मुद्राकोषः.

MONEY-BOX, *s.* मुद्राभाण्डं, मुद्रापात्रं, धनभाण्डं, दीनारभाण्डं.

MONEY-CHANGER, *s.* मुद्रापरिवर्त्तकः, हुण्डिकापत्रसुवर्णरूप्यादिपरिवर्त्तकः, धनव्यापारी *m.* (न्), मुद्राव्यापारी.

MONEYED, *a.* धनवान् -वती -वत् (त्), धनी -निनी -नि (न्), धनिकः -का -कं, सधनः -ना -नं, धनाढ्यः -ढ्या -ढ्यं, महाधनः -ना -नं, द्रव्यवान् &c., वित्तवान् &c.

MONEY-LENDER, *s.* कुसीदिकः, कुसीदः -दा -दं, कौसीदिकः, कुसीदजीवी *m.* (न्), वार्षुषिकः, वृद्धिजीवी *m.*, निषिद्धवृद्ध्युपजीवी *m.* (न्), कलोपजीवी *m.*, ऋणदाता *m.* (तृ), धनिकः, धनप्रयोगी *m.* (न्).

MONEY-LESS, *a.* धनहीनः -ना -नं, अधनः -ना -नं, निर्धनः -ना -नं, द्रव्यहीनः -ना -नं, अर्थहीनः &c., वित्तहीनः &c., क्षीणधनः &c., गतार्थः -र्था -र्थं.

MONGER, *s.* व्यापारी *m.* (न्), व्यवसायी *m.* (न्), क्रयविक्रयिकः, विक्रेता *m.* (तृ), वणिक् *m.* (ज्).

MONGREL, *a.* सङ्कीर्णजातीयः -या -यं, सङ्करजातीयः -या -यं, सङ्करजातः -ता -तं, सङ्करजः -जा -जं, विजातीयः -या -यं, सङ्कीर्णः -र्णा -र्णं.

MONITION, *s.* उपदेशः, प्रत्यादेशः, प्रबोधः -धनं, मन्त्रणं, बोधः -धनं.

MONITOR, *s.* (Warner, admonisher) मन्ता *m.* (न्तृ), अभिमन्ता *m.*, मन्त्री *m.* (न्), बोधकः, प्रबोधकः, उपदेशकः, प्रत्यादेशकः, शिक्षकः.—(In a school) उपशिक्षकः, उपगुरुः *m.*

MONITORIAL, *s.* उपशिक्षकसम्बन्धी -न्धिनी &c., उपशिक्षासम्बन्धी &c.

MONITORY, MONITIVE, *a.* उपदेशकः -का -कं, उपदेशात्मकः -का -कं, उपदेशात्मकः -पा -पं, शिक्षकः -का -कं, उद्बोधकः -का -कं, प्रबोधकः &c.

MONK, *s.* मठवासी *m.* (न्), मुनिः *m.*, सन्न्यासी *m.* (न्), योगी *m.* (न्), यती *m.* (न्), तपस्वी *m.* (न्), वैखानसः, उदासीनः, वैरागी *m.* (न्), वैरागिकः, वैराग्याश्रमी *m.*, वानप्रस्थः, संसारत्यागी *m.*, लोकत्यागी *m.*, सर्वसङ्गपरित्यागी *m.*

MONKEY, *s.* वानरः, कपिः *m.*, प्लवगः, प्लवङ्गः -ङ्गमः, मर्कटः, शाखामृगः, वृक्षचरः, झम्पी *m.* (न्), झम्पाकः, झम्पारुः *m.*, वनौकाः *m.* (स्), बलिमुखः, बलीमुखः, कलिप्रियः, कीशः, हनुमान् *m.* (त्), रामदूतः; 'Female monkey,' वानरी *f.*, मर्कटी; 'monkey-like,' कापेयः -यी -यं; 'monkey-tricks,' वानरचेष्टा, मर्कटचेष्टा.—(Iron weight) लोहभारः.

MONKISH, *a.* मुनिसम्बन्धी -न्धिनी &c., मुनिसदृशः -शी -शं.

MONOCHORD, *s.* एकतन्त्री *m.* (न्), एकतारी *m.* (न्), एकतन्त्रीवाद्यं.

MONOCULAR, MONOCULOUS, *a.* एकाक्षः -क्षा -क्षं, एकलोचनः -ना -नं, एकनेत्रः -त्रा -त्रं, काणः -णा -णं, एकाक्षिविकलः -ला -लं.

MONOGAMIST, *s.* एकपत्नीकः, एकभार्य्यकः, सकृद्विवाही *m.* (न्), अपुनर्विवाही *m.*, एकस्त्रीकः.

MONOGAMY, *s.* एकपत्नीव्रतं, एकभार्य्याव्रतं, एकस्त्रीविवाहः, सकृद्विवाहः, अपुनर्विवाहः.

MONOGRAM, *s.* परस्परसंयुक्तं नामाद्याक्षरं.

MONOLOGUE, *s.* आत्मभाषणं, आत्मगतभाषणं, स्वगतभाषणं, स्वसमीपभाषणं,

MONOMACHY, *s.* द्वन्द्वयुद्धं, द्वन्द्वं, द्वन्द्वायोधनं, नियुद्धं.

MONOMANIA, *s.* एकविषयोन्मादः, एकविषयविक्षेपः, एकविषयभ्रान्तिः *f.*

MONOMANIAC, *s.* एकविषयोन्मत्तः, एकविषयविक्षिप्तः, एकविषयभ्रान्तः.

MONOPETALOUS, *a.* एकदलकः -का -कं, एकदलविशिष्टः -ष्टा -ष्टं.

MONOPOLIST, MONOPOLIZER, *s.* (One who purchases the whole of a commodity) पूर्वक्रेता *m.* (तृ), पूर्वक्रयी *m.* (न्), सर्वभाण्डक्रेता, एकव्यवसायी *m.*—(One who takes the whole) पूर्वग्राहकः, सर्वग्राहकः.

To MONOPOLIZE, *v. a.* (Purchase the whole of a commodity with the view of selling at higher prices) अधिकमूल्यविक्रयबुद्ध्या सर्वभाण्डं पूर्वं क्री (c. 9. क्रीणाति -णीते, क्रेतुं) or सर्वपण्यद्रव्याणि पूर्वं क्री or सर्वद्रव्याणां पूर्वक्रयं कृ.—(Take or obtain the whole) सर्वं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or प्राप् (c. 5. -आप्नोति -आप्तुं), साकल्यं ग्रह् or पूर्वं ग्रह्.—(Have the sole right of dealing) एकव्यवसायं कृ, एकव्यापारं कृ, क्रयविक्रयाधिकारम् एकतो or असामान्येन धृ (c. 10. धारयति -यितुं).

MONOPOLIZED, *p. p.* पूर्वगृहीतः -ता -तं, पूर्वक्रीतः -ता -तं, पूर्वप्राप्तः &c.

MONOPOLY, *s.* एकव्यवसायः, एकव्यापारः, एकव्यवहारः, एकपणाया, एकवाणिज्यं, असामान्यव्यवहारः, एकप्रयोगः, असामान्यप्रयोगः, क्रयविक्रययोर् एकाधिकारः.

MONOSYLLABIC, *a.* एकाक्षरः -रा -रं, एकाक्षरी -रिणी -रि (न्).

MONOSYLLABLE, *s.* एकाक्षरं, एकाक्षरशब्दः, एकाक्षरविशिष्टः शब्दः.

MONOTHEISM, *s.* अद्वैतं, अद्वैतवादः, केवलेश्वरवादः, केवलेश्वरमतं.

MONOTHEIST, *s.* अद्वैतवादी *m.* (न्), अद्वयवादी *m.*, केवलेश्वरवादी *m.*

MONOTONOUS, *a.* (Having but one tone) एकस्वरः -रा -रं, एकतानः -ना -नं, एकस्वनः -ना -नं, समस्वरः -रा -रं, समानस्वरः -रा -रं, अनन्यस्वरः -रा -रं.—(Always the same, tediously uniform) एकरूपः -पा -पं, एकप्रकारः -रा -रं, समरूपः -पा -पं, समानरूपः -पा -पं, समसमानः -ना -नं, एकसारः -रा -रं, निर्विकारः -रा -रं, निर्विक्रियः -या -यं, अविशेषः -षा -षं, एकरङ्गी -ङ्गिणी &c.

MONOTONOUSLY, *adv.* एकस्वरेण, समस्वरेण, एकरूपेण, समरूपेण, समसमानं, निर्विकारं, अविकारेण.

MONOTONY, *s.* (Sameness of tone) एकस्वरः, स्वरैक्यं, स्वराभेदः, स्वरसमता, स्वरसमानता, समानस्वरत्वं, स्वरभेदाभावः.—(Dull uniformity)

एकरूपता, समरूपता, समसमानता, समानरूपता, एकव्यापारत्वं, समव्यापारत्वं, व्यापाराभेदः, विकाराभावः, विशेषाभावः.

Monsoon, *s.* (Rainy season) वृष्टिकालः, मेघागमः, मेघकालः, मेघसमयः, घनसमयः, पर्जन्यकालः, जलदागमः, प्रावृट्कालः.

Monster, *s.* (Something unnatural) अद्भुतं, अद्भुतविषयः, अद्भुतवस्तु *n.*, अपूर्वविषयः, महोद्भुतं.—(Something deformed) अपरूपवस्तु *n.*, विरूपविषयः, अपरूपं, अपरूपता, वैरूप्यं.—(A being enormously large or very frightful) राक्षसशरीरः, भीमशरीरः, विकटाकृतिः, विकटरूपः, घोररूपी *m.* (न्), सुवृहत्परिमाणः.—(Horribly wicked person) राक्षसः, रावणः, घोरकर्मा *m.* (न्).

Monstrosity, *s.* * *See* Monster.

Monstrous, *a.* (Unnatural, extraordinary, out of the course of nature) अद्भुतः -ता -तं, महोद्भुतः -ता -तं, अपूर्वः -र्वा -र्वं, विलक्षणः -णा -णं, विलक्षः -क्षा -क्षं, सृष्टिमार्गवहिर्गतः -ता -तं, सृष्टिरीतिवाह्यः -ह्या -ह्यं, सृष्टिक्रमवाह्यः &c.—(Deformed) अपरूपः -पा -पं, विरूपः -पा -पं.—(Enormously large) राक्षसशरीरः -रा -रं, अतिवृहच्छरीरः -रा -रं, विकटशरीरः &c., अतिमहान् -हती -हत् (त्), सुमहान् &c., अतिवृहन् -हती &c., सुवृहत्परिमाणः -णा -णं.—(Frightful) घोररूपी -पिणी &c., घोराकृतिः -तिः -ति, विकटाकारः -रा -रं, भीमदर्शनः -ना -नं, रौद्रदर्शनः &c., करालरूपः -पा -पं.—(Atrocious) दारुणः -णा -णं, अघोरः -रा -रं, विकटः -टा -टं.

Monstrously, *adv.* अद्भुतं, विकटं, दारुणं, भृशं, अतिशयं -येन, अतीव.

Monstrousness, *s.* अद्भुतता, अघोरता, घोरता, दारुणता, विकटता.

Month, *s.* मासः, मास् *m.*, पक्षद्वयं, पक्षयुगं, माधवं, यज्ञः, वर्षांशः, वर्षांङ्गः. The following are the twelve Hindu months, 1. चैत्रः, corresponding to the last half of March and the first half of April, 2. वैशाखः, April, May, 3. ज्येष्ठः, May, June, 4. आषाढः, June, July, 5. श्रावणः, July, August, 6. भाद्रः or भाद्रपदः, August, September, 7. आश्विनः or आश्वयुजः, September, October, 8. कार्तिकः, October, November, 9. मार्गशीर्षः, November, December, 10. पौषः, December, January, 11. माघः, January, February, 12. फाल्गुनः, February, March.—(Lunar month) चान्द्रमासः; 'half of a lunar month,' पक्षः; 'light or first half of the month,' शुक्लपक्षः, शुक्लपक्षः, सितपक्षः, पूर्वपक्षः, प्रथमपक्षः, देवपक्षः; 'dark or second half of the month,' कृष्णपक्षः, तमिस्रः, तमिस्रपक्षः, उत्तरपक्षः, अपरपक्षः, बहुलः; 'last day of the half-month,' पक्षान्तः, पक्षावसरः.—(Solar month) सौरमासः, सौरः; 'a month old,' मासजातः -ता -तं, मासीनः -ना -नं.

Monthly, *a.* मासिकः -की -कं, मासीनः -ना -नं, मास्यः -स्या -स्यं, प्रतिमासिकः -की -कं, मासानुमासिकः -का -कं; 'half-monthly,' आर्द्धमासिकः -की -कं, पाक्षिकः -की -कं; 'monthly allowance,' मासिकं.

Monthly, *adv.* प्रतिमासं, मासे मासे, मासि मासि, अनुमासं.

Monument, *s.* (Memorial) स्मरणार्थकचिह्नं.—(Tomb, monument to the dead) चित्यं, चैत्यं, चिताचूडकं, चैत्यः, स्तूपः, समाधिः *m.*

Monumental, *a.* (Memorial) स्मरणार्थकः -का -कं.—(Belonging to a tomb) चैत्यसम्बन्धी -न्धिनी -न्धि (न्).

Mood, *s.* (Temper of mind) वृत्तिः *f.*, चित्तवृत्तिः *f.*, मनोवृत्तिः *f.*, भावः, मनोभावः, प्रकृतिः *f.*, मनःस्थितिः *f.*, मनोवस्था; 'cheerful mood,' आनन्दवृत्तिः *f.*, हास्यवृत्तिः *f.*—(In grammar) वाच्यं, अर्थः.—(In logic) प्रकारः, रूपं.

Moodiness, *s.* उदासीनता, क्रोधशीलता, विषण्णता, कार्कश्यं, वक्रता.

Moody, *a.* क्रोधवशाद् उदासीनः -ना -नं or उदासवृत्तिः -त्तिः -त्ति or विषण्णः -ण्णा -ण्णं, क्रोधशीलः -ला -लं, उत्कण्ठितः -ता -तं, दीनमनाः -नाः -नः (स्), उद्विग्नमनाः &c., चिन्तोद्विग्नः -ग्ना -ग्नं, कर्कशभावः -वा -वं, वक्रभावः &c., रुष्टः -ष्टा -ष्टं.

Moon, *s.* चन्द्रः -न्द्रकः, चन्द्रमाः *m.* (स्), सोमः -मा *m.* (न्), इन्दुः *m.*, विधुः *m.*—(Marked like a hare or rabbit) शशी *m.* (न्), शशाङ्कः, शशधरः, शशभृत् *m.*, शशचिन्हः *m.*, शशलाञ्छनः.—(Marking the night) रजनीकरः, निशाकरः, क्षपाकरः, निशाकेतुः *m.*—(Lord of the night) निशापतिः *m.*, क्षपानाथः, यामिनीपतिः *m.*, निशीथिनीनाथः, रजनीनाथः.—(Gem of the night) राकामणिः *m.*, निशामणिः.—(Lord of the constellations) नक्षत्रनाथः, नक्षत्रपः, ऋक्षेशः, उडुपः, उडुपतिः, उडुराट् *m.* (ज्), दाक्षायिणीपतिः *m.*, ताराधिपतिः *m.*, भपतिः *m.*—(The repository and producer of nectar or ambrosia, which is supposed to be distilled in its rays) अमृतसूः *m.*, अमृतदीधितिः *m.*, अमृताधारः, अमृतभृत् *m.*, सुधानिधिः *m.*, सुधाधारः, सुधाभृतिः *m.*, सुधासूतिः *m.*, सुधांशुः, सुधाकरः, सुधाङ्कः, पीयूषरुचिः *m.*, पीयूषमहाः *m.* (स्), पीयूषनिधिः *m.*—(Having cool rays or radiance) शीतांशुः *m.*, शीतमयूखः, शीतमरीचिः *m.*, शीतभानुः *m.*, हिमांशुः *m.*, हिमकरः, हिमरश्मिः *m.*, हिमद्युतिः *m.*, शीतरुक् *m.* (च्), शीतगुः *m.*, हिमअंशुः, प्रालेयांशुः *m.*, तुहिनांशुः *m.*—(Having white rays or pale radiance) शुभांशुः *m.*, सितांशुः, सितरश्मिः *m.*, सितदीधितिः *m.*, श्वेतधामा *m.* (न्), श्वेतरोचीः *m.* (स), शुचिरोचीः *m.* (स्), छायाभृत् *m.*—(Marked like a deer) मृगाङ्कः, मृगविभुः *m.*, हरिणाङ्कः, हरिणकलङ्कः, मृगलाञ्छनः, मृगधरः, छायामृगधरः.—(Containing many digits) कलानिधिः *m.*, कलापूर्णः, कलावान् *m.* (त्), कलाभृत् *m.*, कलापतिः *m.*—(Forming the crest of Siva) शिवशेखरः, हरशेखरः, हरचूडामणिः *m.*—(Brother of Lakshmí, as having been reproduced with that goddess from the ocean when it was churned by the gods and asuras) लक्ष्मीसहजः, श्रीसहोदरः.—(Husband of Rohiní) रोहिणीपतिः *m.*, रोहिणीशः, रोहिणीवल्लभः.—(The butter of the ocean, or produced by the churning of the ocean) अभिनवनीतकः.—(Friend, companion or lord of the lotuses, many of these flowers opening their petals in the night and closing them in the day) कुमुदबान्धवः, कुमुदबन्धुः *m.*, कुमुदपतिः, कुमुदेशः, कुमुदप्रियः, कुमुदिनीपतिः *m.*, कुमुदिनीनायकः, अब्जः.—(Lord of plants or herbs) ओषधीनाथः, ओषधीपतिः *m.*, ओषधीशः.—(Drawn by white horses) श्वेतवाजी *m.* (न्), श्वेतवाहनः.—(Drawn by ten horses) दशवाजी *m.*—(Dispeller of darkness) तमोहरः, तमोनुद् *m.*, तमोनुदः, तमोघ्नः, तमोपहः, तिमिरारिपुः *m.*—(Regulating the days of the month) तिथिग्रहीः *m.*, तिथिः *m.* (Garlanded with stars) तारापीडः.—(King of kings) राजराजः.—(Broken-bodied, having been cut in two by the trident of Siva, as a punishment for having violated the wife of Vrihaspati) भग्नात्मा *m.*—(Lord of Brahmans) द्विजपतिः *m.*, द्विजराजः.—(Lord of the moonlight) कौमुदीपतिः *m.* Other names for the moon of less obvious derivation are शैवालः, द्यौः, कैरवी *m.* (न्), कलापिनी, हरिः *m.*, मास् *m.*, चन्द्रः; 'the autumnal moon,' शरच्चन्द्रः; 'orb or disk of the moon,' चन्द्रबिम्बः, चन्द्रमण्डलं, चन्द्रगोलः -लं; 'day of the moon,' तिथिः.

See LUNAR; 'digit of the moon,' चन्द्रकला, चन्द्ररेखा, इन्दुरेखा, चन्द्रलेखा; 'full moon,' पूर्णचन्द्रः, पूर्णिमा, पूर्णेन्दुः *f.* *See* FULL MOON; 'new moon,' नवशशी *m.* (न्), नवचन्द्रः, अमा, अमावसी, अमावासी, अमावस्या, अमावास्या, अमामसी, अदृष्टिचन्द्रः, दर्शः, सूर्येन्दुसङ्गमः, कुहूः *f.*, तिथिविशेषः, नष्टेन्दुकला; 'moon of the first quarter,' बालचन्द्रः; 'day of new moon,' मासान्तः; 'full or new moon, or the last day of a lunar fortnight,' चतुर्दशी, पक्षान्तः; 'the first day of the moon's increase or wane, or of a lunar fortnight,' प्रतिपद् *f.*; 'fortnight of the waxing moon,' शुक्लपक्षः, सितपक्षः, शुद्धपक्षः; 'fortnight of the waning moon,' कृष्णपक्षः, तमिस्रपक्षः, उडुरपक्षः; 'the full or change of the moon, or the junction of the 15th and 1st of a half-month,' पर्वसन्धिः *m.*, प्रतिपत्पञ्चदश्योरन्तरं; 'moon a little gibbous, or one digit less than full,' अनुमतिः *f.*, कलाहीनः; 'moon a little horned,' सिनीवाली; 'half moon,' चन्द्रार्धं; 'a false moon,' चन्द्राभासः; 'having a face like the moon,' चन्द्रमुखी *f.*, शशिवदना; 'rise of the moon,' चन्द्रोदयः; 'spot's on the moon's disk,' लाञ्छनं, कलङ्कः; 'the wife of the moon,' रोहिणी, चन्द्रकान्ता.

MOON-BEAM, *s.* चन्द्रपादः, शशिपादः, चन्द्रकिरणः, चन्द्ररश्मिः *m.*, शशिकिरणः, शशिकरः, शशिमयूखः, अंशुः *m.*, सोमांशुः *m.*, चन्द्रांशुः *m.*, चन्द्रिका, चन्द्ररोचिः *m.*, पूर्णानकं.

MOONLESS, *a.* चन्द्रहीनः -ना -नं, शशिहीनः &c., नष्टचन्द्रः -न्द्रा -न्द्रं.

MOONLIGHT, *s.* चन्द्रप्रभा, शशिप्रभा, चन्द्रप्रकाशः, चन्द्रिका, चन्द्रिमा, ज्योत्स्ना, चन्द्रज्योतिस् *n.*, चन्द्रातपः, चन्द्रगोलिका, कौमुदी, चन्द्रशाला, दीपिका, चान्द्री, मालती, तुहिनं, अमृततरङ्गिणी, कैरवी, हरिचन्दनं, मुदी, चन्द्रकः.

MOONLIGHT, *a.* ज्योत्स्नः -त्स्नी -त्स्नं, ज्योत्स्नायुक्तः -क्ता -क्तं; 'a moonlight night,' ज्योत्स्नी, ज्यौत्स्नी -त्स्निका.

MOON-PLANT, *s.* चन्द्रवल्लरी, सोमवल्लरी -रिः *f.*, सोमवल्लिका, सोमलता, सोमः, वयस्था, वयःस्था, ब्रह्मी, ब्राह्मी, मत्स्याक्षी.

MOONSHINE, *s.* चन्द्रप्रभा, चन्द्रद्युतिः *f.*, चन्द्रदीप्तिः. *See* MOONLIGHT.

MOON-STONE, MOON-GEM, *s.* चन्द्रकान्तः, चन्द्रमणिः *m.*, सोमकान्तः, चन्द्रोपलः, चन्द्रिकाश्मा.

MOONSTRUCK, *a.* विक्षिप्तबुद्धिः -द्धिः -द्धि, विप्लुतबुद्धिः &c., हृतबुद्धिः &c.

MOONY, *a.* अर्धचन्द्रध्वजाङ्कितः -ता -तं, अर्धचन्द्रध्वजविशिष्टः -ष्टा -ष्टं.

MOOR, *s.* जङ्गलभूमिः *f.*, खिलभूमिः *f.*, अनूपभूः *f.*, कच्छः, कच्छभूः.

To MOOR, *v. a.* रज्जुना or रज्ज्वा नौकां बन्ध् (c. 9. बध्नाति, बन्धुं).

MOORED, *p. p.* रज्जुना or गुणेन बद्धः -द्धा -द्धं, रज्जुबद्धः &c.

MOOR-LAND, *s.* अनूपभूमिः *f.*, कच्छभूमिः *f.*, खिलभूः *f.* *See* MOOR.

MOORY, *a.* जलूषः -षा -षं, जानूषः -षी -षं, कच्छः -च्छा -च्छं, खिलः -ला -लं.

MOOSE, *s.* (Kind of deer) शल्लकः, सल्लकः.

To MOOT, *v. a.* (Discuss) विचर् (c. 10. -चारयति -यितुं), वितर्क् (c. 10. -तर्कयति -यितुं), विवद् (c. 1. -वदति -ते -दितुं), विवादास्पदीकृ, विचारास्पदीकृ, वितर्कास्पदीकृ.—(Bring forward) उपन्यस् (c. 4. -अस्यति -अस्तुं).

MOOT, MOOT-CASE, MOOT-POINT, *s.* विचारविषयः, विचारपदं, विचारास्पदं, विचारस्थलं, विवादास्पदं, विवादविषयः, सन्दिग्धविषयः, अनिष्पन्नविषयः, अनिश्चानः.

MOOTED, *p. p.* विचारितः -ता -तं, वादग्रस्तः -स्ता -स्तं, विचारास्पदीकृतः &c.

MOP, *s.* मार्जनी, सम्मार्जनी, शोधनी, विमार्गः, परिष्कारकः.

To MOP, *v. a.* [illegible] (c. 10. मोपयति -यितुं).

To MOPE, *v. n.* विषद् (c. 1. -सीदति -ते -दितुं), अवसद्, उदासद् (c. 2. -आस्ते -आसितुं), विषीद्, उद्विग्नीभू, [illegible] (Den. दुर्मनायते). उन्मनस्, हृ (c. 1. हरति, हर्तुं).

MOPING, MOPISH, *a.* विषण्णः -ण्णा -ण्णं, अवसन्नः -न्ना -न्नं, उदासीनः -ना -नं, उद्विग्नः -ग्ना -ग्नं (-ग्नः) उद्विग्नमनाः &c., अनमनाः &c.

MOPPET, MOPSEY, *s.* पटपुत्रिका, वस्त्रपुत्रिका, वस्त्रखण्डमयी पुत्तलिका.

MORAL, *a.* (Virtuous) सदाचारः -रा -रं, सदाचारी -रिणी -रि (न्), धार्मिकः -की -कं, धर्माचारी &c., धर्मशीलः &c., साधुः -धुः -ध्वी -धु, साधुवृत्तः -त्ता -त्तं, सुचरितः -ता -तं, सच्चरितः -तां -तं, साध्वाचारः -रा -रं, धर्म्यः -र्म्या -र्म्यं, धर्मी &c., सुधर्मा -र्म्मा -र्म्म (न्), धर्मभृत् *m. f. n.*, न्यायाचारः &c., वृत्तवान् -वती -वत् (तं), सच्छासनी &c., पुण्यः -ण्या -ण्यं, सात्त्विकः -की -कं, नीतिमान् &c.—(Relating to the practice of men, or to actions good or evil) लोकव्यवहारसम्बन्धी &c., लोकाचारविषयकः -का -कं, सदसदाचारसम्बन्धी &c., सदसद्व्यवहारविषयः -या -यं, विधिनिषेधान्वितः -ता -तं.—(Subject to moral laws, bound by precepts and prohibitions) विधिनिषेधाधीनः -ना -नं, विधिनिषेधायत्तः -त्ता -त्तं, विधिनिषेधवान् &c., नियमाधीनः &c.—(Supported by reason or probability, founded on experience) अनुमानसिद्धः -द्धा -द्धं, युक्तिसिद्धः &c., आनुमानिकः -की -कं, यौक्तिकः -की -कं, अनुभूतिसिद्धः &c., युक्तिभाव्यः -व्या -व्यं, अनुमानमूलः -ला -लं; 'moral philosophy,' नीतिशास्त्रं, नीतिविद्या, व्यवहारशास्त्रं, नीतिः *f.*

MORAL, *s.* (Moral doctrine taught by a fiction) तात्पर्यं, तात्पर्यार्थः, अभिप्रायः, भावार्थः, तात्त्विकं, ध्वनितार्थः, गर्भः.

MORALIST, *s.* (Teacher of moral duties) नीतिशास्त्रोपदेशकः, नीत्युपदेष्टा *m.* (ष्टृ), नीतिशिक्षकः, धर्मोपदेशी *m.* (न्), नीतिविवेचकः, सदसद्विवेचकः, नीतिशास्त्रज्ञः, नीतिविद्वान्, कर्तव्याकर्तव्योपदेशकः.—(Mere moral person) नीतिमार्गैकशीलवी *m.*, केवलनीतिमार्गाश्रयी.

MORALITY, *s.* (System of moral duties) नीतिः *f.*, नीतिविद्या, नीतिशास्त्रं, व्यवहारशास्त्रं, नयः, नयविद्या, नयशास्त्रं, अर्थशास्त्रं, विनयविद्या, शीलविद्या, सदसद्विचारः, सदसद्विवेकः, कर्तव्याकर्तव्यविचारः, कर्तव्याकर्तव्यविवेकः; 'as invented by Vrihaspati,' बार्हस्पत्यं.—(Practice of moral duties, virtue) धर्मानुष्ठानं, धर्माचरणं, धर्माचारता, धर्मः, धर्मत्वं, सदाचारत्वं, सच्चरितं, सुचरितं, साधुशीलता, पुण्यता, पुण्यशीलत्वं, साधुवृत्तं.—(Conformity to the principles of rectitude) धर्मानुसारित्वं, न्यायानुसारः, न्यायः, धर्म्यता, धर्मत्वं.

To MORALIZE, *v. a.* (Apply to the purposes of moral instruction) हितोपदेशास्पदीकृ, धर्मोपदेशास्पदीकृ, नीतिशिक्षास्पदीकृ.

To MORALIZE, *v. n.* (Make moral reflections) हितोपदेशं कृ, धर्मोपदेशं कृ, नीत्युपदेशं कृ, हितोपदेशं लिख् (c. 6. लिखति, लेखितुं).

MORALIZER, *s.* हितोपदेशकः, धर्मोपदेष्टा *m.* (ष्टृ), नीतिशिक्षकः.

MORALLY, *adv.* (According to the rules of morality) नीतिशास्त्रतस्, नीतिशास्त्रवत्, नीत्या, नीतितस्.—(Virtuously) धर्म्येण, धर्मतस्, न्यायतस्.—(According to reason or the usual course of things) अनुमानेन, युक्त्या, अनुमानतस्, युक्तितस्, यथासम्भवं.

MORALS, *s.* (System of morality) नीतिः *f.*, नीतिशास्त्रं, नीतिविद्या. *See* MORALITY. (Conduct) आचारः, आचरणं, आचरितं, चरितं, व्यवहारः, वृत्तिः *f.*, प्रवृत्तिः *f.*, वृत्तं, रीतिः *f.*; 'good morals,' विनयः, सदाचारः, सच्चरितं, सुचरितं, साधुचरितं, शीलः, सुशीलः.

MORASS, s. [illegible]

MORBID, a. अस्वस्थः -स्था -स्थं, असुस्थः &c., रोगी -गिणी -गि (न्), रोगवान् -वती -वत् (त्), रोगयुक्तः -क्ता -क्तं; विकारी &c., विकृतः -ता -तं, आधितः -ती -तं.

MORBIDNESS, s. अस्वास्थ्यं, असुस्थता, रोगवत्ता, रोगितत्वं.

MORBIFIC, MORBIFICAL, a. रोगजनकः -का -कं, रोगकरः -री -रं, अस्वास्थ्यजनकः &c., व्याधिकरः -री -रं, अनारोग्यकरः &c., रोगदः -दा -दं.

MORBOSE, a. रोगाक्रान्तः -न्ता -न्तं, रोगजः -जा -जं, असुस्थः -स्था -स्थं.

MORDACIOUS, a. दंशकः -का -कं, दंशनकारी -रिणी -रि (न्).

MORDACITY, s. दंशकता, दंशनशीलता, दंशनं, दंशनगुणः.

MORDICANT, a. खादकः -का -कं, अरुन्तुदः -दी -दं, दंशकः &c.

MORE, a. अधिकः -का -कं, अधिकतरः -रा -रं, अधिकसंख्यकः -का -कं, भूयान् -यसी -यः (स्), भूयिष्ठः -ष्ठा -ष्ठं, उत्तरः -रा -रं, अतिरेकी -किणी -कि (न्), अतिरिक्तः -क्ता -क्तं, परः -रा -रं, परतरः -रा -रं; often expressed by the comparative affixes तर and ईयस्; as, 'more in number,' बहुतरः -रा -रं, बंहीयान् &c.; 'more or less,' न्यूनाधिकः -का -कं, न्यूनातिरेकः -का -कं; 'more than a thousand,' परःसहस्रः -स्रा -स्रं; 'more than a hundred,' परं शतं.

MORE, s. आधिक्यं, अधिकता, अतिरेकः, अतिरिक्तता, उद्रेकः, आतिशय्यं; 'more or less,' न्यूनाधिक्यं, न्यूनातिरेकः, न्यूनातिरिक्तं; 'neither more nor less,' अन्यूनानतिरिक्तं; 'no more,' कृतं, अलं with inst. c.; as, 'no more of this ceremony!' कृतम् आदरेण, अलम् आदरेण; 'what more need I say?' किम् अन्यत्, किम् बहुना.

MORE, *adv.* अधिकं, अधिकतरं, भूयस्, भूयिष्ठं, अतिरिक्तं, परं; or often expressed by the comparative affixes तर and ईयस्; as, 'more heavy,' गुरुतरः -रा -रं, गरीयान् -यसी -यः (स्); 'more and more,' उत्तरोत्तरं, अधिकाधिकं; 'how much more?' किम्पुनर्, किमुत, सुतरां.—(Any more, again) पुनर्, भूयस्.

MOREOVER, *s.* अपिच, अपरञ्च, अपरं, परं, परञ्च, परन्तु, अपरन्तु, अन्यच्च, किञ्च, अधिकन्तु, अधिकं, पुनश्च, अपितु, अपि, अथ.

MORIBUND, *a.* मुमूर्षुः -र्षुः -र्षु, मृतकल्पः -ल्पा -ल्पं, मृतप्रायः -या -यं.

MORINGA, *s.* *See* MORUNGA.

MORION, *s.* शिरस्त्रं, शिरस्त्राणं, शिरस्कं, मस्तकरक्षणी, शीर्षकं.

MORN, MORNING, *s.* प्रभातं, प्रातःकालः, प्रातःसमयः, प्रभातकालः, प्रत्यूषकालः, प्रत्यूषः, प्रत्यूषस् *n.*, प्रत्युषः, प्रत्युषस् *n.*, उषः, उषस् *n.*, उषाकालः, विभातं -तकं, भातः, युष्टं, अरुणः, अरुणोदयः, कल्यं, काल्यं, अह्नमुखं, दिवसमुखं, दिनारम्भः, दिनादिः *m.*, निशावसानं, निशान्तः -न्तं, क्षपान्तः, रात्रिविगमः, प्राचीधिकः, वासरसङ्गः.—(As opposed to afternoon) पूर्वाह्णः or पूर्वाह्णः, प्राह्णः, पूर्वाह्णकालः, प्राह्णकालः; 'in the morning,' प्रातर्, प्रभाते, प्रातःकाले, प्रभातकाले, प्रत्यूषे, उषा, प्रगे, प्राह्णे, पूर्वाह्णे, निशान्ते, पूर्वेद्युस्; 'to be chanted in the morning,' प्रातर्गेयः -या -यं; 'early in the morning,' सुप्रातर्, अतिप्रभाते, अतिप्रगे; 'to-morrow morning,' श्वः प्रभाते; 'good morning,' सुप्रभातं; 'morning, noon, and evening,' त्रिकालं.

MORNING, *a.* प्रातर् in comp., प्रातःकालीनः -ना -नं, प्रातःकालिकः -की -कं, प्रभातीयः -या -यं, प्राभातिकः -की -कं, प्रगेतनः -नी -नं, प्राह्णेतनः -नी -नं, पूर्वाह्णेतनः -नी -नं, उषस्यः -स्या -स्यं, औषिकः -की -कं, औषसः -सी -सं, वैयुष्टः -ष्टी -ष्टं; 'morning duties,' प्रातःकृत्यं; 'morning ablution,' प्रातःस्नानं; 'morning meal,' प्रातराशः, प्रातर्भोजनं.

MORNING-GOWN, *s.* प्रातःकाले भृतो लघुप्रावारः, प्रातर्वसनं, प्रातर्वस्त्रं.

MORNING-STAR, *s.* प्रभातसूचकतारा, प्रभाततारा, शुक्रः.

MORNING-TWILIGHT, *s.* प्रातःसन्ध्या, प्राक्सन्ध्या, पूर्वसन्ध्या, प्रभातसन्ध्या.

MOROSE, *a.* कर्कशस्वभावः -वा -वं, कटुस्वभावः -वा -वं, कर्कशभावः -वा -वं, कर्कशशीलः -ला -लं, वक्रभावः -वा -वं, सदावक्रः -क्रा -क्रं, रूक्षस्वभावः -वा -वं, नैकृतिकः -की -कं, प्रतीपः -पा -पं, उदासीनः -ना -नं, उदासवृत्तिः -त्तिः -त्ति, अरुन्तुदः -दा -दं, दुःशीलः -ला -लं, वामशीलः &c.

MOROSELY, *adv.* कर्कशस्वभावात्, कटुस्वभावात्, कर्कशं, कार्कश्येन, वक्रभावेन, सदावक्रवत्, दुःशीलत्वात्, रूक्षस्वभावात्.

MOROSENESS, *s.* कार्कश्यं, कर्कशता, कर्कशशीलता, कटुता, कटुशीलता, दुःशीलता, दौःशील्यं, वक्रता, वक्रशीलता, स्वभाववक्रता, स्वभावकार्कश्यं, स्वभावकटुता, उदासीनता, उदासवृत्तित्वं, प्रतीपता, वामशीलता, नैकृतिः *f.*, शुक्लता.

MORROW, *s.* (The day next after the present) परदिवसः, परदिनं, अस्तनदिवसः, आगामिदिवसः, कल्यं; 'to-morrow, on the morrow,' श्वस्, परेद्युस्, परदिने, परदिवसे, परेद्यवि, कल्ह्नि, कल्ये, अन्येद्युस्.—(The next day subsequent to any day) उत्तरदिवसः, उत्तरदिनं, उत्तरेद्युस्; 'the day after to-morrow,' परश्वस्; 'to-morrow morning,' श्वः प्रभाते.

MORSEL, *s.* (Mouthful, small piece of food) ग्रासः, पिण्डः, कवलः; 'a morsel as big as an egg,' अण्डपरिमाणो ग्रासः.—(Piece, bit) खण्डः -डकः, क्षुद्रभागः, लवः, शकलः, भिल्लं, भिल्लं, भिल्लिः *f.*; 'a dainty morsel,' सुग्रासः.

MORSURE, *s.* दंशनं, विदंशनं, दंशः, दंशकरणं.

MORTAL, *a.* (Subject to death) मरणाधीनः -ना -नं, मर्त्यः -र्त्या -र्त्यं, मरणीयः -या -यं, नाशाधीनः -ना -नं, कालाधीनः -ना -नं, मृत्युधीनः -ना -नं, मरणधर्मकः -का -कं, मृत्युधर्मकः -का -कं, मृत्युवशः -शा -शं, मरणवशः &c., अनवान् -वती -वत् (त्), अनित्यः -त्या -त्यं.—(Deadly) प्राणघातकः -का -कं, प्राणहरः -रा -रं, प्राणान्तिकः -की -कं, प्राणान्तकः &c., जीवान्तकः &c., प्राणहारी -रिणी -रि (न्), प्राणनाशकः -का -कं, मारात्मकः -का -कं, मृत्युजनकः -का -कं, मर्म्मभेदी -दिनी &c., मर्म्मान्तिकः &c., अन्तकरः -रा -रं.—(Belonging to man, human) मानुषः -षी -षं -षिकः -की -कं, मनुष्यजातीयः -या -यं, मनुष्यधर्म्मकः -का -कं, पौरुषेयः -यी -यं; 'mortal state,' मानुषदशा.

MORTAL, *s.* (A human being) मर्त्यः, मनुष्यः, मानुषः, मानवः, प्राणी *m.* (न्), प्राणभृत् *m.*, जन्मी *m.* (न्), जन्मवान् *m.*, शरीरी *m.*, देही *m.*, देहभृत् *m.*, तनुभृत् *m.*, चेतनः, मृत्युपार्श्वं, मरणपार्श्वं.

MORTALITY, *s.* (Subjection to death) मरणाधीनता, मर्त्यता, मृत्युवश्यता, नाशाधीनता, मृत्युधर्म्मः, मरणधर्म्मः, अनित्यता.—(Human nature) मनुष्यता -त्वं, मानुष्यं, मानुषत्वं -ता, पुरुषता.—(Death, death of great numbers) मृत्युः *m.*, मरणं, अन्ययः, नाशः, बहुनाशः, बहुजननाशः.

MORTALLY, *adv.* प्राणनाशेन, प्राणघातेन, सनाशं, सप्राणघातं, सप्राणनाशं; 'mortally wounded,' भिन्नमर्म्मा -र्म्मी -र्म्म (न्).

MORTAR, *s.* (Vessel in which substances are pounded) उलूखलं, उदूखलः -लं, उदूखलं; 'pestle and mortar,' उलूखलमुषले. 'pounded in a mortar,' उलूखलिकः -की -कं.—(Cement) सुधा, लेपः, विलेपः, चूर्णलेपः, कर्करलेपः, उदपेषः; 'very hard,' वज्रलेपः.

MORTGAGE, *s.* आधिः *m.*, स्थावराधिः *m.*, क्षेत्राधिः, स्थावरबन्धाधिः *m.*, आधानं, आधमनं, क्षेत्रन्यासः, स्थावरबन्धन्यासः, भूमिन्यासः, उपन्यासः, स्थावरबन्धकः, बन्धकः, उपनिधिः *m.*, भूमिनिक्षेपः.

To MORTGAGE, *v. a.* आधीकृ, क्षेत्रादि स्थावरबन्धं न्यस् (c. 4. -न्यस्यति

-अर्पितुं) or निधिप् (c. 6. -धिपति-धेतुं), न्यासं दा, बन्धकं दा, न्यासीकृ.

Mortgaged, *p. p.* आधीकृतः -ता -तं, न्यासीकृतः -ता -तं, न्यस्तः -स्ता -स्तं, उपन्यस्तः &c.; 'to be mortgaged,' आधेयः -या -यं.

Mortgagee, *s.* आधिधारी *m.* (न्), न्यासधारी *m.* (न्), आधियाही *m.* (न्), बन्धकग्राही *m.*, बन्धकधारी *m.*, आधिग्राहकः.

Mortgager, *s.* आधिदाता *m.* (तृ), बन्धकदाता *m.*, आधीकर्ता *m.* (र्तृ).

Mortiferous, *a.* मृत्युजनकः -का -कं, मरणावहः -हा -हं, प्राणघातकः &c.

Mortification, *s.* (In surgery, local extinction of life) मांसनाशः, मांसातिपाकः, मांसपाकः, चेतनानाशः, जीवित्वनाशः, मांसक्लोथः, मांसविद्रधिः *m.*, मांसपूतिः *f.*—(Subjugation of the passions and appetites) दमः, दाम्निः *f.*, दमनं, संयमः -मनं, इन्द्रियदमः, इन्द्रियजयः, इन्द्रियपराजयः, इन्द्रियसंयमनः, जितेन्द्रियत्वं, इन्द्रियवशीकरणं, कामावसायः, वीतकामत्वं, विषयपराङ्मुखता.—(By penance, &c.) तपस्, तपश्चर्या, तपस्या, कृच्छ्रं, कायक्लेशः, वैराग्यं.—(Humiliation, vexation) अभिभवः, अभिभूतिः *f.*, मानभङ्गः, मानखण्डनं, अभिमानखण्डनं, मानहानिः *f.*, तेजोभङ्गः, दर्पभङ्गः, अपकर्षः -र्षणं, व्यथा, दुःखं, क्लेशः, विडम्बना.—(Disappointment) आज्ञाभङ्गः, मनोभङ्गः, आशानाशः, इच्छानाशः, इच्छाविनाशः, इच्छाक्षयः, उत्साहभङ्गः.

Mortified, *p. p.* (In surgery) नष्टमांसः -सा -सं, नष्टचेतनः -ना -नं, क्लोथवान् -वती -वत् (त्), अतिपक्वः -क्वा -क्वं.—(Subdued) दान्तः -न्ता -न्तं, दमितः -ता -तं, संयमितः -ता -तं, वशीकृतः -ता -तं, जितः -ता -तं; 'one whose passions are mortified,' जितेन्द्रियः, यतेन्द्रियः, संयतेन्द्रियः, वीतकामः, वीतरागः, वीतस्पृहः, विरक्तः, वैरागी *m.* (न्), जितकामः, जितकामक्लोधादिः *m.*—(Humiliated, vexed) अभिभूतः -ता -तं, पराभूतः -ता -तं, खण्डितः -ता -तं, भग्नमानः -ना -नं, क्लिष्टः -ष्टा -ष्टं, सन्तप्तः -प्ता -प्तं, उद्विग्नः -ग्ना -ग्नं, विडम्बितः -ता -तं.

To Mortify, *v. a.* (Destroy the vitality of) जीवित्वं or चैतन्यं नश् (c. 10. नाशयति -यितुं), चेतनानाशं कृ, चैतन्यनाशं कृ.—(Subdue) दम् (c. 10. दमयति -यितुं), वशीकृ, जि (c. 1. जयति, जेतुं), पराजि; 'one's passions,' इन्द्रियाणि दम्, इन्द्रियदमनं कृ; 'the body,' शरीरक्लेशं कृ.—(Humble) अभिभू, अपकृष् (c. 1. -कर्षति -क्रष्टुं), मानं भञ्ज् (c. 7. भनक्ति, भङ्क्तुं) or खण्ड् (c. 10. खण्डयति -यितुं), अभिमानखण्डनं कृ, मानविध्वंसं कृ.—(Vex) क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), व्यथ् (c. 10. व्यथयति -यितुं), तप् (c. 10. तापयति -यितुं).

To Mortify, *v. n.* (Lose vitality, as flesh) नष्टचैतन्यः -न्या -न्यं भू, नष्टजीवितः -ता -तं भू, नष्टमांसः -सा -सं भू, मांसिकदेशे पूतीभू, क्लोथीभू.—(Practise austerities) तप् (c. 4. तप्यते), तपस् तप्, तपस् (nom. तपस्यति), तपश्चर्यां कृ, वैराग्याचरणं कृ, शरीरक्लेशं कृ, ब्रह्मचर्यं कृ.

Mortifying, *a.* मानभङ्गकः -का -कं, दर्पभङ्गकः &c., व्यथाकरः -रा -रं.

Mortise, *s.* काष्ठछिद्रं, काष्ठसन्धिः *m.*, काष्ठग्रहणी, काष्ठधरणी, दारुछिद्रं, दारुग्रहणं, काष्ठग्रहणं, काष्ठरन्ध्रं.

To Mortise, *v. a.* अन्यकाष्ठधरणार्थम् एककाष्ठायं छिद् (c. 7. छिनत्ति, छेत्तुं), काष्ठद्वयसन्धानं कृ, काष्ठद्वयं सन्धा (c. 3. -दधाति -धातुं).

Mortmain, *s.* अन्यादेयभोगः, परादेयभोगः, अदेयभोगः.

Morunda, *s.* (Plant) शोभाञ्जनः, शोभनकः, शोभाञ्जनः, सोभाञ्जनः, शिग्रुः *m.*, मोचागन्धः -न्धकः, अक्षीवः, काक्षीवः, काक्षीवः, मोचकः; 'its root,' शिग्रुमूलं; 'seed,' शिग्रुजं, शिग्रुबीजं.

Mosaic, *a.* नानावर्णप्रस्तरखचितः -ता -तं, नानाविधप्रस्तरकुरितः -ता -तं, नानावर्णद्रव्यप्रतिष्ठितः &c.; 'mosaic work,' चित्रकर्मन् *n.* (न्).

Mosque, *s.* यावनधर्मगृहं, यावनधर्ममन्दिरं, यावनप्रासादः.

Moss, *s.* शिलापत्रं, शैवलः, शैवालः, शेवलः, शेवालः, शेपालः, शैवं, कावारं, सूकरी, शूकरी, शूकराक्रान्ता, वराहक्रान्ता.

Moss-grown, *a.* शैवलावृतः -ता -तं, शैवलाच्छादितः -ता -तं, रूढशैवलः &c.

Mossy, *a.* शैवालमयः -यी -यं, सशैवालः -ला -लं, शैवालयुक्तः -क्ता -क्तं, शैवालिकः -का -कं, शेवालविशिष्टः -ष्टा -ष्टं, शैवली -लिनी -लि (न्).

Most, *a.* भूयिष्ठः -ष्ठा -ष्ठं, अधिकतमः -मा -मं, अधिकतरः -रा -रं, अधिकः -का -कं, अधिकसंख्यकः -का -कं, परमः -मा -मं, उत्तमः -मा -मं; 'the most part,' भूयान् -यसी -यः (स्), भूयिष्ठः &c., बहुतरः -रा -रं, बहुतमः -मा -मं; 'for the most part,' भूयिष्ठं, प्रायस्, प्रायशस्, बाहुल्येन, बहुशस्.

Most, *adv.* भूयिष्ठं, अधिकं, अधिकतरं, अधिकतमं, भूयस्, परमं; often expressed by the superlative affixes तम and इष्ठ, as, 'most excellent,' श्रेष्ठतमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं; 'most heavy,' गुरुतमः -मा -मं, गरिष्ठः &c., or by अति or सु or अत्यन्त or अतिशय prefixed; as, 'most powerful,' अतिबलवान् &c.

Most, *s.* अधिकभागः, भूयिष्ठभागः, परभागः, परमभागः, बहुतरभागः, बहुतमभागः, अधिकपक्षः, उत्तमभागः, उत्तमपक्षः, अधिकांशः.

Mostly, *adv.* भूयिष्ठं, प्रायस्, प्रायशस्, प्रायेण, बहुशस्, बाहुल्येन, बहुधा, भूयस्, सामान्यतस्, बहुतरं, साधारण्येन.

Mote, *s.* अणुः *m.*, अणुरेणुः *m.*, त्रसरेणुः *m. f.*, रिक्षा, लिक्षा, कणः, कणिका, पारिमाण्डल्यं, अणुरेणुजालं, जालसूर्यमरीचिस्थं रजस्, जालकान्तरप्रविष्टादित्यरश्मिस्थितं यद्रजस्, ध्वंसी *m.* (न्), समागमः.

Moth, *s.* पतङ्गः, पतङ्गमः, पतङ्गिका, झल्लभः, शरभः, कीटः; 'moth-like,' झाल्लभः -भी -भं.

Moth-eaten, *a.* कीटभक्षितः -ता -तं, कीटखादितः -ता -तं.

Mother, *s.* माता *f.* (तृ), जननी, जनयित्री, जनिका, प्रजनिका, प्रजायिनी, प्रसविनी, प्रसवित्री, प्रसवकर्त्री, प्रसूः *f.*, सूः *f.*, अम्बा, अम्बिका, अम्बालिका, अम्बी, प्रसवस्थली, धात्री, मा, उत्पादिका; 'mother of a son or of offspring,' पुत्रिणी, पुत्रवती, सुतिनी, सुतवती, प्रजावती, अपत्यवती; 'of one child,' एकोदरा; 'of seven children,' सुतवस्करा; 'who has recently had a child,' प्रसूतिका, सूतिका, प्रसूता; 'step-mother,' विमाता *f.* (तृ), सपत्नी माता; 'mother-in-law,' श्वश्रूः *f.*; 'mother and father,' मातापितरौ *m.* du., मातरपितरौ; 'mother of a hero,' वीरप्रसविनी; 'mother's house,' मातृगृहं; 'mother's family,' मातृकुलं; 'born of a different mother,' भिन्नोदरः -रा -रं, अन्योदरः &c., असोदरः &c.

Mother, *a.* (Native) स्वाभाविकः -की -कं, साहजिकः -की -कं, सहजः -जा -जं, जन्म or जाति in comp.; as, 'mother-tongue,' जन्मभाषा, जातिभाषा; 'mother-country,' जन्मभूमिः *f.*

Mother-in-law, *s.* श्वश्रूः *f.*, गुरुपत्नी; 'mother and father in law,' श्वश्रूश्वशुरौ *m.* du.

Mother-of-pearl, *s.* शुक्तिवधूः *f.*, शुक्तिपुटं, मुक्तास्फोटः, मुक्तागारं.

Motherhood, *s.* मातृत्वं -ता, जननीत्वं, मातृभावः, पुत्रिणीत्वं, सुतिनीत्वं.

Motherless, *a.* अमातृकः -का -कं, मातृहीनः -ना -नं, मृतमातृकः &c., मातृरहितः -ता -तं, गतमातृकः -का -कं, हीनमातृकः &c.

Motherly, *a.* मातृसदृशः -शी -शं, मातृकल्पः -ल्पा -ल्पं, मातृतुल्यः -ल्या -ल्यं, मातृकः -का -कं, मातृ in comp.

Motherly, *adv.* मातृवत्, मातृरूपेण, मातृभावेन, मातृधर्मानुसारेण.

Motion, *s.* गतिः *f.*, गमनं, चलनं, चारः, चरणं, सञ्चरणं, सरणं, सोपनं, क्षेलितं, क्षेलिका; 'swift motion,' त्वरितगतिः *f.*; 'slow motion,' मन्दगतिः *f.*, मन्दगमनं; 'backward motion,' विपरीतगतिः *f.*—(Animal action) चेष्टा, चेष्टितं.—(Gesture) इङ्गितं, इङ्गः, अङ्ग-

विक्षेपः, आङ्गिकचेष्टा.—(Agitation) क्षोभः, अन्तःक्षोभः, वेगः.—(Impulse, feeling) वेगः, मनोवेगः, मनोवृत्तिः *f.*, मनोविकारः, रागः, चित्तरागः, चित्तक्षोभः, भावः, वासना, बुद्धिः *f.*, कल्पना, रसः.—(Proposition made) कर्त्तव्योपन्यासः, उपन्यासः, कर्त्तव्यसूचकवाक्यं, वाक्यं.—(Stool) रेकः, रेचनं -ना, उच्चारः, उच्चरितं; 'to put in motion,' चल् (c. 10. चालयति -यितुं).

To MOTION, *v. a.* इङ्गितं कृ, सङ्केतं कृ, अङ्गविक्षेपं कृ, अङ्गसञ्चालनं कृ.

MOTIONLESS, *a.* अचलः -ला -लं, निश्चलः -ला -लं, निश्चेष्टः -ष्टा -ष्टं, अचेष्टः &c., निश्चेष्टः &c., गतिहीनः -ना -नं, गतिशून्यः -न्या -न्यं, निष्क्रम्यः -म्या -म्यं, अस्पन्दः -न्दा -न्दं, निष्पन्दः &c., स्थिरः -रा -रं, स्तब्धः -ब्धा -ब्धं, अगतिकः -का -कं, सन्नः -न्ना -न्नं.

MOTIVE, *a.* (Causing motion, &c.) चालकः -का -कं, प्रवर्त्तकः -का -कं, सञ्चारकः -का -कं, प्रयोजकः -का -कं, व्यापारी -रिणी -रि (न्), हेतुकः -का -कं, कारणिकः -की -कं.

MOTIVE, *s.* (That which incites to action, cause) प्रयोजनं, हेतुः *m.*, कारणं, निमित्तं -त्तकं, प्रवृत्तिनिमित्तं, प्रवर्त्तकं, प्रयोजकं, प्रयोगः, उत्तेजनं, उत्तेजकं, निदानं, निबन्धनं, कार्य्यं; 'without motive,' अकस्मात्, निष्प्रयोजनं, असति प्रयोजने, अकारणात्, हेतुना विना; 'relation between the motive and the effect,' प्रयोज्यप्रयोजकभावः.

MOTLEY, *a.* चित्रविचित्रः -त्रा -त्रं, नानाविधः -धा -धं, नानाप्रकारः -रा -रं, नानावर्णः -र्णा -र्णं, नानारूपः -पा -पं, भिन्नरूपः -पा -पं, नानारङ्गी -ङ्गिणी -ङ्गि (न्), बहुरङ्गी &c., विविधः &c.

MOTOR, MOTORY, *a.* चालकः -का -कं, सञ्चारकः -का -कं, सारकः &c.

MOTTLED, *a.* चित्रितः -ता -तं, चित्रः -त्रा -त्रं, कर्ब्बुरितः -ता -तं.

MOTTO, *s.* वाक्यं, वचनं, लेखः, श्लोकः, कविता, विज्ञापनलेखः, मुद्रालेखः.

MOULD, *s.* (Earth, soil) मृत्तिका, मृद् *f.*, मृदा, पांशुः *m.*, भूमिः *f.*, सर्ज्जः; 'black mould,' नीलमृत्तिका.—(Concretion formed from damp) कलङ्कः, शुक्लकलङ्कः, क्लेदजकलङ्कः, क्लेदजमलं.—(Cast) संस्कारः, आकारः, आकृतिः *f.*, मूर्त्तिः *f.*, संस्थानं, संयानः, रूपं.

To MOULD, *v. a.* (Cause to contract mould) सकलङ्कं -ङ्कां कृ, कलङ्केन दुष् (c. 10. दूषयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं), क्लेदजमलेन दुष्.—(Fashion, form) संस्कृ, रूप् (c. 10. रूपयति -यितुं), सरूपं -पां कृ, रच् (c. 10. रचयति -यितुं), संस्कारं कृ.

To MOULD, *v. n.* (Contract mould) सकलङ्कः -ङ्का -ङ्कं भू, क्लेदज्यामत्वात् शुक्लकलङ्कं or शुक्लमलं बन्ध् (c. 9. बध्नाति, बन्द्धुं), कलङ्कावृतः -ता -तं भू.

MOULDED, *p. p.* कल्पितः -ता -तं, संस्कृतः -ता -तं.—(Kneaded) मर्दितः &c.

To MOULDER, *v. n.* चूर्णीभू, क्षि in pass. (क्षीयते), विशृ in pass. (-शीर्य्यते), विशीर्णीभू, जॄ (c. 4. जीर्य्यति), शनैः शनैः क्षि or नश् (c. 4. नश्यति), अल्पाल्पशः क्षीणीभू or न्यूनीभू.

MOULDERING, *part.* शनैः शनैः क्षीयमाणः -णा -णं, अल्पाल्पं विशीर्य्यमाणः &c.

MOULDINESS, MOLDINESS, *s.* सकलङ्कता, समलता, मलिनता, कलङ्कवत्त्वं.

MOULDING, MOLDING, *s.* संस्कारः.—(Projecture of a wall) भित्तिशीर्षं -र्षकं.

MOULDY, *a.* सकलङ्कः -ङ्का -ङ्कं, समलः -ला -लं, मलिनः -ना -नं, कलङ्कावृतः -ता -तं, कलङ्कमयः -यी -यं, कलङ्कवान् -वती -वत् (त्), मलावृतः &c., शुक्लकलङ्कावृतः &c.

To MOULT, MOLT, *v. n.* (Shed the feathers) पक्षान् or वार्षिकपक्षान् यत् (c. 10. यातयति -यितुं) or मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं) or निर्मुच्, वार्षिकपक्षपातं कृ, पक्षनिमोकं कृ, पक्षगलनं कृ, पक्षपरिवर्त्तनं कृ.

MOULTED, *p. p.* गलितपक्षः -क्षा -क्षं, मुक्तपक्षः &c., पतितपर्णः -र्णा -र्णं.

MOULTING, *s.* पक्षपातः, पक्षपतनं, वार्षिकपक्षपतनं, पक्षनिमोकः, पक्षगलनं, वार्षिकपक्षगलनं, वार्षिकपक्षपरिवर्त्तनं.

MOUND, *s.* (Bank, rampart) वप्रः -प्रं, चयः, सेतुः *m.*, पिण्डनः, पिण्डलः, प्राकारः, धूलिकुट्टिमं, धूलिकेदारः.—(Elevation, hillock, heap of earth) मृत्तिकाचयः, उन्नतभूभागः, क्षुद्रपर्वतः, नाकुः *m.*, वामलूरः.

To MOUNT, *v. n.* (Rise on high) ऊर्द्धं गम् (c. 1. गच्छति, गन्तुं), उपरि गम्, उच्चैर् गम्, ऊर्द्धगमनं कृ, उपरिगमनं कृ.—(Mount on horseback) अश्वम् आरुह् (c. 1. -रोहति -रोढुं) or अधिरुह् or अध्यारुह् or समारुह् or अभिरुह् or अधिक्रम् (c. 1. -क्रामति -क्रमितुं), अश्वारोहणं कृ; 'to mount along side,' अन्वारुह्, समन्वारुह्.

To MOUNT, *v. a.* (Raise on high) ऊर्द्धीकृ, उच्चीकृ, ऊर्द्धं गम् (c. 10. गमयति -यितुं), उच्चैः कृ.—(Climb, ascend, as a hill or a horse) आरुह् (c. 1. -रोहति -रोढुं), अधिरुह्, अध्यारुह्, समारुह्, अभिरुह्, अधिक्रम् (c. 1. -क्रामति -क्रमितुं), अवस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), आरोहणं कृ.—(Place upon) आरुह् in caus. (-रोपयति -यितुं), समारुह्.

MOUNTAIN, *s.* पर्व्वतः, गिरिः *m.*, शैलः, अद्रिः *m.*, महीधरः, भूधरः, वसुधाधरः, धरणीधरः, धराधरः, महीभृत्, नगतीधरः, भूभृत् *m.*, भूमृत्, क्ष्माभृत् *m.*, क्षितिधरः, उर्व्वीधरः, कुभृत्, धरः, धरणीकीलकः, शिखरी *m.* (न्), पृथुशेखरः, तुङ्गशेखरः, सानुमान् *m.* (त्), ककुभान् *m.* (त्), ककुभी *m.* (न्), नगः, शिलोच्चयः, गोत्रः, अहार्य्यः, यावा *m.* (न्), वलाहकः, पृथुनितम्बः; 'crest or peak of a mountain,' शिखरं, गिरिशिखरं, पर्व्वतशृङ्गं, पर्व्वताग्रं, पर्व्वतमस्तकः, ककुद् *f.*; 'brow of a mountain,' गिरिमूर्द्धा *m.* (न्); 'side or ridge,' कटकः, नितम्बः; 'mountain with three peaks,' त्रिकूटः, त्रिककुद् *m.*; 'Western mountain, behind which the sun sets,' अस्तः, अस्ताचलः, अस्ताद्रिः *m.*, अस्तम्भाभृत् *m.*, पश्चिमपर्व्वतः; 'Eastern mountain, over which the sun rises,' उदयः, उदयपर्व्वतः, उदयगिरिः *m.*, उदयशैलः, उदयाचलः, उदयाद्रिः *m.*, पूर्व्वपर्व्वतः; 'hill near a mountain,' पादः, प्रत्यन्तपर्व्वतः; 'land at the foot of a mountain,' उपत्यका; 'on the top,' अधित्यका; 'range of mountains,' कुलपर्व्वतः, कुलाचलः, कुलगिरिः *m.*, कुलशैलः. There are seven principal ranges of mountains given, viz. महेन्द्रः, मलयः, सह्यः, शुक्तिमान्, ऋक्षः, विन्ध्यः, पारिपात्रः -त्रकः or पारियात्रः -त्रकः. Other names of celebrated mountains or mountain ranges are हिमवान्, हिमालयः, हिमाद्रिः *m.*, हेमकूटः, आश्मकूटः, माल्यवान् *m.* (त्), निषधः, मैनाकः also called हिरण्यनाभः and हिमवत्सुतः, गन्धमादनः, चित्रकूटः, क्रौञ्चः or क्रौञ्चः.

MOUNTAIN, *a.* पार्व्वतः -ती -तं, पर्व्वतीयः -या -यं, पार्व्वतीयः -या -यं, गैरः -री -रं, गैरिकः -की -कं, गैरेयः -यी -यं, शैलः -ली -लं, पार्व्वतेयः -यी -यं, पर्व्वत or गिरि in comp.; as, 'mountain torrent,' गिरिनदी.

MOUNTAINEER, *s.* पर्व्वतवासी *m.* (न्), गिरिवासी *m.*, पर्व्वतीयजनः, पार्व्वतीयः, गिरिजः, शैलजनः, गिरिभूः *m.*, शैलाटः.

MOUNTAINOUS, *a.* पार्व्वतीयः -या -यं, पार्व्वतेयः -यी -यं, पर्व्वतीयः -या -यं, सपर्व्वतः -ता -तं, पर्व्वतमयः -यी -यं, सशैलः -ला -लं, समहीधरः -रा -रं.

MOUNTEBANK, *s.* छद्मवैद्यः, मिथ्यावैद्यः, कितवः, धूर्त्तः, कापटिकः.

MOUNTED, *p. p.* आरूढः -ढा -ढं, आरोपितः -ता -तं, रोपितः -ता -तं, समारोपितः -ता -तं, समारूढः &c., अधिरूढः &c., रूढः &c.; 'on horseback,' अश्वारूढः, अश्वारोही *m.* (न्), हयारूढः, तुरगारूढः.

MOUNTING, *s.* (Rising) ऊर्द्धगमनं, उपरिगमनं.—(Ascending, getting on horseback) आरोहः -हणं, अधिरोहणं, समारोहः -हणं.—

(Placing on horseback) आरोपणं, समारोपणं, आरूढीकरणं.

To MOURN, *v. n.* शुच् (c. 1. शोचति -चितुं), अनुशुच्, परिशुच्, शोकं कृ, शोकार्त्तः -र्त्ता -र्त्तं भू, शोचनं कृ, खिद् (c. 4. खिद्यते, खेत्तुं), परिखिद्, दुःख (nom. दुःखायते, दुःखीयते), विलप् (c. 1. -लपति -पितुं), प्रलप्, लप्, उद्विज् (c. 6. -विजते -जितुं), व्यथ् (c. 1. व्यथते -थितुं), प्रव्यथ्, सम्प्रव्यथ्, तप् in pass. (तप्यते), परितप्, सन्तप्, रुद् (c. 2. रोदिति -तुं), परिदेव् (c. 1. -देवते -वितुं), दु (c. 4. दूयते); 'mourn exceedingly,' शुच् in freq. (शोशुच्यते).

To MOURN, *v. a.* (Grieve for) अनुशुच् (c. 1. -शोचति -चितुं), परिदेव् (c. 1. -देवति -ते -वितुं), विलप् (c. 1. -लपति -पितुं), क्रन्द् (c. 1. क्रन्दति -न्दितुं), आक्रन्द्, रुद् (c. 2. रोदिति -तुं), अभिक्रुश् (c. 1. -क्रोशति -क्रोष्टुं).

MOURNED, *p. p.* शोचितः -ता -तं, अनुशोचितः &c., विलपितः -ता -तं.

MOURNER, *s.* शोचकः, अनुशोचकः, शोकी *m.* (न्), खेदी *m.* (न्), परिदेवी *m.* (न्), परिदेवकः, विलपनकृत् *m.*, विलापी *m.*, शोककर्त्ता *m.* (र्त्तृ), अनुतापी *m.*, खिद्यमानः.—(One who wears a funeral dress) अमङ्गलवेषी *m.* (न्).

MOURNFUL, *a.* (Expressing sorrow) शोकसूचकः -का -कं, खेदसूचकः &c., शोकबोधकः -का -कं, शोकार्थकः -का -कं.—(Sorrowful, said of persons) शोकी -किनी -कि (न्), शोकार्त्तः -र्त्ता -र्त्तं, शोकान्वितः -ता -तं, सशोकः -का -कं, खेदी &c., खेदयुक्तः -क्ता -क्तं, खिन्नः -न्ना -न्नं, उद्विग्नः -ग्ना -ग्नं, उद्विग्नमनाः -नाः -नः (स्), विषादी &c., दुःखी &c., दुःखान्वितः -ता -तं, दुर्मनाः &c., विमनाः &c., समन्युः -न्युः -न्यु.—(Causing sorrow, lamentable) शोकजनकः &c., शोकदः -दा -दं, शोचनीयः -या -यं, शोच्यः -च्या -च्यं, शोचितव्यः -व्या -व्यं, शोकावहः -हा -हं, दुःखावहः &c., खेदजनकः -का -कं, शोकार्हः -र्हा -र्हं, शोचनार्हः &c.

MOURNFULLY, *adv.* सशोकं, सखेदं, सदुःखं, सोद्वेगं, शोकेन, शोकपूर्व्वं.

MOURNFULNESS, *s.* शोकः, सशोकता, दुःखं, दुःखिता, उद्वेगः, उद्विग्नता, खेदः, शोच्यता, शोचनीयता, शोकजनकता.

MOURNING, *s.* (Sorrow, lamentation) शोकः, शोचनं, अनुशोचनं, खेदः, विलपनं, विलापः, परिदेवनं -ना, रोदनं, रुदनं, क्रन्दनं, आक्रन्दनं, दुःखं.—(Dress worn by mourners) अमङ्गलवेषः, अशुभवेषः, अमङ्गलकालीनवेषः, अशुभकालीनवेषः, शोकसूचकवेषः. According to the Hindu notion defilement is contracted by the death of a relation; hence the following terms, expressive of a season of mourning, imply a season of impurity; as, अशौचं, आशौचं, कालाशौचं, अघाहः; 'one in such a state,' आशौची -चिनी -चि (न्).

MOUSE, *s.* मूषिकः -का, मूषकः, आखुः *m.*, इन्दुरः, इन्दुरुः *m.*, गिरिः *f.*, गिरिका, दीना, बिलेशयः, वज्रदन्तः, धान्यारिः *m.*, चिक्का.

MOUSE-TRAP, *s.* मूषिकग्रहणार्थं कूटयन्त्रं, मूषिकोन्माथः, मूषिकपञ्जरः.

MOUTH, *s.* मुखं, वदनं, आस्यं, वक्त्रं, आननं, लपनं, तुण्डं -ण्डः, तुण्डिः -ण्डी *m. f.*, श्मन् indec.; 'the corner of the mouth,' सृक्कन् *n.*, सृक्कं, सृक्कन् *n.*, सृक्कं, सृक्कि *n.*, सृक्कि *n.*, सृक्किन् *n.*, सृक्किन्, सृक्किणी *f.*, सृक्किणी; 'the two corners,' सृक्कणी *n.* du., ओष्ठप्रान्तौ *m.* du.; 'dryness of the mouth,' मुखशोषः; 'washing the mouth,' मुखमार्जनं, मुखप्रक्षालनं; 'rincing the mouth,' आचमनं; 'to open the mouth', मुखं व्यादा; 'to stop the mouth,' वाक्स्तम्भं कृ; 'from the mouth,' मुखतस्; 'relating to the mouth,' मुखतीयः -या -यं.—(Aperture, orifice) मुखं, छिद्रं, द्वारं, प्रमुखं.—(Mouth of a river) सम्भेदः, सङ्गमः, सिन्धुसङ्गमः.

To MOUTH, *v. a.* and *n.* (Speak with a big pompous voice) उच्चैःस्वरेण or गर्वितस्वरेण वद् (c. 1. वदति -दितुं), उद्धतस्वरेण वद्.—(Chew, devour) चर्व् (c. 1. चर्वति -र्वितुं, c. 10. चर्वयति -यितुं), ग्रस् (c. 1. ग्रसति -सितुं), भक्ष् (c. 10. भक्षयति -यितुं).

MOUTHFUL, *s.* ग्रासः, पिण्डः, मुखपूरणं, कवलः, कवकः, गण्डूषः -षा, गडोलः, गण्डोलः, गुडेरः -रकः, सिनः; 'three mouthfuls of water,' जलगण्डूषत्रयं.

MOUTHLESS, *a.* मुखहीनः -ना -नं, मुखरहितः -ता -तं, निर्मुखः -खा -खं.

MOUTHPIECE, *s.* मुखनाली, पुटः, जिह्वाली; 'of a flute,' दर्दुरपुटः.—(One who speaks for others) मुखं.

MOVABLE, *a.* चरः -रा -रं, चरिष्णुः -ष्णुः -ष्णु, चलः -ला -लं, चलनः -ना -नं, चलिष्णुः &c., जङ्गमः -मा -मं, गमनशीलः -ला -लं, गमनयोग्यः -ग्या -ग्यं, गमनशक्यः -क्या -क्यं, अस्थावरः -रा -रं, त्रसः -सा -सं, जगन् -गती -गत् (त्), इङ्गः -ङ्गा -ङ्गं, चलनक्षमः -मा -मं; 'movable and immovable,' चराचरः -रा -रं, चलाचलः -ला -लं.

MOVABLENESS, *s.* चरिष्णुता, चलिष्णुता, गमनशीलता, चलनयोग्यता, गतिशीलत्वं, अस्थावरता, चरभावः, चलभावः, गमनशक्तिः *f.*

MOVABLES, *s. pl.* अस्थावराणि *n. pl.*, अस्थावरद्रव्यं -व्याणि *n. pl.*, चरद्रव्याणि, चलद्रव्याणि, जङ्गमद्रव्याणि, अस्थावरधनं.

To MOVE, *v. a.* (Put in motion, cause to change place) चल् (c. 10. चालयति -यितुं), विचल्, सञ्चल्, सृ (c. 10. सारयति -यितुं), चर् (c. 10. चारयति -यितुं), सञ्चर्, स्थानान्तरं गम् (c. 10. गमयति -यितुं), स्थानान्तरीकृ.—(Impel) प्रेर् (c. 10. -ईरयति -यितुं), नुद् (c. 6. नुदति, नोत्तुं), प्रणुद्, चुद् (c. 10. चोदयति -यितुं), प्रचुद्, सञ्चुद्.—(Draw) कृष् (c. 1. कर्षति, c. 6. कृषति -ते, क्रष्टुं), सामाकृष्.—(Incite to action, influence) प्रवृत् (c. 10. -वर्त्तयति -यितुं), प्रयुज् (c. 10. -योजयति -यितुं), प्रोत्सह् (c. 10. -साहयति -यितुं), उत्सह् चेष्ट् (c. 10. चेष्टयति -यितुं), प्ररुच् (c. 10. -रोचयति -यितुं), प्रेर्.—(Excite tenderness, pity, &c.) करुणां जन् (c. 10. जनयति -यितुं), कारुण्यं or दयाम् उत्पद् (c. 10. -पादयति -यितुं), हृदयं व्यध् (c. 4. विध्यति, व्यद्धुं), हृदयं स्पृश् (c. 6. स्पृशति, स्प्रष्टुं), हृदयम् आर्द्रीकृ.—(Affect) उपहन् (c. 2. -हन्ति -न्तुं); 'with grief,' शोकोपहतं -तां कृ.—(Agitate) क्षुभ् (c. 10. क्षोभयति -यितुं), विक्षुभ्, व्याक्षुभ्.—(Make a proposal) उपन्यस् (c. 4. -अस्यति -असितुं), कर्त्तव्योपन्यासं कृ, कर्त्तव्योपस्थापनं कृ, कर्त्तव्योद्भावनं कृ.—(Move away, move off) अपसृ, अपानुद्, अपनुद्, व्यपनुद्.—(Move a piece at chess) शारिं परिणी (c. 1. -णयति -णेतुं) or समन्ताद् नी, शारिपरिणायं कृ.

To MOVE, *v. n.* चल् (c. 1. चलति -लितुं), सृ (c. 1. सरति, सर्त्तुं), प्रसृ, चर् (c. 1. चरति -रितुं), गम् (c. 1. गच्छति, गन्तुं), या (c. 2. याति -तुं), इ (c. 2. एति -तुं), इङ्ग् (c. 1. इङ्गति -ङ्गितुं), चुप् (c. 1. चोपति पितुं), अंह् (c. 1. अंहते -हितुं), गतिविशिष्टः -ष्टा -ष्टं भू.—(Change place) स्थानान्तरं गम्, स्थलान्तरं गम् or या.—(Change residence) गृहान्तरं गम्, वासान्तरं गम्.—(Have vital action) चेष्ट् (c. 1. चेष्टते -ष्टितुं), आत्मानं चेष्ट्, चेष्टां कृ.—(Begin a march) प्रस्थानं कृ, प्रस्था (c. 1. -तिष्ठति -स्थातुं); 'move on,' प्रसृ, प्रगम्, प्रया, चल्; 'move off,' अपसृ, अपया, अपक्रम् (c. 1. -क्रामति, क्रमितुं), अपगम्; 'move about,' इतस्ततः सृ or चल्, परिसृ.

MOVE, *s.* चलनं, सरणं, गमनं, चेष्टा, इङ्गितं, स्थानान्तरं, स्थानान्तरगमनं.—(At chess, &c.) परिणायः, परीणायः, शारिनयनं, खेला -लनं.

MOVED, *p. p.* चालितः -ता -तं, चलितः -ता -तं, चारितः -ता -तं, सञ्चारितः -ता -तं, सारितः -ता -तं, प्रचलितः -ता -तं, स्थानान्तरगतः -ता -तं, स्थानान्तरप्राप्तः -प्ता -प्तं, स्थलान्तरापन्नः -न्ना -न्नं.—(Impelled) प्रेरितः

-ता -तं, प्रणोदितः -ता -तं, प्रणुन्नः -न्ना -न्नं, प्रचोदितः -ता -तं.—(Drawn) कृष्टः -ष्टा -ष्टं, कर्षितः -ता -तं.—(Incited) प्रवर्त्तितः -ता -तं, प्रयोजितः -ता -तं, नियोजितः -ता -तं, प्रोत्साहितः &c., प्रवृत्तः -त्ता -त्तं.—(Excited to pity) जातकारुण्यः -ण्या -ण्यं, जातदयः -या -यं, दयास्पृष्टहृदयः -या -यं.—(Affected) स्पृष्टः -ष्टा -ष्टं, उपहृतः -ता -तं.—(Agitated) क्षुब्धः -ब्धा -ब्धं, क्षोभितः -ता -तं.

Movement, *s.* चलनं, सरणं, चारः, चरणं, सञ्चरणं, गतिः *f.*, गमनं, गमः, घोषणं, चेष्टा, चेष्टितं, इङ्गितं, स्थानान्तरं, स्थलान्तरं, स्थानान्तरगमनं, स्थानभेदः.—(Agitation) क्षोभः, कम्पः.—(In music) ग्रामः, तालः, मूर्च्छना.

Mover, *s.* (That which gives motion) चालकः, सारकः, सञ्चारकः.—(That which moves) चरः, चलः, चलनः.—(Proposer) उपन्यासकृत्, कस्यैचोपन्यासकृत्, कस्यैचोपस्थापकः.—(One who impels to action) प्रवर्त्तयिता *m.* (तृ), प्रवर्त्तकः, प्रयोजकः, प्रेरकः.

Moving, *a.* (Exciting the affections) कारुण्यजनकः -का -कं, कारुण्योत्पादकः &c., दयाजनकः &c., करुणात्मकः &c., हृदयवेधकः &c., हृदयङ्गमः -मा -मं, हृदयस्पृक् (ग्), मर्म्मस्पृक्, हृदयभेदी -दिनी -दि (न्), चित्तवेधकः &c., चित्तद्रावकः &c., भावार्द्रकारी &c., चित्तार्द्रकारी &c.

Moving, *part.* चलन् -लन्ती -लत् (त्), सरन् &c., चरन् &c., चलः -ला -लं, चरः -रा -रं, सरः -रा -रं, सरणः -णा -णं, चलनः -ना -नं, जङ्गमः -मा -मं, कम्पनः -ना -नं, गतिमान् -मती -मत् (त्), गामी -मिनी &c., चारी &c., सारी &c., यायी &c., सर्पी &c., गत्वरः -रा -रं, सृत्वरः -रा -रं; 'moving in the air,' आकाशगामी &c.

Movingly, *adv.* यथा हृदयं स्पृश्यते तथा, यथा करुणा जायते तथा, यथा कारुण्यम् उत्पद्यते तथा.

Mow, *s.* (Of hay or grain) तृणराशिः *m.*, धान्यराशिः *m.*, धान्यचितिः *f.*, धान्यचयः, धान्यसञ्चयः, तृणोत्करः, धान्योत्करः.

To mow, *v. a.* दात्रेण or लवित्रेण छिद् (c. 7. छिनत्ति, छेत्तुं) or अवच्छिद् or लू (c. 9. लुनाति, लवितुं) or कृत् (c. 6. कृन्तति, कर्त्तितुं) or अवकृत्, दो or दा (c. 4. द्यति, c. 2. दाति -तुं).

Mowed, mown, *p. p.* दात्रच्छिन्नः -न्ना -न्नं, दात्रलूनः -ना -नं, लवित्रच्छिन्नः &c., कर्त्तितः -ता -तं, अवकर्त्तितः &c., छिन्नः &c., लूनः &c.

Mower, *s.* तृणच्छेदकः, तृणच्छित्, तृणलवकः, तृणलविता *m.* (तृ), निदाता *m.*

Mowing, *s.* तृणच्छेदः -दनं, तृणलवनं, तृणकर्त्तनं, तृणलावः.

Much, *a.* बहुः -हुः -ह्वी -हु, बहुलः -ला -लं, प्रचुरः -रा -रं, विपुलः -ला -लं, बहुसंख्यकः -का -कं, भूरिः -रिः -रि, भृशः -शा -शं, सुभृशः &c., गाढः -ढा -ढं, प्रगाढः &c., बाढः &c., उद्गाढः &c., निर्भरः -रा -रं, भरः, अत्यन्तः -न्ता -न्तं, अत्यर्थः -र्था -र्थं, अतिरिक्तः -क्ता -क्तं, अतिमात्रः -त्रा -त्रं, नितान्तः -न्ता -न्तं, प्राज्यः -ज्या -ज्यं, पुष्कलः -ला -लं, भूयान् -यसी -यः (स्), भूयिष्ठः -ष्ठा -ष्ठं, प्रभूतः -ता -तं, उत्कटः -टा -टं, पुरुः -रुः -रु, पुरुहः -हा -हं, पुरुहुः -हुः -हु, अदभ्रः -भ्रा -भ्रं, स्फारः -रा -रं, अतिवेलः -ला -लं, अति or अतिशय or सु prefixed; as, 'much pain,' अतिव्यथा, अतिशयवेदना; 'much time,' बहुकालः, दीर्घकालः; 'as much,' यावान् -वती -वत् (त्), यतिः -तिः -ति; 'so much,' तावान् &c., एतावान् &c., इयान् -यती &c., ततिः -तिः -ति; 'so much time,' तावत्कालं; 'how much?' कियान् &c., कियत्प्रमाणः -णा -णं, कतिः -तिः -ति, कतिपयः -या -यं, कतिपयवः &c.; 'how much time?' कियत्कालं, कियन्तं कालं.

Much, *adv.* बहु, भृशं, भूरि, गाढं, निर्भरं, अत्यन्तं, अतिशयं -येन, अत्यर्थं, नितान्तं, प्रगाढं, उद्गाढं, अतिमात्रं, एकान्ततस्, तीव्रं, अतितरां, सुतरां, महा in comp., सुमहत्, अलवत्, अति or अतिशय or सु prefixed; 'as much,' यावत्; 'so much,' तावत्, एतावत्, तावन्मात्रं, इयत्; 'how much?' कियत्, कति; 'how much more?' किमुत, किम्पुनर्, सुतरां.

Much, *s.* बहुत्वं, बाहुल्यं, प्राचुर्यं, भूयस् *n.*, बहुभागः; 'much of what we know about the heavens is founded on calculation,' आकाशीयज्ञानम्भूयो गणितेन जायते; 'to make much of,' बहु मन् (c. 4. मन्यते, मन्तुं).

To NAUSEATE, *v. a.* बाध् in des. (बीभत्सते -त्सितुं), घृण् (c. 1. घृणते -णितुं).

NAUSEATED, *p. p.* बीभत्सेन परित्यक्तः -क्ता -क्तं.

NAUSEOUS, *a.* (Causing sickness) वमनोत्पादकः -का -कं, वमनेच्छाजनकः -का -कं.—(Disgusting) बीभत्सजनकः -का -कं, घृणाजनकः &c., कुत्साजनकः &c., कुत्सितः -ता -तं, विरसः -सा -सं, गर्हितः -ता -तं.

NAUSEOUSNESS, *s.* बीभत्सजनकता, कुत्सितत्वं, विरसता, वैरस्यं.

NAUTIC, NAUTICAL, *a.* नौचालनविद्यासम्बन्धी -न्धिनी -न्धि (न्), नौकाचालनविषयः -या -यं, नाविकः -की -कं; 'nautical person,' नाविकः, नौकाजीवी *m.* (न्).

NAVAL, *a.* (Pertaining to ships) नाविकः -की -कं, नाव्यः -व्या -व्यं. नौकासम्बन्धी -न्धिनी &c., नौकाविषयः -या -यं.—(Consisting of ships) नौकामयः -यी -यं, नौकात्मकः -का -कं, नौकारूपः -पा -पं.

NAVE, *s.* (Of a wheel) नाभिः -भी *f.*, चक्रनाभिः *f.*, पिण्डिः -ण्डी *f.*, पिण्डिका.—(Of a church) पूजाशालाया मध्यभागः.

NAVEL, *s.* नाभिः -भी *f. m.*, तुण्डिः -ण्डी *f. m.*, तुण्डिका, तुन्दिः -न्दी *f.*, तुन्दिका, नालः, उदरावर्त्तः, मध्यवृत्तं, मणिपूरः, अमरा, अमला, धर्म्मी. नाभिकमलं; 'hollow or pit of the navel,' नाभ्यावर्त्तः, तुन्दकूपो -पिका; 'region of the navel,' नाभिचक्रं; 'having a prominent navel,' तुन्दी -न्दिनी &c., तुन्दिकः -का -कं, तुन्दितः -ता -तं, तुन्दिलः -ला -लं, तुन्दिभः -भा -भं, तुन्दिकरः -रा -रं, तुन्दवान् -वती &c., तुण्डिलः &c., तुण्डिभः &c., गोण्डः -ण्डा -ण्डं.

NAVEL-STRING, *s.* नाभिनालः, नालः; 'cutting of it,' नाभिच्छेदनं, नालच्छेदः.

NAVIGABLE, *a.* नौतार्य्यः -र्य्या -र्य्यं, नाव्यः -व्या -व्यं, नौकागम्यः -म्या -म्यं. नौगम्यः &c., नौगमनार्हः -र्हा -र्हं.

NAVIGABLENESS, NAVIGABILITY, *s.* नौतार्य्यता, नौगम्यता, नाव्यता -त्वं.

To NAVIGATE, *v. a.* and *n.* नौकया or नावा तॄ (c. 1. तरति -रितुं -रीतुं) or अतितॄ or सन्तॄ or प्लु (c. 1. प्लवते, प्लोतुं) or गम् (c. 1. गच्छति, गन्तुं) or गमनागमनं कृ, समुद्रतरणं कृ, नौकापर्यटनं कृ, नौभ्रमणं कृ, नौकायात्रां कृ.—(Direct a ship) नौकां वह् (c. 10. वाहयति -यितुं) or चल् (c. 10. चालयति -यितुं) or आनी (c. 1. -नयति -नेतुं).

NAVIGATION, *s.* (Act of passing on the water in ships) नौकया or नावा तरणं or सन्तरणं or गमनं or गमनागमनं or पर्यटनं or भ्रमणं or यात्रा, समुद्रतरणं, समुद्रगमनं, नौगमनं, नौकापात्रा, नौगमनागमनं, नौभ्रमणं, नौपर्यटनं.—(Directing ships) नौकाचालनं. नौचालनं, नौकानयनं, नौकावाहनं.—(The art or science) नाविकविद्या, नौचालनविद्या, नौकानयनविद्या, नौवाहनविद्या.

NAVIGATOR, *s.* (One who sails) नाविकः, महानाविकः, समुद्रगामी *m.* (न्), समुद्रयायी *m.*, समुद्रतरः.—(One who directs a ship) नौचालकः, नौकावाहकः, पोतवाहकः, नौकानेता *m.* (तृ), नौकानयनकृत् *m.*

NAVY, *s.* युद्धनौसमूहः, युद्धनौकासङ्घः, बृहन्नौकासमूहः, नौसमूहः.

NAY, *adv.* न, नो, नहि.—(Nay more) पुनर्, किम्पुनर्, अधिकन्तु, इदं, किम् बहुना.—(Not only) न केवलं.

NEAP, *a.* (Low) नीचः -चा -चं, निम्नः -म्ना -म्नं; 'neap tide,' निम्नवेला, नीचवेला.

NEAR, *a.* (Not far distant) समीपः -पा -पं, निकटः -टा -टं, समीपस्थः -स्था -स्थं, निकटस्थः -स्था -स्थं, समीपवर्त्ती -र्त्तिनी -र्त्ति (न्), निकटवर्त्ती &c., समीपस्थायी &c., आसन्नः -न्ना -न्नं, सन्निकृष्टः -ष्टा -ष्टं, सन्निहितः -ता -तं, प्रत्यासन्नः -न्ना -न्नं, उपानः -ना -नं, अन्तिकः -का -कं, उपस्थः -स्था -स्थं, उपस्थायी &c., अभ्यासः -सा -सं, अभ्याशः -शा -शं, अभ्यर्णः -र्णा -र्णं, उपगतः -ता -तं, आरातीयः -या -यं, अभ्यगः -गा -गं, उपकण्ठः -ण्ठा -ण्ठं, सङ्काशः -शा -शं, सकाशः &c., सनीडः -डा -डं, सविधः -धा -धं, सवेशः -शा -शं, सवेषः -षा -षं, समर्य्यादः -दा -दं, अदूरः -रा -रं, अदूरस्थः &c., अविदूरः -रा -रं, संसक्तः -क्ता -क्तं, अव्यवहितः -ता -तं, अपदान्तरः -रा -रं, अपटान्तरः -रा -रं; 'nearer,' आसन्नतरः -रा -रं, नेदीयान् -यसी -यः (स्); 'nearest or very near,' आसन्नतमः -मा -मं, नेदिष्ठः -ष्ठा -ष्ठं, अन्तिकतमः -मा -मं, अन्तिमः -मा -मं.—(Closely connected) दृढसङ्गः -ङ्गा -ङ्गं, दृढसंसक्तः -क्ता -क्तं.—(Closely concerning or affecting one's interest) स्वार्थसम्बन्धी -न्धिनी &c., निकटसम्बन्धी &c., अन्तरङ्गः -ङ्गा -ङ्गं.—(Intimate) परिचितः -ता -तं, दृढसौहृदः -दा -दं.—(Stingy) कृपणः -णा -णं.

अनवचारी -रिणी &c.—(Not rambling) अविस्तीर्णः -र्णा -र्णं; 'near at one's side,' पार्श्वस्थः &c.

Near, *adv.* समीपं -पतस्, निकटे, अन्तिकं, उपान्ते, अभितस्, आरात्, आसन्ने, अन्तिकृष्टं, निकषा, अदूरे -रात् -रतस्, अविदूरं -रे -रात् -रतस्, अन्तिके, अवाशे, also expressed by the prep. उप, *see* the *next*; 'near at one's side,' पार्श्वे -र्श्वतस्; 'situated near,' उपनीतः -ता -तं; 'going near,' समीपगः -गा -गं.—(Almost, within a little) प्रायस् -यशस्, भूयिष्ठं; 'a woman who is near her delivery,' आसन्नप्रसवा; 'one who is near his death,' आसन्नमृत्युः &c. *See* Nearly.

Near, *prep.* उप, आ, अभि, प्रति; as, 'to go near,' उपगम् (c. 1. -गच्छति -गन्तुं) or उपागम् or अभिगम् or प्रतिगम्; 'brought near,' उपनीतः -ता -तं; 'near a mountain,' उपगिरि, उपगिरं; 'near the ear,' उपकर्णं; 'near the fire,' उपाग्नि; 'near the throat,' उपकण्ठं; 'near evening,' उपसन्ध्यं.

To near, *v. a.* नेद् (nom. नेदयति -यितुं); 'come nearer to,' उपगम् (c. 1. -गच्छति -गन्तुं), उपागम्, अभिगम्. *See To* approach.

Nearly, *adv.* (At no distance) समीपं -पतस्, अदूरे -रं -रात् -रतस्. *See* near, *adv.* (Closely) दृढं, गाढं; 'nearly connected,' दृढसङ्गः -ङ्गा -ङ्गं, गाढसङ्गः &c.—(Almost, within a little) प्रायेण, प्रायशस्, भूयिष्ठं, मनाक्, कल्पं, ईषदूनं, अल्पोनं; 'nearly finished,' समाप्तप्रायः -या -यं; 'nearly dead,' मृतप्रायः -या -यं, आसन्नमृत्युः -त्युः -त्यु, मुमूर्षुः -र्षुः -र्षु; 'the earth is nearly a sphere,' पृथिवी गोलप्राया; 'nearly cooked,' पक्वप्रायः &c.; 'nearly four,' उपचतुराः *m. pl.*

Nearness, *s.* (Closeness) समीपता, सामीप्यं, नैकट्यं, निकटता, समीपवर्तित्वं, निकटवर्तित्वं, आसन्नता, सन्निकृष्टता, सान्निध्यं, सन्निधिः *m.*, सन्निधानं, सन्निकर्षः -र्षणं, सन्निर्बन्धः, प्रत्यासत्तिः *f.*, प्रत्यासन्नता, आनन्तर्यं, अनन्तरं, उपस्थानं, अभ्यासत्वं.—(Closeness of connexion) दृढसम्बन्धः, दृढसंसक्तिः *f.*, दृढसंसर्गः, सुसंसर्गः.—(Intimacy) परिचयः, सुपरिचयः.—(Stinginess) कृपणता, कार्पण्यं, स्वल्पव्ययः.

Neat, *a.* (Trim) विनीतः -ता -तं, परिमृष्टपरिच्छदः -दा -दं, सुरेखः -खा -खं, आकारशुद्धः -द्धा -द्धं.—(Clean) शुद्धः -द्धा -द्धं, श्लक्ष्णः -क्ष्णा -क्ष्णं, परिष्कृतः -ता -तं.

Neat, *s.* (Cattle of the bovine genus) गवादिजन्तुः *m.*, गवादिपशुः *m.*

Neat-herd, *s.* गोपः, गोपालः, गोरक्षकः, गोचारकः, आभीरः.

Neatly, *a* [illegible] विनीतवत्, सपरिष्कारं, शुद्धं, श्लक्ष्णं, परिपाट्या, सुपरिपाट्या, परिष्कारपूर्वं.

Neatness, *s.* विनीतता -त्वं, शुद्धता, [illegible] परिष्कारः, आकारशुद्धता, आकारसुष्टिः *f.*, परिमृष्टता, परिष्कृतता, शुद्धता, [illegible] परिपाटिः -टी, पारिपाट्यं.

Nebula, *s.* (Opacity or film in the eye) शुक्लं, शुक्लाञ्जलः.

Nebulous, *a.* मेघाच्छन्नः -न्ना -न्नं, मेघव्याप्तः -प्ता -प्तं, मेघाकीर्णः -र्णा -र्णं, बहुमेघः -घा -घं, साभ्रः -भ्रा -भ्रं, अभ्रियः -या -र्यं.

Necessarian, *s.* दैववादी *m.* (न्), दैष्टिकः, दैवचिन्तकः, दैवैकवादी *m.*, अदृष्टवादी *m.*, दैवपरः.

Necessaries, *s. pl.* प्रतिदिनप्रयोजनीयद्रव्याणि *n. pl.*, प्रतिदिनप्रयोज्यद्रव्यसम्भारः, द्रव्यसम्भारः, उपकरणसम्भारः, उपकरणसामग्री; 'necessaries of life,' अन्नपानीयं, अन्नोदकं, अन्नवस्त्रं, अन्नाच्छादनं, कक्षिपू *m. du.*

Necessarily, *adv.* अवश्यं, अवश्, विवशं, अवश्यकं, अवश्यमेव, दैववशात्, दैवयोगात्, कर्म्मवशतस्, कार्य्यवशात्, कार्य्यतस्, अनन्यगत्या, नूनं.

Necessary, *a.* (That must be, that cannot be otherwise) अवश्यकः -का -कं, आवश्यकः -की -कं, अवशः -शा -शं, अवश्यः -श्या -श्यं, विवशः -शा -शं, भवितव्यः -व्या -व्यं, भाव्यः -व्या -व्यं, अनन्यसम्भवः -वा -वं, अनन्यथासाध्यः -ध्या -ध्यं, अनन्यथासिद्धः -द्धा -द्धं, अनन्योपायः -या -यं, अनन्यगतिकः -का -कं, अनिवार्यः -र्या -र्यं, नियतः -ता -तं.—(Requisite, needful, wanted) आकांक्षितः -ता -तं, अपेक्षितः -ता -तं, अवश्यकः -का -कं, अवश्यप्रापणीयः -या -यं, सर्वथा प्राप्यः -प्या -प्यं, अवश्योपयोगी -गिनी -गि (न्), अवश्यप्राप्यः -प्या -प्यं, प्रयोजनीयः -या -यं.—(Indispensable, necessary *to be done*) आवश्यकः -की -कं, अवश्यकर्त्तव्यः -व्या -व्यं, अवश्यकरणीयः -या -यं, अवश्यभवितव्यः -व्या -व्यं, सर्वथा भवितव्यः &c. or भाव्यः -व्या -व्यं, अपरिहरणीयः -या -यं, अपरिहार्य्यः -र्य्या -र्य्यं; 'necessary act,' अवश्यकर्त्तव्यं.—(Acting from necessity) विधिवशः -शा -शं, विधिवशकारी &c., दैववशकारी &c., दैवाधीनः -ना -नं; 'the necessary consequence of acts,' कर्म्मवशः, कार्य्यवशः; 'it is necessary' may be expressed by the fut. pass. part., or by अर्ह्. *See* Must.

Necessary, *s.* (Privy) शौचकूपः, पायुक्षालनवेश्म *n.* (न्), अवस्करः कर्दमाटकः.—(A necessary thing). *See* Necessaries.

To necessitate, *v. a.* (Make necessary) अवश्यकं -कां कृ, विवशं -शां कृ, विवशीकृ.—(Oblige, compel) अवश्यं कृ (c. 10. कारयति -यितुं) or प्रवृत् (c. 10. -वर्त्तयति -यितुं) or expressed by the causal form of any verb. *See* Constrain, Compel.

Necessitated, *p. p.* आवश्यकः -की -कं, विवशीकृतः -ता -तं. *See* Constrained.

Necessitous, *a.* दरिद्रः -द्रा -द्रं, निर्धनः -ना -नं, दीनः -ना -नं, दुर्गतः -ता -तं.

Necessity, *s.* (Necessariness) अवश्यकता -त्वं, आवश्यकता, आवश्यकं, आवश्यं, अवश्यता -त्वं, विवशता, वैवश्यं, भवितव्यता, भाव्यता, अनन्यथासम्भवः, अनन्यगतिकत्वं, नियतिः *f.*, नियतत्वं -ता.—(Need, *state of being requisite*) प्रयोजनं, प्रयोगः, प्रयुक्तिः *f.*, उपयोगः, प्रयोजनीयता, आकांक्षा, अपेक्षा, सर्वथा प्रापणीयता.—(Occasion, cause) प्रयोजनं, हेतुः *m.*, निमित्तं, कार्य्यं; 'without any necessity,' प्रयोजनं विना, हेतुना विना; 'what necessity for this investigation?' एतया चर्चया किं प्रयोजनं.—(Indispensableness) कर्त्तव्यता, कार्य्यता, अवश्यकर्त्तव्यता, भवितव्यता, भाव्यता, कार्य्यवशः.—(Fate, fatality) दैवं, विधिः *m.*, दैवाधीनता, दैववशत्वं, दैवायत्तता, अदृष्टाधीनता, भवितव्यता, नियतिः *f.*—(Indigence) दरिद्रता, दारिद्र्यं, दीनता, दुर्गतिः *f.*

Neck, *s.* ग्रीवा, कन्धरा -रः, शिरोधिः *m. f.*, शिरोधरा, गलः, कण्ठः -ण्ठा -ण्ठी -ण्ठं, मस्तकमूलकं; 'back of the neck,' अवटुः *m. f.*, घाटा -टी -टः -टिका, कूकाटिका, कूलिका, [illegible] ग्रीवा *m.* (न्), पश्चाद्ग्रीवा; 'head and neck,' शिरोग्रीवं; 'of a pitcher, or any vessel,' कण्ठः; 'of the bladder,' वस्तिशिरस् *n.*; 'of a lute,' वीणादण्डः; 'of a horse,' निगालः; 'bending back the neck,' उन्नम्रः; 'belonging to the neck,' ग्रैवः -वी -वं, ग्रैवेयः -यी -यं.

Neck-cloth, neckerchief, *s.* कण्ठवस्त्रं, ग्रीवावस्त्रं, ग्रीवावेष्टनं, ग्रीवावरणं, गलवस्त्रं, गलावेष्टनं, ग्रीवाबन्धनी, ग्रीवाभरणं, ग्रैवेयकं.

Necked, *a.* ग्रीवः -वा -वं, कण्ठः -ण्ठा -ण्ठं in comp.; as, 'handsome-necked,' सुग्रीवः -वा -वं; 'long-necked,' दीर्घग्रीवः &c., दीर्घकण्ठः &c.

Necklace, *s.* माला -लिका, हारः, कण्ठमाला, सूत्रं, उरःसूत्रं -त्रिका, ग्रैवं -वेयं -यकं, कण्ठभूषा, कण्ठलता, लम्बनं, प्रालम्बिका, प्रलम्बः, प्रलम्ब-

कलञ्जिका; 'of jewels,' मणिमाला, रत्नावली -लिः *f.*, मणिसरः; 'of pearls,' मुक्तावली -लिः *f.*, मुक्ताकलापः, मुक्ताप्रलम्बः, मुक्तालता; 'of gold,' हेमसूत्रकं, कनकसूत्रं; 'of beads,' अक्षमाला; 'of one string or row,' कण्ठिका; 'of a hundred strings,' देवच्छन्दः, शतयष्टिकः; 'of thirty-two strings,' गुच्छः; 'of thirty-four,' गुच्छार्द्धः.

NECROLOGY, *s.* मृतव्यक्तिविवरणं, मृतजनवृत्तान्तः, मृतजनपरिसंख्या.

NECROMANCER, *s.* श्मशानमन्त्रजापकः, प्रेतसिद्धिकर्त्ता *m.* (र्त्तृ). *See* MAGICIAN.

NECROMANCY, *s.* श्मशानमन्त्रजपनं, प्रेतसिद्धिः *f.*, भूतविद्या, भौतिकविद्या, पिशाचविद्या, कुविद्या. *See* MAGIC, *s.*

NECTAR, *s.* अमृतं, सुधा, सुधारसः, अमृतरसः, पीयूषं, पेयूषं, देवपेयं, लेह्यं, सोमः, पेतं, भक्षजा, कश्यं, तः; 'of flowers,' मधु *n.*, पुष्पमधु, पुष्परसः, पुष्पनिर्यासः, पुष्पसारः, पुष्पभवः, मकरन्दः, मरन्दः, नलदा.

NECTAREAN, NECTAREOUS, NECTARINE, *a.* अमृतमयः -यी -यं, सुधामयः &c., अमृततुल्यः -ल्या -ल्यं, अमृतोपमः -मा -मं, अमृतप्रायः -या -यं.

NEED, *s.* (Want, occasion for something) प्रयोजनं, प्रयोगः, प्रयुक्तिः *f.*, उपयोगः -गिता, कार्य्यं, कारणं, निमित्तं, हेतुः *m.*, आकांक्षा, अपेक्षा; 'there is need of me,' मया प्रयोजनं; 'there is need of a straw,' तृणेन कार्य्यं; 'what need is there of sorrow?' शोकेन किं प्रयोजनं, शोकस्य कः क्रमः or expressed by किं alone, as किं शोकेन; 'according to need,' प्रयोजनवत्, अर्थवत्, यथाप्रयोजनं, यथाकार्य्यं, यथासम्भवं.—(Indigence, distress, difficulty) दारिद्र्यं, दरिद्रता, दीनता, निर्धनता, दुर्गतिः *f.*, दुःखं, अनुपपत्तिः *f.*, सङ्कटं, कष्टं, संकटं, कृच्छ्रं, क्लेशः, बाधः.

To NEED, *v. a.* and *n.* (Require) आकांक्ष् (c. 1. -कांक्षति -क्षितुं), आकाङ्क्ष्, अभिकांक्ष्, अपेक्ष् (c. 1. -ईक्षते -क्षितुं), प्रार्थ् (c. 10. -अर्थयति -यितुं), अर्ह् (c. 1. अर्हति -र्हितुं), often expressed by प्रयोजनं, उपयोगः or कार्य्यं; as, 'the healthy need not a physician,' निरामयाणां चिकित्सकेन प्रयोजनं नास्ति; 'he needs me,' तस्य मया प्रयोजनं. *See* also *To* LACK, *v. a.* (Be necessary). *See* MUST.

NEEDED, *p. p.* आकांक्षितः -ता -तं, अपेक्षितः -ता -तं, प्रयोजनीयः -या -यं.

NEEDFUL, *a.* आकांक्षणीयः -या -यं, प्रयोजनीयः -या -यं, प्रयोजनार्हः -र्हा -र्हं, अवश्यकः -का -कं, आवश्यकः -की -कं, अवश्यप्राप्तणीयः -या -यं, अवश्योपयोगी -गिनी -गि (न्), अपेक्षणीयः -या -यं, प्रार्थनीयः &c., आकांक्षितः -ता -तं, अपेक्षितः -ता -तं; 'needful to be done,' अवश्यकर्त्तव्यः -व्या -व्यं, अवश्यकार्य्यः -र्य्या -र्य्यं, अवश्यकरणीयः -या -यं; 'the one thing needful,' परमार्थः, परमप्रयोजनीयं.

NEEDINESS, *s.* दरिद्रता, दारिद्र्यं, निर्धनता, अधनता, दीनता, दैन्यं.

NEEDLE, *s.* सूचिः -ची *f.* -चिनी -चिका, सेवनी, कूर्चिका; 'eye of a needle,' सूचिरन्ध्रं, सूचिच्छिद्रं; 'point of one,' सूच्यग्रं.—(Magnetic needle) लोहकान्तः, अयस्कान्तमणिः *m.*, अयस्कान्तमणिशलाका.

NEEDLE-CASE, *s.* सूचिभाजनं, सूचिपात्रं, सूच्याधारः.

NEEDLE-MAKER, *s.* सूचिकारः -रकः, सूचिकरणोपजीवी *m.* (न्).

NEEDLE-WOMAN, *s.* सूचिका -की, सूचीशिल्पोपजीविनी.

NEEDLE-WORK, *s.* सूचिता, सूचिकर्म्म *n.* (न्), सूचिशिल्पकर्म्म, सूचकर्म्म.

NEEDLESS, *a.* निष्प्रयोजनः -ना -नं, निष्कारणः -णा -णं, अकारणः &c., अप्रयोजकः -का -कं, अप्रयोजनकः &c., अकारणकः &c., अहेतुकः &c., निरर्थकः &c., अनर्थकः &c., वृथाः -था -थं, किमर्थः -र्था -र्थं.

NEEDLESLY, *adv.* प्रयोजनं विना, निष्प्रयोजनं, अकारणं, निष्कारणं, कारणं

विना, हेतुना विना, हेतुं विना, अहेतुकं, निरर्थकं, व्यर्थं.

NEEDLESNESS, *s.* अहेतुता -त्वं, अकारणत्वं, अकारणं, अप्रयोजकत्वं, अप्रयोजनं, निष्कारणत्वं, प्रयोजनाभावः, कारणाभावः.

NEEDS, *adv.* (Used with must) अवश्यं, अवश्यमेव. *See* MUST.

NEEDY, *a.* दरिद्रः -द्रा -द्रं, निर्धनः -ना -नं, अधनः -ना -नं, दीनः -ना -नं, दुर्गतः -ता -तं, अर्थहीनः -ना -नं, विभवहीनः &c., अर्थी -र्थिनी -र्थि (न्).

NEFARIOUS, *a.* अतिदुष्टः -ष्टा -ष्टं, पापिष्ठः -ष्ठा -ष्ठं, अतिपापिष्ठः &c., अतिपापी -पिनी -पि (न्), दारुणः -णा -णं, घोरः -रा -रं, अघोरः -रा -रं, गर्ह्यः -र्ह्या -र्ह्यं, दुष्टतमः -मा -मं, अतिपातकी &c., महापातकी &c., अतिपापात्मा -त्मा -त्म (न्).

NEFARIOUSLY, *adv.* अतिदुष्टं, पापिष्ठं, दारुणं, घोरं, अघोरं, गर्हितं.

NEFARIOUSNESS, *s.* अतिदुष्टता, पापिष्ठता, दारुणता, घोरता, अतिगर्ह्यता.

NEGATION, *s.* निह्नवः, अपह्नवः, निह्नुतिः *f.*, अपह्नुतिः *f.*, अपलापः, प्रत्याख्यानं, अपवादः, अस्वीकारः, निषेधः, प्रत्यादेशः.—(In logic) अभावः' according to one division it is of two kinds, 'universal negation,' संसर्गाभावः; 'relative or mutual negation,' अन्योन्याभावः; according to another division it is of four kinds, viz. 'extinction,' प्रध्वंसाभावः; 'antecedent non-existence,' प्रागभावः; 'reciprocal negation,' अन्योन्याभावः; 'simple non-existence,' अत्यन्ताभावः.

NEGATIVE, *a.* (Implying denial) अपलापी -पिनी -पि (न्), निह्नवसूचकः -का -कं, निह्नवार्थकः -का -कं, अपवादकः -का -कं, अस्वीकारसूचकः &c., निषेधसूचकः &c., निषेधार्थकः -का -कं.—(Implying absence, privative) अभावसूचकः -का -कं, अभावरूपः -पा -पं, अभावात्मकः -का -कं, अभावदर्शकः -का -कं, अकरणरूपः -पा -पं, अकरणात्मकः -का -कं, अननुष्ठानरूपः -पा -पं.—(Stopping by non-consent) निषेधद्वारा प्रतिबन्धकः -का -कं.

NEGATIVE, *s.* (Word) अस्वीकारसूचकशब्दः, निषेधसूचकशब्दः, अपलापसूचकशब्दः, निषेधार्थकशब्दः, अस्वीकारशब्दः.—(Proposition by which something is denied) अभावसूचकपक्षः, अभावसूचकवाक्यं, निषेधसूचकपक्षः, नास्तिपक्षः, अभावपक्षः.—(Right of preventing) निषेधाधिकारः, निषेधशक्तिः *f.*, प्रतिबन्धसामर्थ्यं.

To NEGATIVE, *v. a.* निषिध् (c. 1. -षेधति -षेद्धुं), प्रतिषिध्, निषेधद्वारा प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं), अपलप् (c. 1. -लपति -पितुं), निरस् (c. 4. -अस्यति -असितुं), निह्नु (c. 2. -ह्नुते -ह्नोतुं), अपह्नु, निषेधं कृ.—(Disprove). *See* the word.

NEGATIVED, *p. p.* निषिद्धः -द्धा -द्धं, निषेधितः -ता -तं, निरस्तः -स्ता -स्तं.

NEGATIVELY, *adv.* अस्वीकारेण, सनिषेधं, सापलापं, सापवादं, अभावकथनेन.

To NEGLECT, *v. a.* (Omit) त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, अतिचर् (c. 1. -चरति -रितुं), लङ्घ् (c. 10. लङ्घयति -यितुं), विलङ्घ्, उल्लङ्घ्, अतिक्रम् (c. 1. -क्रामति -क्रमितुं), व्यतिक्रम्, अतिवृत् (c. 1. -वर्त्तते -र्त्तितुं), हा (c. 3. जहाति, हातुं), अपहा, अपास् (c. 4. -अस्यति -असितुं), उत्सृज् (c. 6. -सृजति -स्रष्टुं), अतिसृज्, व्यपसृज्.—(Be careless about) प्रमद् (c. 4. -माद्यति -मदितुं), न अवधा (c. 3. -धत्ते -धातुं), अनवधानं कृ, प्रमादात् परित्यज्; 'he neglects his duty,' स्वधर्म्मात् प्रमाद्यति.—(Not to perform) न अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), अननुष्ठानं कृ, न कृ.—(Forget to perform) विस्मृ (c. 1. -स्मरति -रे -स्मर्तुं), न स्मृ, अपस्मृ, विस्मरणात् परित्यज्.—(Disregard) उपेक्ष् (c. 1. -ईक्षते -क्षितुं), समुपेक्ष्, उपप्रेक्ष्, न सेव् (c. 1. सेवते -वितुं), अनादरं कृ.—(Slight) अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवमन् (c. 4. -मन्यते -मन्तुं), अधीर् (c. 10. -धीरयति -यितुं), अवगण् (c. 10. -गणयति -यितुं), अनादरं कृ,

अवज्ञा; 'he neglects to honor the honorable,' पूज्यपूजाव्यतिक्रमं करोति.

NEGLECT, *s.* (Omission, forbearing to do any thing) त्यागः, परित्यागः, अननुष्ठानं, उपात्ययः, अतिपातः, पर्य्ययः, अनभ्यासः, अवक्रिया, लोपः, परिलोपः, अपासनं, उत्सर्जनं, अतिसर्जनं, अतिक्रमः, व्यतिक्रमः, अतिवर्त्तनं, लङ्घनं, विलङ्घनं, अतिचारः.—(Carelessness, inattention) प्रमादः, प्रमार्ष्टिः, प्रमत्तता, अनवधानं.—(Forgetfulness) विस्मृतिः *f.*, विस्मरणं.—(Disregard) उपेक्षा, अनपेक्षा, अनवेक्षा, निरपेक्षा, उत्प्रेक्षा, उड्डायनं, अदर्शनं.—(Slighting) अवज्ञा, अवमानं, अनादरः, अमाननं, अवधीरणं, अवपालनं.

NEGLECTED, *p. p.* त्यक्तः -क्ता -क्तं, परित्यक्तः &c., लङ्घितः -ता -तं, उल्लङ्घितः -ता -तं, अतिक्रान्तः -न्ता -न्तं, अतीतः -ता -तं, अपासितः -ता -तं, उत्सृष्टः -ष्टा -ष्टं, विसर्जितः -ता -तं, अननुष्ठितः -ता -तं, असेवितः -ता -तं, उपेक्षितः -ता -तं, समुपेक्षितः -ता -तं, अनपेक्षितः -ता -तं, अवज्ञातः -ता -तं, अवधीरितः -ता -तं, अपमानितः -ता -तं, अवमतः -ता -तं, अवगणितः -ता -तं, अवपालितः &c., उड्डायितः &c., अरक्षितः, &c., अवसन्नः -न्ना -न्नं, अलक्षीभूतः &c.

NEGLECTFUL, *a.* (Heedless, inattentive) अनवधानः -ना -नं, अनवहितः -ता -तं, असावधानः -ना -नं, प्रमादी -दिनी -दि (न्), प्रमादवान् -वती -वत् (त्), प्रमत्तः -त्ता -त्तं.—(Disregardful) उपेक्षकः -का -कं, निरपेक्षः -क्षा -क्षं, निरपेक्षः &c., मन्दादरः -रा -रं, अनादरकारी &c.

NEGLECTFULLY, *adv.* अनवधानेन, अनवहितं, प्रमादेन, सप्रमादं, निरपेक्षं, अनपेक्षया, उपेक्षया, अनपेक्ष्य, मन्दादरं, अवमानेन.

NEGLIGENCE, *s.* अनवधानं -नता, प्रमादः, प्रमार्ष्टिः, प्रमत्तता, अनवहितत्वं, उपेक्षा, अनपेक्षा, अनवेक्षा, असमीक्षा, अव्यवसायः, वालिश्यं. *See* NEGLECT.

NEGLIGENT, *a.* अनवधानः -ना -नं, प्रमत्तः -त्ता -त्तं, प्रमादी -दिनी -दि (न्), प्रमादवान् -वती -वत् (त्), अनवहितः -ता -तं, असावधानः -ना -नं, उपेक्षकः -का -कं, निरपेक्षः -क्षा -क्षं, अव्यवसायी &c., मन्दादरः -रा -रं.

NEGLIGENTLY, *adv.* प्रमाद्यात्, प्रमादेन, प्रमादतस्, प्रमाद्यतस्, अनवधानात्, अनवधानेन, अवधानं विना, प्रमत्तवत्, असमीक्ष्य. *See* NEGLECTFULLY.

NEGOTIABLE, *a.* पणितव्यः -व्या -व्यं, पणायितव्यः &c., व्यवहर्त्तव्यः &c., व्यवहार्य्यः -र्य्या -र्य्यं, व्यवहारयोग्यः -ग्या -ग्यं, व्यवसाययोग्यः &c.

To NEGOTIATE, *v. a.* पण् (c. 1. पणते -णितुं, पणायति, c. 10. पणयति -यितुं), पणायां कृ, व्यवहृ (c. 1. -हरति -हर्त्तुं), व्यवसायं कृ.

NEGOTIATED, *p. p.* पणितः -ता -तं, पणायितः -ता -तं, व्यवहारितः -ता -तं.

NEGOTIATION, *s.* पणायां, पणनं, व्यवहारः, व्यवसायः, घटना, प्रपञ्चनं.—(Pacification) साम *n.* (न्), सन्धिकरणं, शमनं.

NEGOTIATOR, *s.* पणायाकृत्, पणिकः, आपणिकः, व्यवसायी *m.* (न्), व्यवहर्त्ता *m.* (र्त्तृ), व्यवहारी *m.* (न्), कर्म्मकारी *m.*—(Pacificator) सामविद् *m.*, सन्धिविद् *m.*, सन्धिविचक्षणः, सन्धिकुशलः, स्थेयः.

NEGRO, *s.* श्यामदेहः, श्यामशरीरः, श्यामाङ्गः, कृष्णदेहः, कृष्णाङ्गः.

To NEIGH, *v. n.* ह्रेष् (c. 1. ह्रेषते -षितुं) or ह्लेष्, हेष् (c. 1. हेषते -षितुं), रेष् (c. 1. रेषते -षितुं), अश्ववद् रु (c. 2. रौति, रवितुं) or नद् (c. 1. नदति -दितुं) or नादं कृ or चिक्कारं कृ.

NEIGH, *s.* ह्रेषा, ह्लेषा, ह्रेषितं, रेषणं, रेषितं, ह्लेषा, अश्वनादः.

NEIGHBOR, *s.* प्रतिवासी *m.* (न्), निकटवासी *m.*, निकटवर्त्ती *m.* (न्), समीपवासी *m.*, निकटस्थः, समीपस्थः, समीपस्थायी *m.*, प्रतिवेशवासी *m.*, प्रतिवेशी *m.*, प्रतिवेशिकः, सामन्तवासी *m.*, समीपदेशनिवासी जनः, समीपगृहवासी *m.*, सामन्तः, अधिवासः, संस्थः, संस्थितः; 'a next-door neighbor,' निरन्तरगृहवासी *m.*, प्रातिवेश्यः; 'next but one,' अनुवेश्यः; 'one should love one's neighbor as one's self,' आत्मौपम्येन परस्मिन् दयां कुर्य्यात्.

NEIGHBOR, *a.* प्रतिवासी -सिनी -सि (न्). *See* NEIGHBORING.

To NEIGHBOR, *v. a.* निकटे or समीपे स्था (c. 1. तिष्ठति, स्थातुं) or वृ (c. 1. वर्त्तते -र्त्तितुं) or वस् (c. 1. वसति, वस्तुं), स्पृश् (c. 6. स्पृशति, स्प्रष्टुं).

NEIGHBORHOOD, *s.* (Vicinity, adjoining district) सामन्तदेशः, सामन्तं, समीपदेशः, समीपस्थानं, प्रतिवेशः, सन्निवेशः, अधिवासः, अन्तिकं, उपान्तं, निकर्षणः.—(State of being near, proximity) समीपता, सामीप्यं, निकटता, नैकट्यं, सन्निधानं, सान्निध्यं, सन्निधिः *m.*, सन्निधं, सन्निकर्षः, सन्निकृष्टता, आसन्नता, अन्तिकता, अन्तिकं, उपानं -न्यं, प्रत्यासन्नता, प्रत्यासत्तिः *f.*, सामन्तत्वं, निकटवर्त्तित्वं, समीपवर्त्तित्वं, संस्थानं, उपस्थानं, अभ्यासत्वं; 'in the neighborhood of the house,' गृहसन्निधाने, गृहोपान्ते.—(Inhabitants of the neighborhood) समीपवासिनः *m. pl.*, निकटवासिनः *m. pl.*, सामन्तवासिनः *m. pl.*, प्रतिवासिनः *m. pl.*, समीपलोकाः *m. pl.*, तत्रत्यलोकाः *m. pl.*

NEIGHBORING, *a.* निकटवर्त्ती -र्त्तिनी -र्त्ति (न्), समीपवर्त्ती &c., निकटस्थः -स्था -स्थं, समीपस्थः &c., समीपस्थायी &c., समीपवासी &c., सामन्तवासी &c., प्रतिवासी &c., सामन्तस्थः &c., सामन्तः -न्ती -न्तं, समीपः -पा -पं, आसन्नः -न्ना -न्नं, निकटः -टा -टं, अन्तिकः -का -कं, उपानः -ना -नं, उपान्तिकः -की -कं, सन्निहितः -ता -तं, अभ्यासः -सा -सं, अभ्याशः -शा -शं, अदूरस्थः &c., अदूरीस्थः &c.; 'neighboring district,' 'neighboring people.' *See* NEIGHBORHOOD.

NEIGHBORLINESS, *s.* सामन्तव्यवहारयोग्यता, संस्थव्यवहारयोग्यता, सामन्तजनाचारानुसरणं, उपकारशीलता, मित्रत्वं, हितता.

NEIGHBORLY, *a.* सामन्तव्यवहारयोग्यः -ग्या -ग्यं, संस्थव्यवहारयोग्यः &c., प्रतिवासयोग्यः &c., सामन्ताचारानुसारी -रिणी &c., उपकारशीलः -ला -लं, सुहृत्: -त्ता -त्तं.

NEIGHING, *s.* हेषा, ह्रेषा, ह्रेषितं, ह्लेषा, रेषणं -षितं, ह्रेषितस्वनः, अश्वशब्दः, अश्वनादः, अश्वनिस्वनः.

NEITHER, *pron.* (Not either, not the one or the other) expressed by अन्यतरः -रा -रं or एकतरः -रा -रं or उभौ, or simply by the dual in conjunction with the negative न; as, 'neither of them can break the bow,' धनुर् भङ्क्तुम् एकतरो न शक्नोति or उभौ न शक्नुतः or simply न शक्नुतः.

NEITHER, *conj.* expressed by the negative न or न च, or by the prohibitive मा. Sometimes in conjunction with वा; as, 'he took neither food nor clothes for his journey,' यात्रार्थं भक्ष्यं वस्त्रं वा न जग्राह; 'take neither food nor clothes,' भक्ष्यं वस्त्रं वा मा गृहाण; 'do not eat the fruit neither touch it,' फलं मा खादत मा स्पृशत; 'he did not touch, neither did he smell,' नास्पृशद् न चाजिघ्रत्.

NEM. CON. सर्व्वसम्मत्या, सर्व्वानुमत्या, सर्व्वस्वीकारेण.

NEOGAMIST, *s.* नवोढः -ढा, नववधूः *f.*, नवभार्य्या *f.*, नवपतिः *m.*

NEOLOGIC, NEOLOGICAL, *a.* (Pertaining to neology) नूतनन्यायसम्बन्धी -न्धिनी &c., नूतनमतसम्बन्धी &c.—(Employing new words, &c.) *See* the next.

NEOLOGIST, *s.* नूतनशब्दसेवी *m.* (न्), नूतनन्यायाश्रयी *m.*, नूतनमताश्रयी *m.*, नूतनन्यायसेवी *m.*

NEOLOGY, *s.* नूतनन्यायः, नूतनमतं, नूतनविद्या.—(Employment of new words, &c.) नूतनशब्दसेवनं, नूतनमताश्रयणं.

NEOPHYTE, *s.* नवच्छात्रः, नवशिष्यः, प्रायमकल्पिकः, नूतनशिष्यः.

NEOTERIC, *a.* नूतनः -ना -नं, नवः -वा -वं, नवीनः -ना -नं, इदानीन्तनः -नी -नं, आधुनिकः -की -कं, अर्वाचीनः -ना -नं.

NEPAL, *s.* (The country) नेपालः.—(Belonging to it, or produced in it) नैपालिकः -की -कं, नैपालः -ली -लं.

NEPENTHE, *s.* दुःखशमनं, दुःखहारकम् औषधं, उपशमनं.

NEPHEW, *s.* (Brother's son) भ्रातृजः, भ्रात्रीयः, भ्रातृपुत्रः, भ्रातृसुतः, भ्रातृव्यः.—(Sister's son) भगिनेयः, स्वस्रीयः, भगिनीपुत्रः, स्वसृपुत्रः, भगिनीसुतः, स्वसृसुतः.

NEPHRITIC, NEPHRITICAL, *a.* (Relating to the kidneys) मूत्रपिण्डसम्बन्धी -न्धिनी &c., वृक्कसम्बन्धी &c.—(Relieving disease of the kidneys) मूत्रपिण्डरोगहारी -रिणी &c., मूत्ररोगनाशकः -का -कं, वृक्करोगघ्नः -घ्नी -घ्नं.

NEPOTISM, *s.* (Fondness for nephews) भ्रातृव्यभागिनेयस्नेहः.—(Undue attachment for relations) पुत्रपौत्रादिपक्षपातः, कुलपक्षता, अपत्यातिस्नेहः, सन्तानातिस्नेहः, बान्धवातिस्नेहः.

NEREID, *s.* (Sea-nymph) समुद्रीयदेवी, सामुद्रदेवी, जलदेवी.

NERVE, *s.* (Organ of sensation, connected with the marrow of the brain and spine) मज्जातन्तुः *m.*, ज्ञानतन्तुः, ज्ञानवाहिनी, चैतन्यवाहिनी, चैतन्यतन्तुः *m.*, शिरा, सिरा.—(Sinew, tendon) स्नायुः *m.*, सत्वा, शिरा, सिरा, धमनिः -नी *f.*, नाडिः -डी *f.*, वहीरुः *m.*, रसालसा, सन्धिबन्धनं.—(Strength of body) शरीरदृढता, शरीरदार्ढ्यं, गात्रदार्ढ्यं, शरीरबलं, तेजस् *n.*, वीर्य्यं, ओजस् *n.*, ऊर्जः.—(Strength of mind) धैर्य्यं, धीरता -त्वं, धृतिः *f.*, मनःस्थैर्य्यं, बुद्धिकैर्यं.

To NERVE, *v. a.* बलं or धैर्य्यं दा or वृध् (c. 10. वर्धयति -यितुं), सबलीकृ.

NERVELESS, *a.* निर्बलः -ला -लं, दुर्बलः -ला -लं, बलहीनः -ना -नं.

NERVOUS, *a.* (Pertaining to the nerves) मज्जातन्तुसम्बन्धी -न्धिनी &c., मज्जातन्तुस्थः -स्था -स्थं, मज्जातन्तुगतः -ता -तं.—(Having the nerves affected, easily agitated) मज्जातन्तुरोगी -गिणी &c., मज्जातन्तुविकारी &c., शिरारोगी &c., धैर्य्यहीनः -ना -नं, कम्पशीलः -ला -लं, वेपनशीलः &c.—(Vigorous) वीर्य्यवान् -वती -वत् (त्), तेजोवान् &c., ओजस्वी &c., ऊर्जस्वान् &c., ऊर्जस्वलः -ला -लं, वीरः -रा -रं, दृढः -ढा -ढं, सुदृढः &c.

NERVOUSLY, *adv.* (With vigor) सवीर्य्यं, सधैर्य्यं, सबलं, धैर्य्येण.—(With weakness) धैर्य्येण विना, धैर्य्यं विना, सकम्पं, सवेपनं, कम्पशीलत्वात्.

NERVOUSNESS, *s.* (Vigor) वीर्य्यं, धैर्य्यं, धीरता -त्वं, तेजस् *n.*, ओजस् *n.*, दार्ढ्यं, दृढता, सुदृढता, ऊर्जः.—(Affection or weakness of the nerves, agitation) मज्जातन्तुरोगः, मज्जातन्तुविकारः -रिता, धैर्य्यहीनता, अधृतिः *f.*, कम्पशीलता, वेपनशीलता.

NESCIENCE, *s.* अज्ञानं -नता, ज्ञानाभावः, ज्ञानहीनता, अबोधः, अज्ञता.

NESS. This termination, denoting state or quality, is expressed in Sanskrit by the affixes ता, त्वं, and यं, the last usually requiring Vriddhi of the first syllable of the noun; as, from 'idle,' अलस; 'idleness,' अलसता, अलसत्वं, आलस्यं.

NEST, *s.* (Of birds) नीडः -डं, कुलायः, पक्षिस्थानं, पक्षिगृहं, खगस्थानं, जालकं, अङ्कुरकः.—(Any abode, receptacle) गृहं, स्थानं, निधिः *m.*, निधानं, आश्रयः, आश्रयः; 'sitting in a nest,' कुलायनिलायः.

To NESTLE, *v. n.* पक्षिवत् स्वनीडम् आश्रि (c. 1. -श्रयति -यितुं) or समाश्रि or संश्रि, सुखेन or सुखम् आश्रि, यथासुखम् आश्रि or शी (c. 2. शेते, शयितुं) or अधिशी or संविश् (c. 6. -विशति -वेष्टुं) or उपविश् or निली (c. 4. -लीयते -लेतुं).

To NESTLE, *v. a.* (Cherish) पाल् (c. 10. पालयति -यितुं), पुष् (c. 10. पोषयति -यितुं).

NESTLING, *s.* कुलायस्थः or नीडस्थः पक्षिशावकः, कुलायस्थायी *m.* (न्).

NESTOR, *s.* (Sage old man) वृहस्पतिः *m.*

NET, *s.* जालं, जालकं, आनायः, पाशः, पाशबन्धः -न्धं, वागुरा, उन्नाथः, कूटः, कूटयन्त्रं, वीतंसः, वितंसः, पक्षिबन्धनं, बन्धनं -नी; 'for deer,' मृगबन्धिनी -नं, पातिली; 'for fish,' मत्स्यधानी, मत्स्यजालं, मत्स्यग्रहणी, मत्स्यग्रहणार्थं जालं, कुपिनी, पञ्चराखेटः; 'maker of nets,' जालकारकः.

NET, *a.* (Clear, free from deductions) अशेषः -षा -षं, निरवशेषः &c., अभग्नः -ग्ना -ग्नं, अखण्डः -ण्डा -ण्डं, अन्यूनः -ना -नं, निरुद्धारः -रा -रं, शुद्धः -द्धा -द्धं.

To NET, *v. a.* (Make clear gain) अन्यूनं फलं लभ् (c. 1. लभते, लब्धुं).

NETHER, *a.* अधरः -रा -रं, अवरः -रा -रं, अधरस्थः -स्था -स्थं, अधःस्थः &c., अधोभवः -वा -वं, अधस्तनः -नी -नं, नीचस्थः &c., अधमः -मा -मं, अवमः &c., जघन्यः -न्या -न्यं; 'nether part,' अधोभागः; 'nether world,' अधोलोकः; 'nether garment,' अधोंशुकं, अम्बरीयं; 'nether sky,' नभस्तलं.

NETHERMOST, *a.* अवरः -रा -रं, अवरतमः -मा -मं, अधरतमः &c., नीचतमः &c.

NETTING, NET-WORK, *s.* जालं -लकं, जालकर्म्म *n.* (न्), जालप्राया.

NETTLE, *s.* (A plant) पीतपर्णी.

To NETTLE, *v. a.* प्रकुप् (c. 10. -कोपयति -यितुं), व्यथ् (c. 10. व्यथयति -यितुं), सन्ताप् (c. 10. -तापयति -यितुं), कोपं जन् (c. 10. जनयति -यितुं).

NETTLED, *p. p.* ईषत्कुपितः -ता -तं, ईषत्सन्तप्तः -प्ता -प्तं, व्यथितः -ता -तं.

NEURALGIA, *s.* मज्जातन्तुवेदना, मज्जातन्तुव्यथा, शिरावेदना.

NEUROLOGY, *s.* मज्जातन्तुवर्णनं -ना, मज्जातन्तुविद्या, शिरावर्णनं.

NEUROTOMY, *s.* मज्जातन्तुछेदः -दनं, शिराव्यवच्छेदविद्या.

NEUTER, NEUTRAL, *a.* (Not adhering to either party, indifferent) अपक्षपाती -तिनी -ति (न्), विपक्षपातः -ता -तं, उभयपक्षसमानः -ना -नं, उभयपक्षसमः -मा -मं, उभयसामान्यः -न्या -न्यं, उभयसाधारणः -णी -णं, उभयपक्षभिन्नः -न्ना -न्नं, उदासीनः -ना -नं, उदासी &c., तटस्थः -स्था -स्थं, मध्यस्थः &c., समदर्शी &c., समदृष्टिः -ष्टिः -ष्टि, समबुद्धिः -द्धिः -द्धि, समभावः -वा -वं, समः -मा -मं.—(Neuter gender) क्लीबः -बं, नपुंसकः -कं, नपुंसकलिङ्गं, तृतीयप्रकृतिः *f.*, तृतीयाप्रकृतिः.

NEUTRALITY, *s.* माध्यस्थ्यं -स्थ्यं, मध्यस्थता -त्वं, तटस्थ्यं, तटस्थता -त्वं, उभयपक्षसमता, अपक्षपातः -तिता, विपक्षपातत्वं, उदासीनता, औदासीन्यं, औदास्यं, उभयसमता, उभयसाम्यं, उभयसामान्यं, उभयसाधारण्यं, समदृष्टिः *f.*, समता, साम्यं, समानता.

NEUTRALIZATION, *s.* (Act of destroying the peculiar properties of a body) विशेषगुणनाशः -शनं, विशेषधर्म्मनाशः -शनं, गुणविनाशनं, विशेषगुणप्रतीकारः.—(Act of reducing to a state of neutrality) उदासीनीकरणं, समीकरणं, उभयसमीकरणं.—(Rendering inefficient) निर्बलीकरणं, दुर्बलीकरणं.

To NEUTRALIZE, *v. a.* (Destroy the peculiar properties of) विशेषगुणान् नश् (c. 10. नाशयति -यितुं), विशेषगुणनाशनं कृ, विशेषधर्म्मनाशं कृ.—(Render neutral) उदासीनीकरणं, उभयसमीकरणं.—(Render inefficient) निर्बलीकृ, दुर्बलीकृ, बलं नश्.

NEUTRALIZED, *p. p.* नष्टगुणः -णा -णं, नष्टबलः -ला -लं, नष्टशक्तिः -क्तिः -क्ति.

NEUTRALIZER, *s.* विशेषगुणनाशकः, बलनाशकः, शक्तिनाशकः, गुणघ्नः.

NEUTRALLY, *adv.* उदासीनवत्, औदासीन्यपूर्व्वं, उभयसाम्येन, समदृष्ट्या.

NEVER, *adv.* न कदाचित्, न कदापि, न कदाचन, न कर्हिचित्, न जातु, न जातुचित्, sometimes expressed by न; as, 'there never has been and never will be any one like him,' अनेन सदृशः कश्चित् न भूतो न भविष्यति.

NEVERTHELESS, *conj.* तथापि, पुनर्, परन्तु, परं, किन्तु, अपितु, किञ्च.

NEW, *a.* नवः -वा -वं, नवीनः -ना -नं, नूतनः -ना -नं, नूत्नः -त्ना -त्नं, नव्यः -व्या -व्यं, अभिनवः -वा -वं, प्रतिनवः -वा -वं, प्रायवः -या -यं, तरुणः -णा -णं.—(Modern, not ancient) आधुनिकः -की -कं, इदानीन्तनः -नी -नं, अधुनातनः -नी -नं, सद्यस्कालीनः -ना -नं, अप्राचीनः -ना -नं, अपुरातनः -नी -नं.—(Never occurring before) अभूतपूर्वः -र्वा -र्वं, अदृष्टपूर्वः &c., अश्रुतपूर्वः &c., अपूर्वः &c., अयथापूर्वः &c.—(Not habituated, not familiar) अनभ्यस्तः -स्ता -स्तं, अपरिचितः -ता -तं.—(Not before used) अप्रयुक्तः -क्ता -क्तं, अनुपभुक्तः &c.; 'new moon,' *See* MOON.

NEW-BORN, *a.* जातोत्साहः -हा -हं, जातमात्रः -त्री -त्रं, नवोत्पन्नः -न्ना -न्नं.

NEW-COMER, *s.* आगन्तुकः, आगन्तुः *m.*, नवागतः, नवाभ्यागतः.

NEW-FANGLED, *a.* नवकल्पितः -ता -तं, नवमृष्टः -ष्टा -ष्टं, नूतनः -ना -नं.

NEWLY, *adv.* नवं, नूतनं, नवीनं, अभिनवं, प्रतिनवं, प्रत्ययं, सद्यस्.

NEWNESS, *s.* नवता -त्वं, नवीनता, नूतनता -त्वं, नव्यता, नाव्यं, अभिनवता, प्रतिनवता, प्रत्ययता.—(State of not being known before) अपूर्वता -त्वं, अभूतपूर्वता.

NEWS, *s.* वार्त्ता, वृत्तान्तः, समाचारः, सन्देशः, सन्दिष्टं, संवादः, वृत्तं, वर्त्तमानं, प्रवृत्तिः *f.*, किंवदन्ती, उदन्तः -न्तकः, लोकवादः, लोकप्रवादः, जनवादः, जनश्रुतिः *f.*, वार्त्तिकं, सूचना; 'What's the news?' का वार्त्ता; 'good news,' सुवार्त्ता, शुभवार्त्ता, शुभवृत्तान्तः; 'bad news,' दुर्वार्त्ता, अनिष्टवार्त्ता, अशुभवार्त्ता.

NEWSMONGER, *s.* वार्त्तायनः, वार्त्तावृत्तिः *m.*, समाचारवृत्तिः *m.*, वार्त्ताध्यक्षायी *m.* (न्), वार्त्तावहनव्यापारी *m.*, वार्त्तिकः, कुशीलवः, समाचारव्यवसायी.

NEWSPAPER, *s.* समाचारपत्रं, वार्त्तापत्रं, वार्त्तिकपत्रं, संवादपत्रं.

NEWS-VENDER, *s.* समाचारपत्रविक्रेता *m.* (तृ), वार्त्तापत्रविक्रयी *m.*

NEWT, *s.* वृक्षगोधा -धिका, वृक्षकगोधा -धिका, क्षुद्रगोधा.

NEW-TESTAMENT, *s.* नवीननियमः, नूतननियमः, नवनियमः.

NEW-YEAR'S DAY, *s.* वर्षप्रतिपद् *f.*, वत्सरप्रतिपद्, संवत्सरप्रतिपद्.

NEXT, *a.* (In time, &c.) अनन्तरः -रा -रं, निरन्तरः -रा -रं.—(Next in place, having nothing intervening) अव्यवधानः -ना -नं, अव्यवहितः -ता -तं, अनन्तरालः -ला -लं, निरन्तरालः -ला -लं, अपदान्तरः -रा -रं, अव्यहितः -ता -तं, पार्श्वस्थः -स्था -स्थं, अभ्यासः -सा -सं. Next in time may also be expressed by परः -रा -रं or अनन्तरं; as, 'the next day,' परदिवसः, परेद्युः; 'the next world,' परलोकः -कं, लोकान्तरं; 'in the next world,' परत्र, प्रेत्य, अमुत्र; 'relating to the next world,' पारत्रिकः -की -कं, अमुत्रत्यः -त्या -त्यं, आमुष्मिकः -की -कं; 'the next moment,' क्षणान्तरं; 'next born,' अनन्तरजः -जा -जं; 'next of kin,' अनन्तरः -रा -रं; 'next but one,' एकान्तरः -रा -रं; 'next but two,' द्व्यन्तरः -रा -रं, द्व्येकान्तरः -रा -रं.

NEXT, *adv.* अनन्तरं, तदनन्तरं, प्रत्यनन्तरं, परं -रेण, परतस्, परस्तात्, ततः परं, अतः परं, अत ऊर्ध्वं; 'next day,' परदिवसे, परेद्युस्; 'next moment,' क्षणान्तरे.

NIB, *s.* (Bill, beak) चञ्चुः *f.*, तुण्डः -ण्डिः *m.*, मुखः.—(Point) अग्रं, अग्रिः *m.*, अग्रभागः; 'of a pen,' कलमाग्रं.

NIBBED, *a.* अग्रिमान् -मती -मत् (त्), अग्रवान् -वती &c., साग्रः -ग्रा -ग्रं.

To NIBBLE, *v. a.* and *n.* अल्पाल्पशः or अल्पाल्पं चर् (c. 1. चरति -रितुं, c. 10. चरयति -रयितुं) or दंश् (c. 1. दशति, दंष्टुं) or विदंश् or सन्दंश्, सम्मुखदन्तैर् अल्पाल्पं खाद् (c. 1. खादति -दितुं) or छिद् (c. 7. छिनत्ति, छेत्तुं), क्रमशः खाद् or भक्ष् (c. 10. भक्षयति -यितुं) or चर्वणं कृ.—(Carp at) दोषं or छिद्रम् अन्विष् (c. 4. -ष्यति -षितुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), छिद्रान्वेषं कृ, असूय (nom. असूयति).

NIBBLED, *p. p.* अल्पाल्पशः खादितः -ता -तं or चर्वितः -ता -तं or दष्टः -ष्टा -ष्टं, सम्मुखदन्तैर् जग्धः -ग्धा -ग्धं or छिन्नः -न्ना -न्नं or लूनः -ना -नं.

NICE, *a.* (Delicious, pleasant to the taste) स्वादुः -दुः -दुः -दु, सुरसः -सा -सं, मिष्टः -ष्टा -ष्टं, सुखास्वादः -दा -दं, रुचिरः -रा -रं, रुच्यः -च्या -च्यं, रुचिकरः -रा -रं.—(Exact, accurate) सूक्ष्मः -क्ष्मा -क्ष्मं, ऋजुः -जु -जु, समञ्जसः -सा -सं, सम्यक् -मीची -म्यक् (क्), शुद्धः -द्धा -द्धं.—(Judging with exactness or minuteness) सूक्ष्मदृष्टिः -ष्टिः -ष्टि, सूक्ष्मदर्शी -र्शिनी -र्शि (न्), कुशाग्रदृष्टिः &c., कुशाग्रीयमतिः -तिः -ति, कुशाग्रीयबुद्धिः -द्धिः -द्धि, कुशाग्रबुद्धिः &c.—(Over-exact) अतिसूक्ष्मः &c., अतिसूक्ष्मदृष्टिः -ष्टिः -ष्टि.—(Delicate, soft) कोमलः -ला -लं, पेलवः -वा -वं, मृदुः -दुः -दु, सुकुमारः -रा -री -रं.—(Not coarse, fine) अस्थूलः -ला -लं, सूक्ष्मः &c., विरलः &c.—(Pleasing, agreeable) रुचिरः -रा -रं, सुभगः -गा -गं, रम्यः -म्या -म्यं, मनोरमः -मा -मं, सुन्दरः -रा -री -रं.

NICELY, *adv.* (Exactly, accurately) सूक्ष्मं, सौक्ष्म्येण, ससौक्ष्म्यं, सूक्ष्मरूपेण, सूक्ष्मत्वेन, ऋजुना, समञ्जसं, सम्यक्.—(Well, in a good manner) सु prefixed, सुष्ठु; 'nicely done,' सुकृतः -ता -तं.

NICENESS, NICETY, *s.* (Delicacy, deliciousness) स्वादुता, सुरसत्वं, सौरस्यं, मिष्टता.—(Pleasantness) रुचिरता, रुच्यता, रम्यता, रमणीयता.—(Exactness) सूक्ष्मता -त्वं, सौक्ष्म्यं, सामञ्जस्यं, सम्यक्त्वं, शुद्धता.—(Over-exactness or scrupulousness) अतिसूक्ष्मता, अतिसौक्ष्म्यं, —(Delicacy of perception or judgment) सूक्ष्मदृष्टिः *f.* -ष्टित्वं, सूक्ष्ममतित्वं, कुशाग्रीयमतित्वं, कुशाग्रबुद्धित्वं.—(Delicacy of management) युक्तिः *f.*, सुयुक्तिः *f.*, लाघवं, सुनीतिः *f.*

NICHE, *s.* प्रतिमास्थानं, प्रतिमाधारः, प्रतिमानिकेतः -तनं.

NICK, *s.* (Of time) कालसन्धिः *m.*, कालयोगः, शुभकालः, शुभयोगः, सुयोगः, शुभलग्नं, शुभक्षणः, युक्तसमयः, उपयुक्तसमयः, उपयुक्तकालः, उचितसमयः, अवसरः *m.*—(Noteh) छेदः, अवच्छेदः.

To NICK, *v. a.* (Touch at the right time) शुभलग्ने स्पृश् (c. 6. स्पृशति, स्प्रष्टुं) or आसद् (c. 10. -सादयति -यितुं), सुयुक्तिं कृ.—(Make a notch) अवच्छेदं कृ.

NICKNAME, *s.* उपाधिः *m.*, उपाधिनाम *n.* (न्), निन्दानाम *n.*, निन्दासूचकं नाम, तिरस्कारसूचकनाम, अपमानार्थकं नाम.

To NICKNAME, *v. a.* उपाधिं दा, उपाधिनाम कृ, तिरस्कारार्थं नाम दा.

To NICTATE, *v. n.* निमिष् (c. 6. -मिषति -मेषितुं), पक्षिवद् निमेषं कृ.

NICTATION, *s.* निमेषः, निमीलनं, पक्षिनिमेषः, पक्षिवद् निमेषः.

NICTITATING MEMBRANE, *s.* पक्षिणां चक्षुरावरणं, पक्षिनेत्रपटलं.

NIDIFICATION, *s.* नीडकरणं, नीडरचनं, कुलायरचना.

NIECE, *s.* (Brother's daughter) भ्रातृव्या, भ्रातृजा, भ्रातृपुत्री, भ्रातृसुता, भ्रातृकन्या.—(Sister's daughter) स्वसृव्या, भागिनेयी, स्वसृपुत्री, भगिनीसुता, भगिनीकन्या, स्वसृजा.

NIGGARD, *s.* कृपणजनः, अदाता *m.* (तृ), कदर्यजनः, गाढमुष्टिः *m.*

NIGGARD, NIGGARDLY, *a.* दृढमुष्टिः -ष्टिः -ष्टि, गाढमुष्टिः &c., कृपणः -णा -णं, व्ययशङ्की -ङ्किनी -ङ्कि (न्), व्ययशङ्कितः -ता -तं, अल्पव्ययी &c.

स्वल्पव्ययी &c., कदर्य्यः -र्य्या -र्य्यं, मात्सरः -रा -रं, तनुत्यागः -गा -गं, त्यागपराङ्मुखः -खा -खं, दानपराङ्मुख: &c., क्षुद्रः -द्रा -द्रं, अर्थैषरः -रा -रं. *See* MISER, MISERLY.

NIGGARDLINESS, NIGGARDNESS, *s.* कृपणता, कार्पण्यं, कदर्य्यता -त्वं, व्ययशङ्का, स्वल्पव्ययः, दृढमुष्टित्वं, मात्सर्य्यं, दानपराङ्मुखता.

NIGGARDLY *adv.* सकार्पण्यं, कृपणवत्, स्वल्पव्ययेन, व्ययशङ्कया.

NIGH, NIGHLY, NIGHNESS. *See* NEAR, NEARLY, NEARNESS.

NIGHT, *s.* रात्रिः *f.*, निशा, रजनी, क्षपा, शर्वरी, निद् *f.* (श्), त्रियामा, यामिनी, यामवती, नक्तं indecl. निशीथिनी, तमस्विनी, विभावरी, तमी -मा -मिः *f.*, निरातपा, निशीथ्या, निशीथः, क्षणदा, वासुरा, वाशुरा, श्यामा, शताक्षी, शत्वरी, शर्व्वी, यामिः -मी -मिका *f.*, यामीरा, याम्या, दोषा; 'a dark night,' तमिस्रा, तामसी; 'a moonlight night,' ज्योत्स्ना; 'by night, in the night,' रात्रौ, निशायां, निशि, नक्तं, दोषा; 'a number of nights,' निशागणः, गणरात्रं, निशावृन्दं; 'coming on of night,' रात्रियोगः; 'end of night,' निशान्तः -न्तं, अपररात्रः, रात्रिविगमः; 'beginning of night,' निशादिः *f.*; 'every night,' प्रतिरात्रं, प्रतिनिशं, रात्रौ रात्रौ; 'day and night,' अहोरात्रं, अहर्निशं; 'night and day,' रात्रिन्दिवं, रात्र्यहनी *n. du.*; 'a night and two days,' पक्षिणी; 'a period of five nights,' रात्रकं; 'sitting up at night,' रात्रिजागरः -रणं; 'resting at night,' निशोपशायः; 'night attack,' नैशिकवधः, नैशिकं; 'last night,' गतरात्रिः *f.*

NIGHT-BLINDNESS, *s.* निशान्धता; 'affected with it,' निशान्धः -न्धा -न्धं, रात्र्यन्धः &c.

NIGHT-CAP, *s.* रात्रौ भृतं शिरोवेष्टनं or शिरोवस्त्रं, रात्रिशिरस्कं.

NIGHT-DEW, *s.* रात्रिजलं, निशाजलं, रजनीजलं, नैशाम्बु *n.*, निशापुष्पं.

NIGHT-CLOTHES, NIGHT-DRESS, *s.* रात्रिवस्त्रं, रात्रिवसनं, रात्रिवेशः.

NIGHT-FALL, *s.* रजनीमुखं, निशादिः *f.*, रात्र्यारम्भः, रात्रियोगः, सन्ध्याकालः, दिनावसानं, प्रदोषः, प्रदोषकालः.

NIGHT-GOWN, *s.* रात्रिवस्त्रं, रात्रिवसनं, रात्रिवेशः, रात्रौ भृतं वस्त्रं.

NIGHT-HAG, *s.* रात्रिचरी, रात्रिचरा -री, निशाचरा -री, रात्र्यटा.

NIGHTINGALE, *s.* वसन्तदूतः, मदनदूतः, कोकिलः, गातुः *m.*

NIGHTLY, *a.* नैशः -शी -शं, प्रादोषिकः -की -कं, रात्रिकृतः -ता -तं, रात्रिजः -जा -जं, शार्वरः -री -रं, प्रातिरात्रिकः -की -कं.

NIGHTLY, *adv.* (By night) रात्रौ, नक्तं, निशायां, निशि, दोषा.—(Every night) प्रतिरात्रं, प्रतिनिशं, रात्रौ रात्रौ, निशि निशि.

NIGHT-MAN, *s.* खलपूः *m.*, मलपूः *m.*, पुरीषवाहकः, पुरीषापकर्षी *m.*

NIGHTMARE, *s.* कुस्वप्नः, दुःस्वप्नः, अजीर्णेप्रयुक्तस्वप्नः, स्वप्नकल्पितो हृदयदेशोपरिस्थो भारः, स्वप्नकल्पिता मिथ्यावासना or अपच्छाया.

NIGHTSHADE, *s.* (Prickly) कण्टकारी -रिका, निदिग्धिका, वृहती, धावनिका, दुःस्पर्शा, स्पृशी, व्याघ्री, कुली, प्रचोदिनी, क्षुद्रा, राष्ट्रिका.

NIGHT-WALKING, NIGHT-WANDERING, *a.* निशाचरः -रा -री -रं, रात्रिचरः &c., रात्रिञ्चरः &c., रजनीचरः &c., निशाचारी -रिणी -रि (न्), नक्तचारी &c., नक्तञ्चरः &c.

NIGHT-WATCH, *s.* यामः, प्रहरः, रात्रियामः, रात्रिप्रहरः.

NIHILITY, *s.* अभावः, अवस्तुत्वं, नास्तित्वं, असत्ता -त्वं, शून्यता -त्वं.

NIMBLE, *a.* लघुः -घुः -घ्वी -घु, लघुगतिः -तिः -ति, द्रुतगतिः &c., त्वरितगतिः &c., लघुशरीरः -रा -रं, लघुदेहः -हा -हं, चपलाङ्गः -ङ्गा -ङ्गं, अङ्गचपलः -ला -लं, चपलदेहः -हा -हं, चपलगतिः &c., क्षिप्रगतिः &c., क्षिप्रकारी -रिणी -रि (न्), आशुकारी &c., तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), चपलः -ला -लं, चञ्चलः -ला -लं.

NIMBLE-FOOTED, *a.* लघुपादः -दा -दं, चपलपादः &c., पादचपलः -ला -लं.

NIMBLE-HANDED, *a.* लघुहस्तः -स्ता -स्तं, चपलपाणिः -णिः -णि, पाणिचपलः &c.

NIMBLENESS, *s.* लघुता, लाघवं, शरीरलाघवं, लघुगतित्वं, द्रुतगतित्वं, अङ्गचापल्यं, देहचापल्यं, चापल्यं, द्रुतता, क्षिप्रता, शीघ्रता, चञ्चलता, चाञ्चल्यं.

NIMBLE-WITTED, *a.* चपलबुद्धिः -द्धिः -द्धि, क्षिप्रबुद्धिः &c., शीघ्रबुद्धिः &c.

NIMBLY, *adv.* सलाघवं, लाघवेन, लघु, लघुगत्या, द्रुतं, द्रुतगत्या, त्वरितं, त्वरितगत्या, चापल्येन, चपलं, चपलगत्या, अङ्गचापल्येन, क्षिप्रं, शीघ्रं.

NINE, *a.* नव *m. f. n. pl.* (न्), नवसंख्यकः -का -कं.

NINE-FOLD, *a.* नवगुणः -णा -णं, नवविधः -धा -धं, नवधा indecl.

NINETEEN, *a.* नवदश *m. f. n. pl.* (न्), अनविंशतिः *f. sing.*, एकोनविंशतिः *f. sing.*, नवदशसंख्यकः -का -कं.

NINETEENTH, *a.* नवदशः -शी -शं, एकोनविंशः -शी -शं, अनविंशः &c., अनविंशतितमः -मी -मं, एकोनविंशतितमः &c.

NINETIETH, *a.* नवतः -ती -तं, नवतितमः -मी -मं.

NINETY, *a.* नवतिः *f. sing.*, नवतिसंख्यकः -का -कं; 'ninety-one,' एकनवतिः *f.*; 'ninety-two,' द्वानवतिः *f.*; 'ninety-three,' त्रयोनवतिः; 'ninety-four,' चतुर्णवतिः; 'ninety-five,' पञ्चनवतिः; 'ninety-six,' षण्णवतिः; 'ninety-seven,' सप्तनवतिः; 'ninety-eight,' अष्टानवतिः *f.*; 'ninety-nine,' अनशतं, एकोनशतं; 'above ninety years old,' दशमी *m.* (न्), दशमीस्थः, दशमीङ्गतः.

NINETY-FOLD, *a.* नवतिगुणः -णा -णं, नवतिविधः -धा -धं, नवतिधा indecl.

NINNY, NINNY-HAMMER, *s.* अल्पबुद्धिः *m.*, अल्पधीः *m.*, मूर्खः, निर्बुद्धिः.

NINTH, *a.* नवमः -मी -मं, नावमिकः -की -कं.

NINTHLY, *adv.* नवमतस्, नवतस्, नवमस्थाने, नवमपदे.

To NIP, *v. a.* (Cut or pinch off with the ends of the fingers) अङ्गुल्याग्रैः or अङ्गुलिनखैर् अवच्छिद् (c. 7. -छिनत्ति -छेत्तुं) or अवकृत् (c. 6. -कृन्तति -कर्त्तितुं) or निकृत् or छिद् or पीड्.—(Bite off) दंश् (c. 1. दशति, दंष्टुं), विदंश्, सन्दंश्, अवदंश्.—(Pinch in general) पीड् (c. 10. पीडयति -यितुं), मथ् (c. 1. मथति, c. 9. मथ्नाति -थितुं), आर्द्रं -र्द्रां -र्द्रं कृ, आर्द्रीकृ; as, 'to pinch with cold,' शीतेन पीड् शीतार्द्रीकृ, हिमार्द्रीकृ.—(Blast, destroy) नश् (c. 10. नाशयति -यितुं), दुष् (c. 10. दूषयति -यितुं), मृ (c. 10. मारयति -यितुं), विश् (c. 10. -शारयति -यितुं), म्लानीकृ.

NIP, NIPPING, *s.* नखैर् अवच्छेदः or अवकृन्तनं or निकृन्तनं or कृन्तनं, हिमार्द्रीकरणं, शीतार्द्रीकरणं, हिमनाशः.

NIPPED, *p. p.* (With cold) हिमपीडितः -ता -तं, हिमार्द्रः -र्द्रा -र्द्रं, शीतार्द्रः &c., हिमदूषितः -ता -तं, हिमनाशितः &c.—(In general) पीडितः -ता -तं, मथितः &c.

NIPPERS, *s. pl.* सन्दंशः -शकं -शका, कङ्कमुखं.

NIPPLE, *s.* स्तनाग्रं, स्तनमुखं -खः, स्तनशिखा, कुचाग्रं, चूचुकः -कं, स्तनवृन्तः -न्तं, पिप्पलकं, नम्भेटः, वृन्तं; 'the nipples,' पुरश्छदौ *m. du.*

NIT, *s.* लिक्षा, निक्षा, रिक्षा, दिक्षूः, यूकाण्डं.

NITRE, *s.* यवक्षारः, यवजः, तक्ष्यः, पाक्यः, तीक्ष्णः, तीक्ष्णरसः, यवलाजः, यवाग्रजः.

NITROGEN, *s.* expressed in modern treatises by the word रूचकजः.

NITROUS, NITRY, *a.* यवक्षारीयः -या -यं, यवक्षारमयः -यी -यं, यवक्षारगुणकः -का -कं, यवक्षारोत्पादकः -का -कं.

NITTY, *a.* बहुलिक्षः -क्षा -क्षं, लिक्षापूर्णः -र्णा -र्णं, प्रचुरलिक्षः &c.

NIVEOUS, *a.* हिम्यः -म्या -म्यं, तुषारमयः -यी -यं, हिममयः &c.

NO, *adv.* न, नो, नहि; 'or no,' न वा.

No, *a.* (None) usually expressible by न; as, 'no one,' न कश्चित् *m.*, न काचित् *f.*, न कोऽपि *m.*, न कापि *f.*, न कश्चन *m.*, न काचन *f.*; 'no thing,' न किञ्चित्, न किमपि, न किञ्चन; 'no other,' नान्यः -न्या -न्यत्; 'no where,' न क्वचित्, न क्वापि, न कुत्रचित्, न कुत्रापि; 'no more, not again,' न पुनर्; 'no great distance,' नातिदूरं. When 'no' is privative, it is expressed by निर्, अ, वि &c. prefixed, or by हीन, शून्य, वर्जित, रहित &c. affixed; as, 'having no fruit,' निष्फलः -ला -लं, अफलः &c., विफलः &c., फलहीनः -ना -नं, &c.

Nobility, *s.* (Antiquity of family, elevation of rank) महाकुलता, कुलीनता, महाकुलीनता, सत्कुलीनता, अभिजातता, आभिजात्यं, आभिजनं, कुलोत्कर्षः, कुलोत्कृष्टता, औत्कर्ष्यं, कौलीनं, सद्वंशता, वंशोत्कर्षः.—(Elevation or greatness of mind) माहात्म्यं, महात्मता -त्वं, महिमा *m.* (न्), महत्त्वं, उदारता, औदार्य्यं, चित्तोदारता, महेच्छा, महानुभावः.—(Distinction, eminence) उत्कर्षः, उत्कृष्टता, औत्कर्ष्यं, वैशिष्ट्यं, विशिष्टता, प्रधानता -त्वं, समुन्नतिः *f.*, प्रकर्षः, शिष्टता, श्रेष्ठत्वं, सेव्यता, मुख्यातिः *f.*—(Magnificence) प्रतापः, तेजस् *n.*, श्रीः *f.*—(The nobility, noblemen collectively) कुलीनलोकः, कुलीनजनसमूहः, कुलीनजनाः *m. pl.*, शिष्टजनाः *m. pl.*, कुलीनसमूहः, राजन्यकं.

Noble, *a.* (Of ancient family, or elevated rank) कुलीनः -ना -नं, महाकुलीनः -ना -नं, महाकुलः -ला -लं, सत्कुलीनः -ना -नं, सद्वंशः -शा -शं, अभिजनवान् -वती -वत् (त्), अभिजातः -ता -तं, उत्कृष्टः -ष्टा -ष्टं, उत्कृष्टकुलजातः -ता -तं, महाकुलजः -जा -जं, महाकुलप्रसूतः -ता -तं, सत्कुलजातः -ता -तं, विशुद्धकुलभवः, वंशविशुद्धः -द्धा -द्धं, सद्वंशजातः -ता -तं, प्रधानवंशोद्भवः -वा -वं, महावंशीयः -या -यं, उत्तमवंशजातः -ता -तं, कुलश्रेष्ठी -ष्ठिनी -ष्ठि (न्), श्रेष्ठकुलोद्भूतः -ता -तं, कुलोद्गतः -ता -तं, कुलिकः -का -कं, कौलेयः -यी -यं, प्रतिपत्तिमान् &c.—(Great in mind) उदारः -रा -रं, उदारमनाः -नाः -नः (स्), उदारमतिः -तिः -ति, उदारधीः -धीः -धि, महात्मा -त्मा -त्म (न्), महामनाः &c., महामनस्कः -स्का -स्कं, माहात्मिकः -की -कं, महामतिः -तिः -ति, महानुभावः -वा -वं, महेच्छः -च्छा -च्छं, महाशयः -या -यं, उन्नतमनाः &c.—(Distinguished, eminent, excellent) उत्कृष्टः -ष्टा -ष्टं, श्रेष्ठः -ष्ठा -ष्ठं, अत्युत्कृष्टः &c., शिष्टः -ष्टा -ष्टं, विशिष्टः &c., उत्तमः -मा -मं, प्रमुखः -खा -खं, उन्नतः -ता -तं, समुन्नतः -ता -तं, प्रशस्तः -स्ता -स्तं, महान् -हती -हत् (त्), महाभागः -गा -गं, महाभागधेयः -या -यं, सेव्यः -व्या -व्यं.—(Illustrious) ख्यातः -ता -तं, विख्यातः -ता -तं, यशस्वी &c., महायशाः &c., श्रीमान् &c., सुप्रतिष्ठः -ष्ठा -ष्ठं, कीर्त्तिमान् &c.—(Magnificent) महाप्रतापः -पा -पं, महातेजाः &c., विभूतिमान् &c., श्रीमान् &c. 'Noble' may sometimes be expressed by ऋषभः or पुङ्गवः or व्याघ्रः or सिंहः or शार्दूलः or इन्द्रः in comp.; as, 'a noble or eminent man,' पुरुषर्षभः, पुरुषव्याघ्रः, नरपुङ्गवः, नरेन्द्रः &c.; 'a noble elephant,' गजेन्द्रः; 'noble nature,' सत्त्वं; 'noble on both sides,' मातृतः पितृतश्चाभिजनवान् &c.

Noble, nobleman, *s.* कुलीनजनः, कुलीनलोकः, शिष्टजनः, शिष्टलोकः, कुलीनपदस्थः, उच्चपदस्थः, उत्कृष्टपदस्थः, कुलश्रेष्ठी *m.* (न्), सत्कुलीनः, अभिजनवान् *m.* (त्), राजन्यः.

Noble-minded, *a.* उदारमनाः -नाः -नः (स्), उदारधीः -धीः -धि, उदारमनस्कः -स्का -स्कं, उदारचेताः &c., महात्मा -त्मा -त्म (न्), सम्भावितात्मा &c., महेच्छः -च्छा -च्छं.

Nobleness, *s.* महत्त्वं, महिमा *m.* (न्), उत्कर्षः, उत्कृष्टता, श्रेष्ठता, प्रधानता, उदारता, औदार्य्यं, उन्नतिः *f.*, समुन्नतिः. *See* Nobility.

Noblesse, *s.* कौलीन्यं, कौलीनं, कुलीनलोकः, कुलीनसमूहः, कुलीनसभा.

Nobly, *adv.* (With nobleness of birth) कुलीनं, कुलीनवत्, साभिजात्यं; 'nobly-born,' महाकुलप्रसूतः -ता -तं, सत्कुलजातः -ता -तं. *See* Noble, *a.* (With greatness of mind) सौदार्य्यं, औदार्य्येण, उदारवत्, समाहात्म्यं, माहात्म्येन, मनोमहत्त्वात्, महिम्ना, उदारचित्तत्वात्, उदारचेतसा, महेच्छया.—(Magnificently) महाप्रतापेन, महातेजसा, अतितेजसा, सप्रतापं, ऐश्वर्य्येण.

Nobody, *s.* न कश्चित् *m.*, न काचित् *f.*, न कोऽपि *m.*, न कापि *f.*, न कश्चन *m.*, न काचन *f.*

Nocent, *a.* हिंसः -सा -सं, हिंसालुः -लुः -लु, अपकारकः -का -कं.

Noctambulation, *s.* निद्राभ्रमणं, निद्रापरिभ्रमणं, निद्राचारः.

Noctambulist, *s.* निद्राचारी *m.* (न्), निद्राभ्रमणकृत्. *See* Night-walking.

Noctivagant, *a.* निशाचरः -रा -री -रं, नक्तचारी -रिणी &c. *See* Night-walking.

Nocturnal, *a.* नैशः -शी -शं, रात्रिकालिकः -की -कं, रात्रिसम्बन्धी न्धिनी &c., रात्रिकालसम्बन्धी &c., दोषातनः -नी -नं, प्रादोषिकः -की -कं, शार्द्धरः -री -रं, रात्रीयः -या -यं, निशासम्बन्धीयः -या -यं.

To nod, *v. a.* or *n.*, (Incline the head) शिरः or मस्तकं नम् (c. 1. नमति, नन्तुं, c. 10. नमयति -यितुं) or प्रणम् or अभिनम् or विनम् or आनम्.—(Make a sign by a motion of the head) मस्तकसङ्केतं कृ, शिरःसङ्केतं कृ, शिरसा सङ्केतं कृ or संज्ञां कृ or इङ्गितं कृ, शिरश् चल् (c. 10. चालयति -यितुं).

Nod, *s.* (Inclination of the head) शिरःप्रणामः, मस्तकप्रणामः, शिरःप्रणतिः *f.*—(Sign made by a movement of the head) मस्तकसङ्केतः, शिरःसङ्केतः, शिरसा सङ्केतः or संज्ञा or इङ्गितं, मस्तकसन्देशः, शिरश्चालनं.

Nodated, *a.* ग्रन्थिमान् -मती -मत् (त्), ग्रन्थिलः -ला -लं.

Noddle, *s.* मस्तकः -कं, शिरस् *n.*, शीर्षकं, मुण्डकं.

Noddy, *s.* अल्पबुद्धिः *m.*, अल्पधीः *m.*, मूर्खः, निर्बुद्धिः *m.*

Node, *s.* (In surgery) अस्थिगुल्मः, अध्यस्थि *n.*—(In astronomy) पातः, उपग्रहः; 'ascending node,' राहुः *m.*, स्वर्भानुः *m.*, विधुन्तुदः, सैंहिकेयः, तमस् *n.*; 'descending,' केतुः *m.*

Nodose, *a.* ग्रन्थिलः -ला -लं, ग्रन्थी -न्थिनी -न्थि (न्), बहुग्रन्थिः -न्थिः -न्थि.

Nodosity, *s.* ग्रन्थिलत्वं, ग्रन्थिमत्त्वं, सग्रन्थित्वं, सपर्द्धत्वं, ग्रन्थिपूर्णता.

Nodule, *s.* शर्करा, पिण्डः -ण्डं, घनः, लोष्टः -ष्टं -ष्टुः *m.*

Noise, *s.* शब्दः, महाशब्दः, अतिशब्दः, ध्वनिः *m.*, महाध्वनिः *m.*, स्वनः, महास्वनः, निःस्वनः, घोषः -षणं -णा, महाघोषः, नादः, महानादः, स्वरः, महास्वरः, उच्चैःस्वरः, उच्चस्वरः, प्रघोषकः, प्रस्वानः, निर्घोषः, निनादः, रणत्कारः, क्वणः, संह्रादः, निह्रादः, रणः, रणत्कारः, रावः, उद्रावः, कोलाहलः, रासः, रावणं, तुमुलं, ध्वनः, घणः, उत्क्रोशः.—(Public talk) जनवादः, जनप्रवादः, जनरवः, जनश्रुतिः *f.*

To noise, *v. a.* (Spread by report) घुष् (c. 10. घोषयति -यितुं), विघुष्, प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, ख्या in caus. (ख्यापयति -यितुं), आख्या, विख्या, प्रचर् (c. 10. -चारयति -यितुं), प्रकटीकृ.

Noised abroad, *p. p.* घोषितः -ता -तं, विघोषितः -ता -तं, प्रचारितः -ता -तं, प्रकाशितः -ता -तं, प्रकटितः &c., प्रकटीकृतः &c., आख्यातः &c.

Noiseful, *a.* शब्दकारी -रिणी &c., ध्वनयन् -यन्ती -यत् (त्). *See* Noisy.

Noiseless, *a.* निःशब्दः -ब्दा -ब्दं, निश्शब्दः &c., अशब्दः &c., अघोषः -षा -षं, नीरवः -वा -वं, अरवः -वा -वं, शब्दहीनः -ना -नं.

Noiselessly, *adv.* शब्देन विना, अशब्देन, निःशब्दं, निश्शब्दं.

Noisily, *adv.* महाशब्देन, अतिशब्देन, महास्वरेण, उच्चैःस्वरेण.

NOISINESS, *s.* महाशब्दकत्वं, महाशब्दः, महाशब्दकारित्वं, महाध्वनिः *m.* -निता, महानादः -दता, शब्दकारिता, शब्दबहुत्वं, सशब्दता, शब्दत्वं.

NOISOME, *a.* (Noxious, destructive) मारकः -का -कं, मारात्मकः &c., प्राणनाशकः &c., मृत्युजनकः &c., क्षयकरः -रा -रं, विनाशकः &c., प्राणहरः -रा -रं, नृशंसः -सा -सं, शरारुः -रुः -रु, शारुकः -का -कं, घातुकः -का -कं, बाधकः &c., अनिष्टजनकः &c., अहितकारी -रिणी &c.—(Offensive to the smell) दुर्गन्धः -न्धा -न्धं, दुर्गन्धी -न्धिनी -न्धि (न्), पूतिगन्धिकः -का -कं, कुत्सितः -ता -तं.

NOISOMENESS, *s.* दुर्गन्धता -त्वं, दौर्गन्धिः *m.*, पूतिगन्धता, कुत्सितगन्धः, उग्रगन्धता, पूतिः *f.*, कुत्सितत्वं, कौत्सित्यं.

NOISY, *a.* शब्दकारः -री -रि, महाशब्दकारः -री -रि, महाशब्दकः -का -कं, महाशब्दी -ब्दिनी -ब्दि (न्), महास्वनः -ना -नं, महाध्वनिकः -का -कं, महाध्वनिकरः -री -रं, महानादी &c., महानादः -दा -दं, महास्वरकः -का -कं, अतिशब्दनः -ना -नं, अतिशब्दवान् -वती -वत् (त्), तुमुलकारी &c., तुमुलः -ला -लं, कोलाहलकारी &c. कोलाहलकृत् *m. f. n.*, घोररवः -वा -वं, मुखरः -रा -रं.—(Clamorous) घोषवः -वा -वं, घोषकरः -री -रं, महाघोषः -षा -षं, बहुघोषः -षा -षं.—(Sounding) शब्दनः -ना -नं, नादी &c., स्वनवान् &c., संह्रादी &c., स्वनन् -नती -नत् (त्), ध्वनयन् &c.

NOMAD, NOMADIC, *a.* प्रचारानुसारवासी -सिनी &c., पशुचारणानुजीवी.

NOMENCLATOR, *s.* नामस्थापकः, नामबोधकः, नामख्यापकः.

NOMENCLATURE, *s.* शब्दसङ्ग्रहः, शब्दजालं, शब्दमाला, निघण्टुः *m.*

On, prep. अधि, मि prefixed, उपरि affixed.—(Denoting contact with the upper part of a thing) expressed by the loc. c., or by उपरि affixed to the crude form or gen. c.; as, 'on the table,' फलके or फलकोपरि or फलकस्योपरि; 'rain falls on the ground,' भूमौ पतति वृष्टिः; 'having placed the wood on his shoulder,' काष्ठं स्कन्धे कृत्वा; 'placed on the fire,' अग्निः

-रा -रं. The instr. c. is elegantly used for the loc. in similar phrases; as, 'he carries the wood on his shoulder,' भारं स्कन्धेन वहति; 'to go on foot,' पद्भ्यां गम्; 'conduct me home on a horse,' अश्वेन मां वसतिं नय.—(At, or near) expressed by loc. c., or by निकटे, समीपे, उपान्ते &c. affixed, or by उप prefixed; as, 'on the shore,' तीरे, तीरनिकटे, तीरोपान्ते, उपतीरं; 'on the throat,' उपकण्ठं.—(At the time of) expressed by the loc. c., as, 'on Monday,' सोमवारे; 'on their arrival,' तेषु आगतेषु; 'on the corn being cut,' शस्ये लूने सति, or even by the abl. c., as, 'on seeing him,' तद्दर्शनात्, or by the indecl. part., as, 'on seeing that,' तद् दृष्ट्वा; 'on hearing that,' तच्छ्रुत्वा.—(Toward or for) प्रति affixed, or expressed by gen. or loc. c; as, 'have pity on me,' मां प्रति or मम or मयि दयां कुरु.—(Dependence on) expressed by acc. c., after such verbs as अवलम्ब्, आश्रि &c.; as, 'he relies on me,' माम् अवलम्बते.—(Concerning, relating to) विषयः -या -यं, विषयकः -का -कं, सम्बन्धी -न्धिनी &c.; as, 'a treatise on mathematics,' गणितविषयकं शास्त्रं.—(Performing on an instrument) expressed by acc. c. after वद् in caus.; as, 'he plays on a lute,' वीणां वादयति. The affixes तस्, त and दा, often express the sense of 'on'; as, 'on both sides,' उभयतस्, उभयत, उभयपार्श्वतस्; 'on all sides,' सर्वतस्, समन्ततस्, अभितस्, समन्तात्, सर्वत्र; 'on the one hand,' एकतस्; 'on all occasions,' सर्वदा; 'on one occasion,' एकदा; 'on another occasion,' अन्यदा. The following are other examples of instr., and other cases used adverbially to express this prep.; 'on the north-east of the city,' प्राग्नगरेण नगरात्; 'on this account,' अनेन हेतुना; 'on account of, or in consequence of anger,' कोपात्. *See* ACCOUNT; 'on the other side,' अन्यपार्श्वेन, अन्येन पार्श्वेन; 'immediately on hearing this,' तच्छ्रवणमात्रात्; 'on a sudden,' अकस्मात्, सहसा; 'on high,' उच्चैस्, उच्चकैस्, उच्चं, ऊर्ध्वं, ऊर्ध्वे; 'set on foot,' आरब्धः -ब्धा -ब्धं, उद्यतः -ता -तं, प्रचलीकृतः &c.

ON, *adv.* (Forward, in progression) अग्रे, अग्रं, अग्रतस् or expressed by प्र prefixed; as, 'going on,' अग्रे गमनं, प्रगमनं.—(Continuance) expressed by the verb आस् in combination with the pres. or indecl. part. of another verb. *See* KEEP, CONTINUE. (Upon the body, as clothes, &c.). *See To* PUT ON.

ONCE, *adv.* (One time) सकृत्, एकवारं -रे, एककृत्वस्, एककाले, एकसमये.—(On a certain time) एकदा, कदाचित्.—(Formerly) पूर्वं, पुरा. *See* the word. (At once, at the same time) समकाले, एककाले, एकवारे, एकदा.—(All at once) युगपत्, यौगपद्येन, एकपदं -दे.—(All at once in a body) सङ्घशस्.—(All at once, suddenly) अकस्मात्.—(At once, immediately) सद्यस्, तत्काले, तत्क्षणे.—(Once more) पुनरपि.

ON-DIT, *adv.* किंवदन्ती, जनप्रवादः, जनवादः, लोकप्रवादः.

ONE, *a.* (Single in number) एकः -का -कं; 'one man,' एकपुरुषः.—(Indefinitely) 'some one,' 'any one,' कश्चित् &c., कश्चन &c., कोऽपि &c. *See* SOME. (Mutuality) 'one another,' परस्परः -रा -रं, इतरेतरः &c., अन्योन्यः -न्या -न्यं; 'things that are equal to the same, are equal to one another,' यावन्तः पदार्थाः प्रत्येकम् एकेन केनचित् समास्ते ते सर्वे मिथः समानाः; 'one after another,' अनुपूर्वशस्, क्रमशस्, क्रमे क्रमे.—(Same, like) एकः -का -कं, समः -मा -मं, तुल्यः -ल्या -ल्यं; 'at one time,' एककाले, एकपदे; 'of one color,' एकवर्णः -र्णा -र्णं, सवर्णः &c.; 'having one object,' एकार्थः -र्था -र्थं, एकायः -या -यं; 'having one occupation,' एकवृत्तिः &c., 'in one place,' एकस्थाने, एकत्र; 'collected in one place,' एकत्रः &c., एकीभूतः -ता -तं.—(One only, but one) एकाकी -किनी -कि, 'having one only refuge,' अनन्यगतिः &c.; 'having the mind fixed on one object,' अनन्यमनस्कः &c., अनन्यधीः &c.—(One by one) एकैकं, एकैकशस्, एकशस्, प्रत्येकं, पृथक् पृथक् पृथक्.—(One day) एकदा, कदाचित्; 'in one way,' एकधा; 'on the one hand,' एकतस्; 'one of many,' एकतमः -मा -मं; 'one of two,' एकतरः -रा -रं; 'one of these,' तेषाम् एकः, तयोरेकः; 'one year old heifer,' एकाब्दा; 'one year old calf,' एकवत्सरो वत्सः.

ONE, *s.* (Such a one, such and such a person) अमुकः, अमुकजनः.—(A man, a person) जनः, व्यक्तिः *f.*, मनुष्यः; 'one's self,' आत्मा *m.* (न्), स्वयं indecl.; 'by resemblance to one's self,' आत्मोपम्येन; 'done by one's self,' स्वयङ्कृतः -ता -तं; 'one's own,' स्व, आत्म in comp.; 'like one's own body,' स्वशरीरवत्; आत्मशरीरवत्; 'one's own house,' आत्मगृहं, स्वगृहं. *See* OWN.

ONE-EYED, *a.* एकाक्षः -क्षा -क्षं, एकदृक् *m. f. n.* (ज्), एकाक्षिविकलः -ला -लं, एकनेत्रः -त्रा -त्रं, एकचक्षूः -क्षूः -क्षुः (स्), काणः -णा -णं, काणेयः -यी -यं, काणेरः -री -रं.

ONE-HANDED, *a.* एककरः -रा -रं, एकहस्तः -स्ता -स्तं, एकपाणिः -णिः -णि.

ONEIROCRITIC, ONEIROCRITICAL, *a.* स्वप्नविचारी *m.* (न्), स्वप्नप्रकाशकः, स्वप्नार्थज्ञापकः, स्वप्नार्थबोधकः.

ONEIROMANCY, *s.* स्वप्नविचारः, स्वप्नप्रकाशनं, स्वप्नार्थज्ञापनं, स्वप्नार्थबोधनं, स्वप्नपरीक्षा, स्वप्नादिलक्षणाद् भविष्यत्सूचनं or शुभाशुभकथनं.

ONENESS, *s.* एकता -त्वं, ऐक्यं, एकीभावः, ऐक्यभावः, अद्वैतं, अभेदः.—(Doctrine of oneness in theology). *See* UNITY.

To ONERATE, *v. a.* सभारं -रां कृ, भारवन्तं -वतीं -वत् कृ. *See To* LOAD.

ONEROUS, *a.* दुर्भरः -रा -रं, दुःसहः -हा -हं, दुर्वहः -हा -हं, भारी -रिणी -रि (न्), भारवान् -वती -वत् (त्), सभारः -रा -रं, कष्टकरः -रा -रं, पीडाकरः &c., गुरुः -रुः -रु.

ONION, *s.* पलाण्डुः *m.*, सुकन्दकः, सुकन्दकः, मुकुन्दकः, दुर्नामः, दुर्गन्धः, लताकः, गृञ्जनः, मुखगन्धकः, मुखदूषकः, तीक्ष्णकन्दः, महाकन्दः, नीचभोज्यः.

ONLY, *a.* (Single, one alone) एकः -का -कं, केवलः -ला -ली -लं, केवली -लिनी -लि (न्), कैवल्यः -ल्या -ल्यं, मात्रः in comp. मात्रकः -का -कं, अद्वितीयः -या -यं; 'an only son,' एकपुत्रः, एकसूनुः *m.*—(This and no other) अनन्यः -न्या -न्यं, नान्यः -न्या -न्यत्; 'having one only refuge,' अनन्यगतिः -तिः -ति; 'his only business is reading the Vedas,' वेदाध्ययनात् तस्य कार्यं नान्यत्.

ONLY, *adv.* केवलं, मात्रं -त्रेण -त्रात्, कुट्टारं, एकान्ततस्, एव; 'by calculation only,' गणितमात्रेण, केवलगणितेन, गणितेनैव; 'touch only,' स्पर्शमात्रं; 'from touch only,' स्पर्शमात्रात्.

ONOMANCY, *s.* नामाक्षरलक्षणाद् भविष्यत्सूचनं or शुभाशुभकथनं.

ONOMATOPŒIA, *s.* (In rhetoric) अनुकरणं, अनुकरणशब्दः, शब्दानुकरणं.

ONSET, *s.* आक्रमः -मणं, अभिक्रमः -मणं, अधिक्रमः -मणं, अभियोगः, अभियहः, अवस्कन्दः -न्दनं, अभ्याघातः; 'emulative onset,' अहम्पूर्विका.

ONTOLOGIST, *s.* सत्त्वविज्ञाः, सत्त्वमात्रविचारी *m.* (न्), भूतमात्रविचारी *m.*

ONTOLOGY, *s.* सत्त्वविद्या, सत्त्वमात्रविचारः, भूतमात्रविचारः.

ONWARD, ONWARDS, *adv.* अग्रे, अग्रतस्, पुरस्, पुरतस्, पुरस्तात्, अभितस्, अभिमुखं -खे, प्रतिमुखं -खे, अग्रभागं प्रति, उत्तरेण, अङ्गै, or expressed by प्र; as, 'proceeding onwards,' अग्रे गमनं, अग्रगमनं, प्रगमनं, प्रस्थानं.—(A little further) किञ्चिदग्रं -ग्रे, किञ्चिदपरतस्.

ONWARD, *a.* (Advanced, in advance) अग्रः -ग्रा -ग्रं, अग्रिमः -मा -मं, अग्रगामी -मिनी -मि (न्), अग्रगः -गा -गं, अग्रतःसरः -रा -रं, अग्रसरः -रा -रं, प्रगतः -ता -तं.—(Increased) वर्धितः -ता -तं, प्रवृद्धः -द्धा -द्धं, प्रकृष्टः -ष्टा -ष्टं.

ONYX, *s.* (Precious stone) गोमेदकः -कं, शिवधातुः *m.*

To OOZE, *v. n.* शनैः शनैः स्रु (c. 1. स्रवति, स्रोतुं) or स्यन्द् (c. 1. स्यन्दते -न्दितुं) or प्रस्यन्द् or क्षर् (c. 1. क्षरति -रितुं) or री (c. 4. रीयते, रेतुं) or गल् (c. 1. गलति -लितुं), क्लमे क्लमे or बिन्दुक्रमेण क्षरणं कृ.

OOZE, *s.* (Moist mud) सदूषपङ्कः, चिक्कणपङ्कः, क्षरत्पङ्कः.—(Exudation) स्यन्दनं, स्रवः, बिन्दुस्रावः, स्यन्दरसः, स्वेदः, द्रवः, धारा.

OOZING, *s.* शनैः शनैः स्रवणं or स्यन्दनं or क्षरणं or गलनं.

OOZING, *part.* शनैः शनैः स्यन्दी -न्दिनी -न्दि (न्) or स्यन्दमानः -ना -नं or निस्यन्दमानः -ना -नं or स्यन्नः -न्ना -न्नं or क्षरन् -रन्ती -रत् (त्) or स्रवन् &c. or रीणः -णा -णं.

OOZY, *a.* सदूषपङ्कमयः -यी -यं, क्षरत्पङ्कमयः &c., सदूषः -षा -षं.

OPACITY, OPAQUENESS, *s.* (The quality of being impervious to light) प्रकाशाभेद्यता, प्रभाभेद्यता, किरणाभेद्यता, अस्वच्छता, प्रकाशप्रतिबन्धकत्वं, प्रकाशरोधकत्वं, दृष्टिरोधकता.—(Obscurity) निष्प्रभता, अप्रकाशता, कलुषत्वं, प्रभाहीनता, सान्धकारता, अप्रसन्नता.—(Disease in the eyes) जुक्ल.

OPAQUE, OPACOUS, *a.* (Impervious to light) प्रकाशाभेद्यः -द्या -द्यं, प्रभाभेद्यः &c., किरणाभेद्यः &c., प्रकाशप्रतिबन्धकः -का -कं, प्रकाशरोधकः -का -कं, किरणरोधकः &c.—(Not shining by its own light) परप्रकाश्यः -श्या -श्यं.—(Obscure, not transparent) अस्वच्छः -च्छा -च्छं, निष्प्रभः -भा -भं, अप्रकाशः -शा -शं, प्रकाशहीनः -ना -नं, सान्धकारः -रा -रं, कलुषः -षा -षं.

OPAL, *s.* शिवधातुः *m.*, पाषाणमक्षिका, वज्राभः, क्षीरस्फटिकः, गोमेदसन्निभः.

To OPEN, *v. a.* (Unclose) विवृ (c. 5. -वृणोति -वृते -वरितुं -रीतुं), अपावृ, अवावृ, उद्घट् (c. 10. -घाटयति -यितुं), व्यादा (c. 3. -ददाति -दातुं); 'he opens the door,' द्वारं विवृणोति or उद्घाटयति.—(Unbar) निरर्गलीकृ.—(Open the mouth) मुखं व्यादा.—(Open the eyes) लोचने or चक्षुषी उन्मील् (c. 10. -मीलयति -यितुं) or प्रोन्मील्, उन्मिष् (c. 6. -मिषति -मेषितुं) or उत्क्षुल् (c. 10. -क्षालयति -यितुं), नयने विवृ.—(Open a book) पुस्तकं मुच् (c. 6. मुञ्चति, मोक्तुं) or विस्तृ, पुस्तकमोचनं कृ.—(Open a letter) उन्मुद्रीकृ, विमुद्रीकृ.—(Expand) विस्तृ (c. 10. -स्तारयति -यितुं), विकाश् (c. 10. -काशयति -यितुं), विकस् (c. 10. -कासयति -यितुं), विवृ, व्यादा.—(Lay open, make manifest) व्यञ्ज् (c. 7. -अनक्ति -क्तुं, c. 10. -अञ्जयति -यितुं), विकाश्, प्रकाश्, प्रकटीकृ, व्यक्तीकृ.—(Split, break, cut open) भिद् (c. 7. भिनत्ति, भेत्तुं), विभिद्, निर्भिद्, छिद् (c. 7. छिनत्ति, छेत्तुं), विच्छिद्.—(Expound) व्याख्या (c. 2. -ख्याति -तुं), व्याकृ, प्रकाश्, स्पष्टीकृ, व्यक्तीकृ, विवृ, विवरणं कृ.—(Clear) शुध् (c. 10. शोधयति -यितुं), विशुध्.—(Begin) आरभ् (c. 1. -रभते -रब्धुं), उपक्रम् (c. 1. -क्रमते -मितुं).

To OPEN, *v. n.* (Unclose itself) विवृतः -ता -तं भू, अपावृतः -ता -तं भू.—(Expand) विस्तृ in pass. (-स्तीर्यते), विवृ in caus. pass. (-वार्यते), विजृम्भ् (c. 1. -जृम्भते -म्भितुं), विततीभू.—(As flowers) विकस् (c. 1. -कसति -सितुं), प्रविकस्, स्फुट् (c. 6. स्फुटति -टितुं), फुल्ल् (c. 1. फुल्लति -ल्लितुं), विकसितः -ता -तं भू, विमुद्रीभू.—(Crack, open in chinks) स्फुट्, विदल् (c. 1. -दलति -लितुं), विदृ in pass. (-दीर्यते), भिद् in pass. (भिद्यते), विभिद्.—(Begin) आरभ् (c. 1. -रभते -रब्धुं), समारभ्, प्रवृत् (c. 1. -वर्तते -र्तितुं).

OPEN, *a.* (Unclosed) विवृतः -ता -तं, अनावृतः -ता -तं, अपावृतः -ता -तं, असंवृतः -ता -तं, उद्घाटितः -ता -तं, व्याक्तः -क्ता -क्तं, अपरावृतः &c.—(As the mouth) व्याक्तः -क्ता -क्तं, विवृतः &c.—(As the eyes) उन्मीलितः -ता -तं, उन्मिषितः -ता -तं, विवृतः &c.—(As a book) मुक्तः -क्ता -क्तं.—(Expanded) विततः -ता -तं, विस्तृतः -ता -तं, विस्तीर्णः -र्णा -र्णं, विकाशितः -ता -तं, विजृम्भितः -ता -तं, उज्जृम्भितः -ता -तं, उज्जृम्भः -म्भा -म्भं, जृम्भितः -ता -तं, जृम्भः -म्भा -म्भं, अपेतः -ता -तं.—(Unsealed, as a letter, &c.) उन्मुद्रः -द्रा -द्रं, विमुद्रः -द्रा -द्रं, उन्मुद्रीकृतः -ता -तं.—(Not stopped, without obstruction) अनर्गलः -ला -लं, निरर्गलः &c., असक्षाधः -धा -धं, अरुद्धः -द्धा -द्धं, अपिहितः -ता -तं, प्रतिबन्धरहितः -ता -तं, अव्यवधानः -ना -नं.—(Free, clear, unimpeded) मुक्तः -क्ता -क्तं, विमुक्तः &c., मोचितः -ता -तं, शुद्धः -द्धा -द्धं, विशुद्धः &c., अबद्धः -द्धा -द्धं, नियन्त्रणः -णा -णं, उन्मूलः -ला -लं, विशृङ्खलः -ला -लं, निर्विघ्नः -घ्ना -घ्नं, निरवरोधः -धा -धं.—(Plain, evident) व्यक्तः -क्ता -क्तं, प्रव्यक्तः &c., अभिव्यक्तः &c., स्पष्टः -ष्टा -ष्टं, विस्पष्टः &c.—(Public) प्रकाशः -शा -शं, सुप्रकाशः &c., प्रकटः -टा -टं.—(Not close, roomy) विरलः -ला -लं.—(Not covered with trees, as a country) निर्वनः -ना -नं, निर्वृक्षः -क्षा -क्षं, वृक्षशून्यः -न्या -न्यं.—(Ingenuous, candid) निष्कपटः -टा -टं, निर्व्याजः -जा -जं, निर्व्यलीकः -का -कं, विमलः -ला -लं, विमलात्मा -त्मा -त्म (न्), सरलः -ला -लं, शुद्धमतिः -तिः -ति, सरलमतिः &c., मायाहीनः -ना -नं, अवक्रः -क्रा -क्रं, अगूढभावः -वा -वं, उदारः -रा -रं; 'having an open countenance,' उदारलक्षणः -णा -णं.—(Unsheltered) अनाश्रयः -या -यं, निराश्रयः &c.—(Not hidden) अगूढः -ढा -ढं, अगुप्तः -प्ता -प्तं; 'to lay open,' प्रकाश् (c. 10. -काशयति -यितुं), प्रकाशीकृ. *See To* OPEN; 'an open space,' विविक्ता; 'open to the weather,' अभावकाशिकः -की -कं; 'open to all comers,' मुक्तद्वारः -रा -रं; 'open at one end,' एकमुखः -खा -खं; 'an open vowel,' उदात्तः; 'open day,' प्रकाशं; 'having gone out into the open air,' प्रकाशं निर्गत्य; 'open state of the organs of speech,' विवारः, विवृतता -त्वं.

OPENED, *p. p.* (Unclosed) उद्घाटितः -ता -तं, उद्घट्टितः -ता -तं, अपावृतः -ता -तं. *See* OPEN. (Unbarred) निरर्गलीकृतः -ता -तं.—(Unsealed) उन्मुद्रीकृतः -ता -तं, विमुद्रीकृतः &c.—(Uncovered) अनाच्छन्नः -न्ना -न्नं, अनाच्छादितः -ता -तं, अपवृतः -ता -तं.—(Split) स्फुटितः -ता -तं, दलितः -ता -तं, विदलितः &c., भिन्नः -न्ना -न्नं.—(As flowers) विकसितः -ता -तं, फुल्लः -ल्ला -ल्लं, स्फुटः -टा -टं, विमुद्रः -द्रा -द्रं.—(Made plain) व्यक्तीकृतः -ता -तं, प्रकाशितः -ता -तं, स्पष्टीकृतः &c., व्याख्यातः &c.—(Cleared) शोधितः -ता -तं.

OPENER, *s.* उद्घाटकः, उद्घाटनकृत्, विवरणकृत्, विकाशकः.

OPEN-EYED, *a.* विचेताः -ताः -तः, उत्फुल्लनयनः -ना -नं, सचेतनः &c.

OPEN-HANDED, *a.* मुक्तहस्तः -स्ता -स्तं, उदारहस्तः &c., उदारः -रा -रं.

OPEN-HEARTED, *a.* सरलमतिः -तिः -ति, शुद्धमतिः &c., अगूढभावः -वा -वं.

OPEN-HEARTEDNESS, *s.* सरलमतित्वं, शुद्धमतित्वं, उदारता, मायाहीनता.

OPENING, *s.* (Act of opening) उद्घाटनं, उद्घट्टनं, व्यादानं, विवृतिः *f.*, विवरणं.—(Aperture) छिद्रं, रन्ध्रं, द्वारं, मुखं.—(Beginning

commencement) आरम्भः, प्रारम्भः, उपक्रमः, उपोद्घातः.

OPENING, *a.* or *part.* (Commencing, first in order) आरम्भकः -का -कं, प्रारम्भकः &c., प्रथमः -मा -मं, आद्यः -द्या -द्यं.—(Expanding, as a flower) विकाशी -शिनी -शि (न्), विकासी &c., विकशन् -शन्ती -शत् (त्), विकसन् &c., प्रविकशन् &c., स्फुटन् &c.

OPENLY, *adv.* प्रकाशं, प्रकटं, प्राकट्येन, व्यक्तं, सुव्यक्तं, स्फुटं.

OPEN-MOUTHED, *a.* विवृतास्यः -स्या -स्यं, व्यात्तवक्त्रः -क्त्रा -क्त्रं, मुक्तकण्ठः -ण्ठा -ण्ठं, प्रमुक्तकण्ठः &c., गुहामुखः -खी -खं.

OPENNESS, *s.* (Freedom from covering or obstruction) विवृतत्वं, विवृतिः *f.*, अनावृतत्वं, अनावृतिः *f.*, व्यात्तता, मुक्तता -त्वं, अरुद्धता, निर्विघ्नता.—(Plainness, clearness) व्यक्तत्वं -ता, प्रव्यक्तता, स्पष्टता, शुद्धता, शुद्धिः *f.*, वैमल्यं, निर्म्मलता.—(Freedom from disguise) निर्व्याजता, अव्याजः, व्याजहीनता, कपटहीनता, निष्कपटत्वं, निष्कापट्यं.—(Frankness) सारल्यं, सरलता, अकापट्यं, अमाया, मायाहीनता, अवक्रता, दाक्षिण्यं, निर्व्यलीकता, भावागूढता, भावशुद्धता, शुद्धमतित्वं, अजिह्मता, उदारता.—(Publicity) प्रकाशता, प्रकाशः, प्राकट्यं, प्रसिद्धिः *f.*, प्रसिद्धता, अगूढता, अगुप्तता.—(Roominess, freedom from closeness) विरलता, वैरल्यं.—(Want of shelter) निराश्रयता, अनाश्रयता, आश्रयहीनत्वं, अभावकाशिकत्वं.—(Of a country) निर्वनत्वं.

OPERA, *s.* सङ्गीतं, तौर्य्यत्रिकं, नाट्यं, सङ्गीतविशिष्टो नाटकः.

To OPERATE, *v. n.* (Act, exert action) कृ, चेष्ट् (c. 1. चेष्टते -ष्टितुं), विचेष्ट्, कर्म्म कृ, चेष्टां कृ, प्रवृत् (c. 10. -वर्त्तयति -यितुं), कर्त्तृकः -का -कं भू.—(Effect, produce effect) उत्पद् (c. 10. -पादयति -यितुं), समुत्पद्, उपपद्, सम्पद्, फलम् उत्पद्, जन् (c. 10. जनयति -यितुं), सञ्जन्, साध् (c. 10. साधयति -यितुं), कार्य्यं साध्, प्रबलीभू, प्रभू.—(In surgery) शस्त्रक्रियां कृ, शस्त्रोपायं कृ, शस्त्रोपचारं कृ.

OPERATION, *s.* (Agency) कर्त्तृत्वं, कर्त्तृकत्वं, कारणत्वं, कारणं, हेतुता, प्रवर्त्तकत्वं, प्रयोजकत्वं.—(Action) क्रिया, कृतिः *f.*, कर्म्म *n.* (न्), चेष्टा, व्यापारः, विधानं, प्रवृत्तिः *f.*, प्रवर्त्तनं.—(Act, deed) कर्म्म *n.*, कार्य्यं, कृत्यं, चेष्टितं, विचेष्टितं; 'mental operation,' मनोव्यापारः; 'arithmetical,' परिकर्म्म *n.*, कर्म्म *n.*; 'secret in operation,' निगूढकार्य्यः -र्य्या -र्य्यं; 'speedy in operation,' आशुकारी -रिणी -रि (न्); 'slow,' मन्दकारी &c.—(In surgery) वैद्योपचारः, शस्त्रोपचारः, शस्त्रक्रिया, शस्त्रकृत्यं, शस्त्रोपायः, शस्त्रकर्म्म *n.*, उपचारः.

OPERATIVE, *a.* (Exerting agency) कर्म्मकारी -रिणी -रि (न्), कर्म्मकारः -रा -रं, क्रियाकारी &c., कारकः -का -कं, कर्त्तृकः -का -कं, कारणिकः -की -कं, हेतुकः -का -कं, प्रवर्त्तकः -का -कं, प्रयोजकः -का -कं.—(Producing effect, efficacious) कार्य्यसाधकः -का -कं, कार्य्यसम्पादकः &c., फलोत्पादकः &c., सिद्धिकरः -री -रं, गुणकारी &c., गुणावहः -हा -हं, प्रबलः -ला -लं, प्रभविष्णुः -ष्णुः -ष्णु.

OPERATIVE, *s.* कर्म्मकारः, शिल्पकारः, कारुकः, कारुः *m.*, शिल्पकर्म्मकारी *m.*

OPERATOR, *s.* कर्त्ता *m.* (र्त्तृ), कारकः, कर्त्तृकः, कार्य्यकर्त्ता *m.*, प्रवर्त्तकः.—(In surgery) शस्त्रोपचारकृत् *m.*, उपचारकारी *m.* (न्), उपचारकर्त्ता *m.*

OPEROSE, *a.* श्रमसाध्यः -ध्या -ध्यं, कष्टसाध्यः &c., श्रमी -मिणी &c.

OPHIOLOGY, *s.* सर्पविद्या, भुजङ्गविद्या, सर्पादिविषयका विद्या.

OPHIOMANCY, *s.* सर्पादिलक्षणाद् भविष्यत्सूचना or भविष्यदनुमानं.

OPHIOPHAGOUS, *a.* सर्पभक्षकः -का -कं, सर्पभोजी -जिनी -जि (न्).

OPHTHALMIA, OPHTHALMY, *s.* अभिमन्थः, अधिमन्थः, रक्ताधिमन्थः, रक्ताभिमन्थः, अर्ब्बुदः -दं, पिञ्जटः, चक्षूरोगः, नेत्ररोगः, नेत्रामयः, अक्षिरोगः, लोचनामयः.

OPHTHALMIC, *a.* चाक्षुषः -षी -षं, नेत्रसम्बन्धी -न्धिनी &c., नेत्रविषयः &c.

OPIATE, *s.* स्वप्नकारकम् or निद्राकारकम् औषधं, उपशमनं.

OPIATE, *a.* स्वप्नकृत् *m. f. n.*, निद्राकारी -रिणी -रि (न्), निद्राजनकः -का -कं, स्वापनः -ना -नं, उपशमनकारी &c., उपशायी &c., उपशमकृत्.

To OPINE, *v. n.* मन् (c. 4. मन्यते, मन्तुं), तर्क् (c. 10. तर्कयति -यितुं). *See To* THINK.

OPINIATED, OPINIATIVE, *a.* स्वमताभिमानी -निनी -नि (न्), मताभिमानी &c., स्वमताग्रही &c., मताग्रही &c., स्वमतवादी &c., मतवादी &c., दुराग्रही &c.

OPINIATIVENESS, *s.* स्वमताभिमानं -निता, स्वमताग्रहः, मताभिमानं, दुराग्रहः, स्वमतजाड्यं.

OPINION, *s.* मतं, मतिः *f.*, बुद्धिः *f.*, सम्मतं, तर्कः, विचारः, अनुमानं, बोधः, भासः, छन्दः; 'a different opinion,' विकल्पः, परमतं; 'difference of opinion,' मतिभेदः, मतभेदः, विप्रतिपत्तिः *f.*; 'opposed in opinion,' विप्रतिपन्नः -न्ना -न्नं; 'public opinion,' लोकमतं, जनमतं; 'regard for it,' लोकलज्जा, जनलज्जा; 'atheistical opinion,' नास्तिकमतं; 'legal opinion,' सूत्रं.—(Estimation) मानं, सम्मानं.

OPINIONATED, OPINIONATIVE. *See* OPINIATED, &c.

OPIUM, *s.* अफेनं, अहिफेनं, खस्खसरसः, उपविषं.

OPPIDAN, *a.* नागरिकः -की -कं, नागरः -री -रं, पौरः -री -रं.

OPPILATED, *p. p.* सम्बाधः -धा -धं, सङ्कीर्णः -र्णा -र्णं, सङ्कुलः -ला -लं.

OPPONENT, *a.* विरोधी -धिनी -धि (न्), प्रतिरोधी &c., विरुद्धः -द्धा -द्धं, वैरी -रिणी &c., प्रतियोगी &c., प्रतिकूलः -ला -लं, विपक्षः -क्षा -क्षं, प्रतिपक्षः &c., विपरीतः -ता -तं, विमुखः -खा -खं, पराङ्मुखः &c., विमतः -ता -तं, प्रतीपकः &c.

OPPONENT, *s.* प्रतिरोधी *m.* (न्), विरोधी *m.*, वैरी *m.*, शत्रुः *m.*, अरिः *m.*, प्रतियोगी *m.*, प्रतिरोद्धा *m.* (द्धृ), प्रतिरोधकः, प्रतिबन्धकः, प्रतियोद्धा *m.* (द्धृ), प्रतिपक्षः, अभियाती *m.* (न्), विजिगीषुः *m.*—(In controversy) विवादी *m.* (न्), पूर्व्ववादी *m.*, अग्रवादी *m.*, प्रतिवादी *m.*, उत्तरवादी *m.*, पूर्व्वपक्षी *m.*, प्रतिपक्षी *m.*, वादी *m.*

OPPORTUNE, *a.* समयोपयुक्तः -क्ता -क्तं, समयोचितः -ता -तं, समयानुकूलः -ला -लं, सामयिकः -की -कं, कालिकः &c., कालसदृशः -शी -शं, कालयोग्यः -ग्या -ग्यं, प्रस्तावसदृशः &c., प्रास्ताविकः -की -कं, प्राप्तावसरः -रा -रं, प्राप्तकालः -ला -लं, प्राप्तसमयः -या -यं, प्रसङ्गोपयुक्तः &c., काकतालीयः -या -यं.

OPPORTUNELY, *adv.* यथावसरं, काले, स्थाने, समयानुसारेण, समयोपयुक्तं, प्रसङ्गानुसारात्, प्रस्तावसदृशं, यथावकाशं, यथासमयं, यथाप्रसङ्गं, कालयोग्यं, यथायोग्यं, वेलायां.

OPPORTUNENESS, *s.* समयोपयुक्तता, कालयोग्यता, समयौचित्यं, प्रसङ्गयोग्यता, प्रसङ्गानुकूल्यं, कालिकत्वं.

OPPORTUNITY, *s.* अवसरः, प्रसङ्गः, समयः, प्रस्तावः, अवकाशः, कालः, कार्य्यकालः, कालयोगः, सन्धिः *m.*, कालसन्धिः *m.*, वेला, योगः, सुयोगः, स्थानं, वारः, प्रक्रमः; 'according to opportunity,' यथावसरं, यथाप्रसङ्गं, यथावकाशं; 'to lose one's opportunity,' कालं हृ (c. 1. हरति, हर्त्तुं) or हा (c. 3. जहाति, हातुं); 'to await it,' अवसरं प्रतिपाल् (c. 10. -पालयति -यितुं); 'one who has found an opportunity,' लब्धावकाशः -शा -शं.—(Means) साधनं, उपायः, सन्धानं.

To OPPOSE, *v. a.* and *n.* (Act against, resist) प्रतिकृ, विप्रतिकृ, विप्रकृ, प्रतिरुध् (c. 7. -रुणद्धि -रोद्धुं), विरुध्, संरुध्, विरुद्धीभू, प्रतिकूल (nom. प्रतिकूलयति -यितुं), प्रतिकूलीभू, पर्यवस्था (c. 1. -तिष्ठति -स्थातुं),

प्रतिसमास् (c. 2. -आस्ते -आसितुं), प्रतीप (nom. प्रतीपायते), प्रतिहन् (c. 2. -हन्ति -नुं), विपरीतः-ता -तं भू or अस्.—(Put in opposition, set one against the other) विरुद्धं -द्धां कृ, विरुद्धीकृ, परस्परं विरुध्, प्रतिकूलीकृ, विरोधिनं -नीं कृ.—(Hinder) निवृ (c. 10. -वारयति -यितुं), विघ्न (nom. विघ्नयति -यितुं), बाध् (c. 1. बाधते -धितुं), प्रतिबन्ध् (c. 9. -बध्नाति -न्धुं), विहन्, प्रतिहन्, व्याहन्, रुध्.—(Check) निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).

Opposed, *p. p.* विरुद्धः -द्धा -द्धं, प्रतिरुद्धः &c., पर्य्यवस्थितः -ता -तं, विपरीतः -ता -तं, प्रतिकूलः -ला -लं, प्रातिकूलिकः -की -कं, विरोधी -धिनी -धि (न्), विप्रतिकृतः -ता -तं, विप्रकृतः &c., विप्रतिपन्नः -न्ना -न्नं, प्रतियातः -ता -तं.—(Hindered, checked) वारितः -ता -तं, निवारितः -ता -तं, बाधितः -ता -तं, विहतः &c., प्रतिहतः &c., रुद्धः &c., विघ्नितः &c.; when 'opposed' signifies 'the opposite of,' इतर may be used; as, 'opposed to movable,' जङ्गमेतरः -रा -रं.

Opposer, *s.* विरोधी *m.* (न्), प्रतिरोधी *m.*, पर्यवस्थाता *m.* (तृ), प्रतियोगी *m.* (न्), विरोधकः, प्रातिकूलिकः, प्रतिहन्ता. *See* Opponent.

Opposite, *a.* (Situated in front, facing) अभिमुखः -खा -खी -खं, अभिमुखगतः -ता -तं, अभिमुखस्थः -स्था -स्थं, सम्मुखः -खा -खं, सम्मुखस्थः -स्था -स्थं, अभिसम्मुखः -खा -खं, सम्मुखीनः -ना -नं, प्रतिमुखः -खा -खं.—(Adverse, contrary) विपरीतः -ता -तं, प्रतिकूलः -ला -लं, विरुद्धः -द्धा -द्धं, विरोधी -धिनी -धि (न्), प्रतिरोधी &c., विपर्य्यस्तः -स्ता -स्तं, अपसव्यः -व्या -व्यं, प्रसव्यः &c., अपसव्यकः &c., प्रतिपक्षः -क्षा -क्षं, विपक्षः &c, अवकटः -टा -टं.—(Further, on the other side) परः -रा -रं, अपरः -रा -रं; 'the opposite bank,' पारं, परतीरं, तीरान्तरं.—(Reverse of) व्यस्तः -स्ता -स्तं, इतर in comp.; as, 'the opposite of movable,' जङ्गमेतरः -रा -रं; 'of white,' सितेतरः &c.; 'of left,' वामेतरः &c.; 'of innate,' सहजेतरः &c.—(Opposite side of the argument) उत्तरपक्षः, परपक्षः, प्रतिपक्षः.

Opposite, *s.* विपर्य्ययः, विपर्य्यायः, व्यत्ययः, व्यत्यासः, विपर्य्यासः, विपरीतं.

Oppositely, *adv.* (In front) अभिमुखं, सम्मुखं, प्रतिमुखं, सम्मुखीनं.—(Adversely) विपरीतं, वैपरीत्येन, प्रतिकूलं, विरुद्धं, विरोधेन, विपर्य्ययेण, प्रातिकूल्येन.

Opposition, *s.* विरोधः -धनं, प्रतिरोधः -धनं, प्रतिकारः, विप्रतिकारः, प्रतिक्रिया, प्रत्यवस्थानं, पर्य्यवस्था -स्थानं, प्रतियोगः -गिता, विप्रतिपत्तिः *f.*, प्रतिबन्धकता, प्रतिबन्धिता, प्रतियातः.—(State of being opposed) विरुद्धता, विपरीतता, वैपरीत्यं, प्रतिकूलता, प्रतिपक्षता, प्रातिकूल्यं.—(Contrariety) विपर्य्ययः, विपर्य्यायः, पर्य्ययः, विपर्य्यासः, वैपरीत्यं, व्यत्ययः, व्यत्यासः, निकारः.—(Impediment) व्याघातः, विघ्नः, बाधः -धा, प्रतिबन्धः, अवरोधः, उपरोधः, निरोधः, रोधः.—(Collective body of opposers) विरोधिजनसमूहः, प्रतियोगिपक्षः, विरोधकपक्षः.—(Hostile feeling) विरुद्धभावः, द्वेषभावः; 'opposition of interests,' विप्रतिपत्तिः *f.*; 'in opposition to what was before said,' पूर्व्वोक्तप्रतिपक्षे.

To oppress, *v. a.* पीड् (c. 10. पीडयति -यितुं), अभिपीड्, उपपीड्, निपीड्, उपनिपीड्, बाध् (c. 1. बाधते -धितुं), प्रबाध्, परिबाध्, अधिबाध्, द्रुह् (c. 4. द्रुह्यति, द्रोढुं, द्रोग्धुं), अभिद्रुह्, कृष् (c. 10. कर्षयति -यितुं), अभिद्रोहं कृ, मर्द् (c. 10. मर्दयति -यितुं), विडम्ब् (c. 10. -डम्बयति -यितुं), अपकृ, अपकारं कृ, मर्दनं कृ, उपमर्दनं कृ, प्रधृष् (c. 10. -धर्षयति -यितुं), उपद्रवं कृ, उपप्लवं कृ, नैष्ठुर्यं कृ, क्रौर्यं कृ, क्रूरवत् कृ, अभिभू, बलात्कारं कृ.

Oppressed, *p. p.* पीडितः -ता -तं, बाधितः -ता -तं, अतिदुःखः -खा -खं, अभिद्रुताशयः -या -यं, उपद्रुतः -ता -तं, विडम्बितः -ता -तं, अभिभूतः -ता -तं, अपकृतः -ता -तं, आकुलितः -ता -तं.

Oppression, *s.* (The act) पीडनं, प्रजापीडनं, अभिद्रोहः, द्रोहः -हणं, उपद्रवः, उपद्रवकरणं, उपमर्दः -र्दनं, विमर्दः -र्दनं, बाधः -धनं, कर्षणं, परिप्लवः, उपप्लवः, उपप्लवकरणं, अपकारः, अपकर्म्म *n.* (न्), अपक्रिया, बलात्कारः, निष्ठुरता, नैष्ठुर्यं, क्रूरता, क्रौर्यं, दौरात्म्यं, उत्पातः, विडम्बनं -ना, हठः, अन्यायकरणं.—(State) पीडा, बाधा, पीडितत्वं.—(Weight) भारः.

Oppressive, *a.* (Cruelly severe, or tyrannical) बाधकः -का -कं, पीडाकरः -रा -रं, पीडकः -का -कं, उपद्रवकारी -रिणी -रि (न्), उपद्रवी &c., उपमर्दकः -का -कं, अपकारकः &c., सबाधः -धा -धं, निष्ठुरः -रा -रं, क्रूरः -रा -रं, निर्दयः -या -यं, दुर्वृत्तः -त्ता -त्तं, क्लेशदायकः -का -कं, क्लेशदः -दा -दं, अन्यायकारी &c.—(Heavy) भारी -रिणी &c.

Oppressiveness, *s.* बाधकत्वं -ता, सबाधता, क्लेशकता, नैष्ठुर्यं, क्रौर्यं.

Oppressor, *s.* प्रजापीडकः, उपद्रवकर्त्ता *m.* (र्त्तृ), उपद्रवी *m.* (न्), क्रूरचरितः, निष्ठुरः, निर्दयः, अत्याचारः, दुरात्मा *m.* (न्), दुर्जनः, दुर्वृत्तः, दस्युः *m.*

Opprobrious, *a.* निन्दकः -का -कं, निन्दार्थकः &c., निन्दारूपः -पा -पं, निन्दात्मकः &c., गर्हात्मकः &c., गर्हार्थकः &c., अपवादकः &c., मुखरः -रा -रं, दुर्मुखः -खा -खं, परुषः -षा -षं, गर्ह्यः -र्ह्या -र्ह्यं.

Opprobriously, *adv.* निन्दापूर्व्वं, सापवादं, सतिरस्कारं, गर्हणीयं.

Opprobriousness, *s.* निन्दकत्वं, अपवादकता, अभिवादः, पौरुष्यं, मौखर्य्यं.

Opprobrium, *s.* निन्दा, अपवादः, घृणा, गर्हा -र्हणं, कुत्सा, तिरस्कारः, अवज्ञा -ज्ञानं, परिभवः, अपमानं, वाच्यता, वचनीयता, धिक्क्रिया, कुख्यातिः *f.*

To oppugn, *v. a.* प्रतिकृ, विप्रतिकृ, प्रतिरुध्, विरुध् &c. *See To* oppose.

Oppugnancy, *s.* विरोधः, प्रतिरोधः, प्रातिकूल्यं, वैपरीत्यं, प्रतियोगिता.

Oppugned, oppugner. *See* Opposed, opposer, opponent.

Optative, *a.* इच्छासूचकः -का -कं, इच्छाबोधकः &c., अभिलाषबोधकः &c., अभिलाषज्ञापकः &c. The grammatical symbol is सनन्तः.

Optic, optical, *a.* (Pertaining to vision) चाक्षुषः -षी -षं, दृष्टिविषयकः -का -कं, दृष्टिसम्बन्धी -न्धिनी &c.—(Pertaining to optics) दृक्शास्त्रसम्बन्धी &c., दृक्शास्त्रविषयकः &c.

Optic, *s.* (Organ of sight) दृगिन्द्रियं, चक्षुरिन्द्रियं, दर्शनसाधनं.

Optician, *s.* (Maker of optic instruments) चाक्षुषयन्त्रकारकः -कारी *m.* (र्त्तृ), दृष्टिसाधकयन्त्रकारः, दृष्टियन्त्रविक्रेता *m.* (तृ), चाक्षुषयन्त्रविक्रयी *m.*—(Skilled in optics) दृक्शास्त्रज्ञः, चाक्षुषज्ञानी *m.* (न्).

Optics, *s. pl.* दृग्विद्या, चाक्षुषविद्या, दृष्टिविद्या, दृक्शास्त्रं, दृष्टिविषया विद्या, चाक्षुषं ज्ञानं, दर्शनानुशासनं.

Optimacy, *s.* कुलीनवर्गः, कुलीनलोकः, कौलीन्यं, कुलीनता -त्वं.

Optimism, *s.* उत्तमता -त्वं, अत्युत्तमता -त्वं, सज्जनता -त्वं.

Option, *s.* (Power of choosing) विकल्पः -ल्पकः, अनुकल्पः, कल्पः, विभाषा, इच्छा, वरणाधिकारः.—(Wish) इच्छा, अभिलाषः, कामः, मनस्कामः, रुचिः *f.*, अभिरुचिः, ईप्सितं, अभीप्सितं.

Optional, *a.* वैकल्पिकः -की -कं, विकल्पकः &c., सविकल्पकः -का -कं, सानुकल्पिकः -की -कं, विकल्पितः -ता -तं, सविकल्पः -ल्पा -ल्पं, ऐच्छिकः -की -कं, काम्यः -म्या -म्यं, अभिकामिकः &c., यथाकामः -मा -मं, विभावितः -ता -तं; 'an optional matter,' विकल्पविषयः, विभाविषयः.

Optionally, *adv.* सविकल्पं -ल्पकं, सानुकल्पं, विकल्पेन, विकल्पपूर्व्वं.

Opulence, *s.* धनाढ्यता, धनबाहुल्यं, धनसम्पत्तिः *f.*, सम्पत्तिः *f.*, धनैश्वर्य्यं, ऐश्वर्य्यं, महाधनत्वं, धनसमृद्धिः *f.*, लक्ष्मीः *f.*, श्रीः *f.*, लक्ष्मीवत्त्वं.

OPULENT, *a.* श्रीमान् -मती -मत् (न्), धनाढ्यः -ढ्या -ढ्यं, महाधनः -ना -नं, बहुधनः -ना -नं, अतिधनी -निनी -नि (न्), धनी &c., अतिधनवान् &c., धनवान् &c., बहुविज्ञवान् &c., बहुद्रव्यवान् &c., वसुमान् &c., अर्थवान् &c., सम्पत्तिमान् &c., लक्ष्मीवान् &c., समृद्धः -द्धा -द्धं, सम्पन्नः -न्ना -न्नं, धनेश्वरः, लक्ष्मीशः, सुराः *m. f.* (रै), आढ्यः &c., वर्धिष्णुः -ष्णुः -ष्णु, इभ्यः -भ्या -भ्यं.

OPULENTLY, *adv.* धनबाहुल्येन, धनाढ्यवत्, महाधनवत्, सम्पत्तिपूर्वं.

OR, *conj.* वा placed after a word, वापि, अथवा, यद्वा; 'friend or foe,' मित्रं वा शत्रुर् वा.—(Or else) अथवा, किंवा, अन्यथा, इतरथा, आहोस्वित्.

ORACLE, *s.* (Answer of a god to an inquiry made) शकुनं -नः, प्रश्नः, प्रसादः; 'through a voice,' देववाणी, आकाशवाणी.—(The deity who gives the answer) प्रश्नदेवता, प्रसाददेवता, प्रश्नदेवः, शकुनदेवः.—(The place where the answer is given) प्रश्नस्थानं, शकुनस्थानं, प्रसादस्थानं.—(A person whose opinion is of great authority) प्रमाणं, आप्तः.—(A wise or authoritative sentence) आप्तवचनं, आप्तोक्तिः *f.*

ORACULAR, ORACULOUS, *a.* शाकुनिकः -की -कं, शाकुनः -नी -नं, शकुनदः -दा -दं.—(Like an oracle) देववाणीतुल्यः -ल्या -ल्यं, देववाणीसदृशः -शी -शं.—(Authoritative) प्रामाणिकः -की -कं, आप्तः -प्ता -प्तं.—(Obscure) गूढार्थः -र्था -र्थं.

ORACULARLY, *adv.* देववाणीपूर्वं, देववाणीसादृश्येन, सशकुनं.

ORAL, *a.* (Spoken by the mouth, not written) मुखतीयः -या -यं, उक्तः -क्ता -क्तं, अलिखितः -ता -तं, मुखकथितः -ता -तं, श्रुतः -ता -तं.

ORALLY, *adv.* मुखतस्, मुखात् -खेन, अलिखितं, मुखद्वारा.

ORANGE, *s.* (Tree) नारङ्गः, नागरङ्गः, नार्यङ्गः, सुरङ्गः, त्वग्गन्धः, दन्तशठः, ऐरावतः, किम्मीरः, चोलकी *m.* (न्), लवातरुः *m.*, नादेयः, भूमिजम्बुका, राजफलिन्नकः.—(The fruit) नारङ्गफलं, नागरङ्गफलं, पिच्छिलः.

ORANGE-COLORED, *a.* नारङ्गवर्णः -र्णा -र्णं, कौसुम्भः -म्भी -म्भं, पिच्छिलवर्णः &c.

ORANGE-PEEL, *s.* पिच्छिलत्वक् *m.* (च्), नारङ्गफलत्वक् *m.* (च्).

ORANGERY, *s.* नारङ्गवृक्षवाटिका, नारङ्गतरुवाटिका.

ORATION, *s.* वाक्प्रबन्धः, वाक्यप्रबन्धः, वाक्यं, प्रवचनं, सालङ्कारवाक्यं, सालङ्कारभाषणं, सोपपत्तिकवाक्यं, अलङ्कारमयं वाक्यं.

ORATOR, *s.* (Public declaimer) सभावक्तृ *m.* (क्तृ), सभाप्रवक्तृ *m.*, सभावादी *m.* (न्), सभापण्डितः, वक्तृ *m.*, प्रवक्तृ *m.*, वादी *m.*, प्रवचनकर्त्तृ *m.*—(Eloquent speaker) वाक्पटुः *m.*, प्रवचनपटुः *m.*, सुवक्तृ *m.*, सद्वक्तृ *m.*, वागीशः, वागीश्वरः, वाक्पण्डितः, वाग्विद् *m.*, वाग्विदग्धः, सभापण्डितः, वाग्विशारदः, वाक्यद्वारेण विस्मयजनकः.

ORATORICAL, *a.* वाग्लङ्कारमयः -यी -यं, वाङ्मयः -यी -यं, वाक्चातुर्यमयः &c., सालङ्कारवाक्यमयः &c., सभावक्तृत्वसम्बन्धी &c., सभापण्डित्यसम्बन्धी &c., सभापण्डित्यविषयः -या -यं, प्रवचनसम्बन्धी &c.

ORATORIO, *s.* तालबद्धं धर्मकीर्त्तनं, धर्मकीर्त्तनविषया सुखररचना or सुखरसङ्गः.

ORATORY, *s.* (Art of public speaking) सभावक्तृत्वं, सभाप्रवचनविद्या, सभाप्रवचनं, सभाप्रवचनपाण्डित्यं, सभापाण्डित्यं.—(Art of speaking eloquently) वाक्पटुता, प्रवचनपटुता, सुवक्तृत्वं, सद्वक्तृता, वक्तृत्वशक्तिः *f.*, वाक्शक्तिः *f.*, वाक्चातुर्यं, शब्दचातुर्यं, वाचाशक्तिः *f.*, वाग्योगिः *f.*, शब्दपाण्डित्यं, सुप्रलापः.—(Place for prayer) प्रार्थनागारं, प्रार्थनस्थानं.

ORB, *s.* मण्डलं, गोलः -लं, गोलकः, वर्तुलं, विम्बः -म्बं, विम्बकं, परिमण्डलं, चक्रं, चक्रवालं, वृत्तं, वलयः -यं; 'circular array,' चक्रव्यूहः.

ORBATE, *a.* विहीनः -ना -नं, हीनः -ना -नं, मातृपितृहीनः &c.

ORBED, ORBICULAR, ORBICULATE, *a.* मण्डलाकारः -रा -रं, मण्डलाकृतिः -तिः -ति, गोलाकारः &c., मण्डली -लिनी -लि (न्), विम्बी &c., वर्तुलः -ला -लं, वर्तुलाकारः &c., चक्राकारः &c., चाक्रिकः -की -कं, चक्री &c., चाक्रेयः -यी -यं.

ORBICULARLY, *adv.* मण्डलाकारेण, गोलाकारेण, वर्तुलरूपेण, चक्रवत्.

ORBICULARNESS, *s.* मण्डलाकारता, गोलाकारता, मण्डलता, वर्तुलता.

ORBIT, *s.* (Of a planet) कक्षा -क्षः, ग्रहपथः, ग्रहमार्गः, मण्डलं; 'apex of an orbit,' उच्चः; 'apsis,' मन्दोच्चः.

ORCHARD, *s.* वृक्षवाटिका, फलवृक्षवाटी, तरुवाटिका, वाटिका, वाटः -टी -टं, उपवनं, वृक्षोद्यानं, फलवृक्षोद्यानं.

ORCHESTRA, *s.* (Place for musicians) वादित्रस्थानं, वाद्यभाण्डस्थानं, वादित्रस्थलं, भाण्डवादकस्थानं.—(Body of musicians) भाण्डवादकगणः, वादित्रसमुदायः, वाद्यभाण्डं, वादकसमूहः.

ORCHESTRAL, *a.* वाद्यभाण्डसम्बन्धी &c., वादकगणसम्बन्धी &c.

To ORDAIN, *v. a.* (Institute) विधा (c. 3. -दधाति -धातुं), अभिधा, कॢप् (c. 10. कल्पयति -यितुं), प्रकॢप्, परिकॢप्, स्था in caus. (स्थापयति -यितुं), प्रतिष्ठा, संस्था, व्यवस्था, प्रचुद् (c. 10. -चोदयति -यितुं), आदिश् (c. 6. -दिशति -देष्टुं), सन्दिश्, निर्दिश्.—(Appoint) नियुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं, c. 10. -योजयति -यितुं), अधिकृ, प्रकृ, समादिश्, व्यादिश्.—(To any office) अधिकारे or पदे नियुज् or अभिषिच् (c. 6. -सिञ्चति -सेक्तुं), नियोजनं कृ, अधिकृतं -तां कृ.—(Invest with sacerdotal functions) धर्म्माधिकारे or धर्म्मपदे नियुज्, धर्म्माधिकारयुक्तं कृ, धर्म्मपदनियुक्तं कृ, दीक्ष् (c. 1. दीक्षते -क्षितुं), दीक्षां कृ, दीक्षाकर्म्मपूर्वं धर्म्माधिकारं प्रविश् (c. 10. -वेशयति -यितुं), धर्म्मपददीक्षितं कृ.

ORDAINED, *p. p.* (Instituted, established) विहितः -ता -तं, कल्पितः -ता -तं, प्रकल्पितः &c., स्थापितः &c., प्रतिष्ठापितः, व्यवस्थापितः &c., व्यवस्थितः &c., चोदितः &c., प्रचोदितः &c., निर्दिष्टः -ष्टा -ष्टं, नियमितः &c., नियतः &c.—(Appointed) नियुक्तः -क्ता -क्तं, नियोजितः -ता -तं, अधिकृतः -ता -तं, योजितः -ता -तं.—(To any office) अधिकारे or पदे नियुक्तः &c., अधिकारयुक्तः &c., अभिषिक्तः &c.—(To sacerdotal functions) धर्म्माधिकारे नियुक्तः &c., धर्म्मपदनियुक्तः, धर्म्माधिकारयुक्तः, धर्म्मपददीक्षितः, दीक्षितः.

ORDAINER, *s.* प्रकल्पकः, विधाता *m.* (तृ), विधायी *m.* (न्), विधायकः, स्थापकः, प्रचोदकः, नियोजकः, योजकः.

ORDEAL, *s.* परीक्षा, धर्म्माधर्म्मपरीक्षा, दिव्यं, सत्यं, प्रमाणं, कोषः -षं, कोशः, शापः, शपथः, शपनं, प्रत्ययः, क्रिया; 'fiery ordeal,' अग्निपरीक्षा, तप्तदिव्यं; 'ordeal of the balance,' तुलापरीक्षा, तुलाकोशः; 'purification by ordeal,' कोषशुद्धिः *f.*; 'the act of undergoing an ordeal,' दिव्यग्रहणं, दिव्यकरणं, कोषग्रहणं; 'that undergoes one,' दिव्यकारी -रिणी -रि (न्), कोषग्राही &c.; 'to undergo one,' कोषं or सत्यं or दिव्यं कृ; 'proved by ordeal,' शापितः -ता -तं.

ORDER, *s.* (Regular disposition, arrangement) क्रमः, अनुक्रमः, पर्य्यायः, आनुपूर्व्यं, आनुपूर्वी, परिपाटी -टिः *f.*, पारिपाट्यं, विन्यासः, यूहनं, यूढिः *f.*, आवृत् *f.*, पारम्पर्यं, परम्परा, व्यवस्था, व्यवस्थापनं, क्रमेण स्थापनं, प्रतिविधानं, संविधानं, विरचनं -ना; 'inverted order,' व्यतिक्रमः, व्युत्क्रमः; 'natural order of words,' अन्वयः.—(Established mode of proceeding) क्रमः, मार्गः, रीतिः *f.*, नियमः, पद्धतिः *f.*; 'direct order,' आनुलोम्यं; 'in direct order,' अनुलोमः -मा -मं; 'inverse order,' प्रातिलोम्यं; 'in inverse order,' प्रतिलोमः -मा -मं, विलोमः &c.—(Command) आज्ञा,

आदेशः, निदेशः, निर्देशः, शासनं, शिष्टिः *f.*, शास्तिः *f.*, नियोगः, प्रेरणा, अपवादः, प्रयुक्तिः *f.*—(Precept, rule) नियमः, चोदनं -ना, विधिः *m.*, विधानं, वचनं; 'written order,' आज्ञापत्रं, शासनपत्रं; 'general order,' सामान्यशासनं, साधारणाज्ञा.—(Class, grade) गणः, वर्गः, वर्णः, जातिः *f.*; 'the lower orders,' अवरवर्णाः *m. pl.*, अधमवर्णाः, प्राकृतवर्गः, अन्यवर्गः, अन्यजातीयाः *m. pl.*, अधमजातीयाः *m. pl.*; 'the middle or common order,' सामान्यवर्गः, सामान्यपक्षः, साधारणपक्षः.—(Religious order) आश्रमः. There are four Áśramas, corresponding to the four stages of the Brahman's life. Every Brahman who has passed through these four stages is supposed to have passed through the four orders in succession. When, in the first, he is called ब्रह्मचारी *m.*; in the 2d, गृहस्थः; in the 3d, वानप्रस्थः or वैखानसः or यती; in the 4th, भिक्षुः *m.*, सन्यासी *m.* The first order, or that of the religious student, is also called लिङ्गं. Other terms, expressive of religious orders, are मतं, मार्गः, सम्प्रदायः, पन्थाः *m.* (पथिन्); 'head of a religious order,' आश्रमगुरुः *m.*—(In good order, in proper state) सुस्थः -स्था -स्थं, सुस्थितः -ता -तं, सुरक्षितः -ता -तं.—(In order, properly arranged) सुविन्यस्तः -स्ता -स्तं, सुरचितः -ता -तं, सुव्यवस्थितः -ता -तं, क्रमेण स्थापितः -ता -तं; 'in regular order,' यथाक्रमं, क्रमेण -मात्, क्रमशस्, अनुपूर्व्शस्, अनुक्रमशस्, सुपरिपाट्या.—(In order to, for the purpose) अर्थं or अर्थे affixed; as, 'in order to read,' अध्ययनार्थं, or expressed by the dat. c.; as, 'in order to find a fourth quantity,' चतुर्थैराशेर् अवगमाय.—(Out of order) अव्यवस्थितः -ता -तं, अनवस्थितः &c., भग्नक्रमः -मा -मं, असुस्थः -स्था -स्थं, अस्वस्थः &c.

To ORDER, *v. a.* (Dispose, arrange) विधा (c. 3. -दधाति -धातुं), संविधा, विरच् (c. 10. -रचयति -यितुं), विन्यस् (c. 4. -अस्यति -असितुं), परिकॢप् (c. 10. -कल्पयति -यितुं), व्यूह् (c. 1. -ऊहते -हितुं), क्रमेण स्था in caus. (स्थापयति -यितुं), व्यवस्था.—(Command) आज्ञा in caus. (-ज्ञापयति -यितुं), समाज्ञा, आदिश् (c. 6. -दिशति -देष्टुं), समादिश्, सन्दिश्, व्यादिश्, प्रतिसन्दिश्, प्रकॢप्, कॢप्, चुद् (c. 10. चोदयति -यितुं), अभिचुद्, प्रेष् (c. 10. -ईरयति -यितुं), शास् (c. 2. शास्ति, शासितुं), आशास्, अनुशास्.—(Manage) विधा, प्रणी (c. 1. -नयति -नेतुं), सम्प्रणी, निर्वह् (c. 10. -वाहयति -यितुं).

ORDERED, *p. p.* (Disposed, arranged) व्यवस्थापितः -ता -तं, व्यवस्थितः -ता -तं, विधिवितः -ता -तं, रचितः -ता -तं, विन्यस्तः -स्ता -स्तं, विहितः -ता -तं, प्रविहितः -ता -तं.—(Commanded) आज्ञापितः -ता -तं, आज्ञप्तः -प्ता -प्तं, आदिष्टः -ष्टा -ष्टं, समादिष्टः &c., निर्दिष्टः &c., चोदितः -ता -तं, प्रचोदितः &c., प्रेरितः -ता -तं.—(Managed) प्रणीतः -ता -तं, निर्वाहितः -ता -तं.

ORDERER, *s.* आज्ञापकः, आज्ञापयिता *m.* (तृ), आज्ञाकरः *m.* (रिन्), आदेष्टा *m.* (ष्टृ), आदेशी *m.* (न्), निदेष्टा *m.*, प्रकल्पकः.

ORDERLESS, *a.* क्रमहीनः -ना -नं, क्रमरहितः -ता -तं, क्रमशून्यः -न्या -न्यं, अक्रमः -मा -मं, अव्यवस्थितः -ता -तं, अनवस्थितः &c.

ORDERLINESS, *s.* सक्रमत्वं, क्रमिकता, यथाक्रमता, यथानुक्रमता, अनुक्रमः -मणं, अवस्थितिः *f.*, व्यवस्थितत्वं, व्यवस्था. *See* METHODICALNESS.

ORDERLY, *a.* क्रमिकः -का -कं, क्रमकः -का -कं, यथाक्रमः -मा -मं, यथानुक्रमः &c., सक्रमः &c., क्रमानुगतः -ता -तं, व्यवस्थितः -ता -तं, यथान्यायः -या -यं, क्रमानुसारी -रिणी -रि (न्), अनुक्रमः -मा -मं, अनुपूर्व्यः -र्व्या -र्व्यं, आन्वयिकः &c. *See* METHODICAL.

ORDERLY, *adv.* यथाक्रमं, यथानुक्रमं, अनुक्रमं -मेण, सक्रमं, यथापर्य्यायं.

ORDINAL, *a.* क्रमसूचकः -का -कं, क्रमवाचकः &c., क्रमिकः -का -कं.

ORDINAL, *s.* (Number) क्रमिकसंख्या, क्रमवाचकसंख्या.—(Book containing services of the church) पद्धतिः *f.*, नियमसङ्ग्रहः, विधिसङ्ग्रहः.

ORDINANCE, *s.* (Rule, established law) नियमः, विधिः *m.*, विधानं, व्यवस्था, शासनं, निदर्शनं, चोदना, नियोगः, सूत्रं, अनुशासनं, निदेशः, आदेशः, निरूपणं.—(Of religion) विधिः *m.*, धर्म्मविधिः, विधानं, शास्त्रविधानं, संस्कारः, मर्य्यादा, शास्त्रमर्य्यादा, कर्म्म *n.* (न्), क्रिया, नित्यकर्म्म *n.*, अनुष्ठानं, दैवकर्म्म *n.*, कल्पः, संविधानं; 'subsidiary ordinance,' प्रतिविधानं, प्रतिविधिः *m.*

ORDINARILY, *adv.* प्रायस्, प्रायशस्, प्रायेण, सामान्यतस्, साधारण्येन, बहुशस्, बाहुल्येन, भूयस्, भूयिष्ठं.

ORDINARY, *a.* (Common, usual) प्रायिकः -की -कं, सामान्यः -न्या -न्यं, साधारणः -णा -णी -णं, प्रसिद्धः -द्धा -द्धं, लोकप्रसिद्धः &c.—(Customary) व्यवहारिकः -की -कं, व्यावहारिकः &c., आचारिकः -की -कं, यथाव्यवहारः -रा -रं, नैयमिकः -की -कं, यथारीतिः -तिः -ति, नितः -ता -तं, नैत्यकः -की -कं, नैतिकः &c., यथापद्धतिः -तिः -ति.—(Vulgar, middling, inferior) प्राकृतः -ता -तं, लौकिकः -की -कं, मध्यमः -मा -मं, अवरः -रा -रं.

ORDINARY, *s.* (Bishop) धर्म्माध्यक्षः.—(Place for eating in common) साधारणभोजनशाला, सामान्यभोजनस्थानं; 'in ordinary,' नितः -ता -तं, प्रायिकः -की -कं, साधारणः -णी -णं.

ORDINATE, *a.* क्रमिकः -का -कं, यथाक्रमः -मा -मं, यथानुक्रमः &c.

ORDINATION, *s.* (Institution) विधानं, व्यवस्थापनं, स्थापनं -ना, कल्पनं, प्रकल्पनं, चोदना.—(Appointment) नियोगः, नियोजनं, नियुक्तिः *f.*—(To sacerdotal functions) धर्म्माधिकारनियोजनं, धर्म्माधिकारदीक्षा, धर्म्मपदनियोगः, दीक्षा.

ORDNANCE, *s.* आग्नेययन्त्रसमूहः, युद्धयन्त्रसमूहः, युद्धास्त्रसामग्री.

ORDURE, *s.* पुरीषं, विष्ठा, विट्ठा, विट् *f.* (ड्), शकृत् *n.*, अनेध्यं, उच्चारः, उच्चरितं, मलं, शरीरमलं, अवस्करः, अपस्करः, कल्कं, गूथः -थं, दूषीं, हवं, पूतिकं, शमलं; 'to void it,' पुरीषोत्सर्गं कृ, पुरीषम् उत्सृज् (c. 6. -सृजति -स्रष्टुं) or उच्चर् (c. 1. -चरति -रितुं).

ORE, *s.* धातुः *m.*, असंस्कृतधातुः *m.*, अशोधितधातुः *m.*, अपरिष्कृतधातुः *m.*, आकरीयधातुः *m.*, खनिजधातुः *m.*

ORGAN, *s.* (Instrument of action) साधनं, कर्म्मसाधनं, करणं, उपकरणं, कारणं.—(Organ of action) कर्म्मेन्द्रियं. Of these, five are given: 1. 'the larynx or voice,' वाक् *f.* (च्); 2. 'the hand,' पाणिः *m.*; 3. 'the foot,' पादः; 4. 'the organ of excretion,' पायुः *m.*; 5. 'of generation,' उपस्थः.—(Organ of sense or perception) इन्द्रियं, ज्ञानेन्द्रियं, ज्ञानसाधनं, विषयि *n.* (न्), हृषीकं. Of these, five are reckoned: 1. 'the eye,' चक्षुस्; 2. 'the ear,' श्रोत्रं; 3. 'the nose,' घ्राणं; 4. 'the tongue,' जिह्वा; 5. 'the skin,' त्वक् *f.* (च्). The word इन्द्रियं may be affixed to any of these; as, 'the organ of sight,' चक्षुरिन्द्रियं &c.; for the corresponding विषय or 'objects of sense,' *see* OBJECT.—(Internal organ, or organ of the intellect) अन्तरिन्द्रियं, धीन्द्रियं. Of these, four are enumerated: 1. 'the mind, or organ of thought,' मनस्; 2. 'apprehension,' बुद्धिः *f.*; 3. 'individuality, or sense of self,' अहङ्कारः; 4. 'feeling,' चित्तं. In opposition to the 'internal organs,' the

organs of perception and action are sometimes called 'external organs,' बहिरिन्द्रियाणि. The organs collectively, इन्द्रियग्रामः, इन्द्रियवर्गः.—(Instrument, or means of communication) द्वारं, साधनं.—(Musical instrument) वंशी, सुषिरवंशपूर्वीवाद्यं.

ORGANIC, ORGANICAL, *a.* (Pertaining to the organs) ऐन्द्रियिकः -की -कं, इन्द्रियसम्बन्धी -न्धिनी &c.—(Consisting of, or containing organs) इन्द्रियमयः -यी -यं, कर्म्मसाधनमयः &c.—(Produced by the organs) इन्द्रियोत्पन्नः -न्ना -न्नं, इन्द्रियजनितः -ता -तं.—(Possessing organs) इन्द्रियवान् -वती -वत् (त्), इन्द्रियसम्पन्नः -न्ना -न्नं, इन्द्रियविशिष्टः -ष्टा -ष्टं, जीवित्वसाधनविशिष्टः &c., प्राणित्वसाधनसम्पन्नः &c., करणसम्पन्नः &c., सकरणः -णा -णं.—(Instrumental) कारणिकः -की -कं.

ORGANICALLY, *adv.* इन्द्रियव्यूहेन, इन्द्रियव्यूहपूर्व्वं, इन्द्रियतस्.

ORGANIST, *s.* वंशीवादकः, पूर्व्वोक्तसुषिरवाद्यवादकः.

ORGANIZATION, *s.* (Formation with organs) इन्द्रियकरणं, इन्द्रियव्यूहनं, इन्द्रियविन्यासः, इन्द्रियविशिष्टता, सेन्द्रियता.—(Arrangement of the parts or divisions of a body) भागविन्यासः, भागव्यूहनं, भागव्यूढिः *f.*, भागविरचना, भागसंविधानं, भागप्रतिविधानं, भागव्यवस्थापनं.—(Structure) व्यूहः -हनं, व्यूढिः *f.*, संव्यूहः -हनं, विधानं, संविधानं, विन्यासः, संस्थापनं, संस्थितिः *f.*, निर्म्मायं, निर्म्मितिः *f.*, सृष्टिः *f.*, घटनं.

To ORGANIZE, *v. a.* (Form with organs or suitable parts) इन्द्रियवन्तं -वतीं -वत् कृ, इन्द्रियसम्पन्नं -न्नां कृ, इन्द्रिययुक्तं -क्तां कृ, सेन्द्रियं -यां कृ, साङ्गं -ङ्गां कृ, सावयवं -वां कृ, अवयवसम्पन्नं -न्नां कृ, साङ्गोपाङ्गं -ङ्गां कृ, अङ्गोपाङ्गसम्पन्नं -न्नां कृ.—(Form, construct) कॢप् (c. 10. कल्पयति -यितुं), रच् (c. 10. रचयति -यितुं), विरच्, विधा (c. 3. -दधाति -धातुं), संस्था *in caus.* (-स्थापयति -यितुं), निर्म्मा (c. 2. -माति, c. 3. -निर्म्मीते -मातुं), घट् (c. 10. घटयति -यितुं), पिश् (c. 6. पिंशति, पेशितुं), रचनां कृ, विरचनां कृ.—(Dispose or distribute into suitable parts) व्यूह् (c. 1. -ऊहते -हितुं), विन्यस् (c. 4. -अस्यति -असितुं), विधा, संविधा.

ORGANIZED, *p. p.* व्यूढः -ढा -ढं, विन्यस्तः -स्ता -स्तं, विहितः -ता -तं, प्रतिपिहितः &c., व्यवस्थापितः &c., संस्थापितः -ता -तं, रचितः -ता -तं, विरचितः -ता -तं, कल्पितः -ता -तं, परिकल्पितः &c., सृष्टः -ष्टा -ष्टं, घटितः -ता -तं, परिपाटीकृतः -ता -तं, संव्यूढः -ढा -ढं.

ORGASM, *s.* उत्तापः, उत्तेजनं, उत्तेजितत्वं, उन्मदः, उद्भूतिः *f.*, आवेशः, आविष्टता, क्षोभः, वेगः, व्याक्षोभः, क्षुब्धता, सन्तापः.

ORGIES, *s. pl.* नैशोत्सवः, नैशिकोत्सवः, राज्युत्सवः, मद्यपानपूर्व्वं निशि सेवितम् उत्सवादि, समद्यपानं रात्रौ कृतम् उत्सवादि.

ORICHALCH, *s.* पित्तलं, पीतलोहं, पीतलं -लकं, रीतिः *f.*, कांस्यं.

ORIENT, *a.* (Rising) उदयी -यिनी -यि (न्), उदयमानः -ना -नं.—(Eastern). *See* ORIENTAL.

ORIENT, *s.* (The east) पूर्व्वदिक् *f.* (च्), प्राची, सूर्य्योदयदेशः.

ORIENTAL, *a.* पूर्व्वदेशीयः -या -यं, पूर्व्वदिश्यः -श्या -श्यं, प्राच्यः -च्या -च्यं, प्राचीनः -ना -नं, पूर्व्वः -र्व्वा -र्व्वं, पूर्व्वीयः -या -यं, पूर्व्वजः -जा -जं, पूर्व्वदेशस्थः -स्था -स्थं.

ORIENTAL, *s.* पूर्व्वदेशवासी *m.* (न्), पूर्व्वदेशस्थः, प्राचीनदेशवासी.

ORIENTALIST, *s.* पूर्व्वदेशीयभाषाज्ञः, प्राग्देशीयभाषापण्डितः.

ORIFICE, *s.* मुखं, छिद्रं, डारं, सुषिरं, शुषिरं, रन्ध्रं, विवरं, बिलं; 'of a pipe,' दर्व्वीरपुटः; 'of the ear,' वृषभः.

ORIGIN, *s.* (First existence, beginning) मूलं, आरम्भः, मूलारम्भः, प्रारम्भः, उद्भवः, उत्पत्तिः *f.*, प्रथमोद्भवः, प्रथमोत्पत्तिः *f.*, उद्गमः, सम्भवः, प्रभवः, जन्म *n.* (न्), जातिः *f.*, आगमः, उपक्रमः.—(Source, fountain) आदिः *m.*, योनिः *m. f.*, मूलं, बीजं, हेतुः *m.*, कारणं, आदिकारणं, गर्भः, निबन्धनं, निदानं, उत्पत्तिस्थानं, उद्गमस्थानं.—(Original instigator) प्रयोजकः, प्रवर्त्तकः; 'of low origin,' दुर्योनिः -निः -नि, हीनयोनिः &c., हीनजातिः -तिः -ति, हीनजन्मा -न्मा -न्म (न्); 'of noble origin,' भौलः -ली -लं, उत्कृष्टजातिः &c., उद्गमवंशजातः -ता -तं; 'prosperity has its origin in the king,' राजमूला सम्पत्तिः.

ORIGINAL, *s.* (Origin). *See* the preceding. (First copy, archetype) आदर्शः, प्रतुपमानं, प्रतुपमा, मूलं, मूलपत्रं.—(Text) मूलं, मूलग्रन्थः.

ORIGINAL, *a.* (Primitive, first in order) मौलः -ली -लं, मौलिकः -की -कं, मूलिकः -का -कं, प्रथमः -मा -मं, प्राथमिकः -की -कं, आद्यः -द्या -द्यं, आदिमः -मा -मं आदि in comp., पूर्व्वः -र्व्वा -र्व्वं.—(Not made or done before, or by another) अपूर्व्वः -र्व्वा -र्व्वं, अपूर्व्वकृतः -ता -तं, अपूर्व्वसिद्धः -द्धा -द्धं, अपूर्व्वरचितः -ता -तं, अपूर्व्वप्रतिमः -मा -मं, स्वयङ्कृतः &c., स्वयङ्कल्पितः &c., स्वतःकल्पितः &c.—(Having the power to originate new thoughts) अपूर्व्वकल्पकः -का -कं, स्वयङ्कल्पकः &c., स्वतःकल्पकः &c., अपूर्व्वयोजकः &c., अनुयोगी &c.

ORIGINALITY, *s.* (Power of originating new thoughts) अपूर्व्वकल्पनाशक्तिः *f.*, अपूर्व्वकल्पकत्वं.—(State of being original) अपूर्व्वता, अपूर्व्वसिद्धता, अपूर्व्वरचितत्वं, मौलता.

ORIGINALLY, *adv.* आदौ, आदितस्, उत्पत्तितस्, मूलतस्, जातितस्, प्रथमं, प्रथमतस्, आरम्भे, प्रारम्भे, आरम्भतस्.

To ORIGINATE, *v. a.* प्रथमम् उत्पद् (c. 10. -पादयति -यितुं) or जन् (c. 10. जनयति -यितुं) or उद्भू (c. 10. -भावयति -यितुं) or सृज् (c. 6. सृजति, सर्ज्जुं) or कॢप् (c. 10. कल्पयति -यितुं), प्रथमोत्पादनं कृ, प्रथमोत्पत्तिं कृ, प्रथमोद्भवं कृ, आरभ् (c. 1. -रभते -रब्धुं), समारभ्, प्रारभ्, आरम्भं कृ, प्रारम्भं कृ, प्रवृत् (c. 10. -वर्त्तयति -यितुं), उपक्रम् (c. 1. -क्रमते -मितुं).

To ORIGINATE, *v. n.* उत्पद् (c. 4. -पद्यते -पत्तुं), व्युत्पद्, समुत्पद्, जन् (c. 4. जायते, जनितुं), प्रजन्, प्रभू (c. 1. -भवति -भवितुं), उद्भू, सम्भू, प्रसू (c. 1. -सरति -सर्त्तुं), निःसृ, विनिःसृ, उद्गम् (c. 1. -गच्छति -गन्तुं), निर्गम्, प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), उत्था (c. 1. -तिष्ठति -थातुं, rt. स्था), उपस्था.

ORIGINATED, *p. p.* उत्पन्नः -न्ना -न्नं, प्रथमोत्पन्नः &c., उत्पादितः -ता -तं, जातः -ता -तं, प्रवृत्तः -त्ता -त्तं, प्रवर्त्तितः -ता -तं, प्रथमकल्पितः &c., निःसृतः -ता -तं, विनिःसृतः &c.

ORIGINATION, *s.* प्रथमोत्पादनं, प्रथमोत्पत्तिः *f.*, प्रथमोद्भावनं, प्रथमोद्भवः, आरम्भः, प्रारम्भः, आरम्भिः *f.*

ORIGINATOR, *s.* प्रथमोत्पादकः, प्रथमोद्भावकः, मूलोत्पादकः, प्रवर्त्तकः, प्रयोजकः, प्रथमकल्पकः, आरम्भकः.

ORION, *s.* (Constellation) मृगशिरस् *n.*, मृगशीर्षं, आग्रहायणी.

ORISON, *s.* प्रार्थना, स्तवः, स्तुतिः *f.*, वाचिकप्रार्थना.

ORISSA, *s.* (The country) उत्कलः, उत्कलदेशः.

ORNAMENT, *s.* (Embellishment) अलङ्कारः, अलङ्करणं, अलङ्क्रिया, भूषणं, विभूषणं, भरणं, आभरणं, शोभा -भनं, भूषा, विभूषा, मण्डनं, परिष्कारः, संस्कारः, परिकर्म्म *n.* (न्), प्रतिकर्म्म, प्रसाधनं, रञ्जनं, कल्पना, सज्जा, रङ्गः, नेपथ्यं.—(That which ornaments, an ornament) अलङ्कारः, भूषणं, आभरणं, भरणं, कङ्कणः -णं, कलापः, अङ्गदं; 'ornament of language,' अलङ्कारः, शब्दालङ्कारः; of sense,' अर्थालङ्कारः; 'for the feet or ankles,' नूपुरः -रं, पादाङ्गदं.

To ORNAMENT, *v. a.* अलङ्कृ, समलङ्कृ, भूष् (c. 10. भूषयति -यितुं), विभूष्,

शभ् (c. 10. शोभयति -यितुं), उपशुभ्, मण्ड् (c. 10. मण्डयति -यितुं), परिकर्म्म (nom. -कर्म्मयति -यितुं), रञ्ज् (c. 10. रञ्जयति -यितुं).

ORNAMENTAL, *a.* अलङ्कारकः -का -कं, अलङ्करिष्णुः -ष्णुः -ष्णु, शोभाकरः -रा -रं, शोभाकारकः -का -कं, शोभावहः -हा -हं, शोभकः -का -कं, शोभादायकः -का -कं, शोभाप्रदः -दा -दं, भूषकः -का -कं, विभूषकः -का -कं, भूषाकरः -रा -रं.

ORNAMENTALLY, *adv.* अलङ्करणार्थं, विभूषणार्थं, शोभाकरणार्थं.

ORNAMENTED, *p. p.* अलङ्कृतः -ता -तं, भूषितः -ता -तं, विभूषितः -ता -तं, शोभितः -ता -तं, उपशोभितः -ता -तं, मण्डितः -ता -तं, कृतालङ्कारः -रा -रं, सालङ्कारः &c., प्रसाधितः -ता -तं, विरचितः &c.

ORNATE, *a.* *See* the last. (As style) पुष्पितः -ता -तं, अलङ्कृतः -ता -तं, सालङ्कारः -रा -रं, अलङ्कारमयः -यी -यं.

ORNATELY, *adv.* सालङ्कारं, अलङ्कारेण, शोभापूर्व्वं.

ORNITHOLOGIST, *s.* पक्षिविद्याज्ञः, पक्षिविषयकविद्याज्ञः.

ORNITHOLOGY, *s.* पक्षिविद्या, पक्षिविषयका विद्या, शाकुनविद्या.

ORPHAN, *s.* or *a.* (Bereaved of both parents) मातृपितृहीनः -ना -नं, मातापितृहीनः &c., पितामातृहीनः &c., मातृपितृविहीनः &c., मातापितृभ्यां विहीनः &c., मातृपितृरहितः &c.—(Bereaved of father) पितृहीनः -ना -नं, पितृविहीनः &c., पित्रा विहीनः, मृतपितृकः -का -कं, गतपितृकः &c., अपितृकः &c., अनाथः -था -थं, निर्नाथः &c., छेमण्डः, छमण्डः.—(Of mother) मातृहीनः -ना -नं, अमातृकः -का -कं, मातृरहितः -ता -तं, मृतमातृकः -का -कं, गतमातृकः &c., हीनमातृकः &c.

ORPHANAGE, ORPHANISM, *s.* मातृपितृहीनता, निर्नाथता, अनाथत्वं.

ORPIMENT, *s.* (Yellow) हरितालं -लकं, पीतकं, पिञ्जरं, तालं, आलं, अलं.—(Red) रक्तधातुः *m.*

ORRERY, *s.* ग्रहगतिसूचकयन्त्रं, ग्रहादिगतिदर्शकयन्त्रं.

ORRIS, *s.* (Root) श्वेतवचा, वचा, हैमवती, उग्रगन्धा, उग्रा, शतपर्विका, षड्ग्रन्था, सुपत्रा, गोलोमी, काङ्गा, गानिनी.

ORT, *s.* *See* ORTS.

ORTHODOX, *a.* सत्पथगामी -मिनी -मि (न्), सत्पथवर्त्ती &c., सत्पथावलम्बी &c., सन्मार्गगामी &c., सत्यधर्म्मा -र्म्मा -र्म्म (न्), सत्यधर्म्मावलम्बी &c., दक्षिणमार्गी &c., दक्षिणमार्गानुयायी &c., दक्षिणाचारी &c., यथाशास्त्रः -स्त्रा -स्त्रं, शास्त्रीयः -या -यं, शास्त्रसम्मतः -ता -तं, सत्यमतः -ता -तं, सत्यमतधारी &c., सत्पथानुसारी &c., सत्यधर्म्मानुसारी &c., सच्छास्त्रानुसारी &c.

ORTHODOXY, *s.* सत्पथः, सन्मार्गः, दक्षिणमार्गः, सत्यधर्म्मः, सच्छास्त्रं, सत्पथानुसरणं, सन्मार्गानुयायित्वं, सत्पथावलम्बनं, सत्यमतधारणं, यथार्थमतधारणं, यथाशास्त्रता -त्वं.

ORTHOEPIST, *s.* शुद्धोच्चारणविद्याज्ञः, शुद्धोच्चारणविद्.

ORTHOEPY, *s.* शुद्धोच्चारः -रणं, शुद्धोच्चारणविद्या.

ORTHOGON, *s.* समकोणाकृतिः *f.*, समचतुरस्रं, समचतुष्कोणः, दीर्घचतुरस्रं.

ORTHOGONAL, *a.* समकोणाकृतिः -तिः -ति, समासाकृतिः &c., समकोणः &c.

ORTHOGRAPHIC, ORTHOGRAPHICAL, *a.* शुद्धाक्षरविन्याससम्बन्धी -न्धिनी -न्धि (न्), शुद्धाक्षरविन्यासविषयकः -का -कं, वर्णविन्याससम्बन्धी &c.

ORTHOGRAPHICALLY, *adv.* शुद्धाक्षरविन्यासपूर्व्वं, शुद्धाक्षरविन्यासानुसारेण.

ORTHOGRAPHY, *s.* शुद्धाक्षरविन्यासः, शुद्धवर्णविन्यासः, शुद्धवर्णलिखनं, वर्णविन्यासविद्या, अक्षरविन्यासविद्या, सन्धिः *m.*

ORTS, *s. pl.* उच्छिष्टं, अवशिष्टं, शिष्टं, शेषं, भुक्तोच्छिष्टं, भुक्तावशेषं, भक्षितशेषं, भुक्तमुच्छिष्टं, परभुक्तोच्छिष्टं, उच्छिष्टान्नं, शेषान्नं, अन्नशेषं, भुक्तशेषं, आदिष्टं, केलकः, केला -लिः -ली.

To OSCILLATE, *v. n.* दोल् (nom. दोलायते -यितुं), आन्दोल्, प्रेङ्खोल (nom. प्रेङ्खोलायते), प्रेङ्ख् (c. 1. प्रेङ्खति -ते -ङ्खितुं, rt. इङ्ख्), स्पन्द् (c. 1. स्पन्दते -न्दितुं), विस्पन्द्, परिस्पन्द्, इतस्ततो विचल् (c. 1. -चलति -लितुं) or चल् or क्षुभ् (c. 4. क्षुभ्यति -ते, क्षोभितुं) or विक्षुभ् or विस्फुर् (c. 6. -स्फुरति -रितुं) or कम्प् (c. 1. कम्पते -म्पितुं) or विकम्प्.

OSCILLATION, *s.* आन्दोलनं, प्रेङ्खोलनं, प्रेङ्खणं, स्पन्दनं, विस्पन्दनं, इतस्ततो विचलनं or विस्फुरणं or कम्पनं or विकम्पनं or विक्षोभः or गतागतं.

OSCILLATING, OSCILLATORY, *a.* दोलायमानः -ना -नं, आन्दोलायमानः -ना -नं, आन्दोलितः -ता -तं, प्रेङ्खन् -ङ्खन्ती -ङ्खत् (त्), प्रेङ्खमाणः -णा -णं, प्रेङ्खोलितः -ता -तं, स्पन्दमानः -ना -नं, विस्पन्दमानः -ना -नं, कम्पमानः -ना -नं, स्फुरन् &c., विस्फुरन् &c., स्फुरितः -ता -तं, विस्फुरितः &c.

OSCITANCY, OSCITATION, *s.* जृम्भः -म्भणं -म्भा, विजृम्भणं, जृम्भिका.

OSCITANT, *a.* जृम्भमाणः -णा -णं, विजृम्भमाणः &c., जृम्भः -म्भा -म्भं, जृम्भी -म्भिणी -म्भि (न्), जृम्भावान् -वती -वत् (त्).

PROPORTIONABLY, *adv.* अनुरूपतस्, अनुरूपं, अनुसारेण -रतस्, सादृश्येन, सदृशं, प्रमाणतस्, यथाप्रमाणं, यथापरिमाणं, प्रमाणानुसारात् -रेण, यथांशतस्, विभागशस्; 'to one's strength,' *see* under PROPORTION.

PROPORTIONED, *p. p.* यथाप्रमाणं परिकल्पितः -ता -तं, प्रमाणानुसारात् कल्पितः &c. or विहितः &c. *See* PROPORTIONATE.

PROPOSAL, *s.* उपन्यासः, कन्यैव्योपन्यासः, प्रतिज्ञा, प्रतिज्ञातं, कन्यैवसूचना -नं, कन्यैवप्रतिज्ञा, कन्यैवनिर्देशः, अभिधानं, अभिहितं, उक्तं, वाक्यं.—(Of marriage), *see* the next.

To PROPOSE, *v. a.* उपन्यस् (c. 4. -अस्यति -असितुं), उपन्यासं कृ, उपन्यासीकृ, कन्यैव्योपन्यासं कृ, कन्यैवसूचनं कृ, प्रतिज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), प्रतिज्ञां कृ, कन्यैवप्रतिज्ञां कृ, निविद् (c. 10. -वेदयति -यितुं), निवेदनं कृ, अभिधा (c. 3. -दधाति -धातुं), कन्यैवं or यथाकन्यैवं निर्दिश् (c. 6. -दिशति -देष्टुं) or सूच् (c. 10. सूचयति -यितुं), कन्यैवनिर्देशं कृ.—(Intend), *see* the word.—(Make an offer of marriage) विवाहप्रतिज्ञां कृ, प्रेमनिवेदनं कृ.

PROPOSED, *p. p.* उपन्यस्तः -स्ता -स्तं, उपन्यासीकृतः -ता -तं, प्रतिज्ञातः &c., निवेदितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, अभिहितः &c.

PROPOSITION, *s.* उपन्यासः, प्रतिज्ञा, प्रतिज्ञातं, वाक्यं, उक्तं, वचनं.—(In logic, geometry, &c.) प्रतिज्ञा, प्रतिज्ञेयं, ऋक्किका, प्रमेयं, पूर्ब्बपक्षः, प्रतिज्ञातार्थः; 'abandonment of the original proposition,' प्रतिज्ञासंन्यासः, प्रतिज्ञाहानिः *f.*; 'denial of a proposition,' प्रतिज्ञाविरोधः; 'completing it,' आकांक्षापूरणं; 'subsequent proposition,' प्रतिज्ञान्तरं.

To PROPOUND, *v. a.* (Propose) उपन्यस्, प्रतिज्ञा, निर्दिश्, अभिधा, सूच् (c. 10. सूचयति -यितुं), निविद्, प्रतिपद् (c. 10. -पादयति -यितुं).

PROPOUNDED, *p. p.* उपन्यस्तः -स्ता -स्तं, प्रतिज्ञातः -ता -तं, निर्दिष्टः -ष्टा -ष्टं.

PROPRIETARY, *a.* स्वामिसम्बन्धी -न्धिनी -न्धि (न्), स्वाम्यधीनः -ना -नं; 'proprietary right,' स्वत्वं, अधिकारः -रिता, स्वामित्वं, स्वाम्यं, प्रभुत्वं -ता.

PROPRIETOR, *s.* स्वामी *m.* (न्), अधिकारी *m.* (न्), प्रभुः *m.*, पतिः *m.*, ईश्वरः, स्वत्ववान् *m.* (त्), अधिकारवान् *m.*, स्वत्वाधिकारी *m.*; 'without title,' अनपसरः.

PROPRIETORSHIP, *s.* स्वामित्वं, स्वाम्यं, स्वत्वं, अधिकारिता -त्वं, प्रभुत्वं.

PROPRIETRESS, *s.* स्वामिनी *f.*, अधिकारिणी *f.*, स्वत्वाधिकारिणी *f.*

PROPRIETY, *s.* यथायोग्यता, युक्तता, योग्यता, यथायुक्तता, युक्तिः *f.*, उपयुक्तता, उपयोगिता -त्वं, उचितत्वं, औचित्यं, यथोचितत्वं, उपपत्तिः *f.*, सामञ्जस्यं, समञ्जसं, सम्भावना, न्यायः -यता, सङ्गतत्वं, साङ्गत्यं, याथार्थ्यं, यथार्हता, याथातथ्यं, अभेदः, पर्य्याप्तिः, पात्रं -त्रता; 'of conduct,' मर्य्यादा, मर्य्यादानतिक्रमः, विनयः, विनीतता, सुचर्य्या, सुचरितं, स्थितिः *f.*, संस्था, अनतिक्रमः, अव्यभिचारः, कर्त्तव्यता, इतिकर्त्तव्यता; 'pattern of propriety,' न्यायाधारः.

PROROGATION, *s.* चिरकालपर्य्यन्तं महासभाविसर्जनं or कार्य्यनिवृत्तिः *f.* or कार्य्यत्यागः.—(Prolongation) दीर्घीकरणं.

To PROROGUE, *v. a.* (Adjourn to a distant period) चिरकालपर्य्यन्तं महासभां विसृज् (c. 6. -सृजति -सष्टुं, c. 10. -सर्जयति -यितुं) or कार्य्यनिवृत्तिं कृ or कार्य्यत्यागं कृ.—(Prolong) द्राघ (nom. द्राघयति -यितुं), दीर्घीकृ, दीर्घकालस्थं -स्थां कृ, चिरकालस्थं -स्थां कृ.

PROROGUED, *p. p.* चिरकालपर्य्यन्तं विसर्जितः -ता -तं or विसृष्टः -ष्टा -ष्टं.

PROSAIC, *a.* गद्यरूपः -पा -पं, गद्यमयः -यी -यं, गद्यात्मकः -का -कं, छन्दोहीनः -ना -नं, छन्दोरहितः -ता -तं.—(Dull) विरसः -सा -सं, अरसिकः -का -कं, फल्गुः -ल्गुः -ल्गु, रसहीनः -ना -नं, तेजोहीनः &c., लवणहीनः &c.

To PROSCRIBE, *v. a.* (Doom to destruction) घोषणापूर्व्वं वधदण्डार्हं ख्या in caus. (ख्यापयति -यितुं), प्रकाशलेखेन वधार्हं ज्ञा in caus., or वधदण्डार्हं निर्दिश् or वध्यं निर्दिश् or घातव्यं निर्दिश्, अमुकजनो वध्योऽस्ति इति सूचनार्थं प्रकटनपत्रे नाम लिख् (c. 6. लिखति, लेखितुं) or अभिलिख्, मृत्युपात्रं निर्दिश्.—(Denounce and expel) प्रकटनपत्रेण बहिष्कृ or निरस् or प्रत्यादिश्.—(Interdict) प्रकाशनपत्रेण निषिध् or प्रतिषिध्, प्रकटनलेखेन निषृ or बाध्.

PROSCRIBED, *p. p.* वध्यनामावलिपत्राभिलिखितः -ता -तं, वधदण्डार्हः -र्हा -र्हं, प्रकाशपत्रेण निषिद्धः -द्धा -द्धं or प्रतिषिद्धः &c. or निवारितः -ता -तं.

PROSCRIPTION, *s.* प्रकाशनपत्रेण वध्यजननिर्देशः or वध्यनामावलिनिर्देशः, घोषणापूर्व्वं वधदण्डार्हख्यापनं, प्रकटनपत्रेण वधार्हज्ञापनं.

PROSE, *s.* गद्यं, हारकः, छन्दोरहितवाक्यं; 'prose and verse,' गद्यपद्यं; 'alternate prose and verse,' चम्पूः *m.*

To PROSE, *v. n.* दीर्घीचारणेन विरसवाक्यानि or विरसकथाः वद् (c. 1. वदति -दितुं), दीर्घसूत्रतया or दीर्घसूत्रवद् विरसकथोपाख्यानं कृ.

To PROSECUTE, *v. a.* (Pursue, follow up, carry on continuously) अनवरतम् अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), अविरतम् अनुसेव् (c. 1. -सेवते -वितुं) or उपसेव् or सेव्, नित्यं प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), अविरतप्रवृत्तिं कृ, निर्वह् (c. 10. -वाहयति -यितुं); 'to prosecute one's efforts,' अविरतयत्नं कृ, अनवरतप्रयत्नं कृ, नित्योत्साहं कृ; 'one's undertakings,' प्रारब्धानि सम्पद् (c. 10. -पादयति -यितुं); 'one's studies,' नित्याध्ययनं कृ, अविरताध्ययनं कृ, विद्यानुसेवनं कृ.—(In law) अभियुज् (c. 7. -युनक्ति -योक्तुं), अभियोगं कृ, अभिशंस् (c. 1. -शंसति -सितुं), अभिशंसनं कृ, व्यवहाराभियोगं कृ, व्यवहाराभिशंसनं कृ.

PROSECUTED, *p. p.* (Carried on continuously) अविरतम् अनुष्ठितः -ता -तं or अनुसेवितः &c. or सेवितः &c., निर्वाहितः &c.—(In law) अभियुक्तः -क्ता -क्तं, अभिशस्तः -स्ता -स्तं, व्यवहाराभियुक्तः -क्ता -क्तं, व्यवहाराभिशस्तः -स्ता -स्तं.

PROSECUTION, *s.* (Carrying on continuously) अविरतानुष्ठानं, नित्यानुष्ठानं, नित्यानुसेवनं, नित्यसेवनं, नित्यप्रवृत्तिः *f.*, अविरतप्रवृत्तिः *f.*, नित्यप्रवर्त्तनं, निर्वाहनं; 'of efforts,' अविरतयत्नकरणं, नित्योद्योगः; 'of study,' नित्याध्ययनं, अविरताध्ययनं, विद्यानुसेवनं, विद्यानुपालनं, प्रवृत्तिः *f.*—(In law) अभियोगः, अभिशंसनं, व्यवहाराभियोगः, व्यवहाराभिशंसनं, अभियुक्तता.

PROSECUTOR, *s.* (One who carries on continuously) अविरतानुष्ठायी *m.* (न्), अविरतानुसेवी *m.*, निर्वाहकः.—(In law) अभियोगी *m.* (न्), अभियोक्ता *m.* (क्तृ), अभिशंसकः, व्यवहाराभियोगकृत्, व्यवहाराभिशंसनकृत् *m.*, अभियोगकारी *m.* (न्), विवादार्थी *m.*, अर्थी *m.*

PROSELYTE, *s.* धर्म्मपरिवर्त्तकः, धर्म्मान्तरग्राही *m.* (न्), मतान्तरग्राही *m.*, धर्म्मान्तरावलम्बी *m.*, स्वधर्म्मग्राही *m.*, स्वधर्म्मावलम्बी *m.*, अन्यधर्म्मग्राही *m.*, अन्यधर्म्मावलम्बी *m.*, स्वधर्म्मी *m.*, धर्म्मान्तरप्राप्तः, परधर्म्माश्रितः, स्वधर्म्मत्यागी *m.*, स्वधर्म्मत्यागपूर्व्वं धर्म्मान्तरग्राही *m.*; 'to Judaism,' यिहुदीयधर्म्मग्राही *m.*; 'to Christianity,' ख्रीष्टीयधर्म्मग्राही *m.*, ख्रीष्टीयमतग्राही *m.*

To PROSELYTE, PROSELYTIZE, *v. a.* धर्म्मान्तरं or स्वधर्म्मं ग्रह् in caus., मतान्तरं or स्वमतं ग्रह्, धर्म्मपरिवर्त्तकं कृ; 'to Judaism,' यिहुदीयमतं ग्रह् in caus.

PROSELYTISM, *s.* धर्म्मपरिवर्त्तनं, धर्म्मान्तरग्रहणं, धर्म्मान्तरप्रापणं.

PROSER, *s.* दीर्घीचारणेन विरसकथाख्यायकः, दीर्घसूत्री *m.* (न्).

PROSING, *s.* दीर्घीचारणेन विरसकथोपाख्यानं, दीर्घसूत्रता -त्वं.

PROSODIAL, PROSODICAL, *a.* छान्दसः -सी -सं, छन्दःशास्त्रसम्बन्धी &c., छन्दःशास्त्रविषयकः -का -कं, छन्दोविषयकः &c., छन्दःसम्बन्धी &c.

PROSODIAN, *s.* छन्दःशास्त्रज्ञः, छन्दःशास्त्रविद् *m.*, छन्दःशास्त्रव्युत्पन्नः.

PROSODY, *s.* छन्दस् *n.*, छन्दःशास्त्रं, छन्दोविद्या, छन्दोज्ञानं.

PROSOPOPŒIA, *s.* *See* PERSONIFICATION.

PROSPECT, *s.* (View) दृष्टिः *f.*, दर्शनं, दृष्टिपातः, दृक्पातः.—(View of future events, expectation) भाविदर्शनं, भविष्यद्दर्शनं, भाविघटनादर्शनं, अनागतदर्शनं, मानसिकदृष्टिः *f.*, अपेक्षा, उदीक्षणं, आशा, प्रत्याशा.—(That which is presented to the view) दृक्पातविषयः, दृष्टिपातविषयः, दृष्टिगतदेशः, दृक्पातानर्गतदेशः, दृष्टिपातगतप्रदेशः, दृष्टिगोचरदेशः, दृग्गोचरप्रदेशः.

PROSPECTIVE, *a.* भाविकालापेक्षकः -का -कं, उत्तरकालापेक्षकः &c., भाविकालसापेक्षः -क्षा -क्षं, भविष्यदपेक्षकः &c., आगामिकालसापेक्षः &c., भाविस्मृक् *m. f. n.* (ग्).

PROSPECTIVELY, *adv.* भाविकालापेक्षया, उत्तरकालापेक्षया, भविष्यदपेक्षया, भाविकालसापेक्षं, आगामिकालसापेक्षं, भाविकालमपेक्ष्य, उत्तरकालमपेक्ष्य.

PROSPECTIVENESS, *s.* भाविकालापेक्षा, उत्तरकालापेक्षा -क्षकता -त्वं.

PROSPECTUS, *s.* कर्त्तव्यसूचनपत्रं, कर्त्तव्यार्थसूचनपत्रं, कर्त्तव्यार्थबोधनपत्रं.

To PROSPER, *v. a.* (Render successful, favor) सफलीकृ, सिद्धिं or सिद्धतां कृ or नी (c. 1. नयति, नेतुं) or साध् (c. 10. साधयति -यितुं), सिद्धीकृ, सिद्धिमन्तं -मतीं -मत् कृ, वृध् (c. 10. वर्धयति -यितुं), संवृध्, एध् (c. 10. एधयति -यितुं), समृद्धीकृ, उपकृ, अनुग्रह्, उपग्रह्, प्रतिपाल्, अनुपाल्.

To PROSPER, *v. n.* (Thrive) ऋध् (c. 4. ऋध्यति, c. 5. ऋध्नोति, अर्द्धितुं), समृध्, समृद्धीभू, समृद्धः -द्धा -द्धं भू, वृध् (c. 1. वर्धते -र्धितुं), संवृध्, विवृध्, एध् (c. 1. एधते -धितुं), समेध्, सम्पत्तिं गम्, समृद्धिम् इ or गम्, सश्रीकः -का -कं भू, श्रीमान् -मती &c. भू or अस्.—(Be successful) सिध् (c. 4. सिध्यति, सेद्धुं), सिद्धिं गम् or इ, कृतार्थीभू, प्राप्तार्थीभू, सिद्धार्थीभू, सम्पद् (c. 4. -पद्यते -पत्तुं), सम्पदं or सम्पत्तिं गम्, सफलीभू, सफलः -ला -लं भू.

PROSPERITY, *s.* समृद्धिः *f.*, सामृद्धं, ऋद्धिः *f.*, सम्पत्तिः *f.*, सम्पद् *f.*, सुसम्पद् *f.*, वृद्धिः *f.*, संवृद्धिः *f.*, उदयः, पुण्योदयः, अभ्युदयः, श्रीः *f.*, लक्ष्मीः *f.*, सौभाग्यं, भाग्यं, भूतिः *f.*, क्षेमः -मं, एधा, कुशलं -लता, कौशल्यं, शर्म्म *n.*

(न्), कल्याणं, मङ्गलं, माङ्गल्यं, भद्रं, शुभं, शिवं, धृतिः *f.*, रिष्टं, उपचयः; 'season of prosperity,' समृद्धिसमयः, समृद्धिकालः, उदयकालः.—(Success) सिद्धिः *f.*, साध्यसिद्धिः *f.*, अर्थसिद्धिः *f.*, कृतार्थता, सफलता, साफल्यं; 'national,' योगक्षेमः.

PROSPEROUS, *a.* (Thriving) समृद्धः -द्धा -द्धं, वर्धमानः -ना -नं, वर्धिष्णुः -ष्णुः -ष्णु, श्रीमान् -मती -मत् (न्), लक्ष्मीवान् &c., क्षेमवान् &c., वृद्धिमान् &c., समृद्धिमान् &c., उदयी -यिनी -यि (न्), शर्मवान् &c., विपद्रहितः -ता -तं, निरापद् *m. f. n.*, सुस्थः -स्था -स्थं, एधमानः -ना -नं, समेधमानः &c., श्रीलः -ला -लं, सश्रीकः -का -कं, लक्ष्मणः -णा -णं, श्रीयुक्तः -क्ता -क्तं, अधिकर्द्धिः -र्द्धिः -र्द्धि.—(Successful) सफलः -ला -लं, सिद्धिमान् &c., सिद्धः -द्धा -द्धं, सिद्धार्थः -र्थी -र्थं, कृतार्थः &c.—(Fortunate, favorable, auspicious) कल्याणः -णा -णं, कल्याणी &c., मङ्गलः -ला -लं, माङ्गलिकः -की -कं, शुभः -भा -भं, शिवः -वा -वं, शुभान्वितः -ता -तं, सौभाग्यवान् &c., भाग्यवान् &c., धन्यः -न्या -न्यं, कुशलः -ला -लं, क्षेमः -मा -मं, क्षेम्यः -म्या -म्यं, भद्रः -द्रा -द्रं, प्रसवः -वा -वं, शङ्करः -रा -रं, शिवङ्करः &c., श्रीकरः &c.

PROSPEROUSLY, *adv.* समृद्धा, सम्पदा, सुसम्पदा, श्रिया, सक्षेमं, सौभाग्येन, कौशल्येन, सकल्याणं, कल्याणं, कुशलं, शुभं, अभ्युदयेन, सफलं, अवृथा.

PROSPICIENCE, *s.* प्रदर्शनं. *See* FORESIGHT.

PROSTITUTE, *s.* वेश्या, गणिका, पण्यस्त्री, वारस्त्री, साधारणस्त्री, वाराङ्गना, भोग्या, पण्याङ्गना, सामान्या स्त्री, बन्धुरा. *See* HARLOT.

To PROSTITUTE, *v. a.* गर्ह्यकर्म्मणि or कुत्सितकर्म्मणि प्रयुज् (c. 7. -युनक्ति -युङ्क्ते -योक्तुं) or उपयुज् or विनियुज्, गर्ह्यकर्म्मणि or कुत्सितकर्म्मणि नियुज्, पण्यं -ण्यां कृ, साधारणीकृ, सद्यीपभोग्यं -ग्यां कृ.

PROSTITUTION, *s.* वेश्यात्वं, वेश्यावृत्तिः *f.*, पौंश्चल्यं, वारसेवा, भगवृत्तिः *f.*, भगव्यापारः, भगजीविका, वेश्याजीविका. *See* HARLOTRY.—(Devoting to infamous purposes) गर्ह्यकर्म्मणि प्रयोगः, कुत्सितकर्म्मणि विनियोगः, गर्ह्यकर्म्मणि or कुत्सितकर्म्मणि नियोजनं, पण्यकरणं, सद्योपभोग्यकरणं; 'wages of prostitution,' पण्यस्त्रिया भृतिः *f.* or भाटकं, वेशः.

PROSTRATE, *a.* (Lying at length) अवमूर्द्धशयः -या -यं, क्षितिदेहः -हा -हं, भूमिशायी -यिनी -यि (न्), भूमिक्षुतः -ता -तं, अवनिक्षुतः &c.—(In supplication, adoration, &c.) साष्टाङ्गपतितः -ता -तं, साष्टाङ्गप्रणतः &c., साष्टाङ्गनमस्कारं प्रणिपतितः &c., चरणगतः -ता -तं, चरणपतितः -ता -तं, पादपतितः &c., दण्डवत् पतितः &c., पादप्रणतः &c., प्रणिपतितः &c., प्रपतितः &c., उपनतः &c., प्रणतः &c., नतः &c.

To PROSTRATE, *v. a.* (Throw down) पत् (c. 10. पातयति -यितुं), निपत्, अधःपत्, ध्वंस् (c. 10. ध्वंसयति -यितुं), प्रध्वंस्, नश् (c. 10. नाशयति -यितुं), विनश्, प्रणश्, अधरोत्तरीकृ, भूमिं गम् in caus.—(One's self in reverence, &c.) प्रणिपत् (c. 1. -पतति -तितुं), साष्टाङ्गं or साष्टाङ्गपातं प्रणिपत् or पत्, प्रणिपतनं कृ, प्रणम् (c. 1. -नमति -नन्तुं), कार्यं प्रणम्, साष्टाङ्गप्रणामं कृ, साष्टाङ्गनमस्कारं कृ, अष्टाङ्गपातं कृ, अष्टाङ्गप्रणामं कृ, प्रणिपातं कृ, पादप्रणामं कृ, चरणप्रणामं कृ, दण्डवत् पत् or भू or यत्नं कृ, चरणपतनं कृ, पादपतनं कृ, दण्डवत् प्रणामं कृ.—(The strength) सद्यःशक्तिं हृ (c. 1. हरति, हर्तुं), शक्तिपातं कृ, शक्तिनाशं कृ, क्षीणशक्तिं कृ.

PROSTRATED, *p. p.* पातितः -ता -तं, निपातितः &c., अधःपातितः &c., दण्डवत् पातितः &c., प्रणिपातितः &c., प्रणिपतितः &c., भूमिं गमितः &c.—(As strength) हृतशक्तिः -क्तिः -क्ति, नष्टशक्तिः &c., क्षीणशक्तिः &c., गतशक्तिः &c., हृतौजाः -जाः -जः (स्), गतौजाः &c., नष्टौजाः &c.

PROSTRATION, *s.* (Of the body in reverence, &c.) प्रणिपातः, प्रणिपतनं, अष्टाङ्गपातः, अष्टाङ्गप्रणिपातः, साष्टाङ्गप्रणामः, साष्टाङ्गपातः, साष्टाङ्गनमस्कारः, दण्डवत् पतनं or पातः, दण्डवत् प्रणामः, चरणपतनं, पादपतनं, पादप्रणामः, देहपातनं, शरीरपातनं, प्रपतनं.—(Of strength) शक्तिपातः, शक्तिहानिः *f.*, सद्यहानिः *f.*, शक्तिक्षयः, विसंसः -सा, ग्लानिः *f.*—(Of spirits) अवसादः, अवसन्नता, विषादः, विषण्णता, ग्लानिः *f.*

PROSY, *s.* विरसः -सा -सं, अरसिकः -का -कं, फल्गुः -ल्गुः -ल्गु. *See* PROSER.

To PROTECT, *v. a.* (Guard) रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, परिरक्ष्, संरक्ष्, प्रतिरक्ष्, गुप् (c. 1. गोपायति, c. 10. गोपयति -यितुं), अनुगुप्, निर्गुप्, अभिगुप्, प्रगुप्, संगुप्, अभिसंगुप्, पाल्, परिपाल्, अनुपाल्, प्रतिपाल्, अभिपाल्, सम्पाल्, उपपाल्, पा, परिपा, त्रै, परित्रै, संत्रै, त्रा in caus., अव्, पुष्, गुप्तिं कृ, गोपनं कृ, संगोपनं कृ, रक्षणं कृ, संरक्षणं कृ, पालनं कृ, परिपालनं कृ, पोषणं कृ.

PROTECTED, *p. p.* रक्षितः -ता -तं, संरक्षितः &c., अभिरक्षितः &c., परिरक्षितः &c., सुरक्षितः &c., गुप्तः -प्ता -प्तं, गोपितः -ता -तं, गोपायितः &c., सङ्गोपितः &c., पालितः &c., उपपालितः &c., अनुपालितः &c., प्रतिपालितः &c., त्रातः &c., त्राणः -णा -णं, अवितः -ता -तं, तारितः &c., अभ्युपपन्नः -न्ना -न्नं, आश्रितः &c., समाश्रितः &c.

PROTECTION, *s.* (The act) रक्षा, रक्षणं, संरक्षणं, अभिरक्षा -क्षणं, परिरक्षणं, प्रतिरक्षणं, गुप्तिः *f.*, गोपनं, सङ्गोपनं, पालनं, परिपालनं, प्रतिपालनं, अनुपालनं, अभिपालनं, त्राणं, परित्राणं, अवनं, क्षेमकरणं, क्षेमः, अभ्युपपत्तिः *f.*—(That which protects or shelters) आश्रयः, संश्रयः, समाश्रयः, अयनं, आश्रयणं, शरणं, शरण्यता, शरण्यं; 'to seek the protection of, go for protection,' आस्रि (c. 1. -श्रयति -यितुं), संश्रि, समाश्रि, शरणार्थी गम्.—(Favor, countenance) प्रसादः, अनुग्रहः, सङ्ग्रहः, अनुपालनं, आश्रयः.—(Writing that protects) अभयपत्रं.

PROTECTIVE, *a.* रक्षकः -का -कं, संरक्षकः &c., पालकः -का -कं, प्रतिपालकः &c., गोपकः &c., रक्षाकारी -रिणी -रि (न्), चौष्टिकः -की -कं.

PROTECTOR, *s.* रक्षकः, रक्षी *m.* (न्), रक्षिता *m.* (तृ), गोप्ता *m.* (प्तृ), गोपकः, गोपायकः, गोपी *m.* (न्), गोपः, संरक्षकः, पालकः, प्रतिपालकः, पालयिता *m.* (तृ), पालः, पः in comp., त्राता *m.* (तृ), भयत्राता *m.*, शरणं, शरण्यं, आश्रयः, आश्रयभूतः, शरणभूतः, आश्रयदाता *m.* (तृ).

PROTECTRESS, *s.* रक्षका, रक्षिणी, रक्षित्री, पालका, पालयित्री, रक्षाकारिणी, गोपिनी, गोपिका, गोपी, त्रायन्ती, आश्रयदात्री.

PROTEGÉ, *s.* आश्रितः, संश्रितः, रक्षणीयः, पालनीयः, पोष्यः, शरणागतः.

To PROTEND, *v. a.* प्रसृ (c. 10. -सारयति -यितुं), प्रसारणं कृ. *See To* EXTEND.

To PROTEST, *v. n.* (Declare solemnly) दृढनिश्चयपूर्वं or दृढप्रतिज्ञापूर्वं वद्, दृढोक्त्या वद्, दार्ढ्येन वद्, दृढं वद्, दृढोक्तिपूर्वं ख्या or आख्या or प्रख्या, दृढोक्तिं कृ.—(Make a solemn declaration expressive of dissent or opposition) अस्वीकारसूचकं दृढवाक्यं वद् or दृढवादं कृ or दृढनिषेधं कृ, असम्मतिसूचकां दृढोक्तिं कृ, विरोधसूचकां दृढप्रतिज्ञां कृ, दृढोक्तिपूर्वम् अस्वीकारं ख्या in caus. or ज्ञा in caus., दृढनिश्चयपूर्वं or दृढप्रतिज्ञापूर्वम् असम्मतिं ज्ञा in caus. or प्रकाश् (c. 10. -काशयति -यितुं), दृढोक्तिपूर्वं निषेधं कृ, दृढवाक्यपूर्वं न सम्मन्ये or न स्वीकरोमि इति वद्, दृढोक्तिपूर्वं मतान्तरं ख्या or प्रकाश्, दृढप्रतिज्ञापूर्वं न सम्मन् or विपरीतं मन् or अन्यथा मन्.—(In writing) असम्मतिलेखं प्रकाश्, अस्वीकारपत्रं प्रकाश्.

PROTEST, *s.* अस्वीकारसूचकं दृढनिषेधवाक्यं, असम्मतिसूचकं दृढविरोधवाक्यं, अस्वीकारवादः, दृढोक्तिपूर्वो निषेधः, दृढप्रतिज्ञापूर्वो निषेधः, दृढनि-

अस्वीकारप्रकाशनं, दृढप्रतिज्ञापूर्व्वम् असम्मतिप्रकाशनं, दृढोक्तिपूर्व्वं मतान्तरस्थापनं or असम्मतिस्थापनं or विपरीतमतस्थापनं, दृढनिश्चयपूर्व्वम् अस्वीकारवाक्यं or असम्मतिवाक्यं or अनङ्गीकारवाक्यं. —(In writing) दृढनिषेधसूचकं or दृढविरोधार्थकम्, अस्वीकारपत्रं or असम्मतिपत्रं or अनङ्गीकारपत्रं.

PROTESTANT, *s.* असम्मतः, अस्वीकारवादी *m.* (न्), अस्वीकर्त्ता *m.* (र्त्तृ), रोमीयमतविरोधी *m.* (न्), रोमीयमतविरुद्धः, रोमीयधर्म्मासम्मतः.

PROTESTATION, *s.* (Solemn declaration) दृढोक्तिः *f.*, दृढवाक्यं, दृढवादः, दृढप्रतिज्ञापूर्व्वो वादः, दृढभाषणं, दृढप्रतिज्ञापूर्व्वं भाषणं. *See* PROTEST.

PROTEUS, *s.* (Taking any shape at will) कामरूपी *m.* (न्), कामरूपः, इच्छरूपी *m.*, इच्छरूपः, टुः *m.*

PROTOTYPE, *s.* मूलरूपं, मूलप्रतिमा, मूलमूर्त्तिः *f.*, आदर्शः, मूलादर्शः, मूलं, प्रतिरूपं, प्रतिकृतिः *f.*, प्रत्युपमा -मानं, प्रतिमूर्त्तिः *f.*

To PROTRACT, *v. a.* (Lengthen) दीर्घीकृ, द्राघ् (nom. द्राघयति -यितुं). *See To* PROLONG, LENGTHEN.—(Delay) विलम्ब्. *See* the word.

PROTRACTED, *p. p.* दीर्घः -र्घा -र्घं, द्राघिमवान् -वती -वत् (त्), विलम्बितः -ता -तं, चिरायितः &c., चिरस्थः -स्था -स्थं, चिरस्थितः -ता -तं; 'sound,' प्लुतः -तं.

PROTRACTION, *s.* दीर्घीकरणं, द्राघिमा *m.* (न्), दीर्घता, विलम्बः -म्बनं.

To PROTRUDE, *v. a.* (Thrust forward) प्रसृ (c. 10. -सारयति -यितुं), बहिःसृ, बहिर् निःसृ, बहिर् गम् (c. 10. गमयति -यितुं), प्रसारणंकृ.

To PROTRUDE, *v. n.* बहिः सृ (c. 1. सरति, सर्त्तुं), प्रसृ, बहिर् निःसृ, बहिर् गम् (c. 1. गच्छति, गन्तुं), बहिर् भू, बहिःस्था, बहिर् वृत्, अतिवृत्, अतिक्रम्, उद्भिद् in pass. (-भिद्यते), प्रोद्भिद्, उद्भेदं कृ, प्रलम्ब्, बहिर् लम्ब्. *See To* PROJECT, *v. n.*

PROTRUDED, *p. p.* बहिर्गतः -ता -तं बहिःसृतः &c., बहिर्भूतः -ता -तं, बहिःस्थितः &c., बहिर्वर्त्तितः &c., निःसारितः &c., बहिःसारितः &c., बहिर् निःसारितः &c., प्रसृतः &c., प्रसारितः &c., उद्भिन्नः -न्ना -न्नं, प्रोद्भिन्नः &c.

PROTRUDING, *part.* बहिःस्थः -स्था -स्थं, बहिर्वर्त्ती -र्त्तिनी -र्त्ति (न्), बहिर्गतः -ता -तं, बहिर्लम्बः &c. *See* PROJECTING.

PROTRUSION, *s.* बहिर्वर्त्तनं, बहिःसरणं, उद्भेदः, प्रोद्भेदः. *See* PROJECTION.

PROTUBERANCE, *s.* (Tumour, prominence) स्फोटः, विस्फोटः, गुल्मः, गण्डः -ण्डिका, शोथः, आभोगः, उन्नतिः *f.*, प्रलम्बता. *See* PROJECTION.

PROTUBERANT, *a.* उन्नतः -ता -तं, प्रलम्बः -म्बा -म्बं, बहिर्लम्बः &c., गुल्मी -ल्मिनी -ल्मि (न्), आभोगी &c., बृहन्निवेशः -शा -शं. *See* PROJECTING.

To PROTUBERATE, *v. n.* उन्नतः -ता -तं भू, प्रलम्ब्, बहिर्लम्ब्. *See To* PROJECT, *v. n.*

PROUD, *a.* गर्व्वितः -ता -तं, गर्व्वी -र्व्विणी -र्व्वि (न्), सगर्व्वः -र्व्वा -र्व्वं, गर्व्वटः -टा -टं, गर्व्ववान् -वती -वत् (त्), गर्व्वितचित्तः -त्ता -त्तं, दृप्तः -प्ता -प्तं, सदर्पः -र्पा -र्पं, दर्पवान् &c., दृप्तः -प्ता -प्तं, दर्पी &c., मानी &c., मानवान् &c., अभिमानी &c., अभिमानवान् &c., साभिमानः -ना -नं, अहङ्कारी &c., अहङ्कारवान् &c., अहंयुः -युः -यु, साहङ्कारः -रा -रं, अहम्मानी &c., प्रगल्भः -ल्भा -ल्भं, उद्धतः -ता -तं, उद्धतचित्तः -त्ता -त्तं, उद्धतमनाः -नाः -नः (स्), समुद्धतः &c., प्रौढः -ढा -ढं, उच्चण्डः -ण्डा -ण्डं, उच्चण्डचेताः &c., समुच्चण्डः &c., आटोपः -पा -पं, आटोपी &c., उत्सिक्तः -क्ता -क्तं, उच्चशिरस्कः -स्का -स्कं, उच्चमनस्कः &c., समुच्चितचित्तः &c., अदृढदृष्टिः -ष्टिः -ष्टि, अवलिप्तः -प्ता -प्तं, दर्पध्मातः &c., सावहेलः -ला -लं, प्रगृष्टः -ष्टा -ष्टं; 'proud of one's beauty,' रूपगर्व्वितः -ता -तं, रूपाभिमानी &c.; 'of one's birth,' कुलाभिमानी &c.; 'of one's learning,' पाण्डित्याभिमानी &c., पण्डितम्मन्यः -न्या -न्यं; 'of the body,' देहमानी &c.; 'to be proud,' गर्व् (c. 1. गर्व्वति -र्व्वितुं, c. 10. गर्व्वयते -यितुं), गर्व्वितः &c. भू, सगर्व्वीभू, दृप् (c. 4. दृप्यति, दर्त्तुं, दृप्तुं), मन् (c. 4. मानयते -यितुं), प्रगल्भ् (c. 1. -गल्भते -ल्भितुं); 'to render proud,' दृप् (c. 10. दर्पयति -यितुं), गर्व्वितं -तां कृ.

PROUDLY, *adv.* सगर्व्वं, सदर्पं, समानं, साभिमानं, साहङ्कारं, आटोपं, सोन्मादं, गर्व्वितं, उच्चचेतसा, सावहेलं, सावलेपं, गर्व्वितवत्, दृप्तवत्, प्रगल्भवत्.

PROVABLE, *a.* प्रमेयः -या -यं, साधनीयः &c., साध्यः -ध्या -ध्यं, उपपादनीयः &c., उपपाद्यः -द्या -द्यं, प्रतिपाद्यः &c., प्रतिपादनीयः &c., समर्थनीयः &c., सूच्यः -च्या -च्यं.

To PROVE, *v. a.* (Establish as truth) साध् (c. 10. साधयति -यितुं), सिद्धीकृ, प्रमाण (nom. प्रमाणयति -यितुं), प्रमाणीकृ, सप्रमाणं -णां कृ, उपपद् (c. 10. -पादयति -यितुं), प्रतिपद्, विभू (c. 10. -भावयति -यितुं), भू, निर्णी (c. 1. -णयति -णेतुं), सत्याकृ, सत्यीकृ; 'by testimony or other evidence,' साक्षिणा or साक्ष्येण or प्रमाणेन साध् or भू or उपपद्.—(Evince, demonstrate) सूच् (c. 10. सूचयति -यितुं), दृश् (c. 10. दर्शयति -यितुं), अभिदृश्, अनुदृश्, निर्दिश् (c. 6. -दिशति -देष्टुं), विनिर्दिश्, प्रदिश्, निर्णी, समर्थ् (c. 10. -अर्थयति -यितुं), प्रकाश्. —(Try, ascertain, bring to the test) परीक्ष् (c. 1. -ईक्षते -यितुं), परीक्षां कृ, निरूप्, ज्ञा in des., निर्णी, निश्चि, अनुभू, प्रतीतिं कृ.—(Experience) अनुभू, अनुभवं कृ, अनुभूतिं कृ.

To PROVE, *v. n.* (Be found, turn out) सम्भू (c. 1. -भवति -वितुं), सम्पद् (c. 4. -पद्यते -पत्तुं), उत्पद्, उपपद्, विद् in pass. (विद्यते), सिध् (c. 4. सिध्यति -द्धुं), आपत् (c. 1. -पतति -तितुं), संवृत्, वृत्.—(Be ascertained or shown to be true) निर्णी in pass. (-णीयते), निश्चि in pass. (-चीयते), सूच् in pass. (सूच्यते), अनुभू in pass. (-भूयते), विभू, प्रमाणीभू, प्रती in pass. (-ईयते).

PROVED, *p. p.* (Established as true) सिद्धः -द्धा -द्धं, साधितः -ता -तं, उपपादितः &c., उपपन्नः -न्ना -न्नं, प्रमाणितः -ता -तं, प्रमाणीकृतः &c., भावितः &c., विभावितः &c., प्रतिपादितः &c., प्रमितः -ता -तं.—(Evinced, demonstrated) सूचितः -ता -तं, दर्शितः &c., निर्दिष्टः -ष्टा -ष्टं, निर्णीतः -ता -तं, समर्थितः &c.—(Tested, ascertained) परीक्षितः -ता -तं, निरूपितः -ता -तं, निश्चितः &c., निर्णीतः &c., अनुभूतः &c., प्रतीतः -ता -तं; 'thing to be proved,' साध्यं, प्रमेयं; 'proved by evidence,' साक्षिभावितः &c., साक्ष्यसिद्धः &c.

PROVENDER, *s.* पाथेयं, याचिकं, शबलं, सबलः -लं, खाद्यद्रव्यं, भक्ष्यद्रव्यं, पश्वादिखाद्यद्रव्यं, शुष्कतृणादि *n.*, शुष्कघासादि, माषादि, शस्यादि.

PROVER, *s.* उपपादकः, सिद्धिकर्त्ता *m.* (र्त्तृ), साधकः, प्रमाता *m.* (तृ), प्रतिपादकः, उपपत्तिकारी *m.* (न्), प्रतिपत्तिकारकः, निर्णेता *m.*, विभावकः.

PROVERB, *s.* लोकवाक्यं, लोकोक्तिः *f.*, प्राचीनवाक्यं, पुराणवाक्यं, लोकप्रचलितवाक्यं, वाक्यं, वचनं, वाक् *f.* (च्), सूत्रं, प्राचीनसूत्रं, पुराणसूत्रं, उपमानं, उपदेशवाक्यं, उपदेशसूत्रं, न्यायः, न्यायवाक्यं.

PROVERBIAL, *a.* (Mentioned in a proverb) प्राचीनसूत्रोक्तः -क्ता -क्तं, पुराणसूत्रोक्तः &c., लोकोक्तः &c., लोकोक्तः &c.—(Comprised in a proverb, current as one) प्राचीनसूत्ररूपः -पा -पं, पुराणसूत्ररूपः &c., लोकप्रसिद्धः -द्धा -द्धं, लोकप्रचलितः -ता -तं, लोकप्रचलः -ला -लं, न्यायरूपः &c., न्यायप्रसिद्धः &c.

PROVERBIALLY, *adv.* लोकप्रसिद्धं, जनप्रसिद्धं, प्राचीनसूत्रानुसारेण.

To PROVIDE, *v. a.* (Procure or prepare beforehand) अग्रे or पूर्व्वं कॢप् (c. 10. कल्पयति -यितुं) or उपकॢप् or परिकॢप् or सम्पकॢप् or

सोपकारद्रव्यादि कृप् or विधा or उपस्था in caus. or उपपद् in caus. or सम्भृ or पुरस्कृ or प्रस्तुतीकृ or निमे, अग्रे द्रव्यपरिकल्पनं कृ or द्रव्यसम्भारं कृ or उपकरणसम्भारं कृ or द्रव्यसामग्र्यं परिकृप्. *See To* PREPARE.—(Make a previous stipulation) पूर्वनियमं कृ, पूर्वपक्षं कृ, पूर्वसन्धिं कृ, पूर्वसङ्केतं कृ, पूर्वप्रतिज्ञां कृ.—(Provide against or for) expressed by some of the above roots in conjunction with अर्थं or अर्थे in comp.; 'to provide necessaries against a time of want,' आपदर्थं द्रव्यादि सम्भृ or आपदर्थे द्रव्यसम्भारं कृ; 'to provide thick clothing against the cold,' शीतनिवारणार्थं स्थूलवस्त्रादि कृप्; 'to provide for another,' परार्थं प्रयोजनीयद्रव्यादि परिकृप् or परं प्रयोजनीयद्रव्ययुक्तं कृ; 'to provide for another comfortably,' परस्वास्थ्यं कृ or जन्, परसुस्थतां कृ, परं सुखं कृ; 'to provide for, take measures against,' पूर्वोपायं कृ, अग्रे उपायं कृ, पूर्वोपायं प्रयुज्, उपायप्रयोगं कृ.

PROVIDED, *p. p.* (Furnished or prepared beforehand) अग्रे परिकल्पितः -ता -तं or परिकृतः -ता -तं or उपकृतः -ता -तं or सम्पादितः &c. or कल्पितः -ता -तं, पूर्वं सम्भृतः -ता -तं or युक्तः -क्ता -क्तं or समायुक्तः &c. or संयुक्तः &c. or सन्नितः -ता -तं or समन्वितः &c. or उपेतः &c. or संहितः &c. or निर्मितः -ता -तं; 'provided for,' प्रयोजनीयद्रव्ययुक्तः -क्ता -क्तं, सङ्गसोपकारद्रव्ययुक्तः &c., जातस्वास्थ्यः -स्थ्या -स्थ्यं, अवसन्नयुक्तः &c.—(Stipulated previously) पूर्वनियमितः -ता -तं, पूर्वपक्षितः &c., पूर्वसङ्केतितः &c.; 'provided that, with this condition,' पूर्वनियमे कृते, पूर्वसङ्केते कृते, एतेन सन्धिना.

PROVIDENCE, *s.* (Fore-sight, fore-thought) पूर्वदृष्टिः *f.*, अग्रदृष्टिः *f.*, दूरदृष्टिः *f.*, दूरदर्शनं, दीर्घदृष्टिः *f.*, दीर्घदर्शनं, पूर्वचिन्ता, अग्रचिन्ता, पूर्वविवेचनं, पूर्वविचारः -रणं -रा, अग्रविचारः, भविष्यद्दर्शनं, भविष्यच्चिन्ता, भाविचिन्ता, भाविकालावलोकनं, पूर्वविमर्शः, प्रसमीक्षा.—(The providence of God) ईश्वरानुसन्धानं, ईश्वरविधिः *m.*, ईश्वरविधानं.—(Divine Providence himself) विधाता *m.* (तृ), धाता *m.*, अनागतविधाता *m.*, भविष्यद्विधाता *m.*, विधिः *m.*, ईश्वरः, परमेश्वरः.

PROVIDENT, *a.* दीर्घदर्शी -र्शिनी -र्शि (न्), दूरदर्शी &c., दीर्घदृष्टिः -ष्टिः -ष्टि, दूरदृष्टिः &c., परिणामदर्शी &c., अग्रदर्शी &c., भविष्यद्दर्शी &c., अनागतदर्शी &c., भविष्यच्चिन्तकः -का -कं, भाविचिन्तकः &c., पूर्वविचारी &c., पूर्वविवेकी &c., अग्रतः -ता -तं.

PROVIDENTIAL, *a.* ईश्वरकृतः -ता -तं, ईश्वरविहितः &c., ईश्वरानुसन्धानप्रयुक्तः -क्ता -क्तं, ईश्वरविधानप्रयुक्तः &c., विधातृकृतः -ता -तं, विधातृविहितः -ता -तं, ईश्वरसिद्धः &c.

PROVIDENTIALLY, *adv.* ईश्वरविधानेन, ईश्वरविधिना, ईश्वरानुसन्धानात्, दिष्ट्या.

PROVIDENTLY, *adv.* दीर्घदृष्ट्या, अग्रदर्शनात्, परिणामदर्शनात्, भविष्यद्दर्शनात्, चिन्तापूर्वं, विवेचनापूर्वं, पूर्वविचारेण, पूर्वविचारं कृत्वा, पूर्वविवेचनं कृत्वा, प्रसमीक्ष्य, प्रविमृश्य.

PROVIDER, *s.* परिकल्पकः, उपकल्पकः. *See* PROCURER, &c.

PROVINCE, *s.* (Division of a kingdom) मण्डलं, चक्रं, देशः, प्रदेशः, विषयः, राष्ट्रं, निगमः, ग्रामज्ञा; 'governor of a province,' मण्डलेश्वरः, मण्डलपतिः *m.*, मण्डलाध्यक्षः, मण्डलाधिपतिः *m.*, माण्डलिकः.—(Peculiar office or business) स्वधर्मः, स्वकर्म *n.* (न्), कर्म *n.*, कार्यं, अधिकारः, प्रकरणं, क्रिया, नियोगः, निबन्धनं; 'woman's province,' स्त्रीधर्मः, स्त्रीनिबन्धनं.—(Department of science, &c.) प्रकरणं, देशः, अङ्गं, विषयः.

PROVINCIAL, *a.* दैशिकः -की -कं, देशीयः -या -यं, प्रादेशीयः &c., देश्यः -श्या -श्यं, देशी -शिनी -शि (न्), ग्रामण्डलिकः -की -कं, मण्डलसम्बन्धी &c., राष्ट्रिकः -की -कं, राष्ट्रीयः -या -यं, देश in comp., ग्रामीयः -या -यं, ग्राम्यः -म्या -म्यं, जानपदः -दी -दं.

PROVINCIAL, *s.* देशस्थः, देशजः, देशवासी *m.* (न्), ग्रामस्थः, ग्राम्यजनः.

PROVINCIALISM, *s.* देशभाषा, प्रादेशिकभाषा, ग्रामीणभाषा, ग्रामिकभाषा.

PROVISION, *s.* (Act of providing) उपकल्पनं, परिकल्पनं, कल्पनं, सम्भारः, विधानं, उपस्थापनं, उपपादनं, प्रस्तुतीकरणं.—(Measures taken beforehand) पूर्वोपायः, अग्र्योपायः, उपायः, पूर्वकल्पना, पूर्वविधानं; *see* PREPARATION.—(*Store or stock collected*) सम्भारः, संग्रहः, सञ्चयः, सञ्चितं, सामग्री -ग्र्यं, साहित्यं; 'provision of victuals,' अन्नसम्भारः, अन्नसंग्रहः, खाद्यद्रव्यसामग्री; 'of materials,' द्रव्यसामग्री, उपकरणसामग्री, उपकरणसम्भारः.—(Victuals, provisions) अन्नं, भोजनं, भोज्यं, भक्षं, आहारः, खाद्यद्रव्यं, भक्ष्यद्रव्यं, पाथेयं, याचिकं, निर्वाहः, शबलं, सबलः -लं; 'furnished with provisions,' खाद्यद्रव्ययुक्तः -क्ता -क्तं, पाथेयवान् -वती -वत् (त्).—(Previous stipulation) पूर्वनियमः, पूर्वसन्धिः *m.*, पूर्वसङ्केतः, पूर्वप्रतिज्ञा, पूर्वपक्षः, पूर्वसमयः, *See* PROVISO.

To PROVISION, *v. a.* (Furnish with provisions) खाद्यद्रव्ययुक्तं -क्तां कृ, खाद्यद्रव्यादि सम्भृ or उपकृप्, खाद्यद्रव्यसम्भारं कृ, अन्नसम्भारं कृ, खाद्यद्रव्यसम्भृतं -तां कृ.

PROVISIONAL, *a.* आपातिकः -की -कं, आपातिको नियोजितः -ता -तं, सामयिकः -की -कं, प्रासङ्गिकः &c., समयोपयोगी -गिनी -गि (न्), समयानुरूपः -पा -पं, अल्पकालीनः -ना -नं.

PROVISIONALLY, *adv.* आपातिकत्, यथासमयं, यथाप्रयोजनं, अल्पकालार्थं.

PROVISIONARY, PROVISORY, *a.* *See* PROVISIONAL.

PROVISO, *s.* उपनियमः, प्रकरणं, नियमप्रकरणं, सङ्केतः, उपसङ्केतः, प्रतिबन्धः, अनुबन्धः, नियमानुबन्धः, नियमपक्षानुबन्धः, नियमपक्षाङ्गं, नियमपक्षखण्डः, नियमपक्षावयवः, नियमैकदेशः; 'to annex one,' अधीनारोपन्यासं कृ.

PROVISORY, *a.* (Conditional) साङ्केतिकः -की -कं, सप्रतिबन्धः -न्धा -न्धं.

PROVOCATION, *s.* (Act of exciting anger) प्रकोपः -पणं, क्रोधकरणं, कोपकरणं, क्रोधोत्पादनं, कोपोत्पादनं, क्रोधोद्दीपनं, क्रोधोत्तेजनं.—(Cause of anger) कोपकारणं, क्रोधकारणं, कोपहेतुः *m.*—(Act of exciting) उत्तेजनं, उद्दीपनं, उद्बोधनं, प्रबोधनं.

PROVOCATIVE, *a.* उद्दीपकः -का -कं, अग्निवर्धकः &c., सुधाजनकः &c.

PROVOCATIVE, *s.* अग्निवर्धनं, रोचकः -कं, रुचकं, प्ररोचनं, सर्जिका.

To PROVOKE, *v. a.* (Excite to anger) प्रकुप् (c. 10. -कोपयति -यितुं), कुप्, क्रुध् (c. 10. क्रोधयति -धयितुं), कोपं or क्रोधं जन् or उत्पद् or उद्दीप् or उत्पद् (c. 10. -पादयति -यितुं), कोपोत्पादनं कृ, क्रोधोत्तेजनं कृ, क्रोधोद्दीपनं कृ.—(Excite) उद्दीप् (c. 10. -दीपयति -यितुं), उत्तिज् (c. 10. -तेजयति -यितुं), उत्तप् in caus., प्रबुध् in caus., प्ररुच् in caus.—(Challenge) आह्वे, समाह्वे, उपाह्वे.

PROVOKED, *p. p.* प्रकोपितः -ता -तं, प्रकुपितः &c., कुपितः &c., कोपितः &c., उपजातकोपः -पा -पं, जातकोपः &c., इज्जन्युः -न्युः -न्यु, इज्जन्योः -न्धा -न्धं, उद्दीपन्युः &c., कोपदीप्तः -प्ता -प्तं, उत्पन्नन्युः &c., उत्तेजितः -ता -तं, उद्दीपितः &c., उत्तापितः &c., उत्तप्तः -प्ता -प्तं, सन्तप्तः &c., सन्तापितः &c.

PROVOKING, *part.* or *a.* प्रकोपजनकः -का -कं, कोपजनकः &c., क्रोधजनकः &c., प्रकोपकः -का -कं, क्रोधोत्पादकः &c., क्रोधोद्दीपकः &c., कोपोद्दीपकः &c., क्रोधोत्तेजकः &c., उत्तेजकः &c., उद्दीपकः &c., उद्बोधकः &c.

PROVOKINGLY, *adv.* यथा कोपो जायते तथा, यथा क्रोध उद्दीप्यते तथा.

PROVOST, *s.* अध्यक्षः, अधीक्षः, अधिकारी *m.* (न्), अधिपतिः, श्रेष्ठी *m.*

PROW, *s.* नौकाग्रं, नौकाग्रभागः, नौपूर्वभागः, नौकोदग्रभागः.

PROWESS, *s.* पराक्रमः, विक्रमः, सुविक्रमः, शौर्यं, वीर्यं, सुवीर्यं, रणशौर्यं, रणोत्साहः, पौरुषं, कृतपौरुषं, अतिशक्तिता, जनौजस् *n.*, प्रौढिः *f.*, कर्मोदारं; 'personal prowess,' बाहुवीर्यं; 'gained by one's own prowess,' स्वहस्तार्जितः -ता -तं, स्वभुजोपार्जितः &c.; 'man of great prowess,' सुपराक्रमी *m.* (न्), सुविक्रमी *m.*, पराक्रान्तः, अतिशक्तिमान् *m.* (त्); 'to show prowess,' पराक्रम् (c. 1. -क्रामति -क्रमति -मितुं), विक्रम्.

To PROWL, *v. n.* मांसार्थं or आमिषार्थं भ्रम् (c. 4. भाम्यति, भ्रमितुं) or परिभ्रम्, मांसान्वेषणार्थं भ्रम् or पर्यट् (c. 1. -अटति -टितुं).

PROWLER, *s.* मांसार्थं भ्रमणकारी *m.* (न्) or परिभ्रमणकारी *m.*, परिभ्रमी *m.*

PROWLING, *s.* मांसार्थं or मांसान्वेषणार्थं भ्रमणं or परिभ्रमणं or पर्यटनं.

PROXIMATE, *a.* समीपः -पा -पं, निकटः -टा -टं, समीपस्थः -स्था -स्थं, निरन्तरः -रा -रं, सन्निहितः -ता -तं, निरन्तरालः -ला -लं, उपस्थः -स्था -स्थं, उपस्थायी -यिनी -यि (न्), आसन्नः -न्ना -न्नं, अन्तिकः -का -कं, उपसृष्टः -ष्टा -ष्टं, संसक्तः -क्ता -क्तं, सन्निकृष्टः -ष्टा -ष्टं, समीपगः &c. *See* NEAR, NEXT; 'proximate cause,' उपादानकारणं, उपादानं.

PROXIMATELY, *adv.* समीपतस्, सन्निहितं, सन्निकृष्टं, निरन्तरालं, अनन्तरालं.

PROXIMITY, *s.* सामीप्यं, सामीप्यं, सन्निकर्षः, सन्निकृष्टता, सन्निधिः *m.*, सान्निध्यं, सन्निधानं, सन्निधं, अन्तिकं -कता, उपस्थानं, उपस्थितिः *f.*, नैकट्यं, प्रत्यासत्तिः *f.*, प्रत्यासन्नता, संसक्तिः *f.*, संसर्गः, उपश्लेषः, आनन्तर्यं, तादृस्थ्यं. *See* NEARNESS.

PROXY, *s.* (Agency of another who acts as substitute) प्रतिनिधित्वं -ता *s.*—(Person who acts) प्रतिनिधिः *m.*, प्रतिपुरुषः, प्रतिहस्तः -स्तकः; 'by proxy,' प्रतिनिधिद्वारा, प्रतिनिधिद्वारेण; 'one who signs a paper by proxy,' लेखनिकः.

PRUDE, *s.* मिथ्याविनीता, अत्यन्तविनयनिष्ठा, विनयाभिमानिनी, अतिविनीताम्मन्या, सूक्ष्मविनयनिष्ठा, सूक्ष्माचारनिष्ठा, अत्याचारिणी, अत्याचारसेविनी, सुव्रीडिताम्मन्या, अतिविनयसेविनी, अत्यन्तविनीता.

PRUDENCE, *s.* पूर्वविचारः -रणा, परिणामदृष्टिः *f.*, पूर्वसमीक्षा, प्रसमीक्षा, समीक्षा -क्षणं, समीक्ष्यकारिता -त्वं, विमृश्यकारिता, परिणामदर्शनं, दीर्घदृष्टिः, सदसद्विवेकः, विनयः, विनीतता, नीतिः *f.*, नीतिज्ञता, प्राज्ञता, प्रज्ञता, विज्ञता, विवेकः, मनस्विता, विचारशीलता, पूर्वापरविचारः, मतिमत्त्वं, बुद्धिः *f.*, मनीषा, हिताहितविवेकः, पूर्वचिन्ता, चिन्ता, कार्यचिन्ता, परिवेदना, सावधानता, पूर्वदृष्टिः *f.*, अग्रदृष्टिः *f.*, विमर्शः, विवेचना, पूर्वविवेचना.

PRUDENT, *a.* परिणामदर्शी -र्शिनी -र्शि (न्), पूर्वविचारशीलः -ला -लं, दीर्घदर्शी &c., दीर्घदृष्टिः -ष्टिः -ष्टि, समीक्ष्यकारी -रिणी &c., विमृश्यकारी &c., समीक्षाकारी &c., प्राज्ञः -ज्ञा -ज्ञं, प्रज्ञः &c., विज्ञः &c., मनस्वी -स्विनी &c., मतिमान् -मती -मत् (त्), बुद्धिमान् &c., प्रज्ञावान् &c., मनीषी -षिणी &c., परिवेदी -दिनी &c., परिवेदकः -का -कं, बुधः -धा -धं, सुबोधः -धा -धं, विनीतः &c., विनयवान् &c., नीतिमान् &c., नीतिज्ञः -ज्ञा -ज्ञं, पूर्वापरविचारी &c., विचारशीलः -ला -लं, सदसद्दर्शी &c., सदसद्विवेकी &c., दूरदर्शी &c., हिताहितविवेकी &c., पूर्वचिन्तकः -का -कं, पूर्वचिन्ताशीलः &c., कार्यचिन्तकः &c., धीरः -रा -रं, सावधानः -ना -नं, कृतावधानः -ना -नं, कृतधीः -धीः -धि, प्रयत्नः -त्ना -त्नं.

PRUDENTIAL, *a.* पूर्वविचारप्रयुक्तः -क्ता -क्तं, पूर्वसमीक्षाप्रयुक्तः &c., प्रसमीक्षाप्रयुक्तः &c., सविचारः -रा -रं, सविवेकः -का -कं.

PRUDENTLY, *adv.* सविचारं, समीक्षापूर्वं, प्रसमीक्ष्य, सुसमीक्ष्य, सुविमृश्य, परिणामदर्शनात्, परिणामदृष्ट्या, पूर्वविचारेण, सावधानं, सपरिवेदनं, प्राज्ञवत्, विज्ञवत्.

PRUDERY, *s.* मिथ्याविनयः, मिथ्यालज्जा, एकान्तविनयः, सूक्ष्मविनयनिष्ठा, सूक्ष्माचारनिष्ठा, अत्याचारनिष्ठा, विनयाभिमानं, अतिसूक्ष्मशीलता, अतिसूक्ष्मता, अतिविनीतता.

PRUDISH, *a.* मिथ्याविनीतः -ता -तं, एकान्तविनीतः &c., अत्यन्तविनीतः &c., अतिसूक्ष्मः -क्ष्मा -क्ष्मं, विनयाभिमानी -निनी &c. *See* PRUDE, *s.* PRECISE, *a.*

To PRUNE, *v. a.* क्षुद्रपल्लवान् or निरर्थकविटपान् अवच्छिद् (c. 7. -च्छिनत्ति -च्छेत्तुं) or अवकृत् (c. 6. -कृणत्ति -कर्त्तितुं) or लू (c. 9. लुनाति लवितुं) or लुप् (c. 6. लुम्पति, लोप्तुं).

PRUNED, *p. p.* छिन्नपल्लवः -वा -वं, छिन्नविटपः -पा -पं, लूनविटपः &c.

PRUNER, *s.* विटपच्छिद् *m.*, पल्लवच्छिद् *m.*, निरर्थकविटपच्छेत्ता *m.* (तृ).

PRUNING, *s.* पल्लवावच्छेदः, विटपावच्छेदः, निरर्थकविटपावकर्त्तनं.

PRUNING-HOOK, PRUNING-KNIFE, *s.* पल्लवच्छेदनी, विटपच्छेदनी, पल्लवकर्त्तनी.

PRURIENCE, PRURIENCY, *s.* कण्डूतिः *f.*, कण्डूः *f.*, कण्डुः *f.*, कण्डूया, कण्डूयनं.—(Longing desire for any thing) अतिस्पृहा, अत्यन्तस्पृहा, अतिशयेच्छा, अत्यभिलाषः.

PRURIENT, *a.* कण्डूलः -ला -लं, कण्डूतिमान् -मती -मत् (त्), सकण्डूतिः -तिः -ति.

PRURIGO, *s.* कण्डूः *f.*, कण्डुः *f.*, खर्जूः *f.*, कच्छूः *f.*, कच्छुः *f.*, सुकण्डुः *f.*

To PRY, *v. a.* सूक्ष्मं निरूप् (c. 10. -रूपयति -यितुं), सूक्ष्मं निरीक्ष् (c. 1. -ईक्षते -क्षितुं) or दृश् (c. 1. पश्यति, द्रष्टुं), सूक्ष्मदर्शनं कृ, सूक्ष्मान्वीक्ष् (c. 4. -ईक्ष्यति -क्षितुं) or अनुसन्धा (c. 3. -दधाति -धातुं), सूक्ष्मान्वेषणं कृ, सूक्ष्मानुसन्धानं कृ, सूक्ष्मं चर्च् (c. 1. चर्चति -र्चितुं), सूक्ष्मचर्चां कृ, चर्चां कृ, अनधिकारचर्चां कृ, मर्मान्वेषणं कृ, सूक्ष्मगवेषणं कृ, मर्मगवेषणं कृ.

PRYING, *s.* सूक्ष्मनिरूपणं, सूक्ष्मनिरीक्षणं, सूक्ष्मदर्शनं, सूक्ष्मदृष्टिः *f.*, सूक्ष्मान्वेषणं, सूक्ष्मानुसन्धानं, सूक्ष्मचर्चा, अनधिकारचर्चा, चर्चा, मर्मान्वेषणं.

PSALM, *s.* गीतं, स्तुतिगीतं, गानं, स्तुतिगानं, स्तोत्रं, सङ्गीतं, सङ्गीतं, ईश्वरस्तुतिगीतं, भक्तिगीतं, भक्तिगानं, धर्मगीतं.

PSALMIST, *s.* गीतरचकः, स्तुतिगीतरचकः, स्तोत्ररचकः, गीतकारः, गीतकविः *m.*

PSALMODY, *s.* स्तुतिगानं, स्तोत्रगानं, स्तोत्रगीतिः *f.*, ईश्वरस्तुतिगानं.

PSALMOGRAPHY, *s.* गीतरचनं, स्तुतिगीतरचनं, स्तोत्ररचनं, गीतकरणं.

PSALTER, *s.* गीतपुस्तकं, गीतसंहिता, गीतसंहारः, स्तोत्रपुस्तकं, खिलं.

PSEUDO. A prefix expressed in Sanskrit by मिथ्या, मृषा, कृत्रिम, कु &c. prefixed, or कल्प, देशीय &c. affixed; as, 'a pseudo-poet,' मिथ्याकविः *m.*, कुकविः, कविकल्पः, कविदेशीयः; pseudology, मिथ्यावादः, मृषावादः; 'pseudo-morphous,' कृत्रिमरूपः -पा -पं; 'pseudonymous,' कृत्रिमनामा &c.

PSHAW, *exclam.* धिक्, थे, अवे, अरे, रे, कित्, हुम्, अपैहि.

PSYCHOLOGICAL, *a.* आत्मतत्त्वविषयः -या -यं, अध्यात्मविषयकः -का -कं.

PSYCHOLOGY, *s.* आत्मतत्त्वविद्या, अध्यात्मविद्या, अध्यात्मशास्त्रं.

PUBERTY, PUBESCENCE, *s.* यौवनं, यौवनावस्था, तारुण्यं, तारुण्यावस्था, तरुणत्वं, युवत्वं, यौवनकालः, प्रौढता, प्रौढिः *f.*, प्रौढदशा; 'attained to puberty,' प्राप्तयौवनः -ना -नं, प्राप्तयौवनकालः -ला -लं; 'not attained to it,' अप्राप्तयौवनः &c.

PUBESCENT, *a.* प्राप्तयौवनः -ना -नं, अङ्कुरितयौवनः &c., प्राप्ततारुण्यः -ण्या -ण्यं.

PUBLIC, *a.* (Pertaining to the community) सर्वसम्बन्धी -न्धिनी -न्धि (न्), सर्वलोकसम्बन्धी &c., प्रजासम्बन्धी &c., लोक in comp., प्रजा in comp. (General, common to many,) साधारणः -णा -णी -णं, सामान्यः -न्या -न्यं, सर्वसाधारणः &c., सर्वसामान्यः &c., सार्वलौकिकः -की -कं, लौकिकः &c., सार्वजनिकः -की -कं, सर्वजनीनः -ना -नं, सर्वजनीयः -या -यं, विश्वजनीनः &c., विश्वजनीयः -या -यं, सर्वः -र्वा -र्वं, सार्वः -र्वी -र्वं, सर्वीयः -या -यं, लोक or जन in comp., (Commonly known or current) प्रसिद्धः -द्धा, लोकप्रसिद्धः &c., सर्वप्रसिद्धः &c., जनप्रसिद्धः &c., सर्वजनप्रसिद्धः &c., सर्वलोकप्रसिद्धः &c., जगत्प्रसिद्धः &c., देशप्रसिद्धः &c., लोकविश्रुतः -ता -तं, सर्वत्र प्रथितः -ता -तं or प्रचलितः -ता -तं, लोक or जन in comp., *see* POPULAR.—(Open to all) प्रकाशः -शा -शं, सर्वप्रकाशः &c., सर्वलोकप्रकाशः &c., प्रकटः -टा -टं, सर्वप्रकटः &c., लोकप्रकाशः &c., अविधिकः -का -कं; 'public sale,' प्रकाशविक्रयः प्रकाशक्रयः; 'public benefit,' लोकोपकारः; 'public business,' लोकव्यवहारः व्यवहारः; 'public odium' जनविद्वेषः; 'public property,' गवाद्रव्यं; 'public feeling,' लोकचित्तं, प्रकृतिचित्तं.

PUBLIC, *s.* लोकः, सर्वलोकः, सर्वजगाः *m. pl.*, प्रजा, प्रजालोकः; 'for the benefit of the public,' प्रजार्थं, लोकार्थं, लोकोपकारार्थं; 'in public,' प्रकाशं, प्रकाशतस्, प्रकटं, प्राकट्येन, सर्वप्रकाशं, लोकसाक्षात्, लोकसम्मुखं; 'in public and in private,' प्रकाशं विविक्तं च, प्रकाशम् एकान्ततश्च; 'regard for the public or public opinion,' लोकलज्जा, जनलज्जा.

PUBLICAN, *s.* (Collector of tribute or toll) करग्रहः, करग्राही *m.* (न्), करसंग्राही *m.*, शुल्कग्राही *m.*—(Retailer of beer and spirits) शौण्डिकः, शुण्डी *m.* (न्), यवसुरादिविक्रयी *m.* (न्) शुल्कादिविक्रेता *m.* (तृ) सुराविक्रयी *m.*

PUBLICATION, *s.* (The act) प्रकाशनं, प्रकटनं, प्रकटीकरणं, प्रसिद्धीकरणं, प्रकाशीकरणं.—(A published book) प्रकाशितपुस्तकं, प्रसिद्धपुस्तकं.

PUBLIC-HOUSE, *s.* शुण्डास्थानं, मद्यस्थानं, पानगोष्ठिका, शुण्डापानं, शुण्डा, मदिरागृहं, मदिराशाला, आपानं, यवसुरादिविक्रयस्थानं, शुल्कादिविक्रयस्थानं, सुराविक्रयस्थानं.

PUBLICITY, *s.* प्रकाशता, लोकप्रकाशता, लोकप्रकाशः, जनप्रकाशः, प्रकाशः, प्राकट्यं, लोकप्राकट्यं, प्रसिद्धिः *f.*, लोकप्रसिद्धिः *f.*, प्रसिद्धता, लोकप्रसिद्धता -त्वं, लोकविश्रुतिः *f.*, विश्रुतिः, जनप्रसिद्धिः *f.*, प्रख्यातिः *f.*, विख्यातिः *f.*, ख्यातिः *f.*, लौकिकता -त्वं, स्फुटता, व्यक्तता, स्पष्टता.

PUBLICLY, *adv.* (Openly, before the world) प्रकाशं, प्रकाशतस्, प्रकटं, प्राकट्येन, लोकप्रकाशं, सर्वप्रकाशं, प्रसिद्धं, अविधिकं; 'publicly and privately,' *see* PUBLIC, *a.*—(Without concealment) व्यक्तं, सुव्यक्तं, स्पष्टं, स्फुटं, साक्षात्, प्रादुस्, आविस्, आविष्कारं, अगूढं.

PUBLIC-SPIRITED, PUBLIC-MINDED, *a.* लोकोपकारशीलः -ला -लं, लोकोपकारबुद्धिः -द्धिः -द्धि, लोकार्थबुद्धिः &c., जनार्थबुद्धिः &c., लोकार्थी -र्थिनी -र्थि (न्), जनार्थी &c., लोकहितैकुः -कुः -कु, लोकहिताः -ता -तं, सर्वजनहितैषी &c., साधारणजनकैकुः &c.

PUBLIC-SPIRITEDNESS, *s.* लोकोपकारशीलता, लोकोपकारबुद्धिः *f.*, लोकहितैकता.

To PUBLISH, *v. a.* (Make generally known) प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, प्रकटीकृ, प्रकट (nom. प्रकटयति -यितुं), प्रसिद्धीकृ, ख्या in caus. (ख्यापयति -यितुं), प्रख्या, विख्यै, आख्या, घुष् (c. 10. घोषयति -यितुं), विघुष्, आघुष्, प्रथ् (c. 10. -थयति -यितुं), विज्ञा in caus. (-ज्ञापयति -ज्ञपयति -यितुं), घुष् (c. 10. घोषयति -यितुं), प्रथ् (c. 10. प्रथयति -यितुं), निविद् (c. 10. -वेदयति -यितुं), विद्, आविष्कृ, प्रादुष्कृ.—(Publish a book) पुस्तकं प्रकाश् or प्रसिद्धीकृ.—(Put into circulation) प्रचलीकृ, प्रचल् (c. 10. -चलयति -यितुं), प्रचर्.

PUBLISHED, *p. p.* प्रकाशितः -ता -तं, प्रकटीकृतः -ता -तं, प्रकटितः -ता -तं, प्रसिद्धीकृतः &c., ख्यापितः -ता -तं, घोषितः &c., विघोषितः &c., आघोषितः &c., विज्ञापितः &c., प्रख्यातः -ता -तं, प्रचलीकृतः &c., प्रचारितः &c., आविष्कृतः &c., प्रादुष्कृतः &c., प्रथितः &c.

PUBLISHER, *s.* प्रकाशकः, प्रकाशयिता *m.* (तृ), ख्यापकः, विज्ञापकः, प्रसिद्धकर्ता *m.* (र्तृ), आविष्कर्ता *m.*, प्रादुष्कर्ता *m.*

To PUCKER, *v. a.* संकुच् (c. 1. -कोचति -चितुं), कुच् (c. 1. कुचति -चितुं), आकुच्, संहृ (c. 1. -हरति -हर्तुं), पुटीकृ, सम्पुटीकृ, सङ्कोचं कृ.

PUCKER, PUCKERING, *s.* पुटः, पुटीकरणं, सङ्कोचः -चनं, कुचनं, आकुचनं.

PUDDER, *s.* तुमुलं, कोलाहलः, सम्भ्रमः, विप्लवः, व्यग्रता, व्यस्तता.

PUDDING, *s.* वोल्लिका, पोलिका; 'plum-pudding,' *see* the word.

PUDDLE, *s.* सन्नदकः, पङ्कजलीयः, कर्दमजलीयः, सपङ्कजलीयः, पङ्कजलगुल्फः, मलिनजलीयः, समलजलीयः, पङ्कगुल्फः.

To PUDDLE, *v. a.* समलीकृ, पङ्किलीकृ, कलुषीकृ, आविलीकृ. *See* MUDDLE.

PUDENCY, PUDICITY, *s.*, *see* MODESTY.

PUDENDUM, PUDENDA, *s.* (Of a woman) भगं, योनिः *f.*, अधोऽङ्गं, अधोपरं, अधोपद्मः, अधस्, अधस्तात्, उपस्थः, गुह्याङ्गं, रतिकुहरं, रतिमन्दिरं, रतिगृहं. *See* PRIVITY.

PUERILE, *a.* बालिशः -शा -शं, बालेयः -या -यं, बालकीयः -या -यं, बालयोग्यः -ग्या -ग्यं, शिशुयोग्यः &c., बालधर्मकः -का -कं, बालपुद्धिः -द्धिः -द्धि.

PUERILITY, *s.* बालिश्यं, बालेयत्वं -ता, बालकीयता, बालयोग्यता.

PUERPERAL, *a.* प्राजूतिकः -की -कं, प्रसवसम्बन्धी -न्धिनी -न्धि (न्).

PUERPEROUS, *a.* बालप्रसविनी, बालप्रसवती, प्रसूतिका, सूतिका.

PUFF, *s.* (Breath from the mouth) श्वासः, श्वसितं, मुखमरुत्, वदनमरुतः.—(A puff or sudden whiff) फूत्कृतं, फूत्कारः, फूत्कृतं, फूत्कारः फूत् indec.—(Blast, gust) ध्मानं, आध्मानं, ध्मातं, वातः, वातरूपः, वाता, निर्घातः, प्रभञ्जनः.—(Kind of cake) पिष्टकं, आपूपिकं.—(Tumid commendation) अतिशयप्रशंसा, अत्युक्तिरूपा प्रशंसा, अधिकप्रशंसा, अतिशयोक्तिः *f.*

To PUFF, *v. n.* (Breathe) श्वस् (c. 2. श्वसिति -तुं), श्वासं कृ, प्रश्वासं कृ.—(Pant) कृच्छ्रेण श्वस्, कृच्छ्रेण श्वासप्रश्वासं कृ, उद्ध्मा (c. 1. -धमति -ध्मातुं), उद्धमं कृ, प्राणकृच्छ्रोपहतः -ता -तं भू.—(Blow) वा, प्रवा.—(Eject air from the mouth suddenly) अकस्माद् वदनमरुतं or मुखमरुतं निरस् (c. 4. -अस्यति -असितुं) or निःसृ in caus.—(Blow upon with a puffing noise) फूत्कृ, फूत्कृ, फूत्कारं कृ, फूत्कारं कृ, फूत्कारेण or फूत्कारेव प्रश्वस्.—(Swell or be inflated with air) ध्मा in pass. (ध्मायते), आध्मा, वातेन पू in pass. (पूर्यते).

To PUFF, *v. a.* (Inflate, dilate with air) ध्मा (c. 1. धमति, ध्मा), आध्मा, समाध्मा, ध्मा, उपध्मा, वातेन पू (c. 10. पूरयति -यितुं), श्वासेन पू, वायुपूरितं -तां कृ.—(Blow away) अपध्मा, विध्मा.—(Puff up with pride, &c.) दर्पोध्मातं -तां कृ, गर्वोध्मातं -तां कृ, उद्धतीकृ, उन्नतीकृ.—(Praise with exaggeration) अत्युक्त्या or अतिशयोक्त्या प्रशंस्, अतिशयप्रशंसां कृ.

PUFFED, *p. p.* (Inflated) ध्मातः -ता -तं, आध्मातः &c., समाध्मातः &c., प्रध्मातः &c., वातपूरितः -ता -तं, वायुपूर्णः -र्णा -र्णं, श्वासपूरितः &c.—(Puffed up with pride, &c.) दर्पोध्मातः -ता -तं, गर्वोध्मातः &c., उद्धतः &c., दर्पोद्धतः &c., गर्वोद्धतः &c.

PUFFY, *a.* आध्मातः -ता -तं, वातमयः -यी -यं, शब्दमात्रः -त्रा -त्रं.

PUG-DOG, *s.* मर्कटमुखः क्षुद्रकुक्कुरभेदः.

PUG-FACED, *a.* वानरमुखः -खी -खं, मर्कटवदनः -ना -नं, कपिमुखः &c.

PUG-NOSE, *s.* चिपिटः, चिपिटकः, चिपुटः, चिक्किनः, अवभ्रटः.

PUGILISM, *s.* मुष्टियुद्धं, मुष्टियोधनं, मुष्टिपातः, मल्लयुद्धं, मुष्टीमुष्टि, बाहुयुद्धं.

PUGILIST, *s.* मुष्टियोद्धा *m.* (द्धृ), मुष्टियोधः, मुष्टियोधी *m.* (न्), बाहुयोधी *m.*

PUGILISTIC, *a.* मुष्टियुद्धसम्बन्धी -न्धिनी -न्धि (न्), बाहुयुद्धसम्बन्धी &c.

PUGNACIOUS, *a.* युयुत्सुः -त्सुः -त्सु, कलहप्रियः -या -यं, युद्धप्रियः &c., रणप्रियः &c., युद्धेच्छुः -च्छुः -च्छु, युद्धकारी -रिणी -रि (न्), कलहकारी &c., रणकामी -मिनी &c., युद्धकामी &c.

PUGNACITY, *s.* युयुत्सा, युद्धेच्छा, युद्धप्रियता, कलहप्रियता, कलहेच्छा.

PUISNE, *a.* अवरः -रा -रं, अवरपदस्थः -स्था -स्थं, अवरजः -जा -जं.

PUISSANCE, *s.* पराक्रमः, विक्रमः, प्रभावः, ऐश्वर्य्यं, तेजस् *n.*, प्राबल्यं.

PUISSANT, *a.* पराक्रमी -मिणी -मि (न्), विक्रमी &c., पराक्रान्तः -न्ता -न्तं, विक्रान्तः &c., महाबलः -ला -लं, बलवान् -वती -वत् (त्), महाशक्तिः -क्तिः -क्ति, महाविक्रमः -मा -मं.

To PUKE, *v. n.* वम् (c. 1. वमति -मितुं), वमनं कृ, छर्द् (c. 10. छर्दयति -यितुं).

PUKE, *s.* वान्तिकारकम् औषधं, वान्तिकृत्, छर्दनकृत्.

PUKING, *s.* वान्तिः *f.*, वमनं, छर्दनं; *part.*, वमी -मिनी -मि (न्).

PULCHRITUDE, *s.* *See* BEAUTY.

To PULE, *v. n.* (Like a child) बालकवद् रु (c. 2. रौति, रवितुं), शिशुवद् रुद् (c. 2. रोदिति -तुं); 'like a chicken,' पक्षिशावकवत् कूज् (c. 1. कूजति -जितुं).

To PULL, *v. a.* or *n.* (Draw, drag) कृष् (c. 1. कर्षति, c. 6. कृषति -ते, क्रष्टुं, कर्ष्टुं), आकृष्, समाकृष्, परिकृष्, प्रतिकृष्, संकृष्, कर्षणं कृ.—(Pull forcibly) हृ (c. 1. हरति, हर्त्तुं), हरणं कृ.—(Pluck, gather by plucking) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), आदा (c. 3. -ददाति -दत्ते -दातुं), अङ्गुलिभिर् ग्रह् or आदा or चि or अवचि; 'to pull the hair,' केशग्रहं कृ, केशग्रहणं कृ, केशान् ग्रह्.—(Pull down) अपकृष्, अवकृष्, व्यपकृष्, पत् in caus., अधःपत्.—(Pull off) अपकृष्, अवकृष्, व्यपकृष्, उत्कृष्, अपहृ, व्यपहृ, अपनी, अवतॄ in caus. (-तारयति -यितुं); 'he pulls off his clothes,' वस्त्रम् अवतारयति.—(Pull out) उत्कृष्, निष्कृष्, उद्धृ, निर्हृ, उत्पट् (c. 10. -पाटयति -यितुं), उत्खन् (c. 1. -खनति -नितुं), निर्या in caus., उत्पाटनं कृ; 'the hair,' लुञ्च् (c. 1. लुञ्चति -ञ्चितुं), उल्लुञ्च्, अवलुञ्च्, विलुञ्च्, उत्पट्, केशोल्लुञ्चनं कृ, केशोत्पाटनं कृ.—(Pull towards) आकृष्, समाकृष्, प्रतिकृष्.—(Pull in pieces, pull in two) विदॄ (c. 10. -दारयति -यितुं), अवदॄ, विभिद्, विदलीकृ, खण्डशः कृ, खण्डं खण्डं कृ.—(Pull up) उत्पट्, उद्धृ, समुद्धृ, उच्छिद्, उत्खन्; 'by the roots,' उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, समूलं or आमूलम् उद्धृ.

PULL, *s.* कर्षणं, कृष्टिः *f.*, कर्षः, आकर्षः -र्षणं, आकृष्टिः *f.*, संकर्षणं, विकर्षणं.

PULLED, *p. p.* कर्षितः -ता -तं, कृष्टः -ष्टा -ष्टं, आकर्षितः &c., आकृष्टः &c., अवकृष्टः &c., विकर्षितः &c., विकृष्टः &c., हृतः -ता -तं, गृहीतः -ता -तं; 'pulled by the hair,' केशगृहीतः &c., केशेषु गृहीतः; &c.; 'pulled off, as clothes, &c.,' अवतारितः -ता -तं; pulled out,' उत्कृष्टः -ष्टा -ष्टं, निष्कर्षितः &c., उद्धृतः &c., उत्पाटितः &c.; 'as the hair,' उल्लुञ्चितः &c.; 'pulled up,' उन्मूलितः -ता -तं, उत्पाटितः &c., उत्खातः &c., व्यपरोपितः &c.

PULLET, *s.* कुक्कुटीशावकः, कुक्कुटशावकः, पक्षिशावकः, पक्षिणीशावकः.

PULLEY, *s.* काष्ठान्तर्गतं क्षुद्रचक्रं, काष्ठान्तःस्थं सूक्ष्मचक्रं तच्च रज्जुसम्बद्धं भूत्वा कीलकोपरि परिवर्त्तते, कीलकोपरि परिवर्त्तमानं क्षुद्रचक्रं.

PULLING, *s.* कर्षणं, कृष्टिः *f.*, आकर्षणं, आकृष्टिः *f.*, संकर्षणं, विकर्षः -र्षणं, उत्कर्षः, हरणं, ग्रहणं, अङ्गुलिग्रहणं; 'pulling the hair,' केशग्रहः -हणं; 'mutual pulling of the hair,' केशाकेशि indec.; 'pulling up the hair,' केशलुञ्चनं, केशोल्लुञ्चनं.

To PULLULATE, *v. n.* (Germinate) स्फुट्, फुल्ल्, अङ्कुर, विकस्.

PULLULATION, *s.* स्फुटनं, फुल्लतिः *f.*, फुल्लिः *f.*, उद्भेदः, विकसनं.

PULMONARY, PULMONIC, *a.* फुप्फुससम्बन्धी -न्धिनी -न्धि (न्), फुप्फुसनिष्ठः -ष्ठा -ष्ठं, फुप्फुसस्थः -स्था -स्थं, फुप्फुसीयः -या -यं.

PULP, *s.* मज्जा, मज्जा *m.* (न्), मज्जनं, सारः, गर्भः.—(Of fruit) फलसारः, फलगर्भः, फलस्य कोमलभागः or मृदुभागः.

PULPINESS, *s.* समज्जता, मज्जावत्त्वं, मज्जागुणकत्वं, कोमलता, मृदुता.

PULPIT, *s.* उपदेशासनं, उपदेशपीठं, धर्म्मोपदेशपीठं, पीठं, पुरोहितासनं, धर्म्मोपदेशकासनं, धर्म्माध्यापकासनं, धर्म्माध्यापकपीठं.

PULPOUS, PULPY, *a.* मज्जागुणकः -का -कं, मज्जोपमः -मा -मं, मज्जामयः -यी -यं, समज्जः -ज्जा -ज्जं, मांसलः -ला -लं, मांसगुणकः -का -कं, कोमलः -ला -लं, आर्द्रमृदुः -द्वी -दु, मृदुः &c.

To PULSATE, *v. n.* (Palpitate) स्पन्द्, स्फुर्, कम्प्, वेप्.

PULSATION, *s.* स्पन्दनं, प्रतिस्पन्दनं, स्पन्दितं, कम्पः-म्पनं, स्फुरणं, विष्पन्दः, चलत्वं; 'of the heart,' हृदयस्पन्दनं, हृत्कम्पः; 'of an artery,' नाडिस्फुरणं, नाड्याघातः.

PULSE, *s.* (Of the blood or an artery) नाडिः -डी *f.*, नाली -लिः *f.*, नाडीस्फुरणं, नालीस्फुरणं, नाडीस्पन्दनं, नाड्याघातः; 'feeling the pulse,' नाडीपरीक्षा; 'to feel the pulse,' नाडीपरीक्षां कृ.—(Leguminous plant) कलायः, सतीनः -नकः, सतीलः -ला -लकः, सितीलकः, सातीलकः, सातिलकः, द्विदलं, त्रिपुटः, खण्डिकः, हरेणुः *m.*, शमीधान्यं, वनसङ्कटः, धान्यवीरः, मुद्गः, वर्त्तुलः; 'pulse ground and fried,' वडा, वटकः,

PULVERABLE, *a.* क्षोदनीयः -या -यं, चूर्णनीयः &c., चूर्णीकरणयोग्यः &c.

PULVERIZATION, *s.* चूर्णीकरणं, क्षोदीकरणं, चूर्णनं, सञ्चूर्णनं, क्षोदनं.

To PULVERIZE, *v. a.* चूर्ण् (c. 10. चूर्णयति -यितुं), संचूर्ण्, प्रचूर्ण्, विचूर्ण्, चूर्णीकृ, क्षुद् (c. 7. क्षुणत्ति, क्षोत्तुं), प्रक्षुद्, संक्षुद्, क्षोदीकृ, पिष्, गुण्ड् &c. *See To* POUND, POWDER.

PULVERIZED, *p. p.* चूर्णितः -ता -तं, चूर्णीकृतः -ता -तं, संचूर्णितः &c., चूर्णीभूतः -ता -तं, क्षोदितः -ता -तं, क्षोदीकृतः &c., पिष्टः -ष्टा -ष्टं, गुण्डितः -ता -तं, गुण्डितः -ता -तं.

PULVERULENT, *a.* चूर्णमयः -यी -यं, पांशुलः -ला -लं. *See* POWDERY.

PUMMEL, *s.* (Of a saddle) वङ्का.

PUMP, *s.* जलोत्तोलनयन्त्रं, जलोत्तोलननाडिः -डी *f.*, जलोत्क्षेपणयन्त्रं, जलोत्क्षेपकयन्त्रं, जलोत्क्षेपकनाडी, जलोत्तोलनी, जलोत्क्षेपणी, जलनाडी, जलनाली; 'place where water is distributed,' प्रपा.

To PUMP, *v. a.* or *n.* नाडीद्वारेण जलम् उत्तुल् (c. 10. -तोलयति -यितुं) or उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or जलोत्तोलनं कृ or जलोत्क्षेपणं कृ, जलनाडीं सञ्चल् (c. 10. -चालयति -यितुं), जलोत्तोलनयन्त्रं सञ्चल्.—(Interrogate artfully) सव्याजं प्रच्छ् or अनुप्रच्छ् or परिप्रच्छ्, प्रश्नेन परीक्ष् or अनुसन्धा.

PUMPKIN, *s.* कुष्माण्डः -ण्डा -ण्डी, कुष्माण्डकः, कूष्माण्डः -ण्डी -ण्डकः, अलाबूः *f.*, अलाबुः *f.*, आलाबुः *f.*, तुम्बी, कर्कारुः *m.*

PUN, *s.* श्लेषः, श्लेषोक्तिः *f.*, श्लेषवाक्यं, श्लेषालङ्कारः, द्व्यर्थवाक्यं, अर्थापत्तिः *f.*

To PUN, *v. n.* श्लेषोक्तिं कृ, श्लेषवाक्यं वद् (c. 1. वदति -दितुं)

PUNCH, *s.* (Instrument for perforating) वेधनी, वेधनिका.—(Thrust, blow) आघातः, अभिघातः, प्रहारः; 'with the elbow,' कील-

-ला, कीलाघातः, अरत्निप्रहारः.—(Kind of drink) शर्करादिमिश्रितं मद्यजलीरादिरसमयं पानीयं.—(In a puppet show) पुत्तलिकाक्रीडायां वैहासिकः or विदूषकः.

To PUNCH. *v. a.* (Pierce with a punch) पूर्व्वोक्तयन्त्रेण व्यध्.—(With the elbow) अरत्निना तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रहृ (c. 1. -हरति -हर्त्तुं), अरत्निं प्रसार्य्य तड्, कीलाघातं कृ.

PUNCHEON, *s.* (Instrument), *see* PUNCH.—(A measure), *see* CASK.

PUNCHY, *a.* ह्रस्वस्थूलः -ला -लं स्थूलह्रस्वः -स्वा -स्वं, घनह्रस्वः &c.

PUNCTILIO, *s.* सूक्ष्मविषयः, सूक्ष्मविधिः *m.*, सूक्ष्मनियमः, सूक्ष्मता, अतिसूक्ष्मता, सौक्ष्म्यं, अतिसौक्ष्म्यं, शिष्टाचारसौक्ष्म्यं, सभ्याचारसूक्ष्मता.

PUNCTILIOUS, *a.* अतिसूक्ष्मदृष्टिः -ष्टिः -ष्टि, अतिसूक्ष्मदर्शी -र्शिनी -र्शि (न्), अतिसूक्ष्मः -क्ष्मा -क्ष्मं, सूक्ष्मोपचारदर्शी, सूक्ष्माचारनिष्ठः -ष्ठा -ष्ठं, अतिसूक्ष्माचारी &c., सूक्ष्मनियमनिष्ठः &c., सूक्ष्मोपचारनिष्ठः &c., सूक्ष्मोपचारशीलः -ला -लं, सूक्ष्मादरनिष्ठः &c., सूक्ष्मनियमी &c., नियमनिष्ठः &c., अत्याचारी &c.

PUNCTILIOUSNESS, *s.* अतिसूक्ष्मदर्शनं, अतिसूक्ष्मदृष्टिः *f.*, सूक्ष्मोपचारनिष्ठा, सूक्ष्मनियमनिष्ठा, सूक्ष्मादरनिष्ठा, सूक्ष्मसत्कारनिष्ठा, सूक्ष्मादरशीलता, अत्याचारः.

PUNCTUAL, *a.* समयपालकः -का -कं, समयरक्षकः -का -कं, समयनिष्ठः -ष्ठा -ष्ठं, समयसेवी -विनी -वि (न्), कालरक्षकः -का -कं, कालनिष्ठः -ष्ठा -ष्ठं, कालपालकः -का -कं, कालसेवी &c., सामयिकः -की -कं, सङ्केतपालकः -का -कं, सङ्केतनिष्ठः &c., नियमपालकः &c., नियमनिष्ठः &c., वचननिष्ठः &c., प्रतिज्ञानिष्ठः &c., प्रतिज्ञापालकः &c., दृढनियमी &c.

PUNCTUALITY, PUNCTUALNESS, *s.* समयपालनं, समयनिष्ठा, समयसेवनं, कालनिष्ठा, कालसेवनं, कालपालनं, समयरक्षणं, कालरक्षणं, सङ्केतपालनं, सङ्केतनिष्ठा, नियमनिष्ठा, नियमपालनं, वचननिष्ठा, प्रतिज्ञानिष्ठा.

REDUCED, *p. p.* (Brought to a former state) पूर्ववत्कृतः -ता -तं, पूर्ववद्भूतः &c., पूर्वावस्थाकृतः &c., पूर्वदशाकृन्नितः &c., पूर्वस्थितिकृतः &c.—(Brought to any state) गमितः -ता -तं, परिगमितः &c., गतः -ता -तं, कृतः &c. in comp. भूतः &c. in comp.; 'reduced to poverty,' दारिद्र्यगतः -ता -तं, दारिद्र्यकृतः &c., दरिद्रीकृतः &c., दरिद्रीभूतः &c., गतधनः -ना -नं, गतविभवः -वा -वं, प्रचलितविभवः &c., शिथिलवसुः -सुः -सु, *see* POVERTY; 'reduced to misery,' कृच्छ्रगतः -ता -तं, कृच्छ्रकृन्नितः &c.; 'reduced to ashes,' भस्मीकृतः &c., भस्मीभूतः &c., भस्मसात्कृतः &c.; 'to powder,' चूर्णीकृतः &c.; 'to nothing,' निष्किञ्चनः -ना -नं.—(Brought into subjection) वशीकृतः -ता -तं, वशीभूतः &c.—(Diminished, lowered) न्यूनीकृतः -ता -तं, न्यूनीभूतः &c., अल्पीकृतः &c., लघूकृतः &c., शिथिलीकृतः &c., शिथिलितः &c.; 'in strength of body,' शिथिलबलः -ला -लं, क्षीणबलः &c., विगलबलः &c., क्षीणः &c., कृशः -शा -शं.

REDUCIBLE, *a.* आनेयः -या -यं, आनेतव्यः -व्या -व्यं, करणीय in comp.; as, 'reducible to a former state,' पूर्ववत्करणीयः &c.; 'to ashes,' भस्मसात्करणीयः &c., भस्मीकरणीयः &c.

REDUCTION, *s.* (Bringing to any state) करणं in comp.; 'reduction to ashes,' भस्मीकरणं; 'to powder,' चूर्णीकरणं.—(Diminution, impairment) न्यूनीकरणं, न्यूनता -त्वं, ह्रासः, लघूकरणं, ऊनीकरणं, ह्रासः, वैकल्यं, विगलीकरणं, शिथिलीकरणं, शैथिल्यं.—(Subjugation) वशीकरणं, विजयः, सहनं.—(In arithmetic) रूपान्तरं, रूपान्तरकरणं.

REDUNDANCE, REDUNDANCY, *s.* आधिक्यं, अधिकता -त्वं, अतिरेकः, बाहुल्यं, आतिरेक्यं, अतिरिक्तता, आतिशय्यं, उत्सेकः, उद्रसैः, गाढता. *See* EXCESS, EXUBERANCE.

REDUNDANT, *a.* अधिकः -का -कं, अतिरिक्तः -क्ता -क्तं, उद्रिक्तः &c., समतिरिक्तः &c., अतिशय in comp., अतिशयितः -ता -तं, अतिशयी -यिनी &c., अतिशायनः -ना -नं, अयनः -ना -नं, अचैः -चै -चं, उत्सिक्तः &c., उद्रसैः -सी -सैं, गाढः -ढा -ढं. *See* EXCESSIVE, EXUBERANT.

REDUNDANTLY, *adv.* अतिरिक्तं, उद्रिक्तं, अतिशयेन, सातिशयं, अचैः.

To REDUPLICATE, *v. a.* (Double) द्विगुणीकृ.—(A syllable or letter) आवेड् (c. 10. -वेडयति -यितुं), अक्षरावेडनं कृ, अक्षराभ्यासं कृ, अक्षरद्वित्वं कृ, द्विरुक्तिं कृ.

REDUPLICATED, *p. p.* आवेडितः -ता -तं, अभ्यस्तः -स्ता -स्तं, द्विरुक्तः -क्ता -क्तं.

REDUPLICATION, *s.* आवेडनं, आवेडितं, द्विरुक्तिः *f.*; 'of a letter,' द्वित्वं; 'the reduplicated syllable,' अभ्यासः; 'word formed by reduplication,' प्रतिशब्दः. Reduplication is denoted by the symbol रि.

RED-WOOD, *s.* (Kind of red sandal) पद्माङ्गं, रक्तचन्दनं.

To RE-ECHO, RE-ECHOING, *see To* ECHO, ECHOING.

REED, *s.* नलः, नडः, वेत्रं -त्रः, वेतसः -सी, वेणुः *m.*, वंशः, शरः, धमनः, नालः -ली, नाडिः -डी *f.*, कीचकः, तृणं, तृणध्वजः, तृणकेतुः *m.*, पोटगलः, कुशिरन्ध्रः, छिद्रान्तरः, खेलीरकः, त्वक्सारः, शतपर्वा *m.* (न्), मस्करः; 'leaf of a reed,' वेतसपत्रं; 'reed-mat,' नलपट्टिका; 'reed for writing, reed pen,' कलमः, लेखनी, आलेखनी.

REEDY, *a.* (Abounding with reeds) वेत्रकीयः -या -यं, वैत्रकः -की -कं, वेत्रवान् -वती -वत् (त्), वेतसमयः -यी -यं, वेत्रपूर्णः -र्णा -र्णं, नडकीयः -या -यं, नडसः -सा -सं, नडुलः -ला -लं, नलमयः -यी -यं, वेतसवान् -वती -वत् (त्), वेतसपूर्णः -र्णा -र्णं, शरमयः &c.—(Sounding like a reed) कीचकस्वरः -रा -रं.

REEF, *s.* (Of a sail) वातवसनपुटः, नौकावसनपुटः.—(Of rocks) समुद्रमध्ये शैलसेतुः *m.* or शैलश्रेणी or शैलपंक्तिः *f.*

To REEF, *v. a.* वातवसनानि संहृ (c. 1. -हरति -हर्तुं) or संवृ or सम्पुटीकृ.

REEFY, *a.* शैलसेतुपूर्णः -र्णा -र्णं, शैलश्रेणीपूर्णः -र्णा -र्णं.

REEK, *s.* वाष्पः, उष्णवाष्पः, तप्तजलवाष्पः, धूमः -मिका, धूनः, खेदः.

To REEK, *v. n.* वाष्प (nom. वाष्पायते), वाष्पम् उद्गृ or उत्क्षिप् or उद्वम् in caus. or मुच्, वाष्पोद्गतिं कृ, वाष्पोद्गारं कृ, धूम (nom. धूमायते).

REEKING, REEKY, *a.* वाष्पायमानः -ना -नं, वाष्पोद्गारी -रिणी &c., वाष्पमयः -यी -यं, वाष्पार्द्रः -र्द्रा -र्द्रं, आर्द्रः &c., धूनमयः -यी -यं, धूमायमानः -ना -नं.

REEL, *s.* (For winding thread) आवापनं.—(Lively dance) लघु नृत्यं.—(Movement on one side) विचलनं, चलनं.

To REEL, *v. n.* विचल् (c. 1. -चलति -लितुं), सचल्, चल्, इतस्ततो विचल्, एकपार्श्वे यत् in des. (विपलिषति -षितुं, पिपलिषति -षितुं).

To RE-ENFORCE, *s.* बलाधिक्यं कृ, सेनाधिक्यं कृ. *See* RE-INFORCE.

To RE-ENTER, *v. a.* पुनः प्रविश् (c. 6. -विशति -वेष्टुं), पुनर् आगम्.

To RE-ESTABLISH, *v. a.* पुनः स्था in caus. (स्थापयति -यितुं) or प्रतिष्ठा, पुनः संस्था.

REFECTION, *s.* अल्पाहारः, लघुभोजनं, अल्पभोजनं, लघ्वाहारः, आहारः, उपहारः, अल्पान्नखादनं, श्रमापहारः, श्रमपरिच्छेदः, क्लमपरिच्छेदः, शरीरप्रायणं.

REFECTORY, *s.* उपहारगृहं, उपहारशाला, आहारशाला, भोजनशाला.

To REFER, *v. a.* (Deliver over, consign to another for decision) निष्पादनार्थं परस्मिन् सृ in caus. (-सारयति -यितुं) or न्यस् or निक्षिप् or न्यस् or परस्मै प्रतिपद् in caus.—(Leave to the decision of another) परविचारं प्रार्थयित्वा कार्यं or अर्थं त्यज् (c. 1. त्यजति, त्यक्तुं) or उपास् (c. 4. -अस्यति -सितुं) or विसृज् (c. 6. -सृजति -सृष्टुं) or अवसृज् or मुच् or अवमुच् or हा.—(Assign) आरुह् in caus. (-रोपयति -यितुं), समारुह्, अध्यारुह्, अभिसन्धन्(c.9.-धत्ते-न्धुं), सन्धन्.

To REFER, *v. n.* (Have reference) अपेक्ष् (c. 1. -ईक्षते -क्षितुं), अवेक्ष्, प्रतीक्ष्, उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्, निर्दिश्, अभिसन्धन् in pass. (-धीयते), सन्धन् in pass.—(Allude) उद्दिश्, समुद्दिश्, सूच् (c. 10. सूचयति -यितुं).

REFERABLE, *a.* आरोपणीयः -या -यं, समारोपणीयः &c., अध्यारोपणीयः &c., समर्पणीयः -या -यं, अर्पणीयः &c., सन्धनीयः -या -यं, अभिसन्धनीयः -या -यं, सन्धनीयः -या -यं.

REFEREE, *s.* मध्यस्थः, प्रमाणपुरुषः, स्थेयः, निर्णेता *m.* (तृ), विचारकृत्.

REFERENCE, *s.* (Directing or consigning to another for information, &c.) समर्पणं, अर्पणं, प्रतिपादनं, निवेदनं, आरोपणं, समारोपणं, आरोपः.—(Relation, regard, allusion) अपेक्षा, अवेक्षा, प्रतीक्षा, उद्देशः, समुद्देशः, सन्धः, अभिसन्धः, अन्वयः, समन्वयः, विषयत्वं -ता, विषयः, सम्पर्कः, गोचरत्वं -ता; 'containing a reference,' सापेक्षः -क्षा -क्षं; 'in reference to,' अपेक्षया, अपेक्ष्य, प्रतीक्ष्य, उद्दिश्य, उद्देशेन, समुद्दिश्य, सापेक्षं.

REFERRED, *p. p.* (Consigned or directed to another) परसमर्पितः -ता -तं, परप्रदिष्टादितः &c., परनिवेदितः &c., अर्पितः &c., प्रस्थापितः &c.—(Assigned) आरोपितः -ता -तं, समारोपितः &c., अध्यारोपितः &c., अभिसन्धः -न्धा -न्धं, निर्दिष्टः -ष्टा -ष्टं, उद्दिष्टः &c.

REFERRIBLE *a.* आरोपणीयः -या -यं. *See* REFERABLE, *a.*

To REFINE, *v. a.* (Purify) शुध् (c. 10. शोधयति -यितुं), संशुध्, विशुध्, शुद्धीकृ, शोधनं कृ, विमलीकृ, निर्मलीकृ, पवित्रीकृ, विमल (nom. विमलयति -यितुं), मलं हृ or अपनी.—(Make elegant or polite, polish) परिष्कृ, संस्कृ, शिष्टीकृ, शिष्टं -ष्टां कृ, सभ्यं -भ्यां कृ, शिष्टतां or सभ्यतां जन् (c. 10. जनयति -यितुं) or दा, सूक्ष्मीकृ.

To REFINE, *v. n.* (Become pure) शुध् (c. 4. शुध्यति -ते, शोद्धुं), संशुध्, विशुध्, शुद्धीभू, विमलीभू.—(Be over nice) अतिसूक्ष्मीभू, अतिसूक्ष्मतां सेव्.

REFINED, *p. p.* (Purified) शोधितः -ता -तं, संशोधितः &c., शुद्धः -द्धा -द्धं, संशुद्धः &c., विशोधितः &c., शुद्धीकृतः &c., विमलीकृतः &c., निर्मलीकृतः &c., हृतमलः -ला -लं, पवित्रीकृतः &c.—(Polished) परिष्कृतः -ता -तं, संस्कृतः &c., शिष्टः -ष्टा -ष्टं, सभ्यः -भ्या -भ्यं, सभ्यतापन्नः -न्ना -न्नं, सभ्यतासम्पन्नः &c.—(Nice, over nice) सूक्ष्मः -क्ष्मा -क्ष्मं, अतिसूक्ष्मः &c.

REFINEMENT *s.* (Act of purifying) शोधनं, संशोधनं, विशोधनं, शुद्धीकरणं, शोधः.—(Purity) शुद्धिः *f.*, संशुद्धिः *f.*, विशुद्धिः *f.*, शोधितत्वं, शुद्धता -त्वं, पवित्रता, *see* PURITY.—(Act of polishing) परिष्कारः, परिष्कृतिः *f.*, परिष्करणं, संस्कारः, संस्कृतिः *f.*, संस्करणं, सभ्यकरणं, शिष्टकरणं.—(State of being polished, elegance) शिष्टता -त्वं, सभ्यता -त्वं, परिष्कारः, परिष्कृतत्वं, सुजनता, सौजन्यं; 'of manners,' शिष्टाचारत्वं, सभ्याचारत्वं, सभ्याचारसम्पन्नता, शिष्टाचारसम्पन्नता, सभ्याचार्यं, सुशीलता, सुनीतिः *f.*, विनयः; 'of mind,' मनःशुद्धिः *f.*, चित्तशुद्धिः *f.*—(Nicety, over nicety) सूक्ष्मता, अतिसूक्ष्मता, सौक्ष्म्यं, अतिसौक्ष्म्यं.

REFINER, *s.* शोधकः, संशोधकः, शोधयिता *m.* (तृ), मलापहारकः.—(Of metals) धातुशोधकः, धातुमलहारी *m.* (न्), धातुकलङ्कहारी *m.*

REFINING, *s.* (Of metals) धातुशोधनं, धातुमलापहारः, धातुकलङ्कहरणं.

To REFIT, *v. a.* प्रतिसंकृ, प्रतिकृ, समाधा, प्रतिसमाधा, जीर्णोद्धारं कृ, जीर्णसमाधानं कृ, पुनः कॢप् or परिकॢप्, पुनः सज्जीकृ, पुनः समायुज्. *See To* REPAIR.

To REFLECT, *v. a.* (Throw back, cause to return, as a mirror, &c.) प्रतिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) प्रतिहन् (c. 2. -हन्ति -न्तुं), पराहन्, परावृत् in caus. (-वर्तयति -यितुं), प्रत्यावृत्, परावर्तनं कृ, प्रतिक्षेपं कृ, प्रतिविम्ब (nom. प्रतिविम्बयति -यितुं), विम्ब, प्रतिविम्बितं -तां कृ, प्रतिविम्बं कृ, प्रतिमूर्तिं कृ, प्रतिरूपं कृ; 'a body which reflects all the rays of light,' पदार्थो यस्मात् सर्वैकिरणाः परावर्तन्ते or परावर्तन्ति, पदार्थो यः सर्वैकिरणान् परावर्तयति; 'a lake which reflects the stars,' ताराप्रतिविम्बं सरस्, ताराछायं सरस्; 'the mirror reflects the image,' दर्पणो मूर्तिविम्बं प्रतिक्षिपति, दर्पणो मूर्तिं प्रतिविम्बयति, दर्पणो मूर्तिप्रतिविम्बं करोति.

To REFLECT, *v. n.* (In the mind, consider) चिन्त् (c. 10. चिन्तयति -यितुं), संचिन्त्, विचिन्त्, मनसा विचर् (c. 10. -चारयति -यितुं), ध्यै (c. 1. ध्यायति, ध्यातुं), अनुध्यै, संध्यै, अभिध्यै, विमृश् (c. 6. -मृशति -मर्ष्टुं), परिमृश्, चिन्तर्के (c. 10. -तर्कयति -यितुं), अनुतर्के, तर्के, भू (c. 10. भावयति -यितुं), चिभू, सम्भू, मनसा विगण् (c. 10. -गणयति -यितुं), समाधा (c. 3. -धत्ते -धातुं), निरूप् (c. 10. -रूपयति -यितुं), अवेक्ष् (c. 1. -ईक्षते -क्षितुं), समवेक्ष्, समीक्ष्, प्रसमीक्ष्, मन् (c. 4. मन्यते, मन्तुं), चिन्तां कृ, विचारणां कृ.—(Bring reproach, cast censure upon) तिरस्कारम् आवह्, कलङ्कं or दोषं क्षिप् (c. 6. क्षिपति, क्षेप्तुं), यशोहानिं or कीर्तिहानिं or कलङ्कम् आवह्, यशो or कीर्तिं न्यूनीकृ.

REFLECTED, *p. p.* (Thrown back, as in a mirror, &c.) प्रतिविम्बितः -ता -तं, विम्बितः &c., विम्बगतः &c., विम्बगतः &c., प्रतिहतः &c., प्रतिक्षिप्तः -प्ता -प्तं, परावर्त्तितः -ता -तं, पराहतः &c., प्रतिस्खलितः &c., संक्रान्तः -न्ता -न्तं; 'reflected in water,' जलप्रतिविम्बितः -ता -तं; 'to be reflected,' परावृत् (c. 1. -वर्तते -र्त्तितुं), प्रतिहन् in pass. (-हन्यते); 'the rays of the sun are reflected,' सूर्यैकिरणाः परावर्तन्ते; 'it is seen by reflected light,' परावृत्तकिरणैर् विलोक्यते; 'reflected image,' प्रतिविम्बं, विम्बः -म्बं, प्रतिच्छाया, छाया, प्रतिच्छन्दः -न्दकं, प्रतिस्खलनं; 'reflected light,' प्रतिभा.

REFLECTING, *part.* or *a.* (Throwing back as a mirror, &c.) परावर्तनकारी -रिणी -रि (न्), प्रतिविम्बकारी &c., विम्बप्रतिक्षेपकः -का -कं, प्रतिक्षेपकः &c., परावर्तकः &c.; 'a lake reflecting the stars,' ताराप्रतिविम्बं सरस्, ताराछायं सरस्.—(Given to meditation) चिन्ताशीलः -ला -लं, ध्यानशीलः &c., विचारशीलः &c., चिन्तयन् -यन्ती -यत् (त्), चिन्तावान् &c. *See* MEDITATIVE.

REFLECTION, *s.* (Act of throwing back) प्रतिक्षेपः -पणं, प्रतिहतिः *f.*, परावर्तनं, प्रतिविम्बकरणं, संक्रान्तिः *f.*; 'reflection of rays of light,' किरणपरावर्तनं; 'the angle of reflection,' परावर्तनकोणः.—(That which is reflected, image &c. reflected) प्रतिविम्बं, विम्बं -म्बः, प्रतिच्छाया, छाया, छायात्मा *m.* (न्), प्रतिभासः, प्रभासः,

प्रतिमा, प्रतिरूपं, प्रतिमूर्त्तिः *f.*, प्रतिफलं -लनं, प्रतिकृतिः *f.*; 'reflection of the moon,' प्रतिमेन्दुः *m.*—(Consideration, thought) चिन्ता -न्तनं, सुचिन्ता, विचारः, विचारणं -णा, विमर्शः, ध्यानं, आध्यानं, अभिध्यानं, अनध्यानं, चर्चा, समाधिः *m.*, समाधानं, भावना, सम्भावना, चिन्तितं, चिन्तितिः *f.*, चिन्तिया.—(Reproach, censure) कलङ्कः, कीर्त्तिहानिः *f.*, यशोहानिः *f.*

REFLECTOR, *s.* (Something polished for reflecting) प्रतिविम्बातः, आदर्शः, दर्शनं, दर्पणः.—(One who considers) विचारकृत् *m.*, विचारकः, चिन्ताकारी *m.* (न्).

REFLEXIBILITY, *s.* परावर्त्तनीयता, परावर्त्तनयोग्यता, प्रतिविम्बयोग्यता.

REFLEXIBLE, *a.* परावर्त्तनीयः -या -यं, परावर्त्तनक्षमः -मा -मं, परावर्त्तनयोग्यः &c., प्रतिविम्बयोग्यः &c., प्रतिक्षेपणीयः -या -यं, प्रतिहननीयः -या -यं.

REFLEXIVE, *a.* पूर्व्वापेक्षकः -का -कं, पूर्व्वोद्देशकः &c., पूर्व्वप्रतीक्षकः &c.

REFLUENT, *a.* परावर्त्ती -र्त्तिनी -र्त्ति (न्), पश्चात्प्रवाही &c., विपरिवर्त्ती &c.

REFLUX, REFLUENCE, *s.* पश्चाद्वेला, विपरीतवेला, पश्चात्प्रवाहः, विपरीतप्रवाहः, वेलाया विपरीतगतिः *f.*, वेलापरावर्त्तः -र्त्तनं, वेलापरिवर्त्तनं, वेलाविपरिवर्त्तनं.

To REFORM, *v. a.* (Cause to cease from wickedness, bad conduct, &c.) पापात् or दुष्कर्म्मणो निवृत् (c. 10. -वर्त्तयति -यितुं) or विनिवृत् or परावृत् or परिवृत् or विरम् (c. 10. -रमयति -यितुं), अधर्म्मात् or कुकर्म्मणो निवर्त्तयित्वा धर्म्मे प्रवृत् in caus. or नियुज् in caus., पापाद् विप्रतिसृ in caus. (-सारयति -यितुं), विप्रतिसारं जन्, पापनिवर्त्तनं कृ, पापपरिवर्त्तनं कृ, निवृत्तपापं -पां कृ; 'to reform a bad habit,' दोषनिवर्त्तनं कृ, दोषखण्डनं कृ.—(Amend, correct) शुध् (c. 10. शोधयति -यितुं), विशुध्, समाधा, प्रतिसमाधा, प्रतिकृ प्रतिसंकृ. *See To* RECTIFY.

To REFORM, *v. n.* (Cease from bad conduct and return to good) पापात् or दुष्कर्म्मणो निवृत् (c. 1. -वर्त्तते -र्त्तितुं) or विनिवृत् or परावृत् or विरम् (c. 1. -रमति -रन्तुं), अधर्म्मात् or कुकर्म्मणो निवृत्य धर्म्मप्रवृत्तिं कृ or धर्म्मे प्रवृत्, पापाद् विप्रतिसृ (c. 1. -सरति -सर्त्तुं) विप्रतिसारं कृ, विप्रतीसारं कृ, निवृत्तपापः -पा -पं भू, पापत्यागं कृ, पापपरित्यागं कृ, दोषत्यागं कृ, त्यक्तपापः -पा -पं भू, त्यक्तदोषः -षा -षं भू.

REFORM, REFORMATION, *s.* पापनिवर्त्तनं, दोषनिवर्त्तनं, पापनिवृत्तिः *f.*, दोषनिवृत्तिः *f.*, निवर्त्तनं, निवृत्तिः *f.*, परिवर्त्तनं, परिवृत्तिः *f.*, विनिवर्त्तनं, पापत्यागः, दोषत्यागः, दोषपरित्यागः, दोषखण्डनं, दोषपरिच्छेदः, दोषच्छेदः, दोषप्रतिकारः, दोषप्रतीकारः, दोषशोधनं, दोषसमाधानं, प्रतिसमाधानं, विप्रतिसारः, विप्रतीसारः, शोधनं.—(Of religion) धर्म्मपरिवर्त्तनं, दुष्टधर्म्मपरिवर्त्तनं, धर्म्मपरिवृत्तिः *f.*, दूषितधर्म्मशोधनं, धर्म्मशोधनं.

REFORMED, *p. p.* निवृत्तपापः -पा -पं, निवृत्तदोषः -षा -षं, त्यक्तपापः &c., त्यक्तदोषः &c., गतपापः &c., गतदोषः &c., विगतदोषः &c., हृतदोषः &c., गतमायः -या -यं, विरतपापः &c., विनिवृत्तपापः &c., खण्डितदोषः &c., छिन्नदोषः &c., शोधितः -ता -तं, शुद्धः -द्धा -द्धं, विशोधितः &c., ज्ञातविप्रतीसारः -रा -रं, कृतविप्रतीसारः &c.

REFORMER, *s.* निवर्त्तकः, पापनिवर्त्तकः, पापनिवृत्तिकर्त्ता *m.* (र्त्तृ), दोषनिवर्त्तकः, दोषखण्डकः, दोषच्छेदकः, दोषहारी *m.* (न्), शोधनकारी *m.*, शोधकः.—(Of religion) धर्म्मशोधकः, दूषितधर्म्मशोधकः.

To REFRACT, *v. a.* वक्रीकृ, गतिवक्रतां कृ, वक्रगतिं कृ; 'to refract rays of light,' किरणवक्रतां कृ.

REFRACTED, *p. p.* वक्रीभूतः -ता -तं, वक्रीकृतः &c.; 'to be refracted,' वक्रीभू; 'the rays are refracted downwards,' अधो वक्रीभवन्ति किरणाः.

REFRACTION, *s.* किरणवक्रता, किरणवक्रीभावः, किरणवक्रीभवनं, किरणवक्रगतिः *f.*, किरणवक्रीकरणं.

REFRACTORINESS, *s.* प्रतीपता -त्वं, विप्रतीपता, अवश्यता, दुःशास्यता, अविनेयता, दुःसाध्यता, दुर्दान्तता, अविधेयता, दुर्नियहता, अनायत्तता.

REFRACTORY, *a.* प्रतीपः -पा -पं, विप्रतीपः &c., प्रतीपकारी -रिणी -रि (न्), विपरीतकारी &c., अवश्यः -श्या -श्यं, दुःशास्यः -स्या -स्यं, दुःशासनः -ना -नं, अविनेयः -या -यं, अविधेयः &c., दुर्नियहः -हा -हं, दुःसाध्यः -ध्या -ध्यं, अनिवार्य्यः -र्य्या -र्य्यं, उल्लंघितशासनः -ना -नं. *See* INTRACTABLE, PERVERSE; 'to be refractory,' प्रतीप (nom. प्रतीपायते), प्रतीपीभू.

REFRAGABLE, *a.* खण्डनीयः -या -यं, खण्ड्यः -ण्ड्या -ण्ड्यं, खण्डितव्यः &c.

To REFRAIN, *v. a.* (Restrain) यम्, नियम्, विनियम्, संयम्, निगह्, निरुध्, अवरुध्, संदृ, वृ, निवृ, निषिध्, निवृत् in caus.

To REFRAIN, *v. n.* (Forbear, restrain one's self) निवृत् (c. 1. -वर्त्तते -र्त्तितुं) with abl. c., विरम् (c. 1. -रमति -रन्तुं) with abl. c., आत्मानं यम् (c. 1. यच्छति, यन्तुं) or संयम्, परिहृ (c. 1. -हरति -हर्त्तुं) with acc., वृज् (c. 10. वर्जयति -यितुं) with acc., परिवृज्, विवृज्, प्रोज्झ्, त्यज्, हा; 'he should refrain from eating flesh,' निवर्त्तेत मांसभक्षणात् or मांसं वर्जयेत्.

REFRANGIBLE, *a.* वक्रीकरणीयः -या -यं, वक्रीभवनीयः &c., वक्रताक्षमः &c.

To REFRESH, *v. a.* (Invigorate, relieve from fatigue) क्लान्तिं or श्रमं हृ (c. 1. हरति, हर्त्तुं), श्रमापहारं कृ, क्लान्त्यपहारं कृ, क्लान्तिच्छेदं कृ, श्रमच्छेदं कृ, विश्रान्तिं दा, आप्यै (c. 10. -प्याययति -यितुं), समाप्यै, बलं or तेजो or सत्त्वं वृध् (c. 10. वर्धयति -यितुं), सत्त्वं or वीर्य्यं दा.—(Revive, cheer) आश्वस् (c. 10. -श्वासयति -यितुं), प्रत्याश्वस्, पुनर् आश्वस्, पुनर् जीव् (c. 10. जीवयति -यितुं), पुनर्जीवनं दा, सुख् (c. 10. सुखयति -यितुं), आनन्द् in caus., हृष् in caus., ह्लाद् in caus.—(Cool) शीतल (nom. शीतलयति -यितुं), शीतलीकृ, निर्वा in caus. (-वापयति -यितुं), निर्वापनं कृ.—(Make new or fresh) नवीकृ.

REFRESHED, *p. p.* हृतक्लान्तिः -न्तिः -न्ति, हृतश्रमः -मा -मं, हृतक्लमः &c., अपहृतक्लान्तिः &c., अपहृतश्रमः &c., गतक्लमः &c., गतश्रमः &c., विगतश्रमः &c., छिन्नक्लान्तिः &c., छिन्नश्रमः &c., विश्रान्तः -न्ता -न्तं, विश्रान्तः -ना -नं, आप्यायितः -ता -तं.—(Revived, cheered) आश्वासितः &c., समाश्वासितः &c., प्रत्याश्वस्तः -स्ता -स्तं, आनन्दितः -ता -तं, अनुभूतसुखः -खा -खं.—(Cooled) शीतलीकृतः -ता -तं, निर्वापितः &c.—(Made fresh) नवीकृतः -ता -तं.

REFRESHING, *a.* क्लान्तिहरः -रा -रं, क्लान्तिहारकः -का -कं, श्रान्तिहरः &c., श्रमहारी -रिणी -रि (न्), श्रमापहारी &c., श्रमापहः -हा -हं, क्लान्त्यपहः &c., श्रान्त्यपहः &c., क्लान्तिच्छिद् *m. f. n.*, विश्रान्तिदः -दा -दं, श्रमच्छेदकः -का -कं, आप्यायकः -का -कं, आश्वासकः &c., आनन्ददः -दा -दं, बलवर्धकः &c., निर्वापकः &c.

REFRESHMENT, *s.* (Act of refreshing) श्रमापहारः, श्रमापहरणं, क्लान्तिहरणं, क्लान्त्यपहारः, क्लान्त्यपहरणं, क्लान्तिच्छेदः, श्रमच्छेदः, श्रान्तिच्छेदः, आप्यायः -यनं, विश्रान्तिदानं, बलवर्धनं, सत्त्ववर्धनं, सत्त्वदानं, आश्वासनं, विश्रापनं.—(State) विश्रान्तिः *f.*, विश्रामः, विश्रान्तिः *f.*, विश्रान्तता.—(Food, slight repast) उपाहारः, लघुभोजनं, लघ्वाहारः, अल्पाहारः, आहारः.

REFRIGERANT, *a.* तापहरः -रा -रं, सन्तापहरः &c., दाहहरः &c., दाहनाशकः -का -कं, शीतलकारी -रिणी -रि (न्), निर्वापकः -का -कं.

REFRIGERANT, *s.* (Medicine) निर्वापनं, दाहहारकं, तापनाशकम् औषधं.

To REFRIGERATE, *v. a.* तापं or दाहं हृ (c. 1. हरति, हर्त्तुं) or नश्

(c. 10. नाशयति -यितुं), शीतलीकृ, शीतल (nom. शीतलयति -यितुं), निर्वै in caus. (-वापयति -यितुं).

REFRIGERATION, *s.* निर्वापनं, निर्वेशनं, तापहरणं, दाहहरणं, शीतलीकरणं.

REFUGE, *s.* (Shelter, protection) आश्रयः, समाश्रयः, आश्रयणं, संश्रयः, शरणं, आज्ञयः, अयनं, त्रायः, गतिः *f.*, अवस्थानं, सरणं.—(That which shelters, cause of protection) आश्रयः, शरणं, संश्रयः, आश्रयभूतः -ता -तं, शरण्यभूतः -ता -तं, आश्रयस्थानं, शरण्यं, शरण्युः *m.*, पालकः, रक्षकः.—(Resource, expedient) गतिः *f.*, आश्रयः, उपायः, युक्तिः *f.*; 'to take refuge,' आश्रि (c. 1. -श्रयति -यितुं), समाश्रि, संश्रि, उपाश्रि, समुपाश्रि, शरणार्थं गम् (c. 1. गच्छति, गन्तुं) or आगम् or इये (c. 2. एति -तुं, rt. इ), अवलम्ब् (c. 1. -लम्बते -म्बितुं), आश्रयणं कृ; 'having but one refuge,' अनन्यगतिः -तिः -ति, अनन्यगतिकः -का -कं; 'come for refuge,' शरणागतः -ता -तं, शरणार्थम् आगतः &c., शरणापन्नः -न्ना -न्नं, प्रपन्नः &c.; 'seeking refuge,' शरणार्थी -र्थिनी &c., शरणैषी &c.; 'one who affords refuge,' शरणार्थकः.

REFUGEE, *s.* शरणागतः, शरणार्थम् आगतः, शरणार्थी *m.* (न्), शरणैषी *m.* (न्), शरणार्थम् आश्रितः, अवलम्बी *m.* (न्), अवलम्बितः, प्रपन्नः; 'protector of refugees, kind to them,' शरणागतपालकः, शरणागतवत्सलः, प्रपन्नपालः -लकः.

REFULGENCE, *s.* प्रतापः, अतितेजस् *n.*, महातेजस् *n.*, उज्ज्वलता, अतिप्रभा, विभा.

REFULGENT, *a.* प्रतापवान् -वती -वत् (त्), अतिप्रतापी -पिनी -पि (न्), सुप्रभः -भा -भं, उज्ज्वलः -ला -लं, द्योती &c., विभ्राजमानः -ना -नं. *See* SPLENDID, BRIGHT.

To REFUND, *v. a.* प्रतिदा (c. 3. -ददाति -दातुं), पुनर् दा or प्रदा or प्रयम्.

REFUSAL, *s.* (Denial of a thing demanded) प्रत्याख्यानं, प्रत्यादेशः, अपह्नवः, अपह्नुतिः *f.*, अपलापः, निरसनं, निरासः, निराकरणं, निराकृतिः *f.*, अपवादः, निह्नवः, निह्नुतिः *f.*, निषेधः, प्रतिषेधः, अपाकृतिः *f.*, प्रणयविच्छित्तिः *f.*—(Declining to accept) अग्रहणं, अप्रतिग्रहः, अपरिग्रहः, अस्वीकारः, अस्वीकरणं, अनङ्गीकारः, अनङ्गीकरणं, निरसनं, निराकरणं, अननुज्ञानं.—(Of a lover) अवधीरणं -णा, धीरता -त्वं.—(Right of buying or taking in preference) पूर्वक्रयाधिकारः, पूर्वग्रहणाधिकारः.

To REFUSE, *v. a.* (Deny a request or demand, decline to do what is asked) प्रत्याख्या (c. 2. -ख्याति -तुं), अनाःख्या, अतिख्या, प्रत्यादिश् (c. 6. -दिशति -देष्टुं), अपह्नु (c. 2. -ह्नुते -होतुं), निह्नु, अपलप् (c. 1. -लपति -पितुं), निरस् (c. 4. -अस्यति -असितुं), अपास्, निराकृ, प्रत्याचक्ष् (c. 2. -चष्टे), अपवद् (c. 1. -वदति -दितुं), निषिध् (c. 1. -षेधति -षेद्धुं), प्रतिषिध्, अपव्यय् (c. 1. -अयते -यितुं), प्रत्यादेशं कृ, निरासं कृ, न अनुज्ञा, न अनुमन्, न सम्मन्.—(Decline to accept, reject) न ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), न प्रतिग्रह्, अग्रहणं कृ, न स्वीकृ, न अङ्गीकृ, निरस्, अपास्, निराकृ, अवधीर् (c. 10. अवधीरयति -यितुं). The sense of 'refuse' may be expressed simply by the negative particle न; as, 'to refuse to give,' न दा or even by अलं as अलन्दा.

REFUSE, *a.* उच्छिष्टः -ष्टा -ष्टं, अवशिष्टः &c., असारः -रा -रं, निःसारः &c.

REFUSE, *s.* उच्छिष्टं, अवशिष्टं, शेषः, अवशेषः, शेषभागः, उद्वृत्तैः, जुष्टं, समुज्झितं, असारः, असारद्रव्यं, निःसारद्रव्यं, मलं. *See* LEAVINGS.

REFUSED, *p. p.* प्रत्याख्यातः -ता -तं, प्रत्यादिष्टः -ष्टा -ष्टं, अपह्नुतः -ता -तं, निरस्तः -स्ता -स्तं, निराकृतः -ता -तं, अपवादितः &c., निषिद्धः -द्धा -द्धं, अस्वीकृतः &c., अनङ्गीकृतः &c., अननुज्ञातः -ता -तं, अननुमतः &c., असम्मतः &c., अवधीरितः &c.

REFUTABLE, *a.* खण्डनीयः -या -यं, खण्ड्यः -ण्ड्या -ण्ड्यं, खण्डितव्यः -व्या -व्यं, प्रत्याख्येयः -या -यं, निरसनीयः &c., उपमर्दनीयः &c., खण्डनक्षमः -मा -मं.

REFUTATION, *s.* खण्डनं, वाक्यखण्डनं, पक्षाघातः, बाधा -धः, निरासः, वाक्यनिरासः, वाक्यनिरसनं, निराकरणं, वाक्यनिराकरणं, प्रत्याख्यानं, उपमर्दः, अधरीकरणं, आधर्षणं, विक्षेपः, वितण्डा, जल्पः, अनिश्चयः; 'other side of the argument,' उत्तरपक्षः.

To REFUTE, *v. a.* वाक्यं खण्ड् (c. 10. खण्डयति -यितुं) or निरस् (c. 4. -अस्यति -असितुं) or निराकृ, बाध् (c. 1. बाधते -धितुं), प्रत्याख्या (c. 2. -ख्याति -तुं), अधरीकृ, आधृष् (c. 10. -धर्षयति -यितुं), संसूच् (c. 10. -सूचयति -यितुं), विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उपमर्दं कृ, वाक्योपमर्दं कृ, अपवद्, वितण्डां कृ.

REFUTED, *p. p.* खण्डितः -ता -तं, निरस्तः -स्ता -स्तं, निराकृतः -ता -तं, बाधितः &c., अधरीकृतः &c., प्रत्याख्यातः &c., आधर्षितः &c., विक्षिप्तः -प्ता -प्तं, उपमर्दितः &c., निधूतः &c., वितण्डितः &c., निस्तीर्णः -र्णा -र्णं, विखण्डितः &c.

REFUTER, *s.* उपमर्दकः, वाक्यखण्डकः, बाधकः, निरासकारी *m.* (न्).

To REGAIN, *v. a.* प्रतिलभ् (c. 1. -लभते -लब्धुं), पुनर् लभ्, पुनर् उपलभ्, पुनः प्राप् (c. 5. -आप्नोति -आप्तुं), पुनर् आप्, पुनर् अवाप्, अनुप्राप्, प्रत्यवाप्, प्रत्यादा (c. 3. -ददाति -दत्ते -दातुं), पुनर् आदा, प्रतिपद् (c. 4. -पद्यते -पत्तुं), पुनर् आपद्, प्रत्याहृ, पुनर् ग्रह्. *See To* RECOVER, *v. a.*

REGAINED, *p. p.* प्रतिलब्धः -ब्धा -ब्धं, पुनर्लब्धः &c., पुनरुपलब्धः &c., प्रत्युपलब्धः &c., पुनः प्राप्तः -प्ता -प्तं, पुनराप्तः &c., पुनरवाप्तः &c., प्रतिपन्नः -न्ना -न्नं, आपन्नः &c. *See* RECOVERED.

REGAL, *a.* राजकीयः -या -यं, राजयोग्यः -ग्या -ग्यं, राजार्हः -र्हा -र्हं, नृपोचितः -ता -तं, राजसम्बन्धी -न्धिनी &c., ऐश्वरः -री -रं, ऐशिकः -की -कं, ऐशः -शी -शं. *See* KINGLY, PRINCELY, MAJESTIC.—(Man of the regal class) राजन्यः, विराट् *m.* (ज्), क्षत्रियः, मूर्धाभिषिक्तः, बाहुजः.

To REGALE, *v. a.* सन्तृप् (c. 10. -तोषयति -यितुं), तृप्, सन्तृप् (c. 10. -तर्पयति -यितुं), तृप्, संवृध् (c. 10. -वर्धयति -यितुं), सुख् (c. 10. सुखयति -यितुं), आनन्द् in caus.; 'with choice food,' परमान्नैः or भोजनविशेषैः सन्तृप्, उत्तमाहारं भुज् in caus.—(Regale one's self) उत्तमान्नैः सन्तृप् (c. 4. -तृप्यति -तोष्टुं) or आत्मानं सन्तृप् in caus., or सन्तृप् (c. 4. -तृप्यति) or आत्मानं सन्तृप् in caus., उत्तमाहारं कृ, उत्तमभोजनं कृ, उत्सवं कृ, महोत्सवं कृ.

REGALED, *p. p.* सन्तोषितः -ता -तं, सन्तर्पितः &c., संवर्धितः -ता -तं.

REGALIA, *s.* राजलक्षणानि *n. pl.*, राजचिह्नानि *n. pl.*, राजलिङ्गानि *n. pl.*, नृपचिह्नानि *n. pl.*, नृपलिङ्गानि *n. pl.*, नृपलक्षणानि *n. pl.*, राजैश्वर्यचिह्नानि *n. pl.*

REGALITY, *s.* राजत्वं -ता, नृपत्वं, राज्यं. *See* KINGSHIP, ROYALTY.

To REGARD, *v. a.* (Look at, observe) अवेक्ष् (c. 1. -ईक्षते -क्षितुं), अपेक्ष्, प्रतीक्ष्, प्रत्यपेक्ष्, अभिप्रेक्ष्, प्रेक्ष्, निरीक्ष्, वीक्ष्, समीक्ष्, ईक्ष्, दृश् (c. 1. पश्यति, द्रष्टुं), प्रतिदृश्, अनुदृश्, अभिदृश्, आलोक् (c. 10. -लोकयति -यितुं), समालोक्, आलोच्, आलक्ष्, समालक्ष्, लक्ष्.—(Point or be directed towards) उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्.—(Mind, heed) मन् (c. 4. मन्यते, मन्तुं), अनुमन्, मननं कृ, अपेक्ष्, अवेक्ष्, अवेक्षणं कृ, अपेक्षां कृ, अवधा (c. 3. -धत्ते -धातुं), अवधानं कृ, सावधानः -ना -नं भू, अवहितः -ता -तं भू or अस्.—(Esteem,

respect) मन् (c. 10. मानयति -यितुं), सम्मन्, प्रतिमन्, अभिमन्, पूज्, सेव्, निषेव्, भज्, अवेक्ष्, आदृ, अभिनन्द्, सम्मानं कृ.—(Keep, observe) पाल्, प्रतिपाल्, सेव्, निषेव्, उपसेव्.—(Have relation to) प्रतीक्ष्, अपेक्ष्, उद्दिश्.

Regard, *s.* (Look) दृष्टिः *f.*, लक्षं, *see* Look.—(Attention of the mind towards any thing, respect unto) प्रतीक्षा, अवेक्षा, अपेक्षा, अवेक्षणं, अन्ववेक्षा, निरीक्षा -क्षणं, उद्देशः, आस्था, अनुसन्धानं; 'regard to results,' फलोद्देशः.—(Relation, reference) अपेक्षा, प्रतीक्षा, उद्देशः, समुद्देशः, सम्बन्धः, अन्वयः, समन्वयः, विषयत्वं -ता, विषयः, सम्यक्कः; 'having regard to,' सापेक्षः -क्षा -क्षं; 'in regard to,' अपेक्षया, अपेक्ष्य, प्रतीक्ष्य, उद्दिश्य, उद्देशेन, सापेक्षं, विषये.—(Esteem, respect) मानं, सम्मानं, मान्यता -त्वं, आदरः, पूजा.—(Love, affection) स्नेहः, प्रणयः, प्रश्रयः, प्रेम *n.* (न्), अनुरागः, अनुरक्तिः *f.*, प्रीतिः *f.*

Regarded, *p. p.* प्रतीक्षितः -ता -तं, अवेक्षितः &c., अपेक्षितः &c., मतः &c.

Regardful, *a.* प्रतीक्षकः -का -कं, अवेक्षकः &c., अवेक्षाकारी -रिणी -रि (न्), अपेक्षकः &c.—(Heedful) सावधानः -ना -नं, अवहितः -ता -तं.

Regardfully, *adv.* सावेक्षं, सापेक्षं, अपेक्षया, अवेक्षया, सावधानं.

Regarding, *part.* प्रतीक्षकः -का -कं, अपेक्षकः &c., सापेक्षः -क्षा -क्षं.—(Relating to) सम्बन्धी -न्धिनी &c., विषयकः -का -कं.

Regardless, *a.* निरपेक्षः -क्षा -क्षं, अनपेक्षः &c., अनपेक्षकः -का -कं, अपेक्षाहीनः -ना -नं, उपेक्षकः &c., विरक्तः -क्ता -क्तं, उदासीनः -ना -नं, अनुत्सुकः &c.

Regardlessly, *adv.* निरपेक्षं, अनपेक्षं, अनपेक्षया, अनवेक्षया, उपेक्षया.

Regardlessness, *s.* अनपेक्षा, अनवेक्षा, निरपेक्षता -त्वं, उपेक्षा.

Regatta, *s.* नौकाक्रीडा, नौकाकौतुकं, बहुनौकानां क्रीडायुद्धं.

Regency, *s.* राजप्रतिनिधेर् अधिकारः or पदं, राजप्रतिनिधित्वं.—(Body of persons governing vicariously) राजप्रतिनिधिमण्डलं, राजप्रतिनिधिसमाजः.

Regeneracy, *s.* पुनर्जन्म *n.* (न्), पुनर्जातत्वं, पुनर्जातावस्था.

To regenerate, *v. a.* पुनर् जन् (c. 10. जनयति -यितुं), पुनर्जन्म दा, पुनर्जातं -तां कृ, जन्मान्तरं दा, पुनः सृज् (c. 6. सृजति, स्रष्टुं).

Regenerate, regenerated, *a.* पुनर्जातः -ता -तं, पुनर्भवः -वा -वं, द्विजन्मा -न्मा -न्म (न्), पुनर्जन्मा &c., पुनर्भूः -भूः -भु, द्विजः -जा -जं, पुनः सृष्टः -ष्टा -ष्टं, पुनरुत्पन्नः -न्ना -न्नं.

Regeneration, *s.* पुनर्जन्म *n.* (न्), पुनर्जातिः *f.*, पुनर्भवं, पुनर्जन्मावस्था, द्विजन्मावस्था, पुनर्जातावस्था, जन्मान्तरं, पुनरुत्पत्तिः *f.*, नवसृष्टिः *f.*, नव्यसृष्टिः *f.*

Regent, *s.* (Ruler) अधिपतिः *m.*, शासिता *m.* (तृ), शास्ता *m.*, शासकः.—(Vicarious ruler) राजप्रतिनिधिः *m.*—(Regent of the quarter) दिक्पालः; 'the eight regents of the quarters,' अष्टदिक्पालाः *m. pl.* These are, 'of the East,' इन्द्रः; 'of the S. E.' अग्निः or वह्निः; 'of the S.,' यमः or पितृपतिः *m.*; 'of the S. W.,' नैर्ऋतिः; 'of the W.,' वरुणः; 'of the N. W.,' मरुत्; 'of the N.,' कुबेरः; 'of the N. E.,' ईशः or शिवः. Their elephants are ऐरावतः, पुण्डरीकः &c., *see* under Elephant.

Regent, *a.* शासनकारी -रिणी &c., शासिता -त्री -तृ (तृ), राज्याधिकारी &c.

Regicide, *s.* (Killer of a king) राजघातुकः, राजघाती *m.* (न्), राजघातकः, राजहा *m.* (न्), राजहन्ता *m.* (तृ), राजघः, राजघ्नः, राजहिंसकः, नृपहा *m.* &c.—(Killing of a king) राजहत्या, राजवधः, राजघातः, नृपघातः, राजहिंसा.

Regime, *s.* *See* Government, Administration.

Regimen, *s.* (Regulation of diet) पथ्यं, पथ्यापथ्यं, पथ्यापथ्यविचारः, पथ्यापथ्यनियमः; 'violation of it,' अपथ्यं; 'one under it,' पथ्याशी -शिनी -शि (न्).

Regiment, *s.* सैन्यदलं, सैन्यव्यूहः, सैन्यगुल्मः, सैन्यसमूहः, सैन्यगणः.

Regimental, *a.* सैन्यदलसम्बन्धी -न्धिनी -न्धि (न्), सैन्यगुल्मविषयकः -का -कं.

Regimentals, *s.* सैन्यवेषः, सैन्यवेशः, सैन्यदलविशेषको वेशः.

Region, *s.* (Country) देशः, प्रदेशः, विषयः, राष्ट्रं, भूमिः *f.*, चक्रं, मण्डलं, प्रान्तः, धिष्ण्यं, निगः; 'the lower regions,' अधोलोकः, अधोभुवनं, अवाची; 'the upper regions,' ऊर्ध्वलोकः, ऊर्ध्वभुवनं, उदीची; 'centre of a region,' मध्यदेशः.—(Quarter of the sky) दिक् *f.* (श्), दिशा, दिशाः *f.* (स्), दिशी, आशा, काष्ठा, सनिः *m. f.*, *see* Quarter.—(Part of the body) देशः, चक्रं, मण्डलं; 'the region of the heart,' हृदयदेशः; 'of the liver,' यकृद्देशः; 'umbilical region,' नाभिदेशः, स्वाधिष्ठानचक्रं; 'of the head,' मस्तकमण्डलं.

Register, *s.* लेख्यं, लेखः, लेख्यपत्रं, पञ्जिः -ञ्जी *f.*, पञ्जिका, पदपञ्जिका.

To register, *v. a.* लेख्ये or लेख्यपत्रे आरुह् in caus. (-रोपयति -यितुं) or समारुह् or अभिलिख् (c. 6. -लिखति -लेखितुं), or लिख्, लेख्यारूढं -ढां कृ. *See To* record.

Registered, *p. p.* लेख्यारूढः -ढा -ढं, लेख्यारोपितः &c., अभिलिखितः &c., लेख्यसमर्पितः &c. *See* Recorded.

Registrar, *s.* लेखकः, अभिलेखकः, कायस्थः, पञ्जिकाकारकः, लिपिकृत्.

Registry, registration, *s.* (The act of registering) अभिलिखनं, अभिलेखनं, लेख्यारोपणं, लेख्यसमर्पणं, नामाभिलेखनं, नामाभिलिखनं.—(The place) अभिलिखनस्थानं, लेख्यस्थानं, लेखस्थानं, लेख्यगृहं.

Regnant, *a.* शासनकारी -रिणी -रि (न्), राज्याधिकारी -रिणी &c., राजाधिकारयुक्तः -क्ता -क्तं, राज्यधारी &c., प्रबलः -ला -लं.

Regress, regression, *s.* व्यतिक्रमः, विपरीतगतिः *f.*, परावर्तः -र्तनं.

Regret, *s.* पश्चात्तापः, अनुतापः, अनुशोकः, अनुशोचनं, मनस्तापः, तापः, सन्तापः, उद्वेगः, अनुशयः, शोकः, खेदः, उत्कण्ठा, औत्कण्ठ्यं, उत्सुकता, औत्सुक्यं, दुःखं, मनोदुःखं, मनोव्यथा, उद्भ्रमः, उत्कः.

To regret, *v. a.* अनुतप् in pass. (-तप्यते), पश्चात् तप्, सन्तप्, तप्, अनुशुच् (c. 1. -शोचति -चितुं), शुच्, खिद् (c. 4. खिद्यते, खेत्तुं), उद्विज् (c. 6. -विजते -जितुं), उत्कण्ठ् (c. 1. -कण्ठते -ण्ठितुं), उत्सुक (nom. उत्सुकायते), अनुशी (c. 2. -शेते -शयितुं), उन्मनस् (nom. उन्मनायते), दु (c. 5. दुनोति c. 4. दूयते, दोतुं), विदु, अवदु.

Regretful, *a.* अनुशोचकः -का -कं, अनुतापी -पिनी -पि (न्), पश्चात्तापी &c., उत्कण्ठितः -ता -तं, उत्सुकः -का -कं, उद्विग्नः -ग्ना -ग्नं, उत्कः -त्का -त्कं.

Regretted, *p. p.* अनुशोचितः -ता -तं, शोचितः &c., अवदूनः -ना -नं.

Regular, *a.* (According to rule) यथाविधिः -धिः -धि, वैधिकः -की -कं, वैधः -धी -धं, सविधिः -धिः -धि, विधियुक्तः -क्ता -क्तं, विध्यनुसारी -रिणी -रि (न्), नैयमिकः -की -कं, नियमानुसारी &c., यथामार्गः -र्गा -र्गं, यथाशास्त्रः -स्त्रा -स्त्रं, यथापद्धतिः -तिः -ति, सूत्रानुसारी &c., समूत्रः -त्रा -त्रं, सौत्रः -त्री -त्रं.—(According to established usage) आचारिकः -की -कं, व्यवहारिकः &c., व्यावहारिकः &c., यथाव्यवहारः -रा -रं, यथारीतिः -तिः -ति, यथामार्गः -र्गा -र्गं, मार्गानुसारी &c., नित्यः -त्या -त्यं, नैत्यिकः -की -कं, स्थावरः -रा -रं.—(Governed by rule, steady in a course, said of persons) नियमनिष्ठः -ष्ठा -ष्ठं, नियमशीलः -ला -लं, नियमपरः -रा -रं, नियमी &c., नियमानुसारी &c., नियमानुयायी &c., विधिनिष्ठः &c., विध्यनुयायी &c., विधिवर्ती

&c., नियमवर्त्ती &c., विध्यनुवर्त्ती &c., यथामार्गचारी &c., यथाविधिचारी &c., यथानियमाचारी &c., अव्यभिचारी &c., व्यवस्थितः -ता -तं.—(In due order or course) यथाक्रमः -मा -मं, यथानुक्रमः &c., क्रमिकः -का -कं, क्रमकः &c., सक्रमः -मा -मं, क्रमानुगतः -ता -तं, क्रमानुसारी &c., अनुक्रान्तः -न्ता -न्तं, यथापर्य्यायः -या -यं, पारम्पर्यिकः -की -कं, अनुलोमः -मा -मं, अनुपूर्व्वः -र्व्वी -र्व्वं, आनुलोमिकः -की -कं, अविकलः -ला -लं.—(Periodical) नियतकालिकः -की -कं, नियतः -ता -तं, नित्यः -त्या -त्यं.

Regularity, *s.* (Agreeableness to rule) विध्यनुसारः -रिता, नियमानुसारः -रिता, यथाविधिता, सविधिता, नैयमिकत्वं, सूत्रानुसारः -रिता, नियमः, ससूत्रता.—(Steadiness in a course, observance of rule) नियमनिष्ठा, विधिनिष्ठा, नियमशीलता, नियमपरता, विध्यनुवर्त्तनं, नियमानुयायिता, नियमानुवर्त्तित्वं, अव्यभिचारः, व्यवस्थितिः *f.*—(Method, regular course) क्रमः, अनुक्रमः, यथाक्रमता, सक्रमता, क्रमिकता -त्वं, यथानुक्रमता, पर्य्यायः, व्यवस्था, व्यवस्थितिः *f.*, परिपाटिः -टी *f.*, पारिपाट्यं, पारम्परा, पारम्पर्य्यं, आनुपूर्व्यं, आनुपूर्वी, आनुलोम्यं.—(Regular arrangement) विन्यासः, विन्यसनं, व्यूहनं, व्यूटिः *f.*, रचनं -ना, विरचना.

Regularly, *adv.* (According to rule) यथाविधि, विधिवत्, विधितस्, विध्यनुसारेण, विध्यनुरूपेण, यथानियमं, नियमानुसारेण, यथामार्गं, मार्गानुसारेण, यथापद्धति, यथासूत्रं, विधिपूर्व्वं -र्व्वकं.—(Methodically, in due order or course) यथाक्रमं, यथानुक्रमं, सक्रमं, क्रमतस्, क्रमशस्, क्रमेण, क्रमात्, यथापर्य्यायं, पर्य्यायेण, अनुपूर्व्वशस्, आनुपूर्व्येण, शनकैः, शनैः शनैः.

To Regulate, *v. a.* (Adjust by rule) विधिवत् or यथाविधि व्यवस्था in caus. (-स्थापयति -यितुं) or परिकृप् (c. 10. -कल्पयति -यितुं) or संविधा (c. 3. -दधाति -धातुं) or विधा, यथासूत्रं विधा, सूत्र (nom. सूत्रयति -यितुं), परिमाणं निरूप् (c. 10. -रूपयति -यितुं), परिमा, परिमितं -तां कृ.—(Direct, subject to rules and good management) अनुशास् (c. 2. -शास्ति -शासितुं), समनुशास्, शास्, विनियम् (c. 1. -यच्छति -यन्तुं), नियम्, विधा, संविधा, विधृ (c. 10. -धारयति -यितुं), अनुशासनं कृ.—(Dispose, put in good order) विधा, संविधा, परिकृप्, व्यवस्था in caus., ग्रथी, सम्ग्रथी, विन्यस्, विरच्, व्यूह्, व्यवस्थां कृ, नियमं कृ.

Regulated, *p. p.* व्यवस्थितः -ता -तं, व्यवस्थापितः &c., विनियतः -ता -तं, नियतः &c., नियमितः &c., विहितः &c., अनुशासितः &c., शासितः &c., यन्त्रितः -ता -तं, परिमितः &c., प्रमितः &c., सूचितः &c.; 'well regulated,' सुव्यवस्थितः -ता -तं, सुविहितः &c., सुयन्त्रितः &c.; 'ill-regulated,' अव्यवस्थितः -ता -तं, अयन्त्रितः &c.; 'having regulated,' विनियम्य.

Regulation, *s.* (The act of regulating) व्यवस्थापनं, व्यवस्थितिः *f.*, विनियमः, व्यवस्था, अनुशासनं, शासनं, विधानं, संविधानं, परिकल्पनं, विधारणं -णा, यन्त्रणं, प्रणयनं, अनुनयः -यनं.—(Rule) नियमः, विनियमः, विधिः *m.*, विधानं, व्यवस्था, व्यवस्थितिः *f.*, स्थितिः *f.*, सूत्रं, क्रमः, मर्य्यादा.

Regulator, *s.* नियन्ता *m.* (न्तृ), विनियन्ता *m.*, अनुशासकः, शासकः, शास्ता *m.* (स्तृ), अनुशास्ता *m.*, विधाता *m.* (तृ), व्यवस्थापकः, परिकल्पकः.

Rehearsal, *s.* (Repetition of the words of another) पठनं, पाठः, अनुवादः, वाचनं, अनुवाचनं, उल्लेखः -खनं.—(Narration) कथनं, आख्यानं.—(Recital in preparation for the public representation) भाव्यनुकरणं, पूर्व्वाभिनयः -यनं.

To Rehearse, *v. a.* (Repeat the words of another) पठ् (c. 1. पठति -ठितुं), सम्पठ्, अनुपठ्, पठनं कृ, अनुवादं कृ.—(Narrate) कथ्, आख्या, ब्रू in caus.—(Recite, preparatory to a public representation) भाव्यनुकरणं कृ, पूर्व्वाभिनयं कृ.

Rehearsed, *p. p.* पठितः -ता -तं, अनुवादितः &c., पूर्व्वाभिनीतः -ता -तं.

To Reign, *v. n.* राज्यं कृ, राजत्वं कृ, राज्यपालनं कृ, राज्यशासनं कृ, राज्याधिकारं कृ, राजव्यवहारं कृ, राजकार्य्यं कृ, आधिपत्यं कृ, सिंहासनारूढः -ढा -ढं भू.

Reign, *s.* राज्यं, राजत्वं -ता, आधिपत्यं.—(Period of rule) राज्यशासनकालः, राज्यकालः, आधिपत्यकालः.—(Prevalence), *see* the word.

Reigning, *part.* or *a.* राज्यकारी-रिणी-रि(न्), राज्यशासनकारी &c., राज्यारूढः -ढा -ढं, सिंहासनारूढः &c., राजपदारूढः &c., राज्याधिकारी &c.

To Re-imburse, *v. a.* प्रतिदा, पुनर् दा, क्षतिपूरणं कृ, हानिपूरणं कृ, निष्कृतिं दा, अपाकृ, प्रतिकृ, प्रत्युपकृ, परिशोधनं कृ.

Re-imbursement, *s.* पुनर्दानं, प्रतिदानं, क्षतिपूरणं, हानिपूरणं, परिशोधनं.

Rein, *s.* (Of a horse) रश्मिः *m.*, अभीशुः *m.*, अभीषुः *m.*, ग्रग्रहः, ग्रग्राहः, वसुः *m.*, वागा, वल्गा, दन्तालिका.—(Reins), *see* the word.

To Rein, *v. a.* अश्वं रश्मिभिर् यम् (c. 1. यच्छति, यन्तुं) or संयम् or नियम् or निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं) or ग्रग्रह्.

Re-infect, *a.* अकृतार्थः -र्था -र्थं, असिद्धार्थः &c., अकृतार्थीभूतः &c.

To Re-inforce, Re-inforcement. *See To* Recruit.

Reins, *s. pl.* (Lower part of the back) कटिः -टी, कटिदेशः, श्रोणिः -णी *f.*, श्रोणिदेशः, कटिपश्चाद्भागः.—(Kidneys), *see* Kidney.

To Re-instate, *v. a.* पुनः स्था in caus. (स्थापयति -यितुं), प्रतिष्ठा, प्रत्यवस्था, पुनर् अवस्था, पुनर् नियुज् (c. 10. -योजयति -यितुं), पुनः स्थापनं कृ.

Re-instated, *p. p.* पुनः स्थापितः -ता -तं, पुनर् अवस्थापितः &c. or नियोजितः &c.

Re-instatement, *s.* पुनःस्थापनं -ना, पुनरवस्थापनं, प्रतिष्ठापनं -ना, प्रत्यवस्थापनं, पुननियोगः, पुननियोजनं.

To Re-iterate, *v. a.* (Say again) पुनर् वद्, पुनःपुनर् वद्, मुहुर् वद्, अनुवद्, पुनरुक्तिं कृ, आमेड्.—(Do again) पुनः कृ, पुनःपुनः कृ, मुहुः कृ, वारं वारं कृ, मुहुर् मुहुः कृ.

Re-iterated, *p. p.* पुनःपुनः कृतः -ता -तं, वारं वारं कृतः &c., मुहुर् मुहुः कृतः &c., पौनःपुनिकः -की -कं, पुनरुक्तः -क्ता -क्तं, पुनःपुनरुक्तः &c.

Re-iteration, *s.* पुनःपुनःकरणं, मुहुःकरणं, पौनःपुन्यं, पुनरुक्तिः *f.*, पौनरुक्त्यं, पुनर्वचनं, अनुवादः, आमेडनं, समभिहारः.

To Reject, *v. a.* निरस् (c. 4. -अस्यति -सितुं), अपास्, व्युदस्, प्रत्याख्या (c. 2. -ख्याति -तुं), निराकृ, पराकृ, प्रतिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), विक्षिप्, त्यज् (c. 1. त्यजति, त्यक्तुं), निर्धुट् (c. 6. -धुटति -धोटुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), अपाहा (c. 3. -जहाति -हातुं), प्रत्याचक्ष् (c. 2. -चष्टे), निधू (c. 5. -धूनोति -धोतुं), अपध्वंस् (c. 4. -ध्वंसते -ध्वंसितुं), अपध्वस्, वृज् (c. 10. वर्जयति -यितुं), अवधीर् (c. 10. अवधीरयति -यितुं), न स्वीकृ, न ग्रह्, अस्वीकारं कृ, अग्रहणं कृ. *See To* Refuse.

Rejected, *p. p.* निरस्तः -स्ता -स्तं, अपास्तः &c., व्युदस्तः &c., प्रत्याख्यातः -ता -तं, निराकृतः -ता -तं, पराकृतः &c., प्रतिक्षिप्तः -प्ता -प्तं, निक्षिप्तः &c., विक्षिप्तः &c., प्रत्यादिष्टः -ष्टा -ष्टं, अपविद्धः -द्धा -द्धं, निधूतः -ता -तं, अवधीरितः &c., त्यक्तः -क्ता -क्तं, परित्यक्तः &c., वर्जितः &c., अस्वीकृतः &c.

Rejection, *s.* निरसनं, निरासः, निराकृतिः *f.*, निराकरणं, निकृतिः *f.*, प्रत्याख्यानं, प्रत्यादेशः, प्रतिक्षेपः, त्यागः, परित्यागः, वर्जनं, अपवर्जनं,

विसर्जनं, अस्वीकारः, अनङ्गीकारः, अग्रहणं, अवधीरणं -णा.

To REJOICE, *v. n.* आनन्द् (c. 1. -नन्दति -न्दितुं), अभिनन्द्, विनन्द्, नन्द्, हृष् (c. 4. हृष्यति, हर्षितुं), प्रहृष्, संहृष्, सम्प्रहृष्, ह्लाद् (c. 1. ह्लादते -दितुं), आह्लाद्, प्रह्लाद्, उल्लस् (c. 1. -लसति -सितुं), समुल्लस्, प्रोल्लस्, रम् (c. 1. रमते, रन्तुं), अभिरम्, आरम्, संरम्, तुष् (c. 4. तुष्यति, तोष्टुं), परितुष्, सन्तुष्, मुद् (c. 1. मोदते -दितुं), प्रमुद्, प्रतिमुद्, प्री (c. 4. प्रीयते, प्रेतुं), सम्प्री, मद् (c. 4. माद्यति, मदितुं), आनन्दितः -ता -तं भू, हृष्टः -ष्टा -ष्टं भू, हर्षं or आनन्दं गम् or इ.

To REJOICE, *v. a.* आनन्द् (c. 10. -नन्दयति -यितुं), अभिनन्द्, नन्द्, हृष्, (c. 10. हर्षयति -यितुं), प्रहृष्, परिहृष्, ह्लाद् (c. 10. ह्लादयति -यितुं), प्रह्लाद्, आह्लाद्, रम् (c. 10. रमयति -यितुं), उल्लस् (c. 10. -लासयति -यितुं), तुष् (c. 10. तोषयति -यितुं), सन्तुष्, तृप् (c. 10. तर्पयति -यितुं), प्रमुद् (c. 10. -मोदयति -यितुं), मुद्, प्री (c. 9. प्रीणाति, c. 10. प्रीणयति -यितुं), आनन्दं or हर्षं जन् (c. 10. जनयति -यितुं), आनन्दितं -तां कृ, आनन्दं दा.

REJOICED, *p. p.* आनन्दितः -ता -तं, नन्दितः &c., आह्लादितः &c., हर्षितः &c., हृष्टः -ष्टा -ष्टं, प्रहर्षितः -ता -तं, उल्लसितः &c., उल्लासितः &c., तुष्टः -ष्टा -ष्टं, परितुष्टः &c., हर्षयुक्तः -क्ता -क्तं, हर्षाविष्टः -ष्टा -ष्टं; 'in mind,' हृष्टमनाः -नाः -नः (स्), हृष्टमानसः -सा -सं, हृष्टहृदयः -या -यं.

REJOICING, *part. act.* नन्दकः -का -कं, आनन्दकः &c., नन्दनः -ना -नं, आनन्दनः &c., आनन्ददः -दा -दं, आनन्दकरः -रा -रं, हर्षदः -दा -दं, हर्षकः -का -कं, हर्षप्रदः &c., आह्लादकः &c., मोदकः &c., हर्षणः -णा -णं, उत्सवकरः -रा -रं.—*Neut. part.* हर्षमाणः -णा -णं, रममाणः -णा -णं, मोदमानः -ना -नं, प्रीयमाणः &c., सम्प्रीयमाणः &c.

REJOICING, *s.* आनन्दः -न्दनं, हर्षः -र्षणं, आह्लादः -दनं, नन्दनं, प्रमोदः -दनं, सन्तोषणं, *see* JOY.—(Public rejoicing) उत्सवः, उत्सवकरणं.

To REJOIN, *v. n.* प्रतिवच् (c. 2. -वक्ति -क्तुं), पुनर्वच्, प्रतिवद्, प्रत्युत्तरं कृ.

REJOINDER, *s.* प्रतिवाक्यं, प्रतिवचनं, उत्तरं, प्रत्युत्तरं, उत्तरपक्षः, प्रत्युक्तिः *f.*, प्रत्युक्तं, प्रत्यर्पं, कक्षा, उत्तरोत्तरं. *See* REPLY.

To RELAPSE, *v. n.* पुनः पत् (c. 1. पतति -तितुं), पुनर् आगम् (c. 1. -गच्छति -गन्तुं), पुनर् आवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रत्यावृत्, पर्यावृत्, आवृत्, पुनर्ग्रस्तः -स्ता -स्तं भू, पुनः पीडितः &c. भू, पुनराविष्टः -ष्टा -ष्टं भू; 'relapse into a former state,' पूर्वावस्थां or पूर्वदशां गम् or आपद् or इ or प्राप्, पूर्ववद् भू; 'relapse into vice,' पुनर् व्यसनी भू, पुनर् व्यभिचारी भू, पुनर् व्यभिचारं कृ, पुनर् व्यभिचर्, पुनर् धर्म्माद् भ्रंश्, पुनर् धर्म्मं त्यज्, पुनः सत्पथाद् भ्रंश् or च्यु or विचल् or उत्क्रम्; 'relapse into a fever,' पुनर् ज्वरग्रस्तः -स्ता -स्तं भू, पुनर्ज्वरी -रिणी &c. भू, पुनर्ज्वरातुरः -रा -रं भू.

RELAPSE, *s.* पुनःपतनं, आवृत्तिः *f.*, आवर्त्तनं, प्रत्यावृत्तिः *f.*, प्रत्यावर्त्तनं, पर्यावर्त्तः, प्रत्यागमः; 'into a former state,' पूर्वावस्थाप्राप्तिः *f.*; 'into vice,' पुनर्व्यभिचारः, पुनर्धर्म्मत्यागः, पुनर्धर्म्मोल्लंघनः, पुनःसत्पथोल्लंघनः; 'into a fever,' पुनर्ज्वरग्रस्तता.

To RELATE, *v. a.* कथ् (c. 10. कथयति -यितुं), संकथ्, आख्या (c. 2. -ख्याति -तुं), समाख्या, ख्या in caus. (ख्यापयति -यितुं), अभिख्या, शंस् (c. 1. शंसति -सितुं), श्रु in caus., आश्रु, संश्रु, वद्, निवेद्, आवेद्, आचक्ष्, समाचक्ष्, प्रचक्ष्, वर्ण्, उपवर्ण्, अनुवर्ण्, संवर्ण्, निगद्, उदाहृ, व्याहृ, अभिधा, विवृ, विवरणं कृ, कृत्, अनुकृत्, वृत् in caus., कथनं कृ, *see To* NARRATE, TELL; 'to relate over again,' पुनर् आख्या, सम्प्रत्याचक्ष्.

To RELATE. *v. n.* (Have reference) उद्दिश् (c. 6. -दिशति -देष्टुं), अपेक्ष् (c. 1. -ईक्षते -क्षितुं), विषयकः -का -कं भू, सम्बन्ध् in pass. (-ध्यते), सम्बद्धः -द्धा -द्धं भू, सम्बन्धी &c. भू. *See To* REFER.

RELATED, *p. p.* (Narrated) कथितः -ता -तं, आख्यातः -ता -तं, समाख्यातः &c., *see* TOLD.—(Connected) सम्बद्धः -द्धा -द्धं, सम्बन्धी -न्धिनी -न्धि (न्), सम्बन्धः -न्धा -न्धं, कृतसम्बन्धः -न्धा -न्धं, अनुषक्तः &c., अनुसक्तः &c., सम्पृक्तः -क्ता -क्तं, सम्पर्की -र्किणी &c., अनुषङ्गी &c., आनुषङ्गिकः -की -कं, संसक्तः -क्ता -क्तं, सान्वयः -या -यं, अन्वितः -ता -तं, समन्वितः &c.; 'mutually related,' व्यतिषक्तः &c.—(Related by consanguinity, or by blood on the father's side) गोत्रसम्बन्धी -न्धिनी &c., गोत्रसम्बद्धः -द्धा -द्धं, एकगोत्रः -त्रा -त्रं, सगोत्रः &c., गोत्रजः -जा -जं, एकगोत्रजः &c., गोत्री &c., एकशरीरः -रा -रं, एकशरीरसम्बन्धी &c., एकरक्तः -क्ता -क्तं, एकरक्तसम्बन्धी &c., एकशरीरावयवः -वा -वं, एकशरीरान्वयी &c., सकुल्यः -ल्या -ल्यं, सजातीयः -या -यं, स्वजातीयः &c., सवंशीयः &c., स्ववंशीयः &c., आत्मीयसम्बन्धी &c., *see* KINDRED, *a.*—(Related by blood on the mother's side or by marriage) योनिसम्बन्धी &c., योनिसम्बद्धः -द्धा -द्धं, शरीरसम्बन्धी &c., आत्मसम्बन्धी &c., यौनः -नी -नं.

RELATER, *s.* कथकः, आख्यायकः, ख्यापकः, उपकथकः, काथिकः.

RELATING, *part.* (Having reference) विषयकः -का -कं, सम्बन्धी -न्धिनी -न्धि (न्), उद्देशकः -का -कं or expressed by the affix ईय, *see* REFERENCE, REGARD, REGARDING.

RELATION, *s.* (Act of telling) कथनं, आख्यानं, उपकथनं, उपाख्यानं, ख्यापनं, वर्णनं -ना, शंसनं, विवरणं, व्याहरणं, अनुकीर्त्तनं, निरूपणं, आवणं, निवेदनं, उद्गारः; 'exact relation of particulars,' वस्तुकथनं, वृत्तान्तकथनं, वस्तुस्थितिकथनं.—(Reference) विषयत्वं, सम्बन्धः, उद्देशः, अन्वयः, अपेक्षा, गोचरत्वं; 'in reference to,' अपेक्षया, उद्दिश्य, *see* REFERENCE, REGARD.—(Connexion) सम्बन्धः -न्धित्वं, अभिसम्बन्धः, सम्पर्कः, अन्वयः, समन्वयः, सन्दर्भः, अनुषङ्गः, संसक्तिः *f.*, समासक्तिः *f.*, संसर्गः; 'mutual relation,' अन्योन्यसम्बन्धः, मिथःसम्बन्धः, व्यतिषङ्गः; 'intimate and inseparable relation, as of properties with substances,' समवायः, समवायसम्बन्धः, नित्यसम्बन्धः; 'as of material with produce,' समवायिकारणं.—(Connexion by blood, alliance of kin) एकशरीरता, एकशरीरसम्बन्धः, एकशरीरान्वयः, एकशरीरावयवत्वं, ज्ञातित्वं, ज्ञातिभावः, सम्बन्धित्वं, बन्धुता, बान्धवत्वं, सजातित्वं, सगर्भत्वं, समानोदर्य्यता, सोदर्य्यता, सगोत्रत्वं, एकगोत्रता, समगोत्रता, गोत्रसम्बन्धः, एकरक्तसम्बन्धः, समरक्तसम्बन्धः, सपिण्डता, एकपिण्डता, सापिण्ड्यं.—(Connexion on the mother's side, or by marriage) योनिसम्बन्धः, शरीरसम्बन्धः, आत्मभावः, आत्मता.—(Kinsman) बान्धवः, बन्धुः *m.*, बन्धुजनः, गोत्रबन्धुः *m.*, ज्ञातिः *m.*, स्वज्ञातिः *m.*, गोत्रजनः, गोत्रपुरुषः, गोत्रजः, सम्बन्धी *m.* (न्), सपिण्डः, समानोदकः, कुटुम्बी *m.*, स्वकुटुम्बी, *see* KINSMAN; 'relations,' बन्धुवर्गः, बान्धवाः *m. pl.*, ज्ञातिवर्गः, बान्धवगणः, *see* KINDRED; 'having relations,' सबान्धवः -वा -वं, कौटुम्बिकः -की -कं. The सपिण्डः is a relation connected by the offering of the funeral cake to the manes of common ancestors; the समानोदकः is connected by the offering of water only.

RELATIONSHIP, *s.* सम्बन्धः, सम्बन्धित्वं, बन्धुता -त्वं, बान्धवत्वं -ता, ज्ञातित्वं, ज्ञातिभावः, ज्ञातेयं, सजातित्वं. *See* under RELATION.

RELATIVE, *a.* (Having relation) सम्बन्धी -न्धिनी -न्धि (न्), सम्बन्धकः -का -कं, सम्बन्धीयः -या -यं, विषयकः -का -कं, अनुषङ्गी &c., आनुषङ्गिकः -की -कं, सम्पर्की &c., सम्बन्धः -न्धा -न्धं, सम्पर्कः -र्का -र्कं, सान्वयः -या -यं, उद्देशकः -का -कं, परायणः -णा -णं.—(Not abso-

lute) अन्यापेक्षकः -का -कं, अन्यसापेक्षः -क्षा -क्षं, सापेक्षः &c., अन्योद्देशकः &c., अकेवलः -ला -लं.—(Correlative, mutually related) अन्योन्यसम्बन्धी &c., अन्योन्याश्रितः -ता -तं, अन्योन्यान्वितः &c.—(In grammar) तत्पदापेक्षकः -का -कं, तत्पदापेक्षी &c.

RELATIVE, *s.* बन्धुः *m.*, बान्धवः, सम्बन्धी *m.* (न्), ज्ञातिः *m.* *See* KINSMAN.

RELATIVELY, *adv.* सापेक्षया, अन्यापेक्षया, सापेक्षं, उद्देशेन, उद्दिश्य, अन्योद्देशेन, अन्यमुद्दिश्य, अन्यमपेक्ष्य, अन्यसापेक्षं. *See* REGARD.

To RELAX, *v. a.* शिथिलीकृ, शिथिल (nom. शिथिलयति -ते -यितुं), स्रथ् (c. 10. स्रथयति -यितुं), प्रस्रथ्, अथ् (c. 1. अथति, c. 10. अथयति -यितुं), अन्थ् (c. 9. अन्थ्नाति, अन्थितुं), स्रथीकृ, संस् (c. 10. संसयति -यितुं), विसंस्, सस्तीकृ, विसस्तीकृ, विगल् in caus.—(Remit) मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, अवमुच्, अवसृज् (c. 6. -सृजति -स्रष्टुं), विसृज्.—(Abate, diminish) शम् (c. 10. शमयति -यितुं), उपशम्, लघूकृ, न्यूनीकृ; 'relax one's efforts,' उद्योगशैथिल्यं कृ.—(Relax the mind) विनुद् (c. 10. -नोदयति -यितुं), विनोदनं कृ, मनोविनोदं कृ.—(The bowels) कोष्ठमृदुतां जन्, नाडिमृदुतां जन्, कोष्ठलघुतां जन्, लघुकोष्ठतां कृ, अतिसारं or सारणं जन्, *see To* PURGE.—(Untie) उद्ग्रन्थ्, उन्मुच्, वियुज्, विसन्धा, विपाश्, उत्सूत्रीकृ.

To RELAX, *v. n.* शिथिलीभू, शिथिल (nom. शिथिलायते), स्रथ (nom. स्रथायते), अथ (nom. अथायते), अन्थ् (c. 1. अन्थते -न्थितुं), स्रथीभू, संस् (c. 1. संसते -सितुं), सस्तीभू.—(Abate) शम् (c. 4. शाम्यति, शमितुं), उपशम्, प्रशम्, न्यूनीभू.—(Remit in close attention) उद्योगशैथिल्यं कृ, शिथिलोद्योगः -गा -गं भू.

RELAXATION, *s.* (Act) शिथिलीकरणं, अन्थनं, अथनं, विसंसनं, मोचनं.—(State) शैथिल्यं, शिथिलता, विसंसा, विसंसः, प्रस्रथः, मुक्तिः *f.*, मुक्तता.—(Abatement, remission) शमः, उपशमः, शान्तिः *f.*, उपशान्तिः *f.*, न्यूनता.—(Amusement, remission of labor) विनोदः -दनं, मनोविनोदः, विश्रामः, विश्रान्तिः *f.*, उद्योगविश्रामः, उद्योगविश्रान्तिः *f.*, उद्योगविच्छेदः, उद्योगशैथिल्यं, अनध्यायः.—(Of bowels) कोष्ठमृदुता, मृदुकोष्ठता, कोष्ठलघुता, लघुकोष्ठता, अतिसारः, सारणं.

RELAXED, *p. p.* शिथिलितः -ता -तं, शिथिलीकृतः &c., शिथिलः -ला -लं, स्रथः -था -थं, प्रस्रथः &c., विस्रथः &c., सस्तः -स्ता -स्तं, विसस्तः &c., विगलितः -ता -तं, मुक्तः -क्ता -क्तं, मोचितः -ता -तं; 'in the body,' विस्रथाङ्गः -ङ्गा -ङ्गं, सस्ताङ्गः &c.; 'in strength,' शिथिलबलः -ला -लं, शिथिलशक्तिः -क्तिः -क्ति; 'in the bowels,' मृदुकोष्ठः -ष्ठा -ष्ठं, लघुकोष्ठः &c.; 'one who has relaxed his hold,' सस्तहस्तः -स्ता -स्तं, शिथिलितहस्तः &c.

RELAXING, *part.* or *a.* शैथिल्यकारी -रिणी -रि (न्), शैथिल्यजनकः -का -कं, ग्लानिकारकः &c., ग्लानिकरः &c., बलशैथिल्यकारकः &c., बलशैथिल्यजनकः &c.

RELAY, *s.* मार्गे निरूपितस्थानेषु सज्जीकृतो जवाश्वगणः, जवाश्वस्थानं.

To RELEASE, *v. a.* मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, प्रविमुच्, निर्मुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), विमोक्ष्, उद्धृ (c. 1. -हरति -हर्तुं), त्रै (c. 1. त्रायते, त्रातुं), परित्रै, निस्तॄ (c. 10. -तारयति -यितुं), उत्तॄ, विसृज्, त्यज्. *See To* FREE, LIBERATE.

RELEASE, *s.* मुक्तिः *f.*, विमुक्तिः *f.*, मोक्षः -क्षणं, विमोक्षः -क्षणं, मोचनं, विमोचनं, उद्धारः, उद्धरणं, समुद्धरणं, त्राणं, परित्राणं, निस्तारः, निस्तरणं, उत्तरणं, विसर्जनं, त्यागः; 'from confinement,' बन्धनमुक्तिः *f.*

RELEASED, *p. p.* मुक्तः -क्ता -क्तं, विमुक्तः &c., मोचितः -ता -तं, विमोचितः &c., मोक्षितः &c., उद्धृतः &c., *see* LIBERATED; 'from obligation,' ऋणमुक्तः -क्ता -क्तं, उत्तीर्णः -र्णा -र्णं, अवतीर्णर्णः &c.; 'from confinement,' बन्धनमुक्तः &c.

RELEASER, *s.* मोचकः, विमोचकः, उद्धर्त्री *m.* (तृ). *See* LIBERATOR.

To RELENT, *v. n.* दयार्द्रः -द्रा -द्रं भू, दयार्द्रचित्तः -त्ता -त्तं भू, दयार्द्रीभू, मृदूभू, मृदुचित्तः -त्ता -त्तं भू, दयां कृ, करुणां कृ, कृपां कृ, सकरुणः -णा -णं भू, करुण (nom. करुणायते), कृपा (nom. कृपायते), पुनर् दयां कृ, पुनर् अनुग्रहं कृ, कोमलचित्तः -त्ता -त्तं भू, स्निग्धीभू, द्रवीभू, शम् (c. 4. शाम्यति, शमितुं), शान्तिं or सान्त्वं गम्.

RELENTLESS, *a.* निर्दयः -या -यं, निष्करुणः -णा -णं, अकरुणः &c., निष्कृपः -पा -पं, अशाम्यः -म्या -म्यं, अशमनीयः -या -यं, उग्रदण्डः -ण्डा -ण्डं, उग्रः -ग्रा -ग्रं, निष्ठुरः -रा -रं, कठोरः &c., पाषाणहृदयः -या -यं, निर्द्रवहृदयः &c.; 'a relentless foe,' दृढवैरी *m.* (न्).

RELENTLESSLY, *adv.* निर्दयं, निष्करुणं, निष्कृपं, निष्ठुरं, कठोरं, उग्रदण्डेन.

RELEVANCE, RELEVANCY, *s.* प्रासङ्गिकत्वं, प्रसङ्गयोग्यता, प्रसङ्गानुसारः, प्रसङ्गसङ्गतिः *f.*, प्रसङ्गौचित्यं, प्रसङ्गान्वयः, प्रकरणयोग्यता, प्रकरणानुसारः, प्रकरणसङ्गतिः *f.*, प्राकरणिकत्वं, प्रस्तावानुसारः, प्रस्तावान्वयः, प्रस्तावौचित्यं, प्रस्तावानुषङ्गः, प्रस्तुतानुषङ्गः, प्रस्तुतसङ्गतिः *f.*, युक्तिः *f.*, योग्यता, यौक्तिकत्वं, विषयकत्वं.

RELEVANT, *a.* प्रासङ्गिकः -की -कं, प्रसङ्गानुसारी -रिणी -रि (न्), प्रसङ्गसङ्गतः -ता -तं, प्रसङ्गौचितः -ता -तं, प्रसङ्गयोग्यः -ग्या -ग्यं, प्रसङ्गसदृशः -शी -शं, प्रसङ्गान्वयी &c., प्रकरणयोग्यः &c., प्रकरणानुसारी &c., प्रकरणसङ्गतः &c., प्राकरणिकः -की -कं, प्रस्तावोचितः -ता -तं, प्रस्तावानुसारी &c., प्रस्तावानुषङ्गी &c., प्रस्तुतानुषङ्गी &c., प्रस्तावसदृशः -शी -शं, प्रास्ताविकः -की -कं, यौक्तिकः -की -कं, प्रयुक्तः -क्ता -क्तं, युक्तिमान् -मती -मत् (त्), प्रतीक्षकः -का -कं, अपेक्षकः &c., उद्देशकः &c., विषयकः &c.

RELIANCE, *s.* विश्वासः, प्रत्ययः, विश्रम्भः, निष्ठा, आश्रयः, उपाश्रयः, संश्रयः, समाश्रयः, आशयः, अयनं, आयः, अवलम्बनं, तन्त्रता.

RELIC, *s.* शेषः -षं, अवशेषः -षं, शिष्टं, अवशिष्टं, अवशिष्टांशः, नष्टशिष्टांशः, परिशेषः, परिशिष्टं, शेषभागः, अवशिष्टभागः, शेषखण्डः.—(Corpse) शवः -वं.

RELICT, *s.* (Widow) विधवा, गतभर्तृका, मृतपतिका.

RELIEF, *s.* (Removal of pain or distress, alleviation) दुःखशमनं, दुःखशान्तिः *f.*, दुःखोद्धरणं, दुःखापहरणं, दुःखापहारः, दुःखमोचनं, दुःखमुक्तिः *f.*, दुःखपरिहारः, दुःखापनयनं, श्रमापनयनं, श्रमापहारः, श्रमपरिहारः, अनिष्टापनयनं, दुःखपरिमार्जनं, उद्धरणं, उद्धारः, शमनं, प्रशमनं.—(Ease or alleviation obtained) सुखं, शान्तिः *f.*, प्रशान्तिः *f.*, शमः, उपशमः, शान्तता, विश्रान्तिः *f.*, विश्रामः, स्वास्थ्यं, स्वस्थता, सुस्थता, सुस्थितिः *f.*, निर्वृतिः *f.*, समाधानं.—(In sculpture), *see* BASS-RELIEF.

RELIEVABLE, *a.* उद्धरणीयः -या -यं, शमनीयः &c., शाम्यः -म्या -म्यं.

To RELIEVE, *v. a.* (Free from pain, remove distress) उद्धृ (c. 1. -हरति -हर्तुं), दुःखम् अपहृ or हृ or अपनी (c. 1. -नयति -नेतुं), दुःखाद् मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), दुःखं शम् (c. 10. शमयति -यितुं), दुःखशमनं कृ, दुःखोद्धरणं कृ, दुःखापहरणं कृ, श्रमम् अपहृ or हृ, श्रमापनयनं कृ, श्रमापहरणं कृ, दुःखमोचनं कृ.—(Alleviate) शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, शान्तिं दा or कृ, शमनं कृ, प्रशमनं कृ, विश्रामं दा, विश्रान्तिं दा, लघ (nom. लघयति -यितुं), लघूकृ.—(Help) उपकृ, साहाय्यं कृ, सहायत्वं कृ, उपचर्.—(Relieve guard) सैनिकपरिवर्त्तनं कृ, रक्षकपरिवृत्तिं कृ, जागरणाद् मुच्.—(Set off by contrast) विपरीतगुणप्रकाशेन अधिकशोभां दा.

SHRUBBY, *a.* गुल्मावृतः -ता -तं, तरुगुल्मावृतः &c., गुल्ममयः -यी -यं.

To SHRUG, *v. a.* or *n.* (The shoulders) असनोषमूचनार्थं स्कन्धसङ्कोचं कृ or स्कन्धाकुचनं कृ or स्कन्धोत्क्षेपणं कृ or स्कन्धचेष्टनं कृ.

SHRUG, *s.* स्कन्धसङ्कोचः, स्कन्धाकुचनं, स्कन्धोत्क्षेपणं, स्कन्धचेष्टा.

SHRUNK, *s.* सङ्कुचितः -ता -तं, कुचितः -ता -तं, आकुञ्चितः &c., संवृतः -ता -तं, क्षीणः -णा -णं, संश्यानः -ना -नं, संहतः -ता -तं, संक्षिप्तः -प्ता -प्तं, इसितः -ता -तं, सत्वः -त्वा -त्वं, सङ्कीर्णः -र्णा -र्णं.

To SHUDDER, *v. n.* कम्प् (c. 1. कम्पते -म्पितुं), विकम्प्, स्फुर् (c. 6. स्फुरति -रितुं), विस्फुर्, प्रस्फुर्, वेप् (c. 1. वेपते -पितुं), प्रवेप्, ह्वल् (c. 1. ह्वलति -लितुं), सीत्कारं कृ, शीत्कारोपहतः -ता -तं भू, सीत्कारयुक्तः -क्ता -क्तं भू.

SHUDDER, SHUDDERING, *s.* अङ्गकम्पः, शरीरकम्पः, अङ्गस्फुरणं, शरीरस्फुरणं, विस्फुरणं, अङ्गवेपनं, कम्पः -म्पनं, विकम्पः -म्पनं, सीत्कारः, सीत्कृतं, शीत्कारः.

To SHUFFLE, *v. a.* (Shove one way and the other) इतस्ततः संचल् (c. 10. -चालयति -यितुं) or चल्, इतस्ततः सृ (c. 10. सारयति -यितुं) or विक्षिप्, बहुधा चल्; 'to shuffle the feet,' पादास्फालनं कृ, पादचापल्यं कृ.—(Mix together) सम्मिश्रीकृ, अस्तव्यस्तीकृ, अपरोत्तरीकृ, संकुलीकृ, सङ्करीकृ, विक्षिप्, सम्मिश्र्; 'cards,' द्यूतपत्रसम्मिश्रणं कृ.

To SHUFFLE, *v. n.* (Practice evasions) छद्म कृ, छलं कृ, व्यपदेशं कृ, अपदेशं कृ, व्यपदिश् (c. 6. -दिशति -देष्टुं), कपटं कृ, वक्रवृत्तिः -त्तिं भू, चपलः -ला -लं भू.

SHUFFLE, SHUFFLING, *s.* (Mixing, pushing together) सम्मिश्रणं, अस्तव्यस्तीकरणं, इतस्ततः सञ्चालनं or सारणं or विक्षेपः; 'of the feet,' पादास्फालनं, पादचापल्यं.—(Evasion) छद्म *n.* (न्), छलं, व्यपदेशः, अपदेशः, वक्रता, चपलता, चापल्यं.

SHUFFLER, *s.* वक्रवृत्तिः *m.*, चपलवृत्तिः *m.*, छद्मवृत्तिः *m.* छली *m.* (न्).

To SHUN, *v. a.* वृज् (c. 10. वर्जयति -यितुं), परिवृज्, विवृज्, परिहृ (c. 1. -हरति -हर्तुं), प्रोज्झ् (c. 6. प्रोज्झति -ज्झितुं, rt. उज्झ्), उज्झ्, हा (c. 3. जहाति, हातुं), त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, वर्जीकृ.

SHUNNED, *p. p.* वर्जितः -ता -तं, विवर्जितः &c., परिहृतः -ता -तं, प्रोज्झितः -ता -तं, वर्जीकृतः -ता -तं, त्यक्तः -क्ता -क्तं, परित्यक्तः &c.

SHÚDRA, *s.* *See* SÚDRA.

To SHUT, *v. a.* (Close, fasten up) पिधा (c. 3. -दधाति -धातुं), अपिधा, रुध् (c. 7. रुणद्धि, रोद्धुं), निरुध्, अवरुध्, संवृ (c. 5. -वृणोति -वरितुं -रीतुं), बन्ध् (c. 9. बध्नाति, बन्धुं), संह (c. 1. -हरति -हर्तुं), संहन् (c. 2. -हन्ति -न्तुं); 'shut the door,' द्वारं पिधेहि or रुन्धि; 'they shut the doors,' द्वारादि पिदधुः or रुरुधुः; 'to shut the mouth,' मुखं संवृ or पिधा; 'the hands,' हस्तौ बन्ध् or संहन्; 'a book,' पुस्तकं बन्ध्; 'the lips,' ओष्ठौ संवृ; 'the eyes,' मील्, निमील्, निमिष्, *see To* CLOSE, *v. a.*—(Contract, compress) संवृ, संह, संकुच्, संहन्, सम्पीड्.—(Bar) अर्गलेन बन्ध्.—(Obstruct) रुध्, निरुध्, स्तम्भ्, प्रतिबन्ध्.—(Shut in), *see To* CONFINE, INCLOSE.—(Shut out) बहिष्कृ, निरु, निराकृ, निषिध्, *see To* EXCLUDE, PRECLUDE.—(Shut up) निरुध्, अवरुध्; 'in a prison,' कारायां निरुध्; 'in a box,' सम्पुटीकृ.

SHUT, *p. p.* रुद्धः -द्धा -द्धं, पिहितः -ता -तं, संवृतः -ता -तं, बद्धः -द्धा -द्धं, पिधानवान् -वती -वत् (त्), सपिधानः -ना -नं; 'as a bud,' अविकचः -चा -चं, मुकुलीकृतः -ता -तं; 'as the eye,' निमीलितः -ता -तं, मुकुलितः &c.

SHUTTER, *s.* अवरोधकं, प्रतिबन्धकं, आच्छादनं, कपाटः; 'of a window,' जालकावरोधकं, जालकाच्छादनं, वातायनावरोधकं.

SHUTTLE, *s.* (Of a weaver) तसरः, सूचवेष्टनं, सूचयन्त्रं, तसरः, मक्षिकाः, नाडिकीरं.

SHUTTLE-COCK, *s.* लघुगुलिकाविशेषो यो विनोदार्थं दण्डाहतो भूत्वा इतस्ततः प्रक्षिप्यते.

SHY, *a.* सभाभीतः -ता -तं, सभाभीरुः -रुः -रु, जनभीतः -ता -तं, लोकभीतः &c., भावबन्धविमुखः -खा -खी -खं, अल्पभाषी -षिणी -षि (न्), आलापविरक्तः -क्ता -क्तं, कातरः -रा -रं, आगमनभीरुः -रुः -रु, भीरुः -रुः -रु.

SHYNESS, *s.* सभाभीतिः *f.*, सभाभीरुता, जनभीतिः *f.*, लोकभीतिः *f.*, सभागम्यः, भावबन्धविमुखता, आलापविरक्तिः, भीरुता, कातरता.

SIBILANT, *s.* (Letter) ऊष्मः. *See* HISSING.

SICK, *a.* (Inclined to vomit) वमनेच्छुः -च्छुः -च्छु, विवमिषुः -षुः -षु, वमनोन्मुखः -खा -खं, वमी -मिनी -मि (न्), उत्क्लारी -रिणी &c., छर्दनेच्छुः -च्छुः -च्छु.—(Ill) रोगी -गिणी -गि (न्), रोगार्तः -र्ता -र्तं, रोगातुरः -रा -रं, रोगान्वितः -ता -तं, रोगग्रस्तः -स्ता -स्तं, अस्वस्थः -स्था -स्थं, सामयः -या -यं, व्याधितः -ता -तं, व्याधियुक्तः -क्ता -क्तं, अमी &c., विकारी &c., आमयावी &c., उपतापी &c., अभ्यानः -ना -नं, रुग्नः -ग्ना -ग्नं, *see* ILL, *a.*—(Disgusted) जातघीभावः -वा -वं, द्वेषी -षिणी &c., विकृतः -ता -तं, निर्विण्णः -ण्णा -ण्णं; 'sick of the world,' भवरोगी -गिणी &c., भवार्तः -र्ता -र्तं; 'sick-room,' विश्रिका.—(To be sick, vomit) वम् (c. 1. वमति -मितुं), छर्द् (c. 10. छर्दयति -यितुं).

To SICKEN, *v. a.* (Disgust) घीभावं कृ or जन् (c. 10. जनयति -यितुं), वैकृतं जन्.—(Make sick) वमनेच्छां जन्, छर्दनेच्छां जन्, रोगार्तीकृ, सरोगीकृ.

To SICKEN, *v. n.* (Fall sick) रोगग्रस्तः -स्ता -स्तं भू, रोगार्तः -र्ता -र्तं भू, ज्वर् (c. 1. ज्वरति -रितुं), सरोगीभू, *see To* LANGUISH.—(Feel disgust) घीभावोपहतः -ता -तं भू, जातघीभावः -वा -वं भू.

SICKENING, *a.* घीभावजनकः -का -कं, विरक्तिजनकः &c., *see* DISGUSTING.

SICKISH, *a.* ईषद्वमनेच्छुः -च्छुः -च्छु, ईषद्रोगी -गिणी -गि (न्).

SICKLE, *s.* लवित्रं, दात्रं, लवनकं, लवाकः, शस्यकर्तनी, शस्यछेदनी, कर्तनी, खण्डनः, खण्डनं -नी, खण्डधनः, खण्डीकः.

SICKLINESS, *s.* सरोगता, रोगिता, रोगार्तिता, रोगशीलता, जन्मरोगिता.

SICKLY, *a.* (Unwell) *see* SICK.—(Habitually ill) सदारोगी -गिणी -गि (न्), नित्यरोगी &c., रोगाधीनः -ना -नं, रोगशीलः -ला -लं; 'by birth or nature,' जन्मरोगी &c., जातिरोगी &c., प्रकृतिरोगी &c., स्वभावरोगी &c.; 'having a sickly countenance,' रुग्नवदनः -ना -नं, रुग्नमुखः &c.

SICKNESS, *s.* (Inclination to vomit, nausea) वमनेच्छा, छर्दनेच्छा, विवमिषा, वमनोन्मुखता, वमः -मनं, वमिः *f.*, वान्तिः *f.*, उल्लेशः, उल्लेदः, उल्लेपः, उत्क्लारः, छर्दनं, छर्दी, छर्दिः *f.*, छर्दिस् *f.*, प्रच्छर्दिका.—(Disease) रोगः, व्याधिः *m.*, आमयः, रुक् *f.* (ज्), अस्वास्थ्यं, अस्वस्थता, विकारः, असमाधानं, रुग्नावस्था, रोगिता, रोगग्रस्तता, रोगव्याप्तिः *f.*, *see* DISEASE, ILLNESS.

SIDE, *s.* (Of a man or any animal) पार्श्वः, पार्श्वभागः, पक्षः -क्षकः, पक्षभागः, कुक्षिः *m.*, अक्षः, पार्श्वास्थं, अङ्गास्थं, अङ्गः, कोलः; 'pain in the side,' पार्श्वशूलः -लं, कुक्षिशूलः -लं; 'left side,' वामपार्श्वः, वामाङ्गं; 'turning upon the side,' पार्श्वपरिवर्तनं, अङ्गपरिवर्तनं; 'removed from the side of a parent,' पितुर् अङ्गात् परिभ्रष्टः, पितृपार्श्वात्परिभ्रष्टः -ष्टा -ष्टं; 'at one's side,' पार्श्वे, पार्श्वतस्; 'staying close at the side,' पार्श्वस्थः -स्था -स्थं, पार्श्वगतः -ता -तं, पार्श्वपरिवर्ती -र्तिनी &c., उपान्तस्थः -स्था -स्थं; 'sleeping at the side of,' पार्श्वशयः -या -यं.—(Edge, border) प्रान्तः, उपान्तः -न्तं, अन्तः, सीमा, धारा; 'of a wood,' वनान्तः -न्तं, वनधारा; 'of a river,' नदीतीरं, नदीकूलं, नदीतटं; 'of a roof,' पटलप्रान्तः; 'of a mountain,' पर्वतधारा, पर्वतटङ्का.—(Declivity or slope of a mountain) उत्सङ्गः, नितम्बः, कटकः.—(Part considered in respect to its direction) दिक् *f.* (ज्), दिशा, पार्श्वः or more usually expressed by the affixes तस्, त्र &c.; as, 'on all sides,' सर्वतस्, सन्ततस्, समन्तात्, विश्वतस्, परितस्, अभितस्, सर्वत्र, सर्वदिक्षु चतुर्दिक्षु; 'on both sides,' उभयतस्, उभयत्र, उभयपार्श्वयोः; 'on the other side,' अपरतस्, परतस्; 'on the opposite side,' अभिमुखतस्, विपरीतभागे; 'side by side,' पार्श्वापार्श्वि.—(Any part being in opposition to another) पक्षः; 'side of an argument,' पक्षः; 'both sides of an argument,' पक्षद्वयं; 'taking up a side,' पक्षता; 'another side of the argument,' पक्षान्तरं.—(Party faction) पक्षः; 'one's own side,' आत्मपक्षः, स्वपक्षः; 'having a side,' पक्षवान् &c.; 'one of the opposite side,' विपक्षः, प्रतिपक्षः; 'one of the same side,' सपक्षः, स्वपक्षावलम्बी *m.* (न्), स्वपक्षकः; 'to take a side,' पक्षपातं कृ, *see To* SIDE; 'one who takes a side,' पक्षपाती *m.* (न्), पक्षोद्ग्राही *m.*—(Any part of a thing) भागः; 'the outer side,' बाह्यभागः; 'black on the two sides,' द्वयोर् भागयोः श्यामः -मा -मं.—(Branch of a family, separate line) पक्षः; 'relations on the father's side,' पितृपक्षा ज्ञातयः; 'on the mother's side,' मातृपक्षा बान्धवाः; 'noble on both sides,' मातृतःपितृतश्चाभिजनवान् -वती &c.—(Side of a geometrical figure) भुजः, बाहुः *m.*, दोस् *m.*

SIDE, *a.* पार्श्विकः -की -कं, पार्श्वः -र्श्वी -र्श्वं, पार्श्वीयः -या -यं, पार्श्वस्थः -स्था -स्थं, पार्श्विकः -की -कं, पाक्षः -क्षी -क्षं, पार्श्व or पक्ष in comp.; 'a side door,' पक्षद्वारं.

To SIDE, *v. n.* (Embrace or adopt a side) पक्षपातं कृ, पक्षोद्ग्राहं कृ, पक्षं ग्रह् or उद्ग्रह् or अनुग्रह्.

SIDE-BOARD, *s.* पक्षफलकः -कं, पार्श्वफलकः, पार्श्वस्थफलकः.

SIDE-LONG, *a.* अनुपार्श्वः -र्श्वा -र्श्वं, पार्श्विकः -का -कं, आनुपार्श्विकः -की -कं, पक्षः -क्षा -क्षं, तिरश्चीनः -ना -नं, तिर्यङ् -र्यञ्ची -र्यक् (च्); 'side-long glance,' तिर्यग्दृष्टिः *f.*, अपाङ्गदृष्टिः.

SIDE-LONG, *adv.* अनुपार्श्वं, पार्श्वतस्, तिर्यक्, तिरस्, पार्श्वदिशि.

SIDE-LOOK, *s.* कटाक्षः, नेत्रकटाक्षः, अपाङ्गदृष्टिः *f.*, अपाङ्गदर्शनं, दृष्टिविक्षेपः.

SIDER, *s.* पक्षकः, पक्षधरः, पक्षोद्ग्राही *m.* (न्), पक्षपाती *m.*, पक्षी *m.*

SIDEREAL, SIDERAL, *a.* तारासम्बन्धी -न्धिनी -न्धि (न्), नाक्षत्रिकः -की -कं, नाक्षत्रः -त्री -त्रं, नक्षत्रसम्बन्धी &c., ताराविषयकः -का -कं, ग्रहसम्बन्धी &c., तारामयः -यी -यं, नक्षत्रमयः &c., तारापूर्णः -र्णा -र्णं.

SIDE-SADDLE, *s.* पक्षपर्य्याणं, पक्षपर्य्ययं, स्त्रीपर्य्याणं, स्त्रीपर्य्ययं.

SIDESMAN, *s.* पक्षकः, पक्षपाती *m.* (न्), पक्षोद्ग्राही *m.*, पक्षी *m.*, पार्श्विकः, पक्षधारी *m.* *See* PARTISAN.

SIDE-TABLE, *s.* पक्षफलकः -कं, पार्श्वफलकः, पार्श्वस्थफलकः.

SIDE-WAYS, SIDE-WISE, *adv.* तिर्यक्, तिरस्, तिरश्चीनं, अनुपार्श्वं, पार्श्वतस्; 'moving side ways,' तिर्यङ् -र्यञ्ची -र्यक् (च्), तिर्यग्गामी -मिनी &c., तिरश्चीनः -ना -नं.

SIDING, *s.* (Taking a side) पक्षग्रहणं, पक्षावलम्बः, पक्षता.

To SIDLE, *v. n.* तिर्यग् गम् (c. 1. गच्छति, गन्तुं), तिर्यक् चल् or या.

SIDLING, *s.* तिर्यक्चलनं, तिर्यग्यानं, तिर्यग्गमनं, तिर्यग्गतिः *f.*—(One of a horse's paces) उत्तेजितः.

SIEGE, *s.* अवरोधः -धनं, प्रतिरोधः, रोधः -धनं, चिरारोधः, रुद्धा, नगरवेष्टनं, नगरपरिवेष्टनं, सैन्यवेष्टनं.

SIEVE, *s.* चालनी -नं, धान्यचालनी, शोधनी, धान्यशोधनी, प्रस्फोटनं -नी, तितउः *m.*, तित्तिर *n.*, निर्गलनयन्त्रं, पाटीरः, शतपोनः.

To SIFT, *v. a.* (Separate by a sieve) शुध् (c. 10. शोधयति -यितुं), तितउना चल् (c. 10. चालयति -यितुं), चालनयन्त्रेण शुध् or शोधनं कृ, निर्गलनं कृ, प्रस्फुट् in caus.—(Investigate minutely) सूक्ष्मपरीक्षां कृ, सूक्ष्मं परीक्ष्, सूक्ष्मजिज्ञासां कृ, मन्थनं कृ, मथनं कृ.

SIFTED, *p. p.* शोधितः -ता -तं, निर्गलितः &c., चालितः &c., मथितः &c.

SIFTING, *s.* शोधनं, धान्यशोधनं, धान्यचालनं, निर्गलनं, प्रस्फोटनं, धान्यप्रस्फोटनं, मथनं.

To SIGH, *v. n.* दीर्घनिःश्वासं कृ, दीर्घनिःश्वासं कृ, दीर्घं निश्वस् or निःश्वस् (c. 2. -श्वसिति -तुं), दीर्घम् उच्छ्वस् or विनिश्वस् or विनिःश्वस् or समुच्छ्वस्, स्तन् (c. 1. स्तनति -नितुं), निस्तन्, सीत्कारं कृ.

SIGH, *s.* दीर्घनिश्वासः, दीर्घनिःश्वासः, दीर्घश्वासः, निःश्वासः, निश्वासः, निःश्वसनं, दीर्घनिःश्वसनं, निश्वासः, निश्वसनं, उच्छ्वासः, दीर्घोच्छ्वासः, उच्छ्वसितं, दीर्घोच्छ्वसितं, दीर्घश्वसितं, दीर्घश्वसनं, समुच्छ्वासः, समुच्छ्वसितं, विनिश्वासः, स्तननं, स्तनितं.

SIGHING, *part.* दीर्घनिश्वासी -सिनी -सि (न्), निःश्वासी &c., उच्छ्वासी &c., दीर्घोच्छ्वासी &c., दीर्घनिश्वस्य indec., निश्वसन् -सन्ती -सत् (त्), विनिश्वसन् &c.

SIGHT, *s.* (Vision, view, act of seeing) दृष्टिः *f.*, दर्शनं, ईक्षणं, वीक्षणं, वीक्षा, प्रेक्षणं, प्रेक्षा, आलोकः, आलोकनं, अवलोकनं, लोकः -कनं, लक्षणं, आलोचनं -ना, निज्ञानं, निर्वेशेनं, निध्यानं, निभालनं, निभालनं, सूचना; 'being within sight,' दृष्टिगोचरः -रा -रं, दृष्टिविषयः -या -यं, दृग्गोचरः &c., दृश्यः -श्या -श्यं, दृश्यमानः &c., चक्षुर्ग्राह्यः -ह्या -ह्यं, *see* VISIBLE; 'in sight,' दृष्टिगोचरेण; 'in sight of, in presence of,' साक्षात्, समक्षं, प्रत्यक्षेण, पश्यतस्, दृष्टितस्; 'in sight of many persons,' बहुजनसमक्षं; 'out of sight,' अदृश्यः -श्या -श्यं, *see* INVISIBLE; 'out of one's sight,' परोक्षे, अगोचरेण; 'out of my sight,' ममागोचरेण; 'at sight of,' दर्शनात्, दर्शनेन; 'at sight of the token,' अभिज्ञानदर्शनात्; 'first sight of,' प्रथमदर्शनं, अपूर्वदर्शनं; 'at the very first sight,' प्रथमदर्शनात् -ने, प्रथमदर्शनमात्रात्, आप्रथमदर्शनात्, सकृद्दर्शनात्; 'at sight, in commerce,' पत्रदर्शनात्.—(Faculty or sense of sight) दृष्टिः *f.*, दृक् *f.* (श्), चक्षुरिन्द्रियं, नेत्रेन्द्रियं, चक्षुस् *n.*, दृक्शक्तिः *f.*, दृष्टिशक्तिः *f.*, दर्शनशक्तिः *f.*, आलोचकं; 'charming or bewitching the sight,' दृष्टिबन्धः -न्धनं.—(Eye) चक्षुस् *n.*, नेत्रं, नयनं, लोचनं, दृष्टिः *f.*—(Spectacle, show, anything seen) प्रेक्षा, प्रेक्षणं, कौतुकं; 'fond of sight-seeing,' कौतुकासक्तः -क्ता -क्तं.

SIGHTLESS, *a.* दृष्टिहीनः -ना -नं, नेत्रहीनः &c., काणः -णा -णं.

SIGHTLY, *a.* दर्शनीयः -या -यं, सुदर्शनः -ना -नं, सुदृश्यः -श्या -श्यं.

SIGN, *s.* (Token, mark) लक्षणं, चिह्नं, लाञ्छनं, ध्वजः, अभिज्ञानं, प्रज्ञानं, लिङ्गं, लक्ष्मं, अङ्कः -ङ्कं, सूचना, सूचकं; 'good sign,' सुचिह्नं, सुलक्षणं; 'bad sign,' कुलक्षणं, अवलक्षणं, अपचिह्नं, दुर्लक्षणं.—(Motion or action indicating something) संज्ञा, सङ्केतः, इङ्गितं, इङ्गः, आकारः; 'with the fingers,' अङ्गुलिसन्देशः; 'with the head,' शिरःसङ्केतः, मस्तकसङ्केतः, मस्तकसन्देशः; understanding signs,' इङ्गितज्ञः -ज्ञा -ज्ञं; 'to make signs,' सङ्केतं कृ, इङ्गितं कृ.—(Portent, prodigy) उत्पातः, अद्भुतं, उपसर्गः, दुर्लक्षणं, दुश्चिह्नं.—(Of the zodiac) राशिः *m.*, *see* ZODIAC; 'rising of a sign,' लग्नं.—(Arithmetical sign) अङ्कः.—(Sign manual) हस्ताक्षरं, स्वाक्षरं, स्वहस्ताक्षरं.—(Of an inn, &c.) ध्वजः, सुराध्वजः.

To SIGN, *v. a.* स्वहस्ताक्षरं or हस्ताक्षरं or नामाक्षरं लिख् (c. 6. लिखति, लेखितुं), स्वाक्षरेण or हस्ताक्षरेण अङ्क् (c. 10. अङ्कयति -यितुं).

SIGNAL, *s.* सङ्केतः, संज्ञा, इङ्गितं, ध्वजः, चिह्नं, प्रकाशचिह्नं.

SIGNAL, *a.* प्रसिद्धः -द्धा -द्धं, स्मरणीयः -या -यं, स्मरणार्हः -र्हा -र्हं, विशिष्टः -ष्टा -ष्टं, विशेष in comp., विचित्रः &c. *See* REMARKABLE.

To SIGNALIZE, *v. a.* प्रसिद्धीकृ, विशिष्टीकृ, प्रसिद्धं -द्धां कृ, स्मरणीयं -यां कृ, विचित्रीकृ, विचित्रीकृ; 'to signalize one's self,' कीर्तिं or यशः प्राप् (c. 5. -आप्नोति -आप्तुं), विशिष् in pass. (-शिष्यते), नाम or प्रसिद्धां लभ् or प्राप्.

SIGNATURE, *s.* हस्ताक्षरं, स्वहस्ताक्षरं, स्वाक्षरं, नामाक्षरं, हस्तलिखनं.

SIGNED, *p. p.* हस्ताक्षराङ्कितः -ता -तं, स्वाक्षराङ्कितः &c., मुद्राङ्कितः &c.; 'a paper signed and sealed,' मुद्रिका, मुद्राङ्कितपत्रं.

SIGNET, *s.* मुद्रा, मुद्रिका, प्रत्ययकारिणी, नामाक्षरं; 'signet-ring,' अङ्गुलिमुद्रा; 'royal-signet,' राजमुद्रा.

SIGNIFICANCE, *s.* (Meaning) अर्थः, अर्थवत्त्वं, अर्थवत्ता, अभिप्रायः, आकूतं, वाचकता.—(Importance) गौरवं, भारः.—(Force) शक्तिः *f.*

SIGNIFICANT, SIGNIFICATIVE, *a.* (Having a meaning) अर्थवान् -वती -वत् (त्), अर्थान्वितः -ता -तं, अर्थयुक्तः -क्ता -क्तं, सार्थः -र्था -र्थं, सार्थकः -का -कं, आर्थिकः -की -कं, साकूतः -ता -तं, पूर्णार्थः -र्था -र्थं.—(Expressive, indicative) उद्बोधकः -का -कं, बोधकः &c., सूचकः -का -कं, वाचकः &c., अर्थसूचकः &c., अर्थबोधकः &c., अभिधायिकः -का -कं, लाक्षणिकः -की -कं, अर्थप्रकाशकः &c., दर्शकः &c., प्रदर्शकः &c., साङ्केतिकः -की -कं, इङ्गितज्ञः -ज्ञा -ज्ञं; 'significant word,' अभिधेयं, अभिव्याहारः.

SIGNIFICANTLY, *adv.* सार्थं, साकूतं, पूर्णार्थं, पूर्णार्थतस्, अर्थवत्.

SIGNIFICATION, *s.* (Meaning) अर्थः, विवक्षा, विवक्षितं, आकांक्षा, अभिप्रायः, आकूतं; 'etymological signification,' अवयवार्थः.—(Force of words) शक्तिः *f.*, शब्दशक्तिः *f.*, शब्दसामर्थ्यं, निरूढः.—(Act of making known) सूचनं -ना, ज्ञापनं.

SIGNIFIED, *p. p.* सूचितः -ता -तं, ज्ञापितः &c., संज्ञासूचितः &c.

To SIGNIFY, *v. a.* (Make known) सूच् (c. 10. सूचयति -यितुं), संसूच्, ज्ञा in caus. (ज्ञापयति, ज्ञपयति -यितुं), विज्ञा, बुध् in caus.—(By signs) सङ्केतादिद्वारेण सूच्.—(Mean, convey meaning, imply) बोधय् (c. 10. -बोधयति -यितुं), वच् in des. (विवक्षति -क्षितुं), अर्थं सूच् or उद्दिश् (c. 6. -दिशति -देष्टुं), अर्थवान् -वती -वत् भू, *see* *To* MEAN.—(Have consequence or importance) गुर्वीः -र्वी -र्वि भू, पूर्णार्थः -र्था -र्थं भू, महार्थः &c. भू, बह्वर्थः &c. भू; 'to signify little,' अल्पार्थः -र्था -र्थं भू, लघ्वर्थः -र्वी -र्वि भू. Sometimes expressible by the instr. case after किं; as, 'what signify the splendors of a court?' किं सभाप्रतापेन; 'what does this signify?' किम् अनेन.

SIGN-MANUAL, *s.* हस्ताक्षरं, स्वहस्ताक्षरं; 'of a king,' राजहस्ताक्षरं.

SIGN-POST, *s.* ध्वजस्तम्भः, ध्वजोपस्तम्भः, मार्गसूचनस्तम्भः, मार्गस्तम्भः.

SILENCE, *s.* (Forbearance of speech) मौनं, मौनभावः, मौनित्वं,

अभाषणं, अनालापः, तूष्णीम्भावः, तूष्णीम्भूतत्वं, निःशब्दता, वाग्यतता, निश्चलः, भाषणाभावः; 'suppression of speech, dogged silence,' वाक्स्तम्भः, वाग्रोधः, वाग्बन्धनं, मुखबन्धनं, मुखस्तम्भः, मुखरोधः, वाग्यमनं; 'vow of silence,' मौनव्रतं, वाक्नियमः; 'condition of a fish,' मौनता; 'to keep silence,' वाचं यम् (c. 1. यच्छति, यन्तुं) or नियम्, वाचं रुध् (c. 7. रुणद्धि, रोद्धुं), मुखं रुध्, वाग्रोधं कृ, तूष्णीम् भू, मौनं कृ, मौनीभू; 'Silence!' मौनं कुरु, तूष्णीम्भव.—(Stillness), *see* the word.

To SILENCE, *v. a.* वाग्रोधं कृ, वाग्बन्धनं कृ, वाक्स्तम्भं कृ, मुखरोधं कृ, निरुत्तरीकृ, अनुत्तरीकृ, निरुत्तरं-रां कृ, अधरीकृ.—(Cause to cease) विरम् (c. 10. -रमयति -यितुं), निवृत् (c. 10. -वर्तयति -यितुं).

SILENCED, *p. p.* निरुत्तरः-रा-रं, निरुत्तरीकृतः-ता-तं, दत्तोत्तरः-रा-रं, अनुत्तरः &c., अनुत्तरीकृतः &c., रुद्धमुखः-खा-खं, बद्धमुखः &c.

SILENT, *a.* (Not speaking) मौनी-निनी-नि (न्), तूष्णीकः-का-कं, अभाषी-षिणी &c., अनालापः-पा-पं, अनालापी &c., निःशब्दः-ब्दा-ब्दं, निर्वेचनः-ना-नं, तूष्णीम्भूतः-ता-तं, मूकः-का-कं.—(Habitually silent, speaking little) अल्पभाषी &c., अल्पवादी &c., तूष्णींशीलः-ला-लं, वाग्यतः-ता-तं, वाग्यः-ग्या-ग्यं, वाचंयमः-मा-मं, *see* TACITURN.—(Having the mouth stopped, doggedly silent) रुद्धमुखः-खा-खं, मुद्रितमुखः &c., बद्धमुखः &c.—(Having no answer to return) निरुत्तरः-रा-रं, अनुत्तरः-रा-रं.—(Still) निःशब्दः-ब्दा-ब्दं, निश्शब्दः &c., नीरवः-वा-वं.—(To be silent) तूष्णीम् भू, मौनीभू, मौनं कृ, वाचं यम् (c. 1. यच्छति, यन्तुं), वचनं विरम् (c. 1. -रमति -रन्तुं).

SILENTLY, *adv.* तूष्णीं, तूष्णीकां, सतूष्णीं, मौनीभूय, वाग्यतम्, जोषं, निःशब्दं.

SILK, *s.* (Fine thread, &c., produced by caterpillars) कीटजं, कृमिजं, कीटसूत्रं, कीटजसूत्रं, कृमिजसूत्रं, कीटतनुः *m.*, कीटकोषः, कीटकोशः, कीटकोषजं, कृमिकोषजं, कौशेयं, कौषेयं.—(Wove silk) दुकूलं, दुगूलं, कौशाद्यरं, कौशाद्यरं, कौशेयं, कौषेयं, कौशेयवस्त्रं, कौशिकवस्त्रं, कौशिकं, कीटकोषजं, पट्टः, चीनांशुकं, चाईरं, वल्गुसन्नतं, झौर्णं; 'bleached silk,' धौतकौशेयं, पट्टोर्णं.

SILK, SILKEN, *a.* कौशः-शी-शं, कौशिकः-की-कं, कौशेयः-यी-यं, कौषेयः &c., कौषिकः &c., कीटकोषजः-जा-जं, कोशजः &c., कोशप्रभवः-वा-वं, कृमिकोशोत्थः-त्था-त्थं, कोषोद्भवः &c., कृमिकोषोद्भवः &c., दौकूलः-ली-लं, दुकूलमयः-यी-यं; 'a silk garment,' कौशाद्यरं.—(Soft) मृदुः-दुः-दु, कोमलः &c.

SILK-COTTON TREE, *s.* शाल्मलिः-ली *m. f.*, शाल्मलितरुः *m.*, शाल्मलः, शाल्मलिनी, स्थिरायुः *m.*, पिच्छिला, पूरयी, मोचा; 'its gum,' पिच्छा, शाल्मलीनिर्यासः; 'another sort of silk-cotton tree,' कूटशाल्मलिः *m. f.*, रोचनः.

SILK-WEAVER, *s.* कीटतन्तुवायः, दुकूलकारः, कौशिकपटकारः.

SILK-WORM, *s.* कोशकारः-रिका, कोशकारः-रिका, तन्तुकीटः, तन्तुकृमिः *m.*, कोशवासी *m.* (न्), कोशस्थः, पुण्डरीकः, पट्टकूलं.

SILKY, *a.* कौशेयः-यी-यं, कौशगुणकः-का-कं. *See* SILKEN.

SILL, *s.* (Of a door) शिला-ली, देहली.—(Of a window) वातायनशिला.

SILLILY, *adv.* मूर्खवत्, मूढवत्, अज्ञवत्, अल्पबुद्धया, निर्बोधवत्.

SILLINESS, *s.* मूर्खता, अल्पबुद्धित्वं, निर्बुद्धित्वं, अज्ञता, बुद्धिहीनता.

SILLY, *a.* अल्पबुद्धिः-द्धिः-द्धि, अल्पधीः-धीः-धि, अल्पमेधाः-धाः-धः (ध्), दुर्बुद्धिः &c., मन्दबुद्धिः &c., मन्दमतिः-तिः-ति, दुर्मतिः &c., निर्बोधः-धा-धं, मूढस्वभावः-वा-वं, दुर्मेधाः &c., मूर्खः-र्खी-र्खं, मूढः-ढा-ढं, मुग्धः-ग्धा-ग्धं, अनीतिज्ञः-ज्ञा-ज्ञं. *See* FOOLISH.

SILVAN, *a.* आरण्यः-ण्यी-ण्यं, आरण्यकः-की-कं, अरण्यजः-जा-जं, वन्यः-न्या-न्यं, वनजः-जा-जं, वानः-नरी-नं, वानेयः-यी-यं, वनस्थः-स्था-स्थं, वनेचरः-रा-रं, वन in comp.

SILVER, *s.* (The metal) रूप्यं, रौप्यं, रजतं, श्वेतं-तकं, सितं, धौतं, शुभ्रं, शुभं, महाशुभं, खजूरं, खर्जूरं, दुर्वर्णं, चन्द्रलोहं, चन्द्रहासं, राजरङ्गं, इन्दुलोहकं, तारं, ब्राह्मपिण्डं, अकूपं.—(Coin made of silver) रूप्यमुद्रा, रौप्यमुद्रा.

SILVER, *a.* (Made of silver) रूप्यमयः-यी-यं, रौप्यः-प्यी-प्यं, रूप्यनिर्मितः-ता-तं, राजतः-ती-तं, रजतमयः &c., रजतनिर्मितः &c., रजतकृतः-ता-तं.—(White, like silver) रूप्यवर्णः-र्णा-र्णं, श्वेतः-ता-तं, *see* SILVERY.

To SILVER, *v. a.* रजत (nom. रजतयति -यितुं), रजतोपेतं-तां कृ, रजतान्वितं-तां कृ, रूप्यवर्णीकृ, श्वेतवर्णीकृ.

SILVERED, *p. p.* रजतान्वितः-ता-तं, राजतान्वितः &c., धौतः-ता-तं, रसितः-ता-तं, रूप्योपेतः &c., रूप्यवर्णीकृतः &c. *See* PLATED.

SILVER-SMITH, *s.* रूप्यकारः-रिका, रौप्यकारः-रिका, नाडिन्धमः.

SILVERY, *a.* रूप्यवर्णः-र्णा-र्णं, रौप्यवर्णः-र्णा-र्णं, रूप्यसदृशः-शी-शं, रजतोपमः-मा-मं, श्वेतवर्णः &c., शुक्लवर्णः &c.; 'having a silvery beard,' सितश्मश्रुः-श्रुः-श्रु.

SIMILAR, *a.* तुल्यः-ल्या-ल्यं, सदृशः-शी-शं, समः-मा-मं, समानः-ना-नं, साधारणः-णी-णा-णं, अनुगुणः-णा-णं, सगुणः &c., समगुणः &c., तुल्यगुणः &c., सधर्मा-र्मा-र्म (न्), सधर्मी-र्मिणी &c., अभ्युपगतः &c. *See* LIKE.

SIMILARITY, *s.* तुल्यता, सदृशता-त्वं, सादृश्यं, समता, समानता, साम्यं, औपम्यं; 'of form,' सारूप्यं, सरूपता, समरूपता; 'of character,' स्वभावसमता, प्रतिभावः. *See* LIKENESS.

SIMILARLY, *adv.* तद्वत्, तथैव, तथा, तुल्यप्रकारेण, एवं, सादृश्येन, एवम्प्रकारेण, तथाप्रकारेण, तथाविधेन, एवंविधेन.

SIMILE, *s.* उपमा, दृष्टान्तः, उदाहरणं, निदर्शनं, उत्प्रेक्षा.

SIMILITUDE, *s.* (Resemblance, form) औपम्यं, उपमा, प्रतिमा-मानं, आकारः, रूपं, मूर्तिः *f.*—(Likeness), *see* SIMILARITY, SIMILE.

To SIMMER, *v. n.* शनैः शनैः क्षीणशब्देन क्षुष् in pass. (क्षुष्यते) or पच् in pass. (पच्यते) or आ in pass. (आयते).

SIMMERING, *s.* शनैः शनैः क्षपणं, शनकैः क्षपणं or अपचं.

To SIMPER, *v. n.* अनर्थकहास्यं कृ, अनर्थकस्मितं कृ, अनर्थकहासं कृ, अनर्थकनिःशब्दहासं कृ, कुस्मिं (c. 1. -स्मयते -स्मेतुं), कुस्मितं कृ.

SIMPER, *s.* अनर्थकस्मितं, अनर्थकहास्यं, अनर्थकनिःशब्दहास्यं.

SIMPLE, *a.* (Not compound) निरवयवः-वा-वं, अमिश्रितः-ता-तं, अमिश्रः-श्रा-श्रं, शुद्धः-द्धा-द्धं, केवलः-ला-लं, केवली-लिनी-लि (न्), अकृत्रिमः-मा-मं, अव्याकृतः-ता-तं, असङ्कीर्णः-र्णा-र्णं, असमस्तः-स्ता-स्तं; 'simple word,' व्यस्तपदं.—(Artless, plain) सरलः-ला-लं, मायाहीनः-ना-नं, अमायिकः-की-कं, अमायः-या-यं, शुद्धमतिः-तिः-ति, निष्कपटः-टा-टं, अकपटः &c., निर्व्याजः-जा-जं, छलहीनः-ना-नं, अवक्रः-क्रा-क्रं, अजिह्मः-ह्मा-ह्मं, ऋजुः-जुः-जु.—(Neat) विनीतः-ता-तं, निर्भूषणः-णा-णं.—(Not abstruse, not complex) स्पष्टार्थः-र्था-र्थं, अगूढार्थः &c., स्वष्टार्थः &c., स्पष्टः-ष्टा-ष्टं, सुगम्यः-म्या-म्यं, अक्लिष्टः-ष्टा-ष्टं, भिन्नार्थः &c., *see* PLAIN.—(Foolish, childish) अल्पबुद्धिः-द्धिः-द्धि, दुर्मतिः-तिः-ति, बालिशः-शा-शं, *see* SILLY.

SIMPLE, *s.* (Herb) ओषधिः-धी *f.*, औषधं, वृषं.

SIMPLE-MINDED, *a.* शुद्धबुद्धिः-द्धिः-द्धि, सरलबुद्धिः &c., सरलमतिः &c.

SIMPLETON, *s.* अल्पबुद्धिः *m.*, अल्पधीः *m.*, मन्दबुद्धिः &c., मूर्खः, मूढः.

SIMPLICITY, SIMPLENESS, *s.* (State of being uncompounded) निरवयवत्वं, अमिश्रता, अमिश्रितत्वं, शुद्धता, केवलत्वं, अमिश्रभावः.—(Artlessness, plainness) सरलता, सारल्यं, अमाया, मायाहीनता, अमायिकत्वं, अकापट्यं, निष्कापट्यं, कपटाभावः, अव्याजः, छलहीनता, अवक्रता, ऋजुता, अनन्यभावः, आनीड्यं; 'of mind,' मतिसारल्यं, बुद्धिसारल्यं, मतिशुद्धता.—(Freedom from ornament) विनीतत्वं -ता, अभूषितत्वं, भूषणाभावः, भूषणहीनता.—(Freedom from abstruseness) एकार्थता, स्पष्टार्थता, स्पष्टता, सुगम्यता, व्यक्तता, सुज्ञेयता.—(Childishness) बालिश्यं, *see* SILLINESS.

SIMPLIFIED, *p. p.* लघूकृतः -ता -तं, सुगमीकृतः &c., व्यक्तीकृतः -ता -तं.

To SIMPLIFY, *v. a.* लघूकृ, सुगमीकृ, व्यक्तीकृ, स्पष्टीकृ, अर्थगूढतां हृ, एकार्थीकृ; 'to simplify the subject,' प्रस्तुतलाघवार्थं.

SIMPLY, *adv.* (Merely, solely) केवलं, मात्रं -वेण -त्रात्, *see* PLAINLY.

To SIMULATE, *v. a.* छद्म कृ, व्याजं कृ, छद्मवेशं धृ. *See To* PRETEND.

SIMULATION, *s.* छद्म *n.* (न्), व्याजः, अपदेशः, व्यपदेशः. *See* PRETENCE.

SIMULTANEOUS, *a.* समकालिकः -की -कं, समकालीनः -ना -नं, समानकालिकः &c., एककालिकः &c., एककालीनः -ना -नं, एकसमयः -या -यं, यौगपदिकः -की -कं.

SIMULTANEOUSLY, *adv.* युगपत्, एकदा, एककाले, समकाले, यौगपद्येन.

SIMULTANEOUSNESS, *s.* समकालिकता, एककालिकता, यौगपद्यं, कालैक्यं, एककालता, समकालता, समानकालत्वं, युगपद्भावः.

SIN, *s.* पापं, कल्मषं, किल्बिषं, पातकं, पाप्मा *m.* (न्), अघं, दुरितं, एनस् *n.*, कलुषं, अभद्रं, अशुभं, वृजनं, वृजिनं, दोषः, अपराधः, दुष्कृतं, कल्कं, अंहस् *n.*, अंघस् *n.*, मन्तुः *m.*, कुल्मलं, कलङ्कः, प्रत्यवायः, किल्बं, अमीवं, पङ्कः -ङ्कं, जन्नपूगं; 'bad action,' दुष्कर्म *n.* (न्), कुकर्म *n.*, पापकर्म *n.*, अपकर्म *n.*, अकर्म *n.*, दुष्कृतं, दुष्कृतिः *f.*, असत्कर्म *n.*, कुकृत्यं; 'heinous sin,' महापातकं, महापापं, अतिपातकं, अनुपातकं; 'the five heinous sins,' पञ्चमहापातकानि *m. pl.*; these are, 1. Killing a Brahman, ब्रह्महत्या, ब्राह्मणवधः. 2. Stealing gold, सुवर्णस्तेयं. 3. Drinking spirituous liquors, सुरापानं. 4. Intercourse with the wife of a Guru, गुरुतल्पगमनं. 5. Associating with any one guilty of these crimes, तत्संसर्गः; 'secret sins,' प्रच्छन्नपातकानि *n. pl.*, गुप्तपातकानि *n. pl.*; 'awful sin,' अघोरपातकं, अघोरपापं, घोरपापं; 'freed from sin,' पापमुक्तः -क्ता -क्तं; 'restraining sin,' पापविनिग्रहः; 'involved in the consequences of sin,' पापगोचरः -रा -रं; 'equal in sin,' पापसम्मितः -ता -तं; 'a personification of the five heinous sins, or a male whose head is Brahmanicide, whose arms are theft, whose heart is wine-drinking, &c.,' पापपुरुषः.

To SIN, *v. n.* पापं कृ, पातकं कृ, पापकर्म कृ, अपराधं कृ, दोषं कृ, अपराध् (c. 4. -राध्यति, c. 5. राध्नोति -राद्धुं), दुष् (c. 4. दुष्यति, दोषितुं), दुष्कृतं कृ, मन्तु (nom. मन्तूयते).

SINCE, *prep.* or *adv.* (After, from the time that) expressed by the abl. c., either alone or followed by प्रभृति or आरभ्य or अवधि or sometimes preceded by आ; as, 'since childhood,' बाल्यात् or बाल्यतः or बाल्यात् प्रभृति or आबाल्यात्, शैशवात्प्रभृति; 'ever since one's birth,' जन्मतः प्रभृति or जन्मत आरभ्य or आजन्मतः; 'ever since I saw him,' प्रथमदर्शनक्षणात् प्रभृति, or यतः प्रभृति स मे दर्शनपथं गतः (followed by ततः प्रभृति); 'since the time of Vena,' वेणकालात्प्रभृति. The crude form may sometimes be used with the above words in this sense; as, 'since birth,' जन्मप्रभृति or जन्मारभ्य or जन्मावधि. —(Ago, in past time) पुरा, पूर्वं, गतकाले, अतीतकाले, पूर्वकाले, पुरस्तात्.—(Because that, seeing that) यस्मात्, येन, यतस्, यत्, हि, often expressed by the abl. c. of the abstract affix त्वं, or the instr. c. of the affix ता; as, 'since it was founded on observation,' प्रत्यक्षमूलत्वात्, प्रत्यक्षमूलतया.

SINCERE, *a.* (Said of things or persons) सरलः -ला -लं, आर्जिकः -की -कं, ताक्षिकः -की -कं, ताक्षिकः &c., सत्यः -त्या -त्यं, दक्षिणः -णा -णं, निर्व्याजः -जा -जं, निर्व्यलीकः -का -कं, अमायिकः -की -कं, अमायी -यिनी -यि (न्), अमायः -या -यं, मायाहीनः -ना -नं, निष्कपटः -टा -टं, अकपटः -टा -टं, अकृत्रिमः -मा -मं, अकल्पितः -ता -तं, दम्भरहितः -ता -तं, ऋजुः -जुः -जु, अजिह्मः -ह्मा -ह्मं, अवक्रः -क्रा -क्रं, शुद्धः -द्धा -द्धं, पूतः -ता -तं, वास्तविकः -की -कं, वास्तवः -वी -वं, यथार्थः -र्था -र्थं, निष्कपटः -टा -टं.—(Said of persons only) सत्यवादी -दिनी -दि (न्), सत्यवाक् *m. f. n.* (च्), सत्यशीलः -ला -लं, शुद्धमतिः -तिः -ति, शुद्धभावः -वा -वं, विमलात्मा -त्मा -त्म (न्), अशठधीः -धीः -धि, उदारः -रा -रं, सत्यव्रतः -ता -तं, शुचिः -चिः -चि, निशठः -ठा -ठं.

SINCERELY, *adv.* सरलं, सारल्येन, दाक्षिण्येन, निर्व्यलीकं, निर्व्याजं, अमायया, सत्यं, मनःपूर्वं, हृदयपूर्वं.

SINCERITY, SINCERENESS, *s.* सरलता, सारल्यं, दाक्षिण्यं, सत्यव्रता, निर्व्यलीकता, अमाया, अमायिकत्वं, मायाहीनता, अकृत्रिमता, अकल्पितत्वं, निष्कपटत्वं, अकापट्यं, निष्कापट्यं, ऋजुता, आर्जवं, शुद्धता, वास्तविकता, यथार्थता, सत्यवादित्वं, सत्यशीलता, मतिशुद्धता, उदारता, विमलता, शुचिता, अनन्यभावः.

SINCIPUT, *s.* (Front of the head) मस्तकाग्रभागः, शिरोग्रभागः.

SIN-DESTROYING, *a.* पापनाशी -शिनी -शि (न्), पापनाशकः -का -कं, पापघ्नः -घ्नी -घ्नं, अघघ्नः &c., अघमलापहः -हा -हं, अघमर्षणः -णा -णं, पापशमनः &c.

SINE, *s.* (Of an arc in geometry) ज्या, ज्जिया; 'versed sine,' इषुः *m. f.*, शरः.

SINECURE, *s.* वेतनयुक्तो निष्कर्मकाधिकारः or कर्मशून्याधिकारः.

SINEW, *s.* स्नायुः *m. f.*, स्नसा, स्नावः, सिरा, शिरा, सन्धिबन्धनं, स्नायुश्चेतांशः, वहीरूः *m.*, रसालसा.—(Sinews, strength) बलं, शक्तिः *f.*, मुख्यसाधनं.

SINEWY, *a.* स्नायुमयः -यी -यं, शिरालः -ला -लं. *See* NERVOUS.

SINFUL, *a.* (Said of persons) पापी -पिनी -पि (न्), पापकर्मा -र्मा -र्म्मा (न्), कुकर्मा &c., दुष्कर्मा &c., दुष्कृती &c., पापकारी -रिणी &c., पापकृत् -त्री -त् (त्), पापकरः -री -रं, पापकृत् *m. f. n.*, कुकर्मकृत्, कुकर्मकारी &c., दुष्कृतकर्मा &c., पापकर्मी -र्मिणी &c., अपराधी &c., एनस्वी &c., किल्बिषी &c., पातकी &c., कल्मषी &c., कृत्सितकर्मा &c., पापाशयः -या -यं, पापपरायणः -णा -णं, पापनिरतः -ता -तं, पापात्मकः -का -कं, पापात्मा -त्मा -त्म (न्), पापबुद्धिः -द्धिः -द्धि, पापमतिः -तिः -ति, मन्दकारी &c., दुष्टकारी &c., असती -तिनी &c., अधर्मचारी &c., दुरितः -ता -तं, *see* WICKED; 'very sinful,' पापिष्ठः -ष्ठा -ष्ठं, पापीयान् -यसी -यः (स्), अतिपापी &c.—(Containing sin, said of things) पाप in comp., पापी &c., पापवान् -वती -वत् (त्), दुष्टः -ष्टा -ष्टं, धर्मविरुद्धः -द्धा -द्धं, अघवान् &c., अघमयः -यी -यं, कलुषः -षा -षं, कल्की &c., कल्कः -ल्का -ल्कं, प्रत्यवायी &c.; 'sinful actions,' पापकर्माणि *n. pl.*

SINFULLY, *adv.* पापवत्, सपापं, दुष्टवत्, दुर्जनवत्, सपातकं.

SINFULNESS, *s.* पापं, पापिष्ठता, पापबुद्धिः *f.*, सपापता, पापनिरतिः *f.*, पापवर्त्म, दुष्टता, शठता, शाठ्यं, धर्मविरुद्धता, प्रत्यवायः. *See* WICKEDNESS.

To SING, *v. n.* गै (c. 1. गायति, गातुं), अनुगै, अभिगै, प्रगै, निगै, परिगै, उद्गै, गायनं कृ, गानं कृ.—(As birds, &c.) रु (c. 2. रौति, रवितुं), कल् (c. 10. कलयति -यितुं), कलं रु, वाश् (c. 4. वाश्यते -शितुं), वाशितं कृ.—(Make a humming sound) रणरणशब्दं कृ.

To SING, *v. a.* गै (c. 1. गायति, गातुं); 'to sing an air,' कलं गै; 'a song,' गीतं गै; 'a poem,' काव्यं गै.—(Celebrate in song) उपगै, परिगै, अभिप्रगै, गानेन कृत्, *see* CELEBRATE, CELEBRATED.

To SINGE, *v. a.* वाससो दहं (c. 1. दहति, दग्धुं), वह्निभागे दह्, ईषद् दह्, अग्निना स्पृश्, अग्निस्पृष्टं -ष्टां कृ. *See To* SCORCH.

SINGED, *p. p.* वाससो दग्धः -ग्धा -ग्धं, वह्निदग्धः &c., अग्निस्पृष्टः -ष्टा -ष्टं.

SINGER, *s.* गायकः, गाता *m.* (तृ), गायनः, गातुः *m.*, गाथिकः, गाथकः, गाथाकारः, गेष्णुः *m.*, गेयः, उद्गाता *m.*; 'female singer,' गायी, गायकी, गायनी, उद्गात्री.

SINGING, *s.* गायनं, गानं, गीतिः *f.*, गीतं, स्वरयुक्तवाक्योच्चारणं.—(Of birds, &c.) रुतं, पक्षिरुतं, रावः, पक्षिरावः, वाशितं, वाशनं, मधुरहतं, कलः, कलकलः, कलरवः, कलनं. *See* MURMUR.

SINGING, *part.* गायन् -यती -यत् (त्), प्रगायन् &c.

SINGING-MASTER, *s.* गानशिक्षकः, गानविद्याशिक्षकः, गीतोपदेशकः.

SINGLE, *a.* (One, consisting of one only) एकः -का -कं, अद्वितीयः -या -यं, केवलः -ला -ली -लं, एककः -का -कं; 'a single inflection,' एकपदं.—(Sole, alone) एकाकी -किनी -कि (न्), केवलः -ला -ली -लं, केवली &c., एकः -का -कं, अद्वितीयः -या -यं, असहायः -या -यी.—(Not double) अद्वैधः -धी -धं, अद्विकः -का -कं, अद्विगुणः -णा -णं, अद्वितीयः -या -यं.—(Distinct, individual) भिन्नः -न्ना -न्नं, व्यक्तः -क्ता -क्तं, अव्यापकः -का -कं, अविभक्तः &c., *see* PARTICULAR.—(Pure, simple) शुद्धः -द्धा -द्धं, *see* SIMPLE.—(Unmarried) अविवाहितः -ता, अनूढः -ढा, निःसङ्गः -ङ्गा.

To SINGLE, *v. a.* उद्धृ (c. 1. -हरति -हर्तुं, rt. हृ), उद्धृ, उद्धृह्, *see To* SELECT.

SINGLE-BODIED, *a.* एकदेहः -हा -हं, एकशरीरः -रा -रं, एकाङ्गः &c.

SINGLE-COMBAT, *s.* द्वन्द्वयुद्धं, द्वयोर्युद्धं, द्वन्द्वं, निर्युद्धं.

SINGLE-EYED, *a.* एकाक्षः -क्षी -क्षं, एकलोचनः -ना -नं, एकलक्षी -क्षिणी &c.

SINGLE-HANDED, *a.* असहायः -या -यं, स्ववाहुसहायः &c., एकाकी &c.

SINGLE-HEARTED, *a* एकचित्तः -त्ता -त्तं, अनन्यवृत्तिः -त्तिः -त्ति.

SINGLE-HOOFED, *a.* एकशफः -फा -फं, एकखुरः -रा -रं, एकखुरी -रिणी &c.

SINGLE-MINDED, *a.* शुद्धमतिः -तिः -ति. *See* SIMPLE, SIMPLE-MINDED.

SINGLENESS, *s.* (State of being one, or distinct from all others) एकता. ऐक्यं, केवलत्वं, कैवल्यं, अद्वितीयता, अद्वैधता, भिन्नता.—(Simplicity, sincerity) शुद्धता, अनन्यता, अनन्यभावः; 'of heart,' मतिशुद्धता.

SINGLE-STICK, *s.* (Cudgel) यष्टिः *m.*, दण्डः, वेत्रं, द्विदण्डि indec.; 'fighting with single-stick,' द्विदण्डिप्रहरणं, द्विभुजयष्टिप्रहरणं.

SINGLY, *adv.* (Individually, one by one) प्रत्येकं, एकशस्, एकैकशस्, एकतस्, एकैकं, पृथक्, पृथक् पृथक्.—(Alone, without companions) असहायतस्, अद्वितीयतस्, एकतस्.

SINGULAR, *a.* (Single) एकः -का -कं, *see* SINGLE.—(Existing by itself, unexampled) अद्वितीयः -या -यं, अनुपमः -मा -मं, अप्रतिमः -मा -मं, अपूर्वः -र्वा -र्वं, असदृशः -शी -शं, अनन्यसाधारणः -णा -णी -णं, अनन्यसामान्यः -न्या -न्यं, अपूर्वप्रतिमः -मा -मं, अपूर्वप्रमाणः -णा -णं, एकमात्रः -त्रा -त्रं.—(Not common, odd) असाधारणः -णा -णी -णं, असामान्यः -न्या -न्यं, असकृतः -ता -तं, विलक्षणः -णा -णं, अप्रसिद्धः -द्धा -द्धं, अपरूपः -पा -पं, अद्भुतः -ता -तं, लोकबाह्यः -ह्या -ह्यं, अलौकिकः -की -कं, लोकोत्तरः -रा -रं.—(The singular number) एकवचनं.

SINGULARITY, *s.* असाधारणता, अद्वितीयता, अप्रतिमता, अनुपमता, असदृशता, असादृश्यं, अपूर्वता, असामान्यता, अनन्यसाधारणता, विलक्षणता, वैलक्षण्यं, असकृत्त्वं, असकृतिः *f.*, अपरूपता, अद्भुतता, एकता.

SINGULARLY, *adv.* अपूर्ववत्, अपूर्वं, असकृत्, विलक्षणं, सवैलक्षण्यं, असाधारण्येन, असामान्येन, अद्भुतं, विशेषतस्.

SINISTER, *a.* (Not honest, crooked) असरलः -ला -लं, वक्रः -क्रा -क्रं, अनृजुः -जुः -जु, कुटिलः -ला -लं, वामः -मा -मं, वृजिनः -ना -नं.—(Inauspicious) अमङ्गलः -ला -लं, अकल्याणः -णा -णं, अमङ्गलसूचकः -का -कं.—(Left), *see* the word.

SINISTRALLY, *adv.* वामत्वेन, सव्यत्वेन, वामदिशि, वामदिशं प्रति.

SINISTROUS, *a.* वामस्थः -स्था -स्थं, सव्यस्थः &c., वामवर्ती -र्तिनी &c.

To SINK, *v. n.* सद् (c. 6. सीदति, सत्तुं), अवसद्, विषद्, व्यवसद्, उत्सद्, संसद्, अधोगम् (c. 1. -गच्छति -गन्तुं), अधो या (c. 2. याति -तुं), अधःपत् (c. 1. पतति -तितुं), अवपत्, पद्.—(In water) मज्ज् (c. 6. मज्जति, मङ्क्तुं), निमज्ज्, जलमग्नः -ग्ना -ग्नं भू.—(In the mud) पङ्के सद् or पद्.—(In difficulties) कृच्छ्रे सद्, आपदि सद्.—(With fear) भयात् सद् or विषद्.—(Decline) अस्तं गम्, क्षि in pass. (क्षीयते), भ्रंस्, *see To* FAIL.

To SINK, *v. a.* (Cause to sink) अवसद् (c. 10. -सादयति -यितुं), व्यवसद्, सद्, मज्ज् (c. 10. मज्जयति -यितुं), अधोगम् in caus. (-गमयति -यितुं).

SINK, *s.* (Drain) जलनिर्गमः, जलसारणी, गुप्तनाली, गुप्तिः *f.*

SINKING, *part.* सीदन् -दती -दत् (त्), अवसीदन् &c., मज्जन् -ज्जती -ज्जत् (त्), निमज्जन् &c., निमग्नः -ग्ना -ग्नं.

SINLESS, *a.* निष्पापः -पा -पं, अपापः -पा -पं, पापहीनः -ना -नं, पापरहितः -ता -तं, अकल्मषः -षा -षं, निष्कल्मषः &c., अनघः -घा -घं, अकिल्बिषः -षा -षं, वीतकल्मषः &c., अनेनाः -नाः -नः (स्), निरागाः &c., अकल्कः -ल्का -ल्कं, निर्दोषः -षा -षं, निरपराधः -धा -धं, निष्कलङ्कः -ङ्का -ङ्कं, अनमीवः -वा -वं.

SINLESSNESS, *s.* निष्पापता, अपापता, पापहीनता, पापाभावः.

SINNER, *s.* पापी *m.* (न्), पापजनः, पापकारी, पापकृत् *m.*, पापात्मा *m.* (न्), पापकर्मा *m.* (न्), एनस्वी *m.* (न्), व्यसनी *m.*, अपुण्यकर्मा *m.* (र्मन्), अपुण्यकृत् *m.*, अघोनः, *see* SINFUL; 'an atrocious sinner,' महापातकी *m.* (न्), अतिपातकी *m.*, महापापी *m.*, अतिपापी *m.*, पापमूर्तिः *m.*, पापनिधिः *m.*, पापस्वरूपः, पापराशिः *m.*, पापपुरुषः.

SIN-OFFERING, *s.* पापघ्नकर्म, पापनाशकप्रायश्चित्तं, पापघ्नकबलिः *m.*

SINUOSITY, *s.* वक्रता, वक्रिमा *m.* (न्), कुटिलता, जिह्मता, कौटिल्यं.

SINUOUS, *a.* वक्रः -क्रा -क्रं, कुटिलः -ला -लं. *See* WINDING, *a.*

SINUS, *s.* (In surgery) नाडिः -डी *f.*, नाडीव्रणं -णः, नालिः -ली, नालीव्रणं -णः, नालीक्षतं, गतिः *f.*, अवटः -टिः *m.*

To SIP, *v. a.* (Drink in small quantities) अल्पाल्पशस् or अल्पाल्पं पा (c. 1. पिबति, पातुं) or आपा, अल्पशो निपा or चम् (c. 1. चमति -मितुं), ईषत्पानं कृ, आचम् (c. 1. -चामति -मितुं), उपस्पृश् (c. 6.

-स्पृशति -स्प्रष्टुं). The last two words are used especially with reference to sipping water before meals and religious ceremonies from the palm of the hand, and ejecting it again.

Sip, sipping, *s.* ईषत्पानं, अल्पशः पानं, अल्पशो निपानं, ईषन्निपानं, आचमनं, उपस्पर्शः, मुखिप्रथमीः *f.*, ओष्ठनिपानं, ओष्ठपानं.

Siphon, *s.* कुक्कुटनाडीयन्त्रं, नाडीयन्त्रं, नालीयन्त्रं, वक्रनाडी.

Sipped, *p. p.* अल्पाल्पशः पीतः -ता -तं, अल्पशो निपीतः -ता -तं.

Sir, *s.* आर्यः, महाशयः, महानुभावः, महेच्छः, महाजनः, सुजनः, श्री prefixed; 'O sir,' आर्य. As an address of respect, 'Sir' may often be expressed in Sanskrit by भवान् with the 3d pers. of the verb; as, 'enter, Sir,' प्रविशतु भवान्.

Sire, *s.* (Word of address to a king) देव voc. c., श्रीमद्देव, महाराज, राजन्, आयुष्मन्.—(Father) जनकः, जननः, जविता *m.* (तृ).

Siren, *s.* मोहिनी, मोहकारिणी, मायिनी, मायाकारिणी, चित्तमोहिनी.

Sirius, *s.* (Dog-star) लुब्धकः.

Sirloin, *s.* (Of beef) गोपार्श्वमांसं, गोपार्श्वः.

Sirname, *s.* उपनाम *n.* (न्), पद्धतिः -ती *f.* *See* Surname.

Sirrah, *s.* (Reproachful address) अरे, अरेरे, रे, रै, अवे.

Sirup, *s.* इक्षुरसः, स्वादुरसः, मधुरसः, मधुररसः, मधुरं, लेह्यं.

Sirupy, *a.* इक्षुरसमयः -यी -यं. स्वादुरसमयः &c., मधुरः -रा -रं.

Sister, *s.* स्वसा *f.* (सृ *nom. pl.* स्वसारः), भगिनी, भगिनीका, भग्नी, स्वयोनिः *f.*, जामिः -मी, यामिः -मी; 'elder sister,' अग्रजा; 'younger sister,' अवरजा; 'sister's husband,' भगिनीपतिः *m.*, स्वसृपतिः; 'sister's son,' भागिनेयः, स्वसीयः, स्वस्रियः, स्वस्रेयः; 'sister's daughter,' भागिनेया, स्वसीया, स्वस्रिया, स्वस्रेयी.—(Woman of the same faith) धर्मभगिनी.

Sister-in-law, *s.* (Husband's sister) ननान्दा *f.* (न्दृ), ननन्दा *f.* (न्दृ), नन्दा, पतिस्वसा *f.* (सृ), पत्युः स्वसा *f.*—(Wife's sister) श्यालकी, श्यालकी, श्यालिका, जायाभगिनी, पत्नीस्वसा *f.*—(Brother's wife) भ्रातृजाया, भ्रातृपत्नी, भ्रातृभार्या, प्रजावती.

Sisterhood, *s.* (State of a sister) भगिनीत्वं, स्वसृत्वं.—(Community of sisters or women) स्वसृगणः, भगिनीगणः, स्वसृमण्डली, स्वसृसमूहः, स्त्रीगणः.

Sisterly, *a.* स्वसृयोग्यः -ग्या -ग्यं, भगिनीयोग्यः &c., स्वसीयः -या -यं.

To sit, *v. n.* उपविश् (c. 6. -विशति -वेष्टुं), समुपविश्, उपोपविश्, उपवेशं कृ, उपवेशनं कृ, आस् (c. 2. आस्ते -सितुं), अध्यास्, समास्, सद् (c. 1. सीदति, सत्तुं), निषद् with loc. or acc. c.; as, 'he sits down on a chair,' पीठे or पीठम् उपविशति; 'on a seat offered,' दत्तासनम् उपविशति.—(Sit by the side of) उपास्, अन्वास्.—(Sit idle) उदास्.—(Incubate) नीडं निली (c. 4. -लीयते -लेतुं), नीडनिलायं कृ, अण्डोपरि उपविश्.—(Press on, bear on) उपस्था, समुपस्था, आक्रम्, पीड्.—(As an assembly) कार्यमिषेाहं कृ.

Sítá, *s.* (The wife of Rámachandra, and daughter of Janaka, the king of Mithilá. She is called 'earth-born,' as having been turned up from the soil by a plough, as Janaka was ploughing a spot to prepare for a sacrifice) सीता, धरणीसुता, भूमिसम्भवा, भूमिजा, भूपुत्री, जनकात्मजा, जनकसुता, जनकतनया.

Site, *s.* स्थानं, स्थलं, पदं, आस्पदं, स्थितिः *f.*, भूमिः *f.*, पदविः -वी *f.*, प्रतिष्ठा -ष्ठानं, धानी, विन्यासः, गाधः.—(Of a house) वास्तुः *m.*,

वास्तु *n.*, गृहभूमिः *f.*, वेश्मभूः *f.*, गृहपोतकः, गृहपोटः, पोटः, पोतः -तकः, कुट्टिमं, वाटिका; 'ceremony of purification, &c., of a site,' स्थलशुद्धिः *f.*, वास्तुसंशमनं, वास्तुसंशमनीयं.

Sitting, *s.* (The act) उपवेशः -शनं, आसना -नं, अध्यासः -सनं -ना, आस्था.—(A seat) आसनं.

Sitting, *part.* आसीनः -ना -नं, अध्यासीनः &c., उपविष्टः -ष्टा -ष्टं, निषीदन् -दती -दत् (त्); 'on a seat,' आसनोपविष्टः &c.

Situated, situate, *a.* (Placed or standing with regard to any other object) स्थः स्था स्थं, स्थितः -ता -तं, अवस्थितः &c., संस्थः -स्था -स्थं, संस्थितः -ता -तं, दिश्यः -श्या -श्यं; 'situated near,' समीपस्थः &c., समीपस्थितः &c.; 'situated to the south,' दक्षिणस्थः -स्था -स्थं, दक्षिणदिश्यः &c.; 'towards the east,' पूर्वस्थः &c., पूर्वदिश्यः &c.; 'well situated,' सुस्थितः -ता -तं, सुसंस्थितः &c.; 'pleasantly situated,' सौवास्तवः -वी -वं.—(With regard to men or things) स्थः स्था -स्थं, स्थितः -ता -तं, अवस्थ in comp., अवस्थाप्राप्तः -प्ता -प्तं, अवस्थापन्नः -न्ना -न्नं; 'well situated,' सुस्थः &c., सुस्थितः &c.; 'so situated,' तदवस्थः -स्था -स्थं; 'how situated?' किमवस्थः -स्था -स्थं; 'badly situated,' दुःस्थितः -ता -तं, दुःस्थः &c.

Situation, *s.* (Place, position) स्थानं, स्थितिः *f.*, अवस्थितिः *f.*, अवस्थानं, आस्पदं, पदं, पदविः -वी *f.*—(State, circumstances) अवस्था, दशा, स्थितिः *f.*, संस्थितिः *f.*, भावः, वृत्तिः *f.*, आस्पदं, पदं; 'disgraceful situation,' परिभवास्पदं, परिभवपदं.—(Office, post) पदं, पदविः -वी, अधिकारः, स्थानं, स्थलं, नियोगः, व्यापारः.

Śiva, *s.* A celebrated Hindú God, the Destroyer of Creation, and therefore the most formidable of the Hindú Triad. He also personifies reproduction, since the Hindú philosophy excludes the idea of total annihilation without subsequent regeneration. Hence he is sometimes confounded with Brahmá, the Creator, or first person of the Triad. He is the particular god of the Tántrikas, or followers of the books called Tantras. His worshippers are termed Śaivas, and although not so numerous as the Vaishnavas, exalt their god to the highest place in the heavens, and combine in him many of the attributes which properly belong to the other deities. According to them Śiva is Time, Justice, Fire, Water, the Sun, the Destroyer and Creator. As presiding over generation, his type is the Linga, or Phallus, the origin probably of the Phallic emblem of Egypt and Greece. As the god of generation and of justice, which latter character he shares with the god Yama, he is represented riding a white bull. His own colour, as well as that of the bull, is generally white, referring probably to the unsullied purity of Justice. His throat is dark blue; his hair of a light reddish colour, and thickly matted together, and gathered above his head like the hair of an ascetic. He is sometimes seen with two hands, sometimes with four, eight, or ten, and with five faces. He has three eyes, one being in the centre of his forehead, pointing up and down. These are said to denote his view of the

three divisions of time, past, present, and future. He holds a trident in his hand to denote, as some say, his relationship to water, or according to others, to show that the three great attributes of Creator, Destroyer, and Regenerator are combined in him. His loins are enveloped in a tiger's skin. In his character of Time, he not only presides over its extinction, but also its astronomical regulation. A crescent or half-moon on his forehead indicates the measure of time by the phases of the moon; a serpent forms one of his necklaces to denote the measure of time by years, and a second necklace of human skulls marks the lapse and revolution of ages, and the extinction and succession of the generations of mankind. He is often represented as entirely covered with serpents, which are the emblems of immortality. They are bound in his hair, round his neck, wrists, waist, arms, and legs; they serve as rings for his fingers, and earrings for his ears, and are his constant companions. Śiva has more than a thousand names, which are detailed at length in the sixty-ninth chapter of the Śiva Purána. The following list of the principal of these will give the best idea of his character and attributes. (The Auspicious one) शिवः, शम्भुः *m.*, शङ्करः, सदाशिवः, शंभवान् *m.* (न्), भवः, भगः.—(The great god or lord) महादेवः, ईश्वरः, महेश्वरः, महेशः, ईशः, ईशानः, नाथः, देवः.—(Lord of the universe, as worshipped at Benares) विश्वेश्वरः, विश्वेशः, विश्वनाथः, महेश्वरः.—(Lord of the earth) भूतेश्वरः.—(The seizer) हरः, हरकः, हरिः *m.*—(The Destroyer, a personification of Time that destroys all things) कालः, महाकालः, कालहरः, कालजरः.—(The Reproducer, the Conqueror of Death and cause of life and being) भवः, मृत्युञ्जयः, मृत्युहरणः, चन्द्रमौलिः *m.*, भूतात्मा *m.* (न्), भः, भवः *m.*—(Disperser of the tears of mortals) रुद्रः.—(The terrific or tremendous one) भैरवः, घोरः, भीमः, भीष्मः, भीमः.—(The fierce one) उग्रः, चण्डः.—(Blue-throat, having a dark blue and beautiful throat, so stained by the acrimony of the poison, which he swallowed on its production at the churning of the ocean; *see* Ocean) नीलकण्ठः, हालाहलः, नीलग्रीवः, शितिकण्ठः, कालकण्ठः, श्रीकण्ठः, नीललोहितः.—(Tri-ocular, having three eyes) त्रिलोचनः, त्रिनेत्रः, त्रिदृक् *m.* (श्), त्रिनयनः, त्र्यक्षः.—(Having deformed or unnatural eyes) विरूपाक्षः.—(Moon-crested, having a crescent on his brow) चन्द्रमौलिः *m.*, चन्द्रशेखरः, शशिशेखरः, इन्दुभृत्, चन्द्रचूडः, शशिधरः, चन्द्रधरः, सोमः.—(Borne on, or accompanied by the Bull which personifies Justice) वृषवाहनः, वृषध्वजः, वृषकेतनः, वृषाकपिः, वृषभगतिः *m.*, वृषपतिः *m.*, वृषभाङ्कः *m.* (न्), वृषाङ्कः, वृषाकरः, वृषाकरः.—(Having matted or braided hair) धूर्जटिः *m.*, जटाधरः, जटाधारी *m.* (न्), जटिलः, जटाजूटः, जटाशिखः, जटिली *m.* (न्), जटिः.—(Having sky-coloured hair) नीलकेशी *m.* (न्), नीलकेशः.—(Trident-bearer) शूली *m.* (न्), त्रिशूली *m.*, शूलधरः, त्रिशाखी *m.*—(Lord of animals or cattle) पशुपतिः *m.*, गोपतिः, गोरक्षः, गोपालकः.—(Lord of spirits) भूतेशः, भूतनाथः, भूतः.—(Bearer of the Ganges, this river having on its descent from heaven alighted on his head, and thence descended upon earth, through a chasm in the Himálaya mountains called Gomukha) गङ्गाधरः.—(Clothed with a tiger's skin) कृत्तिवासाः *m.* (स्), कृत्तिवासः.—(Bound or covered with snakes) अहिभृत्.—(Having a necklace of human skulls) कपालभृत्, कपाली *m.* (न्), अस्थिमाली *m.*, मुण्डमालिमाली *m.*, अस्थिधन्वा *m.* (न्), भगाली *m.*—(The white one or yellowish white) शुभ्रः, गौरः, हरिणः.—(Conqueror and Destroyer of the district and king of Tripura) त्रिपुरारिः, त्रिपुरसूदनः, त्रिपुरहरः, त्रिपुरान्तकः.—(Presiding over the three Vedas, or the three letters of the mystical syllable *om*) त्रयक्षरः.—(He of whom one form is water) जलमूर्तिः *m.*—(The Steadfast) स्थाणुः *m.*—(The Universal) सर्वः.—(The Omnipresent) सर्वगः.—(The Omniscient) सर्वज्ञः.—(The Imperishable) अक्षरः.—(The Five-faced) पञ्चमुखः, पञ्चाननः, पञ्चवक्त्रः, सदाशिवमूर्तिः.—(Scorcher of Cupid, *see* Kámadeva) स्मरहरः, कामशत्रुः *m.* (न्), अनङ्गादुद्भवः, भर्गः.—(Restorer of his body) पराङ्गदः.—(Lord of Kailása, in the Himálayas, the favourite haunt of both Śiva and Kuvera) गिरीशः, गिरिशः, कैलासपतिः *m.* (स्), कैलासनिलयेशः.—(Lord of Benares) काशीनाथः, काशीशः; hence one of the names of Benares is त्रिपुरारातिः, त्रिपुरी.—(Having three residences) त्रिधामा *m.*—(Destroyer of Daksha's sacrifice. That sage having on one occasion made a sacrifice, to which he invited all the gods, excepting his son-in-law Śiva and his daughter Durgá, the latter went unbid, and being received coldly, threw herself into the fire, whence emanated a form of Śiva, who decapitated the sage) दक्षाध्वरध्वंसकृत्, दक्षयज्ञविनाशी *m.* (न्), क्रतुध्वंसी *m.*—(He of whom the seed was cast into Fire) वह्निरेताः *m.* (स्), कृशानुरेताः *m.*—(Teacher of the grihya, or book of domestic rites) गृह्यगुरुः.—(Possessor of the head of Brahmá, having in a dispute cut off one of the heads of that deity) ब्रह्मशिरोभृत्.—(Enemy of the demon Pura) पुरारिः *m.*, पुरद्विष् *m.*—(Enemy of the demon Andhaka) अन्धकरिपुः *m.*—(He who cuts to pieces with his axe) खण्डपरशुः *m.*, खण्डपरशुः *m.*—(Armed with the Khatwánga or Pánsúla) खट्वाङ्गी *m.*, खट्वाङ्गभृत् *m.*, पांशुली *m.*—(Armed with a rope) पाशी *m.*—(Lord of devotion or devotees) योगेशः.—(Lord of gold) हेमेशः.—(Fond of dancing) नाट्यप्रियः.—(The naked one) दिगम्बरः, दिग्वासाः *m.* (स्), नग्नः.—(Covered with sandal powder) गन्धचर्चितः, गन्धुलः.—(Mounted on a dog in his terrific form) श्वगः.—(The perverse) वामः, वामदेवः.—(Husband of Párvatí) पार्वतीनाथः.—(Of Durgá) दुर्गापतिः, दक्षजापतिः.—(Of Gauri) गौरीपतिः.—(Of Umá) उमापतिः.—(Of Bhaváni) भवानीपतिः.—(Lord of the Pramathas, his attendants) प्रमथाधिपः.—(Lord of Nandi, one of his chief attendants) नन्दीशः, नन्दीश्वरः, नन्दिप्रियः.—(Lord of Bhringi, one of his chamberlains) भृङ्गीशः.—(Loved of Vishnu) हरिप्रियः.—(Having Vishnu as his dart,

that deity having served him for a shaft which set the city of Tripura on fire) हरिशरः. Some of his other names, the derivation of which is not very apparent, are the following: नकुलः, अध्यूढः, शिपिविष्टः, श्रिविविष्टः, श्रीरुद्रः, नाथः, मृडः, कुष्करः, वाटः, डः *m.*—(Under the emblem of the Phallus) लिङ्गं; 'a worshipper of him under that type,' लिङ्गी *m.*—(A form of Śiva, half male and half female) अर्द्धनारीशः, अर्द्धनारीनटेश्वरः.—(Inferior manifestations of him, called Bhairavas) असिताङ्गः, रुरुः *m.*, चण्डः, क्रोधः, उन्मत्तः, कपर्दिः, भीषणः, संहरः, नकुलः.—(His wife) पार्वती, दुर्गा, गौरी, उमा, सती, भवानी, *see* PÁRVATÍ; as the symbol of created nature his wife is called प्रकृतिः.—(His sons) कार्त्तिकेयः, गणेशः, *see* KÁRTIKEYA, GANESHA.—(His attendants) प्रमथः, शिवकीर्त्तनः.—(Some of the names of his attendants are) नन्दी *m.*, नन्दिः *m.*, भृङ्गी *m.*, नाडीदेहः, नाडीविग्रहः, नाडीच्छेदः, भृङ्गरिटः, तण्डुः, पशुः.—(His vehicle or bull) वृषः, नन्दी *m.*—(Temple consecrated to his bull) गोपुटिकः.—(His trident) त्रिशूलं, पिनाकः, महितं, पाशुपतास्त्रं.—(His bow) पिनाकः, अजगवं.—(One of his weapons, a staff with transverse pieces, representing the breast-bone and ribs, surmounted by a skull) खट्वाङ्गं, पांशुलः.—(His rope for binding incorrigible offenders) पाशः.—(His musical instrument, a kind of rattle, shaped like an hour-glass, and held in one hand) डमरुः *m.*—(His serpent earrings) नागकुण्डलं.—(His necklace of skulls) अस्थिमाला, मुण्डमाला.—(His matted hair) जटा, जटाजूटः, कपर्दः.—(His superhuman power) विभूतिः *f.*, भूतिः *f.*, *see* SUPERHUMAN, *a.*—(Daitya flayed by him) रुरुः.—(Worshipper of Śiva) शैवः, शैव्यः, शिवज्ञः, पाञ्चार्थिकः. Many plants are sacred to Śiva, as the aśoka, vilva, mango, &c.

SIX, *a.* षट् *m. f. n. pl.* (षष्), षट्संख्यकः -का -कं, षट्कः -ट्का -ट्कं; 'six months,' षण्मासाः *m. pl.*, षण्मासं; 'the six seasons,' षड्ऋतवः *m. pl.*; 'of six months standing,' षाण्मासिकः -की -कं, षण्मास्यः -स्या -स्यं; 'six-fingered,' षडङ्गुलिः -लिः -लि; 'six-angled,' षट्कोणः -णा -णं; 'six-limbed,' षडङ्गः -ङ्गा -ङ्गं; 'six-armed,' षड्भुजः -जा -जं; 'six-faced,' षण्मुखः -खा -खं; 'a yoke of six oxen,' षड्गवं; 'having six feet,' षट्पदः -दा -दं; 'in six ways,' षड्धा; 'the aggregate of six,' षट्कं.

SIX-FOLD, *a.* षड्गुणः -णा -णं, षड्विधः -धा -धं, षट्कः -ट्का -ट्कं.

SIXTEEN, *a.* षोडश *m. f. n. pl.* (न्) षोडशकः -का -कं.

SIXTEENTH, *a.* षोडशः -शी -शं; 'a sixteenth part,' षोडशांशः.

SIXTH, *a.* षष्ठः -ष्ठी -ष्ठं, षष्ठकः -का -कं; 'a sixth part,' षड्भागः, षडंशः; 'a sixth meal,' षष्ठान्नं; 'being or having a sixth,' षष्ठी -ष्ठिनी -ष्ठि (न्).

SIXTHLY, *adv.* षष्ठतस्, षष्ठस्थाने, षष्ठपदे.

SIXTIETH, *a.* षष्टितमः -मी -मं, षष्टः -ष्टी -ष्टं.

SIXTY, *a.* षष्टिः *f.*, षष्टिसंख्यकः -का -कं; 'he reigned sixty years,' षष्टिम् अब्दान् राज्यं चकार; 'sixty-one,' एकषष्टिः; 'sixty-two,' द्वाषष्टिः; 'sixty-three,' त्रयःषष्टिः; 'sixty-four,' चतुःषष्टिः; 'sixty-five,' पञ्चषष्टिः; 'sixty-six,' षट्षष्टिः; 'sixty-seven,' सप्तषष्टिः; 'sixty-eight,' अष्टाषष्टिः; 'sixty-nine,' नवषष्टिः, एकोनसप्ततिः, ऊनसप्ततिः; 'aggregate of sixty,' षष्टिकं; 'bought with sixty,' षष्टिकः -का -कं.

SYMPATHY, *s.* समदुःखत्वं, समदुःखिता, सहदुःखिता -त्वं, समदुःखसुखिता, अन्यदुःखदुःखिता, परदुःखदुःखिता, अन्यदुःखदुःखं, अनुवेदना, कारुण्यं, अनुकम्पा; 'joyful sympathy,' सुखसुखिता, अनुमोदनं.—(Conformity of temperament) आनुगुण्यं, स्वभावसमता, स्वभावानुगुण्यं, समभावः, भावसाम्यं, प्रकृतिसाम्यं, आनुरूप्यं, साधर्म्यं.

SYMPHONIOUS, *a.* समस्वरः -रा -रं, समानस्वरः &c. *See* HARMONIOUS.

SYMPHONY, *s.* स्वरिक्यं, स्वरसमता, तालसमता, स्वरसाम्यं, स्वरमेलनं, तानमेलनं, तानसमनं, *see* HARMONY.—(Air) चर्च्चरी.

SYMPTOM, *s.* लक्षणं, पूर्व्वलक्षणं, चिह्नं, पूर्व्वचिह्नं, वृत्तान्तः, ज्ञानं, आकारः, *see* INDICATION, SIGN; 'of disease,' रोगलक्षणं, लक्षणं, विसूचिका; 'secondary symptom,' अनुलक्षणं.

SYMPTOMATIC, *a.* सूचकः -का -कं, प्रदर्शकः -का -कं, उद्बोधकः &c., बोधकः &c., लाक्षणिकः -की -कं. *See* INDICATIVE.

SYNAGOGUE, *s.* यिहुदीयानां भजनभवनं or पूजामन्दिरं.

SYNCHRONISM, *s.* समकालिकता, कालैक्यं, योगपद्यं, एककालिकता.

To SYNCHRONIZE, *v. n.* एककाले सम्भू or सम्पद्, एकसमये सम्भू, समकाले भू, समकालिकः -का -कं भू or अस्. *See* SIMULTANEOUS.

SYNCHRONOUS, *a.* समकालिकः -की -कं. *See* SIMULTANEOUS.

To SYNCOPATE, *v. a.* मध्याक्षरं लुप् (c. 6. लुम्पति, लोप्तुं), मध्याक्षरलोपं कृ.

SYNCOPE, *s.* (Fainting) मूर्च्छना.—(In grammar) मध्याक्षरलोपः.

SYNECDOCHE, *s.* (Figure in rhetoric) उपलक्षणं.

SYNOD, *s.* धर्म्माध्यक्षसभा, धर्म्मोपदेशकसभा, धर्म्मसभा.

SYNODAL, SYNODICAL, *a.* सभ्यः -भ्या -भ्यं; 'month,' चन्द्रमासः.

SYNONYM, *s.* पर्य्यायः, अपरपर्य्यायः, एकार्थपदं, समानार्थशब्दः, समार्थकशब्दः, तुल्यार्थकशब्दः, उपशब्दः.

SYNONYMOUS, *a.* समानार्थः -र्था -र्थं, एकार्थः &c., एकार्थकः -का -कं, तुल्यार्थकः &c., सहार्थः -र्था -र्थं.

SYNONYMY, *s.* समानार्थत्वं, समार्थत्वं, एकार्थत्वं, तुल्यार्थत्वं.

SYNOPSIS, *s.* ग्रन्थसारात्मकपर्व, सारपर्वक. *See* EPITOME.

SYNTACTICAL, *a.* वाक्यविन्याससम्बन्धी &c., वाक्यरचनाविषयकः -का -कं, पदविन्यासविषयकः &c.; 'syntactical agreement,' अन्वयः.

SYNTAX, *s.* वाक्यविन्यासः, वाक्यरचना, पदविन्यासः, पदरचना, पदयोजना, वाक्ययोजना, पदान्वयः, अन्ययोजना.

SYNTHESIS, *s.* संयोगः, संयोजनं, योगकरणं. *See* COMBINATION.

SYNTHETICAL, *a.* संयोगरूपः -पा -पं, संयोगात्मकः &c., संयोगकारी &c.

SYPHILIS, *s.* उपदंशः, वृषणजक्षूः *f.* *See* LUES VENEREA.

SYPHON, *s.* *See* SIPHON.

SYRINGE, *s.* वस्तिः *m. f.*, नलिका, अग्नःप्रक्षेपणी. *See* SQUIRT.

To SYRINGE, *v. a.* वस्तिद्वारेण जलादि अग्नःप्रक्षिप्, अग्नः शुध्.

SYRUP, *s.* मधुरं, मधु *n.*, इक्षुरसः, इक्षुरसवः, लेहं.

SYSTEM, *s.* (Plan) कल्पना, अनुसन्धानं, *see* SCHEME.—(Method) क्रमः, पर्य्यायः, *see* METHOD.—(Of the body, constitution) शरीरप्रकृतिः *f.*, देहप्रकृतिः *f.*, प्रकृतिः *f.*, भावः, शरीरं.—(Assemblage of parts adjusted into a regular whole) रीतिः *f.*, स्थितिः *f.*, संस्थानं, संस्थितिः *f.*, भागैः, क्रमः.—(Systems of philosophy). These are six, *see* under SCHOOL. The three leading systems are the Nyáya, Vedánta, and Sánkhya.

SYSTEMATIC, SYSTEMATICALLY, *see* METHODICAL, &c.

To SYSTEMATIZE, SYSTEMIZE, *v. a.* *See To* METHODIZE.

SYSTOLE, *s.* (In anatomy) हृत्पिण्डसङ्कोचः.

T.

TABASHEER, *s.* (Manna of the bamboo) वंशक्षीरी, वंशरोचना, वंशलोचना, त्वक्क्षीरा -री, वंशीरी.

TABBY, *a.* चित्रः -त्रा -त्रं, शबलः -ला -लं. *See* BRINDLED.

TABERNACLE, *s.* मण्डपः, दूष्यं, पटमण्डपः. *See* TENT.

TABES, *s.* क्षयः, क्षयरोगः, क्षयपुः *m.*, शरीरशोषणं.

TABLE, *s.* (For holding dishes, &c.) फलकः -कं, भोजनफलकः -कं, भोजनाधारः, भोजनाङ्गनं, मञ्चः -ञ्चकः, भोजनमञ्चः; 'writing table,'

लिखनफलकं, लिपिफलकं, लिपिसज्ञाधारः, लेखसाधनाधारः.—(Persons eating at the same table) सहभोजिनां पंक्तिः f.; 'unworthy of eating at the same table with the good,' सद्भिः सह एकपंक्तिभोजनानर्हः -र्हा -र्हं.—(Of stone, metal, &c., for writing) पट्टः, प्रस्तरः, पत्रं -त्रिका.—(Tabular view) पत्रकं, सारणी, प्रस्तरः, चक्रं, *see* SYNOPSIS; 'table of numbers, figures, &c.,' अङ्कजालं, सारणी, कोष्ठकं.—(Table of contents) अनुक्रमणिका, सूचीपत्रं, सूची -चिका, पत्रपद्धी.

TABLE-CLOTH, *s.* फलकाच्छादनं, फलकावरणं, फलकाच्छादनपटः.

TABLE-LAND, *s.* सानुः -नु *m. n.*, अधित्यका, प्रस्थः, समस्थलं, पर्वतभूमिका, भृगुः *m.*, कटकः, खुः *m.*, खु *n.*

TABLET, *s.* पत्रं, पत्रिका, पत्रकं, पट्टः, फलकः -कं, प्रस्तरः.

To TABOO, *v. a.* उपभोगासेधं कृ, भोगासेधं कृ. *See To* INTERDICT.

TABOR, *s.* मृदङ्गः, पटहः, पणवः, प्रणवः, आंखी. *See* DRUM.

TABULAR, *a.* पत्रस्थः -स्था -स्थं, पत्रकारूढः -ढा -ढं, फलकस्थः &c.

TACIT, *a.* विवक्षितः -ता -तं, अपरिसिद्धः -द्धा -द्धं, ध्वनितः &c., अनिषेधरूपः &c., मानसः -सी -सं; 'tacit consent,' मानसानुज्ञा, मानसं.

TACITLY, *adv.* विवक्षया, अनिषेधेन, मनसा, ध्वनितार्थतस्, तूष्णीं.

TACITURN, *a.* अनालापशीलः -ला -लं, अल्पवादी -दिनी &c., तूष्णींशीलः -ला -लं, कथाविरक्तः -क्ता -क्तं, आलापविमुखः -खा -खं, भाषणविरक्तः &c., परिमितकथः &c., मौनी &c., अनालापः -पा -पं, तूष्णीकः -का -कं. *See* RESERVED.

TACITURNITY, *s.* आलापविरक्तिः *f.*, अनालापशीलता, अनालापः -पिता, मौनित्वं, मौनं, कथाविरक्तिः *f.*, वाग्यामः. *See* RESERVE.

To TACK, *v. a.* (Fasten, attach) अनुबन्ध् (c. 9. -बध्नाति -बन्द्धुं), आबन्ध्, पिनह्, आनह्, *see To* FASTEN, STITCH.

To TACK, *v. n.* नौमार्गं परिवृत् in caus., नौमार्गपरिवर्त्तनं कृ.

TACK, *s.* (Small nail) क्षुद्रकीलः, कीलकः, क्षुद्रशङ्कुः *m.*

TACKING, *s.* नौमार्गपरिवर्त्तनं, नौमार्गपरिवृत्तिः *f.*, नौपथपरिवृत्तिः.

TACKLE, TACKLING, *s.* नौकासज्जा, नौसज्जा, सज्जा. *See* RIGGING.

To TACKLE, *v. a. See To* HARNESS, RIG, SEIZE, LAY HOLD.

TACT, *s.* युक्तिः *f.*, कुशलता, कौशल्यं, विज्ञता, अभिज्ञता. *See* SKILL.

TACTICIAN, *s.* व्यूहरचनकुशलः, व्यूहरचनाभिज्ञः, व्यूहपण्डितः.

TACTICS, *s.* व्यूहरचनविद्या, बलविन्यासविद्या, सैन्यविन्यासविद्या, व्यूहरचना, सैन्यरचना, व्यूहनं.

TACTILE, *a.* स्पर्शनीयः -या -यं, स्पृश्यः -श्या -श्यं. *See* TANGIBLE.

TADPOLE, *s.* भेकशावकः, मण्डूकशावकः, बालमण्डूकः.

TAIL, *s.* पुच्छः -च्छं, लाङ्गूलं, लाङ्गुलं, लङ्गूलं, बालः -ला, बालधिः *m.*, बालहस्तः, लूमं, लोमः, पिच्छः, लङ्गः; 'peacock's tail,' बर्हः -र्हं, पिच्छं, कलापः, मयूरपुच्छं, प्रचलाकः; 'to lift up the tail,' उत्पुच्छ (Nom. उत्पुच्छयते).

TAILED, *a.* पुच्छी -च्छिनी -च्छि (न्), पुच्छवान् -वती -वत् (त्), पिच्छवान् &c., पुच्छान्वितः -ता -तं, लाङ्गूली &c., पिच्छिलः -ला -लं.

TAIL-LESS, *a.* अपुच्छः -च्छा -च्छं, पुच्छहीनः -ना -नं, पुच्छरहितः &c.

TAILOR, *s.* सौचिकः, सूचिकः, सौचिः *m.*, तुन्नवायः, वस्त्रभेदी *m.* (न्), वस्त्रभेदकः, सूचिकर्म्मविद् *m.*

To TAINT, *v. a.* दुष् (c. 10. दूषयति -यितुं), लिप् (c. 6. लिम्पति, लेप्तुं), दोषयुक्तं -क्तां कृ, दूषणं कृ. *See To* CORRUPT, INSPECT, STAIN.

TAINT, *s.* दूषणं, दोषः, कलङ्कः, मलं, लेपः -पनं. *See* STAIN.

TAINTED, *p. p.* दूषितः -ता -तं, लिप्तः -प्ता -प्तं, कलङ्कितः -ता -तं, सकलङ्कः -ङ्का -ङ्कं; 'as meat,' पूतिगन्धिकः -का -कं, दुर्गन्धी -न्धिनी &c.

To TAKE, *v. a.* ग्रह् (c. 9. गृह्णाति -ह्लीते, ग्रहीतुं), प्रतिग्रह्, अभिग्रह्, परिग्रह्, सम्ग्रह्, उपसम्ग्रह्, आदा (c. 3. -ददाति -दत्ते -दातुं), उपादा, लभ् (c. 1. लभते, लब्धुं), उपलभ्, धा (c. 3. धत्ते, धातुं), प्रतीष् (c. 6. -इच्छति -एषितुं), ग्रहणं कृ, आदानं कृ.—(Seize) हृ (c. 1. हरति, हर्त्तुं), धृ (c. 1. धरति, धर्त्तुं), हरणं कृ.—(Captivate), *see* the word.—(Apprehend) ग्रह्, उपलभ्, अवगम्.—(Feel, experience, be affected by) उपहतः -ता -तं भू, अनुभू, उपागम्, उपागम्, विद्.—(Swallow) गॄ, निगॄ, ग्रस्, खाद्, पा.—(Admit) ग्रह्, स्वीकृ, अङ्गीकृ.—(Gain possession of) आप्, प्राप्, अर्ज्, उपार्ज्, लभ्, आसद्, अधिगम्, *see To* GAIN.—(Take possession of) आक्रम् (c. 1. -क्रामति -क्रमितुं), आविश्, समाविश्.—(Require) आकांक्ष्, *see To* REQUIRE.—(Take away) अपनी (c. 1. -नयति -नेतुं), नी, अपहृ, हृ, *see To* REMOVE, *v. a.*—(Take back) प्रत्यादा; 'lead back,' प्रतिनी.—(Take down), *see To* PULL DOWN, DEPRESS, WRITE.—(Take in), *see To* COMPREHEND, CHEAT.—(Take off) अपनी, अवतॄ or उत्तॄ in caus., उत्कृष्, *see To* STRIP, DIVEST, IMITATE.—(Take up), *see To* LIFT, UNDERTAKE, OCCUPY, ENGROSS, COMPRISE.—(Take upon one's self) स्वीकृ, *see To* UNDERTAKE.

Obs. The word 'take' in English has often no equivalent in Sanskrit, but must be rendered by some other form of expression. It may often be expressed by the roots कृ or भू in conjunction with a noun, and is not unfrequently inherent in the verb without being expressed at all, as in the following examples.—(Take aim) लक्षानुज्ञः -क्षा -क्षं भू, लक्षीकृ, अनुसन्धा.—(Take an airing) वायुहेतोः परिक्रम् or विहृ.—(Take breath), *see To* PAUSE, REST.—(Take care, take heed), *see To* HEED.—(Take care of) रक्ष्, *see* under CARE.—(Take a course), *see To* RESORT.—(Take effect) प्रभू, सप्रभावः -वा -वं भू, प्रबलीभू, सफलीभू, *see* EFFICACIOUS.—(Take hold), *see To* SEIZE, HOLD.—(Take in hand), *see To* UNDERTAKE.—(Take leave) आमन्त्र्, आमन्त्रणं कृ, *see* FAREWELL.—(Take notice), *see To* OBSERVE, NOTICE.—(Take pains), *see* under PAIN.—(Take part), *see To* SHARE.—(Take place), *see To* HAPPEN.—(Take root), *see To* ROOT, *v. n.*—(Take to task) निर्भर्त्स्, *see To* REPROVE.—(Take the name) नाम ग्रह्.

To TAKE, *v. n.* (Betake one's self) आश्रि, *see* RECOURSE, RESORT.—(Gain reception, succeed) सिध् (c. 4. सिध्यति, सेद्धुं), सम्पद् (c. 4. -पद्यते -पत्तुं), प्रसिद्धिं प्राप्, प्रसिद्धीभू, लोकप्रसिद्धः -द्धा -द्धं भू.—(Have effect) प्रभू.—(Take after) अनुकृ.

TAKEN, *p. p.* गृहीतः -ता -तं, आदृतः -ता -तं, आप्तः &c., उपात्तः &c.—(Gained) प्राप्तः -प्ता -प्तं, आप्तः &c., लब्धः -ब्धा -ब्धं.—(Taken away) अपनीतः -ता -तं, अपहृतः -ता -तं, हृतः &c., *see* REMOVED.—(Taken down) अवपातितः -ता -तं, पातितः -ता -तं, *see* LOWERED, HUMBLED.—(Taken off, as clothes, &c.) अवतारितः -ता -तं, *see* STRIPPED.—(Captivated) मोहितः -ता -तं, हृतचित्तः -त्ता -त्तं, वशीकृतः &c.; 'let it be taken,' गृह्यतां; 'proper to be taken,' ग्रहणीयः -या -यं, आदेयः -या -यं; 'having taken,' गृहीत्वा, आदाय; 'having taken his bow and arrow,' गृहीतेषुकार्म्मुकः, आदायेषुकार्म्मुकः.

TAKER, *s.* ग्राही *m.* -हिणी *f.* (न्), ग्राहकः -हिका, ग्रहीता *m.* -त्री *f.* (तृ), आदायी *m.* -यिनी *f.*, प्रतिग्रहीता *m.*, हर्त्ता *m.*, हारी *m.*

T ING, *s.* (The act) ग्रहणं, ग्रहः, ग्राहः, प्रतिग्रहणं, प्रतिग्राहः, आदानं, उपादानं, स्वीकरणं, स्वीकारः; 'taking away,' अपनयनं, हरणं, अपहरणं, *see* REMOVAL.

TAKING, *a.* मनोहारी -रिणी &c., हृदयग्राही &c. *See* CAPTIVATING.

TALC, *s.* अभ्रकं, अभ्रं, चमलं, निर्मलं, गिरिजं, गिरिजामलं, मेघजालं, मेघनालं, शुभ्रं, खरपत्रं, अक्षरं, अमरीशं, भृङ्गं; 'calx of it,' अभ्रकभस्म *m.* (न्).

TALE, *s.* कथा, उपाख्यानं, आख्यानं, परिकथा, उदन्तः. *See* STORY.

TALE-BEARER, *s.* कर्णेजपः, कर्णेजपः, उपजापकः, पिशुनः, भेदजनकः.

TALE-BEARING, *s.* पैशुन्यं, पिशुनता, उपजापः, कर्णेजापः, दोषानुवादः.

TALENT, *s.* (Endowment) गुणः.—(Great abilities) बुद्धिवैभवं, बुद्धिकौशलं, धीशक्तिः *f.*, बुद्धिप्रभावः, दाक्षिण्यं, *see* GENIUS.

TALENTED, *a.* गुणी -णिनी -णि (न्), गुणवान् &c. *See* under GENIUS.

TALISMAN, *s.* कवचः -चं, संवदनं -नी, यन्त्रं. *See* AMULET.

To TALK, *v. n.* भाष् (c. 1. भाषते -षितुं), सम्भाष्, वद् (c. 1. वदति -दितुं), संवद्, आलप्, मन्त्र्, कथोपकथनं कृ. *See To* CONVERSE.

TALK, *s.* कथोपकथनं, संवादः, सम्भाषा -षणं, आलापः, कथा, कथाप्रसङ्गः, *see* CONVERSATION; 'small talk,' लघुभाषणं; 'fine talk,' शब्दाडम्बरं; 'mere talk,' वाक्सारं.—(Report) वदन्ती -न्ती *f.*

TALKATIVE, *a.* वाचाटः -टा -टं, वाचनः &c. *See* LOQUACIOUS.

TALKATIVENESS, *s.* वाचाटता, वाचालता. *See* LOQUACIOUSNESS.

TALKER, *s.* वक्ता *m.* (क्तृ), कथकः, भाषी *m.* (न्), आलापी *m.*, वादी *m.*

TALL, *a.* तुङ्गः -ङ्गा -ङ्गं, उत्तुङ्गः &c., प्रांशुः -शुः -शु, उच्चः -च्चा -च्चं, *see* HIGH; 'in stature,' उच्चदेहः -हा -हं, उच्चमूर्त्तिः -र्त्तिः -र्त्ति, दीर्घदेहः -हा -हं, दीर्घमूर्त्तिः &c., दीर्घतनुः -नुः -नु.

TALLNESS, *s.* उच्चता, तुङ्गता, प्रांशुता, उच्चतिः *f.*; 'of stature,' देहदीर्घता, दीर्घदेहत्वं, शरीरदीर्घता, शरीरोच्चता.

TALLOW, *s.* मेषवपा, मेषवसा, गोवपा, गोवसा, गोमेदस् *n.*

TALLOW-CANDLE, *s.* गोवपामयदीपकः, गोवसानिर्म्मितदीपिका.

TALLOW-CHANDLER, *s.* गोवपाविक्रयी *m.* (न्), मेषादिवपाव्यापारी *m.*

TALLY, *To* TALLY. *See* MATCH, *To* MATCH, *v. n.*

TALON, *s.* नखः, नखरः, कररुहः, करजः. *See* CLAW.

TAMARIND, *s.* (The tree) अम्लिका, अम्लीका, आम्लिका, आम्लीका, अम्लफलः, तिन्तिडी, तिन्तिली, तिन्तिडीकः -का -कं, तिन्तिडिका, चिञ्चा, चुक्रा -क्री, गुरुपत्रा, चारिका, चरिका, गुरुपत्रा, चञ्चः.—(The fruit) अम्लफलं.

TAMARISK, TAMARIX, *s.* (Tree) पिचुलः, पिच्चिलः, झावुः *m.*, झावुकः, बहुवन्यिः *m.*, यमदूतका.

TAMBOUR, TAMBOURINE, *s.* मृदङ्गः, पटहः. *See* DRUM.

TAME, *a.* (Not wild) गृह्यः -ह्या -ह्यं, गृहजः -जा -जं, ग्राम्यः -म्या -म्यं, गृहपुष्टः -ष्टा -ष्टं, क्षेमः -मा -मं, अहिंस्रः -स्रा -स्रं, गृह or ग्राम in comp.; 'a tame pigeon,' गृहजपोतकः; 'tame hog,' ग्राम्यशूकरः, ग्रामशूकरः, विड्वराहः.—(Subdued, trained) दान्तः -न्ता -न्तं, दमितः -ता -तं, वशः -शा -शं, अधीनः -ना -नं, शिक्षितः -ता -तं, उपज्ञातः &c.—(Flat, spiritless), *see* the words.

To TAME, *v. a.* दम् (c. 10. दमयति -यितुं), प्रदम्, क्रूरतां शम् (c. 10. शमयति -यितुं), क्रूरताज्ञानिं कृ, क्रूरतानाशं कृ, क्रूरताभङ्गं कृ, वशीकृ, निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अभिग्रह्.

TAMEABLE, *a.* दमनीयः -या -यं, दम्यः -म्या -म्यं, सुदमः -मा -मं.

TAMED, *p. p.* दमितः -ता -तं, दान्तः -न्ता -न्तं, वशीकृतः -ता -तं, वशीभूतः &c., वशङ्गतः &c., ज्ञातः &c., ज्ञातक्रौर्य्यः -र्य्या -र्य्यं.

TAMELY, *adv.* कापुरुषवत्, क्लीबवत्, कातरवत्, सकातर्य्यं.

TAMENESS, *s.* गृह्यता, वश्यता, वश्यत्वं, अहिंस्रता, वशीभूतता.

TAMER, *s.* दमकः, दमी *m.* (न्), दमनकारी *m.* *See* SUBDUER.

TAMING, *s.* दमनं, दमः, दमथः -थं, दमथुः *m.* *See* SUBJUGATION.

To TAMPER, *v. a.* (Meddle), *see To* MEDDLE.—(Practise secretly) कुकर्म्मसम्पादनार्थं गूढव्यवहारं कृ or गूढव्यापारं कृ or गूढसंसर्गं कृ, छलेन व्यापृ in pass. or व्यवह्.

To TAN, *v. a.* (Leather) चर्म्मसन्धानं कृ, चर्म्मपाचनं कृ, दृतिसन्धानं कृ.—(Imbrown) ताम्रीकृ, ताम्रवर्णीकृ, श्यामीकृ.

TAN-PIT, *s.* चर्म्मसन्धानभाण्डं, चर्म्मपाचनभाण्डं, चर्म्मपाचनकुण्डं.

TANGENT, *s.* (In geometry) स्पर्शरेखा, सम्पातरेखा.

TANGIBILITY, *s.* स्पर्शनीयता, स्पृश्यता, स्पर्शवेद्यता.

TANGIBLE, *a.* स्पर्शनीयः -या -यं, स्पृश्यः -श्या -श्यं, संस्पृश्यः &c., स्पृष्टव्यः -व्या -व्यं, स्पर्शयोग्यः &c., स्पर्शार्हः -र्हा -र्हं, स्पर्शवेद्यः &c., सम्पर्कीयः &c.

To TANGLE, TANGLE, &c. *See To* ENTANGLE, ENTANGLEMENT, &c.

TANJORE, *s.* (The country) चोलः, चोलाः *m. pl.*

TANK, *s.* तडागः, जलाधारः, सरोवरः, वेशनः. *See* RESERVOIR.

TANNER, *s.* चर्म्मकारः -री *m.* (न्), चर्म्मारः, चर्म्मसन्धानी *m.*

To TANTALIZE, *v. a.* इष्टवस्तु दर्शयित्वा मनोरथान् जनयित्वा लङ्घ् (c. 10. लङ्घयति -यितुं), आशाः or मनोरथान् जनयित्वा लङ्घ्, स्पृहणीयवस्तु दर्शयित्वा न दा or भग्नाशं -शां कृ or वञ्च् (c. 10. वञ्चयति -यितुं).

TANTALIZED, *p. p.* वञ्चितः -ता -तं, लङ्घितः &c., जाताशः -शा -शं.

TANTALIZING, *a.* आशाजनकः -का -कं, स्पृहाजनकः &c., वञ्चकः &c.

TANTAMOUNT, *a.* समानार्थकः -का -कं, समतूल्यः &c. *See* EQUIVALENT.

TANTRA, *s.* (A religious treatise, generally in the form of a dialogue between Śiva and Durga, teaching peculiar and mystical formulæ for the worship of the deities, or the attainment of superhuman power. These works are very numerous, and their authority in many parts of India seems, in a great measure, to have superseded that of the Vedas) तन्त्रं; 'a follower of the doctrine taught in the Tantras,' तान्त्रिकः.

To TAP, *v. a.* (Strike a gentle blow) लघुप्रहारं कृ, लघ्वाघातं कृ, लघु ग्रह् or आहन्.—(A cask, &c.) सुरादिभाजने छिद्रं कृ, सुरादिस्रावणार्थं भाण्डं छिद्र् (c. 10. छिद्रयति -यितुं).

TAP, *s.* लघुप्रहारः, लघ्वाघातः, ईषदाघातः, ईषत्प्रहारः.

TAPE, *s.* पट्टः, दीर्घपट्टः, बन्धनी, दीर्घबन्धनी, तनुपट्टः.

TAPER, *s.* क्षुद्रदीपः -पकः, क्षुद्रदीपिका, सूक्ष्मदीपिका.

TAPER, *a.* शुण्डाकृतिः -तिः -ति, शुण्डाकारः -रा -रं, शुण्डारूपः &c.

TAPESTRY, *s.* चित्रजवनिका, जवनिका, चित्रयवनिका, यवटी.

TAPE-WORM, *s.* उदरावेष्टः, नाडीकीटः, नाडीजन्तुः *m.*, मीषा.

TAPTÍ, *s.* (A river in India) ताप्ती.

TAR, *s.* सरलद्रवः, सरलरसः, सर्ज्जरसः, अरालः, रालः.

TARDINESS, *s.* मन्दता, मान्द्यं, विलम्बः -म्बनं. *See* SLOWNESS.

TARDY, *a.* मन्दः -न्दा -न्दं. *See* SLOW, DILATORY.

TARE, *s.* कक्षः, शस्यश्लेष्मरुहः कक्षभेदः, वन्यघासः.

TARGET, *s.* वाणलक्ष्यं, शरलक्ष्यं, लक्ष्यं, लक्षं, शरार्थं, *see* BUTT.

TARIFF, *s.* सूचिः -ची *f.*, सूचिपत्रं, अनुक्रमणिका. *See* LIST.

To TARNISH, *v. a.* कलङ्क (nom. कलङ्कयति -यितुं), दुष् in caus., *see To* SOIL.

To TARNISH, *v. n.* मलिनीभू, सकलङ्कीभू, दुष् (c. 4. दुष्यति, दोषितुं).

TARNISHED, *p. p.* मलिनितः -ता -तं, कलङ्कितः &c., दूषितः -ता -तं.

To TARRY, *v. n.* स्था, अवस्था, विलम्ब्, वस्. *See To* STAY, DELAY.

TART, *a.* अम्लः -म्ला -म्लं, शुक्तः -क्ता -क्तं. *See* SOUR, SHARP.

TART, *s.* (Kind of pie) शष्कुली, पिष्टकं.

TARTAR, *s.* (Of the teeth) दन्तमलं, दन्तशर्करा, पुप्पिका, पिप्पिका, दौर्गन्धिकं.

TASK, *s.* कार्य्यं, कर्त्तव्यं, व्रतं, कर्म्म *n.* (न्), भारः; 'to take to task,' निर्भर्त्स् (c. 10. -भर्त्सयति -यितुं), निन्द्, *see To* REPROVE.

To TASK, *v. a.* भारं न्यस् (c. 4. -अस्यति -सितुं), कार्य्ये नियुज्.

TASK-MASTER, *s.* कार्य्यशासकः, कार्य्यकारयिता *m.* (तृ), कर्म्मशासकः.

TASSEL, *s.* शिथिलसूत्रमयं प्रलम्बकाभरणं, प्रलम्बः -म्बकः -कं.

TASTABLE, *a.* प्राशनीयः -या -यं, प्राश्यः &c., आस्वादनीयः &c.

To TASTE, *v. a.* प्राश् (c 9. -अश्नाति -शितुं), आस्वाद् (c. 1. -स्वादति -दितुं), स्वाद्, लिह् (c. 2. लेढि -ढुं), अवलिह्, रसम् आस्वाद्, आस्वादनं कृ, रसास्वादनं कृ, रस् (c. 10. रसयति -यितुं), रसवेदनं कृ, रसबोधं कृ, रसज्ञानं कृ, रसनं कृ.—(Perceive by the taste) स्वादज्ञानं कृ, स्वादबोधनं कृ, स्वादवेदनं कृ.

To TASTE, *v. n.* (Have a taste or flavor) स्वद् (c. 1. स्वादते, स्वदते), सरसः -सा -सं भू or अस्, स्वादयुक्तः -क्ता -क्तं भू or अस्.

TASTE, *s.* (The sensation excited by applying any thing to the tongue or palate) स्वादः, आस्वादः, रसज्ञानं, रसबोधः, रसवेदनं.—(The sense) रसनेन्द्रियं, आस्वादनशक्तिः *f.*, रसनशक्तिः *f.*, रसनं, रुचिः *f.*—(Flavor) रसः, आस्वादः, रुचिः *f.*; 'the six tastes,' षड्रसाः *m. pl.*; these are, 1. sweet, मधुरः; 2. salt, लवणः; 3. pungent, कटुः; 4. bitter, तिक्तः; 5. sour, अम्लः; 6. astringent, कषायः.—(Relish, liking for) रुचिः *f.*, अभिरुचिः *f.*, सन्तोषः; 'that husband was not to her taste,' स पतिः सन्तोषाय तस्या नाभवत्; 'according to taste,' यथारुचि; 'loss of taste,' अरुचिः *f.*, अरोचकं; 'of similar tastes,' समानशीलः -ला -लं.—(Nice perception, faculty of discerning beauty) रसः, रसिकता, रसज्ञता, रसज्ञानं; 'devoid of taste,' अरसिकः -का -कं, अरसज्ञः -ज्ञा -ज्ञं; 'having taste,' रसज्ञः &c., रसिकः &c., सरसः -सा -सं, रसी -सिनी &c.

TASTED, *p. p.* आस्वादितः -ता -तं, स्वादितः &c., प्राशितः &c., ज्ञातरसः -सा -सं, गृहीतरसः &c., रसितः &c., अनुभवरसिकः &c.

TASTELESS, *a.* विरसः -सा -सं, नीरसः &c. *See* INSIPID.

TASTER, *s.* आस्वादी *m.* (न्), रसास्वादी *m.*, प्राशी *m.*, रसी *m.*

TASTING, *s.* आस्वादः -दनं, स्वादनं, प्राशनं, रसनं, लेहनं.

TASTINESS, TASTEFULNESS, *s.* रसिकता, सरसत्वं, सौरस्यं, रोचकता.

TASTY, TASTEFUL, *a.* रसिकः -का -कं, सरसः -सा -सं, सुरसः &c., रसवान् -वती -वत् (त्), रसी -सिनी -सि (न्), रोचकः -का -कं, रुचिरः -रा -रं, रुच्यः -च्या -च्यं, रुचिकरः -रा -रं, रसितः -ता -तं. *See* SAVORY.

TATTER, TATTERED. *See* RAG, RAGGED, RAGAMUFFIN.

To TATTLE, TATTLE, TATTLER. *See To* PRATE, BLAB, &c.

TAUGHT, *p. p.* शिक्षितः -ता -तं, उपदिष्टः -ष्टा -ष्टं, अध्यापितः -ता -तं, पाठितः -ता -तं, ज्ञापितः &c., विज्ञापितः &c., लम्भितः -ता -तं.

To TAUNT, *v. a.* उपालभ् (c. 1. -लभते -लब्धुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आक्षिप्, अधिक्षिप्, परिक्षिप्, तर्ज्, *see To* REVILE.

TAUNT, *s.* आक्षेपः, अवक्षेपः, क्षेपः, उपालम्भः. *See* SARCASM.

TAUNTED, *p. p.* [illegible] -ता -तं, अवक्षिप्तः &c., उपालब्धः -ब्धा -ब्धं.

TAUNTING, TAUNTINGLY. *See* SARCASTIC, SARCASTICALLY.

TAURUS, *s.* (The sign or constellation) वृषः, वृषभः, तावुरिः *m.*

TAUTOLOGY, *s.* पुनरुक्तिः *f.*, पुनरुक्तत्वं, अनुवादः. *See* REPETITION.

TAVERN, *s.* गन्धा, मदिरागृहं, मद्यविक्रयस्थानं, *see* PUBLIC-HOUSE.

TAVERN-KEEPER, TAVERNER, *s.* शौण्डिकः, मद्यविक्रयी *m.* *See* VINTNER.

TAWDRY, *a.* कुशोभनः -ना -नं, मिथ्याशोभायुक्तः &c., मिथ्याशोभनः &c.

TAWNINESS, *s.* पिङ्गलता, कपिलता, पिशङ्गता, तामवर्णता.

TAWNY, *a.* पिङ्गलः -ला -लं, पिङ्गः -ङ्गा -ङ्गं, कपिलः -ला -लं, पिशङ्गः -ङ्गा -ङ्गं, पिशङ्गी -ङ्गिनी -ङ्गि (न्), पिञ्जरः -रा -रं, तामवर्णः -र्णा -र्णं, अरुणः -णा -र्णं, कपिलः -ला -लं, कद्रूः -द्रूः -द्रु, आरुः -रूः -रु, शावः -वी -वं.

TAX, *s.* करः, शुल्कः -ल्कं, राजकरः -रं, कारः, राजस्वं, *see* IMPOST; 'exempt from it,' अकरः -रा -रं.—(Burthen) भारः.

To TAX, *v. a.* कराद् दा in caus. (दापयति -यितुं), करं न्यस् (c. 4. -अस्यति -सितुं), सकरीकृ.—(Impose a burthen) भारं न्यस्.—(Charge, accuse), *see* the words.

TAXABLE, *a.* कराधीनः -ना -नं, शुल्काधीनः -ना -नं, करयोग्यः -ग्या -ग्यं, करदः -दा -दं; 'taxable article,' शुल्कस्थानं.

TAXATION, *s.* करादिन्यासः, करादिव्यवस्थापनं, शुल्कादिस्थापना.

TAXED, *p. p.* सकरः -रा -रं, सशुल्कः -ल्का -ल्कं, करदः -दा -दं.

TAX-GATHERER, *s.* करग्रहः, करग्राही *m.* (न्), शुल्कग्राही *m.*

TEA, *s.* No Sanskrit equivalent, चहा may be used.

TEA-POT, *s.* चहापात्रं, चहाधारः, चहाभाजनं.

To TEACH, *v. a.* उपदिश् (c. 6. -दिशति -देष्टुं), शिष् (c. 10. शिषयति -यितुं), अनुशिष्, अभिशिष्, अधी in caus. (अध्यापयति -यितुं, रा. इ), पठ् in caus., ज्ञाप् &c., *see To* INSTRUCT. Sometimes the causal expresses the sense of 'teach;' as, 'he teaches to dance,' नर्त्तयति; 'he teaches to read,' पाठयति.

TEACHABLE, *a.* शिक्षणीयः -या -यं, शिक्ष्यः -क्ष्या -क्ष्यं. *See* DOCILE.

TEACHABLENESS, *s.* शिक्षणीयता, शिक्ष्यता, सुशिक्ष्यता.

TEACHER, *s.* उपदेशकः, शिक्षकः, अध्यापकः, बोधकः, अवबोधकः, *see* INSTRUCTOR; 'of children,' बालाध्यापकः, *see* PEDAGOGUE.

TEACHING, *s.* उपदेशः, शिक्षा, अध्यापनं. *See* INSTRUCTION.

TEAK, *s.* (Tree) अर्णः, शाकः, शाकाख्यः, करञ्जदः, खरपत्रः, अङ्गारोपमः, हलीनः.

TEAL, *s.* (Kind of duck) कलहंसः, कादम्बं.

TEAM, *s.* (Of horses) रथसंयोजिता अश्वश्रेणी; 'of oxen,' गोश्रेणी.

TEAR, *s.* (Of the eye) अक्षि *n.*, असृ *n.*, अश्रु, अस्रं, वाष्पः, नेत्राम्बु *n.*, नेत्रजलं, नेत्रोदकं, नेत्रजं, नयनाम्बु *n.*, नयनजलं, नयनवारि *n.*, नयनसलिलं, विलोचनाम्बु *n.*, लोचनाम्बु *n.*, रोदनं; 'tear-drop,' वाष्पबिन्दुः *m.*, अश्रुबिन्दुः *m.*, अस्रबिन्दुः *m.*, अश्रुकला; 'starting of tears,' वाष्पोद्भवः; 'flood of tears,' अश्रुधारा, धाराश्रु *n.*; 'flowing of tears,' अश्रुपातः, अश्रुस्रावः; 'tears of affection,' प्रेमाश्रु; 'of joy,' हर्षाश्रु *n.*; 'to shed tears,' अश्रूणि यत् (c. 10. पातयति -यितुं) or स्रु in caus. (स्रावयति -यितुं) or वृत् in caus. (वर्त्तय (nom. वाष्पायते), असृ (nom. असायते), प्ररुद्, रुद्, रोदनं कृ; 'he shed tears of joy,' हर्षाद् अश्रूण्य् अपातयत्; 'in tears, having the eyes filled with tears,' जाताश्रुः -श्रुः -श्रु, अश्रुलोचनः -ना -नं, अश्रुनयनः &c., अश्रुमुखः -खी -खं, वाष्पोपप्लुताक्षः -क्षी -क्षं, वाष्पाविलेक्षणः &c., पर्य्यश्रुः -श्रुः -श्रु; 'interrupted by tears,' वाष्पाकुलः -ला -लं.—(Rent), *see* RENT.

To TEAR, *v. a.* दृ (c. 10. दारयति -यितुं, c. 9. दृणाति, दरितुं -रीतुं), विदृ, अवदृ, दारणं कृ, विदारणं कृ, विभिद्, *see To* REND, LACERATE, PULL.—(Tear down, off, out, up), *see* under *To* PULL.—(The hair) लुच् &c., *see To* PLUCK.

To TEAR, *v. n.* (Rush along) महावेगेन चल्.—(Be torn or rent) विद् in pass., विभिद् in pass., *see To* CLEAVE, DIVIDE, *v. n.*

TEARFUL, *a.* साश्रुः -श्रुः -श्रु, साश्रुः &c., साश्रः -श्रा -श्रं, साश्रः &c., सवाष्पः -ष्पा -ष्पं, सबाष्पपूर्णः -र्णा -र्णं, बाष्पपूर्णः &c., अश्रुमयः -यी -यं.

TEARFULLY, *adv.* सवाष्पं, साश्रं, साश्रु, बाष्पाकुलधारा, साश्रुपातं.

TEARING, *s.* दारणं, विदारणं, विदारः, विभेदः -दनं, पाटनं.

To TEASE, *v. a.* बाध् (c. 1. बाधते -धितुं). *See To* ANNOY, TORMENT.

TEASED, *p. p.* बाधितः -ता -तं, पीडितः &c., व्यथः -था -थं.

TEAT, *s.* स्तनाग्रं, स्तनः, *see* NIPPLE; 'having two teats,' द्विस्तनी.

TECHNICAL, *a.* लाक्षणिकः -की -कं, पारिभाषिकः &c., साङ्केतिकः -की -कं, परिभाषितः -ता -तं, विशेषचिह्नासङ्गती -न्धिनी &c.

TECHNICALLY, *adv.* परिभाषानुसारेण, विशेषकलानुसारेण.

TECHNICALITY, *s.* लाक्षणिकत्वं, पारिभाषिकत्वं, साङ्केतिकत्वं.—(A technical term) परिभाषा, लाक्षणिकः.

TEDIOUS, *a.* दीर्घसूत्रः -त्रा -त्रं, अतिदीर्घः -र्घा -र्घं, खेदजनकः -का -कं, श्रमजनकः &c. *See* LONG, PROLIX, IRKSOME.

TEDIOUSLY, *adv.* अतिदीर्घं, दीर्घसूत्रवत्, सुदीर्घं.

TEDIOUSNESS, *s.* दीर्घसूत्रता, अतिदीर्घता. *See* IRKSOMENESS.

To TEEM, *v. n.* पूर्णगर्भः -र्भा -र्भं भू, अतिपूर्णः -र्णा -र्णं भू.—(Bring forth abundantly) बाहुल्येन उत्पद् (c. 10. -पादयति -यितुं) or जन्.

TEEMING, *part.* पूर्णगर्भः -र्भा -र्भं, परिपूर्णः -र्णा -र्णं, सम्पूर्णः &c., पूर्णः &c., आकुल in comp., आढ्य in comp. *See* PROLIFIC.

TEETH, *s. pl.*, दन्ताः *m. pl.*, *see* TOOTH; 'having teeth,' दन्ती -न्तिनी -न्ति (न्), सदन्तः -न्ता -न्तं, जातदन्तः &c.; 'having good teeth,' सुदन् -दती -दन् (न्); 'woman having fine teeth,' सुदन्ती; having discolored teeth,' अरोकदन्तः &c.; 'row of teeth,' दन्तपंक्तिः *f.*; 'sensitiveness of the teeth,' दन्तहर्षः.

To TEETH, *v. n.* जातदन्तः -न्ता -न्तं भू, उद्भिन्नदन्तः -न्ता -न्तं भू.

TEETHING, *s.* दन्तोद्भेदः, दन्तोद्भवः, दन्तस्फोटः, दन्तोत्पत्तिः *f.*, दन्तजननं; 'time of teething,' दन्तोद्भेदनकालः.

TEGUMENT, *s.* आवेष्टनं, कवचः -चं, पुटः -टी. *See* INTEGUMENT.

TELESCOPE, *s.* दूरदर्शकयन्त्रं, महादूरदर्शकयन्त्रं, दूरदर्शनयन्त्रं, चाक्षुषयन्त्रं, दृष्टिसाधकयन्त्रं.

TELINGANA, *s.* (The country) तैलङ्गः, तैलङ्गाः.

To TELL, *v. a.* कथ् (c. 10. कथयति -यितुं). *See To* RELATE, NARRATE.

To TELL, *v. n.* (Take effect) सफलीभू, सप्रभावः -वा -वं भू, सिध्.—(Hit the mark), *see* under MARK.—(Tell of) सूच्.

TELLER, *s.* कथकः, कथिकः, आख्यायकः. *See* RELATER.

TELLING, *s.* कथनं, उपकथनं, आख्यानं, *see* RELATION, NARRATION.

TELL-TALE, *s.* सूचकः, सूची *m.* *See* TALE-BEARER, INFORMER.

TEMERITY, *s.* साहसं, दुःसाहसं, विषमसाहसं. *See* RASHNESS.

To TEMPER, *v. a.* शम् (c. 10. शमयति -यितुं). *See To* MODERATE.

TEMPER, *s.* (Of mind) शीलः, प्रकृतिः *f.*, भावः, स्वभावः, संवेदनं; 'good temper,' सद्भावः, *see* GOOD-HUMOUR; 'bad temper,' दुर्भावः.—(Calmness, moderation) शान्तिः *f.*, शान्तता, समता, संयमः, रोषाभावः.—(Anger) रोषः.

TEMPERAMENT, *s.* प्रकृतिः *f.*, स्वभावः, भावः, देहप्रकृतिः *f.*, देहस्वभावः, शरीरप्रकृतिः *f.*, जन्मप्रकृतिः *f.*; 'bilious,' पित्तप्रकृतिः *f.*

TEMPERANCE, *s.* (Moderation) संयमः, यमः, परिमितता, अप्रसक्तिः *f.*—(In eating) मिताशनं, अल्पाशनं, मिताहारः -रित्वं, मितभोजनं, अल्पाहारः -रित्वं, परिमिताहारः, परिमितभोजनं -जित्वं.—(In drinking) परिमितपानं, मितपानं, अल्पपानं, मात्रापानं.

TEMPERATE, *a.* (Moderate) संयमी -मिनी &c., संयतः -ता -तं, संयतवृत्तिः -त्तिः -त्ति, संयमशीलः -ला -लं, *see* MODERATE.—(In desires) अल्पाकांक्षी -क्षिणी &c., अप्रसक्तः -क्ता -क्तं, जितेन्द्रियः -या -यं.—(In eating) मिताशनः -ना -नं, परिमिताहारः -रा -रं, मिताहारः &c., मिताहारी -रिणी &c., यताहारः &c., अल्पाहारः &c., अल्पाहारी &c., स्वल्पाहारः &c., मितभोजी &c., नियताहारी &c., लघ्वाहारः -रा -रं, लघ्वाहारी &c., अल्पाशी &c., मिताशी &c.—(In drinking) मितपायी &c., परिमितपायी &c., अल्पपायी &c., मितपानी &c., पानाप्रसक्तः -क्ता -क्तं.—(Not excessive) परिमितः -ता -तं, अतीव्रः -व्रा -व्रं.—(Moderately warm) ईषदुष्णः -ष्णा -ष्णं, मन्दोष्णः &c., अचण्डः -ण्डा -ण्डं, अतीक्ष्णः -क्ष्णा -क्ष्णं.—(Calm, not violent) शान्तः -न्ता -न्तं, अरोषणः -णा -णं, शान्तिप्रयुक्तः -क्ता -क्तं, अचण्डः -ण्डा -ण्डं, धीरः -रा -रं, धैर्यशाली &c.

TEMPERATELY, *adv.* अरोषेण, अक्रोधेन, अतीव्रं, अचण्डं, शान्त्या.

TEMPERATURE, *s.* उष्णानुष्णमानं, उष्णानुष्णप्रमाणं, उष्णशीतमानं, उष्णानुष्णता, उष्णमानं, उष्णप्रमाणं, ग्रीष्मायीष्मता.

TEMPERED, *p. p.* शमितः -ता -तं, उपशमितः &c., नियमितः -ता -तं.

TEMPEST, TEMPESTUOUS. *See* STORM, STORMY, HURRICANE.

TEMPEST-TOST, TEMPEST-BEATEN, *a.* पवनाहतः -ता -तं, पवनक्षिप्तः -प्ता -प्तं, पवनाघातप्रेरितः &c., वायावेगप्रेरितः &c., अनिलसंक्षुब्धः &c.

TEMPLE, *s.* (Building dedicated to a deity) मन्दिरं, प्रासादः, देवमन्दिरं, देवालयं, देवगृहं, देवभवनं, मखपः -पं, देवागारः -रं, देवधिष्ण्यं *n.* (न्), देवतामन्दिरं, भजनालयं, देवतागारः -रं, देवतायतनं, देवावासः, महालयः -यं, सुरस्थानं, सुरमन्दिरं, सुरगृहं, देवकुलं, यज्ञियशाला, वीहारः, वयुनं, चिच्छर्दकः, चिच्छन्दकः, स्वस्तिकः, सर्वतोभद्रः, नन्द्यावर्तः, रुचकः; 'temple dedicated to Siva,' शिवालयं, शिवमन्दिरं; 'open temple,' मखपः; 'endowments of a temple,' देवस्वं; 'worship at the entrance of a temple,' द्वारपूजा.—(Of the head) कपोलः, क्षेत्रः, शङ्खः, शङ्खकः -कं.

TEMPORAL, *a.* ऐहिकः -की -कं, ऐहलौकिकः -की -कं, लौकिकः &c., सांसारिकः &c., दृष्टार्थः -र्थी -र्थं. *See* SECULAR.

TEMPORARILY, *adv.* अल्पकालमात्रं, क्षणमात्रं, अचिरेण, अशाश्वतं.

TEMPORARINESS, *s.* अनित्यता, अचिरस्थायिता, क्षणिकता.

TEMPORARY, *a.* अचिरस्थायी -यिनी -यि (न्), अचिरकालिकः -का -कं, अचिरः -रा -रं, अनित्यः -त्या -त्यं, अशाश्वतः -ती -तं, क्षणिकः -का -कं.

To TEMPORIZE, *v. n.* समयानुरोधं कृ, समयानुवर्त्तनं कृ, कालानुरोधं कृ.

TEMPORIZER, *s.* समयानुरोधी *m.* (न्), कालानुरोधी *m.*, कालानुवर्त्ती *m.*

To TEMPT, *v. a.* (Entice to evil) प्रलुभ् (c. 10. -लोभयति -यितुं), परिलुभ्, लुभ्, आकृष् (c. 1. -कर्षति -कर्ष्टुं), मुह् (c. 10. मोहयति -यितुं), प्रलोभनं कृ, विमोहनं कृ.—(Try, prove) परीक्ष् (c. 1. -ईक्षते -क्षितुं), परीक्षां कृ.

TEMPTATION, *s.* (Enticement to evil) प्रलोभनं, विलोभनं, आकर्षणं, आकृष्टिः *f.*, मोहः -हनं, विमोहनं.—(Trial) परीक्षा.

TEMPTED, *p. p.* प्रलोभितः -ता -तं, आकृष्टः -ष्टा -ष्टं, मोहितः &c.; 'by avarice,' लोभाकृष्टः &c.—(Tried) परीक्षितः -ता -तं.

TEMPTER, *s.* प्रलोभकः, विलोभकः, मोहकः, परीक्षकः, परीक्षाकृत्.

Tempting, *a.* आकर्षकः -का -कं, विमोहनः -ना -नं. *See* Enticing.

Ten, *a.* दश *m. f. n. pl.* (न्), दशकः -का -कं, दशावयवः -वा -वं; 'aggregate of ten,' दशकं; 'ten days,' दशाहं; 'in ten ways,' दशधा.

Tenable, *a.* रक्षणीयः -या -यं, प्रतिपादनीयः &c., स्थापनीयः &c.

Tenacious, *a.* (Holding fast) संलग्नग्राहिः -हा -हि, *see* Retentive.—(Persistent in a course) अभिनिविष्टः -ष्टा -ष्टं, आग्रही -हिणी &c., दृढः -ढा -ढं, दृढसङ्कल्पः -ल्पा -ल्पं.—(Of opinions) स्वमतासही &c.—(Of life) दुर्मरः -रा -रं.

Tenacity, *s.* अभिनिवेशः, आग्रहः, ग्रहः, दृढता, धृतिः *f.*, धारणा.

Tenant, *s.* अधिवासी *m.* (न्), परस्वामिकक्षेत्राधिवासी *m.*, परस्वामिकगृहाधिवासी *m.*, परस्वत्वपुरुषभूम्यधिवासी *m.*

To tenant, *v. a.* परस्वामिकभूमिम् अधिवस् (c. 1. -वसति -वस्तुं).

Tenanted, *p. p.* अध्युषितः -ता -तं, अधिवासितः &c. *See* Occupied.

Tenantry, *s.* परस्वामिकक्षेत्राधिवासिनां गणः, अधिवासिवर्गः.

To tend, *v. a.* पालय्, रक्ष्, *see* under *To* keep; 'cattle,' गोपालनं कृ.

To tend, *v. n.* (Aim at, be directed or incline towards) अभिसन्धा (c. 3. -दधाति -धातुं), उद्दिश् (c. 6. -दिशति -देष्टुं), अभिप्रे (c. 2. अभिप्रेति -तुं, rt. इ), प्रवणः -णा -णं भू; 'act which tends to a main object,' प्रयोजकः, प्रयोजकक्रिया *f.*, प्रयोगार्थः.—(Conduce, contribute), *see* the words.

Tendency, *s.* प्रावण्यं, प्रवणता, प्रवृत्तिः *f.*, प्रवाहः, शीलता or शालुता in comp., *see* Inclination; 'to descend,' अधोगतिशीलता.

Tender, *a.* (Soft) कोमलः -ला -लं, मृदुः -दुः -दु, आर्द्रः -र्द्रा -र्द्रं.—(Sensible of pain) सुकुमारदुःखः -खा -खं, सुदुःखितः -ता -तं, *see* Sore.—(Delicate) सुकुमारः -रा -रं, कौमारः -री -रं, पेलवः -वा -वं, मृदुः &c.; 'having a tender frame,' प्रकृतिपेलवः -वा -वं, मृदङ्गः -ङ्गी -ङ्गं.—(Young) बालः -ला -लं, कौमारः -री -रं.—(Compassionate) दयालुः -लुः -लु, कारुणिकः -की -कं, आर्द्रः -र्द्रा -र्द्रं, दयार्द्रः &c., सहार्हः &c., *see* Pitiful.

Tender, *To* tender. *See* Offer, *To* offer.

Tender-hearted, *a.* करुणात्मकः -का -कं, कोमलचित्तः -त्ता -त्तं, कोमलान्तःकरणः -णा -णं, कोमलहृदयः -या -यं, सदयहृदयः &c., दयार्द्रभावः -वा -वं, दयार्द्रचित्तः &c., स्निग्धहृदयः &c., स्निग्धहृद्, भावार्द्रः &c.

Tenderly, *adv.* सकरुणं, सकारुण्यं, करुणं, सदयं, सानुकम्पं.

Tenderness, *s.* (Softness) कोमलता -त्वं, मृदुता, मार्दवं, सौकुमार्यं, कौमारं, आर्द्रता.—(Compassion, kindness) कारुण्यं, करुणा, कृपा, दया, अनुकम्पा, दयालुता, घृणत्वं, *see* Pity.

Tendinous, *a.* शिरालः -ला -लं, शिरामयः -यी -यं, स्नायुमयः &c.

Tendon, *s.* स्नायुः *m.*, अस्ना, शिरा, सिरा, स्नावः, सन्धिबन्धनं, सन्धिबन्धनं, नाडी, *see* Muscle; 'of the neck,' मन्या.

Tendril, *s.* (Of a vine or creeper) लतातन्तुः *m.*, तन्तुः *m.*

Tenement, *s.* आवसथः, भवनं, *see* Dwelling; 'earthly,' देहः.

Tenet, *s.* मतं, सम्मतं, तन्त्रं, स्थितिः *f.* *See* Opinion, Dogma.

Tenfold, *a.* दशगुणः -णा -णं, दशविधः -धा -धं, दशधा indec.

Tenor, *s.* (Course, drift) क्रमः, अन्वयः, प्रसङ्गः, प्रवाहः, अभिप्रायः, तात्पर्यं, निदर्शनं.—(Voice) मध्यस्वरः.

Tense, *a.* आततः -ता -तं, ततः &c. *See* Stretched, Tight.

Tense, *s.* (In grammar) कालः; 'Present,' वर्तमानकालः; 'Preterite,' अतीतकालः; 'Imperfect,' अद्यतनभूतकालः.

Tension, *s.* आततिः *f.*, आततत्वं, ततिः *f.*, दृढैषित्वं. *See* Tightness.

Tent, *s.* तूर्यं, तूर्ण्यं, पटवेश्मः, पटगृहं, पटवेश्म *n.* (न्), पटवासः, पटकुटिः *f.*, पटगृहं, शिबिरं, स्थूलं, योगक्षादनं, गुल्मी, वेश्मिका, कुटकः, गुल्मपटिका; 'tent-maker,' तूर्यनिर्मोपजीवी *m.*; 'outer tent or screen surrounding a tent,' अवनिका, यवनिका.

Tenth, *a.* दशमः -मी -मं; 'tenth day of the month,' दशमी.

Tenuity, *s.* तनुता, तानवं, सूक्ष्मता, सौक्ष्म्यं, श्लक्ष्णता.

Tenuous, *a.* तनुः -नुः -नवी -नु, सूक्ष्मः -क्ष्मा -क्ष्मं. *See* Thin.

Tepid, *a.* ईषदुष्णः -ष्णा -ष्णं, कोष्णः &c., अकोष्णः &c., मन्दोष्णः &c., कदुष्णः -ष्णा -ष्णं, अनुष्णाशीतः -ता -तं. *See* Lukewarm.

Tepidness, *s.* ओष्मता, अकोष्णता, मन्दोष्मता. *See* Lukewarmness.

Tergiversation, *s.* अपदेशः, पलायनं, अपक्रमः, पराङ्मुखता, मुखं.

Term, *s.* (Limit, end) अन्तः, पर्यन्तः -न्तं, *see* Limit.—(Period) अवधिः *m.*, कालावधिः *m.*, *see* Period; 'of days,' अहोरात्रः; 'utmost term,' परमावधिः *m.*; 'of life,' आयुर्मेयोदयः.—(Word, expression, appellation) संज्ञा, पदं, वाक्यं, शब्दः, वचनं, अभिधानं, आख्या, नाम *n.* (न्), पङ्क्तिः *f.*—(Conditions) सङ्केतः, प्रतिज्ञा, नियमः, नियमवाक्यं.—(State of intercourse) व्यवहारः, धृतिः *f.*, परिचयभावः, परिचयः; 'good terms,' प्रीतिः *f.*, मैत्रं, संधिधिः *f.*; 'ill terms,' विधृतिः, अधृतिः *f.*, अप्रीतिः *f.*—(Time of business) व्यवहारकालः, कार्यनिर्वाहकालः, *see* Session.—(Of a syllogism) अवयवः.—(Of an arithmetical series) पदं; 'first term' आदिपदं, मुखं; 'last term,' अन्यपदं.

To term, *v. a.* अभिधा, आख्या. *See To* name, call, style.

Termagant, *s.* कलहेशा, चण्डी, दुष्टा. *See* Scold, Shrew.

Termed, *p. p.* अभिहितः -ता -तं, स्मृतः &c. *See* Named, Called.

Terminable, *a.* समर्यादः -दा -दं, परिच्छेदनीयः &c., *see* Limitable.

Terminal, *a.* अन्तस्थः -स्था -स्थं, पार्श्वगः -गी -गं, अन्तः -न्ती -न्तं.

To terminate, *v. a.* or *n.* अवसो. *See To* end, close, limit.

Termination, *s.* अवसानं, अन्तः, अवधिः *m.*, परिणामः, विद्या, *see* End, Conclusion.—(In grammar) अन्तः, अन्तपदं.

Termless, *a.* निरवधिः -धिः -धि, अनन्तः -न्ता -न्तं. *See* Endless.

Terrace, *s.* (Before a house) आलिन्दः, अलिन्दः, प्रघाणः, प्रपदः, गृहतटी, पीठिः -ठी *f.*, देहली -लिः *f.*—(On the roof of a house) प्रासादपृष्ठं, अट्टालः -लिका, तलकुटः, पृष्ठं.—(Covered terrace in the yard) चित्रशिः *f.*, वेदिका.

Terraqueous, *a.* जलस्थलमयः -यी -यं, जलस्थलात्मकः -का -कं.

Terrestrial, terrene, *a.* (Sublunary) लौकिकः -की -कं, ऐहलौकिकः &c., *see* Mundane.—(Earthen, earthly) भौमः -मी -मं, भौमिकः -की -कं, *see* Earthly, Earthen.—(Going or existing on the earth) भूचरः -री -रं, स्थलचरः &c., भूमिगः -गा -गं, स्थलगः &c., भूलोकस्थः -स्था -स्थं; 'terrestrial globe,' भूगोलः -लकं.

Terrible, terrific, *a.* भयानकः -का -कं, घोरः -रा -रं, दारुणः -णा -णं, भीमः -मा -मं. *See* Frightful, Fearful, Horrible.

Terribly, terrified, &c. *See* Frightfully, Frightened, &c.

To terrify, *v. a.* त्रस् in caus., भी in caus., *see To* frighten.

Territorial, *a.* राष्ट्रीयः -या -यं, राष्ट्रसम्बन्धी &c., दैशिकः -की -कं.

Territory, *s.* राष्ट्रं, देशः, प्रदेशः, भूमिः *f.*, राज्यं, अधिकारः.

Terror, *s.* त्रासः, सन्त्रासः, साध्वसं, भयं. *See* Fear, Fright.

Terse, *a.* शुद्धः -द्धा -द्धं, संस्कृतः -ता -तं, संक्षिप्तः -प्ता -प्तं.

Terseness, *s.* शुद्धता, शुद्धिः *f.*, संक्षिप्तता, संक्षेपः, संस्कारः.

Tertian, *s.* आह्निकज्वरः, आह्निकः, तृतीयकज्वरः, तृतीयकः.

TESSELATED, *a.* अक्षपदानुकारेण नानावर्णशिलाखण्डखचितः -ता -तं.

TEST, *s.* (Trial) परीक्षा, -क्षणं, कषः *f.*, उपधा, कषः -र्षणं, आकषः, निकषः, प्रतीतिः *f.*, परीक्षितिः *f.*; 'this may be put to the test,' एतत्परीक्षा करणीया, एतत्प्रतीतिर् उपायता.—(Means of trial) परीक्षासाधनं.

To TEST, *v. a.* परीक्ष् (c. 1. -ईक्षते -क्षितुं), आ in des. *See To* TRY.

TESTACEOUS, *a.* शङ्खवासी -सिनी &c., कम्बुविशिष्टः -ष्टा -ष्टं, कम्बुमयः &c.

TESTAMENT, *s.* (Will) मृतपत्रं, मरणपत्रं, मृत्युपत्रं, मृतलेखः; 'Old Testament,' पुरातननियमः; 'New Testament,' नूतननियमः.

TESTAMENTARY, *a.* (Pertaining to a will) मृतपत्रसम्बन्धी &c. -विषयकः -का -कं.—(Given by a will) मृतपत्रदत्तः -त्ता -त्तं.

TESTATOR, *s.* मृतलेखकर्त्ता *m.* (र्त्तृ), मरणलेखकर्त्ता *m.*

TESTATRIX, *s.* मृतलेखकर्त्री, मृत्युलेखकर्त्री, मरणलेखकर्त्री.

TESTED, *p. p.* परीक्षितः -ता -तं, कृतपरीक्षः -क्षा -क्षं. *See* TRIED.

TESTICLE, *s.* अण्डं, मुष्कः, वृषणः, कोषः -षकः, कोशः, फलं, मुष्फकः, नीक्षणं; 'testicles,' अण्डद्वयं, मुष्कद्वयं, अण्डयुग्मं, वृषणद्वयं, वृषणौ *m. du.*; 'enlargement of them,' अण्डवृद्धिः *f.*, अण्डशोफः; 'having them,' सवृषणः -णा -णं, अण्डीरः -रा -रं, अण्डीलः &c.

To TESTIFY, *v. a.* or *n.*, साक्ष्यं दा or कृ, प्रमाणं दा, प्रमाण (nom. प्रमाणयति -यितुं). *See To* DECLARE, CERTIFY, PUBLISH.

TESTIMONIAL, *s.* प्रमाणपत्रं, प्रमाणलेखः, प्रामाणिकलेखः.

TESTIMONY, *s.* साक्ष्यं, साक्षिता, प्रमाणं, प्रामाण्यं. *See* EVIDENCE.

TESTINESS, *s.* ककैशता, काकैश्यं, वक्रता, कटुता. *See* PEEVISHNESS.

TESTY, *a.* ककैशः -शा -शं, कटुः -टुः -टु. *See* PEEVISH, FRETFUL.

TETE-A-TETE, *s.* रहःसंलापः, रहःसम्भाषा, रहःप्रत्यासत्तिः *f.*

TETHER, *s.* बन्धनरज्जुः *m. f.*, बन्धनसूत्रं, चारणरज्जुः *m. f.*

To TETHER, *v. a.* दीर्घरज्जुना बद्ध्वा चर् (c. 10. चारयति -यितुं).

TETRAD, *s.* (Aggregate of four) चतुष्टयं, चतुष्कं.

TETRAGON, *s.* चतुरस्रं, चतुष्कोणः, चतुर्भुजः.

TETRAGONAL, *a.* चतुष्कोणः -णा -णं, चतुरस्रः -स्रा -स्रं, चतुर्भुजः -जा -जं.

TEXT, *s.* (Subject of a comment) मूलं, मूलग्रन्थः, पांक्तग्रन्थः, प्रतीकं, निदर्शनं, अभिहितत्वं, प्रयोगः.—(Verse or passage of Scripture) वचनं, वाक्यं, सूक्तं, ऋक् *f.* (च्), विधिः *m.*, श्रुतिः *f.*; 'of the Vedas,' वेदवचनं, वेदवाक्यं.

TEXTILE, *a.* तान्तवः -वी -वं, तन्त्री -न्त्रिणी -न्त्रि (न्).

TEXTUAL, *a.* वाचनिकः -की -कं, मौलिकः -की -कं.

TEXTURE, *s.* (Weaving) ऊतिः *f.*, वायः, व्यूतिः.—(Web, that which is woven) तान्तवं, वस्त्रं.—(Quality of the threads) तन्तुगुणः, सूत्रगुणः.

THAN, *adv.* or *conj.* Usually expressed in Sanskrit by the abl. c.; as, 'a store of grain is better than all stores,' धान्यसंग्रहः श्रेयान् सर्वसंग्रहात्; 'worthier than I,' अस्मत्तो वरीयान्. Or by न च; as, 'silence is better than speaking untruth,' वरं मौनं न च वचनम् अनृतं [*i. e.* better silence and not speaking untruth]. In modern Sanskrit 'than' is often expressed by अपेक्षया, or अपेक्ष्य; as, 'some of the organs of animals are stronger than those of men,' जन्तूनां कानिचिद् इन्द्रियाणि मनुष्यापेक्षया प्रबलानि; 'acid has a stronger attraction for iron than copper,' अम्लरसं ताम्रम् अपेक्ष्य लोहम् अधिकम् आकर्षति; 'placing the cup on some place higher than one's head,' स्वमस्तकम् अपेक्ष्य उच्चतरे स्थाने पात्रं विन्यस्य; 'than him,' तदपेक्षया; 'than me,' मदपेक्षया.

To THANK, *v. a.* धन्यं वद् (c. 1. वदति -दितुं), कृतज्ञताकथनं कृ, कृतज्ञताप्रकाशनं कृ, कृतज्ञतादर्शनं कृ, उपकारस्तुतिं कृ, प्राप्तोपकारस्तुतिं कृ, उपकारस्वीकारं कृ, धन्यवादं कृ; 'to give thanks to God,' ईश्वरं धन्यं वद्, ईश्वरगुणान् वद्, ईश्वरस्य धन्यवादं कृ; 'I thank thee,' त्वां धन्यं वदामि.

THANK, THANKS, *s. pl.* धन्यवादः; कृतज्ञतादर्शनं, कृतज्ञताकथनं, कृतज्ञताप्रकाशनं, उपकारस्तुतिः *f.*, उपकाराभिवादः, उपकारस्वीकारः; 'many thanks to you for your kindness,' अनुगृहीतो ऽस्मि तवोपकारेण; 'thanks to thee for the breakfast,' कुशलं ते प्रातराशस्य.

THANKFUL, *a.* कृतज्ञः -ज्ञा -ज्ञं, उपकारज्ञः &c., कृतज्ञतादर्शकः -का -कं, कृतज्ञताकथकः &c., कृतज्ञताप्रकाशकः &c., उपकाराभिवादकः &c., धन्यवादी -दिनी -दि (न्).

THANKFULLY, *adv.* कृतज्ञतापूर्वं, सधन्यवादं, कृतज्ञवत्, उपकारज्ञवत्.

THANKFULNESS, *s.* कृतज्ञता, उपकारज्ञता, उपकृतज्ञता.

THANKLESS, *a.* अकृतज्ञः -ज्ञा -ज्ञं, कृतघ्नः &c. *See* UNGRATEFUL.

THANKSGIVING, *s.* धन्यवादः, कृतज्ञताकथनं, कृतज्ञतादर्शनं.

THAT, *pron.* (Demonstrative) सः सा तत् (त्), एषः एषा एतत् (एतत्), असौ *m. f.* (अदस्); 'that man,' स नरः; 'at that time,' तस्मिन् काले, *see* THEN.—(Relative) यः या यत् (यत्) or expressed by a compound; as, 'the man that has great wealth,' महाधनो नरः, *see* WHO, WHICH.—(That is to say) अर्थात्, अर्थतस्, वस्तुतस्.—(So that) तथा यथा, *see* the next.

THAT, *conj.* Expressed by तथा यथा, यथा, यत्, इति or by the accusative case, as in the following examples; 'do you contrive that I may be liberated from my bonds,' यथा मुच्ये बन्धनात् तथा संविधातुम् अर्हसि; 'I did not expect that I should see you again,' न म आसीद् आशंसा यथा पुनरपि त्वां प्रेक्षिष्ये; 'do you not know that I keep watch in the house?' त्वं न जानासि यथा गृहरक्षां करोमि; 'know that it is impossible to stand before him,' अवेहि यद् अशक्यं तस्यागे स्थातुं; 'this is a new doctrine, that having killed an enemy remorse should be felt,' अयं नूतनो न्यायो यद् अरातिं हत्वा सन्तापः क्रियते; 'the pupils said that they had done their task,' कृतकृत्या वयम् इति शिष्या ऊचुः; 'having ascertained that it was a monkey who rang the bell,' मर्कटो घण्टां वादयति इति परिज्ञाय; 'his idea was that an increase of wealth ought to be made,' अर्थवृद्धिः करणीया इति मतिर् बभूव; 'reflecting in his mind that I am happy in possessing such a wife,' धन्यो ऽहं यस्य एतादृशी भार्या इति मनसि निधाय; 'I will inform the Guru that the hour of sacrifice has arrived,' उपस्थितां होमवेलां गुरवे निवेदयामि; 'they related that a golden shower had fallen from the clouds,' हिरण्मयीं वृष्टिं नभसः पतितां शशंसुः; 'thou sayest that my beloved is pining away,' पथैनुकां प्रियां मे क्षपयसि.—(In order that) expressed by अर्थं in comp., or by the dative case; as, 'what must I do in order that I may get money?' धनप्राप्त्यर्थं or धनप्राप्तये किं मया कर्त्तव्यं.

THATCH, *s.* छदिः *f.*, तृणछदिः *f.*, छादं, पटलं, तृणपटलं, कटनं, कुटलं, कुटङ्गः, गृहाच्छादनी.

To THATCH, *v. a.* शुष्कतृणादिना or तृणपटलेन गृहाच्छादनं कृ.

THATCHED, *p. p.* तृणाच्छादितः -ता -तं, शुष्कतृणच्छादितः -ता -तं.

THATCHER, *s.* गृहाच्छादनकृत् *m.*, तृणपटलकारः, कोटकः.

To THAW, *v. a.* द्रवीकृ, विद्रु in caus., विद्रावणं कृ. *See To* MELT, *v. a.*

To THAW, *v. n.* द्रवीभू, द्रु (c. 1. द्रवति, द्रोतुं), विद्रु. *See To* MELT, *v. n.*

THAW, *s.* हिमद्रवः, हिमद्रावः, हिमगलनं, हिमक्षरणं.

THE. This definite article may be either expressed by the pronoun सः सा तत्, or is more usually omitted altogether; as, 'the man,' स पुरुषः or पुरुषः; 'the woman,' सा स्त्री or स्त्री; 'the lion,' स सिंहः or सिंहः.

THEATRE, *s.* रङ्गः, रङ्गशाला, नाटकशाला, नाट्यशाला, नाटकगृहं, नाटकमन्दिरं, नृत्यशाला, रङ्गभूमिः *f.*, समाजसन्निवेशः, आनतैः.

THEATRICAL, *a.* नाटकीयः -या -यं, नाट्यसम्बन्धी -न्धिनी &c., नाट्यविषयकः -का -कं, नाटकसम्बन्धी &c., नाट्यशालासम्बन्धी &c.

THEE, *pron.* त्वां acc. c.; 'by thee,' त्वया; 'to thee,' तुभ्यं, ते; 'of thee,' तव, ते.

THEFT, *s.* स्तेयं, चौर्य्यं, चौरं, चौरिका, स्तैन्यं, स्तैनं, चुरा, तास्कर्य्यं, तस्करता, मुष्टं, मुष्टिः *f.*, अपहारः, परद्रव्यापहारः, चौर्यकर्म्म *n.* (न्). *See* STEALING.

THEIR, *pron.* तेषां *gen. pl. m.*, तासां *f.*, एतेषां *gen. pl. m.*, एतासां *f.*, एषां *gen. pl. m.*, आसां *gen. pl. f.*

THEISM, *s.* आस्तिक्यं, आस्तिक्यमतं, आस्तिक्यवादः, ईश्वरवादः.

THEIST, *s.* आस्तिकः, आस्तिक्यवादी *m.* (न्), ईश्वरवादी *m.*

THEM, *pron.* तान् or एतान् *acc. pl.*; 'by them,' तैः; 'of them,' तेषां.

THEME, *s.* (Topic) प्रकरणं, विषयः, *see* SUBJECT.—(Short dissertation) अल्पप्रबन्धः, अल्पलेखः, अल्पप्रसङ्गः.

THEMSELVES, *pron.* Expressed by आत्मा *m.* (न्). *See* MYSELF.

THEN, *adv.* (At that time) तदा, तदानीं, तर्हि, एतर्हि, तस्मिन् काले, तत्काले.—(After that) ततः, अथ, तदनन्तरं, तदुपरि; 'now and then,' कदाचित्, कदापि, *see* under Now.

THENCE, *adv.* (From that place) ततस्, तस्मात् स्थानात्, तस्माद् देशात्.—(For that reason) तस्मात्, *see* THEREFORE.

THENCEFORTH, THENCEFORWARD, *adv.* ततःप्रभृति, तदाप्रभृति, तत्कालादारभ्य, तत आरभ्य, तदारभ्य, तदवधि, तत्कालावधि.

THEOCRACY, *s.* ईश्वरकर्तृकराज्यं, ईश्वरकर्तृकशासनं, ईश्वरप्रभुत्वं.

THEOGONY, *s.* देवोत्पत्तिः *f.*, देवजन्म *n.* (न्), देववंशः -वंशावली.

THEOLOGIAN, *s.* परमार्थविद् *m.*, परमार्थज्ञानी *m.* (न्), ब्रह्मज्ञानी *m.*, ब्रह्मविद्वान्, अध्यात्मज्ञानी *m.*, अध्यात्मदृक् *m.* (श्), श्रोत्रियः, श्रुताध्ययनसम्पन्नः, धर्म्मशास्त्रज्ञः, वेदान्ती *m.*

THEOLOGICAL, *a.* परमार्थविद्याविषयकः -का -कं, परमार्थविद्यासम्बन्धी -न्धिनी &c., अध्यात्मज्ञानविषयकः &c., औपनिषदः -दी -दं.

THEOLOGY, *s.* परमार्थविद्या, परमार्थज्ञानं, श्रुतिविद्या, धर्म्मविद्या, देवज्ञानं, ब्रह्मज्ञानं, ब्रह्मविद्या, तत्त्वज्ञानं, तत्त्वविद्या, अध्यात्मज्ञानं, अध्यात्मविद्या, श्रोत्रियता, परार्थप्रकरणं.

THEOREM, *s.* (Proposition to be proved) प्रमेयं, प्रमेयोपपाद्यं.

THEORETIC, THEORETICAL, *a.* मानसिकः -की -कं, काल्पनिकः &c., अव्यवहारिकः -की -कं, व्यवहारागम्यः -म्या -म्यं, मनोमयः &c. *See* SPECULATIVE.

THEORETICALLY, *adv.* मनःकल्पनानुसारेण, मनःकल्पनया, कल्पनापूर्व्वं.

THEORY, *s.* (Speculation, scheme) कल्पना, मनःकल्पना, मानसकल्पना, मानससृष्टिः *f.*, तर्कः, कल्पितं, मनःकल्पितं, अधीपत्तिः *f.*; 'anxious to establish one's own theory,' स्वकल्पनासाधनेच्छुः -च्छुः -च्छु.—(Exposition of principles) बीजनिर्देशः, उपपत्तिः *f.*

THERAPEUTIC, *a.* रोगशमकः -का -कं, रोगप्रतिकारकः &c., *see* CURATIVE.

THERE, *adv.* तत्र, तत्स्थाने, तस्मिन् स्थाने, तस्मिन् देशे; 'here and there,' इतस्ततस्; 'produced there, or relating to that place,' तत्यः -त्या -त्यं, तत्रस्थः -स्था -स्थं; 'the people residing there,' तत्रस्थजनाः *m. f.*, तत्यजनाः.

THEREABOUTS, *adv.* (Near that place) तत्रोपाने, तत्स्थानसमीपे-निकटे, तत्रसमीपे, आदिपञ्चात्.—(Nearly), *see* NEARLY, *adv.*

THEREAT, *adv.* तेन, तस्मात्, तदुपरि, ततस्, अतस्.

THEREBY, *adv.* तेन, तेनोपायेन, तद्द्वारा, तद्द्वारेण, अनेनोपायेन.

THEREFORE, *adv.* तेन, तस्मात्, अनेन हेतुना, तेन हेतुना, तस्य हेतोः, तेन कारणेन, तत्कारणात्, अतस्, ततस्, अतःकारणात्, अतोहेतोः, तन्निदानात्, तत्, इति, इति हेतोः.

THEREIN, *adv.* तत्र, तस्मिन्, एतस्मिन्, अस्मिन्, अस्मिन् विषये.

THEREOF, *adv.* तस्य, एतस्य, तदीयः -या -यं; 'belonging to that place,' तत्यः -त्या -त्यं, तत्स्थानिकः -की -कं, तत्स्थानीयः -या -यं, तत्रस्थः &c.

THEREUPON, *adv.* ततस्, अतस्, तत्रोपरि, तदनन्तरं, अत्रान्तरे.

THERMOMETER, *s.* उष्णानुष्णमापनयन्त्रं, शीतोष्णमापनयन्त्रं.

THESE, *pron.* एते *m.* एताः *f.* एतानि *n. pl.* (एतत्), इमे *m.*, इमाः *f.*, इमानि *n. pl.* (इदं), अमी *m. pl.* (अदस्); 'these two,' एतौ *m. du.*, एते *f. du.*

THESIS, *s.* (Proposition) पक्षः, पूर्व्वपक्षः, प्रतिज्ञा.

THEY, *pron.* ते *m.*, ताः *f.*, तानि *n. pl.* (तद्), एते &c., इमे &c. (इदं), अमी *m. pl.* (अदस्); 'they two,' तौ *m. du.*, ते *f. du.*

THICK, *a.* घनः -ना -नं, स्थूलः -ला -लं, सान्द्रः -न्द्रा -न्द्रं, निबिडः -डा -डं, अविरलः -ला -लं, नीरन्ध्रः -न्ध्रा -न्ध्रं, श्यानः &c., स्यानः &c., *see* DENSE.—(As water, &c., turbid) कलुषः -षा -षं, अमलः -ला -लं, आविलः -ला -लं.

THICK, *adv.* (In quick succession) निरन्तरं, अविरतं, *see* FREQUENTLY.—(Closely) निरन्तरं, अविरलं, निबिडं.

To THICKEN, *v. a.* घनीकृ, सान्द्रीकृ, स्थूलीकृ, श्यानीकृ, निबिडीकृ.

To THICKEN, *v. n.* घनीभू, सान्द्रीभू, स्थूलीभू, श्यानीभू, निबिडीभू.

THICKENED, *p. p.* घनीभूतः -ता -तं, घनीकृतः -ता -तं, स्थूलीभूतः &c.

THICKENING, *s.* घनीकरणं, घनता. *See* INSPISSATION.

THICKET, *s.* गहनं, वृक्षगहनं, तरुगहनं, वनगहनं, झाटः -टं, गुह्यं, विपिनं, गह्वरं, सान्द्रं, प्रस्तारः.

THICK-HEADED, *a.* स्थूलबुद्धिः -द्धिः -द्धि, स्थूलधीः &c. *See* STUPID.

THICKLY, *adv.* निरन्तरं, अविरलं, निबिडं, अविरतं, सुसंहतं.

THICKNESS, *s.* घनता -त्वं, स्थूलता, स्थौल्यं, सान्द्रता, नैबिड्यं, श्यानता, पीवरत्वं, संहतत्वं, *see* DENSITY. 'Thickness,' as a property of matter, is expressed by पिण्डत्वं.

THICK-SET, *a.* संहतः -ता -तं, सुसंहतः &c., निरन्तरः -रा -रं.

THIEF, *s.* स्तेनः, चौरः, स्तेयी *m.* (न्), चोरः, तस्करः, स्तेयवृत् *m.*, मोषकः, आमोषी *m.* (न्), मोष्टा *m.* (ष्टृ), परस्वापहारी *m.*, अदत्तादायी *m.*, परद्रव्यहारकः, चौर्य्यकृत् *m.*, ऐकागारिकः, मलिम्लुचः. *See* ROBBER, STEALER.

THIEF-TAKER, THIEF-CATCHER, *s.* चौरग्राही *m.* (न्), स्तेनग्राही *m.*

To THIEVE, *v. n.* चौर्य्यं कृ, स्तेयं कृ, तास्कर्य्यं कृ, परद्रव्यहरणं कृ.

THIEVISH, *a.* चौर्य्यासक्तः -क्ता -क्तं, स्तेयासक्तः &c., चौर्य्यशीलः -ला -लं, स्तेयकारी -रिणी -रि (न्), अदत्तपरधनापहारप्रसक्तः -क्ता -क्तं.

THIEVISHNESS, *s.* चौर्य्यासक्तिः *f.*, स्तेयासक्तिः *f.*, चौर्य्यशीलता, तस्करता.

THIGH, *s.* ऊरुः *m.*, सक्थि *n.*, जङ्घा, जाङ्घनी, भवत् *m.*; 'fore part of

the thigh,' प्रतिजङ्घा; 'having long thighs,' दीर्घसक्थः -क्था -क्थं.

TORTUOUS, *a.* वक्रः -क्रा -क्रं, कुटिलः -ला -लं, तिर्य्यङ् -रश्ची -र्य्यक् (ञ्च्); 'moving tortuously,' तिर्य्यग्गामी -मिनी &c., कुटिलगामी &c., दन्द्रमणः -णा -णं; 'movement,' चङ्क्रमा -मणं, दन्द्रमं -मणं.

To TORTURE, *v. a.* यत् (c. 10. यातयति -यितुं), यातनयन्त्रेण व्यथ् or प्रमथ् (c. 10. -माथयति -यितुं), यातनां कृ, अत्यन्तं पीड् &c. *See To* TORMENT.

TORTURE, *s.* यातना, अतिव्यथा, व्यथा, प्रमाथः, व्याधिः *m.*, अतिव्याधिः *m.*,

तिग्मव्यथा, तिग्मवेदना, सम्पीडः, उद्वेजनं. *See* TORMENT.

TORTURED, *p. p.* व्यथितः -ता -तं, सन्तप्तः -प्ता -प्तं, प्रमथितः -ता -तं.

TORTURER, *s.* यातनाकारी *m.* (न्), यातनकृत् *m.*, व्यथाकरः, प्रमाथी *m.* (न्), उद्वेजनकरः, सन्तापकः, परिक्लेष्टा *m.* (ष्टृ). *See* TORMENTING.

To TOSS, *v. a.* क्षिप् (c. 6. क्षिपति, क्षेप्तुं), विक्षिप्, उत्क्षिप्, समुत्क्षिप्, क्षुभ् (c. 10. क्षोभयति -यितुं), विक्षुभ्, संक्षुभ्, उद्धू (c. 5. -धूनोति -धोतुं), विधू.

To TOSS, *v. n.* विक्षिप् in pass. (-क्षिप्यते), इतस्ततो विक्षिप् or विचल् (c. 1. -चलति -लितुं) or प्रचल्, इतस्ततो लुठ् (c. 6. लुठति -ठितुं) or प्रलुठ् or लुल्, घूर्ण् (c. 1. घूर्णति -ते -र्णितुं), विघूर्ण्, व्याघूर्ण्, परिघूर्ण्, उद्धू in pass. (-धूयते), विधू, इतस्ततः प्लु (c. 1. प्लवते, प्लोतुं).

TOSS, *s.* क्षेपः -पणं, उत्क्षेपः -पणं, समुत्क्षेपः, क्षोभः, व्याक्षोभः.

TOSSED, *p. p.* क्षिप्तः -प्ता -प्तं, उत्क्षिप्तः &c., क्षुब्धः -ब्धा -ब्धं, संक्षुब्धः &c., उद्धूतः -ता -तं, विधूतः &c., व्यस्तः -स्ता -स्तं, प्रलोठितः -ता -तं, उद्भ्रान्तः -न्ता -न्तं, विक्षिप्तः &c., विकीर्य्यमाणः -णा -णं, काल्यमानः &c.

TOSSING, *s.* क्षेपणं, उत्क्षेपणं, हल्लनं. *See* ROLLING, *s.* and *part.*

TOTAL, *a.* सम्पूर्णः -र्णा -र्णं, पूर्णः &c., समग्रः -ग्रा -ग्रं, आत्यन्तिकः -की -कं, *see* ENTIRE, COMPLETE; 'total rout,' सुपलायितं.

TOTAL, TOTALITY, *s.* साकल्यं, समुदायः, समस्तिः *f.*, समासः, सामग्र्यं, ऐक्यं, पारायणं, कार्त्स्न्यं, समाम्नायः. *See* WHOLE, *s.*

TOTALLY, *adv.* सर्व्वतस्, सर्व्वशस्, सम्यक्, साकल्येन. *See* ENTIRELY.

To TOTTER, *v. n.* स्खल् (c. 1. स्खलति -लितुं), प्रस्खल्, विचल् (c. 1. -चलति -लितुं), संचल्, चल्, विह्वल् (c. 1. -ह्वलति -लितुं), प्रह्वल्, ह्वल्.

TOTTERING, *part.* स्खलितः -ता -तं, विचलन् -लन्ती -लत् (त्), स्खलितगतिः -तिः -ति, विक्लवगतिः &c., स्खलद्गतिः &c., चलविचलः -ला -लं.

To TOUCH, *v. a.* स्पृश् (c. 6. स्पृशति, स्प्रष्टुं), संस्पृश्, परिस्पृश्, हस्तेन परामृश् or आलभ्, स्पर्शं कृ. *See To* HANDLE, MOVE.

To TOUCH, *v. n.* (Come in contact) सम्पर्कम् इ or गम्, संसर्गम् इ or गम्, परस्परस्पर्शं कृ; 'as a vessel,' लग् (c. 1. लगति -गितुं).

TOUCH, *s.* (The sense) स्पर्शः, स्पृष्टिः *f.*, स्पर्शेन्द्रियं.—(The perception, the act of touching) स्पर्शः -र्शनं, संस्पर्शः, परिमर्शः, परिमार्गः, स्पर्शबोधः, स्पर्शज्ञानं, त्वग्ज्ञानं.—(Contact) सम्पर्कः, पृक्तिः *f.*, संस्पर्शः, संसर्गः, *see* CONTACT.—(Touch as a test of gold) वर्णिका.

TOUCHED, *p. p.* स्पृष्टः -ष्टा -ष्टं, संस्पृष्टः &c., *see* MOVED; 'my heart is touched with grief,' उत्कण्ठया संस्पृष्टं हृदयं; 'to be touched,' स्प्रष्टव्यः -व्या -व्यं, स्पृश्यः -श्या -श्यं, स्पर्शनीयः -या -यं.

TOUCHING, *a.* हृदयङ्गमः -मा -मं. *See* MOVING, PATHETIC, *a.*

TOUCH-STONE, *s.* निकषः, कषः, निकषपाषाणः, कषपाषाणः, निकषग्रावा *m.* (न्), आकषः, निकसः, कसः, शाणः, शानः, हेमलः.

TOUCHY, *a.* शीघ्रकोपी -पिनी &c. *See* IRRITABLE, PEEVISH.

TOUGH, *a.* दृढः -ढा -ढं, दुःखभेद्यः -द्या -द्यं, दुर्भेद्यः &c., दुःखछेद्यः &c., दुश्छेद्यः &c., दुःखछिन्नः -न्ना -न्नं, कठिनः -ना -नं, शिथिलदृढः &c.

TOUGHNESS, *s.* दृढता, दुर्भेद्यता, दुःखछेद्यता, कठिनता, काठिन्यं.

TOUR, *s.* भ्रमणं, परिभ्रमणं, पर्यटनं, विहारः, विहरणं.

TOURIST, *s.* परिभ्रमकः, भ्रमणकारी *m.* (न्), भ्रमणकृत्, विहारी *m.*

TOURNAMENT, TOURNEY, *s.* अश्वारोहिणां क्रीडायुद्धं.

TOW, *s.* स्थूलशणं, शणसूत्रं, स्थूलभङ्गा, शणस्थूलं.

To TOW, *v. a.* रज्जुना or रज्ज्वा कृष्, रज्जुना आकृष्य चल् in caus.

TOWARD, TOWARDS, *adv.* (In the direction of) प्रति, अनु, अभिमुखं, उद्दिश्य; 'towards the city,' नगरं प्रति, नगराभिमुखं; 'he set out towards the north,' उत्तरां दिशमुद्दिश्य प्रस्थितः.—(With respect to) उपरि, उद्दिश्य, उद्देशेन, प्रति affixed; 'towards me,' ममोपरि, मामुद्दिश्य, मां प्रति; 'want of courtesy towards you,' तवोपरि अदाक्षिण्यं; 'not behaving properly towards his father,' पितुरुपरि असदृशव्यवहारी.—(Nearly) प्रायस्; 'towards evening,' अभिसायं.

TOWARD, TOWARDLY, &c. *See* APT, FORWARD, SHARP, &c.

TOWEL, *s.* गात्रमार्जनी, अङ्गमार्जनी, गात्रमार्जनवस्त्रं, वरकं.

TOWER, *s.* प्रासादशिखरं -शृङ्गं, मञ्चः *f.*, दुर्गं. *See* TURRET.

TOWERING, *a.* प्रोन्नतः -ता -तं, उन्नतः -ता -तं. *See* ELEVATED.

TOWN, *s.* नगरं -री, पुरी, *see* CITY; 'town and country,' पुरजनपदं.

TOWN-FOLK, TOWNS-MAN, *s.* नगरजनः, नगरनिवासिजनः. *See* CITIZEN.

TOWN-HALL, *s.* नगरकार्य्यनिर्वाहयोग्या महाशाला.

TOY, *s.* क्रीडनकं, क्रीडाद्रव्यं, क्रीडावस्तु *n.*, खेलनी, क्रीडामृगः.

To TOY, *v. n.* *See To* PLAY, SPORT, DALLY, TRIFLE.

TOY-SHOP, *s.* क्रीडाद्रव्यविक्रयस्थानं, क्रीडावस्तुविक्रयगृहं.

TRACE, *s.* अभिज्ञानं, चिह्नं, लक्षणं, अङ्कः, पदवी, तत्त्वं, *see* MARK, FOOTSTEP.—(Of a carriage, &c.) प्रग्रहः, प्रग्राहः, चर्म्मबन्धः.

To TRACE, *v. a.* (Follow by some mark) अनुसृ, मार्गानुसरणं कृ, वर्त्मानुसरणं कृ, मृग्, मार्ग्, *see To* TRACK.—(Mark out) वाक्यरेखाम् अङ्क् (c. 10. अङ्कयति -यितुं) or लिख् (c. 6. लिखति, लेखितुं).

TRACHEA, *s.* श्वासमार्गः, श्वासप्रश्वासमार्गः, प्राणमार्गः.

TRACK, *s.* पदवी -विः *f.*, मार्गः, पथः, पन्थाः *m.*, *see* ROAD, TRACE.

To TRACK, *v. a.* पादानुसरणं कृ, पदानुसरणं कृ, मार्गानुसरणं कृ, अनुपदं या (c. 2. याति -तुं) or गम्, अनुसृ, *see To* PURSUE.

TRACKLESS, *a.* पादास्पृष्टः -ष्टा -ष्टं, पादाङ्करहितः &c., पदविहीनः &c.

TRACT, *s.* देशः, प्रदेशः, *see* REGION, COUNTRY.—(Short treatise) लेखः, पत्रिका, अल्पप्रबन्धः, स्वल्पप्रबन्धः.

TRACTABILITY, *s.* विधेयता, विनेयता, वश्यता, सविनयता.

TRACTABLE, *a.* विधेयः -या -यं, वश्यः &c., *see* DOCILE, MANAGEABLE.

TRADE, *s.* (Commerce) वाणिज्यं -ज्या, वणिज्यं, वणिक्कर्म्म *n.* (न्), वणिक्क्रिया, अर्थप्रयोगः, क्रयविक्रयः, व्यापारः, नीवरः, कोशातकी *m.* (न्), *see* COMMERCE.—(Occupation of a man of the third class) वैश्यक्रिया, वैश्यवृत्तिः *f.*—(Occupation) व्यापारः, व्यवसायः, व्यवहारः.

To TRADE, *v. n.* वाणिज्यं कृ, क्रयविक्रयं कृ, व्यापारं कृ, उपक्री.

TRADER, *s.* वणिक् *m.* (ज्), वाणिजिकः &c. *See* MERCHANT.

TRADESMAN, *s.* पत्तनवणिक् *m.* (ज्), नगरवणिक्, *see* SHOP-KEEPER.

TRADITION, *s.* लोककथा, इतिहासः, परम्परागतकथा, परम्परागतवाक्यं, पारम्पर्य्यं, परम्परागताचारः, पारम्पर्य्योपदेशः, पारम्परीयकथा, ऐतिह्यं, इतिह ind., सम्प्रदायः, आम्नायः, पुराणं, पूर्व्वं, धोरणिः *f.*, प्रवादः, आख्यायिका, गुरुक्रमः, ओघः.

TRADITIONAL, TRADITIONARY, *a.* परम्परागतः -ता -तं, परम्परायातः &c., परम्परीणः -णा -णं, पारम्परीयः -यी -यं, परम्पराप्राप्तः -प्ता -प्तं, ऐतिहासिकः -की -कं, पौराणिकः -की -कं, पुराणोक्तः -क्ता -क्तं, साम्प्रदायिकः -की -कं, क्रमागतः -ता -तं, क्रमायातः &c., क्रमप्राप्तः &c., ओघप्राप्तः &c., रूढः -ढा -ढं; 'instruction,' पारम्पर्य्योपदेशः; 'practice,' वंशानुचरितं.

TRADITIONALLY, *adv.* पारम्पर्य्येण, परम्पराक्रमेण, सम्प्रदायतस्.

To TRADUCE, TRADUCED. *See To* CALUMNIATE, MALIGN, &c.

TRADUCER, *s.* अपवादकः, अभिशंसी *m.* (न्), *see* CALUMNIATOR.

TRAFFIC, *s.* वाणिज्यं, लोकव्यवहारः, लोकयात्रा, *see* COMMERCE.

To TRAFFIC, *v. n.* वाणिज्यं कृ, पण्. *See To* COMMERCE, TRADE.

TRAGEDIAN, *s.* करुणरसाभिनयकुशलः, करुणारसाभिनेता *m.* (तृ).

TRAGEDY, *s.* दुःखपरिणामकनाटकं, करुणारसप्रधाननाटकं.

TRAGIC, TRAGICAL, *a.* (Pertaining to tragedy) दुःखपरिणामनाटकसम्बन्धी &c., करुणारसप्रधानः -ना -नं, करुणारसविषयकः -का -कं.—(Ending tragically) दुःखपरिणामकः -का -कं, दुष्परिणामी -मिनी &c., दुरन्तः -न्ता -न्तं.

To TRAIL, *v. a.* विकृष् (c. 1. -कर्षति -क्रष्टुं), आकृष्, समाकृष्, कृष्.

To TRAIL, *v. n.* विकृष् in pass. (-कृष्यते), आकृष्, कृष्, कृष्टः -ष्टा -ष्टं भू.

TRAIL, *s.* (Track) पदवि: -वी *f.*—(Scent left) गन्धः.

To TRAIN, *v. a.* विनी (c. 1. -नयति -नेतुं), शिक्ष् (c. 10. शिक्षयति -यितुं), अनुशिक्ष्, शास्, अनुशास्, अनुशासनं कृ, नियमनं कृ. *See To* DISCIPLINE.

TRAIN, *s.* (End of a robe) वसनाग्रः, मानवस्त्राग्रः, वसनभारः.—(Retinue) परिवारः, परिवर्हः, सामग्र्यं, *see* RETINUE.—(Concatenation) श्रेणी, प्रबन्धः, *see* SERIES, SUCCESSION; 'train of fraud,' कपटप्रबन्धः; 'of reasoning,' तर्कप्रबन्धः, अनुमानप्रबन्धः.—(Regular course) क्रमः, अनुक्रमः.—(Of gunpowder) आग्नेयचूर्णश्रेणी.—(Of a peacock) बर्हः, बर्हभारः.

TRAINED, *p. p.* शिक्षितः -ता -तं, विनीतः -ता -तं, अनुनीतः &c., कृताभ्यासः -सा -सं, दमितः -ता -तं, दान्तः -न्ता -न्तं. *See* DISCIPLINED, EDUCATED.

TRAINING, *s.* शिक्षा, *see* EDUCATION; 'of a horse,' अश्वशिक्षा.

TRAIT, *s.* लक्षणं; 'bad trait,' कुलक्षणं, दुर्लक्षणं; 'good,' सुलक्षणं.

TRAITOR, *s.* (One guilty of treason) राजद्रोही *m.* (न्), शत्रुसेवी *m.*, द्विट्सेवी *m.*, राजशत्रुः, देशद्रोही *m.*, भेत्ता *m.* (त्तृ), भेदकः, उपजापकः.—(One who betrays his trust) विश्वासघाती *m.* (न्), विश्वासघातकः, वञ्चकः, विसंवादी *m.*, मिथ्याप्रतिज्ञः, विश्रम्भघाती *m.*

TRAITOROUS, *a.* राजापथ्यकारी &c., राजद्रोही &c., *see* TREASONABLE.

TRAMMEL, *To* TRAMMEL. *See* SHACKLE, CLOY, *To* CLOY.

To TRAMP, *v. n.* चरणपातं कृ, पदन्यासं कृ, पदविक्षेपं कृ.

To TRAMPLE, *v. a.* पादाभ्यां मृद् (c. 9. मृद्नाति, मर्दितुं) or सम्मृद् or प्रमृद् or उपमृद् or अवमृद्, पादाघातेन मृद् or क्षुद् (c. 7. क्षुणत्ति, क्षोत्तुं), मर्दनं कृ, उपमर्दनं कृ, अवमर्दनं कृ, पादाभ्यां आक्रम् or समाक्रम्.

TRAMPLED, *p. p.* पादाभ्यां मर्दितः -ता -तं or सम्मर्दितः &c. or उपमर्दितः &c. or अवमर्दितः &c., पादाहतः -ता -तं, पादमर्दितः &c., पादन्यासमर्दितः &c., पादक्षुण्णः -ण्णा -ण्णं, प्रमथितः -ता -तं.

TRAMPLING, *s.* मर्दनं, उपमर्दः -र्दनं, अवमर्दः -र्दनं, सम्मर्दः -र्दनं, पादाहतिः *f.*, पादाघातः, पदघातः, चरणपातः, पादास्फालनं, पादाभ्यासः, चरणास्फालनं, प्रमथनं.

TRANCE, *s.* देहात्मवृत्तिः *f.*, मोहावस्था, समाधिः *m.*, तन्मयावस्था, मूर्च्छना, आवेशः, मोहः, लोकान्तरचित्तवृत्तिः *f.*

TRANQUIL, *a.* शान्तः -न्ता -न्तं, प्रशान्तः &c., स्थिरः -रा -रं, स्वस्थः -स्था -स्थं, शान्तात्मा -त्मा -त्म (न्), स्वस्थचित्तः -त्ता -त्तं, अक्षुभ्यः -भ्या -भ्यं. *See* CALM.

To TRANQUILIZE, *v. a.* शम् (c. 10. शमयति -यितुं), *see To* CALM, COMPOSE.

TRANQUILLITY, *s.* शान्तिः *f.*, शमः, शान्तता, निर्वृतिः *f.*, स्थिरता, अक्षुब्धता, अक्षोभः, स्वस्थता, स्वास्थ्यं, निरुपद्रवता. *See* CALMNESS, COMPOSURE.

To TRANSACT, *v. a.* निर्वह् (c. 10. -वाहयति -यितुं), व्यवह् (c. 1. -हरति -हर्तुं), विधा (c. 3. -दधाति -धातुं), प्रभ्री, सम्प्रभ्री, प्रभृ in caus.,

आचर्, समाचर्, अनुष्ठा, तीर् (c. 10. तीरयति -यितुं), पार् (c. 10. पारयति -यितुं), पच् (c. 10. पचयति -यितुं), कृ; 'business,' कर्मनिर्वाहं कृ.

TRANSACTED, *p. p.* निर्वाहितः -ता -तं, पक्षायितः -ता -तं, पचितः -ता -तं, आचरितः -ता -तं.

TRANSACTION, *s.* (The act of doing) निर्वाहः -हणं, प्रपञ्चनं, विधानं, आचरणं, प्रणयनं, अनुष्ठानं; 'of business,' कर्मनिर्वाहः.—(Affair) कर्म *n.* (न्), कार्यं, व्यापारः, व्यवहारः, वृत्तान्तः, पक्षायः.

To TRANSCEND, *v. a.* *See To* EXCEED, SURPASS, EXCEL.

TRANSCENDENTAL, *a.* अत्युत्तमः -मा -मं. *See* SURPASSING, SUPERIOR.

TRANSCENDENTLY, *adv.* अत्युत्तमं, अत्यन्तं, अधिकं, अभ्यधिकं, परमं.

To TRANSCRIBE, TRANSCRIPT. *See To* COPY, COPY.

TRANSCRIBER, *s.* लिपिकारः, प्रतिलिपिकारकः, आदर्शकारकः.

To TRANSFER, *v. a.* (Make over, cause to pass) संक्रम् in caus. (-क्रामयति -यितुं), उपसंक्रम्, संचर् in caus. (-चारयति -यितुं), सृ in caus. (-सर्पयति -यितुं), अध्यारुह् in caus. (-रोपयति -यितुं), अपवृत् (c. 10. -वर्तयति -यितुं); 'to another,' परस्मिन् or परस्मै or परहस्ते सृ in caus. or संक्रम् in caus.—(Convey from one place to another) स्थानान्तरीकृ, स्थलान्तरीकृ.

TRANSFERABLE, *a.* सङ्क्रामणीयः -या -यं, सञ्चारणीयः &c., परसमर्पणीयः &c.

TRANSFERRED, *p. p.* सङ्क्रामितः -ता -तं, सङ्क्रान्तः -न्ता -न्तं, उपसङ्क्रान्तः &c., सञ्चारितः &c., परहस्तसमर्पितः &c., अध्यस्तः -स्ता -स्तं.

TRANSFIGURATION, *s.* रूपान्तरग्रहणं, मूर्त्तिन्तरग्रहणं, रूपपरिवर्त्तनं.

To TRANSFIGURE, *v. a.* रूपान्तरीकृ, मूर्त्तिन्तरं कृ, *see To* TRANSFORM.

TRANSFIGURED, *p. p.* रूपान्तरीकृतः -ता -तं. *See* TRANSFORMED.

To TRANSFIX, *v. a.* व्यध् (c. 4. विध्यति, व्यद्धुं), प्रतिव्यध्, भिद् (c. 7. भिनत्ति, भेत्तुं), शूल् (c. 1. शूलति -लितुं), कील् (c. 10. कीलयति -यितुं), निखन् (c. 1. -खनति -नितुं), क्षुर् (c. 6. क्षुरति -रितुं). *See To* PIERCE.

TRANSFIXED, *p. p.* विद्धः -द्धा -द्धं, अतिविद्धः &c., कीलितः -ता -तं, क्षुरितः &c.; 'through the belly,' क्षुरितोदरः -रा -रं.

To TRANSFORM, *v. a.* रूपं परिवृत् in caus., रूपपरिवर्त्तनं कृ, रूपान्तरीकृ, विडस् (c. 10. -डसयति -यितुं). *See To* METAMORPHOSE.

TRANSFORMATION, *s.* रूपान्तरीकरणं, रूपान्तरं, मूर्त्तिपरिवर्त्तनं, विडसनं, व्याकृतिः *f.*, परिणामः. *See* METAMORPHOSIS.

TRANSFORMED, *p. p.* व्याकृतः -ता -तं, विडसितः &c. *See* METAMORPHOSED.

To TRANSFUSE, *v. a.* एकपात्रान्यत्रात् सावयित्वा अन्यपात्रे निषिच् (c. 10. -सेचयति -यितुं) or निषिच्, पात्रान्तरीकृ. *See To* TRANSFER.

TRANSFUSION, *s.* सङ्क्रामणं, सङ्क्रान्तिः *f.*, सञ्चारणं, पात्रान्तरीकरणं.

To TRANSGRESS, *v. a.* लङ्घ् (c. 10. लङ्घयति -यितुं), उल्लङ्घ्, अतिक्रम् (c. 1. -क्रामति -क्रमितुं), समतिक्रम्, व्यतिक्रम्, अभ्यतिक्रम्, अतिचर् (c. 1. -चरति -रितुं), व्यभिचर्, उल्लङ्घनं कृ, लङ्घनं कृ, अतिक्रमणं कृ, व्यतिक्रमं कृ, अतिवृत्. *See To* SURPASS.

To TRANSGRESS, *v. n.* अपराध्, अपराधं कृ. *See To* OFFEND, *v. n.*

TRANSGRESSED, *p. p.* उल्लङ्घितः -ता -तं, लङ्घितः &c., विलङ्घितः &c., अतिक्रान्तः -न्ता -न्तं, व्यतिक्रान्तः &c., समतिक्रान्तः &c., उत्क्रान्तः &c., अतीतः &c.

TRANSGRESSION, *s.* (The act of transgressing) लङ्घनं, उल्लङ्घनं, विलङ्घनं, अतिक्रमः -मणं, व्यतिक्रमः, समतिक्रमः, उत्क्रमः -मणं, अतिपातः, अनाचारः, उपायवः, अनयः, भङ्गः, लोपः -पनं, अमर्यादा.—

(Offence) अपराधः, पापं, पातकं, *see* OFFENCE.

TRANSGRESSOR, *s.* (One who goes beyond) अतिक्रामकः, अतिक्रमी *m.* (न्), उल्लङ्घी *m.*, अत्याचारी *m.*—(Sinner) अपराधी *m.*, *see* OFFENDER.

TRANSIENT, *a.* अचिरस्थायी -यिनी &c., अस्थायी &c., क्षणिकः -का -कं, क्षयविध्वंसी &c., भङ्गुरः -रा -रं, क्षणभङ्गुरः &c., चञ्चलः -ला -लं, अनित्यः -त्या -त्यं, अचिरविनश्वरः -रा -रं, नश्वरः &c., अशाश्वतः -ती -तं. *See* MOMENTARY, TEMPORARY.

TRANSIENTNESS, *s.* अचिरस्थायित्वं, अस्थायिता, अनित्यता.

TRANSIT, *s.* सङ्क्रमः -मणं, सङ्क्रान्तिः *f.*, सङ्क्रामः, क्रान्तिः *f.*, अतिक्रमः -मणं, गतिः *f.*; 'of a star,' तारासङ्क्रमः.

TRANSITION, *s.* सङ्क्रमः -मणं, सङ्क्रान्तिः *f.*, विकारः, सञ्चारः, अवस्थान्तरं, स्थित्यन्तरं, अभिलम्भनं, स्थानान्तरं.

TRANSITIVE, *a.* (Verb) सकर्मकः, सकर्मक्रिया; 'transitive voice,' परस्मैपदं.

TRANSITORY, *a.* अस्थायी &c., जगत् -गती -गत्. *See* TRANSIENT.

To TRANSLATE, *v. a.* (Remove), *see To* REMOVE, TRANSFER; 'to heaven,' सशरीरं स्वर्गम् आरुह् in caus.—(Into another language) भाषान्तरीकृ, अवद् (c. 1. -तरति -रितुं -रीतुं), अवतरणं कृ, विवृ, भाषान्तरे निरूप् (c. 10. -रूपयति -यितुं).

TRANSLATED, *p. p.* (Removed), *see* REMOVED; 'to heaven,' सशरीरस्वर्गारोपितः -ता -तं, सशरीरमुक्तः -क्ता -क्तं.—(Into another language) भाषान्तरीकृतः -ता -तं, अवतीर्णः -र्णा -र्णं, विवृतः -ता -तं, भाषान्तरे निरूपितः -ता -तं; 'Prákrit translated into Sanskrit,' प्राकृतः संस्कृते निरूपितः.

TRANSLATION, *s.* (Removal), *see* REMOVAL; 'to heaven,' सशरीरस्वर्गारोपणं, सशरीरमुक्तिः *f.*—(Into another language) भाषान्तरं, भाषान्तरीकरणं, अवतरणं, अवतारः, विवरणं, भाषान्तरे निरूपणं; 'loose translation,' भावानुहरणं.

TRANSLATOR, *s.* भाषान्तरकारी *m.* (न्), अवतरणकृत्, व्याख्याता *m.* (तृ), अर्थव्याख्याता *m.*, अर्थनिरूपकः. *See* INTERPRETER.

To TRANSMIGRATE, *v. n.* देहान्तरं गम् (c. 1. गच्छति, गन्तुं), शरीरान्तरं गम्, जन्मान्तरं or पुनर्जन्म प्राप्, योनिभ्रमणं कृ.

TRANSMIGRATION, *s.* देहान्तरप्राप्तिः *f.*, देहान्तरगतिः *f.* -गमनं, शरीरान्तरप्राप्तिः *f.*, पुनर्जन्म *n.* (न्), जन्मान्तरं, जन्ममरणं, योनिभ्रमणं, पुनरावृत्तिः *f.*, गतिः *f.*; 'exemption from it,' अपुनरावृत्तिः *f.*

TRANSMISSION, TRANSMITTAL, *s.* सञ्चारः -रणं, सङ्क्रामणं, सङ्क्रान्तिः *f.*, सञ्चालनं, प्रेरणं, प्रापणं, अभिवाहनं.

To TRANSMIT, *v. a.* संचर् in caus. (-चारयति -यितुं), संक्रम् in caus. (-क्रामयति -यितुं), उपसंक्रम्, प्रेर् (c. 10. प्रेरयति -यितुं), प्राप् in caus.

TRANSMITTED, *p. p.* सञ्चारितः -ता -तं, सङ्क्रामितः &c., प्रेरितः &c.

TRANSMUTATION, *s.* परिणामः, परिणामान्तरं, द्रव्यान्तरं.

To TRANSMUTE, *v. a.* द्रव्यान्तरीकृ, परिणामभेदं कृ, भावान्तरं कृ.

TRANSPARENCY, *s.* स्वच्छता -त्वं, अच्छता, प्रसन्नता, प्रसत्तिः *f.*, निर्मलता, प्रकाशभेद्यता, किरणभेद्यता, प्रकाशारोधकता.

TRANSPARENT, *a.* (Clear) स्वच्छः -च्छा -च्छं, अच्छः &c., प्रसन्नः -न्ना -न्नं, निर्मलः -ला -लं, अमलः &c., स्फटिकाभः -भा -भं.—(Transmitting light, not opake) प्रकाशभेद्यः -द्या -द्यं, किरणभेद्यः &c., प्रकाशारोधकः -का -कं, प्रकाशप्रतिबन्धकः &c., दृष्टयरोधकः &c., पारदृश्यकः &c., सच्छायः -या -यं.

To TRANSPIRE, *v. n.* प्रसिद्धः -द्धा -द्धं भू, प्रसिद्धीभू, प्रकाशः -शा -शं भू, प्रकाशीभू, प्रचलीभू, लोकविदितः -ता -तं भू.

To TRANSPLANT, *v. a.* स्थानान्तरे रुह् in caus. (रोपयति -यितुं) or रोपणं कृ, उन्मूल्य स्थानान्तरे रुह् in caus., उन्मूल् (c. 10. -मूलयति -यितुं).

TRANSPLANTED, *p. p.* स्थानान्तरे रोपितः -ता -तं, उन्मूलितः -ता -तं.

To TRANSPORT, *v. a.* (Convey, carry) तॄ (c. 10. तारयति -यितुं), वह्, वाह्, आवह्, संवह्, स्थानान्तरीकृ, आनी, *see To* CONVEY.—(As a criminal) विवस् (c. 10. -वासयति -यितुं), प्रवस्, निर्वस्, प्रव्रज् (c. 10. -व्राजयति -यितुं), देशान्तरीकृ, सागरपारे दूरीकृ, स्वदेशाद् दूरीकृ.—(Ravish), *see* the word.

TRANSPORT, *s.* (Conveyance) तारणं, सन्तारणं, वाहनं, आनयनं.—(Of passion) क्रोधावेशः, क्रोपावेशः.—(Rapture), *see* RAPTURE.

TRANSPORTATION, *s.* विवासः -सनं, प्रवासः -सनं, निर्वासनं, विवासकरणं, प्रव्राजनं, सागरपारे दूरीकरणं, सन्तारणं, सन्तारकत्वं.

TRANSPORTED, *p. p.* (Conveyed) सन्तारितः -ता -तं, तारितः &c., वाहितः &c.—(Exiled) विवासितः &c.—(Enraptured), *see* the word.

To TRANSPOSE, *v. a.* स्थानपरिवर्त्तनं कृ, स्थानविनिमयं कृ, स्थानविपर्य्ययं कृ, स्थानं परिवृत् (c. 10. -वर्त्तयति -यितुं), विपर्यस्.

TRANSPOSED, *p. p.* परिवर्त्तितः -ता -तं, विपर्यस्तः &c., व्यत्यस्तः &c.

TRANSPOSITION, *s.* स्थानपरिवर्त्तनं, स्थानविनिमयः, स्थानविपर्य्ययः, व्यत्ययः, विपर्य्ययः, विपर्य्यासः.—(In arithmetic) तुल्यशङ्किः *f.*

TRANSVERSE, *a.* तिर्य्यङ् -ञ्ची -र्य्यक् (च्), व्यत्यस्तः -स्ता -स्तं, विपरीतः &c.

TRANSVERSELY, *adv.* तिर्य्यक्, व्यत्यस्तं, कोणाकोणि, विपरीतं.

TRAP, *s.* उन्माथः, कूटयन्त्रं, कूटः, पाशः, वागुरा, जालं, यन्त्रपाशः, नाहः, पातिली. *See* SNARE.

TRAPEZIUM, *s.* विषमचतुरस्रं, विषमचतुर्भुजः, विषमचतुष्कोणः.

TRAPPINGS, *s. pl.* परिच्छदः, भूषणं, परिकर्म्म *n.*, *see* FINERY.—(Of a horse or elephant) परिस्तोमः, वर्णः, आदानं, आस्तरः -रणं, प्रवेणिः -णी *f.*, कुथः.

TRASH, *s.* असारद्रव्यं, तुच्छद्रव्यं, कुत्सितद्रव्यं. *See* RUBBISH.

TRAVAIL, *To* TRAVAIL, *See* under LABOR, *To* LABOR, *v. n.*

To TRAVEL, *v. n.* व्रज्, प्रव्रज्, देशभ्रमणं कृ, देशपर्य्यटनं कृ, देशाटनं कृ, अध्वना गम्, यात्रां कृ, चर्, विचर्. *See To* JOURNEY.

TRAVEL, TRAVELING, *s.* अध्वगमनं, मार्गगमनं, देशभ्रमणं, भ्रमणं, परिभ्रमणं, पर्य्यटनं, देशपर्य्यटनं, अटनं, यात्रा, संयात्रा, व्रज्या, अटाट्या, मार्गश्रमणं, प्रवासः; 'to return from travel,' प्रवासाद् आगम्; 'traveling-carriage,' पारियानिकः; 'companion,' सहचरः.

TRAVELLER, *s.* पथिकः, पान्थः, अध्वगः -गामी *m.* (न्), अध्वन्यः, अध्वनीनः, यात्रिकः, यादृच्छिकः, सारथिकः, मार्गस्थः, पथिलः, गन्तुः *m.*, गमथः, यायी *m.* (न्), देशिकः, इत्वरः, प्रोथः, देशिकः, अध्वनि वर्त्तमानः, परदेशसेवी *m.*; 'a great traveller,' बहुदेशदर्शी *m.*

To TRAVERSE, *v. a.* तॄ (c. 1. तरति -रितुं -रीतुं), अतितॄ, सन्तॄ, अतिक्रम् (c. 1. -क्रामति -क्रमितुं), परिक्रम्, पारं गम् (c. 1. गच्छति, गन्तुं), or कृ.

TRAVERSED, *p. p.* अतिक्रान्तः -न्ता -न्तं, तीर्णः &c., पारगतः &c., पारमितः &c.

TRAVESTY, *s.* हास्यजनकविडम्बनं, हास्यरसप्रधानानुकरणकाव्यं, हास्यजनकानुकरणकविता, आकारगोपनं.

TRAY, *s.* पात्रं, भाजनं, शरावः, द्रोणिः -णी *f.*, आधारः

TREACHEROUS, *a.* विश्वासघाती &c., मिथ्याप्रतिज्ञः -ज्ञा -ज्ञं, विसंवादी &c., असत्यसन्धः -न्धा -न्धं, अविश्वास्यः &c., *see* PERFIDIOUS, FAITHLESS.

TREACHEROUSLY, TREACHEROUSNESS. *See* PERFIDIOUSLY, &c.

TREACHERY, *s.* विश्वासघातः, विश्वासभङ्गः, विसंवादः, प्रतिज्ञाभङ्गः, उपधिः -धी *f.*, उपजपः, धूर्त्तता, अभिमरः. *See* PERFIDY.

Treacle, *s.* इक्षुसारः, इक्षुरसक्वाथः, शर्करासारः. *See* Molasses.

To tread, *v. n.* चरणपातं कृ, पदपातं कृ, पादपातं कृ, पदन्यासं कृ, पादापैयं कृ, पदविष्टम्भं कृ, क्रम् (c. 1. क्रामति, क्रमते -मितुं).

To tread, *v. a.* आक्रम् (c. 1. -क्रामति -क्रमितुं), समाक्रम्, पादाभ्याम् आक्रम् or पीड्, पदन्यासं कृ, पादन्यासं कृ, पादापैयं कृ; 'to tread on one's steps,' पदाक्रमणं कृ; 'one who does so,' पदाक्रान्तः. —(Crush with the feet) पादाभ्यां मृद् or अवमृद्, *see To* trample, stamp, step.

Tread, *s.* पदन्यासः, पादन्यासः, पदपातः, पादपातः, चरणपातः, क्रमः, विक्रमः, पादाभ्यासः, पादाघातः. *See* Step, Pace.

Treason, *s.* राजद्रोहः, राजाभिद्रोहः, राजशरीराभिद्रोहः, राजापकारः, राजापथ्यकारित्वं, राजविरोधः.

Treasonable, *a.* राजद्रोही -हिणी -हि (न्), राजाभिद्रोही &c., राजापकारी &c., राजद्रोहसम्बन्धी &c., राजविरोधी &c.

Treasure, *s.* (Store of valuables) निधिः *m.*, निधानं, कोषः.—(Accumulation of money, &c.) धनसञ्चयः, द्रव्यसञ्चयः, वित्तनिचयः, धनराशिः *m.*, धनसङ्घातः, सञ्चितधनं.—(Money, &c.) धनं, वित्तं, वसु *n.*—(A treasure) निधिः *m.*, कुलाभिः *m.*—(Divine treasure) निधिः *m.*, सेवधिः *m.*, *see* under Kuvera.

To treasure, *v. a.* निधिं कृ, निधा, संचि, कोषीकृ. *See To* hoard.

Treasured, *p. p.* सञ्चितः -ता -तं, कोषीकृतः &c., कोषभूतः -ता -तं.

Treasurer, *s.* कोषाध्यक्षः, कोशाध्यक्षः, कोशाधीशः, कोशनायकः, धनाधिकारी *m.* (न्), भाण्डागाराध्यक्षः, धनाध्यक्षः, अर्थाधिकारी *m.*, धनाध्यक्षः, कोडपालः, गञ्जाधिकारी *m.*, गञ्जाधिपः, धनाधिपः, भाण्डागारी *m.*, भौरिकः.

Treasurership, *s.* कोषाधिकारः, अर्थाधिकारः, गञ्जाधिकारित्वं.

Treasury, *s.* कोषः, कोशः, धनागारं, भाण्डागारं, धनशाला, धनगृहं, कोशः -शकं, गञ्जः -ञ्जं, अर्थसंस्थानं, निधिः *m.*

To treat, *v. a.* (Act or behave towards) आचर् (c. 1. -चरति -रितुं), समाचर्, व्यवह् (c. 1. -हरति -हर्तुं), सेव् (c. 1. सेवते -वितुं), विधा (c. 3. -दधाति -धातुं), प्रणी (c. 1. -नयति -नेतुं), विनी; 'one should treat one's son like a friend,' पुत्रं मित्रवद् आचरेत्; 'to treat ill,' अपकृ, कुव्यवहारं कृ; 'to treat with respect,' पूज्, सत्कृ, *see To* honour; 'with hospitality,' सत्कृ, सत्कारं कृ, आतिथ्यं कृ.—(Give food, &c.) उपनयेन तृप् (c. 10. तर्पयति -पितुं) or सन्तृप्.—(A disease) उपचारं कृ, प्रयोगं कृ, चिकित्सां कृ.

To treat, *v. n.* (Treat of any subject) विषयप्रसङ्गं कृ, प्रसक्तिं कृ, प्रस्तावं कृ, प्रस्तुतं -तां कृ, मन्त्र् (c. 1. मन्त्रयति -यितुं), मन्त्रणं कृ, विचर् (c. 10. -चारयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं); 'to treat at length,' प्रपञ्चनं कृ.—(Negotiate) पण्, *see* the word.

Treat, *s.* उपनयनसत्कारः, परमान्नभोजनं, *see* Feast, Entertainment.

Treated, *p. p.* आचरितः -ता -तं, व्यवहृतः &c., व्यवहारितः &c., सेवितः &c.; 'ill-treated,' अपकृतः &c., कुव्यवहारितः -ता -तं; 'well-treated,' सत्कृतः -ता -तं, सुव्यवहारितः &c., सेवितः &c., सेव्यमानः -ना -नं.—(Treated of) प्रस्तुतः -ता -तं, विचारितः -ता -तं, मन्त्रितः &c., निरूपितः &c.; 'at length,' प्रपञ्चितः -ता -तं.

Treatise, *s.* निबन्धः, ग्रन्थः, ग्रन्थः, लेखः, शास्त्रं, पुस्तकं.

Treatment, *s.* प्रक्रमणं, प्रणीतिः *f.*, नयः, आचरणं, प्रयोगः, प्रवृत्तिः *f.*, उपायप्रयोगः; 'of disease,' उपचारः, चिकित्सा.

Treaty, *s.* नियमः, समयः, संविद् *f.* *See* Compact, League.

Treble, *a.* त्रिगुणः -णा -णं, त्रिविधः -धा -धं, त्रिगतः -ता -तं.

Treble, *s.* (In music) उच्चस्वरः, उच्चस्वरः, तीक्ष्णस्वरः.

To treble, *v. a.* त्रिगुणीकृ, त्रिगुण (nom. त्रिगुणयति -यितुं).

Trebly, *adv.* त्रिगुणं, त्रिधा, त्रेधा, त्रिविधं, वारत्रयं.

Tree, *s.* वृक्षः, तरुः *m.*, द्रुमः, पादपः, द्रुः *m.*, वनस्पतिः *m.*, वनराजिः *m.*, क्षितिरुहः, महीरुहः, भूरुहः, फलग्राही *m.* (न्), फलदः, पल्लवी *m.* (न्), रोहिः *m.*, अवनिरुह् *m.* (ह्), अवनिरुहः, स्थन्वी *m.* (न्), विटपी *m.*, शाखी *m.*, अंहिपः, गच्छः, पची *m.*, कुठः, कुटः, अगमः, पलाशी *m.*, शालः, सालः, अनोकहः, वानस्पत्यः; 'a village tree, held in veneration,' चैत्यः; 'relating to a tree,' वार्क्षः -क्षी -क्षं.

Trefoil, *s.* त्रिपर्णीः -र्णी -र्णं, त्रिपत्रः -त्रा -त्रं, त्रिदला.

Trellis, trellis-work, *s.* जालं -लकं, जालिका, गवाक्षजालं.

To tremble, *v. n.* कम्प् (c. 1. कम्पते -म्पितुं), वेप् (c. 1. वेपते -पितुं), स्फुर् (c. 6. स्फुरति -रितुं), चपल (nom. चपलायते). *See To* quiver, shake, *v. n.*

Trembling, *part.* कम्पमानः -ना -नं, वेपमानः &c., जातकम्पः -म्पा -म्पं, जातवेपथुः -थुः -थु, उल्लुलः -ला -लं, उल्लुलन् -लन्ती &c. *See* Quivering.

Trembling, *s.* कम्पः -म्पनं, प्रकम्पः, उत्कम्पः, वेपनं, प्रवेपथुं, स्फुरणं, विधुवनं, उल्लुलः; 'of voice,' स्वरभङ्गः, *see* Quivering, *s.*

Tremendous, *a.* अतिदारुणः -णा -णं, अतिभयानकः, *see* Fearful.

Tremor, *s.* वेपथुः *m.*, कम्पः, वेपनं, स्फुरणं, स्फूर्तिः *f.*, चलनं, विधूतिः *f.*, विधुतिः *f.*, विधूननं, गात्रकम्पः. *See* Trembling, *s.*

Tremulous, *a.* लोलः -ला -लं, चञ्चलः &c., चपलः &c., कम्पनः -ना -नं, कम्पः -म्पा -म्पं, सकम्पः -म्पा -म्पं, कम्पान्वितः -ता -तं, सोत्कम्पः &c., तरलः -ला -लं, तरलितः -ता -तं, लुलितः &c., आलोलः -ला -लं, चटुलः &c., स्फूर्जिमान् -मती &c.

Tremulously, *adv.* सकम्पं, सवेपनं, सस्फुरणं, चञ्चलं, तरलं.

Tremulousness, *s.* लोलता, चञ्चलता, चपलता, सकम्पता -त्वं.

Trench, *s.* परिखा, खातं, कुल्या, उपकुल्या, परिखादं, खन्नः, *see* Ditch; 'trench at the foot of a tree,' आलवालं, स्थानकं.

To trench, *v. a.* or *n.* *See To* intrench, encroach.

Trencher, *s.* काष्ठमयपात्रं, काष्ठमयभाजनं, काष्ठमयभाण्डं.

Trepidation, *s.* कम्पः, भयकम्पः, विभ्रमः. *See* Trembling, Terror.

To trespass, *v. a.* (Pass beyond, exceed propriety) अतिक्रम् (c. 1. -क्रामति -क्रमितुं), उत्क्रम्, मर्य्यादातिक्रमं कृ, मर्य्यादालङ्घनं कृ, सीमातिक्रमणं कृ, सीमोल्लङ्घनं कृ, *see To* transgress, offend.—(Intrude, encroach) अनधिकारपूर्वम् आक्रम् or आक्रमणं कृ, *see To* intrude, &c.

Trespass, *s.* अतिक्रमः, उत्क्रमः, आक्रमणं, मर्य्यादातिक्रमः, अनधिकारप्रवेशः, व्यभिचारः, अमर्य्यादा, अपराधः, द्रोहः.

Trespasser, *s.* मर्य्यादातिक्रमी *m.* (न्), अनधिकारप्रवेशकः.

Tress, *s.* अलकः, कबरः -री -रं, केशवेशः, केशगर्भकः. *See* Curl.

Triad, *s.* त्रिकं, त्रयं -यी; 'the Hindú triad,' त्रिमूर्तिः *f.*

Trial, *s.* (Testing, proving) परीक्षा -क्षणं, अनुभवः, *see* Test; 'under trial,' अनुभूयमानः -ना -नं; 'subjected to trial,' अनुभवारूढः -ढा -ढं.—(Experience) अनुभवः, अनुभूतिः *f.*, प्रतीतिः *f.*—(Attempt) यत्नः, प्रयत्नः, उद्योगः.—(Judicial trial) विचारः, व्यवहारदर्शनं, धर्म्मविवेचनं; 'day of trial,' विचारदिनं, आह्वानदर्शनं.—(Affliction, calamity), *see* the words.

Triangle, *s.* त्रिकोणः -णं, त्रिभुजः, त्र्यस्रं, त्रिशृङ्गः -ङ्गं, त्रिपुटकः, सूचिः *f.*, त्रिकोणाकृतिः *f.*, त्रिकोणमूर्तिः *f.*; 'acute angled,' अन्तर्लम्बः; 'equilateral,' समत्रिभुजः; 'isosceles,' द्विसमत्रिभुजः; 'scalene,'

त्रिभुजभुजः; 'base of a triangle,' भुजः; 'segment of the base,' अवाधा; 'verticle arm,' कोटिः *f.*; 'area,' त्रिकोणक्षेत्रं.

TRIANGULAR, *a.* त्रिकोणाकृतिः -तिः -ति, त्रिकोणाकारः -रा -रं, त्रिभुजाकारः &c., अस्राकारः &c., त्र्यस्रः -स्रा -स्रं.

TRIBE, *s.* जातिः *f.*, वर्गः, कुलं, वर्गः, गणः, गोत्रं; 'the four tribes or classes,' चतुर्वर्णीं; these are, 1. the sacerdotal, *see* BRAHMIN; 2. the military, *see* under MILITARY, *a.*; 3. the agricultural or mercantile, *see* AGRICULTURIST; 4. the servile, *see* SHÚDRA.

TRIBRACH, *s.* (Foot of three short syllables) त्राक्षरपदः.

TRIBULATION, *s.* क्लेशः, दुःखं, सङ्कटं. *See* DISTRESS, TROUBLE.

TRIBUNAL, *s.* (Court of justice) धर्म्मसभा, न्यायसभा, धर्म्मशाला.—(Seat of a judge) धर्म्मासनं, न्यायासनं.

TRIBUTARY, *a.* or *s.* करदः -दा -दं, शुल्कदः -दा -दं, नैगमः -मी -मं; 'made so,' करदीकृतः -ता -तं.—(Paid in tribute) करूपः &c.

TRIBUTE, *s.* करः, शुल्कः -ल्कं, करभारः, उपहारः. *See* TAX.

TRICE, *s.* निमेषः, पलं, क्षणः, त्रुटिः *f.*; 'in a trice,' निमेषमात्रेण.

TRICK, *s.* (Artifice to deceive) छलं, छद्म *n.* (न्), व्यपदेशः, माया, कपटः, व्याजः, कैतवप्रयोगः, *see* FRAUD.—(Bad or strange habit) व्यसनं, दुर्गुणं, दुर्लक्षणं, अचलक्षणं, चेष्टा, कुचेष्टा, क्षेलितं; 'monkey trick,' मर्कटचेष्टा, *see* PRANK.

To TRICK, TRICKERY. *See To* DECEIVE, DECEPTION, DECEIT.

TRICKED, *p.p.* वञ्चितः -ता -तं, व्यपदिष्टः -ष्टा -ष्टं. *See* DECEIVED.

To TRICKLE, *v. n.* शनैः शनैः स्यन्द् (c. 1. स्यन्दते -न्दितुं) or सु (c. 1. सवति, सोतुं) or स्रु or री. *See To* OOZE, FLOW.

TRICKLING, *part.* शनैः शनैः स्यन्दमानः -ना -नं. *See* OOZING, *part.*

TRICKLING, *s.* स्यन्दनं, निस्यन्दः, स्रवणं, स्रवः, स्रावः. *See* OOZING, *s.*

TRIDENT, *s.* त्रिशूलः -लं, त्रिशिखं, त्रिशीर्षकः -कं, पिनाकः -कं; 'of Śiva,' *see* under ŚIVA; 'bearer of one,' त्रिशूलपाणिः *m.*

TRIDUAN, *a.* त्र्याह्निकः -की -कं, त्र्यहान्तरितः -ता -तं.

TRIED, *p. p.* परीक्षितः -ता -तं, अनुभूतः &c.; 'person,' उपधाशुचिः.

TRIENNIAL, *a.* त्रैवार्षिकः -की -कं, त्र्याब्दिकः &c., त्रिवर्षात्मकः &c.

TRIFLE, *s.* स्वल्पविषयः, अल्पविषयः, लघुविषयः, स्त्रीकाल्पवस्तुः.

To TRIFLE, *v. n.* बालकवद् आचर्, बालकवृत्तिं सेव् or आस्था, लघुविषयव्यापृतः -ता -तं भू, खेला (nom. खेलायति), क्रुड् (c. 6. क्रुडति -डितुं); 'trifle away,' क्षिप्.

TRIFLER, *s.* लघुविषयव्यापृतः -व्यापारी *m.*, कालक्षेपकः.

TRIFLING, *a.* लघुः -घुः -घु, स्वल्पः -ल्पा -ल्पं, अल्पप्रभावः -वा -वं, लघुप्रभावः &c., अगणनीयः -या -यं, क्षुल्लकः -का -कं, तृणप्रायः -या -यं, ह्रनीयान् -यसी -यः (स्). *See* INCONSIDERABLE.

TRIFOLIATE, *a.* त्रिपर्णीः -र्णी -र्णि, त्रिपत्रः -त्रा -त्रं, त्रिदलः -ला -लं.

TRIGONOMETRICAL, *a.* त्रिकोणमितिविषयकः -का -कं -सम्बन्धी -न्धिनी &c.

TRIGONOMETRY, *s.* त्रिकोणमितिः *f.*, त्रिकोणगणनविद्या.

TRILATERAL, *a.* त्रिभुजः -जा -जं, त्रिभुजात्मकः -का -कं.

TRILITERAL, *a.* त्र्यक्षरकः -का -कं, त्र्यक्षररूपः &c., त्रिवर्णीः &c.

TRILL, *To* TRILL. *See* QUAVER, *To* QUAVER.

TRILLION, *s.* प्रयुतघनः, धुनः; 'hundred trillion,' अक्षौहिणी.

TRIM, *a.* विनीतः -ता -तं, सुवेषः -षा -षं. *See* NEAT.

TRIM, *s.* (Condition) अवस्था, स्थितिः *f.*—(Gear) सज्जा.

To TRIM, *v. a.* विरच् (c. 10. -रचयति -यितुं), कृप् (c. 10. कल्पयति -यितुं), सुवेषं -षा कृ, सुस्थीकृ. *See To* ARRANGE, DRESS, CLIP.

TRIMMING, *s.* विरचनं -ना; 'of a garment,' परिग्रहः.

TRINITARIAN, *s.* त्र्यक्षित्रयैकत्ववादी *m.* (न्), त्र्यक्षित्रयात्मकदेवतात्रयी *f.*, त्रयैकत्ववादी *m.*, त्रयैकत्वमतावलम्बी *m.*

TRINITY, *s.* त्र्यक्षित्रयैकत्वं, त्रयैकत्वं, त्र्यक्षित्रयात्मकदेवता.

TRINKET, *s.* कङ्कणः -णं, भूषणं, *see* ORNAMENT; 'for the hair,' बालपाश्या, पारितथ्या; 'for the forehead,' ललाटिका, पत्रपाश्या.

TRINOMIAL, *a.* (In mathematics) त्रिपदः -दा -दी -दं.

TRIO, *s.* त्रयं -यी, त्रिकं, त्रितयं, त्रिकूटं. *See* TRIAD.

TRI-OCULAR, *a.* त्रिनयनः -नी -नं, त्रिनेत्रः -त्रा -त्रं, त्रिलोचनः -ना -नं.

To TRIP, *v. a.* (Trip up) स्खल् in caus. (स्खलयति -यितुं), परपादम् आहत्य पत् (c. 10. पातयति -यितुं), उद्घातं कृ, *see To* SUPPLANT.

To TRIP, *v. n.* स्खल् (c. 1. स्खलति -लितुं), प्रस्खल्, स्खलनं कृ, *see To* STUMBLE.—(Walk lightly) लघुगत्या गम् or चर् or चल्.

TRIP, *s.* (Stumble) स्खलनं, उद्घातः.—(Excursion) भ्रमणं, ईक्षणं.

TRIPARTITE, *a.* त्रिभागः -गा -गं, त्रिखण्डः -ण्डा -ण्डं, त्र्यंशः -ंशा -ंशं.

TRIPE, *s.* अन्त्रं, उदरं, पक्वान्त्रं. *See* ENTRAILS.

TRIPETALOUS, *a.* त्रिदलः -ला -लं, त्रिदलविशिष्टः -ष्टा -ष्टं.

TRIPLE, TRIPLED, *a.* त्रिगुणः -णा -णं, त्रिविधः -धा -धं, त्रिरूपः -पा -पं, त्रिगतः -ता -तं, त्रिवृत् *m. f. n.*, त्रिधा ind., त्रेधा ind.

To TRIPLE, TRIPLET. *See To* TREBLE, TRIAD, TRIO.

TRIPLICITY, *s.* त्रैविध्यं, त्रिविधत्वं, त्रैगुण्यं, त्रिरूपता.

TRIPOD, TRIPOS, *s.* (Any thing with three feet) त्रिपदं, त्रिपादं.

TRISYLLABIC, *a.* त्र्यक्षरः -रा -रं, त्र्यक्षरी -रिणी &c., त्र्यस्रः -स्रा -स्रं.

TRISYLLABLE, *s.* त्र्यक्षरशब्दः, त्र्यक्षरविशिष्टशब्दः.

TRITE, *a.* उज्झितः -ता -तं, लोकोज्झितः &c., जीर्णः -र्णा -र्णं.

TRITENESS, *s.* उज्झितता, लोकोज्झितता, प्रसिद्धता, जीर्णता.

TRITHEISM, *s.* देवत्रयवादः, देवत्रयमतं, त्रिदेववादः.

To TRITURATE, *v. a.* चूर्ण्, पिष्, संघृष्, संघर्षं कृ. *See To* GRIND.

TRITURATION, *s.* सङ्घर्षः -र्षणं, पिनर्दः -र्दनं, परिमलः, *see* GRINDING.

TRIUMPH, *s.* (Pomp of a victory) जययात्रा, विजययात्रा, जयोत्सवः.—(Victory) विजयः, जयः, जयश्रीः *f.*—(Joy for victory) जयानन्दः, जयहर्षः, जयोल्लासः, जयगर्वः.

To TRIUMPH, *v. n.* (Celebrate victory with pomp) जययात्रां कृ, विजययात्रां कृ, जयोत्सवं कृ.—(Obtain victory) विजि (c. 1. -जयते -जेतुं), जि, विजयी भू.—(Exult) जयजयशब्दं कृ, जयानन्दं कृ.

TRIUMPHAL, *a.* जय or विजय in comp.; 'triumphal arch,' जयतोरणं.

TRIUMPHANT, *a.* विजयी -यिनी -यि (न्), जयी &c., जयवान् -वती -वत् (न्), विजयवान् &c., विजयमानः -ना -नं, जयशाली &c., जययुक्त -क्ता -क्तं, प्राप्तजयः -या -यं, लब्धजयः &c., जिष्णुः -ष्णुः -ष्णु, जेता -त्री -तृ (तृ), जैत्रः -त्री -त्रं, जयानन्दी &c., जितश्रमः -मा -मं, जितारिः -रि -रि.

TRIUMPHANTLY, *adv.* सविजयं, सजयानन्दं, सजयदर्पं, जयदर्पेण.

TRIUMVIRATE, *s.* पुरुषत्रयप्रभुत्वं, त्र्यक्षित्रयप्रभुत्वं.

TRIUNE, *a.* त्र्येकः -का -कं, त्रयात्मकैकः -का -कं.

TRIVIAL, *a.* लघुः -घुः -घ्वी -घु, क्षुद्रः -द्रा -द्रं. *See* TRIFLING.

TRIVIALNESS, *s.* लघुता, लाघवं, क्षुद्रता, अतिक्षुद्रता, स्वल्पता.

TROCHEE, *s.* (Foot of two syllables) त्रालः, गलः, गलपदं.

TRODDEN, *p.p.* पादमर्दितः -ता -तं, पादमृदितः &c., पादाहतः &c., पदाहतः &c., चरणावनमितः -ता -तं, पादस्पृष्टः -ष्टा -ष्टं, पदस्पृष्टः &c.

TROOP, *s.* (Band, collection) गणः, वृन्दं, यूथं, सङ्घः, समूहः, *see* MULTITUDE; 'in troops,' यूथशस्.—(Of cavalry) अश्वारूढसैनिकगुल्मः.—(Troops) सेनाः *m. pl.*, सैनिकाः *m. pl.*, *see* FORCES.

TROOPER, *s.* अश्वारूढसैनिकः, अश्वारूढसैन्यः, *see* HORSEMAN.

TROPE, *s.* रूपकं, व्यञ्जनं. *See* METAPHOR, FIGURE.

TROPHY, *s.* (Triumphal column) जयस्तम्भः, रणस्तम्भः, यूपः -पं.—(Memorial of victory) जयचिह्नं, जयस्मारकं.

TROPIC, *s.* (The line) अयनसीमा, क्रान्तिसीमा, दक्षिणोत्तरायणसीमा, अयनान्तः.—(Tropics) क्रान्तिवलयः, क्रान्तिवृत्तं, अयनवृत्तं, क्रान्तिमण्डलं.

TROPICAL, *a.* क्रान्तिवलयसम्बन्धी &c., क्रान्तिवृत्तसम्बन्धी &c., क्रान्तिवलयान्तर्गतः -ता -तं.—(Metaphorical), *see* the word.

TROT, *s.* धोरितं -तकं, धौरितकं, धोरणं, धारितं -तकं, धौर्य्यं, धारा.

To TROT, *v. n.* धोर् (c. 1. धोरति -रितुं), धोरणं कृ, धोरितं कृ.

TROTH, *s.* भक्तिः *f.*, प्रत्ययः, विश्वासः. *See* FAITH, TRUTH, FIDELITY.

To TROUBLE, *v. a.* आयस् (c. 10. -यासयति -यितुं), बाध् (c. 1. बाधते -धितुं), उपरुध् (c. 7. -रुणद्धि -रोद्धुं), क्लिश्, तप्, व्याकुलीकृ, अर्द्, व्यथ्, व्यग्रं -ग्रां कृ, कष्टं कृ, क्लेशं कृ or दा, कृच्छ्रं दा, *see To* HARASS; 'dont trouble yourself,' अलम् आयासेन.

TROUBLE, *s.* क्लेशः, कष्टं, आयासः, प्रयासः, दुःखं, बाधः -धा, उपरोधः, पीडा, व्यथा, तापः, सन्तापः, आपद् *f.*, आपत्तिः *f.*, विपद्, विपत्तिः *f.*, दुर्दशा, दुःस्थितिः *f.*, कष्टावस्था, व्यसनं, उपद्रवः, सङ्कटं, *see* CALAMITY, PERPLEXITY; 'a sea of trouble,' विपत्सागरः.—(Pains) यत्नः, *see* PAINS.—(That which gives annoyance) कण्टकः -कं, शल्यं, दुःखं.

TROUBLED, *p. p.* बाधितः -ता -तं, क्लेशितः &c., क्लिष्टः -ष्टा -ष्टं, उपरुद्धः -द्धा -द्धं, दुःखितः -ता -तं, सन्तापितः &c., कातरः -रा -रं, व्यग्रः -ग्रा -ग्रं, उद्विग्नः -ग्ना -ग्नं, विह्वलः -ला -लं, आर्त्त in comp.; as, 'troubled with thirst,' तृषार्त्तः -र्त्ता -र्त्तं; 'with hunger,' क्षुधार्त्तः &c.

TROUBLESOME, *a.* कष्टकरः -रा -रं, कष्टकारकः -का -कं, कष्टावहः -हा -हं, क्लेशकारी -रिणी -रि (न्), क्लेशावहः -हा -हं, दुःखावहः &c., श्रमावहः &c., आयासहेतुकः -का -कं, कष्टः -ष्टा -ष्टं, दुष्टः &c., विषमः -मा -मं, दुर्निवहः -हा -हं, सकण्टकः -का -कं; 'a troublesome fellow,' कण्टकः.

TROUBLOUS, *a.* सोपद्रवः -वा -वं, सोपप्लवः &c. *See* CALAMITOUS.

TROUGH, *s.* द्रोणिः -णी *f.*, द्रुणिः -णी *f.*; 'for watering cattle,' निपानं, प्रपा, आहावः, पुण्यं.

TROWEL, *s.* (Of masons) कर्णी, लेपनयन्त्रं.

TROWSERS, *s. pl.* जङ्घावस्त्रं, कटिवस्त्रं, जङ्घापरिधानं, कञ्चुकः.

TRUANT, *a.* कर्म्मविमुखः -खा -खं, कर्म्मपराङ्मुखः &c., विलम्बी -म्बिनी -म्बि (न्), अलसः -सा -सं; 'to play truant,' कर्म्मविमुखः -खा -खं भू, विलस् (c. 1. -लसते -सितुं), अलसवद् आचर्.

TRUCE, *s.* अवहारः, सावधिकसन्धिः *m.*, निरूपितकालपर्य्यन्ता युद्धनिवृत्तिः *f.*; 'a truce to jesting,' विरमतु परिहासः.

TRUCK, *s.* क्षुद्रचक्रः शकटः, नीचचक्रं द्रव्यवाहनं, नीचशकटः.

To TRUCKLE, *v. n.* अत्यनुरोधं कृ, छन्दोनुरोधं कृ, छन्दोनुवृत्तिं कृ.

TRUCULENT, *a.* क्रूरः -रा -रं, निष्ठुरः &c. *See* SAVAGE.

To TRUDGE, *v. n.* पादाभ्यां व्रज् or चर्, आयासेन व्रज्.

TRUE, *a.* (Not false) सत्यः -त्या -त्यं, तथ्यः -थ्या -थ्यं, यथार्थः -र्था -र्थं, सम्यक् -मीची -म्यक् (क्), समीचीनः -ना -नं, ऋतः -ता -तं, सत्यवान् -वती &c., उपपन्नः -न्ना -न्नं, सिद्धः -द्धा -द्धं, *see* GENUINE, REAL, EXACT; 'true and false,' सदसत्; 'it is very true,' युक्तं, युज्यते, उपपन्नं.—(True to obligations, keeping faith) सत्यप्रतिज्ञः -ज्ञा -ज्ञं, सत्यसन्धः -न्धा -न्धं, सत्यशीलः -ला -लं, सत्यव्रतः -ता -तं, *see* HONEST, FAITHFUL.

TRUENESS, *s.* सत्यता, तथ्यता, यथार्थता, सम्यक्त्वं. *See* TRUTH.

TRUISM, *s.* स्वतःस्पष्टवाक्यं, स्वतःप्रमाणकवचनं, स्वतःसिद्धवाक्यं.

TRULY, *adv.* सत्यं, यथार्थं -र्थतस्, अर्थतस्, तत्त्वतस्, वस्तुतस्, सम्यक्, परमार्थतस्, अञ्जसा, एवं. *See* REALLY, CERTAINLY.

TRUMPERY, *s.* असारद्रव्यं, तुच्छद्रव्यं, उच्छिष्टं. *See* TRASH.

TRUMPET, *s.* (Instrument) तूरी, रणतूरी.—(Flower) पाटलिः *m. f.*, पाटला, फलेरुहा, कृष्णवृन्ता, कुबेराक्षी, अमोघा, मोघा, काचस्थाली, काली, स्थाली, तोयपुष्पी, तोयप्रष्ठा, तोयाधिवासिनी.

To TRUMPET, *v. a.* तूरीवादनपूर्व्वं प्रकाश्. *See To* PUBLISH.

TRUMPETER, *s.* तूरीवादकः, रणतूरीवादकः, तूरीध्मः.

TRUNCHEON, *s.* गदा, यष्टिः *m.*, दण्डः. *See* CLUB, CUDGEL.

To TRUNDLE, *v. a.* and *n.* *See To* ROLL, *v. a.* and *n.*

TRUNK, *s.* (Of a tree) स्कन्धः, प्रकाण्डः -ण्डं, काण्डः -ण्डं, गण्डिः *m.*; 'of a lopped tree,' स्थाणुः *m.* -णु *n.*, ध्रुवः, शङ्कुः *m.*—(Of the body) शरीरकाण्डः -ण्डं; 'headless trunk,' कबन्धः, अपमूर्द्धकलेवरं.—(Main body) मुख्यभागः.—(Of an elephant) शुण्डा, शुण्डादण्डः, हस्तः, करः, भुजः.—(Chest, box) भाण्डं.

TRUSS, *s.* (Of hay, &c.) तृणकूर्च्चः, तृणभारः, तृणगुच्छः.—(Bandage) पट्टः -ट्टकः, कवलिका, आधारः, बन्धनं.

To TRUSS, *v. a.* सम्बन्ध्, कूर्च्चीकृ, कील् (c. 10. कीलयति -यितुं).

TRUST, *s.* (Confidence) विश्वासः, प्रत्ययः, विश्रम्भः, निष्ठा, समाश्वासः, सम्प्रसादं, *see* CONFIDENCE, RELIANCE; 'breach of trust,' विश्वासभङ्गः, विश्वासघातः, प्रत्ययभङ्गः, प्रणयभङ्गः.—(Charge) न्यासः, निक्षेपः.—(Credit) कालिका, उद्धारः; 'to buy on trust,' उद्धारं कृ.

To TRUST, *v. a.* (Confide in) विश्वस् (c. 2. -श्वसिति -तुं), समाश्वस्, *see To* CONFIDE, *v. n.*—(Commit in confidence) समृ in caus., *see To* INTRUST.—(Sell on credit) उद्धारं दा.

To TRUST, *v. n.* (Be confident) प्रत्याशां कृ, दृढप्रत्याशां कृ, निश्चयं कृ, दृढप्रत्ययं कृ, आशां कृ, विश्वासं कृ, निःसन्देहः -हा -हं भू.—(Rely on) विश्वस्, *see To* RELY, CONFIDE, *v. n.*

TRUSTED, *p. p.* विश्वस्तः -स्ता -स्तं, विश्वसितः &c. *See* CONFIDED.

TRUSTEE, *s.* न्यासधारी *m.* (न्), निक्षेपधारी *m.*

TRUSTING, *part.* विश्वासी -सिनी &c., विश्वस्तः &c., *see* CONFIDING; 'trusting to the strength of one's own arm,' स्वबाहुबलमाश्रितः -ता -तं.

TRUSTWORTHINESS, *s.* विश्वास्यता, विश्वासार्हत्वं, आप्तता, विश्रब्धता.

TRUSTWORTHY, TRUSTY, *a.* विश्वासार्हः -र्हा -र्हं, विश्वासयोग्यः -ग्या -ग्यं, विश्वास्यः -स्या -स्यं, आप्तः -प्ता -प्तं, विश्वासपात्रं, विश्वासभूमिः *f.*, विश्रब्धः -ब्धा -ब्धं, विश्रम्भार्हः -र्हा -र्हं, श्रद्धार्हः &c., अहार्य्यः -र्य्या -र्य्यं, अभेद्यः &c.

TRUTH, *s.* सत्यं, तथ्यं, ऋतं, सम्यक्, अवितथं, तत्त्वं, तत्त्वार्थः, यथार्थवचनं, याथार्थ्यं, सत्त्वं, सत्ता, परमार्थः, पूतं.—(Trueness) सत्यता -त्वं, तथ्यता, यथार्थता, याथार्थ्यं, सम्यक्त्वं, वास्तवत्वं, याथातथ्यं; 'one who speaks the truth,' सत्यवादी *m.*, *see* VERACIOUS; 'speaking the truth,' *see* VERACITY; 'one who knows the truth,' तत्त्वविद्, सत्यविद्; 'investigation of truth,' मीमांसा; 'true state of the case,' सत्यवृत्तं, सत्यवृत्तान्तः.—(In truth) सत्यमेव, वस्तुतस्, *see* TRULY.

TRUTHFUL, TRUTHFULNESS. *See* TRUE, VERACIOUS, VERACITY.

To TRY, *v. a.* (Test) परीक्ष् (c. 1. -ईक्षते -क्षितुं), परीक्षां कृ, अनुभू, ज्ञा in des., *see To* TEST, PROVE, EXAMINE, INVESTIGATE.

To TRY, *v. n.* (Endeavour) यत् (c. 1. यतते -तितुं), प्रयत्, यत्नं कृ,

प्रयत्नं कृ, चेष्, व्यवसो, उद्यम्, यद्, उपक्रम्, उद्यमं कृ, उद्योगं कृ; 'they tried to kill me,' ते मां हन्तुम् उद्यताः or व्यवसिताः; 'he tries to drink the water,' जलं पातुं व्यवस्यति. Sometimes expressed by the desid. form; as, 'he tries to recollect,' सुस्मूर्षते.

TRYING, *part.* or *a.* परीक्षकः -का -कं, परीक्षाकारी -रिणी -रि (न्).

TUB, *s.* द्रोणी -णिः *f.*, द्रुणी -णिः *f.*; 'bathing tub,' स्नानद्रोणी -णिः *f.*

TUBE, *s.* नलिका, नालः -ली -लिः -ला -लं, नाडी -डिः *f.*, प्रणालः -ली -लिका, नलः, सुषिः *f.*, सुषिरं; 'glass tube,' काचनालः.

TUBER, *s.* (Bulbous root) कन्दः -न्दं.

TUBERCLE, *s.* सूक्ष्मव्रणः, सूक्ष्मगुल्मः, ग्रन्थिः *m.* *See* PIMPLE.

TUBEROUS, *a.* ग्रन्थिलः -ला -लं, कन्दी -न्दिनी &c. *See* KNOBBY.

TUBULAR, *a.* नलिकाकारः -रा -रं, नालाकृतिः -तिः -ति, नलिकाकृतिः &c.; 'vessel of the body,' नालः -ली, नाडिः -डी *f.*, तन्त्री, धमनी.

To TUCK, TUCK. *See To* FOLD, FOLD, COMPRESS, CRAM.

TUESDAY, *s.* मङ्गलवारः, भौमवारः, कुजवारः, भौमवासरः.

TUFT, *s.* शिखा, शिखरः -रं, चूडा, शेखरः, स्तवकः, पल्लवः, अवतंसः, *see* CLUMP, CLUSTER, BUNCH; 'of mangoes,' आम्रपल्लवः; 'of hair,' चूडा, केशपिण्डः, लोमपिण्डः, लोमगुच्छकः.

TUFTED, *a.* चूडावान् -वती -वत् (त्), चूडालः -ला -लं, शिखी -खिनी -खि (न्), शिखरी -रिणी &c., शेखरितः -ता -तं.

To TUG, *v. a.* कृष् (c. 1. कर्षति, क्रष्टुं), आकृष्, हृ. *See To* PULL.

TUITION, *s.* उपदेशः, शिक्षा, अध्यापनं, शैष्योपाध्यायिका.

To TUMBLE, *v. n.* पत् (c. 1. पतति -तितुं), *see To* FALL, ROLL, *v. n.*

To TUMBLE, *v. a.* *See To* RUMPLE, DISORDER, THROW DOWN.

TUMBLE, *s.* पातः, अवपातः, प्रपातः, पतनं. *See* FALL.

TUMBLER, *s.* (Mountebank) प्लवकः, कृशाश्वी *m.* (न्), कलायनः, केलकः, *see* DANCER.—(Glass vessel) काचपात्रं, कटसादकः.

TUMID, TUMEFACTION. *See* SWELLED, SWOLLEN, SWELLING.

TUMLOOK, *s.* (Country) तमालिका, तमोलिप्ती, तामलिप्तं -प्ती.

TUMOUR, *s.* स्फोटः -टकः, विस्फोटः, गुल्मः, शोफः, अर्बुदः *m.*, व्रणः -णं, अर्बुदः -दं, मांसवृद्धिः *f.*, ग्रन्थिः *m.*; 'on the tongue,' अधिजिह्वः; 'on the eye, &c.,' अधिमांसः -सकः; 'fatty tumour,' मेदोर्बुदं, मेदोग्रन्थिः *m.*

TUMULT, *s.* तुमुलं, कोलाहलः, पटहः. *See* RIOT, UPROAR.

TUMULTUOUS, *a.* अनवस्थितः -ता -तं, अव्यवस्थितः -ता -तं, अव्यवस्थः -स्था -स्थं, क्षुभः -भा -भं, तुमुली &c. *See* DISORDERLY.

TUN, *s.* (Large cask) वृहद्भाण्डं, वृहद्भाजनं.

TUNE, *s.* (Combination of notes) तानः, तालः, कलः, स्वरः, रागिणी, रागभेदः; 'time and tune,' तानमानं.—(Harmony of sound) तालैक्यं, स्वरैक्यं, *see* HARMONY; 'out of tune,' अपस्वरः -रा -रं, कुस्वरः &c., वैतालिकः -की -कं; 'in tune,' सुस्वरः &c., युक्तस्वरः &c., एकस्वरः &c., तुल्यस्वरः &c.

To TUNE, *v. a.* तानीकृ, युक्तस्वरीकृ, स्वरैक्यं कृ.

TUNEFUL, *a.* सुस्वरः -रा -रं. *See* HARMONIOUS, MELODIOUS.

TUNNEL, *s.* गूढमार्गः, गुप्तमार्गः, विवरमार्गः, अन्तर्भौममार्गः.

To TUNNEL, *v. a.* गूढमार्गं कृ, शुषिरीकृ, उत्खन् (c. 1. -खनति -नितुं).

TURBAN, *s.* उष्णीषः -षं, वेष्टकं, वेष्टनं, शिरोवेष्टनं, पट्टः.

TURBID, *a.* कलुषः -षा -षं, आविलः -ला -लं, अनच्छः -च्छा -च्छं, मलिनः &c., अमिमेलः &c., *see* MUDDY; 'becomes so,' कलुषायते.

TURBIDNESS, *s.* कलुषता, कालुष्यं, आविलत्वं. *See* MUDDINESS.

TURBULENCE, *s.* कलहकारित्वं, तुमुलकारित्वं, अव्यवस्थितत्वं, अनवस्थानं, क्षोभः. *See* DISORDER, DISTURBANCE.

TURBULENT, *a.* कलहकारी -रिणी -रि (न्), तुमुलकारी -रिणी &c., कलहकारः -री -रं, अव्यवस्थितः &c. *See* TUMULTUOUS.

TURF, *s.* तृणभूमिः *f.*, तृणभूमितलं, स्तरः. *See* SWARD.

TURGID, TURGIDITY. *See* SWELLED, SWOLLEN, SWELLING.

TURKESTÁN, *s.* (The country) तुरुष्कः, तुरुष्कदेशः.

TURMERIC, *s* हरिद्रा, काञ्चनी, पीता, गौरी, निशाह्वा, निशा, वरवर्णिनी, वर्णदाता *m.* (तृ), मङ्गलप्रदा, हेमरागिणी, वर्णेष्टा, वनेशा, कृमिघ्नी, लसा.

TURMOIL, *s.* सन्तापः, व्यग्रता, क्लेशः, तुमुलं in caus. *See* DISQUIET.

To TURN, *v. a.* (Cause to revolve) आवृत् (c. 10. -वर्त्तयति -तितुं), परिवृत्, विवृत्, वृत् &c., *see To* REVOLVE, *v. a.*, ROLL, *v. a.*—(Change) परिवृत् in caus.—(Bend) साचीकृ, *see To* BEND, *v. a.*—(Make acid) अम्लीकृ.—(Form on a lathe) भ्रमेण or चक्रयन्त्रेण निर्मा or यद् or रच्.—(Make giddy) भ्रम्, *see To* INFATUATE.—(In the mind), *see To* REVOLVE.—(Dissuade) निवृत् in caus.—(Turn away the face) मुखं परिवृत् in caus.—(Turn away, turn off) अपास्; 'to turn away an old servant,' मूलभृत्यम् अपास्, *see To* DISMISS, REJECT, AVERT.—(Turn back) परावृत् in caus.—(Turn down), *see To* FOLD.—(Turn off) *see To* DIVERT.—(Turn out) बहिष्कृ, *see To* OUST.—(Turn over) परिवृत् in caus., *see To* OVERTURN.—(Turn the back) पलाय्, पराङ्मुखः -खा -खं भू, विमुखः &c. भू.—(Turn the mind to) मनः कृ, मतिं कृ or प्रकृ.—(Turn to), *see To* RESORT. 'To turn' may often be expressed by कृ in comp.; as, 'to turn a thing black,' द्रव्यं कृष्णीकृ.

To TURN, *v. n.* (Move round) परिवृत् (c. 1. -वर्त्तते -वर्तितुं), विवृत्, विपरिवृत्, सम्परिवृत्, आवृत्, वृत्, *see To* REVOLVE, *v. n.*, ROLL, *v. n.*—(Change) परिवृत्, *see To* SHIFT, *v. n.*—(Become sour) अम्लीभू, अम्लभावं or अम्लतां गम् or इ.—(Depend on) अवलम्ब्, समालम्ब्.—(Turn against) प्रतिकूलीभू, विरुद्धः -द्धा -द्धं भू.—(Turn away) पराङ्मुखीभू, पराङ्मुखः -खा -खं भू, विमुखीभू, विमुखः -खा -खं भू.—(Turn back) परिवृत्, परावृत्, निवृत्.—(Turn out), *see To* PROVE, *v. n.*—(Turn round) परिवृत्.—(Turn up) प्रादुर्भू, आविर्भू, सम्भू, उत्पद्, उपस्था. 'To turn' may often be expressed by भू in comp.; as, 'to turn black,' कृष्णीभू; 'to turn to ashes,' भस्मसाद्भू.

TURN, TURNING, *s.* (Revolution) परिवर्त्तनं, आवर्त्तः -र्त्तनं, परिवर्तः, परिवृत्तिः *f.*—(Bend, winding) वङ्कः, वक्रता; 'of a river,' नदीवङ्कः.—(Change) परिवर्त्तनं, विकारः, आवृत्तिः *f.*—(Recurring season, alternation) पर्य्यायः, विपर्य्ययः, परिवृत्तिः *f.*, आवृत्तिः *f.*, वारः, वासरः; 'by turns, in turn,' पर्य्यायेण, क्रमेण, विपर्य्ययेण; 'to do by turns, take turns,' पर्य्यायेण कृ, विह्.—(Occasion) कालः, समयः, अवसरः, वारः.—(Form, cast) आकारः, आकृतिः *f.*, शीलः -लता, भावः, स्वभावः; 'of mind,' मनःस्वभावः, चित्तवृत्तिः *f.*—(Walk to and fro) विहारः, ईषद्विहारः, ईषत्परिक्रमः, इतस्ततः परिक्रमः.—(A good turn) उपकारः.—(An ill turn) अपकारः.

TURN-COAT, *s.* *See* RENEGADE, TIME-SERVER.

TURNED, *p. p.* (Made to go round) परिवर्त्तितः -ता -तं, आवर्त्तितः &c.—(Bent) साचीकृतः -ता -तं.—(Made acid) अम्लीकृतः -ता -तं.

अम्लीभूतः &c.; 'a sweet thing turned acid,' मधुरम् अम्लभावं गतं. —(Turned adrift) विसर्जितः -ता -तं.—(Turned away) अपास्तः -स्ता -स्तं, प्रतिषिद्धः -द्धा -द्धं, *see* DISMISSED, REJECTED; 'having the face turned away,' पराङ्मुखः -खी -खं, विमुखः &c., पराचीनः -ना -नं.—(Turned back) परावृत्तः -त्ता -त्तं, परिवृत्तः &c., निवृत्तः &c.—(Turned out) बहिष्कृतः -ता -तं, बहिःकृतः &c., निष्काशितः &c.; 'out of office,' च्युताधिकारः -रा -रं, हृताधिकारः &c.—(Turned loose) मोचितः -ता -तं.—(Having the eyes turned up) ऊर्ध्वलोचनः -ना -नं.—(Turned of ninety) दशनीयः -या -यं, दशनीकृतः -ता -तं.

TURNER, *s.* भ्रमाजीवी *m.* (न्), चक्रजीवी *m.*, चक्री *m.*, कुन्दी *m.*

TURNING, *s.* भ्रमणकारेण काष्ठद्रव्यघटनं or काष्ठद्रव्यरचनं -ना.

TURNIP, *s.* शिखामूलं, गृञ्जनं.

TURPENTINE, *s.* श्रीवासः, श्रीवासस् *n.*, श्रीरसः, वृक्षधूपः, यक्षधूपः, धूपाङ्गः, पायसः, सरलद्रवः, रसाङ्गः, घृताङ्गः, तिलपर्णीः, श्रीवेष्टः, श्रीपिष्टः, सर्जरसः, सालवेष्टः, दधि *n.*

TURPITUDE, *s.* दुष्टता, भावदुष्टता. *See* BASENESS, WICKEDNESS.

TURQUOISE, TURKOIS, *s.* वैदूर्यं, हरिताश्मा *m.* (न्), पेरोजं.

TURRET, *s.* प्रासादशृङ्गं, प्रासादशिखरं, गृहशिखरं, शिरोगृहं, षड्भिः *f.*, वलभी -भिः *m. f.*, लताः, लासकः.

TURTLE, *s.* कूर्मः, कच्छपः कमठः, कामठः. *See* TORTOISE.

TURTLE-DOVE, *s.* कलरवः कलध्वनिः *m.*, कपोतः. *See* PIGEON.

TUSK, *s.* दंष्ट्रा, रदः, रदनः दाडकः, दाढा, विषाणं, राक्षसी.

TUSKED, *p. p.* दंष्ट्री -ष्ट्रिणी -ष्ट्रि (न्), दन्ती &c., विषाणी &c.

TUTELARY, *a.* रक्षकः -का -कं, पालकः &c., रक्षणकारी -रिणी &c.; 'a tutelary deity,' लोकपालः -लकः, इष्टदेवता, अधिदेवता.

TUTENAG, *s.* (Metal) तुत्थं, तुत्थकं, तुत्थाञ्जनं.

TUTOR, *s.* उपाध्यायः, गुरुः, वीसवः, वीसचिवः, *see* PRECEPTOR.

TUTORSHIP, *s.* उपाध्यायत्वं, अध्यापकता, आचार्यत्वं, उपदेशकत्वं.

To TWADDLE, TWADDLING, &c. *See To* PRATE, PRATING, &c.

TWANG, *s.* (Of a bow, &c.) विस्फारः, विष्फारः, स्फारः, ज्याघोषः, ज्याक्षिप्तिः, टङ्कारः, टः.—(Sharp sound) झनत्कारः, क्वणितं.

